Puranas. Varāhapurāṇa

82-9150 60

Atha śrīmadvārāhamahāpurāṇam prārabhyate

॥ अथ श्रीमद्वाराहमहापुराणं प्रारभ्यते ॥

इस पुस्तकका रजिस्टरी सब हक़ सन १८६७ के आक्ट २५ के बमूजब यन्त्रालयाधिकारीने स्वाधीन रक्खा है।

1923

प्रस्तावना ।

अयि आर्याः प्रज्ञावन्तः सन्तः । मेधाविनः संभावयितुमर्हा मदीयसमर्थनाम् । नाविदितप्रायमेतद्युष्माभिः यज्जगद्धितं चिन्तयतः श्रीमन्नारायणस्यांशतः प्रकटितेन व्यासमुनिना विनिर्मितानि तच्छिष्यप्रशिष्यैश्च भुवि स्थापितान्यस्मिञ्जगति जाग्रति सकलनिगमागमवेत्तृभिः संमाननीयानि मनुष्याणामैहिकामुष्मिकश्रेयःसंपादनकृतार्थानि कलिप्रभावविमर्दितेतनमोमिलिन्दानां मनुजानां सन्मार्गप्रवर्तनपटूनि ब्राह्मराक्षाद्यष्टादशपुराणानीति । येषु च मनुजोद्धाराय जगदुत्पत्तिस्थितिलयमहालयनानाविधेश्वरावतारप्राकट्यप्रकिमार्गप्रदर्शनभूगोलखगोलवर्णनादयोऽनेके विषयाः संवलिताः सकलजीवानां सद्योमुक्तिमार्गप्रदर्शने तीक्ष्णयुतुल्यतामवलम्बन्ते । तथैवेदं द्वादशं वराहं नाम महापुराणमप्यष्टादशसु संमिलितं नयनपथातिथितामुपयाति । विलसति यत्र च जगदुत्पत्तिस्थितिप्रलयविविधधर्मयमनियमकर्मनियमकर्मदोषप्रायश्चित्तश्राद्धकरणभूवलपरश्तसमग्रतीर्थगणनातन्माहात्म्यभूगोलज्ञानपापपुण्यवर्णनद्वारा संयमिनीस्थजीवयातनाप्रभृतयः सहस्रशो विषयाः संगृहीताः सान्ति । यद्ध्ययनपठनश्रवणादितश्च धैर्यवन्तो भवन्ति जन्तवः कुसङ्गकुरमत्सारिदुर्जननक्रतिमिंगिलादिदुस्तीर्णऽसारसंसार वारांनिधौ निमग्नाः सुरन्निवत्सपदं तं विधायेति निरीक्ष्यैतादृङ्महापुण्यवतां श्रेयस्करमद्याविधि कुत्रापि संशुद्धिपूर्वकमुद्रितं पुराणं लोकोपकारबुद्ध्या स्थानिः स्वकीये " श्रीवेङ्कटेश्वर " (स्टीम्) मुद्रणयंत्रालये महता व्ययेन परिश्रमेण च पुष्टाचिक्कणपत्रेषु सौंदर्यविलसद्भिर्लोहाक्षरैर्मुद्रयित्वा विदुषामन्दानन्दप्रदं वाराहं नाम द्वादशं पुराणं प्रकाश्यमनायि तारतम्यपस्य जिज्ञासुभिः सद्विद्वज्जनैरवश्यमेव संग्रहणीयामित्यर्थयामोनवरतं समस्तविद्वज्जनान् । किमिति बहुना विस्तरेण । अयते चेदं पुराणमपूर्णमिवास्तीति । यदि केषामपि विदुषां निकटे इतोऽप्यधिकोंशश्चेदुपलभ्येत तर्हि कृपया स प्रेषणीयः । तमपि मुद्रयित्वा सहैवानेन प्रकटीकरिष्यामः ।

इति समस्तसज्जनकृपाकांक्षी–खेपराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयाध्यक्षः–मुंबई.

अथ श्रीवराहपुराणस्थविषयानुक्रमणिकाऽऽरम्भः ।

अध्या०	प०	विषयाः ।	श्लोकांकाः	अध्या०	प०	विषयाः	श्लोकांकाः
१	१	मङ्गलाचरणम्. अनुक्रमणिकाध्यायः, वराहं प्रति धरणीकृताः प्रश्नाः, हसतः क्रोडरूपिणो हरेरुदरे रुद्रसिद्धमहर्ष्यादिदर्शनम्	.... २८	५	६	कर्मजन्यमोक्षादिकथनम्, मोक्षप्राप्तिनिमित्तं राज्ञः संशयं छेत्तुं रैभ्यवसुश्रुहृपतिसंवादानन्तरं विमलकथकसंवादकथनम्, कपिलोपदेशतोऽश्वशिरोराजर्षेर्वनगमनम्, तेन कृता यज्ञनारायणस्तुतिः, राज्ञा मुक्तिः	.... ५८
२	१	सृष्टिस्थितियुगादिमाहात्म्यम्, पुराणलक्षणम्, तत्रादौ सर्गः संक्षेपेण, अथ सृष्टिं विस्तरेण वदेति महीप्रश्नः, सात्त्विकसृष्टिः, तमोमोदमहामोहतामिस्रान्धतामिस्राख्यपञ्चपर्वाऽविद्योत्पत्तिः, पञ्चादितिर्यक्त्वोत्तरसर्गः, देवावृर्ध्वस्रोतःसर्गः, मनुष्याद्यश्चैकलोतःसर्गः, पुनः षट् सर्गनामानि, अथ स्थितिः, तत्रादौ रुद्रसनकादिमरीच्याद्युत्पत्तिः, दक्षकन्याभ्यो देवदानवगन्धर्वारिगपक्षिणामुत्पत्तिः, रुद्रसर्गः, एकादशरुद्रसप्तद्वयः, युगमाहात्म्यम्, स्वायंभुवान्तमन्वन्तरप्रियव्रतसप्तर्षि नारदागमनम्, नारदावलोकिताश्चर्यनिरूपणम्, तत्र कन्यारूपसावित्रीदर्शनम्, नारदाय सावित्रीकृतं वेदादीनां दानम्	.... ८३	५	७	पुनर्योगमाया शेषाङ्कशायिनारायणरूपदर्शनम्, नारायणस्य सर्वव्यापित्वकथनम्.	.... ४२
३	३	प्रियव्रतनारदसंवादः, नारदप्रागजन्मवृत्तान्तः, ब्रह्मपारस्तवकथनम्, नारायणदर्शनम्, नारदवरप्राप्तिः	.... २८	५	८	धर्मव्याधचरितम्, मातृश्राद्धाय व्याधस्य पुत्रीप्रदानम्, मातांगृहागतेन तेन गोधूमलीह्यादिभक्षणे कोटिशो जीवघातोत्पत्तिनिरूपणम्, तप्श्चर्तुं व्याधस्य पुरुषोत्तमाख्यतीर्थगमनम्, व्याधकृतं विष्णुस्तोत्रम्, व्याधस्य वरप्राप्तिर्ब्रह्मणि लयश्च.	.... ५६
४	४	नारायणव्यापकत्वम्, नारायणस्याष्टमूर्तयः, प्रियव्रतमोक्षः, अश्वशिरश्चरितम्, अश्वमेधावभृथे ब्राह्मणैः परिवारितस्य तस्य कपिलजैगीषव्यक्षमागमः, नारायणदर्शनाभिलाषिणो राज्ञः संदेहवारणाय कपिलजैगीषव्याभ्यां विष्णुगरुडरूपधारणम्,		५	९	मत्स्यावतरः, भूराद्युत्पत्तिः, तेजसश्चन्द्रसूर्यकल्पना, चातुर्वर्ण्-	
				५	१०		

अध्या० प०	विषयाः।	श्लोकांकाः
	सर्ज्जनम्, नानाविधसुरद्या भूरादिलोकपूरणम्, व्यतीतायां ३ रात्रौ मत्स्यरूपेण जले प्रविष्टस्य विष्णोर्जलद्रुता स्तुतिः, कूटस्थविकृतस्य-भगवतो मूर्ध्नो लयवृद्धिनिरूपणम् ३५	
१० ११	अथ सृष्टिः, सुप्रतीकादात्रेयपक्षादतो दुर्जयसुद्युम्नयोरुत्पत्तिः, दुर्जये राज्यधुरं न्यस्य सुप्रतीकस्य चित्रकूटगमनम्, दुर्जयेन भारतादि-वर्षाणां स्वायत्तीकरणम्, दुर्जयस्य देवराजं जेतुद्यमः, तत्प्रहरादि-वर्णनम्य दुर्जयं हन्तुमिन्द्रस्य मेरुसुहृदं पूर्वदेशागमनम्, सुरादीज्ञित्वा प्रतिनिवृत्त्य पथि समागच्छतस्तस्य हेतुप्रश्नोः सुकेशीमिश्रकेश्याख्य-कन्याभ्यां परिणयनम्, ताभ्यां प्रभवसुतदर्शनोत्पत्तिः, अरण्ये पर्य-टतस्तस्य गौरमुखाश्रमागमनम्, ... ८४	
११ १३	पुनर्दैत्यचरित्रम्. गौरमुखकृतविष्णुस्तवेन साक्षात्साक्षायणदर्शनम्, भगवद्दत्तमणिप्रभावतो विविधैश्वर्यवर्णनम्, अक्षौहिणीबलयुतस्यातिधी-भूतस्य तस्य राज्ञःपरितोषणम्, मणिमाच्छेत्तुं कृतोद्यमस्य राज्ञः मणि-समुत्पन्नैश्वर्याधैः सह सुमहान्संगरः,चिन्तापरिप्लुतस्य गौरमुखस्य पुरतः प्रादुर्भूतस्य हरेः प्रार्थनया चक्रेण सकलसैन्यादिहननम्, अतःपरमिद क्षेत्रं नैमिषारण्यसंज्ञितं भविष्यतीत्यादिकं कथयित्वा हरेरन्तर्धानम् ११२	
१२	१५	ततश्चित्रकूटं समागतदुर्जयकृतश्रीरामस्तवनतस्तस्य मुक्तिः २१
१३	१६	श्राद्धकल्पः, भगवत्कृतमहदाश्रयं निरीक्ष्य तमेवारिराधयिषोर्गौरमु-खस्य मुनेः प्रभासनामसोमतीर्थगमनम्, तत्रागतमार्कण्डेयं प्रति गौर-

अध्या० प०	विषयाः।	श्लोकांकाः
	मुखकृतः पितृगणनादिप्रश्नः, मार्कण्डेयानिरुक्तः पैतृकः स्वर्गः, श्राद्ध-कालाः, श्राद्धैः पितृगणतृप्तिप्रदःकालः, रहस्यापरश्राद्धकालः, नाना-विधतीर्थेषु श्राद्धम्, पितृगीतम्, ...५१	
१४	१७	श्राद्धेनिमन्त्रणयोग्यायोग्यब्राह्मणादिनिरूपणम्, निमन्त्रणादिकम्, ब्राह्मणसंख्यादिकम्, भोजनायोपवेशनादिकथनम्, श्राद्धप्रकारः तत्राभ्यागतातिथिपूजननिरूपणः, होमविधिः, भोजनप्रकारः, अभिश्र-वणम्, विकिरान्नदानादि, पिण्डदानादिकम्. श्राद्धान्ते वैश्वदेवादि. ५३
१५	१९	गौरमुखस्य दशावतारस्तोत्रेण मोक्षः, गौरमुखस्य. पूर्वजन्मशतं निशाम्य पितृनिष्टु पश्चात्तेन कृतं दशावतारस्तोत्रम्, गौरमुखमोक्षः २३
१६	१९	सरमोपाख्यानम्, दुर्वासोवृक्षा शप्तस्येन्द्रस्य वाराणस्यां निश्वसनम्, दुर्जये मृतं श्रुत्वा तुरंगमानीय देवान्प्रति विश्वस्रुविद्युद्गमनम्, बृहस्पत्युपदेशेन देवानां गोमेधयज्ञारम्भः, शुक्रोपदेशातोऽसुरेश्वर-न्तीनां गवां हरणम्, मरुद्भयो दैत्येरपहृता गाः श्रुत्वा सरमातुयाथेने-न्द्रेण दैत्यानां पराजयं कृत्वा गवामानयनम्, बदुपरीः संवर्धितेनेन्द्रेण दैत्यवधसूहननम्. सरमाख्यानश्रवणादिफलम्. ४०
१७	२०	अथ महातपउपाख्यानम्, श्रुतकीर्त्यारिमजप्रजापालस्य मृगयां, चरतो महातपआश्रममनम्, मुनिप्रति तेन मोक्षसंबंधिप्रश्नकरणम्, अधुम-हमिकया विवदमानेषु देवेषु जनार्दनप्रभाववर्णनद्वारामोक्षमार्गोपदेशः ७९
१८	२२	अथाग्न्याद्युत्पत्तिवर्णनम्, पञ्चमहाभूतोत्पत्तिः, वैश्वानराद्युत्पत्तिः २६

१९ २३ अथाग्निप्राशास्त्यम्, पावकाय प्रतिपत्तिर्विदानम्, तस्यां होमादिना पितृतृप्तिः, तस्याश्चुपोषणफलम्, एतच्चश्रवणफलम्. १०

२० २३ अथाश्विनोरुत्पत्तिः, मरीचिवंशसमुत्पन्नमार्तण्डाय स्वप्ना दत्तं कन्यादानम्, तस्य तेजोऽसह्यमानतयाऽश्वरूपिण्यां तस्यामश्विनोरुत्पत्तिः, मार्तण्डेनोपदिष्टयोरश्विनोस्तपश्चरणम्, ताभ्यामीरितं ब्रह्मपारमयस्तोत्रपठेन प्रजापतेर्वरप्राप्तिः, ताभ्यां द्वितीयातिथिदानम्, अस्याश्चुपोषणफलम्, श्रवणफलञ्च. ३७

२१ २४ गौर्युत्पत्तिः, प्रजाः क्षुद्रसमसर्वस्य रुद्रस्य जले निमज्जनम्, दक्षात्सवास्वमरणाश्चुत्पत्तिः,दक्षयज्ञारम्भः, तत्र ऋषिदेवादीनां नानाविधकर्मणि कल्पना, रुद्रस्य जलाद्बहिर्निर्गमनम्, अन्यकृतसुद्यादिवर्णनं निरीक्ष्य कोपान्नरद्वो रुद्रस्य श्रौत्रिभ्यो भूतप्रेतादीनाश्चुत्पत्तिः, कुपितस्य रुद्रस्य तेः सार्द्धं दक्षयज्ञं प्रति गमनम्, तत्र महासंग्रामवर्णनम्, तत्र भगादीनां नानावयवकृन्तनम्, तत्रागतेन विष्णुना सह प्रवृत्तं युद्धम्, तत्र हरिहरनियोजितनारायणपाशुपताख्योः प्रवृत्तं व्योम्नि युद्धम्, अन्योन्यातिशयसमेतौ तौ दृष्ट्वा तत्रागतेन परमेष्ठिना हरिहरयुद्धप्रशमनम्, तत्र रुद्रभागकल्पना, देवैःकृता रुद्रस्तुतिः,ततस्तुष्टरुद्रेण समग्रदेवानामवयवसमीकरणम् , रुद्रायं दाक्षायणीदानम्, सर्वदेवानां स्वस्वस्थानगमनम्. ९०

२२ २६ गौरीविवाहः, हिमवद्गृहेऽवतरितुं तत्रैव तपश्चरंस्तायाः सत्यां हिमवद्गृहेऽवतरणम्, ततोपि रुद्रं पतिमभिलषंस्तायास्तस्यां तपसाऽऽराधितहरस्य वृद्धब्राह्मणवेषेणागमनम्, स्नातुंगतस्य रुद्रस्य झषावुद्धरंस्तायास्तस्याः स्वरूपदर्शनपुरःसरं पाणिग्रहणम्, पित्रे हिमवते तदुवृत्तान्तनिवेदनम्, पित्रा समानिताभ्यस्तस्या विवाहोत्सवारम्भः। तत्र नारदादीनामागमनम्, उमायाः पाणिग्रहणम्, तृतीयायां संवृतस्त्रैनास्य तत्रक्षणनिवेशः, उपोषणफलम्, श्रवणफलञ्च. ५४

२३ २७ अथ गणपत्युत्पत्तिः, देवानां कैलासप्रत्यागमनम्, परमेष्ठिनो हास्यतः कमारोत्पत्तिः, मोहयन्तं तं दृष्ट्वा गजवक्त्रो भवेतिशापदानम्, मस्तकं धुन्वानस्य तस्य देहादिनाथ कानां प्रादुर्भावः, तेषां नामकरणम्,तक्त्रवसुद्भवस्य गजवक्त्रस्य नामकरणम्, सर्वमस्वादिषु तस्य सर्वोत्कर्षत्वम्, देवैःकृता गणनायकस्तुतिः, एतत्सर्वं चतुर्थ्यां संवृत्तमितस्मात्तस्यां तिलभक्षणपुरःसरं गणनाथ काराधनावश्यकत्वम् एतच्छ्रवणादिफलम्. ३८

२४ २८ अथ सर्पोत्पत्तिः, कश्यपस्य कद्रूमार्यामनन्तवासुक्यादिजननम्, तेषां वंशप्रपंचश्च वृद्धिर्गमिस्तैर्मनुजादीनांविनाशः, ब्रह्मणः शरणं गतानां सांत्वनम्, सरीसृपेभ्यो ब्रह्मणा दत्तः शापः, शापानुग्रहश्च, पञ्चम्यामस्याश्चुपोषणादिभिः सत्फलावाप्तिः ३३

२५ २९ अथ कार्त्तिकेयोत्पत्तिः, देवदैत्ययुद्धे वर्तमाने हिरण्यकशिपुप्रभृतिसैन्यान्प्रेतुमशक्यान्वीक्ष्य कमपि बलीयांसं सेनापतिं विधातुमीगिरसीपदेशतः परमेष्ठिपुरोगमानां देवानां कैलासं प्रति गमनम्, दैवैर्वेहिता रुद्रस्तुतिः, शक्तिं क्षोभयतस्तस्य कुमारोत्पत्तिः सेनापतिकरणञ्च, अस्याश्चुपोष्य पुत्रफलादिप्राप्तिः ६२

अध्या० प०	विषयाः ।	श्लोकाङ्काः।
२६	३० अथादित्योत्पत्तिः, सूर्यस्य नानाविधनामहेतवः, तस्यैवान्तःस्थितानां देवानां स्तुतिः । सप्तम्यां सूर्येण मूर्तिरङ्गीकृतातस्तस्यामुपोषणादिभिः शमकथनावाप्तिः	१८
२७	३१ अथाष्टमात्रुत्पत्तिः, अन्यकारपरित्रस्तब्रह्मा देवेभ्यो दिव्यमतिगमनम्, समस्तदेवानां सत्कृतिः शंसुकुता, तावदेव तत्रान्धकागमनम्, देवदैत्यानां तुमुलं युद्धम्, नारदमुखात्प्रवर्तमानं युद्धं श्रुत्वा तत्र नारायणागमनं दानवैः सह युद्धश्च. शंगरे संक्रुद्धस्य शंभोर्मुखज्वालाविनिर्गमेन दैत्योत्पत्तिः, अष्टमात्रगणना, तया शोणिते रक्तेऽद्धुरक्तमूनाशः एतच्छ्रवणफलम्.	४३
२८	३२ अथ दुर्गोत्पत्तिः, इन्द्रवधाय सिन्धुश्रीपराज्ञस्तपश्चरणम्, मानुषं रूपमास्थाय तत्रागतया वेत्रवत्या सह संगमेन वेत्रासुरोत्पत्तिः, तेन कृतो ब्रह्मादिदेवतानां पराजयः, तद्वननोपायं चिन्तयतो ब्रह्मणो देवीप्रादुर्भावः, युद्धवन्त्या देव्या वेत्रासुरहननं, देवानां स्तुतिश्च, देव्या ब्रह्मण आदेशाद्विमालरूपगमनम्, कर्तव्यकार्यं प्रत्यादेशो ब्रह्मणः, नवमीव्रतनिरूपणम्, तत्कर्तुः फलञ्च.	४९
२९	३३ अथ द्विजोत्पत्तिः, प्रजाधारणकारणं चिन्तयतो ब्रह्मणः श्रोत्रेभ्यो दशकन्याजननम्, तासाञ्च स्वयंजनितेभ्यो दशलोकपालेभ्यो दानं दशमीतिथिदानञ्च, दशमीव्रतोपवासादिफलश्रुतिः	१६
३०	३३ अथ धनदोत्पत्तिः, सृष्टिकामस्य ब्रह्मणो मुखाद्वायुनिर्गमनम्, शर्करावर्षितया प्रतिषेधितस्य तस्यानिलस्य मूर्तिमत्कथनम्, तस्माच्चतुर्दशीतिथिदानम्, तद्व्रतप्रकारस्तत्कृतिफलञ्च	८
३१	३३ अथ विष्णूत्पत्तिः, सृष्टायां सृष्टौ कर्णकण्डूमिच्छोर्नारायणस्य देहतो विष्णूत्पत्तिः, तन्नामकरणं प्रजापालनं प्रत्यादेशश्च, नानायुधप्रदानम्, द्वादशीव्रतनिरूपणम्, तत्फलञ्च	२३
३२	३४ अथ धर्मोत्पत्तिः, प्रजापालनं चिन्तयतो ब्रह्मणो दक्षिणांगाद्रूपं कृतिधर्मोत्पत्तिः तस्य कृताद्दियुगेषु ब्राह्मणादिवर्णेषु च भिन्नभिन्नतया स्थितिः, तारं जिवृत्सु सोमेन धर्मेहलनम्, सोमदोषेण कोपितानां देवासुराणां युद्धम्, ब्रह्मण आदेशाद्धर्मतो घर्षम्, अतः परं त्रयोदशीतिथिदानं धर्मार्थं, तद्व्रतोपोषणादिफलम्	३६
३३	३५ अथ रुद्रोत्पत्तिः, सृष्टवतो ब्रह्मणः कुपितस्य ब्रह्मणो रुद्रोत्पत्तिः, ततः पिशाचाद्युत्पत्तिवर्णनम्, कुपितस्य रुद्रस्य स्तुतिपूरःसरं यज्ञेषु रुद्रभागकल्पनम्, तस्मै चतुर्दशीतिथिदानम्, श्रवणफलञ्च	३५
३४	३५ पितॄणां स्थितिवर्णनम्, योगगतस्य परमेष्ठिनो देहात्पितृगणोत्पत्तिस्तेषां नामस्थानानि, तेषां वृत्तिकल्पना, अमावास्यायां श्राद्धफलम्	९
३५	३६ अथ सोमोत्पत्तिस्थितिरहस्यम्, स्वकन्याभिररममाणस्य चन्द्रमसः दक्षदत्तशापने क्षयः लोकक्षितिर्थं करुणार्द्रयमन्यान्सोमोत्पत्तिः, पैर्णमास्युपोषणफलम्.	१५
३६	३६ प्राचीनेतिहासवर्णनम्, प्राङ्मनिजानां कृतादिषूत्पत्तिवर्णनम्, ततस्तत्से प्रवृत्तेन प्रजापालनशक्तता गोविन्दस्तुतिः, तस्य ब्रह्मणि लयः	२३

अध्या०	पृ०	विषयाः	श्लोकांकाः
३७	३७	अथ प्राचीनेतिहासवर्णनम्. भगवद्भक्तव्रतानि, देविकातटे तपश्चरत आत्मोपहूतनैवेल्लजिघृक्षयाऽऽगतस्य व्याधस्यप्रकृतेजसा प्रधर्षणम्, ब्राह्मणं प्रार्थयमानस्य व्याधस्य तत्र स्थितिः, तत्रागतस्य बुभुक्षितस्य कार्यांचिद्बाह्मणस्य नाशानपूर्वकं व्याधकृता ब्राह्मणरक्षा, नभोनारायणवेति भंत्रं निशम्य व्याधस्य मुक्तिः, व्याधस्य प्राग्जन्मनि ज्ञापादिस्थानम्, व्याधान्मोचितब्राह्मणकृतो व्याधस्य मोक्षमार्गोपदेशः....	४७
३८	३८	तस्य व्याधस्य वाताहारतया तपश्चरतस्तत्र दुर्वास आगमनम्, भोजनं वाचमानाय तस्मै नमस्तलात्पतिताम्रवाक्षद्वानम्, पुनश्च व्याधकृतस्तुत्या हृष्टाया देविकायास्तत्रागमनम्,तस्मै जलदनञ्च, तत्कृतातिथ्येन तुष्टस्य दुर्वाससस्तस्मै वेदादिप्रदानरूपवरस्तद्प्रकारकरणंच.	३९
३९	३९	अथ मत्स्यद्वादशीव्रतम्, सत्यतपोदुर्वाससंवादः, अवश्यभेदतःशरीरस्य त्रयोभेदाः, ब्राह्मणादिषु चतुर्भेदं कर्मकाण्डप्रदर्शनमारभ्य द्वादशीप्रभृतिव्रताचारानियमाः, चतुःकुम्भादिदानम्, व्रतपूर्तौ ब्राह्मणभोजनादिकम्, . व्रतस्यास्याचरणेन महाफलश्रुतिः, अस्य श्रवणफलम्	८०
४०	४०	कूर्मद्वादशीव्रतम्, पौषशुक्लद्वादशी कूर्मद्वादशी, तत्र कूर्मरूपिहरेः पूजनम्, ब्राह्मणाय भोजनदक्षिणादिकम्, तद्व्रताचरणफलं च	११
४१	४१	वराहद्वादशीव्रतम्, माघशुक्लद्वादशीवराहद्वादशी, तत्र नारायणपूजनपुरःसरं द्विजातीनां पूजनं सदक्षिणभोजनंच. तस्याः फलश्रुतौ वीरधन्वाख्यानम्, पित्रादेशेन प्रायश्चित्तं चिकीर्षतो मृगरूपधराणां ब्राह्मणानां वधः, देवरातशरणंगतस्य वीरधन्वन उपदिष्टव्रताचरणेन ब्रह्महत्यानिवारणम्	४८
४२	४२	अथ नृसिंहद्वादशीव्रतम्, फाल्गुनशुक्लद्वादशी नृसिंहद्वादशी, तस्यां स्वशक्त्या नृसिंहहरेः पूजनम्, ब्राह्मणेभ्यो दानादिकम्, शत्रुभिर्हृतराज्यस्य वत्सनाम्नो नृपस्य वसिष्ठोपदृशतोऽस्या द्वादश्या व्रताचरणेन पुनरराज्यप्राप्तिः	१६
४३	४२	अथ वामनद्वादशीव्रतम्, वामनस्य पूजाप्रकारः, ब्राह्मणेभ्यो दानादिकम्, व्रताचरणफलञ्च.	१७
४४	४३	अथ जामदग्यद्वादशीव्रतम्, वैशाखशुक्लद्वादशी जामदग्यद्वादशी, तत्फलश्रुतौ वीरकेतोःपख्यानम्, पुत्रविप्लवेषा तपश्चरतस्तत्रागतयाज्ञवल्क्ययोपदिष्टजामदग्यद्वादशीव्रताचरणेन नष्टाख्यपुत्रावाप्तिः, यस्याद्यापि श्रीर्भुवि श्रूयते.	२१
४५	४३	अथ श्रीरामद्वादशीव्रतम्, ज्येष्ठशुक्लद्वादशी रामद्वादशी, दशरथस्यैतद्व्रताचरणेन श्रीरामादिपुत्रचतुष्टयप्राप्तिः	११
४६	४३	श्रीकृष्णद्वादशीव्रतम्, पूजाविधिक्रमः, अस्य व्रतस्याचरणेन वसुदेवस्य श्रीकृष्णाख्यपुत्रफलप्राप्तिः	१५
४७	४४	बुद्धद्वादशीव्रतम्, श्रावणशुक्लद्वादशी बुद्धद्वादशी, अत्र जनार्दनपूजाविधिः, अस्य फलश्रुतौ नृगाख्यानम्, मृगयासक्तचित्तो भ्रममाणइतस्ततो नृगो राजा तपोरधन्यास्सुमं हन्तुमुद्यतानां लुब्धानां नृपदेहनिर्गतयादेव्या हननम्, ततो विस्मयाविष्टस्य नृगस्य	

अध्या० प०	विषयाः ।	श्लोकांकाः
	नामदेवमुखात्स्वप्राग्जन्मकृतं बुद्धद्वादशीव्रताचरणफलमिति ज्ञानम्, अन्यत्फलञ्च.	२४
४८	४४ अथ कल्किद्वादशीव्रतम्, माद्रपदशुक्लद्वादशी कल्किद्वादशी, कल्किपूजनं ब्राह्मणेभ्यो दानादिकञ्च, हतराज्यो विशाखाख्यपूर्वे वदरिकाश्रमे तपश्चरंस्तत्रागताभ्यां नरनारायणाभ्यां द्रविणादिवृद्धिरूपं वरं लेभे तस्मै ताभ्यामुपदिष्टं कल्किद्वादशीव्रतञ्च, अस्याचरणेन परलोके च सुखप्राप्तिः	२४
४९	४५ अथ पद्मनाभद्वादशीव्रतम्, आश्विनशुक्लद्वादशी पद्मनाभद्वादशी, तस्यां पद्मनाभपूजनम्, भद्राश्वगृहागतेनागस्त्येन [राज्ञे]सुखावलोकनतश्चतुर्थदिवसपर्यंतं पृथक्पृथगुच्चारणेन तस्य प्राग्जन्मकृतं पद्मनाभद्वादशीफलकथनम्, अगस्त्यगमनञ्च.	४७
५०	४६ अथ धरणीव्रतम्, कार्तिक्यामब्जनाभपूजनविधानम्, तत्फलम्.	३१
५१	४६ अथागस्त्यगीतारम्भः, दुर्वाससोवचःश्रवणानन्तरं सत्यतपसो हिमवद्वनम्, पुनर्भद्राश्वगृहागतेनागस्त्येनेरितं पशुपालनृपाय्दिश्य परोक्षज्ञानद्वारा मोक्षधर्मनिरूपणम्.	३०
५२	४७ मोक्षधर्मनिरूपणम्.	११
५३	४७ मोक्षधर्मनिरूपणे पशुपालोपाख्यानम्.	३६
५४	४८ अथोत्तमगुणप्राप्तिव्रतम्, नारदेनाऽरोग्यद्वादशीमुपदिश्योद्धर्तुमात्मकं वसन्तशुक्लद्वादश्यां विष्णुपूजनविधानम्.	२०
५५	४९ अथ शुभव्रतम्, मार्गशीर्षमास्याचरणीयं शुभव्रतम्,तत्र हरेः पूजनम्, ब्राह्मणेभ्यो रौप्यमक्षीदानादिकम्, एतद्व्रताचरणेन ब्रह्मवादि-	

अध्या० प०	विषयाः ।	श्लोकांकाः
	नृपाय प्रत्यक्षतां गतेन विष्णुना दत्तं पुत्रप्राप्तिरूपवरं प्राप्य पुनस्तत्पसे युक्तेन राज्ञा कृता स्तुतिः, तत्कृतस्तवतोषितहरेः कौडजरूपेणागमनम्,नृपाय मोक्षधर्मादिरूपवरप्रदानं, तत्तीर्थस्य कुब्जकाम्रनामकरणञ्च.	६१
५६	५० अथ धन्यव्रतम्, मार्गशीर्षसितप्रतिपदि करणीयम्, तत्र विष्णवग्रे पूजनम् तत्फलञ्च	१६
५७	५० कार्तिकसितद्वितीयायामाम्र्यं कान्तिव्रतं संवत्सरावधि करणीयम्, तत्र केशवपूजनपुरःसरं तत्तादिनियमाः, तत्र होमः, ब्रह्मणेभ्योदानादिकम् तत्फलम्	१८
५८	५१ फाल्गुनशुक्लतृतीयायां करणीयं सौभाग्यव्रतम्, लक्ष्मीनारायणोमामहेश्वरपूजनम्. व्रते मल्यपदार्थाः तत्फलञ्च.	१९
५९	५१ चातुर्मास्याचरणीयं फाल्गुनशुक्लचतुर्थी विघ्नहरं नाम व्रतम्, व्रतान्ते ब्राह्मणभोजनादिकम्, अस्य फलञ्च	१०
६०	५१ कार्तिकशुक्लपक्षम्यां शान्तिव्रतम् वर्षेमेकमाचरणीयमिति, अनन्तज्ञायिहरेः पूजनम्, संवत्सरान्ते ब्राह्मणभोजनादिकम्, तत्फलम्, ...	८
६१	५२ पौषसितपञ्चम्यां कामव्रतम्, वेनानीरूपविष्णुपूजनम्,व्रतान्ते ब्राह्मणभोजनादिकम्, तत्फलञ्च.	१२
६२	५२ अथापरमारोग्यव्रतम्,तत्रादित्यरूपविष्णोः पूजनम्, मानससरन्नामासाध्यानरण्यनृपस्य तज्जे पद्म ऋक्षीतुभिच्छोः कुष्ठित्वप्राप्तिः, तत्रागतेन वसिष्ठेन व्रतोपदेशतस्तन्निवारणम्.	३४

अध्या०	प०	विषयाः ।	श्लोकांकाः
६३	५३	भाद्रपदकृष्णाष्टम्यां करणीयं पुत्रप्राप्तिव्रतम्, तत्फलं च	.... १२
६४	५३	आश्वयुजे मासि शुद्धनवम्यां शौर्यव्रतम्, तत्र दुर्गादेवीपूजनं तत्फलं च.	.... ६
६५	५३	कार्तिकशुक्लद्वादश्यां सार्वभौमव्रतम्, तत्र दिक्प्राप्त्यैना, तत्फलञ्च	.... १५
६६	५३	नारदपुराणाथैपाञ्चरात्रम्, श्वेतद्वीपगतस्य नारदस्य नारायणदर्शनं हरिणोपदिष्टं पाञ्चरात्रमाहात्म्यम्.	.... २०
६७	५४	अथ विष्णवाश्रयैम.	.... ९
६८	५४	अथ श्रौतिहासवर्णनम्, चतुर्युगेषु परमेश्वरस्वरूपम्, अगस्त्यगम्यादिवर्णनम्, अन्यसंकरे विप्राणां शुद्धत्वादिकम्	.... २०
६९	५५	अथ नारायणाश्रयैवर्णनम्, परितोतः इलावृतोपवृण्डे सरस्तीरे तपश्चरतः कस्यचिदाश्रमपदं प्राप्तस्यागस्त्यस्य मुनिहुंकारमात्रेण निर्गतामिः कन्याभिरातिथ्यम्, मुनेर्डितीयहुंकृत्या कोटिशः कन्याकाकुलेहमद्रोण्यागमनम्, द्रोणौ प्रविष्टस्यागस्त्यस्य सप्तसमुद्रनगादिदर्शनञ्च.	.... १९
७०	५५	अथ कृतत्रेताद्वापरादिविषयाः, हरिं ऋषिभिराराधयतोगस्त्यस्य तत्र ब्रह्मादिदेवानामागमनम्, एतेषां को याज्य इति भान्तमगस्त्यं प्रति रुद्रेणोक्तं जिदेवानां भेदग्राहित्वम्, तत्रापि नारायणश्रेष्ठत्वम्, कृतादिषु नारायणोपासना, रुद्रेण नारायणदिक्षात्प्राप्तपाशुपताख्यानं करणम्	.... ४७
७१	५६	कलिप्रवेशविषयाः, अगस्त्यस्य रुद्रहृदये कमलासननारायणदर्शनम्, मोहनशास्त्रकरणहेतुः, तत्र शतशृंगे कमलासनप्राप्तवरे गौतमे निवसति कस्यचित्कालस्य द्वादशाब्दिकानावृष्ट्या क्षुत्क्षामाभिः प्रपालनम्, निवृत्तायां च तीर्थयात्रानिमित्तं गन्तुकामैर्वेधैर्मार्याममय्या गोः प्रेषणेन गौतमोपरि गोहत्यानिमित्तमिथ्याभिशापः गोहत्यात्रस्तेन गौतमेन गंगानयनसत्क्रियाकरणम्, तत्र सप्तर्षीणामागमनम् ब्राह्मणानां छलं विज्ञाय तेभ्यः कलौ पाखण्डित्वप्रापिनिमित्तशापदानम्, तां नदीं गोदावरीं विदुस्तत्र गोदानमाहात्म्यम्, ततः कलियुगसमुत्पन्नानां ब्राह्मणानां श्रेयसे शिवेन निबन्धसंग्रहिताकरणम्.	.... ६७
७२	५८	अथ प्रकृतिपुरुषनिर्णयः, त्रयाणां देवानां यजनादिकम्, ...	.... १६
७३	५८	अथ वैराजसृष्टम्, प्रजाः स्रष्टुं ब्रह्मणादिष्टः शिवो जले निमज्जन्भगुष्ठमात्रपरिमितपुरुष दर्शादित्यान् ददर्शोर्ति तं प्रति शंभुकृता स्तुतिः, ततस्तवेन विष्णुना शंभवे वरप्रदानम्	.... ५३
७४	५९	अथ भुवनकोषवर्णनम्, स्वायंभुवमनोः प्रियव्रतोत्तानपादौ पुत्रौ, तयोर्मध्ये प्रियव्रतपुत्रचरित्रवर्णनम्, तत्पुत्रेभ्यः सप्तद्वीपदानम्, तेषामपि पुत्रसंख्या, नामेः सर्गकथनम.	.... १२
७५	६०	अथ जम्बूद्वीपमेरुनिरूपणम्, जम्बूद्वीपयोजनपरिमाणम्, तत्रस्थितानां पर्वतानां वर्णनम्, तत्रस्थानामन्येषां पर्वतानां परिमाणञ्च, जंबुद्वीपस्थानां खण्डानां वर्णनम्, तेषां परिमाणं च, मेरुपर्वतपरिमाणम्, मेरोः पूर्वादिप्रदेशस्थाः पर्वताः, मेरोरुपर्यधस्ता-	

अध्या०	प०	विषयाः ।	श्लोकांकाः
		न्मानम्, मेरोः पार्श्वतः स्थितानां देशाः, तत्र मनोवती नाम ब्रह्मसभा, तत्परिमाणं च, तत्र देवादीनां स्थितिः	८२
७६	६२	अथाष्टदिक्पालपुर्यः, तत्रामरावत्यैश्वर्यादिवर्णनम्, सैन्धर्यादिक्पाल-पुरीनामानि.	१६
७७	६२	अथ मेरुवर्णनम्, चत्वारो मर्यादापर्वताः, तत्रमन्दराचलप्राङ्मुखक-दम्बवृक्षवर्णनम्, तद्भूतयः, गन्धमादनपर्वतस्यक्रमुपादपवर्णनम्, तत्र कर्दमसुनेरा-श्रमपदञ्च, तथैव ताम्राभस्य शैलस्य पतंगस्य चांतेरे महत्सरस्तस्य च मध्ये महाशिलाः, तस्य चोपरि महारुण्या तत्र विद्याधरपुरम्, तत्र पुलोमनामविद्याधरनिवासस्थानम्, तेषां परिमा-णंच, तथा विशाखाचलेन्द्रस्य श्वेतस्य चान्तेर सरस्तस्य पूर्वतीरे महद्वाम्रवनम्, तत्र देवादीनां निवासः सुमूलाचलेन्द्रस्य वसुधारस्य चान्तरे विल्वस्थली, वसुधारस्तन्धारोमध्ये किंशुकवनम्, तत्र प्रति-मासमादित्यावतरणम्, पञ्चकूटस्य कैलासस्य चान्तरे स्वर्गप्रोपान-मिव सुमण्डलम्, तद्विस्तारायतपरिमाणम्, सुपार्श्वशिखिशैक्रयो-र्मध्ये सौमशिलातलम्, तस्यमध्ये त्रिंशद्योजनविस्तीर्णं वह्निस्था-नम्, शैक्रवरयोः कुमुदाञ्जनयोरन्तरे शतयोजनविस्तीर्णा मातुलु-गस्थली, शैलयोः पिञ्जरगैरयोरन्तरे नारायणायतनम्, शुक्रपाण्डु-रयोरन्तरे त्रिंशद्योजनविस्तीर्णे एकशिलोद्देशः, तत्फलरसंसंभूत जा-म्बूनदसुवर्णवर्णनम्, विपुलशृंगसंभूतात्कल्पादपवर्णनम्, सुपा-र्श्वशृंगस्थन्यग्रोधपादपवर्णनम् तत्परिमाणंच....	३३

अध्या०	प०	विषयाः ।	श्लोकांकाः
७८	६३	मन्दरादिपर्वतचतुष्टयवर्णनम्, चतुर्णु गिरिषु अरुणोदादिसरांसि, तेषां पूर्वादिदिक्षु स्थितिः, अरुणोदस्य प्राच्यां शैलाः, मानसस्य दक्षिण-स्थितानां पर्वतानां वर्णनम्, असितोदस्य पाश्चात्याः पर्वताः, महा-भद्रस्योत्तरतः पर्वतानां कथनम्.	२४
७९	६४	अथ मेरोर्द्रोणीनां निरूपणम्, तत्र श्रीमेरोर्विस्तरवर्णनम्, तद्विस्त-रायतप्रमाणम्, तद्वृक्षशोभावर्णनम्, तत्र सुन्यादीनामाश्रमाः, सुरवा-नदीतीरे तालवनपरिमाणादिकम्	२८
८०	६४	अथ मेरोर्द्रोण्यादिवर्णनम्, शिशिरपत्रक्रयोमध्ये शुक्रभूमिरुदुम्बरंनाम वनञ्च, तत्परिमाणम्, तत्र निष्कम्पा दीर्घिका, तस्या मध्ये न्यग्रो-धवृक्षोपरि चन्द्रशेखरवर्णनम्, सहस्रशिखरस्य कुमुदस्यान्तरे पञ्चा-शद्योजनायामं विंशद्योजनविस्तृतमिक्षुक्षेपोच्चशिखरम्, तत्रेन्द्राश्रमः, शंखकूटकपमयोर्मध्ये पुरुषस्थली, कपिञ्जलनागशैलयोरन्तरे द्राक्षादि-वृक्षमण्डिता स्थली तत्प्रमाणञ्च, पुष्करसहमेघयोरन्तरेपाणितलप्रख्या-स्थली, तत्प्रमाणञ्च.	१०
८१	६५	अथ तेषुतेषु देवानामवकाशा वर्ण्यन्ते, सीताख्ये गिरौ महेन्द्रक्रीडा-स्थानम्, तत्र पारिजातवनञ्च, कुञ्जरे गिरौ दानवानां पुराणि, वज्रके पर्वते राक्षसानां पुराणि, महाशैले शैले किन्नराणां पञ्चदशस-हस्राणि पुराणि, वेणुमतिपर्वते विद्याधरपुरत्रिकम, कुञ्जरे गिरौ पशुपतिनिवासस्थानम्, वसुधारेपि वृषभध्वजस्थानम्, वसुधार-रत्नधारयोर्मुनि वसुसप्तर्षीणां पुराणि, एकशृंगे गिरौ परमेष्ठिनः स्थानम्, गजपर्वते भगवतीस्थानम्, प्रमेदकस्य पश्चिमे	

अध्या०	प०	विषयाः ।	श्लोकांकाः
		वले देवदानवसिद्धादिपुराणि, तत्र स्थितायां महाशिलायां प्रतिपर्वणि सोमस्यावतरणम्, त्रिकूटे ब्रह्मणः स्थानम्, शृङ्गारूपपर्वते पूर्वादिक्क्रमेण नारायणादिदेवतानां निलयाः, जातुच्छमहापर्वते त्रिंशद्योजनमण्डलं नवजलं नाम सरः, उपर्युक्तानामष्टपर्वतानां वर्णाः पृथ्व्यास्थितिः ८
८२	६६	अथ नवव्यवताराः, इन्द्रगजेन क्षोभिताया आकाशगाभिन्याः सरितो मेरोरुपरि पतनम्, मेरुकूटतटेभ्यः प्रस्खलिताया षड्भिस्सहस्रयोजनाभिरालंबं पतमानायाश्चातुर्विध्यम्, तासां चतसृणां पृथक्पृथक्सप्तभेदेषु प्रवृत्तिः, तत्तद्देशानां जीवनभूता नद्यः ४
८३	६६	अथ नैषधस्यकुलाचलजनपदनदीवर्णनम्, सप्त कुलपर्वताः, तन्निवासिनां जनपदानां नामानि, तेषां पानीयमहानदीनां नामानि. ३
८४	६६	मेरोर्दक्षिणोत्तरवर्षवर्णनम्, मेरोर्दक्षिणे श्वेतस्योत्तरेण च रम्यकेनाम वर्षम्, तत्रस्थन्यग्रोधफलभक्षिणानामुद्भिवर्णनम्. श्वेतस्योत्तरे त्रिशृङ्गस्य च दक्षिणे हिरण्मयनाम वर्षम्, तत्रस्थानां वृक्षाणां समृद्धिवर्णनम्, तत्रदेशस्था वृक्षाः, उत्तरशृंगादक्षिणसमुद्रान्तमुत्तरकुरुक्षेत्रम् तस्मात्मरणाद्यैश्वर्यजनका वृक्षाः, तत्रस्थानां पुरुषाणां पुरमायुः, चन्द्रकान्तसूर्यकान्तनगयोर्मध्ये चन्द्रावर्ता नाम नदी, सूर्यद्वीपे सूर्यावर्ता नाम नदी, तत्राकैस्थानम्, तमुल्लंघ्य भद्राकारं नाम खण्डम्, तत्र वायोरधिष्ठानम् १२
८५	६७	अथ भारते नवखण्डवर्णनम्, नवभेदं भारतम्, तत्र सप्तकुलपर्वताः क्षुद्रपर्वताश्च, हिमवत्पादविनिर्गता नद्यः, पारियात्रोद्भवा नद्यः, ऋक्षप्रसूतानद्यः, विन्ध्यपादोद्भवाः सरितः, मलयजा नद्यः, शुक्तिमत्रभवा नद्यः, जम्बुद्वीपप्रमाणम्. ६
८६	६७	अथ शाकद्वीपनिरूपणम्, तत्प्रमाणम्, तत्रत्यानां स्थितिश्च, सप्तकुलपर्वतास्तदुपनामानि, तत्रत्याः सप्तमहानद्यः. ३
८७	६८	अथ कुशद्वीपवर्णनम्, तत्रश्रीरोदःसमुद्रः द्वीपपरिमाणम्, एतेषां द्विजातिवर्णभेदः, तत्र द्विजातिम्न्यो नद्यः ४
८८	६८	अथ क्रौंचद्वीपवर्णनम्, तन्नामनम्, तत्र सप्तप्रधानपर्वताः, तत्र वर्षाणि, तत्रापि सप्तनद्यः, तस्य परितः समुद्रः. ६
८९	६८	अथ शाल्मलीद्वीपवर्णनम्, तन्नामनम्, सप्तपर्वतास्तावत्यो नद्यस्तत्समुद्रश्च, अथ षड्गोमेदकथनम्, तत्र ह्रौ प्रधानपर्वतौ तत्समुद्रः, पुष्करार्ध्ये खण्डे मानसपर्वतः, प्रतिकल्पमेतेषां मण्डलानां स्थितिः. ७
९०	६८	अन्धकासुरवधाकांक्षया ब्रह्मविष्ण्वोः कैलासागमनम्, तत्रैकीभूतानां त्रिदेवानामेकीभूतया दृष्टया त्रिवर्णदेव्युत्पत्तिः, तस्यै वरप्रदानम्, तत्रिमूर्तिदेव्याजगदुत्पत्त्यादिकथनम्, तासां श्वेतादिपर्वतगमनम्, ब्रह्मसृष्टिवर्द्धनञ्च. ४७
९१	६९	अथ सरस्वतीवर्णनादिकम्, सरस्वतीं प्रति ब्रह्मणा कृता स्तुतिः. १६
९२	७०	वैष्णवीमाहात्म्यम्, मन्दरावचे तपश्चरन्त्या देव्या कुमारीणामुत्पत्तिः, तत्र पुरुनिर्मोमम्, कन्यानामानि, देव्यन्तिकमागत्य महिषासुरस्य देवीरूपं कथयित्वा नारदागमनम् ३६
९३	७०	मंत्रिमहिषासुरसंवादः, महिषस्य मन्त्रिभिः साकं देव्यानयनावैचारः,

अध्या०	प०	विषयाः ।	श्लोकांकाः
		देवीं प्रतिदूतप्रेषणम्, योद्धृ दैत्यचमूप्रयाणम्	३६
१४	७१	अथ सुरासुरक्षुब्धर्णवनम्, अहीरैः सुरसैन्येषु मग्नेषु विदुतानां तेषां ब्रह्मलोकगमनम्	४७
१५	७२	अथ महिषासुरवधः, आगतेन दूतेन कथिता महिषाद्भुरोत्पत्तिः, परिचारिक्या परिघातस्य दूतस्य गमनम्, देव्या युद्धे प्रयाणम्, तामिः कन्याभिर्दैतसैन्यस्य महिषस्य देवीं प्रति धावमानस्य दशसहस्रवर्षं पर्यन्तं देव्या सह युद्धम्, देवैः स्तुतया देव्या महिषासुरहननम्.	७२
१६	७३	त्रिशक्तिरहस्ये रौद्रीव्रतम्, रुरुदैत्येन पराजितैर्देवैः स्तुतया रौद्र्या देव्या तद्धननम्, अन्यासाञ्च तासां सर्वासां तत्रागतेन रुद्रेण भक्ष्यकल्पनम्, रुद्रकृता स्तुतिः, त्रिशक्तिसर्गश्रवणफलम्.	७६
१७	७५	अथ रुद्रमाहात्म्यम्, ब्रह्मणोकपालाख्यद्रुपितेन रुद्रेण ब्रह्मशिरःकृन्तनम्, करस्थकपालनिवृत्तये सर्वतीर्थेषु पर्यटन्वारणसीमागत्य गंगायां स्नातस्य रुद्रस्य हस्तात्कपालनिवृत्तिः, तत्रागतेन ब्रह्मणा कपालमोचनीति तत्तीर्थनामकरणम्, रुद्रस्य कैलासगमनम्	४८
१८	७६	अथ पर्षाध्यायः, कुठारेण दर्भानुद्धरतः सत्यतपसोगुल्याश्छिन्नायां निःसृतं भस्मावलोक्य केनापि किञ्चरेण विज्ञापितयोरिन्द्रविष्णोरस्मै वरप्रदानम्, सत्यतपोरुणिमुक्तिः	३९
१९	७७	अथ तिलधेनुदानमाहात्म्यम्, कार्तिकशुक्लद्वादश्यां गुरुपूजितहरिदर्शनम्, संवत्सरान्ते गुरुप्रसादनम्, एकादश्यामुपोष्य	

अध्या०	प०	विषयाः	श्लोकांकाः
		वालयं गत्वेन्द्रादिदेवैरुपूजनम्, ब्राह्मणभोजनादि होमादिकं च, तत्र वसिष्ठश्वेतसंवादरूपेतिहासः, विनाऽन्नं पीडिताय श्वेताय विनीताश्वोपाख्यानकथनम्, अन्नदानमहिमा, तिलधेनुदानविधिः, अस्यश्रवणफलम्.	१००
१००	७९	जलधेनुदानविधिः, तद्दानफलम्	२१
१०१	८०	अथ रसधेनुदानमाहात्म्यम्, तद्दानविधानं फलञ्च.	१५
१०२	८०	गुडधेनुदानमाहात्म्यम्, तद्विधानं दानफलं श्रवणफलञ्च.	२५
१०३	८१	शर्कराधेनुदानमाहात्म्यम्, तद्विधानं तद्दानफलञ्च.	१९
१०४	८१	अथ मधुधेनुदानमाहात्म्यम्, तद्विधानं, तत्फलञ्च.	२१
१०५	८२	अथ क्षीरधेनुदानवीधिः, तत्फलम्.	१९
१०६	८२	अथ दधिधेनुदानमाहात्म्यम्, तद्विधानम्, फलञ्च.	९
१०७	८२	अथ नवनीतधेनुदानमाहात्म्यम्, तद्विधानं तद्दानफलं दर्शनफलञ्च.	१५
१०८	८३	अथ लवणधेनुदानम्, तद्विधानं फलञ्च	१७
१०९	८३	कार्पासधेनुदानमाहात्म्यम् तद्विधानं फलञ्च.	१०
११०	८३	अथ धान्यधेनुदानमाहात्म्यम्, तद्विधानं फलञ्च.	२२
१११	८४	कपिलाधेनुदानमाहात्म्यम्, तद्विधानं फलञ्च, कपिलालक्षणानि.	१९
११२	८४	अथोभयतोमुखीगोदानं हेमकुम्भदानम्, पुराणप्रशंसा, कपिलामाहात्म्यम्, दुग्धदकपिलादाननिषेधः, प्रतिग्रहकर्तुर्द्विजस्य वर्जनम्, तेनसह व्यापारिणां प्रायश्चित्तम्, कपिलायाः पृथिवीस्वनिरूपणम्,	

अध्या०	प०	विषयाः	श्लोकांकाः
		कपिलादानविधिः, तत्फलञ्च, वह्निहोमोपदिष्टस्य श्वेतस्य मुक्तिः, पुराणानां गणना, अस्य श्रवणफलञ्च ८१	
११३	८६	भगवत्स्तुतिः, कल्पान्ते रसातलगतयं धरण्या कृता माधवस्तुतिः, अवणफलञ्च. ६८	
११४	८७	अथ श्रावराहावतारः, वराहरूपिणं देवं स्तुवन्तीमहीकृता योगसांख्यविनिश्चयात्मकाः प्रश्नाः. ६९	
११५	८९	अथ विविधधर्मोत्पत्तिः, प्रतिद्वादशि वराहपूजनम्, ब्राह्मणस्य भगवत्कर्मनियमः, क्षत्रियाणां भगवत्कर्मनियमः, भगवत्कर्मस्थानां वैश्यानां कर्म, शूद्रस्य कर्मणि, योगप्राप्तिहेतुः ९३	
११६	९०	अथ सुखदुःखनिरूपणम्, दुःखरूपाणि कर्माणि सुखरूपाणि कर्माणि. ४६	
११७	९१	अथ द्वात्रिंशदपराधाः, आहारानाहारादिद्वात्रिंशपदपराधाः, अन्यद्व्रतम्, कर्मणाश्रुत्तमं कर्म. ९१	
११८	९२	अथ वैष्णवाराधविधिस्तत्कृतफलञ्च. ९८	
११९	९४	अथ भोज्यनियमविधिः, प्रापञ्चद्रव्यकर्मण्यभोज्यनियमविधिः २०	
१२०	९४	अथ त्रिसंध्यामंत्रोपस्थानम्. २३	
१२१	९५	अथ जन्मभावः, भगवत्परायणानां पुरुषाणां लक्षणानि, प्रसन्नानां पुरुषाणां धर्मः, अगर्भमापकधर्मः, ... २१	
१२२	९५	अथ कोकामुखमाहात्म्यम्, शकाधिपतुपस्य प्राग्जन्मवृत्तान्तम्, चिछीगरुत्मयोः परासिद्धिस्तत्क्षेत्रकृतदानादिफलम्. १२२	
१२३	९८	अथ सुमनोगंधादिमाहात्म्यम्, कार्तिकशुद्धद्वादश्यां प्रबोधिनी कर्म,	

अध्या०	प०	विषयाः	श्लोकांकाः
		शैशिरं कर्म, द्वादशीमाहात्म्यम्, हरये गन्धपत्रमपर्णम् ४२	
१२४	९९	अथ ऋतूपकरम्, फाल्गुनशुक्लद्वादश्यां हरेः पूजनम्, तद्व्रताचरणफलम्, भगवतोपदिष्टमृतुकर्म, तच्छ्रवणादिफलञ्च. ९९	
१२५	१००	अथ मायाचक्रम्, वसुधया प्रार्थितेन वराहरूपिहरिणा तस्यै मायायाः सर्वत्र व्यापित्वकथनम्, सोमशर्मणे द्विजाय प्रदर्शितं मायास्वानम्, एतच्छ्रवणफलम्. १८९	
१२६	१०५	अथ कुब्जाम्रकमाहात्म्यम्, कुब्जाम्रके तपश्चरतो रैभ्यस्य तपसा परितुष्टेन भगवतान्यतीर्थानां माहात्म्यकथनम्, कुब्जाम्रके स्थितस्य कुमुदाकारतीर्थस्य माहात्म्यम्, तत्रस्थमानसतीर्थमहिमा, मायातीर्थमाहात्म्यम्, सवीरमकतीर्थमाहात्म्यम्, पूर्णमुखतीर्थमाहात्म्यम्,करवीरपुण्डरीकाख्यतीर्थफलम्, अग्नितीर्थमाहात्म्यम्, वायुतीर्थशुक्रतीर्थमाः सप्तसामुद्रकं तीर्थम्, मानससरोनामतीर्थम्, कुब्जाम्रके वृत्तं व्याळीनकुलाख्यानम्, एतत्पठनफलम्, ... २३४	
१२७	११०	अथ ब्राह्मणदीक्षासूत्रवर्णनम्, दीक्षितानां वर्ज्यावर्ज्यकर्माणि, दीक्षाग्रहणप्रकारः. ७५	
१२८	१११	अथ कङ्कतालूनदर्शनम्, क्षत्रियदीक्षाप्रकारः, वैश्यदीक्षाप्रकारः, शूद्रदीक्षाप्रकारः, चतुर्णां वर्णानां छत्रम्, दीक्षितानां कर्तव्यता, स्नानोपकल्पनान्तेषु कर्तव्यता ९२	
१२९	११३	संध्यादिप्रकारः, विष्णुपूजनादिकञ्च, तान्त्रोत्पत्तिस्तन्त्रमाहात्म्यञ्च, ... ६०	
१३०	११९	राजान्नभोगे प्रायश्चित्तम्. २४	
१३१	११६	अथ दन्तकाष्ठचर्वणप्रायश्चित्तम् ११	

अध्या० प०	विषयाः ।	श्लोकाङ्काः
१३२	११६ अथ मृतकस्पर्शायाश्चित्तम्, मैथुनं कृत्वा शवस्पर्शादोषः, तदोषनिवारणप्रायश्चित्तम्, शवस्पर्शदोषः, रजस्वलां स्पृष्ट्वा भगवत्स्पर्शनतः पापम्, तत्प्रायश्चित्तम्. ३९
१३३	११७ अथ पूजासामग्रिकयुद्वस्पुरीषोत्सर्गयोः प्रायश्चित्तम्. १३
१३४	११७ अथ पूजादिसामग्रिकान्यपरार्धेषु प्रायश्चित्तम्,मौनत्यागप्रायश्चित्तम्, नीलवस्त्रं धृत्वा भगवत्पूजनादौप्रायश्चित्तम्, विनाविधिं भगवत्स्पर्शने प्रायश्चित्तम्, आचारविधिः,क्रुद्धतया भगवद्वपसर्पणे दोषः प्रायश्चित्तञ्च.... ७२
१३५	११९ जालपादभक्षणापराधप्रायश्चित्तम्,रक्तवस्त्रं धृत्वा भगवद्वपसर्पणे दोषः प्रायश्चित्तम्,विनादीपेनान्धकारे भगवत्सेवादिनादोषः प्रायश्चित्तञ्च, कृष्णवस्त्रंधृत्वा विष्णुपूजने दोषः प्रायश्चित्तं च अधौतवस्त्रं धृत्वा,भगवत्स्पर्शकरणे दोषः प्रायश्चित्तञ्च, श्वानोच्छिष्टदाने दोषः, प्रायश्चित्तंच, वराहमांसं भुक्त्वा भगवत्सेवायां दोषः प्रायश्चित्तञ्च जालपादं भक्षयित्वा विष्णुपूजनादौ दोषः प्रायश्चित्तञ्च. ५९
१३६	१२० अथ आर्यश्चित्तकर्मसूत्रम्, दीपंस्पृष्ट्वा विष्णुकर्मणि दो० प्रा०स्नशानं गत्वाऽस्नात्वा विष्णुपूजने दो० प्रा०, विष्णुना श्यशानजुगुप्सनकारणम्, वराहमांसेन प्रापणे कृते दो० प्रा० मद्यंपीत्वा विष्णुपसर्पणे दो० प्रा० भगवद्भक्तः कौसुम्भं शाकं भक्षयेत्तदो० प्रा०नवान्नमदत्त्वा भोजने दो० प्रा०, गन्धमाल्यान्यदत्त्वा विष्णवे धूपदाने पद्मचाषुपानदी वहन्भगवत्कर्मपरायणे दो० प्रा० भेर्यादैशब्दमकृत्वा भगवत्प्र-

अध्या० पत्रांकः	विषयाः	श्लोकांकाः
	बोधने दो०प्रा० बहुतरमन्नं भुक्त्वाऽजीर्णेन परिष्लुतेऽस्नाते भगवत्कर्मणिप्रवृत्तौ दो०, अस्य पठनफलम्. १२७
१३७	१२३ अथ गृध्रजम्बुकास्थानम्, चक्रतीर्थागमनफलम्, सोमतीर्थमाहात्म्यम्, तत्रसोमाय विष्णुना वरप्रदानम्, शृगालीगृध्रयोस्तत्रक्षेत्रेमरणेन मानुषत्वप्राप्तिः, तदाख्यानम्. २६१
१३८	१२९ अथ खञ्जरीटोपाख्यानम्, सौकरवे मृतस्य खञ्जरीटस्य क्रीडाद्रिबालकैर्गंगामासि क्षेपणेन मानुषत्वप्राप्तिसंबंधाख्यानम्, तच्छ्रवणफलम्. १०३
१३९	१३१ सौकरवमाहात्म्यम्, गोमयमाहात्म्यम्, स्नानोपवेशने भूमे सलिलदानेफलम्, संमार्जनफलम्,गायनफलम्, क्षणकदृत्तम्, सत्यमाहात्म्यम्, एकगीतफलदानेन ब्रह्मरक्षसो देवाग्रे नृत्यमानस्य मुक्तिफलम्. १२१
१४०	१३३ कोकामुखमाहात्म्यम्, तत्र पर्वतात्पतितायां विष्णुधारायां स्नानात्फलम्, तत्र विष्णुपदं नाम स्थानम्, तत्र स्नानफलम्, विष्णुसरोनाम तीर्थमा० सोमतीर्थमा० तङ्ककूटेतिख्याततीर्थमा०, अम्रातीरेश्वरोनामतीर्थमा० ब्रह्मेश्वरः क्षेत्रमा०, धेनुपरतीर्थमा०, धर्मोद्भवतीर्थमा०, पापप्रमोचननामतीर्थमा०, यमव्यसनकं तीर्थम्, मातंगा तीर्थमा०, वज्रमवं नामतीर्थम्, शाकरुद्रेति विख्यातं तीर्थम्, विष्णुतीर्थम्, मत्स्यशिलानामतीर्थम्, एतत्पठनफलम्. १९८

१४१ १३६ अथ बदरिकाश्रममाहात्म्यम्, तत्रस्थं ब्रह्मकुण्डमितिख्यातं तीर्थम्, अग्नितत्यपदं नाम तीर्थम्, तत्र इन्द्रलोकमितिख्यातो विष्ण्वाश्रमः, पञ्चस्रोतस्तीर्थम्, चतुःस्रोतस्तीर्थम्, वेदधारं नाम तीर्थम्, द्वादशादित्यकण्डं नामतीर्थम्, लोकपालं नामतीर्थम्, मेरोर्वैरं नाम तीर्थम्, मानसोद्रेदं नामतीर्थम्, पञ्चशिरं नाम तीर्थम्, तच्चिह्नम्. सोमाभिषेकं नाम तीर्थम्, उर्वशीकुण्डं नाम तीर्थम्, अस्यश्रवणफलम्. ७०

१४२ १३७ अथ गुह्यकर्ममाहात्म्यम्, भगवति चित्तधारणत्वम्, ऋतुकाले गमननिषेधः, ऋतुकालानंतरं स्वयमिगमनम्, शयने स्त्रीदर्शननिषेधः, संभोगानन्तरं स्नानम्, अपूर्वे ऋतुकाले स्त्रीगमननिषेधः ऋतुस्नातायामनभिगमने दोषः, स्त्रीगमनदिवसः. संन्यासयोगः, एतच्छ्रवणफलम्. ६४

१४३ १३९ अथ मन्दरमाहिमनिरूपणम्, मन्दारतीर्थमाहात्म्यम्, तत्रप्रापणे नामगिरिः स्नानकुंडनाम तीर्थम्, मोदनं नामतीर्थम्, वैकुण्ठकारणं नाम तीर्थम्, सोमस्रोतोनामतीर्थम्, पूर्वेण गुह्यनामतीर्थम्, विंध्यादीनिःसृतं गुह्यं तीर्थम्, पश्चिमपार्श्वे देवसमन्वितं चक्रवर्तं नाम तीर्थम्, गुह्यो गभीरको नाम महाह्रदः; दक्षिणे चक्रम्, वामे गदा, एतच्छ्रवणफलम्. ७२

१४४ १४० अथ सोमेश्वरादिलिङ्गप्रतिष्ठाक्षेत्रत्रिवेण्यादिमाहात्म्यम्, शापनिवृत्तये तपश्चरते सोमाय ऋतुष्टेन हरेण वरदानम्, रोषाश्चस्तपसा तुष्टेन शंभुना तस्यै "लिंगरूपेण तव गर्भे स्थास्यामि" इति वरप्रदानम्, ततः

परं रेवाखण्डमिति ख्यातम्, गण्डकया तपसा स्तुत्या च संतुष्टेन हरिणा तस्यै "शालग्रामशिलारूपी तव गर्भगतो भविष्यामि" इति वरप्रदानम्, बाणगंगोत्पत्तिः, रावणतपोवनम्, नर्तनाचलोत्पत्तिः, मुक्तिक्षेत्रे गण्डकीसमुत्पत्तिः, तन्माहात्म्यम्, त्रिवेणीप्रकटनं, परस्परं शापप्रदानतोगजग्राहस्वभावयोर्जयविजययोस्तत्रमोक्षः हरिहरभेदं तीर्थम्, हंस तीर्थम्, यक्षतीर्थम्, ... १८४

१४५ १४४ शालग्रामक्षेत्रमाहात्म्यम्, तपस्यते सालंकायनाय वरदानम्, नन्दिकेश्वरोत्पत्तिः, तत्र च बिल्वप्रभं नाम क्षेत्रम्, चक्रस्थामितीर्थम्, विष्णुपदं नाम क्षेत्रम्, ह्रदस्रोतस्तीर्थम्, शंखप्रभं क्षेत्रम्, गदाकुण्डं क्षेत्रम् अग्निप्रभं नामक्षेत्रम्, सप्तर्षयुधं तीर्थम्, देवप्रभक्षेत्रम्, विद्याधरं नाम क्षेत्रम्, पुण्यनदी नाम तीर्थम्, गन्धर्वक्षेत्रम्, देवह्रदं क्षेत्रम्, देवनद्योः संभेदः, श्वेतगंगा, त्रिशूलगंगा, सिद्धाश्रमः, तन्माहात्म्यम्. १२४

१४६ १४६ अथ रुरुक्षेत्रस्थह्रदर्षीकेशमाहात्म्यम्. रुरुतीर्थप्राकट्यचेतिहासः, तपस्यतो देवदूतस्यपदच्युतिर्शंकमानेनेन्द्रेण तपःखण्डनम्, पुनर्निर्वेदमासस्यमृगयुतुङ्गेतपस्यतस्तस्याशितेनवरप्रदानम्, ततःपरंसम्भ्रेतितीर्थख्यातिः, म्लेच्छाप्सरसःकन्यकाप्रसूयस्वर्गगतासती रुरुभिर्मृगैः पोषितायाअतएवरुरुनाम्न्याःकन्यकायास्तपसातुष्टेनहरिणा "स्वब्राह्मा ख्यातं भविष्यतीक्षेत्रम्" इति वरमदानंतस्यै. ८७

अध्या०	प०	विषयाः	श्लोकांकाः
१६०	१६५	अथ मथुरापरिक्रमः । मथुरास्नानार्थप्रदेशोत्तरोत्तरंगमनक्रमः प्रदक्षिणाफलम्	८५
१६१	१६७	द्वादशनद्यात्रप्रभावः, तन्माहात्म्यञ्च	११
१६२	१६७	अथ चक्रतीर्थप्रभावः मथुराया उत्तरे चक्रतीर्थोत्तं ब्राह्मणवृत्तांतम्.	६८
१६३	१६८	अथ कपिलश्राद्धमाहात्म्यम्. मथुरास्थवैकुण्ठतीर्थेस्नानेन कस्यचिद्ब्राह्मणस्य ब्रह्महत्या निवारणम्, रावणेन वराहरूपिणो देवस्थानयनम्, रावणधानान्तरंगमेशयोध्यायामानयनम्, ततः लवणासुरवधानन्तरं शत्रुघ्नेन मथुरायाः स्थापनम्, तत्रस्नानाद्दिफलम्.	६१
१६४	१७०	अथाब्रकूटपरिक्रमप्रभावः, मथुरापश्चिमेभागेगोवर्द्धनं क्षेत्रम्. पूर्वेणेन्द्रम् दक्षिणेयमतीर्थम्, पश्चिमेवारुणम्, उत्तरेणकौवेरम्, अब्रकूटमदक्षिणम्, प्रदक्षिणाविधानम्, पुण्डरीकतीर्थमहिमा, आप्सरसंकुण्डम्, सङ्कर्षणतीर्थम्, कदम्बखण्डकुण्डम्, अरिष्टतीर्थम्, राधाकुण्डम्, मोक्षराजाख्यतीर्थम्, इन्द्रध्वजंतीर्थम्, अब्रकूटपरिक्रमफलम्.	४६
१६५	१७१	ब्राह्मणमाहात्म्यम्, कूपमभावः, मथुरायाप्रेतमुक्तिः....	६८
१६६	१७२	असिकुण्डप्रभावः, असिकुण्डोत्पत्तिः.	३०
१६७	१७३	विश्रान्तिमाहात्म्यम्, राक्षसमुक्तिः, ...	३०
१६८	१७४	मथुरायां महादेवस्यक्षेत्रपालरूपनिरूपणम्, महावेतदर्शनेनमथुरायां प्रवेशात्फलप्राप्तिः.	११
१६९	१७४	गरुडवृत्तान्तम्.	४२
१७०	१७५	वसुकर्णवैश्यस्यापुत्रस्य कस्यचिन्मुनेरुपदेशतः सस्त्रीकस्यव्रतं गोकर्णनाममहादेवस्य चरतः गोकर्णनामपुत्रप्राप्तिः पुत्राकांक्षयामथुरायां निवसन्धनसंक्षये सति वणिं येनोपार्जितं द्रव्यं गृहीत्वा प्रतिनिवृत्तस्य मार्गे कंचिच्छेडं दृष्ट्वा तत्रे पिष्टाद्गतस्यतस्यकन्दरे कस्यचिच्छुकस्य समागमे तेनोक्तंस्वस्यप्राक्तनवृत्तम्, गोकर्णशंकरसंवादः.	९६
१७१	१७७	शुकपञ्जरं गृहीत्वागोकर्णस्य मथुरागमनम्, धनसंक्षये शुकेनसह धनसञ्चयाय नाविसमारुह्यगच्छतो महावातविह्वलस्य सतो गोकर्णस्य शुकेनकुतीर्थे द्वीपांतरासंनाथैनयाऽऽनीतेन जटायुषः पठिोपरिसमारुह्यद्वीपान्तरगमनम्. ततः स्वदेशंगन्तुमशक्तेन गोकर्णेन स्वपित्रोरग्रे शुकमेषणम्, मथुरामागस्य गोकर्णवृत्तनिवेदनं तत्पिवृभ्याम्.	६२
१७२	१७९	तद्वीपस्यदेवीनांवशादतो गोकर्णस्य मथुरागमनम्.	६१
१७३	१८०	तत्र महान्ति कार्याणि कृत्वा गोकर्णस्य मोक्षः	१४
१७४	१८१	महानामब्राह्मणाख्यानम्, नानातीर्थेषुपर्यटतोब्राह्मणस्यप्रेतशंवादः, प्रेतानामाहारः, प्रेतयोन्यागमनकारणम्, प्रेतत्वप्राप्तिहेतुः, धर्मविरुद्धकारिणांश्रुतिप्रामाण्यकरणम्, मथुरायां सङ्कर्षणमानदेवपूजाप्रकारः, प्रेतानांमुक्तिः, एतत्पठनफलम्.	९८
१७५	१८३	कुण्णगंगाकालञ्जरमाहात्म्यम्, वसुब्राह्मणाख्यानम्.	२८

अध्या०	प०	विषयाः	श्लोकांकाः
१६०	१६५	अथ मथुरापरिक्रमः । मथुरास्नानार्थप्रदेशोत्तरोत्तरंगमनक्रमः प्रदक्षिणाफलम्	८५
१६१	१६७	द्वादशनद्यात्रप्रभावः, तन्माहात्म्यञ्च	११
१६२	१६७	अथ चक्रतीर्थप्रभावः मथुराया उत्तरे चक्रतीर्थोत्तं ब्राह्मणवृत्तांतम्.	६८
१६३	१६८	अथ कपिलश्राद्धमाहात्म्यम्. मथुरास्थवैकुण्ठतीर्थेस्नानेन कस्यचिद्ब्राह्मणस्य ब्रह्महत्या निवारणम्, रावणेन वराहरूपिणो देवस्थानयनम्, रावणधानान्तरंगमेशयोध्यायामानयनम्, ततः लवणासुरवधानन्तरं शत्रुघ्नेन मथुरायाः स्थापनम्, तत्रस्नानाद्दिफलम्.	६१
१६४	१७०	अथाब्रकूटपरिक्रमप्रभावः, मथुरापश्चिमेभागेगोवर्द्धनं क्षेत्रम्. पूर्वेणेन्द्रम् दक्षिणेयमतीर्थम्, पश्चिमेवारुणम्, उत्तरेणकौवेरम्, अब्रकूटमदक्षिणम्, प्रदक्षिणाविधानम्, पुण्डरीकतीर्थमहिमा, आप्सरसंकुण्डम्, सङ्कर्षणतीर्थम्, कदम्बखण्डकुण्डम्, अरिष्टतीर्थम्, राधाकुण्डम्, मोक्षराजाख्यतीर्थम्, इन्द्रध्वजंतीर्थम्, अब्रकूटपरिक्रमफलम्.	४६
१६५	१७१	ब्राह्मणमाहात्म्यम्, कूपमभावः, मथुरायाप्रेतमुक्तिः....	६८
१६६	१७२	असिकुण्डप्रभावः, असिकुण्डोत्पत्तिः.	३०
१६७	१७३	विश्रान्तिमाहात्म्यम्, राक्षसमुक्तिः, ...	३०
१६८	१७४	मथुरायां महादेवस्यक्षेत्रपालरूपनिरूपणम्, महावेतदर्शनेनमथुरायां प्रवेशात्फलप्राप्तिः.	११
१६९	१७४	गरुडवृत्तान्तम्.	४२
१७०	१७५	वसुकर्णवैश्यस्यापुत्रस्य कस्यचिन्मुनेरुपदेशतः सस्त्रीकस्यव्रतं गोकर्णनाममहादेवस्य चरतः गोकर्णनामपुत्रप्राप्तिः पुत्राकांक्षयामथुरायां निवसन्धनसंक्षये सति वणिं येनोपार्जितं द्रव्यं गृहीत्वा प्रतिनिवृत्तस्य मार्गे कंचिच्छेडं दृष्ट्वा तत्रे पिष्टाद्गतस्यतस्यकन्दरे कस्यचिच्छुकस्य समागमे तेनोक्तंस्वस्यप्राक्तनवृत्तम्, गोकर्णशंकरसंवादः.	९६
१७१	१७७	शुकपञ्जरं गृहीत्वागोकर्णस्य मथुरागमनम्, धनसंक्षये शुकेनसह धनसञ्चयाय नाविसमारुह्यगच्छतो महावातविह्वलस्य सतो गोकर्णस्य शुकेनकुतीर्थे द्वीपांतरासंनाथैनयाऽऽनीतेन जटायुषः पठिोपरिसमारुह्यद्वीपान्तरगमनम्. ततः स्वदेशंगन्तुमशक्तेन गोकर्णेन स्वपित्रोरग्रे शुकमेषणम्, मथुरामागस्य गोकर्णवृत्तनिवेदनं तत्पिवृभ्याम्.	६२
१७२	१७९	तद्वीपस्यदेवीनांवशादतो गोकर्णस्य मथुरागमनम्.	६१
१७३	१८०	तत्र महान्ति कार्याणि कृत्वा गोकर्णस्य मोक्षः	१४
१७४	१८१	महानामब्राह्मणाख्यानम्, नानातीर्थेषुपर्यटतोब्राह्मणस्यप्रेतशंवादः, प्रेतानामाहारः, प्रेतयोन्यागमनकारणम्, प्रेतत्वप्राप्तिहेतुः, धर्मविरुद्धकारिणांश्रुतिप्रामाण्यकरणम्, मथुरायां सङ्कर्षणमानदेवपूजाप्रकारः, प्रेतानांमुक्तिः, एतत्पठनफलम्.	९८
१७५	१८३	कुण्णगंगाकालञ्जरमाहात्म्यम्, वसुब्राह्मणाख्यानम्.	२८

अध्या० प०	विषयाः ।	श्लोकाङ्काः
१७६	१८३ वसुब्राह्मणाख्यानम्, कृष्णगंगोद्भवमाहात्म्यम्.	९३
१७७	१८५ ह्यरिकायाभागतनारदवचनेन ब्रह्मःसमाहूतानां स्त्रीणां सांबरूपदर्शनेन कामोद्दीपनम्, सांबाय कृष्णदत्तःशापः, आदित्याराधनं प्रति साम्बाय नारदेनोपदिष्टो धर्मः, तपश्चरतः साम्बस्य सूर्याद्रिप्राप्तिः सूर्यप्रतिष्ठापनञ्च, ततः परंसांबपुराणकथनम्.	६२
१७८	१८७ मार्गशीर्षाद्यास्वासुपोष्यशुक्लव्रतचरितश्रवणफलम्.	८
१७९	१८७ ह्यात्रिंशद्वरपाघेषु प्रायश्चित्तानि मथुरास्थतीर्थानि.	३६
१८०	१८८ चन्द्रसेननृपाख्यानम्, व्रततृतीयमाहात्म्यम् एतच्छ्रवणफलम्. श्राद्धकाणमावश्यकम्, सप्तमेषुदानम्, पठनफलम्, ...	१३४
१८१	१९१ अथ मधुकाष्ठाप्रतिमायामर्चास्थापनम्. प्रतिष्ठितार्चायामर्चनविधानम्	२५
१८२	१९१ शैलार्चास्थापनम्, पूजनप्रकारः, अस्यफलम्.	३९
१८३	१९२ मृन्मयार्चास्थापनम्, अर्चनप्रकारस्तत्फलञ्च.	३६
१८४	१९३ ताम्रार्चास्थापनम्, तद्विधानम्, पूजनप्रकारस्तत्फलम्, ...	२३
१८५	१९४ कांस्यार्चास्थापनम्, तद्विधानम्, पूजनप्रकारस्तत्फलञ्च.	३५
१८६	१९५ रौप्यप्रतिमास्थापनम्, तद्विधेकः, सुवर्णार्चास्थापनम्, गृहे नार्च्यानि लिंगानि, क्रयविक्रयनिषेधः, ...	५८
१८७	१९६ अथसृष्टिपितृयज्ञौ, स्वर्गोत्पत्तिः, देवादीनामुत्पत्तिः, पुत्रशोकेनतप्तस्यनिमेर्देहेनज्ञानोपदेशतः समाश्वासनम्, तच्चिन्तनेनागतेन स्ववंशकर्ताऽऽत्रेयेणोपदिष्टः पितृयज्ञः, मृतस्योत्तरक्रिया.	१२४

अध्या० पत्रांकाः	विषयाः	श्लोकांकाः
१८८	१९९ अथपिण्डकल्पश्राद्धोत्पत्तिप्रकरणम्, मृतस्य त्रयोदशाहपर्यंतं करणीयं कार्यम् श्राद्धेवर्जनीयाः, आगतानां द्विजानां पूजनादिकम्, छत्रादिदानम्, प्रेतनिमित्तं मध्यभोज्यादिदानम्. प्रेतविसर्जनम्.	१०७
१८९	२०१ अथपिण्डकल्पोत्पत्तिप्रकरणम्. प्रेतभोजनविशेषानार्थंसुपवासादिकम्, उदरस्थे प्रेताग्ने नरकादिभीतिः, पात्रे दानादिकम्, मेधातिथिवृत्तान्तम्,	६०
१९०	२०२ अथश्राद्धपितृयज्ञनिश्चयप्रकरणम्, श्राद्धेऽभोज्याः, अदर्शनीयदर्शनेन श्राद्धस्य राक्षसत्वम्, गृहस्थानां श्राद्धादिप्रकारः, श्राद्धादिकरणफलम्, पितृनुद्दिश्य प्रथमं श्राद्धमग्रये दातव्यम्, तत्कारणम्, तत्पश्चात् पितृभ्यः पिण्डदानादिकम्, अपांक्तेया विप्राः अपांक्तेयानां भोजनेन पितृणांदुःखम्, मृताऽन्नाभोक्तृणांदानप्रकारः । प्रेतायं मुख्यमानीनां प्रायश्चित्तम्, तत्र भोजने संकल्पावश्यकम्.	१३८
१९१	२०५ अथ मधूत्पत्तिदानसंकरणप्रकरणम्.	२१
१९२	२०६ अथ रुद्रैशान्तिवर्णनम्, शान्तिः, मधुकर्कः	४०
१९३	२०७ नाचिकेतप्रथानवर्णनम्, जनमेजयस्यवैशंपायनसमागमः, उद्दालकेनऋषस्य नचिकेतोनामपुत्रस्य यमसदनगमनम्.	५१
१९४	२०८ नचिकेतसः पुनः पितुरन्तिकमागमनम्, संयमिनीस्थानां वृत्तान्तश्रवणोत्सुक्यानां प्रश्नाः.	३६
१९५	२०९ यमलोकस्थपापिवर्णनम्, अन्ये च तापसैः पृष्टाः प्रश्नाः;	३२
१९६	२१० धर्मराजपुरवर्णनम्, यमपुरप्रमाणम्, पुष्पोदकसरिद्वर्णनम्, पुरस्थनानाविधसमृद्धिवर्णनम्.	३६

अध्या०	प०	विषयाः ।	श्लोकांकाः
१९७	२१०	धर्मिष्ठपापिष्ठानां प्रवेशस्थानानि, धर्मयुक्तानां पापकारिणाञ्च समा, कूष्माण्डयातुधानादान्यशुभाशुभकर्मकारिणां वर्णनम्	५४
१९८	२१२	अथ संसारचक्रयातनास्वरूपवर्णनम्, नास्तिकेतस्य यमकृतमा-त्रैश्यम्, नास्तिकेतकृते यमस्तोत्रम्, तुष्टेन यमेन ऋषिपुत्राय जीवानां नानाविधयातनाप्रदर्शनम्	८३
१९९	२१३	विविधपापकारिणां विविधयातनादर्शनम्	४२
२००	२१४	नरकयातनास्वरूपवर्णनम्, वैतरणीनदीवर्णनम्, सङ्कारकवनम्, यमशुष्ठीवर्णनम्, शूलप्रदः पर्वतः, शृङ्गारकवनम्, नाना-विधरौरव्यकथनम्	७६
२०१	२१६	अथ राक्षसकिंकरयुद्धम्	५१
२०२	२१७	अथ नारकीयदण्डनकर्मविपाकवर्णनम्. नानाविधदुष्कृतकारिणां चित्रगुप्तादिष्टनानाविधदुःखप्रदयातनादानम्.	८२
२०३	२१९	अथ पापक्षयकृतकर्मवर्णनम्, चित्रगुप्तादिष्टपापफलानि.	७०
२०४	२२१	अथ दूतप्रेषणम्, चित्रगुप्तेन नानाप्रकाररूपधारिणां दूतानां प्रेषणम्.	२६
२०५	२२१	अथ शुभफलानुकीर्तनवर्णनं सुकृतकारिणां सत्स्थानप्रेषणम्	३१
२०६	२२२	अथ शुभकर्मफलोदयप्रकरणम्.	४३
२०७	२२३	संसारचक्रपुरुषविलोभनप्रकरणम्, यमकदासि नारदागमनम्, यमनारदसंवादः, नरकप्रातिनिवारणकृत्यानि, तपआदि-नियमकारिणां सत्फलावाप्तिः, नानाप्रकारदत्तादानाद्विजन्य-फलवर्णनम्, ...	५६

अध्या०	प०	विषयाः ।	श्लोकांकाः
२०८	२२४	अथ पतिव्रतोपाख्यानम्, तपस्सिद्धानांद्विजानांमाहात्म्यम्, निमि-पुत्रस्य मित्रेरूपवतीनामपत्न्याः पतिव्रतात्रभावः, अरण्ये वसतो मित्रिरूपवत्योर्मातापतत्तायारूपवत्यामहीपतमानायाः क्रूरक-दाक्षप्रक्षेपपादूगगनतलान्मरीचिमालिनः पतनम्.	१३
२०९	२२६	पतिव्रतामाहात्म्यवर्णनम्, पतिव्रताभिराचरणीयानि भर्तृनिमित्त-कार्याणि	२१
२१०	२२७	अथ पापनाशोपायनिरूपणम्, पापनाशनोपायाः, प्रजापतिप्रोक्तपाप-नाशनोपायाः, ...	६५
२११	२२८	चतुर्वर्णानां पापनाशनोपायवर्णनम्, महापातकिनांपापनिराकरणोपायः, एकादशीमाहात्म्यम्, एकादश्यामोजननिषेधः, दशावतारपूजना-दिकम्, तरफलंच.	९९
२१२	२३०	अथ संसारचक्रोपाख्यानप्रबोधनीयवर्णनम्, संयमिनोवृत्तान्तं श्रुत्वा तापसानामाश्रयम्	२१
२१३	२३१	नीकर्णश्रमाहात्म्यम्, सुव्रतब्राह्मणगे स्थाणुतुष्टये तपस्तप्य-तो नन्दिनामद्विजस्य तपस्तुष्टनागतेन शंभुना तस्मै स्वसाम्य-रूपवरप्रदानम्, ...	९०
२१४	२३३	पुनः नीकर्णमाहात्म्यम्, नन्दिकेश्वरवरप्रदानवर्णनम्, नन्दीश्वर-वरप्राप्त्या व्रस्तनां मौञ्जवति पर्वते ब्रह्मादिदेवानामागमनम्, तत्र समध्येदेवगन्धर्वतीर्थविद्याधरोरगादीनामागमनम्, इन्द्रस्यार्थेनया महेश्वरात्स्वरवरप्राप्तिकथनम्	९०

अध्या०	प०	विषयाः ।	श्लोकाकाः
२१५	२३५	अथ गोकर्णेश्वरजलेश्वरमाहात्म्यवर्णनम्. शिवं विचिन्वतो देवान् प्रत्यन्तरिक्षस्थेन शंभुनोक्तं शैलेश्वरमाहात्म्यम्, तत्र मृगशृंगोद्भवं नामतीर्थम्, पञ्चनदं तीर्थम्, वाग्मतीमाहात्म्यम्. वाह्वाकिदर्शनफलम्, क्रोशोद्भवं तीर्थम्, ब्रह्मोद्भेदं तीर्थम्, गोरक्षकं तीर्थम्, गौरीशिखरः उमास्तनकुण्डम्, प्रान्तकपानी यंतीर्थम्, ब्रह्मोदयं तीर्थम्, सुन्दारिकातीर्थम्, वाग्मतीं वणिवती-संगमः, क्षेत्रस्यास्य गोकर्णेश्वर इति ख्यातिः	१२२
२१६	२३७	अथ गोकर्णशृंगेश्वरादिमाहात्म्यम्, तत्रैवदृश्याग्रीवस्थतपःकरणम्, दक्षिणगोकर्णोत्पत्तिः.	२६
२१७	२३८	अथ धरणीवाराहसंवादफलश्रुतिवर्णनम्	२४
२१८	२३९	पुराणपठनादिविषयानुक्रमणिका.	४६

इति श्रीगौडकुलनिवासिकालिदासतनूजजनपाजविनरामशर्मणाविर्निर्मिता
श्रीवराहपुराणस्थविषयानुक्रमणिका संपूर्णा ॥

इदं महापुराणमपूर्णमेव । पुराणांतरोक्तसंख्यापेक्षयाल्पसंख्याकग्रन्थदर्शनात् ॥ यदि पूर्णं भागो मिलिष्यत्यधिकश्रमतदा तमपि मुद्रयित्वा प्रकाशयिष्यामः ॥
येषां निकट इतोऽधिकोंशः स्याच्चेः प्रेषणीय इति प्रार्थना ।

पुस्तक मिलनेका ठिकाना—

गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" स्टीम् प्रेस,
कल्याण—मुंबई.

खेमराज श्रीकृष्णदास,
"श्रीवेंकटेश्वर" स्टीम् प्रेस,
खेतवाडी—मुंबई.

श्रीगणेशाय नमः ॥ अथ प्रथमोनुक्रमाणिकाऽध्याय आरभ्यते ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥ नमस्तस्मै वराहाय लीलयोद्धरते महीम् ॥ खुरमध्यगतो यस्य मेरुः खणखणायते ॥ १ ॥ दंष्ट्राग्रेणोऽद्धृता गौरुदधिपरिवृता पर्वतैर्निम्नगाभिः साकं मृत्पिण्डवत्प्राग्बृहदुरुवपुषाऽनन्तरूपेण येन ॥ सोऽयं कंसासुरारिर्सुरनरकदशास्त्यान्तकृत्सर्वतस्थः कृष्णो विष्णुः सुरेशो नुदतु मम रिपूनादिदेवो वराहः ॥ २ ॥ सूत उवाच ॥ यस्मिन्काले क्षितिः पूर्वं वराहवपुषा तु सा ॥ उद्धृता विभुना शक्त्या पप्रच्छ परमेश्वरम् ॥ ३ ॥ धरण्युवाच ॥ कल्पे कल्पे भवानेवं मां समुद्धरति प्रभो ॥ न चाहं वेद ते मूर्तिमादिवर्गं च केशव ॥४॥ वेदेषु चैव नष्टेषु मत्स्यो भूत्वा रसातलात् ॥ प्रविश्य तानथोत्कृष्य ब्रह्मणे दत्तवानसि ॥ ५ ॥ अन्यत्सुरासुरामिते त्वं समुद्रस्य मन्थने ॥ धृतवानसि कौर्म्येण मन्दरं मधुसूदन ॥ ६ ॥ पुनश्च गां जगन्नाथ निमज्जन्तीं रसातलात् ॥ उज्जहारैकदंष्ट्रेण भगवन्वै महार्णवात् ॥ ७ ॥ अन्यद्धिरण्यकशिपुर्वरदानेन दर्पितः ॥ आबाधमानः पृथिवीं स त्वया विनिपातितः ॥ ८ ॥ पुनर्निःक्षत्रिया देव त्वया चापि पुरा कृता ॥ जामदग्न्येन रामेण त्वया भूत्वा सकृत्प्रभो ॥ ९ ॥ पुनश्च रावणो रक्षः क्षपितं क्षात्रतेजसा ॥ बलिः प्रबद्धो भगवंस्त्वया वामनरूपिणा ॥ १० ॥ न च जानाम्यहं देव तव किंचिद्विचेष्टितम् ॥ उद्धृत्य मां कथं सृष्टिं सृजसे किंच कारणम् ॥ ११ ॥ सकृद्धियेत कृत्वा च पाल्यते चापि केन वा ॥ केन वा सुलभो देवो भवेस्त्वं सततं विभो ॥ १२ ॥ कथं च सृष्टेरादिः स्यादवसानं कथं भवेत् ॥ कथं युगस्य गणना संख्याऽस्यापु चतुर्युगम् ॥ १३ ॥ को वा विशेषस्तेष्वस्मिन्का वा वाञ्छा महेश्वर ॥ यज्ञानः के च राजानः के च सिद्धिं परां गताः ॥१४॥ एतत्सर्वं समासेन कथयस्व प्रसीद मे ॥ इत्युक्तः क्रोडरूपेण जहास परमेश्वरः ॥ १५ ॥ इसतस्तस्य कुक्षौ तु जगद्धात्री ददर्श ह ॥ रुद्रान्देवान्सह वसूंस्सिद्धसंघान्महर्षिभिः ॥ १६ ॥ सचन्द्रसूर्यग्रहसप्तलोकानन्तःस्थितांस्तत्र उपात्तधर्मान् ॥ इतीदृशं पश्यति सा समस्तं यावत्क्षितिर्वैपितसर्वगात्रा ॥ १७ ॥ उन्मीलितास्यस्तु यदा महात्मा दृष्टो धरण्याऽमलसर्वगात्र्या ॥ तावत्स्वरूपेण चतुर्भुजेन महोदधौ सुप्तमथोऽन्वपश्यत् ॥१८॥ शेषपर्यङ्कशयने सुप्तं देवं जनार्दनम् ॥ दृष्ट्वा तन्नाभिपङ्केरुहन्तःस्थ तं चतुर्भुजम् ॥ कृताञ्जलिपुटा देवी स्तुतिं धात्री जगाद ह ॥ १९ ॥ धरण्युवाच ॥ नमः कमलपत्राक्ष

नमस्ते पीतवाससे ॥ नमः सुरारिविध्वंसकारिणे परमात्मने ॥ २० ॥ शेषपर्यंकशयने धर्तवृक्षःस्थलश्रिये ॥ नमस्ते सर्वदेवेश नमस्ते मोक्ष
कारिणे ॥ २१ ॥ नमः शार्ङ्गांसिचक्राय जन्ममृत्युविवर्जित ॥ नमो नाभ्युत्थितमहाकमलासनजन्मने ॥ २२ ॥ नमो विद्रुमरक्तोष्ठपाणिपल्लव
शोभिने ॥ शरणं त्वां प्रपन्नास्मि त्राहि नारीमनागसम् ॥ २३ ॥ पूर्णनीलाञ्जनाकारं वाराहं ते जनार्दन ॥ दृष्ट्वा भीताऽस्मि भूयोऽपि
जगत्त्वद्देहगोचरम् ॥ इदानीं कुरु मे नाथ दयां त्राहि महाप्रभो ॥ २४ ॥ केशवः पातु मे पादौ जंघे नारायणो मम ॥ माधवो मे कटिं पातु
गोविन्दो गुह्यमेव च ॥ २५ ॥ नाभिं विष्णुस्तु मे पातु उदरं मधुसूदनः ॥ उरस्त्रिविक्रमः पातु हृदयं पातु वामनः ॥ २६ ॥ श्रीधरः पातु मे
कण्ठं हृषीकेशो मुखं मम ॥ पद्मनाभस्तु नयने शिरो दामोदरो मम ॥ २७ ॥ एवं न्यस्य हरेर्न्यासं नामानि जगती तदा ॥ नमस्ते भगवन्
विष्णो इत्युक्त्वा विरराम ह ॥ २८ ॥ इति वाराहपुराणे अनुक्रमणिकायां प्रथमोऽध्यायः ॥ १ ॥ अथ सृष्टिस्थितियुगमाहात्म्यम् ॥ सूत
उवाच ॥ ततस्तुष्टो हरिर्भक्त्या धरण्यात्मशरीरगः ॥ मायां प्रकाश्य तेनैव स्थितो वाराहमूर्त्तिना ॥ १ ॥ जगाद किं ते सुश्रोणि प्रश्नमेतं
सुदुर्लभम् ॥ कथयामि पुराणस्य विषयं सर्वशास्त्रतः ॥ २ ॥ पुराणानां हि सर्वेषामयं साधारणः स्मृतः ॥ श्लोकं धरणि निश्चित्य निःशेषं
त्वमतः शृणु ॥ ३ ॥ श्रीवराह उवाच ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥ ४ ॥ आदिसर्ग
महं तावत्कथयामि वरानने ॥ यस्मादारभ्य देवानां राज्ञां चरितमेव च ॥ ५ ॥ ज्ञायते चतुरंशश्च परमात्मा सनातनः ॥ ६ ॥ अथसृष्टिः ॥
आदावहं व्योम महत्ततोऽण्डरेकैव मतः प्रबभूव बुद्धिः ॥ त्रिधा तु सा सत्त्वरजस्तमोभिः पृथक्पृथक्सत्त्वरूपैरुपेता ॥ ७ ॥ तस्मिन्खिकेऽहं
तंमसो महान्स सदोच्यते सर्वविदां प्रधानः ॥ तस्मादपि क्षेत्रविदूर्जितो यो बभूव बुद्धिस्तु ततो बभूव ॥ ८ ॥ तस्मात्तु तेभ्यः श्रवणादि ॥ १ ॥
हेतवस्ततोऽक्षमाला जगतो व्यवस्थिताः ॥ भूतेर्गतैरेव च पिण्डमूर्तिर्मया भद्रे विहिता त्वात्मनैव ॥ ९ ॥ शून्यं त्वासीत्तत्र शब्दस्तु खं च
तस्माद्वायुस्तत एवानु तेजः ॥ तस्मादापस्तत एवानु देवि मया सृष्टा भवती भूतधात्री ॥१० ॥ योगे पृथिव्यां जलवत्ततोऽपि सबुद्बुदं कललं
त्वण्डमेव ॥ तस्मिन्प्रवृद्धिं च गतेऽहमासीदापोमयश्चात्मनात्मानमादौ ॥ ११ ॥ सृष्ट्वा नारस्ता अथो तत्र चाहं येनैव स्यान्नाम नारायणेति ॥

कल्पे कल्पे तत्र शयामि भूयः सुतस्य मे नाभिजः स्याद्यथाद्य ॥ १२॥ एवंभूतस्य मे देवि नाभिपद्मे चतुर्मुखः॥उत्तस्थौ स मया प्रोक्तः प्रजाः सृज महामते ॥१३॥ एवमुक्त्वा तिरोभावं गतोऽहं सोऽपि चिन्तयन् ॥ आस्ते यावज्जगद्धात्रि नाध्यगच्छतु किंचन ॥१४॥ तावत्तस्य महारोषो ब्रह्मणोऽव्यक्तजन्मनः॥संभूय तेन बालः स्यादेको रोषात्मसंभवः॥१५॥यो रुदन्वारितस्तेन ब्रह्मणाव्यक्तमूर्त्तिना॥ब्रवीति नाम मे देहि तस्य रुद्रेत्य सौ ददौ॥१६॥सोऽपि तेन सृजस्वेति प्रोक्तो लोकमिमं शुभे॥अशक्तः सोऽथ सलिले ममज्ज तपसे धृतः ॥१७॥तस्मिन्सलिलमग्ने तु पुनरन्यं प्रजापतिम्॥ब्रह्मा ससर्ज्ज भूतेषु दक्षिणाङ्गुष्ठतः परम्॥१८॥वामे चैव तथाङ्गुष्ठे तस्य पत्नीमथासृजत् ॥१९॥स तस्यां जनयामास मनुं स्वायं भुवं प्रभुः॥तस्मात्संभाविता बुद्धिः प्रजानां ब्रह्मणा पुरा ॥२० ॥ धरण्युवाच ॥ विस्तरेण समाचक्ष्व आदिसर्गं सुरेश्वर॥ब्रह्मा नारायणाख्योऽयं कल्पादौ चाभवद्यथा ॥२१॥श्रीभगवानुवाच॥ससर्ज सर्वभूतानि यथा नारायणात्मकः॥कथ्यमानं मया देवि तदशेषं क्षिते शृणु॥२२॥गतकल्पावसाने तु निशी सुतः स्थितः शुभे ॥ सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवैक्षत ॥ २३ ॥ नारायणः परोऽचिन्त्यः पराणामपि पूर्वजः ॥ ब्रह्म स्वरूपो भगवाननादिः सर्वसम्भवः ॥ २४ ॥ इदं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ॥ ब्रह्मस्वरूपिणं देवं जगतः प्रभवाप्ययम् ॥ २५ ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ २६ ॥ सृष्टिं चिन्तयतस्तस्य कल्पादिषु यथा पुरा ॥ अबुद्धिपूर्वकस्तस्य प्रादुर्भूतस्तमोमयः ॥ २७ ॥ तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मनः ॥ २८ ॥ पंचधावस्थितः सर्गो ध्यायतः प्रतिबोधवान् ॥ स मुख्यसर्गो विज्ञेयः सर्गविद्भिर्विचक्षणैः ॥२९॥ पुनरन्यमभूत्तस्य ध्यायतः सर्गमुत्तमम् ॥ तिर्यक्स्रोतस्तु वै यस्मात्तिर्यक्स्रोतस्तु वै स्मृतः ॥ ३० ॥ पश्वादयस्ते विख्याता उत्पथग्राहिणः कुताः ॥ तमप्यसाधनं मत्वा तिर्यक्स्रोतश्चतुर्मुखः ॥ ३१ ॥ ऊर्द्धस्रोतस्त्रिधा यस्तु सात्त्विको धर्मचर्त्तनः ॥ तथोर्द्धचारिणो देवाः सर्वे गर्भसमुद्भवाः ॥ ३२ ॥ तदा सृज्यान्यसर्गं तु तदा दृष्ट्वा प्रजापतिः ॥ असाधकांस्तु तान्मत्वा मुख्यसर्गादिसम्भवान् ॥ ३३ ॥ ततः स चिन्तयामास अर्वाक्स्रोतस्तु स प्रभुः ॥ ॥ अर्वाक्स्रोतासि चोत्पन्ना मनुष्याः साधकाः मताः ॥ ३४ ॥ ते च प्रकाशबहुलास्तमोद्रिक्ता रजोऽधिकाः ॥ तस्मात्ते

दुःखबहुला भूयोभूयश्च कारिणः ॥ ३५ ॥ इत्येते कथिताः सर्गाः षडेते सुभगे तव ॥ प्रथमो महतः सर्गस्तन्मात्राख्यो द्वितियिकः ॥ ३६॥
वैकारिकस्तृतीयस्तु सर्गश्चैन्द्रियकः स्मृतः ॥ इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः ॥ ३७ ॥ मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः ॥ तिर्यक्स्रोतश्च यः प्रोक्तस्तैर्यक्स्रोतः स उच्यते ॥ ३८ ॥ तथोर्द्धस्रोतसां श्रेष्ठः सप्तमः स तु मानवः ॥ अष्टमोऽनुग्रहः
सर्गः सात्त्विकस्तामसश्च सः ॥ ३९ ॥ पंचैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः ॥ प्राकृतो वैकृतश्चैव कौमारो नवमः स्मृतः ॥ ४० ॥
सर्गाःयेते वै समाख्याता नव सर्गाः प्रजापतेः ॥ प्राकृता वैकृताश्चैव जगतो मूलहेतवः ॥ इत्येते कथिताः सर्गाः किमन्यच्छ्रोतुमिच्छसि ॥ ४१॥
अथ स्थितिः ॥ धरण्युवाच ॥ नवधा सृष्टिरुत्पन्ना ब्रह्मणोऽव्यक्तजन्मनः ॥ कथं सा वर्धते देव एंतन्मे कथयाच्युत ॥ ४२ ॥ वराह उवाच ॥
प्रथमं ब्रह्मणा सृष्टा रुद्राद्यास्तु तपोधनाः ॥ सनकाद्यस्ततः सृष्टा मरीच्यादय एव च ॥ ४३ ॥ मरीचिरात्रिश्च तथा अङ्गिराः पुलहः क्रतुः॥
पुलस्त्यश्च महातेजाः प्रचेता भृगुरेव च ॥ नारदो दशमश्चैव वसिष्ठश्च महातपाः ॥ ४४ ॥ सनकाद्यो निवृत्त्याख्ये तेन धर्म्मे प्रयोजिताः ॥
प्रवृत्त्याख्ये मरीच्याद्या मुक्त्वैकं नारदं मुनिम् ॥ ४५ ॥ योऽसौ प्रजापतिस्तस्याद्यो दक्षिणाङ्गुष्ठसम्भवः ॥ तस्यादौ तत्र वंशे तु जगदेतच्चराचरम् ॥ ४६ ॥ देवाश्च दानवाश्चैव गन्धर्वोरगपक्षिणः ॥ सर्वे दक्षस्य कन्यासु जाताः परमधार्मिकाः ॥ ४७ ॥ अथ रुद्रसर्गः ॥ योऽसौ रुद्रेति
विख्यातः पुत्रः क्रोधसमुद्भवः ॥ भ्रुकुटीकुटिलात्तस्य ललाटात्परमेष्ठिनः ॥ ४८ ॥ अर्द्धनारनिरवपुः प्रचण्डोऽतिभयङ्करः ॥ विभजात्मान
मित्युक्त्वा ब्रह्मा चान्तर्दधे पुनः ॥ ४९ ॥ तथोक्तोऽसौ द्विधा स्त्रीत्वं पुरुषत्वं चकार सः ॥ विभेद पुरुषत्वं च दशधा चैकधा च सः ॥ ५०॥
ततस्त्वेकादश ख्याता रुद्रा ब्रह्मसमुद्भवाः ॥ ५१ ॥ अयमुद्देशतः प्रोक्तो रुद्रसर्गो मयाऽनघे ॥ अथ युगमाहात्म्यम् ॥ इदानीं युगमाहात्म्यं
कथयामि समासतः ॥५२ ॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् ॥ ५३ ॥ एतस्मिन्ये महासत्त्वा राजानो भूरिदक्षिणाः ॥ देवासुराश्च ये
चक्रुर्धर्म्मं कर्म च तच्छृणु ॥ ५४ ॥ आसीत्प्रथमकल्पे तु मनुः स्वायम्भुवः पुरा ॥ तस्य पुत्रद्वयं जज्ञे अतिमानुषचेष्टितम् ॥ ५५ ॥ प्रिय
व्रतोत्तानपादनामानं धर्म्मवत्सलम् ॥ तत्र प्रियव्रतो राजा महायज्वा तपोबलः ॥ ५६ ॥ स च चेड्डा विविधैर्यज्ञैर्विपुलैर्भूरिदक्षिणैः ॥ सप्तद्वीपेषु

संस्थाप्य भरतादीन्सुताम्त्रिजान् ॥ स्वयं विशालां वरदां गत्वा तेपे महत्तपः ॥ ५७ ॥ तस्मिन् स्थितस्य तपसि राज्ञो वै चक्रवर्त्तिनः ॥ उपेया न्नारदस्तत्र दिदृक्षुर्ब्रह्मचारिणम् ॥ ५८ ॥ स दृष्ट्वा नारदं व्योम्नि ज्वलद्भास्करतेजसम् ॥ अभ्युत्थायेन राजेन्द्र उत्तस्थौ हर्षितस्तदा ॥ ५९॥ तस्यासनं च पाद्यं च सम्यक् कृत्वा निवेद्य वै ॥ स्वागतादिभिरालापैः परस्परमवोचताम् ॥ ६० ॥ कथान्ते नारदं राजा पप्रच्छ ब्रह्मवादिनम् ॥६१॥ प्रियव्रत उवाच ॥ भगवन्किंचिदाश्चर्यमेतस्मिन्कृतसंज्ञिते ॥ युगे दृष्टं श्रुतं चापि तन्मे कथय नारद ॥ ६२ ॥ नारद उवाच ॥ आश्चर्यमेकं दृष्टं मे तच्छृणुष्व प्रियव्रत ॥ ह्यस्तनेऽहनि राजेन्द्र श्वेताख्यं गतवानहम् ॥६३॥ द्वीपं तत्र सरो दृष्टं फुल्लपङ्कजमालिनैः ॥ सरस स्तस्य तीरे तु कुमारीं पृथुलोचनाम् ॥६४॥ दृष्ट्वाहं विस्मयापन्नस्तां कन्यामायतेक्षणाम् ॥ पृष्टवानास्मि राजेन्द्र तदा मधुरभाषिणीम् ॥६५॥ कासि भद्रे कथं वासि किं वा कार्यमिह त्वया ॥ कर्तव्यं चारुसर्वाङ्गि तन्ममाचक्ष्व शोभने ॥ ६६ ॥ एवमुक्ता मया सा हि मां दृष्ट्वाऽनिमिषेक्षणा ॥ स्मृत्वा तूष्णीं स्थिता यावत्तावन्मे ज्ञानमुत्तमम् ॥ ६७ ॥ विस्मृतं सर्ववेदाश्च सर्वशास्त्राणि चैव हि ॥ योगशास्त्राणि शिक्षाश्च वेदानां स्मृतयस्तथा ॥ ६८ ॥ सर्वं दृष्टेव मे राजन्कुमार्याऽपहृतं क्षणात् ॥ ततोऽहं विस्मयाविष्टश्चिन्ताशोकसमन्वितः ॥ ६९ ॥ तामेव शरणं गत्वा यावत्पश्यामि पार्थिव ॥ तावद्दिव्यः पुमांस्तस्याः शरीरे समदृश्यत ॥ ७० ॥ तस्यापि पुंसो हृदये त्वपरस्तस्य चोरसि ॥ अन्यो रक्तेक्षणः श्रीमान्द्वादशादित्यसन्निभः ॥ ७१ ॥ एवं दृष्टाः पुमांसोऽत्र त्रयः कन्याशरीरगाः ॥ क्षणेन तत्र कन्येका न तान्पश्यामि सुव्रत ॥ ७२ ॥ ततः पृष्टा मया देवी सा कुमारी कथं मम ॥ वेदा नष्टा ममाचक्ष्व भद्रे तन्नाशकारणम् ॥ ७३ ॥ कन्योवाच ॥ माताहं सर्ववेदानां सावित्री नाम नामतः ॥ मां न जानासि येन त्वं ततो वेदा हतास्तव ॥ ७४ ॥ एवमुक्ते तया राजन्विस्मयेन तपोधन ॥ पृष्टा त एते पुरुषा एतत्कथय शोभने ॥ ७५ ॥ कन्योवाच ॥ य एष मच्छरीरस्थः सर्वाङ्गश्चारुशोभनः ॥ एष ऋग्वेदनामा तु वेदो नारायणः स्वयम् ॥ वह्निभूतो दहत्याशु पापा न्युच्चारणादनु ॥ ७६ ॥ एतस्य हृदये योऽयं दृष्ट आसीत्त्वयात्मजः ॥ स यजुर्वेदरूपेण स्थितो ब्रह्मा महाबलः ॥ ७७ ॥ तस्याप्युरसि संविष्टो य एष शुचिरुज्ज्वलः ॥ स सामवेदनामा तु रुद्ररूपी व्यवस्थितः ॥ ७८ ॥ एष

आदित्यवत्पापान्याशु नाशयते स्मृतः ॥७९॥ एते त्रयो महावेदा ब्रह्मन्देवास्त्रयः स्मृताः ॥ एते वर्णा अकाराद्याः सवनान्यत्र वै द्विज ॥ ८० ॥
एतत्सर्वं समासेन कथितं ते द्विजोत्तम ॥ गृहाण वेदाञ्छास्त्राणि सर्वज्ञत्वं च नारद ॥ ८१ ॥ एतस्मिन्वेदसरसि स्नानं कुरु महाद्विज ॥ कृते
स्नानेऽन्यजन्मीयं येन स्मरसि सत्तम ॥ ८२॥ एवमुक्त्वा तिरोभावं गता कन्या नराधिप ॥ अहं तत्र कृतस्नानस्त्वां दिदृक्षुरिहागतः ॥८३ ॥
इति वराहपुराणे आदिभूतमुष्टिस्थितियुगमाहात्म्यवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥ अथ नारदप्रागजन्मवृत्तान्तः ॥ प्रियव्रत उवाच ॥
अन्यस्मिन्भगवञ्जन्मन्यासीद्यत्त्वद्विचेष्टितम् ॥ सर्वं कथय देवर्षे महत्कौतूहलं हि मे ॥ १ ॥ नारद उवाच ॥ स्नातस्य मम राजेन्द्र तस्मिन्वेद
सरस्यथ ॥ सावित्र्याश्च वचः श्रुत्वा तस्मिन् जन्मसहस्रिकम् ॥ स्मरणं तत्क्षणाज्जातं शृणु जन्मान्तरं मम ॥२॥ अस्त्यवन्तीपुरं राजंस्तत्राह
प्राग्द्विजोत्तमः ॥ नाम्ना सारस्वतः पूर्वं वेदवेदाङ्गपारगः ॥ ३ ॥ बहुभृत्यपरीवारो बहुधान्यश्च पार्थिव ॥ अन्यस्मिन् कृतसङ्गे तु युगे परम
बुद्धिमान् ॥४॥ ततो ध्यातं मयैकान्ते किमनेन करोम्यहम् ॥ द्वन्द्वेन सर्वमेताद्धि न्यस्य पुत्रेषु याम्यहम् ॥ तपसे धृतसङ्कल्पः सरः सारस्वतं
द्रुतम् ॥ ५ ॥ एवं चिन्त्य मया पृष्टः कर्मकाण्डेन केशवः ॥ श्राद्धैश्च पितरो देवा यज्ञैश्चान्ये तथा जनाः ॥ ६ ॥ ततोऽहं निर्गतो
राजंस्तपसे धृतमानसः ॥ सारस्वतं नाम सरो यदेतत्पुष्करं स्मृतम् ॥ ७ ॥ तत्र गत्वा मया विष्णुः पुराणः पुरुषः शिवः ॥ आराधितो
मया भक्त्या जपं नारायणात्मकम् ॥ ८ ॥ ब्रह्मपारमयं राजञ्जपता परमस्तवम् ॥ ततो मे भगवांस्तुष्टः प्रत्यक्षत्वं जगाम ह ॥ ९ ॥
प्रियव्रत उवाच ॥ कीदृशं ब्रह्मपारं तु श्रोतुमिच्छामि सत्तम ॥ कथयस्व प्रसादेन देवर्षे सुप्रतत्रवीः ॥ १० ॥ नारद उवाच ॥ परं पराणा
ममृतं पुराणं पारं परं विष्णुमनन्तवीर्यम् ॥ नमामि नित्यं पुरुषं पुराणं परापरं पारगतं पराणाम् ॥११॥पुरातनं त्वप्रतिमं पुराणं परापरं
पारगमुग्रतेजसम् ॥ गम्भीरगम्भीरधियां प्रधानं ततोऽस्मि देवं हरिमीशितारम् ॥ १२ ॥ परात्परं चापरमं प्रधानं परास्पदं शुद्धपदं विशा
लम् ॥ परात्परेशं पुरुषं पुराणं नारायणं स्तौमि विशुद्धभावः ॥ १३ ॥ पुरा पुरं शून्यमिदं ससर्ज तदा स्थितत्वात्पुरुषः प्रधानम् ॥ जने
प्रसिद्धः शरणं ममास्तु नारायणो वीतमलः पुराणः ॥१४॥ पारं परं विष्णुमपाररूपं पुरातनं नीतिमतां प्रधानम्॥ धृतक्षमं शान्तिधरं क्षितीशं

शुभं सदा स्तौमि महानुभावम् ॥ १५ ॥ सहस्रमूर्द्धानमनन्तपादमनन्तबाहुं शशिसूर्यनेत्रम् ॥ तमक्षरं क्षीरसमुद्रनिद्रं नारायणं स्तौम्यहृतं परेशम् ॥ १६ ॥ त्रिवेदगम्यं त्रिनवैकमूर्त्तिं त्रिशुक्लसंस्थं त्रिहुताशभेदम् ॥ त्रितत्त्वलक्ष्यं त्रियुगं त्रिनेत्रं नमामि नारायणमप्रमेयम् ॥ १७ ॥ कृते सिते रक्ततनुं तथा च त्रेतायुगे पीततनुं पुराणम् ॥ तथा हरिं द्वापरतः कलौ च कृष्णीकृतात्मानमथो नमामि ॥ १८ ॥ सतर्ज्ञ यो वक्त्र एव विप्रान्सुबाहान्तरे क्षत्रमथोरुयुग्मे ॥ विशः पदाग्रेषु तथैव शूद्रान्नमामि तं विश्वतनुं पुराणम् ॥ १९ ॥ परात्परं पारगतं प्रमेयं युधाम्पतिं कार्यत एव कृष्णम् ॥ गदासिचर्म्मेष्वभृतोत्थपाणिं नमामि नारायणमप्रमेयम् ॥ २० ॥ इति स्तुतो देववरः प्रसन्नो जगाद मां नीरदतुल्य घोषः ॥ वरं वृणीष्वेत्यसकृत्ततोऽहं तस्यैव देहे लयमिष्टवांश्च ॥ २१ ॥ इति श्रुत्वा वचो मह्यं देवदेवः सनातनः ॥ उवाच प्रकृतिं गच्छ विप्रेतत्तु प्रयोजनम् ॥ २२ ॥ नारं पानीयमित्युक्तं पितॄणां तदयो भवान् ॥ तदाप्रभृति ते नाम नारदेति भविष्यति ॥ २३ ॥ एव मुक्त्वा गतो देवः सद्योऽदर्शनमुच्चकैः ॥ अहं कठेरं त्यक्त्वा कालेन तपसा तदा ॥ ब्रह्मलोके लयं प्राप्तस्तदोत्पत्तिं च पार्थिव ॥ २४ ॥ दिवसश्च पुनः सृष्टो दशभिस्तनयैः सह ॥ दिनादियों हि देवस्य ब्रह्मणोऽव्यक्तजन्मनः ॥ २५ ॥ स सृष्टयादिः समस्तानां देवादीनां न संशयः ॥ सर्वस्य जगतः सृष्टिरेषैव प्रभुरमैतः ॥ २६ ॥ एतन्मे प्राकृतं जन्म यन्मां पृच्छसि पार्थिव ॥ यस्मान्नारायणं ध्यात्वा प्राप्तोऽस्मि गुरुतां नृप ॥ २७ ॥ तस्मात्त्वमपि राजेन्द्र भज विष्णुपरायणः ॥ २८ ॥ इति वराहपुराणे आदिभूतवृत्तान्ते नारदप्राग्जन्मवृत्तान्तनिरूपणं नाम तृतीयोऽध्यायः ॥ ३ ॥

अथ नारायणस्यापकृत्वम् ॥ धरण्युवाच ॥ योऽसौ नारायणो देवः परमात्मा सनातनः ॥ भगवान्सर्वभावेन उताहो नेति शंस मे ॥ १ ॥

वराह उवाच ॥ मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ॥ रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥ २ ॥ इत्येताः कथितास्तस्य मूर्त्तयो भूतधारिणि ॥ दर्शनं प्राप्तुमिच्छूनां सोपानानि च शोभने ॥ ३ ॥ यत्तस्य परमं रूपं तत्र पश्यन्ति देवताः ॥ अस्मदादिस्वरूपेण पूरयन्ति ततो धृतिम् ॥ ४ ॥ ब्रह्मा भगवतो मूर्त्ती राजंस्तामसतस्तथा ॥ याभिः संस्थाप्यते विश्वं स्थितौ सञ्चाल्यते च ह ॥ ५ ॥ त्वमेका तस्य देवस्य मूर्त्तिराद्या धरा धरे ॥ द्वितीया सलिलं मूर्त्तिस्तृतीया तैजसी स्मृता ॥ ६ ॥ चतुर्थी वायुमूर्त्तिः स्यादाकाशाख्या तु

पञ्चमी ॥ एतास्तु मूर्तयस्तस्य क्षेत्रज्ञस्त्वं हि मद्विधाम् ॥ मूर्तित्रयं तथा तस्य इत्येतावाश्चाष्टमूर्तयः ॥ ७ ॥ अभिध्यातमिदं सर्वं जगन्नारायणेन ह ॥ इत्येतत्कथितं देवि किमन्यच्छ्रोतुमिच्छसि ॥८॥ धरण्युवाच ॥ नारदेनैवमुक्तस्तु तदा राजा प्रियव्रतः ॥ कृतवान्किं ममाचक्ष्व प्रसादात्परमेश्वर ॥ ९ ॥ वराह उवाच ॥ भवतीं सतधा कृत्वा पुजाणां च प्रदाय सः ॥ प्रियव्रतः पस्तेपे नारदाच्छ्रुतविस्मयः ॥ १० ॥ नारायणात्मकं ब्रह्म परं जत्वा स्वयम्भुवः ॥ ततः स तद्गतमनाः परं निर्वाणमाप्तवान् ॥ ११ ॥ शृणु चान्यद्वरारोहे यद्वृत्तं परमेष्ठिनः ॥ आराधनाय च यतः पुराकाले नृपस्य ह ॥१२ ॥ आसीद्दृश्वशिरा नाम राजा परमधार्मिकः ॥ सोऽश्वमेधेन यज्ञेन यज्ञा सुबहुदक्षिणाः॥१३॥ स्नातश्चावभृथे सोऽथ ब्राह्मणैः परिवारितः ॥यावदास्ते स राजर्षिस्तावद्योगिवरो मुनिः॥ आययौ कपिलः श्रीमान्जैगीषव्यश्च योगिराट् ॥ १४ ॥ ततस्त्वरितमुत्थाय स राजा स्वागतक्रियाम् ॥ चकार परया युक्तः स मुदा राजसत्तमः ॥ १५ ॥ तं दृष्ट्वैतावागतनगौ दृष्ट्वा देवौ महाव्रतः ॥ पप्रच्छ तौ तिग्मिधियौ योगज्ञौ स्वेच्छयागतौ ॥ १६ ॥ भवन्तौ संशयं विप्रौ पृच्छामि पुरुषर्षभौ ॥ कथमाराधये देवं हरिं नारायणं परम् ॥ १७ ॥ विप्रावूचतुः ॥ क एष प्रोच्यते राजन्त्वया नारायणो गुरुः ॥ आवां नारायणौ द्वौ तु त्वत्प्रत्यक्षगतौ नृप ॥ १८ ॥ अङ्गिरा उवाच ॥ भवन्तौ ब्राह्मणौ सिद्धौ तपसा दग्धकिल्बिषौ ॥ कथं नारायणावावामिति वाक्यमथेरितम् ॥ १९ ॥ शङ्खचक्रगदापाणिः पीतवासा जनार्दनः ॥ गरुडस्थो महादेवः कस्तस्य सदृशो भुवि ॥ २० ॥ तस्य राज्ञो वचः श्रुत्वा तौ विप्रौ संशितव्रतौ ॥ जहसतुः पश्य विष्णुं राजन्निति जजल्पतुः ॥ २१ ॥ एमुक्त्वा स कपिलः स्वयं विष्णुर्बभूव सः ॥ जैगीषव्यश्च गरुडस्तत्क्षणं समजायत ॥ २२ ॥ ततो हाहाकृतं त्वाशीत्तत्क्षणाद्राजमण्डलम् ॥ दृष्ट्वा नारायणं देवं गरुडस्थं सनातनम् ॥ २३ ॥ कृताञ्जलिपुटो भूत्वा ततो राजा महायशाः ॥ उवाच शाम्यतां विप्रौ नायं विष्णुरथेदृशः ॥ २४ ॥ यस्य ब्रह्मा समुत्पन्नो नाभिपङ्कजमध्यगः ॥ तस्याच ब्रह्मणो रूद्रः स विष्णुः परमेश्वरः ॥ २५ ॥ इति राजवचः श्रुत्वा तदा तौ मुनिपुङ्गवौ ॥ चक्रतुः परमां मायां योगमायां विशेषतः ॥ २६ ॥ कपिलः पद्मनाभस्तु जैगीषव्यः प्रजापतिः ॥ कमलस्थो बभौ ब्रह्मा तस्माद्रुद्रः प्रभाकरः ॥ २७ ॥ ददर्श राजा रक्ताक्षं कालानलसमद्युतिम् ॥ नेक्ष्यो

॥ ४ ॥

भवति विश्वेशो मायेषा योगिनां सदा ॥ २८ ॥ सर्वव्यापी हरिः श्रीमानिति राजा जगाद ह ॥ ततो वाक्यावसाने तु तस्य राज्ञो हि संसदि ॥ २९ ॥ मत्कुणा मशकाः यूका भ्रमराः पक्षिणोरगाः ॥ ३० ॥ अश्वा गावो द्विपाः सिंहा व्याघ्रा गोमायवो मृगाः ॥ अन्येऽपि पशवः कीटा ग्राम्यारण्याश्च सर्वशः ॥ दृश्यन्ते राजभवने कोटिशो भूतधारिणि ॥ ३० ॥ तद्दृष्ट्वा भूतसङ्घातं राजा विस्मितमानसः ॥ यावच्चिन्तयते किं स्यादेतादेत्यवगम्य च ॥ जैगीषव्यस्य माहात्म्यं कपिलस्य च धीमतः ॥ ३२ ॥ कृताञ्जलिपुटो भूत्वा स राजाश्वशिरास्तदा ॥ पप्रच्छ तावृषी भक्त्या किमिदं द्विजसत्तमौ ॥ ३३ ॥ द्विजावूचतुः ॥ आवां पृष्टौ त्वया राजन् कथं विष्णुरिहेज्यते ॥ प्राप्यते च महाराज तेनेदं दर्शितं तव ॥ ३४ ॥ सर्वज्ञस्य गुणा ह्येते ये राजंस्तव दर्शिताः ॥ स च नारायणो देवः सर्वज्ञः कामरूपवान् ॥ ३५ ॥ सौम्यस्तु सस्थितः क्वापि प्राप्यते मनुजैः किल ॥ आराधनं न चैतस्य परमार्थं भविष्यति ॥ ३६ ॥ किन्तु सर्वशरीरस्थः परमात्मा जगत्पतिः ॥ स्वदेहे दृश्यते भक्त्या नैकस्थानगतस्तु सः ॥ ३७ ॥ अतोऽर्थं दर्शितं रूपं देवस्य परमात्मनः ॥ आवयोस्तव राजेंद्र प्रतीतिः स्याद्यथा तव ॥ ३८ ॥ एवं सर्वगतो विष्णुस्तव देहे जनेश्वर ॥ मन्त्रिगां भृत्यसङ्घस्य सुराद्या ये प्रदर्शिताः ॥ ३९ ॥ पशवः कीटसंघाश्च तेऽपि विष्णुमया नृप ॥ भावनां तु दृढां कुर्याद्यतः सर्वमयो हरिः ॥ ४० ॥ नान्यतत्तत्सदृशं भूतमिति भावेन सेव्यताम् ॥ एष ते ज्ञानसद्भावस्तव राजन्प्रकीर्तितः ॥ ४१ ॥ परिपूर्णेन भावेन स्मर नारायणं गुरुम् ॥ पूजोपहारैर्धूपैश्च ब्राह्मणानां च तर्पणैः ॥ ध्यानेन सुस्थितेनाशु सुप्राप्यः परमेश्वरः ॥ ४२ ॥ इति वराहपुराणे आदिकृतवृत्तान्ते नारायणस्य व्यापकत्ववर्णनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ अथ कर्मजन्यमोक्षादिकम् ॥ अश्वशिरा उवाच ॥ भवन्तो मम संदेहमेकं छेत्तुमिहार्हतः ॥ येन च्छिन्नेन जयेत मम संसारविच्युतिः ॥ १ ॥ एवमुक्तो नृपतिना तदा योगिवरो मुनिः ॥ कपिलः प्राह धर्मात्मा राजानं यजतां वरम् ॥ २ ॥ कपिल उवाच ॥ कस्ते मनसि सन्देहो राजन् परमधार्मिक ॥ छिनत्मि येन तच्छ्रुत्वा ब्रूहि यत्तेऽभिवाञ्छितम् ॥ ३ ॥ राजोवाच ॥ कर्मिणा प्राप्यते मोक्ष उताहो ज्ञानिना मुने ॥ एतन्मे संशयं छिन्धि यदि मेऽनुग्रहः कृतः ॥ ४ ॥ कपिल उवाच ॥ इमं प्रश्नं महाराज पुरा पृष्टो बृहस्पतिः ॥ रैभ्येण ब्रह्मपुत्रेण राज्ञा च वसुना तथा ॥ ५ ॥ वसुरासी

नृपश्रेष्ठो विद्वन्दानपतिः पुरा ॥ चाक्षुषस्य मनोः काले ब्रह्मणोऽन्वयवर्द्धनः ॥ ६ ॥ वसुः स ब्रह्मणः सद्म मतवांस्तदिदक्षया ॥ पथि चैत्ररथ दृष्ट्वा विद्याधरवरं नृप ॥ अपृच्छच्च वसुः प्रीत्या ब्रह्मणोऽवसरं प्रभो ॥ ७ ॥ सोऽत्रवीद्देवसमितिर्वैतेन ब्रह्मणो गृहे ॥ एवं श्रुत्वा वसुस्तत्स्थो द्वारि ब्रह्मोकसस्तदा ॥ ८ ॥ तावत्तत्रैव रैभ्यस्तु आजगाम महातपाः ॥ स राजा प्रीतिमानासद्विधुः सम्पूर्णमानसः ॥ ९ ॥ उवाच पूजयि त्वाग्रे क्व प्रयातोऽसि वै मुने ॥ १० ॥ रैभ्य उवाच ॥ अहं बृहस्पतेः पार्श्वादागतोऽस्मि महानृप ॥ किञ्चित्कार्यान्तरं प्रष्टुमगादेवपुरोहि तम् ॥ ११ ॥ एवं ब्रुवति रैभ्ये तु ब्रह्मणस्तन्महत्सदः ॥ उत्तस्थौ स्वानि विष्ण्यानि गता देवगणाः प्रभो ॥ १२ ॥ तावद्बृहस्पतिस्तत्र रैभ्येण सह संविदम् ॥ कृत्वा स्वधिष्ण्यमगमद्वसुना चानुपूजितः ॥ १३ ॥ रैभ्य आङ्गिरसो राजा वसुश्चोपविवेश ह ॥ उपविष्टेषु राजेन्द्र तेषु विष्वपि सोऽब्रवीत् ॥ १४ ॥ बृहस्पतिर्देवगुरू रैभ्यं वचनमन्तिके ॥ किं करोमि महाभाग वेदवेदाङ्गपारग ॥ १५ ॥ रैभ्य उवाच ॥ बृह स्पते कर्मिणा किं प्राप्यते ज्ञानिनाऽथवा ॥ मोक्ष एतन्ममाचक्ष्व पृच्छतः संशयं प्रभो ॥ १६ ॥ बृहस्पतिरुवाच ॥ यत्किंचित्कुरुते कर्म पुरुषः सच्चसाधु वा ॥ सर्वं नारायणे न्यस्य कुर्वन्नपि न लिप्यते ॥ १७ ॥ श्रूयते च द्विजश्रेष्ठ संवादो विप्रलुब्धयोः ॥ आत्रेयो ब्राह्मणः कश्चि द्वेदाभ्यासरतो मुनिः ॥ १८ ॥ तपस्यभिरतः प्रातः स्नायी नित्यरतः सदा ॥ नाम्ना संयमनः पूर्वमेकस्मिन्द्विजसे नदीम् ॥ घर्मारण्ये गतः स्नातुं घन्यां भागीरथीं शुभाम् ॥ १९ ॥ तत्रासीनं महायूथं हरिणानां विचक्षणः ॥ लुब्धो निठुरको नाम धनुःपाणिः कृतान्तवत् ॥ आयषो तं जिघांसुः सन्सज्यं संयुज्य सायकम् ॥ २० ॥ ततः संयमनो विप्रो दृष्ट्वा तं मृगयारतम् ॥ वारयामास मा भद्र जीववातमिमं कुरु ॥ २१ ॥ एतच्छ्रुत्वा वचो व्याधः स्मितपूर्वमिदं वचः ॥ उवाच नाहं हिंसामि पृथग्जीवाद्विजोत्तम ॥ २२ ॥ परमात्मा स्वयं धूर्तैः क्रीडते मृगरूपतस्त्व यम् ॥ कृता मायावली मन्त्रैस्तद्वदेतन्न संशयः ॥ २३ ॥ अहंभावः सदा ब्रह्मन्न विवेशो सुबुद्धिभिः ॥ प्राणयात्रारतं सर्वं जगदेतद्विचेष्टित ॥ तत्राहमिति यः शब्दः स साधुत्वं न गच्छति ॥ २४ ॥ इत्याकर्ण्य स विप्रेन्द्रो द्विजः संयमनस्तदा ॥ विस्मयेनात्रवीद्व्याधं लुब्धं निठुरकं द्विजः ॥ २५ ॥ किमेतदुच्यते भद्र प्रत्यक्षं हेतुमद्वचः ॥ २६ ॥ ततः श्रुत्वा पुनर्विप्रं लुब्धकः प्राह धर्मवित् ॥ कृत्वा लोहमयं जालं तस्याधो

ज्वलनं ददौ ॥ २७ ॥ दत्तवह्निं द्विजं प्राह ज्वालयतां काष्ठसंचयः ॥ ततो विप्रो मुखेनाग्निं प्रज्वाल्य निरयम ह ॥ २८ ॥ ज्वलिते तु पुनर्वह्नौ
तं जालं लोहसंभवम् ॥ गवाक्षैर्निर्गतज्वालं बभौ कादंबिगोऽवत ॥ २९ ॥ पृथक्पृथक्सहस्राणि निश्चक्रुर्ज्वलनार्चिषः ॥ एकस्थानगतस्यापि
वह्नेरायसजालकैः॥३०॥ ततो लुब्धोऽत्रवीद्विप्रमेकां ज्वालां महामुने ॥ गृहाण येन शेषाणां करिष्यामीह नाम्नम् ॥ ३१ ॥ एवमुक्ता हुताशे
तु तोयपूर्णैघटं द्रुतम् ॥ चिक्षेप सहसा वह्निः प्रशशामाथ पूर्ववत् ॥ ३२ ॥ ततोऽत्रवील्लुब्धकस्तु ब्राह्मणं तं तपोधनम् ॥ भगवन्या त्वया
ज्वाला गृहीतातांस्तताशनात् ॥ प्रयच्छ येन मार्गेण मांसान्यानाय्य भक्षये ॥३३ ॥ एवमुक्तस्तदा विप्रो यावदायसजालकम् ॥ पश्यत्येव न
तत्राग्निर्मूलनाशे गतः क्षयम् ॥ ३४॥ ततो विलक्ष्यभावेन ब्राह्मणः शंसितव्रतः ॥ तूष्णींभूतः स्थितस्तावल्लुब्धको वाक्यमब्रवीत् ॥ ३५ ॥
एतस्मिन्ज्वलितो वह्निर्बहुशाखश्च सत्तम ॥ मूलनाशे भवेन्नाशस्तद्वदेतदपि द्विज ॥ ३६ ॥ आत्मा स प्रकृतिस्थश्च भूतानां संश्रयो भवेत् ॥
विकृताद्युद्भवस्तस्य एषा वै जगतः स्थितिः॥३७॥पिण्डग्रहणधर्मेण यदस्य विहितं व्रतम् ॥ तत्तदात्मनि संयोज्य कुर्याणो नावसीदति॥३८॥
एवमुक्ते तु व्याधेन ब्राह्मणो राजसत्तम ॥ पुष्पवृष्टिरथाकाशात्तस्योपरि पपात ह ॥ ३९ ॥ विमानानि च दिव्यानि कामगानि महान्ति च ॥
बहुरत्नानि मुख्यानि दृदृशे ब्राह्मणोतमः ॥ ४० ॥ तेषु निरुक्तं लुब्धं सर्वेषु समवस्थितम् ॥ ददृशे ब्राह्मणस्तत्र कामरूपिणमुत्तमम् ॥४१ ॥
अद्वैतवासनासिद्धं योगाद्बहुशरीरकम् ॥ दृष्ट्वा विप्रो मुदा युक्तः प्रययौ निजमाश्रमम् ॥ ४२ ॥ एवं ज्ञानं भवेत्कर्म कुर्वतोऽपि स्वजातिकम् ॥
भवेन्मुक्तिर्द्विजश्रेष्ठ रैभ्य राजन्वसो श्रुतम्॥४३॥एवं तौ संप्रपच्छेतं प्राप्तौ रैभ्यवसू नृप॥ बृहस्पतेस्ततो ज्ञानमतुर्निजमाश्रमम्॥४४॥
तस्मात्त्वमपि राजेन्द्र देवं नारायणं प्रभुम् ॥ अभेदेन स्वदेहे तु पश्य त्वात्मयया प्रभुम् ॥ ४५ ॥ कपिलस्यं वचः श्रुत्वा स राजाश्वशिरा
विभुः ॥ ज्येष्ठं पुत्रं समाहूय धन्यं स्थूलशिराह्वयम् ॥ अभिषिच्य निजे राज्ये स राजा प्रययौ वनम् ॥ ४६ ॥ नैमिषारण्यं वरारोहे तत्र यज्ञं
ततुं हरिम् ॥ तपसाराधयामास यज्ञमूर्तिं स्तवेन च ॥४७॥ घण्टयुवाचाकथं यज्ञतनोः स्तोत्रं राज्ञा नारायणस्य ह॥स्तुतिः कृता महाभाग
पुनरेतच्च शंस मे ॥ ४८ ॥ वराह उवाच ॥ नमामि नित्यं त्रिदशाधिपस्य भवस्य सूर्यस्य हुताशनस्य ॥ सोमस्य राज्ञो महतामनेकरूपं

हरिं यज्ञतनुं नमस्ते॥ ४९॥सुभीमदंष्ट्रं शशिसूर्यनेत्रं संवर्तरव्याग्नयुग्मकुक्षिम् ॥ दर्भाङ्गरोमाणमथोग्रशक्तिं तनातनं यज्ञनरं नमामि ॥५०॥ द्यावापृथिव्योरिदमन्तरं हि व्याप्तं शरीरेण दिशश्च सर्वाः॥ तमीड्यमीशं जगतां प्रसूतिं जनार्दनं तं प्रणतोऽस्मि नित्यम्॥५१॥ सुरासुराणामजयो जयाय युगेयुगे यत्स्वशरीरमाद्यम् ॥ सृजत्यनादिः परमेश्वरो यस्तं यज्ञमूर्तिं प्रणतोऽस्मि नित्यम् ॥ ५२ ॥ दधार मायामयमुग्रतेजा जघाय चक्रं त्वमलं सुशुभ्रम् ॥ सारङ्गशङ्खादिचतुर्भुजो यस्तं यज्ञमूर्तिं प्रणतोऽस्मि नित्यम् ॥ ५३ ॥ क्वचित्सहस्रं शिरसां दधानः क्वचिन्महापर्वततुल्यकायः ॥ क्वचित्स एव त्रसरेणुतुल्यो यस्तं सदा यज्ञनरं नमामि ॥५४॥ चतुर्भुजो यः सृजते समग्रं स्थाङ्गपाणिः प्रतिपालनाय ॥ क्षयाय कालानलसन्निभो यस्तं यज्ञमूर्तिं प्रणतोऽस्मि नित्यम् ॥५५॥ संसारचक्रक्रमणक्रियाये य इज्यते सर्वगतः पुराणः ॥ यो योगिनां ध्यानगतोऽप्रमेयस्तं यज्ञमूर्तिं प्रणतोऽस्मि नित्यम् ॥ ५६ ॥ सम्यङ्मनस्यर्पितनानहं ते यदा सुदृश्यं स्वतनौ तु तत्त्वम् ॥ न चान्यदृस्तीति मतिः स्थिरा मे यतस्ततो याति विशुद्धभावम् ॥ ५७ ॥ इतीरतस्तस्य हुताशनार्चैःप्रख्यं तु तेजः पुरतो बभूव ॥ तस्मिन्स राजा प्रविवेश बुद्धिं कृत्वा लयं प्राप्तवान्यज्ञमूर्तौ ॥ ५८ ॥ इति वराहपुराणे आदिकृतवृत्तान्ते रैभ्यचरिते कर्मनमोक्षनारायणस्तोत्रयोर्निरूपणं नाम पंचमोऽध्यायः ॥ ५ ॥

अथ पुण्डरीकाक्षपारस्तोत्रम् ॥ धरण्युवाच ॥ स वसुः संशयच्छेदं प्राप्य रैभ्यश्च सत्तपः ॥ उभौ किं चक्रतुर्देव श्रुत्वा चाङ्गिरसं वचः ॥ १ ॥ वराह उवाच ॥ स वसुः सर्वधर्मज्ञः स्वराज्यं प्रत्यपालयत् ॥ अयजद्बहुभिर्यज्ञैर्मेहद्भिर्भूरिदक्षिणैः ॥ २ ॥ कर्मकाण्डेन देवेशं हरिं नारायण प्रभुम् ॥ तोषयामास राजेन्द्रस्तमभेदेन चिन्तयन् ॥ ३ ॥ ततः कालेन महता तस्य राज्ञो मतिः किल ॥ निवृत्तराज्यभोगेच्छाद्वन्द्वस्यान्त सुपेयुषः ॥ ४ ॥ ततः पुत्रं निवस्यन्तं श्रेष्ठं भ्रातृशतस्य ह ॥ अभिषिच्य स्वके राज्ये तपोवनमुपागतः ॥ ५ ॥ पुष्करं नाम तीर्थानां प्रवरं यत्र केशवः ॥ पुण्डरीकाक्षनामा तु पूज्यते तत्परायणैः ॥ ६ ॥ तत्र गत्वा स राजर्षिः काश्मीरापिपतिर्वसुः ॥ अतितीव्रेण तपसा स्वशरीर मशोषयत् ॥ ७ ॥ पुण्डरीकाक्षपारं तु स्तवं भक्त्या जपन् बुधः ॥ आरिराधयिषुर्देवं नारायणमकल्मषम् ॥ स्तोत्रान्ते तद्गतं प्रातः स राजा राजसत्तमः ॥ ८ ॥ धरण्युवाच ॥ पुण्डरीकाक्षपारं तु स्तोत्रं देव कथं स्मृतम् ॥ कीदृशं तन्मया वृक्ष्य परमेश्वर तत्त्वतः ॥ ९ ॥ वराह

उवाच ॥ नमस्ते पुण्डरीकाक्ष नमस्ते मधुसूदन ॥ नमस्ते सर्वलोकेश नमस्ते तिग्मचक्रिणे ॥१०॥ विश्वमूर्ते महाबाहुं वरदं सर्वतेजसम् ॥
नमामि पुण्डरीकाक्षं विद्याविद्यात्मकं विभुम् ॥११॥ आदिदेवं महादेवं वेदवेदाङ्गपारगम् ॥ गंभीरं सर्वदेवानां नमस्ये वारिजेक्षणम् ॥१२॥
सहस्रशीर्षिणं देवं सहस्राक्ष महाभुजम् ॥ जगत्संव्याप्य तिष्ठन्तं नमस्ये परमेश्वरम् ॥ १३ ॥ शरण्यं शरणं देवं विष्णुं जिष्णुं सनातनम् ॥ नीलमेघप्रतीकाशं नमस्ये चक्रपाणिनम् ॥ १४॥ शुद्धं सर्वगतं नित्यं व्योमरूपं सनातनम् ॥ भावाभावविनिर्मुक्तं नमस्ये सर्वगं हरिम् ॥ १५ ॥ नान्यत्किंचित्प्रपश्यामि व्यतिरिक्तं त्वयाऽच्युत ॥ त्वन्मयं च प्रपश्यामि सर्वमेतच्चराचरम् ॥१६॥ एवं तु वदतस्तस्य मूर्त्तिमान्पुरुषः किल ॥ निर्गत्य देहान्नीलाभो घनचण्डो भयङ्करः ॥ १७ ॥ रक्ताक्षो हस्वकायस्तु दृग्धस्थूणासमप्रभः ॥ उवाच प्राञ्जलिर्भूत्वा किं करोमि नराधिप ॥१८॥ राजोवाच ॥ कोऽसि किं कार्यमिह ते कस्मादागतवानसि ॥ एतन्मे कथय व्याध एतद्विच्छामि वेदितुम् ॥१९॥
व्याध उवाच ॥ पूर्वं कलियुगे राजंस्त्वं राजा दक्षिणापथे ॥ पूर्णधर्माभिधः श्रीमान्नलस्थाने विचक्षणः ॥ २० ॥ स कदाचिद्भ्रवान्वीर तुरगेः परिवारितः ॥ अरण्यमागतो हन्तुं श्वापदानि विशेषतः ॥२१॥ तत्र त्वया त्वत्कामेन मृगवेषधरो मुनिः ॥ दण्डयुग्मेन दूरे तु पातितो धरणीतले ॥ २२ ॥ सद्यो मृतश्च विप्रेन्द्रस्त्वं च राजन्मुदा युतः ॥ हरिणोऽयं हत इति यावत्पश्यसि पार्थिव ॥ तावन्मृगवपुर्विप्रो मृतः प्रस्रवणे गिरौ॥२३॥ तं दृष्ट्वा त्वं महाराज श्रुभितेन्द्रियमानसः ॥ गृहागतस्ततोऽन्यस्य कस्यचित्कथितं त्वया ॥२४॥ततः कतिपयाहस्य त्वया राज्ञो नरेश्वर ॥ ब्रह्महत्याभयाद्भीतचित्तेनैतद्विचिन्तितम् ॥ कृत्यं करोमि शान्त्यर्थं मुच्येयं येन पातकात् ॥ २५ ॥ ततस्त्वया महाराज सकुल्नारायणं प्रभुम् ॥ संचिन्त्य द्वादशीशुद्धा त्वया राजन्नुपोषिता॥२६॥ नारायणो मे सुप्रीत इति प्रोक्त्वा शुभेऽहनि॥ गोदत्ता विधिना सद्यो मृतोऽस्युदरशूलतः॥२७॥अमुतो द्वादशीधर्म्मो यत्तत्रापि च कारणम् ॥ कथयामि भवत्पत्नी नाम्ना नारायणी शुभा ॥२८॥ सा कण्ठगेन प्राणेन व्याहृता तेन ते गतिः ॥ २९ ॥ कल्पमेकं महाराज जातो विष्णुपुरे तव ॥ अहं च तव देहस्थः सर्वं जानामि चाक्षयम् ॥ ३० ॥
ब्रह्मग्रहो महाघोरः पीडयामीति मे मतिः ॥ तावद्विष्णोस्तु पुरुषैः किङ्करैर्मुसलैरहम् ॥ ३१ ॥ प्रहृतः सङ्क्षयं यातश्च्युतस्ते रोम

कूपतः ॥ स्वर्गस्थस्यापि राजेन्द्र स्थितोऽहं स्वेन तेजसा ॥३२॥ ततोऽहःकल्पे निवृत्ते रात्रिकल्पेन सत्तम ॥ इदानीमादिसृष्टौ तु कृते नृपति सत्तम ॥ सम्भूतस्त्वं महाराज राज्ञः सुमनसो गृहे ॥३३॥ काश्मीरदेशाधिपतेरहं चाङ्गरुहेस्तव ॥ यज्ञैरिष्टं त्वयानेकैर्बहुभिश्चातदक्षिणैः ॥३४॥ न चाहं तैरपहृतो विष्णुस्मरणवाञ्छितैः ॥ इदानीं यत्त्वया स्तोत्रं पुण्डरीकाक्षपारगम् ॥ ३५ ॥ पठितं तत्प्रभावेण विहायाङ्गरुहाण्यहम् ॥ एकीभूतः पुनर्जातो व्यापरूपी नृपोत्तम ॥ ३६ ॥ अहं भगवतः स्तोत्रं श्रुत्वा प्राक्पापमूर्त्तिना ॥ मुक्तोऽस्मि धर्मबुद्धिर्मे वर्त्तते साम्प्रतं विभो ॥ ३७ ॥ एतच्छ्रुत्वा वचो राजा परं विस्मयमागतः ॥ वरेण छन्दयामास तं व्याधं राजसत्तमः ॥ ३८ ॥ राजोवाच ॥ स्मारितोऽस्मि यथा व्याध त्वया जन्मान्तरंगतम् ॥ तथा त्वं मत्प्रभावेण धर्मव्याधो भविष्यति ॥ ३९ ॥ यश्चैतत्पुण्डरीकाक्षपारगं शृणुयात्परम् ॥ तस्य पुष्करयात्रायां विधिस्नानफलं भवेत् ॥ ४० ॥ वराह उवाच ॥ एवमुक्त्वा ततो राजा विमानवरमास्थितः ॥ परेण तेजसा योगमवाप शेषधारिणि ॥ ४१ ॥ इति वराहपुराणे आदिकृतवृत्तान्ते वसुचरिते वसोः पुण्डरीकाक्षपारस्तोत्रेण मोक्षप्राप्तिर्नाम षष्ठोऽध्यायः ॥ ६ ॥ वसु चरितं समाप्तम् ॥ अथ तपोगदाधरस्तोत्राभ्यामुत्तमलोकप्राप्तिः ॥धरण्युवाच ॥ रैभ्योऽसौ मुनिशार्दूल श्रुत्वा सिद्धं वसुं तदा ॥ स्वयं किमकरो देव संशयो मे महानयम् ॥१॥ वराह उवाच ॥ स रैभ्यो मुनिशार्दूल श्रुत्वा सिद्धं वसुं तदा ॥ आजगाम गयां पुण्यां पितृतीर्थे तपोधनः ॥२॥ तत्र गत्वा पितॄन्भक्त्या पिण्डदानेन तर्पयन् ॥ ततापं सुमहत्तीव्रं तपः परमदुश्चरम् ॥ ३ ॥ चरतस्तस्य तत्तीव्रं तपो रैभ्यस्य धीमतः ॥ आजगाम महायोगी विमानस्थोऽतिदीप्तिमान् ॥ ४ ॥ त्रसरेणुसमे शुद्धे विमाने सूर्यसन्निभे ॥ परमाणुप्रमाणेन पुरुषस्तत्र दीप्तिमान् ॥ ५ ॥ सोऽब्रवीद्रैभ्य किं कार्यं तपश्चरसि सुव्रत ॥ एवमुक्त्वा दिवो भूमेरन्तरास च वै पुमान् ॥ ६ ॥ तत्रापि रोदसीव्याप्तं विमानं सूर्यसन्निभम् ॥ युगपद्विष्णुभवनं व्याप्तुवन्तं ददर्श सः ॥ ७ ॥ ततः स विस्मयाविष्टो रैभ्यः प्रणतिपूर्वकम् ॥ पप्रच्छ तं महायोगिन् को भवान्प्रब्रवीतु मे ॥ ८ ॥ पुरुष उवाच ॥ अहं रुद्रादवरजो ब्रह्मणो मानसः सुतः ॥ नाम्ना सनत्कुमारेति जनोलोके वसाम्यहम् ॥ ९ ॥ भवतः पार्श्वमायातः प्रणयेन तपोधन ॥ धन्योऽसि सर्वदा वत्स ब्रह्मणः कुलवर्द्धनः ॥ १० ॥ रैभ्य उवाच ॥ नमोस्तु ते योगिवर प्रसीद दयां मह्यं कुरुष्वे विश्व

रूप ॥ किमत्र कृत्यं वद योगिसिद्ध धन्योऽहमुक्तो हि कथं त्वयाद्य ॥ ११ ॥ सनत्कुमार उवाच ॥ धन्यस्त्वमेव द्विजवर्यमुख्य यद्देववाद्याभिरतः पितृंश्च ॥ प्रीणासि मन्त्रव्रततपज्ञयोगैर्गयां समासाद्य च सर्वपिण्डैः ॥ १२॥ शृणुष्व चान्यो नृपतिर्बभूव विशालनामा स पुरं विशालम् ॥ उवाच धन्यो धृतिमान्सपुत्रः स्वयं विशालाधिपतिर्द्विजाग्र्यान् ॥ १३ ॥ पप्रच्छ पुत्रार्थममित्रहा स ते ब्राह्मणाः प्रोचुरदीनसत्त्वाः ॥ राजन् पितॄंस्तर्पय पुत्रहेतोर्गत्वा गयामन्नदानैरनेकैः ॥ १४ ॥ ध्रुवं सुतस्ते भविता नृपेश सुसम्प्रदाता सकलक्षितीशः ॥ १५ ॥ इतीरिते ब्राह्मणैः स हृष्टो राजा विशालाधिपतिः प्रयत्नात् ॥ आगत्य तेन प्रवरेण तीर्थे मघासु भक्त्याथ कृतं पितॄणाम् ॥ १६ ॥ पिण्डप्रदानं विधिना प्रयत्ना त्तावद्वियत्युत्तममूर्त्तिकांक्षीन् ॥ पश्यन् स पुंसः सितपी तकृष्णानुवाच राजा किमिदं भवद्भिः ॥ उपेक्ष्यते शंसत सर्वमेव कौतूहलं मे मनसि प्रवृत्तम् ॥ १७ ॥ सित उवाच ॥ अहं सितस्ते जनकोस्मि तात नाम्ना च वृत्तेन कुलेन कर्मणा ॥ अयं च मे जनको रक्तवर्णो नृशंसकृद्ब्रह्महा पापकारी ॥ १८ ॥ अधीश्वरो नाम परः पिताऽस्य कृष्णो वृत्त्या कर्मणा चापि कृष्णः ॥ एतेन कृष्णेन हताः पुरा वै जन्मन्यनेके ऋषयः पुराणाः ॥ १९॥ एतौ मृतौ द्वावपि पुत्र रौद्रमवीचिसंज्ञं नरकं प्रपन्नौ ॥ अधीश्वरो मे जनकः परोऽस्य कृष्णः पिता द्वावपि दीर्घकालम् ॥ २० ॥ अहं च शुद्धेन निजेन कर्मणा शक्रासनं प्राप्तिो दुर्लभं तत् ॥ त्वया पुनर्मन्त्रविदा गयायां पिण्डप्रदानेन बलादिमौ च ॥ संयोजितौ तीर्थपिण्ड प्रदानप्रभावतो यौ नरकस्थितावपि ॥ २१ ॥ पितृन् पिता महांस्तत्र तथैव प्रपितामहान् ॥ प्रीणयामीति तत्तोयं त्वया दत्तमरिन्दम ॥ २२ ॥ तेनास्मद्युगपद्योगो जातो वाक्येन सत्तम ॥ तीर्थप्रभावाद्गच्छ ।मि ।पितृलोकं न संशयः ॥ २३ ॥ अत्र पिण्डप्रदानेन एतौ तव पितामहौ ॥ दुर्गतावपि संसिद्धौ पापकृद्भिर्कृतिङ्कृतौ ॥ २४ ॥ तीर्थप्रभाव एषोऽस्मिन्ब्रह्मन्नस्यापि तत्सुतः ॥ पितुः पिण्डप्रदानेन कुर्याद्दुद्धरणं पुनः ॥ २५ ॥ एतस्मात् कारणात्पुत्र अहमेतौ ।विगृह्य वै ॥ आगतोऽस्मि भवन्तं वै द्रष्टुं यास्यामि साम्प्रतम् ॥ २६ ॥ एतस्मात्कारणाद्वेभ्य भवान्धन्यो मयोच्यते ॥ सकृद्गयाभिगमनं सकृत्पिण्डप्रदापनम् ॥ २७ ॥ दुर्लभं त्वं पुनर्नित्यमास्मिन्क्षेत्रे व्यवस्थितः ॥ किमतु प्रोच्यते रैभ्य तव पुण्यमिदं प्रभो ॥ २८ ॥ येन साक्षाद्गदापाणिर्दृष्टो नारायणः स्वयम् ॥ ततो गदाधरः साक्षादस्मिन्क्षेत्रे व्यवस्थितः ॥ अतोऽतिविख्यातमं तीर्थमेतद्दिजो

त्तम ॥ २९ ॥ वराह उवाच ॥ एवमुक्त्वा महायोगी तत्रैवान्तरधीयत ॥ रैभ्योऽपि च गदापाणेर्हरेः स्तोत्रमथाकरोत् ॥३० ॥ रैभ्य उवाच ॥ गदाधरं विबुधजनैरभिष्टुतं धृतक्षमं क्षुधितजनार्त्तिनाशनम् ॥ शिवं विशालासुर सैन्यमर्दनं नमाम्यहं हृतसकलाशुभं स्मृतौ ॥ ३१ ॥ पुराण पूर्वं पुरुषं पुरुष्टुतं पुरातनं विमलमलं नृणां गतिम् ॥ त्रिविक्रमं हृतधरणिं बलोर्जितं गदाधरं रहसि नमामि केशवम् ॥ ३२ ॥ विशुद्धभावं विभवैरुपावृतं श्रियावृतं विगतमलं विचक्षणम् ॥ क्षितीश्वरैरपगतकिल्बिषैः स्तुतं गदाधरं प्रणमति यः सुखं वसेत् ॥ ३३ ॥ सुरासुरैराचित पादपङ्कजं केयूरहाराङ्गदमौलिधारिणम् ॥ अन्धो शयानं च रथाङ्गपाणिनं गदाधरं प्रणमति यः सुखं वसेत् ॥ ३४ ॥ सितं कृते त्रेतयुगेऽरुणं विभुं तथा तृतीये नीलमुवर्णमच्युतम् ॥ कलौ युगेऽलिप्रतिमं महेश्वरं गदाधरं प्रणमति यः सुखं वसेत् ॥ ३५ ॥ बीजोद्भवो यः सृजते चतुर्मुखं तथैव नारायणरूपतो जगत् ॥ प्रपालयेद्रुद्ररूपुस्तथान्तकृद्गदाधरो जयतु षडर्द्धमूर्तिमान् ॥ ३६ ॥ सत्त्वं रजश्चैव तमो गुणात्रय स्त्वेतेषु विश्वस्य समुद्भवः किल ॥ स चैक एव त्रिविधो गदाधरो दधातु यैर्य मम धर्ममोक्षयोः ॥ ३७ ॥ संसारतोयार्णवदुःखतन्तुभिर्वियोग नक्रक्रमणैःसुभीषणैः॥मज्जन्तमुच्चैः सुतरां महाप्लवो गदाधरो मामुदधौ तु योऽतरत्॥३८॥ स्वयं त्रिमूर्तिः खमिवात्मनात्मनि स्वशक्तिताश्चाण्ड भिदं ससर्ज ह ॥ तस्मिन्नलोत्थासनमाप तेजसं ससर्ज यस्तं प्रणतोऽस्मि भूधरम् ॥ ३९ ॥ मत्स्यादिनामानि जगत्सु चाश्नुते सुरादि संरक्षणतो वृषाकपिः ॥ मखस्वरूपेण स सन्ततो विभुर्गदाधरो मे विदधातु सद्गतिम् ॥ ४० ॥ वराह उवाच ॥ एवं स्तुतस्तदा विष्णु र्भक्त्या रैभ्येण धीमता ॥ प्रादुर्बभूव सहसा पीतवासा जनार्दनः ॥ ४१ ॥ शङ्खचक्रगदापाणिर्गरुडस्थो श्रियद्वृतः ॥ उवाच रैभ्यमम्भीरधीरवाक्पुरुषोत्तमः ॥४२ ॥ तुष्टोऽस्मि रैभ्य भक्त्या ते स्तुत्या चापि द्विजोत्तम ॥ तीर्थस्नानेन च विभो ब्रूहि यत्तेऽभिवाञ्छितम् ॥ ४३ ॥ रैभ्य उवाच ॥ गतिं मे देहि देवेश यत्र ते सनकादयः ॥ वसेयं तत्र येनाहं त्वत्प्रसादाज्जनार्दन ॥ ४४ ॥ देव उवाच ॥ एवमस्त्विति ते ब्रह्मन्नित्युक्त्वाऽन्तरधीयत ॥ भगवानपि रैभ्यस्तु दिव्यज्ञानसमन्वितः ॥ ४५ ॥ क्षणाद्भवूव देवेन परितुष्टेन चक्रिणा ॥ जगाम यत्र ते सिद्धाः सनकाद्या महर्षयः ॥ ४६ ॥ एतच्च रैभ्यनिर्दिष्टं स्तोत्रं विष्णोर्गदाभृतः ॥ यः पठेत्स गयां गत्वा पिण्डदानाद्विशिष्यते ॥ ४७ ॥ इति वराह

॥ ८ ॥

पुराणे आदिकृतवृत्तान्ते रैभ्यस्य तपसा गदाधरस्तोत्रेण चोत्तमलोकप्राप्तिर्नाम सप्तमोऽध्यायः ॥ ७ ॥ इति रैभ्यचरितं समाप्तम् ॥ अथ धर्मव्याधचरितम् ॥ वराह उवाच ॥ योऽसौ वसोः शरीरे तु व्याधो भूत्वा नृपस्य ह ॥ स स्ववृत्त्या स्थितः कालं चतुर्वर्षसहस्रकम् ॥ १ ॥ एकैकं स्वकुटुम्बार्थं हत्त्वा वनचरं मृगम् ॥ भृत्यातिथिदुताशानां प्रीणनं कुरुते सदा ॥ २ ॥ मिथिलायां वरारोहे सदा पर्वणिपर्वणि ॥ पितॄणां कुरुते श्राद्धं स्वाचारेण विचक्षणः ॥ ३ ॥ अग्निं परिचरन्नित्यं वदन् सत्यं सुभाषितम् ॥ प्राणयात्रानुपकरन्तु योऽसौ जीवं न पातयेत् ॥ ४ ॥ एवं तु वसतस्तस्य धर्मबुद्धिर्महातपाः ॥ पुत्रस्त्वज्जुनको नाम बभूव मुनिवद्दशी ॥ ५ ॥ तस्य कालेन महता चारित्रेण च धीमतः ॥ बभूवाज्जुनका नाम कन्या च वरवर्णिनी ॥ ६ ॥ तस्या यौवनकाले तु चिन्तयामास धर्मवित् ॥ कस्येयं दीयते कन्या को वा योग्यश्च वै पुमान् ॥७॥ इति चिन्तयतस्तस्य मतङ्गस्य सुतं प्रति ॥ धर्मव्याधस्य सुव्यक्तं प्रसन्नाख्यं प्रतिब्रुवन् ॥ ८ ॥ एवं संचिन्त्य मातङ्गः प्रसन्नं प्रति सोद्यतः ॥ उवाच तस्य पितरं प्रसन्नायाज्जुनीं भवान् ॥ गृहाण तपतां श्रेष्ठ स्वयन्दत्तां महात्मने ॥ ९ ॥ मतङ्ग उवाच ॥ प्रसन्नोऽयं मम सुतः सर्वशास्त्र विशारदः ॥ गृह्यतामस्यज्जुनकां कन्यां त्वत्सुतां व्याधसत्तम ॥ १० ॥ एवमुक्ते तदा कन्यां धर्मव्याधो महातपाः ॥ मतङ्गपुत्राय ददौ प्रसन्नाय च धीमते ॥ ११ ॥ धर्मव्याधस्तदा कन्यां दत्त्वा स्वगृहमीयिवान् ॥ सापि श्वशुरयोर्भर्तुः शुश्रूषणपराभवत् ॥ १२ ॥ अथ कालेन महता सा कन्याऽज्जुनकाऽशुभा ॥ उक्ता श्वश्वा सुता पुत्री जीव हन्तुस्त्वमीदृशी ॥ न जानासि तपः कर्तुं भर्तुराराधनं तथा ॥ १३ ॥ साऽपि स्वल्पापराधेन भर्त्सिता तनुमध्यमा ॥ पितुर्वेश्मागता बाला रोदमाना मुहुर्मुहुः ॥ १४ ॥ पित्रा पृष्टा किमेतत्ते पुत्रि रोदनकारणम् ॥ एवमुक्ता तदा सा तु कथयामास भामिनी ॥ १५ ॥ श्वश्वाऽहमुक्ता तीव्रेण कोपेन महता पितः ॥ जीवहन्तुः सुतेत्युच्चैरसकृद्व्याधजेति च ॥ १६ ॥ एवच्छ्रुत्वा स धर्मात्मा धर्मव्याधो रुषान्वितः ॥ मतङ्गस्य गृहं सोऽथ गत्वा जनपदेवृतेम् ॥ १७ ॥ तस्यागतस्य सम्बन्धी मतङ्गो जयतां वरः ॥ आसनाद्यार्घ्यपाद्येन पूजयित्वेदमब्रवीत् ॥ १८ ॥ किमागमनकृत्यं ते किं करोम्यागतक्रियाम् ॥ १९ ॥ व्याध उवाच ॥ भोजनं किंचिदिच्छामि भोक्तुं चैतन्यवर्जितम् ॥ कौतूहलेन येनाऽहमागतो भवतो गृहे ॥ २० ॥ मतङ्ग उवाच ॥ गोधूमा व्रीहयश्चैव संस्कृता मम वेश्मनि ॥ भुज्यतां

धर्मविच्छ्रेष्ठ यथाकामं तपोधन ॥ २१ ॥ व्याध उवाच ॥ पश्यामि क्रीदृशास्ते हि गोधूमा व्रीहयो यवाः ॥ स्वरूपेण च सन्त्येते येन वो वेद्मि सत्तम ॥ २२ ॥ वराह उवाच ॥ एवमुक्ते मतङ्गेन शूर्पं गोधूमपूरितम् ॥ अपरं तत्र व्रीहीणां धर्मव्याधाय दर्शितम् ॥ २३ ॥ दृष्ट्वा व्रीहीन् स गोधूमान्धर्मव्याधो वरासनात् ॥ उत्थाय गन्तुमारेभे मतङ्गेन निवारितः ॥२४॥ किमर्थं गन्तुमारब्धं त्वया वद महामते ॥ अमुकेनैव संसिद्धं मद्गृहे चान्नमुत्तमम् ॥ पाचयित्वा स्वयं चैव कस्मात्त्वं नाद्य भुञ्जति ॥ २५ ॥ व्याध उवाच ॥ सहस्रशः कोटिशश्च जीवान्हंसि दिने दिने ॥ अथेदशस्य पापस्य कोऽन्नं भुञ्जति सत्तमान् ॥२६ ॥ अचैतन्यं यदि गृहे विद्यतेऽन्नं सुसंस्कृतम् ॥ तदानीमस्मि संभोक्ता मत्वा तु स्वजनं तव ॥ २७ ॥ अहमेकं कुटुम्बार्थं हन्म्यरण्ये पशुं दिने ॥ तं चेत्पितृभ्यः सत्कृत्य दत्त्वा भुञ्जामि साऽनुगः ॥ २८ ॥ त्वं तु जीवान्बहून्हत्वा स्वकुटुम्बेन सानुगः ॥ भुञ्जसे तेन सततमभोज्यं तन्मतं मम ॥ २९ ॥ ब्रह्मणा तु पुरा सृष्टा ओषध्यः सर्वरुधिरः ॥ यज्ञार्थं तत्तु भूतानां भक्ष्यमित्येव वै श्रुतिः ॥ ३० ॥ दिव्यो भौमस्तथा पैत्रो मानुषो ब्राह्म एव च ॥ एते पंच महायज्ञा ब्रह्मणा निर्म्मिताः पुरा ॥ ३१ ॥ ब्राह्मणानां हितार्थाय इतरेषां च तन्मखाः॥ इतरेषां तु वर्णानां ब्राह्मणैः कारिताः शुभाः ॥३२॥एवं कृत्वा नरो भुक्त्वा तस्माद्ब्राह्मं विशुध्यति ॥ अन्यथा व्रीहयोऽप्येते एकैकं मृगपक्षिणः ॥ मन्तव्या दातृभोक्तॄणां महामांसं तु तत्स्मृतम् ॥ ३३ ॥ मया ते दुहिता दत्ता पुत्रार्थे वरवर्णिनी ॥ सा च त्वद्भार्यया प्रोक्ता दुहिता जन्तुघातिनः ॥ अतोऽर्थमागतोऽहं ते गृहं प्राप्ति समीक्षितुम् ॥ ३४॥ आचारं देवपूजां च अतिथीनां च तर्पणम् ॥ एतेषामेकमप्यत्र कुर्वन्नपि न दृश्यसे ॥ ३५ ॥ तदहं गन्तुमिच्छामि पितॄणां श्राद्धकाम्यया ॥ स्वगृहे नैव भुञ्जामि पितॄणां कार्यमित्युत ॥ ३६ ॥ अहं व्याधो जीवघाती न तु त्वं लोकहिंसकः ॥ मत्सुता जीवघातस्य यदोढा त्वत्सुतेन च ॥३७॥ तन्महत्त्वं च सम्प्राप्तं प्रायश्चित्तं तपोधन ॥ एवमुक्त्वा स चोत्थाय शप्त्वा नारीं तदाम्बरे ॥ ३८ ॥ मा सुषाभिः समं श्वश्वा विश्वासो भवतु क्वचित् ॥ मा च सुषा कदाचित्स्याद्या श्वश्रूं जीवतीमिषेत् ॥ ३९ ॥ एवमुक्त्वा गतो व्याधः स्वगृहं प्रति भामिनि ॥ ततो देवाप्निपुत्रभक्त्या पूजयित्वा विचक्षणः ॥ ४० ॥ पुत्रं चार्जुनकं स्थाप्य स्वसन्तानं महातपाः ॥ धर्मव्याधो जगामाशु तीर्थं त्रैलोक्यविश्रुतम् ॥ ४१ ॥ पुरुषोत्तमाख्यं च

परं तत्र गत्वा समाहितः ॥ तपश्चचार नियमान्पठन्स्तोत्रमिदं धरे ॥४२॥ नमामि विष्णुं त्रिदशारिनाशनं त्रिशालवक्षःस्थलसंश्रिताश्रियम् ॥
सुशासनं नीतिमतां पराङ्गतिं त्रिविक्रमं मन्दरधारिणं सदा ॥ ४३ ॥ दामोदरं निर्जितभूतलं विभा यशोंशुशुभ्रं भ्रमराङ्गसप्रभम् ॥ भवे भवे
दैत्यरिपुं पुरुहुतं नमामि विष्णुं शरणं जनार्दनम् ॥ ४४ ॥ त्रिधा स्थितं तिग्मरथाङ्गपाणिनं नयस्थितं युक्तमनुत्तमैर्गुणैः ॥ निःश्रेयसाख्यं
क्षयितेतरं गुरुं नमामि विष्णुं पुरुषोत्तमं त्वहम् ॥ ४५ ॥ महावराहो हविषां भुजो जनो जनार्दनो मे हितकृच्चतुर्मुखः ॥ महीधरो मामुदधिप्लवे
महान्त पातु विष्णुः शरणार्थिनं तु माम् ॥ ४६॥ मायाततं येन जगत्त्रयं कृतं ययाग्निनेकेन ततं चराचरम् ॥ चराचरस्य स्वयमेव सर्वतः स
मेऽस्तु विष्णुः शरणं जगत्पतिः ॥४७॥ भवे भवे यश्च ससर्ज कं ततो जगत्प्रसूतं सचराचरं त्विदम् ॥ ततश्च रुद्रात्मवति प्रलीयते ततो
हरिर्विष्णुर्हरस्तथोच्यते ॥ ४८ ॥ रवन्दिपृथ्वीपवनादिभास्करा जलं च यस्य प्रभवन्ति मूर्तयः ॥ स सर्वदा मे भगवान् सनातनो ददातु शं
विष्णुरचिन्त्यरूपधृक् ॥ ४९ ॥ इतीरिते तस्य सनातनः स्वयं पुरोवभूवाद्भुतरूपदर्शनः ॥ वरं वृणीष्वेति सनातनोऽब्रवीदनन्तपादोदरबाहु
वक्त्रः ॥ ५०॥ इतीरितो व्याधवरो जगाद प्रदीयतामेष वरः सुतेष्वपि ॥ क्रियाकलापेन तथात्मविद्यया कुरुप्रसूतावपि तेऽनुगामिनः ॥५१॥
ज्ञानोदयस्तस्य कुरुस्य सर्वदा लयस्तथा ब्रह्मणि मे सनातन ॥५२ ॥ इतीरिते तं भगवानुवाच ह प्रतन्त्रबुद्धिर्भवते मया त्वयम् ॥ वरो विभु
प्रश्च कुरुस्य ते मया लयस्तथा ब्रह्मणि शाश्वते तव ॥ ५३ ॥ इतीरिते देववरेण स क्षणात् स्वदेहतस्तेज उदीर्णमेक्षत ॥ ५४ ॥ विसर्जया
मास कविं सनातनं लयं च तत्र प्रतिपेदिवानसौ ॥ इतीरितं स्तोत्रवरं धरे नरः पठिष्यते यश्च शृणोति मानवः ॥ ५५ ॥ हरिं समभ्यर्च्य सदा
ह्युपोषितो विशेषतो विष्णुदिने च मानवः ॥ स याति यत्र स्वयमेव केशवो वसेत मन्वन्तरसप्ततिं सुखम् ॥५६॥ इति वराहपुराणे आदिकृत
वृत्तान्ते धर्म्मव्याधचरितं नामाष्टमोध्यायः ॥ ८ ॥ अथ मत्स्यावतारः ॥ धरण्युवाच ॥ आदौ कृतयुगे नाथ किं कृतं विश्वमूर्तिना ॥
नारायणेन तत्सर्वं श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥ वराह उवाच ॥ पूर्वं नारायणस्त्वेको नासीत्किञ्चिद्धरे परम् ॥ सैक एव रतिं लेभे नैव
स्वच्छन्दकर्मकृत् ॥ २ ॥ तस्य द्वितीयमिच्छाताश्चिन्ता बुद्ध्यात्मिका बभौ ॥ अभावरेवेश संज्ञा या क्षणं भास्करसन्निभा ॥ ३ ॥ तस्यापि

द्विविधा भूता चिन्ताभूद्ब्रह्मणादिनः ॥ उमेति संज्ञया यत्तत्सदा मर्त्ये व्यवस्थिता॥४॥ ओमित्येकाक्षरीभूता सतर्जेमां महीं न्तदा ॥ भूः ससर्ज भुवं स्वोऽपि सतर्ज च ततो महः ॥ ५ ॥ ततश्च जन इत्येव ततश्चात्मा प्रलीयते ॥ एतद्दोतं तथा प्रोतं सूत्रे मणिगणा इव ॥ ६ ॥ जगत् प्रणवतो भूतं शून्यमेतत्स्थितं तदा ॥ येयं मूर्तिर्भगवतः शङ्करः स स्वयं हरिः ॥७॥ शून्यौलोकानिमान्सृष्ट्वा सिसृक्षुर्मूर्त्तिमुत्तमाम् ॥ क्षोभ यित्वा मनोधाम तत्राकारः स्वमात्रतः ॥ स्थितस्तस्मिन्यदा क्षुब्धे ब्रह्माण्डमभवत्तदा ॥ ८ ॥ तस्मिंस्तु शकलीभूते भूलोंकं च व्यव स्थितम् ॥ अपरं भुवनं प्रायान्मध्ये भास्करसन्निभम्॥९॥पुरा नवूकसंस्थो यः पद्मकोशो व्यवस्थितः ॥ स हि नारायणो देवः प्राजापत्येन तेजसा ॥१०॥ अकाराद्यं स्वरं ताभ्यां हलं च विससर्ज ह ॥ अमूर्त्तेसृष्टो ज्ञात्राणि उदगायत्तदा हि सः॥११॥सृष्ट्वा पुनरमेयात्मा चिन्तयामास धारणम् ॥ तस्य चिन्तयतो नेत्रात्तेजः समभवन्महत् ॥ १२ ॥ दक्षिणं वह्निषड्भागं वामं तुहिनसन्निभम् ॥ तद्दृष्ट्वा चन्द्रसूर्यौ तु कल्पितौ परमेष्ठिना ॥१३॥ ततः प्राणः समुत्तस्थौ वायुश्च परमेष्ठिनः ॥ स एव वायुर्भगवान्योऽद्यापि हृदि नो विभुः ॥१४॥ तस्माद्वह्निः समुत्तस्थौ तस्मादग्नेर्जलं महत् ॥ य एषाग्निः स वै तेजो ब्राह्मं परमकारणम् ॥१५॥ बाहुभ्यामप्यसौ तेजः क्षात्रं तेजः ससर्ज ह ॥ ऊरुभ्यामपि वैश्यांश्च पद्भ्यां शूद्रांस्तथा विभुः ॥ १६ ॥ ततस्तु ससृजे यक्षान्राक्षसांश्च तथा विभुः ॥ चतुर्विधैस्तु भूलोंकं भुवो लोकं वियद्वरैः ॥ १७ ॥ भूतैः स्वमार्गगैरन्यैः स्वर्लोकं समपूरयत् ॥ महर्लोकं तथा तैस्तैर्भूतैश्च सनकादिभिः ॥ १८॥ जनोलोकं ततश्चैव वैराजैः समपूरयत् ॥ तपोलोकं ततो देवैस्तपोनिष्ठैरपूरयत् ॥ १९ ॥ अपुनर्मारकैर्देवैः सत्यलोकमपूरयत् ॥ सृष्टिं सृष्ट्वा तथा देवो भगवान्भूतभावनः ॥ कल्पसंज्ञां तदामोघां जगन्ति परमेश्वरः ॥ २० ॥ तस्मिन् जगति भूलोंको भुवोलोकश्च जातते ॥ स्वर्लोकश्च त्रयोऽप्येते जायन्ते नात्र संशयः ॥ २१ ॥ सुते तु देवे कल्पान्ते तावती रात्रिरिष्यते ॥ त्रैलोक्यमेतत्सकलं स्यात्तथोपप्लुताङ्कृतम् ॥ २२ ॥ ततो राज्यां व्यतीतायामुत्थितः कमलेक्षणः ॥ चिन्तयामास तान्वेदान्मातरं च चतुर्ष्वपि॥ २३॥ चिंतयानः स देवेशस्तान्वेदान्नाध्यगच्छत ॥ लोकमार्गास्थितिं कर्तुं निद्राज्ञानेन मोहितः ॥ चिंतयामास देवेशो नात्र देवो व्यवस्थितः ॥ २४ ॥ ततः स्वमूर्त्तौ तोयाख्ये लीनान्दृष्ट्वा महेश्वरः ॥ जिघृक्षुश्चिन्तयामास मत्स्यो भूत्वाऽऽ

विशञ्जलम्॥२५॥ एवं ध्यात्वा महामत्स्यस्तत्क्षणात्समजायत॥ विवेश्श च जलं देवः समन्तात्सोभयन्निव ॥२६॥ तस्मिन् प्रविष्टे सहसा जलं तु महामहीधृग्वपुषि प्रकाशम् ॥ मात्स्यं गते देववरे महोदधिं हरिं स्तवैस्तुष्टुवुरुद्धतक्षितिम् ॥ २७ ॥ नमोऽस्तु वेदान्तरगाप्रतर्क्य नमोऽस्तु नारायण मत्स्यरूप॥नमोऽस्तु ते सुस्वर विश्वमूर्ते नमोऽस्तु विद्याद्रपरूपधारिन् ॥२८॥ नमोस्तु चन्द्रार्क अनेकरूप जलान्तविश्रस्थित चारुनेत्र॥नमोस्तु विष्णो शरणं व्रजामः प्रपाहि नो मत्स्यतनुं विहाय॥२९॥त्वया ततं विश्वमनन्तमूर्त्ते पृथङ्न ते किञ्चिदिहास्ति देव॥भवान्न चास्य व्यतिरिक्तमूर्त्तिस्त्वत्तो वयं ते शरणं प्रपन्नाः ॥ ३० ॥ खात्मेन्दुवह्निश्च मनश्च रूपं पुराणमूर्त्तेस्तव चाञ्जनेत्र ॥ क्षमस्व शंभो यदि भक्तिहीनं त्वया जगद्भासति देवदेव ॥ ३१॥ विरुद्धमेतत्तव देवरूपं शुभापणं सुस्वनमद्वितुल्यम् ॥ पुराण देवेश जगन्निवास शमं प्रयाह्यच्युत तीव्रभानो ॥ ३२ ॥ नमाम सर्वे शरणं प्रपन्ना भयाच्च ते रूपमिदं च दृष्ट्वा ॥ लोके समस्ते भवता विनाऽद्य न विद्यते देहगतं पुराणम् ॥३३ ॥ एवं स्तुतस्तदा देवो जलस्थाञ्जगृहे च सः ॥ वेदान्तोपनिषच्छास्त्राण्यतः स्वं रूपमास्थितः ॥३४॥ यावत्स्वमूर्त्तिर्भगवान्तावदेव जगत्त्विदम्॥ कूटस्थे तळयं याति विकृतस्थे विवर्द्धते ॥ ३५ ॥ इति वराहपुराणे आदिकृतवृत्तान्ते सृष्टिवर्णने मत्स्यावतारतत्स्तवनिरूपणंनाम नवमोध्यायः ॥ ९॥ अथ सृष्टिः ॥ वराह उवाच ॥ एवं सृष्ट्वा जगत्सर्वं भगवान्भूतभावनः ॥ विरराम ततः सृष्टिर्व्यवर्द्धत धरे तदा ॥१॥ वृद्धाया मथ सृष्टौ तु सर्वे देवाः पुरातनम् ॥ नारायणाख्यं पुरुषं यजन्तो विविधैर्मखैः ॥ २ ॥ द्वीपेषु चैव सर्वेषु वर्षेषु च मखैर्हरिम् ॥ देवाः सत्रे र्महद्भिस्ते यजन्तः श्रद्धयान्विताः ॥ ३ ॥ तोषयामासुरत्यर्थं स्वं पूज्यं कर्तुमीप्सवः ॥ एवं तोषयतां तेषां बहुवर्षसहस्रकः ॥ कालो देवस्तदा तुष्टः प्रत्यक्षत्वं जगाम ह ॥ ४ ॥ अनेकबाहूदरवक्त्रनेत्रो महागिरेः शृङ्गमिवोल्लिखंस्तदा ॥ उवाच किं कार्यमथो सुरेशः प्रब्रूत तं देववरा वरं वः ॥ ५ ॥ देवा ऊचुः ॥ जयस्व गोविन्द महानुभाव त्वया वरं नाथ वरेण देवाः ॥ मनुष्यलोकेऽपि भवन्तमाद्यं विहाय नास्मान्भवतेह कश्चित् ॥ ६ ॥ चन्द्रादित्यौ वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ॥ सर्वे भवन्तं शरणागताः स्म कुरुष्व पूज्यानिह विश्व मूर्त्ते ॥ ७॥ एवमुक्तस्तदा तैस्तु महायोगीश्वरो हरिः ॥ करोमि सर्वान्वः पूज्यानित्युक्त्वाऽन्तरधीयत ॥८॥ देवा अपि निजैर्कांशै गतवन्तः

सनातनाः ॥ स्तुवन्तः परमेशोऽपि त्रिविधं भावमास्थितः॥९॥ एवं त्रिधा जगद्धाता भूत्वा देवान्महेश्वरः ॥ आराध्य सात्त्विकं राजस्तामसं च त्रिधा स्थितम् ॥ १० ॥ सात्त्विकेन पठेद्वेदान्यज्ञेन देवताः ॥ आत्मनोऽवयवो भूत्वा राजसेनापि केशवः ॥ ११ ॥ स कालरूपिणं रौद्रं प्रकृत्या शूलपाणिनम् ॥ आत्मनो राजसीं मूर्त्तिं पूजयामास भक्तितः ॥ १२ ॥ तामसेनापि भावेन असुरेषु व्यवस्थितः ॥ १३ ॥ एवं त्रिधा जगद्धाता भूत्वा देवान्महेश्वरः ॥ आराधयामास ततो लोकोऽपि विविधोभवत् ॥१४ ॥ एवं विष्णुर्महेशानां नाम गृह्णन्व्यवस्थितः ॥ स च नारायणो देवः कृते युगवरे प्रभुः ॥१५॥ त्रेतायां रुद्ररूपस्तु द्वापरे यज्ञमूर्त्तिमान् ॥ कलौ नारायणो देवो बहुरूपो व्यजायत ॥ १६ ॥ तस्यादिकर्तुर्वै विष्णोश्चरितं भूरितेजसः ॥ शृणुष्व सर्वं सुश्रोणि गदतो मम भामिनि ॥ १७ ॥ असीत्कृतयुगे राजा सुप्रतीको महाबलः ॥ तस्य भार्याद्वयं चासीदविशिष्टं मनोरमम् ॥ १८ ॥ विद्युत्प्रभा कान्तिमती तयोरेते तु नामनी ॥ तयोः पुत्रं समं राजा न लेभे बलवानपि ॥१९॥ यदा तदा मुनिश्रेष्ठमात्रेयं वीतकल्मषम् ॥ तोषयामास विधिना चित्रकूटे नगोत्तमे ॥२०॥ स ऋषिस्तोषितस्तेन दीर्घकालं वरार्थिना ॥ वरं दित्सुतया याचद्भत्रेदत्रिजो मुनिः ॥ २१ ॥ तावद्दिग्द्रोऽपि करिणा गतः पार्श्वेन तस्य ह ॥ देवसेन्यैः परिवृतस्तूष्णीमेव महाबलः ॥ २२ ॥ तं दृष्ट्वा तद्गतप्रीतिरप्रीतिं प्रीतवान्मुनिः ॥ चुक्रोप देवराजाय शापमुग्रं ससर्ज ह ॥२३॥ यस्मात्त्वया ममावज्ञा कृता मूढ दिवस्पते ॥ ततस्त्वं चालितो राज्यादन्यलोके वसिष्यसि ॥ २४ ॥ एवमुक्त्वाऽपि कोपेन सुप्रतीकं च भूपतिम् ॥ उवाच राजन्युत्रस्ते भविता दृढविक्रमः ॥ २५ ॥ इन्द्ररूपोपमः श्रीमानुग्रच्छत्रः प्रतापवान् ॥ विद्याप्रभावतत्त्वज्ञः क्रूरकर्मा भविष्यति ॥ २६ ॥ दुर्जयोऽतिबली राजा एवमुक्त्वा गतो मुनिः ॥ सोऽपि राजा सुप्रतीको भार्यायां गर्भमावहत् ॥ २७ ॥ विद्युत्प्रभायां धर्मज्ञः साऽपि काले त्वसूयत ॥ तस्याः पुत्रः समभवद्दुर्जयाख्यो महाबलः ॥ २८ ॥ जातकर्मादिसंस्कारं तस्य चक्रे मुनिः स्वयम् ॥ तस्य चेष्टबलेनासौ मुनिः सौम्यो बभूव ह ॥ २९ ॥ वेदशास्त्रार्थविद्यायां पारगो धर्मवान् शुचिः ॥ या द्वितीयाऽभवत्पत्नी तस्य राज्ञो महात्मनः ॥ ३० ॥ नाम्ना कान्तिमती धन्या तस्याः पुत्रो बभूव ह ॥ नाम्ना सुयुग्र इत्येवं वेदवेदाङ्गपारगः ॥ ३१ ॥ अथ कालेन महता स राजा राजसत्तमः ॥

॥११॥

सुप्रतीकः सुतं दृष्ट्वा दुर्जयं योग्यमन्तिके॥ ३२॥ आत्मनो वृद्धभावं च वाराणस्यधिपो बली॥ चिन्तयामास राज्यार्थं दुर्जयं प्रति भामिनि॥ ३३॥
एवं संचिन्त्य धर्मात्मा तस्य राज्यं ददौ नृपः ॥ स्वयं च चित्रकूटाख्यं पर्वतं स जगाम ह ॥ ३४ ॥ दुर्जयोऽपि महद्राज्यं हस्त्यश्वरथ
वाजिभिः ॥ संयोज्य चिन्तयामास राज्यवृद्धिं प्रति प्रभुः ॥ ३५ ॥ एवं संचिन्त्य मेधावी हस्त्यश्वरथपत्तिभिः ॥ समेतां वाहिनीं कृत्स्नां उत्तरां
दिशमाश्रितः ॥ ३६ ॥ तस्य चोत्तरतो देशाः सर्वे सिद्धा महात्मनः ॥ भारताख्यमिदं वर्षं साधयित्वा सुदुर्जयः ॥ ३७ ॥ ततः किंपुरुषं
नाम वर्षं तेनापि साधितम् ॥ ततः परतरं चान्यद्धरिवर्षं जिगाय सः ॥३८॥ रम्यं रोमावतं वापि कुरुं भद्राश्ववेष च ॥ इलावृतं मेरुमध्यमेतत्सर्वं
जिगाय सः ॥ ३९ ॥ जित्वा जम्ब्वाख्यमेतद्धि द्वीपं यादसां नृपः ॥ जगाम देवराजानं जेतुं सर्वसुरान्वितम् ॥ ४० ॥ मेरुपर्वतमारुह्य देव
गन्धर्वदानवान् ॥ गुह्यकाञ्किन्नरान्दैत्यांस्ततो ब्रह्मसुतो मुनिः ॥ ४१ ॥ नारदो दुर्जयजयं देवराजाय शंसते ॥ तत इन्द्रस्त्वरायुक्तो लोकपालैः
समन्वितः ॥ ४२ ॥ जगाम दुर्जयं हन्तुं सोऽचिरेणाऽनिर्जितम् ॥ विहाय पर्वतं मेरुं मर्त्यलोकमिहागतः ॥ ४३ ॥ पूर्वदेशे च देवेन्द्रो लोक
पालैः समं प्रभुः ॥ स्थितवांस्तस्य सुमहच्चरितं सम्भविष्यति ॥ ४४ ॥ दुर्जयश्च सुराजित्वा यावत्प्रतिनिवर्तते ॥ गन्धमादनपृष्ठे तु स्कन्धा
वारनिवेशनम् ॥ ४५ ॥ कृत्वाऽवस्थितसंभारमागतौ तापसौ तु तम् ॥ तावागतौ तथाऽवूचां राजन् दुर्जय लोकपाः ॥ निवारितास्त्वया सर्वे
लोकपालैर्विना जगत् ॥ ४६ ॥ न प्रवर्तेत्ततो देहि तत्परं सुखमुत्तमम् ॥ एवमुक्ते ततस्तौ तु दुर्जयः प्राह धर्मवित् ॥४७॥ कौ भवन्ताविति
ततस्तावूचतुरस्मिन्नौ ॥ विद्युत्सुविद्युन्नामानावसुराविति नामतः ॥ ४८ ॥ त्वया सम्प्रति चेच्छामो धर्मे सत्सु सुसंस्कृतम्॥लोकपालानां
सर्वमावांकुर्म कुर्वः सुदुर्जय ॥ ४९ ॥ एवमुक्ते दुर्जयेन तौ स्वर्गे सन्निवेशितौ ॥ लोकपालौ कृतौ सद्यस्ततोऽन्तर्द्धानमापतुः ॥ ५० ॥ तयो
रपि महत्कर्म चरितं च धराधरे ॥ भविष्यति महाराजो दुर्जयो मन्दरोपरि ॥ ५१ ॥ धनदस्य वनं दिव्यं दृष्ट्वा नन्दनसन्निभम् ॥ मुदा वभ्राम
रम्येऽस्मिन्त्स यावद्राजसत्तमः ॥ ५२ ॥ तावत्सुवर्णवृक्षाधः कन्याद्वयमपश्यत ॥ अतीव रूपसम्पन्नमतीवाद्भुतदर्शनम् ॥ ५३ ॥ दृष्ट्वा तु
विस्मयाविष्टः क इमे शुभलोचने॥ एवं संचिन्त्य यावत्स क्षणमेकं व्यवस्थितः॥५४॥तस्मिन्क्षणे तावदृषौ तापसौ सोऽवलोकयत्॥ तौ दृष्ट्व

सहसा राजा ययौ प्रीत्या परां मुदम् ॥ ५५॥ अवतीर्य द्विषाद्गर्णं नमश्चक्रे तयोः स्वयम् ॥ उपविष्टः स ताभ्यां तु कौशे दत्ते वरासने॥५६॥
पृष्टः कस्त्वं कुतश्चासि कस्य वा किमिह स्थितः ॥ तो प्रहस्याब्रवीद्राजा सुप्रतीकेति विश्रुतः ॥ ५७ ॥ तस्य पुत्रः समुत्पन्नो दुर्जयो नाम
नामतः ॥ पृथिव्यां सर्वराजानो जिगीषन्निह सत्तमौ ॥ ५८॥ आगतोऽस्मि ध्रुवं चैव स्मर्तव्योऽहं तपोधनौ ॥ भवन्तौ को समाख्यातां ममानु
ग्रहकाङ्क्षया ॥ ५९ ॥ तापसावूचतुः ॥ आवां हेतूपहेत्वाख्यौ मनोः स्वायंभुवः सुतौ ॥ आवां देवाविनाशाय गतौ स्वो मेरुपर्वतम् ॥ ६० ॥
तत्रावयोर्महासैन्यं गजाश्वरथसङ्कुलम्॥जिगाय सर्वदेवानां शतशोऽथ सहस्रशः॥६१॥ते च देवा महत्सैन्यं दृष्ट्वा सैन्यं निपातितम्॥असुरैरुज्झित
प्राणं ततस्ते शरणं गताः ॥ ६२ ॥ क्षीराब्धौ यत्र देवेशो हरिः शेते स्वयं प्रभुः ॥ तत्र विज्ञापयामासुः सर्वे प्रणतिपूर्वकम् ॥ ६३ ॥ देवदेव
हरे सर्वं सैन्यं त्वमुरसत्तमैः ॥ पराजितं परित्राहि भीतं विह्वलचेतनम् ॥ ६४॥ त्वया देवासुरे युद्धे पूर्वं त्राताः स्म केशव॥सहस्रबाहोः क्रूरस्य
समरे कालनेमिनः ॥ ६५ ॥ इदानीमपि देवेश असुरो देवकण्टकौ ॥ हेतूपहेतूनामानौ बहुसैन्यपरिच्छदौ ॥६६ ॥ तौ हत्वा त्राहि नः सर्वान्
देवदेव जगत्पते ॥ एवमुक्तस्ततो देवो विष्णुर्नारायणः प्रभुः ॥ ६७॥ अहं यस्यामि तौ हन्तुमित्युवाच जगत्पतिः ॥ एवमुक्तास्ततो देवा मेरु
पर्वतसन्निधौ ॥ ६८ ॥ प्रतस्थुस्तेऽथ मनसा चिन्तयन्तो जनार्दनम् ॥ तैः संचिन्तितमात्रस्तु देवश्चक्रगदाधरः ॥६९॥आवयोः सैन्यमाविश्य
एक एव महाबलः ॥ एकधा दशधात्मानं शतधा च सहस्रधा ॥ ७० ॥ लक्षधा कोटिधा कृत्वा स्वभूत्या च जगत्पतिः ॥ एवं स्थिते देववरेऽ
स्मत्सैन्ये महाबलः ॥ ७१ ॥ यः कश्चिदसुरो राजन्नावयोर्बलमाश्रितः ॥ स हतः पतितो भूमौ दृश्यते गतचेतनः ॥ ७२ ॥ एवं तत्सहसा
सैन्यं मायया विश्वमूर्त्तिना ॥ निहत्य मांसलकलं पत्तिध्वजमाकुलम् ॥ ७३ ॥ चतुरङ्गं बलं सर्वं हत्वा देवो रथाङ्गधृक् ॥ आवां शेषावथो
दृष्ट्वा गतोऽन्तर्द्धानमीश्वरः ॥ ७४॥ आवयोरीदृशं कर्म दृष्टं देवस्य शार्ङ्गिणः ॥ ततस्तमेव शरणं गतावाराधनाय वै ॥७५॥ त्वं चास्म
न्मित्रतनयः सुप्रतीकात्मजो नृपः ॥ इमे च आवयोः कन्ये गृहाण मनुजेश्वर ॥ हेतूकन्या सुकेशी तु मिश्रकेशी प्रहेतूजा ॥ ७६ ॥ दुर्जय
स्त्वेवमुक्तस्तु हेत्रा वै ते उभे शुभे ॥ कन्ये जग्राह धर्मेण भार्यार्थं मनुजेश्वरः ॥ ७७ ॥ ते लब्ध्वा सहसा राजा मुदा परमया युतः ॥ आज

॥१२॥

गाम स्वकं राष्ट्रं निजसैन्यसमावृतः ॥ ७८ ॥ ततः कालेन महता तस्य पुत्रद्वयं बभौ ॥ सुकेश्याः प्रभवः पुत्रो मिश्रकेश्याः सुदर्शनः ॥ ७९ ॥ स राजा दुर्जयः श्रीमाँल्लब्ध्वा पुत्रद्वयं शुभम् ॥ स्वयं कालान्तरे श्रीमान्ग्रामारण्यमान्तिके ॥ ८० ॥ तत्रस्थो वनजान्जन्तून्बन्धयन्वै भयङ्करान् ॥ ददर्शारण्यमाश्रित्य मुनिं स्थितमकल्मषम् ॥ ८१ ॥ तपस्यन्तं महाभागं नाम्ना गौरमुखं शुभम् ॥ ऋषिवृन्दस्य गोप्तारं त्रातारं पापिनां स्वयम् ॥ ८२ ॥ तस्याश्रमो विमलजलाविलो मरुत्सुगन्धिवृक्षमवरो द्विजन्मनः ॥ राज जीमूत इवाम्बरान्महीं सुपागतः प्रवरविमानवद्बहुः ॥ ८३ ॥ ज्वलन्मुखाग्निप्रतिभासिताम्बरः सुशुद्धसंवासितवेशकुड्कुकः ॥ शिष्यैः समुचारितसामनादकः सुरूपयोषिन्मुनिकन्यकायुतः ॥ इतीदृशोऽस्यावसथो वराश्रमे सुपुष्पिताशेषतरुप्रसूनकः ॥ ८४ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते सृष्टिवर्णने दुर्जयचरिते दशमोऽध्यायः ॥ १० ॥ पुनर्दुर्जयचरितम् ॥ वराह उवाच ॥ ततस्तमीदृशं दृष्ट्वा तदा गौरमुखाश्रमम् ॥ दुर्जय श्चिन्तयामास रम्यमाश्रमपण्डितम् ॥१॥ प्रविशाम्यत्र पश्यामि ऋषीन्परमधार्मिकान् ॥ चिन्तयित्वा तदा राजा प्रविवेश तमाश्रमम् ॥ २ ॥ तस्य प्रविष्टस्य ततो राज्ञः परमहर्षितः ॥ चकार पूजां धर्मात्मा तदा गौरमुखो मुनिः ॥३॥ स्वागतादिक्रियाः कृत्वा कथान्ते तं महामुनिः ॥ स्वशक्त्यहं नृपश्रेष्ठ सानुगस्य तु भोजनम् ॥ करिष्यामि प्रसुच्यन्तां साधु वाहा इति द्विजः ॥ ४ ॥ एवमुक्त्वा स्थितस्तूष्णीं स मुनिः शंसितव्रतः ॥ राजापि तस्थौ तद्भक्त्या स्वसहायैः समन्वितः ॥ ५ ॥ अक्षौहिण्यो बलस्यास्य पञ्चमात्रं तदा स्थिताः ॥ अयं च तापसः किं मे दास्यते भोजनं त्विह ॥ ६ ॥ निमन्त्र्य दुर्जयं विप्रस्तदा गौरमुखो नृपम् ॥चिन्तयामास किं चास्य मया देयं तु भोजनम् ॥७॥ एवं चिन्तयतस्तस्य महर्षेर्भावितात्मनः ॥ स्थितो मनसि देवेशो हरिर्नारायणः प्रभुः ॥ ८ ॥ ततः संस्मृत्य मनसा देवं नारायणं तदा ॥ तोषयामास गङ्गायां प्रविश्य मुनिसत्तमः ॥९॥ धरण्युवाच ॥ कथं गौरमुखो विष्णुं तोषयामास भूधर ॥ एतन्मे कौतुकं श्रोतुं सम्यगिच्छा प्रवर्तते ॥ १० ॥ वराह उवाच ॥ नमोऽस्तु विष्णवे नित्यं नमस्ते पीतवाससे ॥ नमस्ते चाद्यरूपाय नमस्ते जलरूपिणे ॥ ११ ॥ नमस्ते सर्वसंस्थाय नमस्ते जलशायिने ॥नमस्ते क्षितिरूपाय नमस्ते तैजसात्मने ॥१२॥नमस्ते वायुरूपाय नमस्ते व्योमरूपिणे॥त्वं देवः सर्वभूतानां

प्रभुस्त्वमसि हव्यछपः ॥ १३ ॥ त्वमोङ्कारो वषट्कारः सर्वत्रैव च संस्थितः ॥ त्वमादिः सर्वदेवानां तव चादिर्न विद्यते ॥ १४ ॥ त्वं भूतस्त्वं च भुवो स्वस्त्वं जनस्त्वं च महः स्मृतः ॥ त्वं तपस्त्वं च सत्यं च त्वयि देव चराचरम् ॥१५॥ त्वत्तो भूतमिदं सर्वं विश्वं त्वत्तो ऋगादयः ॥ त्वत्तः शास्त्राणि जातानि त्वत्तो यज्ञाः प्रतिष्ठिताः ॥ १६ ॥ त्वत्तो वृक्षा वीरुधश्च त्वत्तः सर्वा वनौषधी ॥ पशवः पक्षिणः सर्पास्त्वत्त एव जनार्दन ॥ १७ ॥ ममापि देवदेवेश राजा दुर्जयसंज्ञितः ॥ आगतोऽभ्यागतस्तस्य चातिथ्य कर्तुमर्हसे ॥ १८ ॥ तस्य मे निर्धनस्याद्य देवदेव जगत्पते ॥ भक्तिनम्रस्य देवेश कुरुष्वान्नाद्यसञ्चयम् ॥ १९ ॥ यं यं स्पृशामि हस्तेन यं च पश्यामि चक्षुषा ॥ काष्ठं वा तृणकन्दं वा तत्तदन्नं चतुर्विधम् ॥ २० ॥ तथा त्वन्यतमं वापि यद्भक्षार्थं मनसा मया ॥ तत्सर्वं सिद्ध्यतां मह्यं नमस्ते परमेश्वर ॥ २१ ॥ वराह उवाच ॥ इति स्तुत्या तु देवेशस्तुतोप जगता पतिः ॥ प्रीतस्तस्य स्वकं रूपं दर्शयामास केशवः ॥ २२ ॥ उवाच सुप्रसन्नात्मा ब्रूहि विप्र वरं परम् ॥ एवं श्रुत्वाक्षिणी यावदुन्मीलयति वै मुनिः ॥ २३ ॥ तदा शङ्खगदापाणिः पीतवासा जनार्दनः ॥ गरुडस्थोऽपि तेजस्वी द्वादशादित्यसुप्रभः ॥ २४ ॥ दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थितिः ॥ यदि भा सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ २५ ॥ तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ॥ ददर्श स मुनिर्देवे विस्मयोत्फुल्ललोचनः ॥ २६ ॥ ननाम शिरसा देवं कृताञ्जलिरथाब्रवीत् ॥ यदि मे वरदो देवो भूयाद्भक्तस्य केशवः ॥ २७ ॥ इदानीमेष नृपतिर्यथा सबलवाहनः ॥ ममाश्रमे कृताहारः श्वः प्रयाता स्वकं गृहम् ॥ २८ ॥ इत्युक्त स्तस्य देवेशो वदतः संबभूव ह ॥ चित्तसिद्धिं ददौ तस्मै मार्गं च सुमहाप्रभम् ॥ २९ ॥ तं दत्त्वान्तर्दधे देवः स च गौरमुखो मुनिः ॥ जगाम चाश्रमं पुण्यं नानाऋषिनिषेवितम् ॥३० ॥ तत्र गत्वा स विप्रेन्द्रश्चिन्तयामास वै मुनिः ॥ हिमवच्छिखराकारं महाश्रमिव चोन्नतम् ॥ शशाङ्करश्मिसङ्काशं गृहं वै शतभूमिकम् ॥ ३१ ॥ तादृशानां सहस्राणि लक्षकोट्यश्च सर्वशः ॥ गृहाणि निर्ममे विप्रो विष्णोर्लब्धवरस्तदा ॥ ३२ ॥ प्राकाराणि तथोपान्ते तल्पोद्यानकानि च ॥ कोकिलाकुलयुष्टानि नानाद्विजवराणि च ॥ ३३ ॥ चम्पकाशोकपुन्नाग नागकेसरवन्ति च ॥ नानाजात्य स्तथा वृक्षा गृहोद्यानेषु सर्वशः ॥ ३४ ॥ हस्तिनां हस्तिशालाश्च तुरगाणां च मन्दुराः ॥ चकार सञ्चयान्

॥१३॥

विप्रो नाना भक्ष्यस्य सर्वशः ॥ ३५ ॥ भक्ष्यं भोज्यं तथा लेह्यं चोष्यं बहुविधं तथा ॥ चकारान्नाद्यविषयं हेमपात्राणि सर्वतः ॥ ३६ ॥ एवमुक्त्वा स विप्रस्तु राजानं भूरितेजसम् ॥ उवाच सर्वसैन्यानि प्रविशन्तु गृहानिति ॥ ३७ ॥ एवमुक्तस्ततो राजा तद्वई पर्वतोपमम् ॥ प्रविवेशान्तरेष्वन्ये भृत्या विविशुराशु वै ॥३८॥ततस्तेषु प्रविष्टेषु तदा गोमुखो मुनिः ॥ प्रगृह्य तं मणिं दिव्यं राजानं चेदमब्रवीत् ॥३९॥ मज्जनाभ्यवहारार्थं पथि प्रक्रामते तथा ॥ विलासिनीस्तथा दासान्प्रेषयिष्यामि ते नृप ॥ ४० ॥ एवमुक्त्वा स विप्रेन्द्रस्तं मणिं वैष्णवं तदा ॥ एकान्ते स्थापयामास राज्ञस्तस्य प्रपश्यतः ॥ ४१ ॥ तस्मिन्स्थापितमात्रे तु मणौ शुद्धसमप्रभे ॥ निश्चेरुर्योषितस्तत्र दिव्यरूपाः सहस्रशः ॥ ४२ ॥ सुकुमाराङ्गरागाद्याः सुकुमारा वराङ्गनाः ॥ सुकपोलाः सुचार्व्यङ्गयः सुकेशान्ताः सुलोचनाः ॥ ४३ ॥ काश्चित्सौवर्ण पात्रीश्च गृहीत्वा सम्प्रतस्थिरे ॥ एवं योषिद्गणास्तत्र नराः कर्मकरास्तथा ॥ ४४ ॥ निर्जग्मुस्तस्य नृपतेः सर्वे भृत्या नृपस्य ह ॥ केवलं भोजनं पूर्वं परिधानं च सर्वशः ॥४५॥ ताः स्त्रियः सर्वभृत्यानां राजमार्गेण मज्जनम् ॥ ददृशुस्ते नरास्तासां हस्तिनां चारुगामिनाम् ॥४६॥ नानाविधानि तूर्याणि तत्र वाद्यन्त सर्वशः ॥ मज्जतो नृपतेस्तस्य ननृतुश्चान्ययोषितः ॥ ४७ ॥ अपराश्च जगुस्तत्र शक्रस्येव प्रमज्जतः ॥ एवं दिव्योपचारेण स्नात्वा राजा महामनाः ॥ ४८ ॥ चिन्तयामास राजेन्द्रो विस्मयाविष्टचेतनः ॥ किमिदं मुनिसामर्थ्यात्तपसो वाथवा मणेः ॥४९॥ एवं स्नात्वोत्तमे वस्त्रे परिधाय नृपस्तथा ॥ विविधान्नं तु विधिना बुभुजे स नृपोत्तमः ॥ ५० ॥ यथा च नृपतेः पूजा कृता तेन महर्षिणा ॥ तद्वद्भृत्यजनस्यापि चकार मुनिसत्तमः ॥ ५१ ॥ यावत्स राजा बुभुजे सभृत्यबलवाहनः ॥ तावदस्तगिरिं भानुर्जगामारुणतप्रभः ॥ ५२ ॥ ततस्तु रात्रिः समपद्यताऽधुना शरच्छशाङ्कोज्ज्वलरुक्ष्मभण्डिता ॥ करोति रागं स च रोहिणीधवः सुसङ्गतं सौम्यगुणैर्युतोपि च ॥ ५३ ॥ भृगुद्रहः कृष्णतरांशुभानुना सहोद्यतो दैत्यगुरुः सुराधिपः ॥ अथान्यथापक्षगतो न राजते स्वभावयोगेन मतिस्तु देहिनाम् ॥ ५४ ॥ सुरक्ततां भूमिसुतश्च मुञ्चते राहुः सितं चन्द्रमसांशवः सिताः ॥ युक्तः स्वभावो जगतः सुरासुरैर्ननु स्वभावो बलवीर्यकृन्नृपः ॥ ५५ ॥ शनैश्चरास्यापितरश्मिमण्डले सूर्यांशसिद्धान्तकथेव निर्मले ॥ करोति केतुर्न परो महत्तमस्तदा

कुशीलेषु गतिश्च निर्मला ॥ ५६ ॥ बुधोचबुद्धिर्नगतो विभावयत्रराज राज्ञस्तनयः स्वकर्मभिः ॥ भृतीच्छुकः कक्षविवाहिताश्चिराद्भवेदयं साधुषु सम्मितो ध्रुवम् ॥ ५७ ॥ करोति केतुः कपिलं वियाचिरं राज्ञः सुराणां पथि संस्थितो भृशम् ॥ न दुर्जनः सज्जनसंसदि क्वचित्करोति शुद्धं निजकर्मकौशलम् ॥ ५८ ॥ शशाङ्करश्मिप्रतिभासिता अपि प्रसादमीयुर्न रतीः पदेपदे ॥ कुलेभुवः सम्भवधर्मपत्न्यो महांशुयोगान्महतः समुव्रतिः ॥ ५९ ॥ त्रिदोषसंक्रान्तिकृतोऽस्य सर्वशः सुतेन राज्ञो वरुणस्य सूर्यजाः ॥ चिरं जिता कौशिकसत्रिवेशिता न वेद कर्म्म क्वचिदन्यथा भवेत् ॥ ६० ॥ द्रव्द्राः समेता सुनयः शिशुः पुरा हरिं य आराधितवान्नृपासनम् ॥ लक्ष्म्यापि बुद्ध्या सुचिरं प्रकाशितं ध्रुवेण विष्णुस्मरणेन दुर्लभम् ॥ ६१ ॥ इतीव सा रात्रिरभून्मुनेः शुभे वराश्रमे दुर्जयभूपतेः शुभा ॥ सभृत्यवर्गः सगजाश्ववन्दिनां सुभक्तवस्त्राभरणादिपूजया ॥६२॥ इतीदृशो ये वररत्नचित्रिताः सुपट्टसंवीतवरान्विताः सदा ॥ गृहेषु पर्यङ्कवराः समास्थिताः सुरूपयोषित्स्थितभङ्गभासुराः ॥६३॥ स तत्र राजा विससर्ज भूभृतः स्वयं सुभृत्यानपि सर्वतो गृहम् ॥ गतेषु सुप्त्वाप वरस्त्रिया वृतः सुरे शवत्स्वर्गगतः प्रतापवान् ॥ ६४ ॥ एवं सुमनसस्तस्य सभृत्यस्य महात्मनः ॥ ऋषेस्तस्य प्रभावेण ह्यहाः प्रसुषुपुस्तदा ॥ ६५ ॥ ततो रात्र्यां व्यतीतायां स राजा ताः पुनः स्त्रियः ॥ अन्तर्द्धानं गतास्तत्र दृष्ट्वा तानि गृहाणि वा ॥ ६६ ॥ अदृश्यानि महार्हाणि वरासनगतानि च ॥ स राजा विस्मयाविष्टश्चिन्तयामास दुःखितः ॥ ६७ ॥ कथमेवं मणिर्मह्यं भवतीति पुनः पुनः ॥ चिन्तयन्नधिगम्याथ स राजा दुर्जयस्तथा ॥ ६८ ॥ चिन्तामणिमिमं चास्य हरामीति विचिन्त्य च ॥ प्रयाणं चोदयामास स राजाऽऽश्रमबाह्यतः ॥ ६९ ॥ आश्रमस्य बहिर्गत्वा नातिदूरे सबाहनः ॥ ततो विरोचनाख्यं वै प्रेषयामास मन्त्रिणम् ॥ ७० ॥ ऋषेर्गौरमुखस्यापि मणेर्याचनकर्मणि ॥ ऋषिं तं च समागत्य मणिं याचितुमुद्यतः ॥ ७१ ॥ रत्नानां भाजनं राजा मणिं तस्मै प्रदीयताम् ॥ अमात्येनैवमुक्तस्तु क्रुद्धो गौरमुखोऽब्रवीत् ॥ ७२ ॥ प्रतिग्राहीति विप्रस्तु राजा चैव ददाति च ॥ त्वं च राजा पुनर्भूत्वा याचसे दीनवत्कथम् ॥७३ ॥ एवं ब्रूहि दुराचारं राजानं दुर्जयं स्वयम् ॥ गच्छ द्रुतं दुराचार मा त्वां लोकोऽत्यगादिति ॥ ७४ ॥ एवमुक्तस्तदा दूतो जगाम च नृपान्तिकम् ॥ कथयामास तत्सर्वं यदुक्तं

॥१४॥

ब्राह्मणेन च ॥ ७५ ॥ ततः क्रोधपरीतात्मा श्रुत्वा ब्राह्मणभाषितम् ॥ दुर्ज्जयः प्राह नीलाख्यं तामन्तं गच्छ माचिरम् ॥ ७६ ॥
ब्राह्मणस्य मणिं गृह्य तूर्णमेहि यदृच्छया ॥ ७७ ॥ एवमुक्तस्तदा नीलो बहुसेनापरिच्छदः ॥ जगाम स च विप्रस्य
वन्यमाश्रममण्डलम् ॥ ७८ ॥ तत्राग्निहोत्रशालायां दृष्ट्वा तं मणिमाहितम् ॥ उत्तीर्य स्यन्दनान्नीलः सोऽवारोहत भूतले ॥ ७९ ॥ अवतीर्णे
ततस्तस्मिन्नीले परमदारुणे ॥ क्रूरबुद्ध्या मणेस्तस्मान्निर्जग्मुः शस्त्रपाणयः ॥ ८० ॥ सरथाः सध्वजाः साश्वाः सवर्णाः सावितर्मिणः ॥
उपवृष्काः सतूणीरा योधाः परमदुर्ज्जयाः ॥ ८१ ॥ निश्चेरुस्तं मणिं भित्त्वा त्वसंख्येया महाबलाः ॥ तत्र सज्ञा महा शूरा दश पंच
च संख्यया ॥ ८२ ॥ नामभिस्तान्महाभागे कथयामि शृणुष्व तत् ॥ सुप्रभो दीप्ततेजाश्च सुरश्मिः शुभदर्शनः ॥ ८३ ॥ सुकान्तिः
सुन्दरः सुन्दः प्रद्युम्नः सुमनाः शुभः ॥ सुशीलः सुखदः शम्भुः सुदान्तः सोम एव च ॥ एते पंचदश प्रोक्ता नायका उत्थिता मणेः ॥८४ ॥
ततो विरोचनं दृष्ट्वा बहुसैन्यपरिष्कृतम् ॥ योधयामासुरव्यग्रा विविधायुधपाणयः ॥ ८५ ॥ धनूंषि तेषां कनकप्रभाणि शरान्सुजा
म्बूनदपुंखनद्धान् ॥ पतन्ति खड्गानि विभीषणानि भुशुण्डिशूलाः परमप्रधानाः ॥ ८६ ॥ रथो रथं सम्परिवार्य तस्थौ गजो गजस्यापि हयो
हयस्य ॥ पदातिरन्यप्रपराक्रमश्च पदातिमेव प्रससार चाग्र्यम् ॥ ८७ ॥ द्वन्द्वान्यनेकानि तथैव युद्धे द्रवन्ति शूराः परिभर्त्सयन्तः ॥ विभीषणं
निर्गतसाधुमार्गं बभूव रक्तप्रभवं सुघोरम् ॥ ८८ ॥ तथा प्रवृत्ते तुमुले च युद्धे हतः स राज्ञः सचिवो विसंज्ञः ॥ सह्यानुगः सर्वबलैरुपेतो जगाम
वेत्रस्ततमान्दिराय ॥ ८९ ॥ तस्मिन्हते दुर्ज्जयरा जमात्रिणि उपायथो स्वेन बलेन राजा ॥ स दुर्ज्जयः साश्वरथोऽतितीव्रः प्रतापवांस्तैर्मणिजै
र्युयोध ॥९०॥ ततस्तस्मिंस्तदा राज्ञो महत्कदनमाबभौ ॥ ततो हेतूमहेतूभ्यां श्रुत्वा जामातरं रणे ॥ ९१ ॥ युध्यमानं महाबाहुं ततश्चानि
यतुश्चसूयुः ॥ तास्मिन्बले ये दैतेयास्तान्छृणुष्व धरेरितान् ॥९२॥ प्रघसो विघसश्चैव सङ्घसोऽज्ञानितप्रभः ॥विद्युत्प्रभः सुघोषश्च उन्मत्ताक्षो
भयङ्करः ॥ ९३ ॥ अग्निदत्तोऽग्नितेजाश्च बाहुः शक्रः प्रतर्दनः ॥ विरोधो भीमकर्म्मा च विप्रचित्तिस्तथैव च ॥ ९४ ॥ एते पंचदश श्रेष्ठाः
असुराः परमायुधाः ॥ अक्षौहिणीपरीवार एकैकोऽत्र पृथक्पृथक् ॥ ९५ ॥ महामायास्तु समरे दुर्ज्जयस्य दुरात्मनः ॥ युयुधुर्मणिजैः सार्द्धं

महासैन्यपरिच्छदाः ॥ ९६ ॥ तं सतेजास्त्रिभिर्बाणैर्विंधसं सम्प्राविध्य च ॥ सङ्कं सदशभिर्बाणैः सुरद्विषः प्रत्यविध्यत ॥ ९७ ॥ अशनिप्रभं रणेऽविध्यत्पंचभिः शुभदर्शनः ॥ विद्युत्प्रभं सुकान्तिस्तु सुघोषं सुन्दरस्तथा ॥ ९८ ॥ उन्मत्ताक्षं तथाविध्यत्सुन्दः पंचभिराशुगैः ॥ चकर्त्त च धनुस्तस्य शितेन नतपर्वणा ॥ ९९ ॥ सुमना अग्निदंष्ट्रं तु सुवेदश्चाग्नितेजसम् ॥ सुनलो वायुशक्रौ तु सुवेदस्तु प्रतर्दनम् ॥ १०० ॥ परस्परं सुयुद्धेन योधयित्वाऽलाघवात् ॥ यथासख्यन ते दैत्याः पुनर्मणिभवेर्हताः ॥ १०१ ॥ यावत्स सङ्करो घोरो महांस्तेषां व्यवर्द्धत ॥ तावत्समित्कुशादानि कृत्वा गौरमुखो मुनिः ॥ १०२ ॥ आगतो महदाश्चर्यसंग्रामं भयदर्शनम् ॥ बहुसैन्यपरीवारं स्थितं तं चापि दुर्जयम् ॥ १०३ ॥ तद्दृष्ट्वा स मुनिर्द्वारि चिन्तासंलग्नचेतनः ॥ उपविश्याधिगम्याथ मणेः कारणमेव ह ॥ १०४ ॥ एवं कृत्वा मणिकृतं रौद्रं गाढं च संयुगम् ॥ चिन्तयामास देवेशं हरिं गौरमुखो मुनिः ॥ स देवः पुरतस्तस्य पीतवासाः खगासनः ॥ किमत्र ते मया कार्यमिति वाणीमुदीरयन् ॥ १०५ ॥ स ऋषिः प्राञ्जलिर्भूत्वा प्रोवाच पुरुषोत्तमम् ॥ जहीमं दुर्जयं पापं सैन्येन परिवारितम् ॥ १०६ ॥ एवं मुक्तं तदा तेन चक्रं ज्वलनसन्निभम् ॥ तेन चक्रेण तत्सैन्यमसुरैर्दुर्जयं बलात् ॥ १०७ ॥ निमेषान्तरमात्रेण समग्रं भस्मसात्कृतम् ॥ एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ॥ १०८ ॥ उवाच निमिषेणेदं निहतं दानवं कुलम् ॥ अरण्येऽस्मिंस्ततस्त्वेवं नैमिषारण्यसंज्ञितम् ॥१०९॥ भविष्यति यथार्थं वै ब्राह्मणानां निवेशनम् ॥ अहं च यज्ञपुरुष एतस्मिन्वनगोचरे ॥ ११०॥ नाम्ना याज्या सदा चेमे दश पंच च नायकाः ॥ कृते युगे भविष्यन्ति राजानो मणिजा इमे ॥ १११ ॥ एवमुक्त्वा ततो देवो गतोऽन्तर्द्धानमीश्वरः॥ द्विजोऽपि स्वाश्रमे तस्थौ मुदा परमया युतः॥११२॥ इति वराहपुराणे आदिकृतवृत्तान्ते दुर्जयचरितं नाम एकादशोऽध्यायः ॥ ११॥

॥१९॥

वराह उवाच ॥ ततस्तत्र रथाङ्गाग्रौ दग्धाञ्छ्रुत्वा नरोत्तमान् ॥ महच्छोकपरीतात्मा चिन्तयामास पार्थिवः ॥ १ ॥ तस्य चिन्तयत स्त्वेवं तत्त्वबुद्धिरजायत ॥ चित्रकूटे गिरौ विष्णू राघवश्च प्रकीर्त्यते ॥ २ ॥ ततोऽहं नामसंज्ञाभिर्हरिं स्तौमि जगत्पतिम् ॥ इति संचिन्त्य नृपतिर्जगाम गिरिमुत्तमम् ॥ ३ ॥ चित्रकूटं महापुण्यं नृपः स्तोत्रमुदीरयन् ॥ ४ ॥ दुर्जय उवाच ॥ नमामि रामं नरनाथमच्युतं कविं पुराणं

त्रिदशारिनाशनम् ॥ शिवस्वरूपं प्रभवं महेश्वरं सदा प्रपन्नार्तिहरं कृताश्रयम् ॥ ५ ॥ भवान् सदा देव समस्ततेजसां करोषि तेजांसि समस्त
रूपधृक् ॥ क्षितौ भवान् पंचगुणस्तथा जले चतुःप्रकारस्त्रिविधोऽथ तेजसि ॥ ६ ॥ द्विधाऽथ वायौ त्रिषवे प्रतिष्ठितो भवान् हरिः
शब्दचरः पुमानसि ॥ भवान्च्छशी सूर्यहुताशनोऽसि त्वयि प्रलीनं जगदेतदुच्यते ॥ ७ ॥ भवत्प्रतिष्ठं रमते जगद्यतः ततोऽसि रामेति
जगत्प्रतिष्ठितः ॥ भवार्णवे दुःखतरोर्मिवङ्कुले तथाक्षमीनग्रहनक्रभीषणे ॥ ८ ॥ न मज्जति त्वत्स्मरणप्लवो नरः स्वुतोऽसि रामेति तथा तपो
वने ॥ वेदेषु नष्टेषु भवांस्तथा हरे करोषि मात्स्यं वपुरात्मनः सदा ॥ ९ ॥ युगक्षये रक्षितसर्वदिङ्मुखे भवांस्तथाग्निर्वडवारूपधृग्विभो ॥ कौर्मं
तथा रूपं वपुरास्थितः सदा युगेयुगे माधव सिन्धुमन्थने ॥ १० ॥ न चान्यदस्तीति भवत्समं क्वचिन्नादैनाद्यत्वमधुव चोत्तमम् ॥ त्वया
ततं विश्वमिदं महात्मँल्लोकालिला वेद दिशश्च सर्वाः ॥ ११ ॥ कथं त्वमाद्यं परमं तु धाम विहाय चान्यं शरणं व्रजामि ॥ भवानेकः पूर्वमा
सीत्ततश्च महानहं सलिलं वह्निरूपैः ॥ वायुस्तथा खं च मनोऽपि बुद्धिस्त्वत्तो गुणास्त्वत्प्रभवं च सर्वम् ॥१२॥ त्वया ततं विश्वमिदं समस्तं
सनातनस्त्वं पुरुषो मतो मे ॥ समस्ततविश्वेश्वर विश्वमूर्त्ते सहस्रबाहो जय देवदेव ॥ १३ ॥ नमोऽस्तु रामाय महानुभाव इति स्तुतो देव
वरः प्रसन्नः ॥ तदा तु राज्ञः सुप्रतीकाय मूर्तिं सन्दर्शयामास ततोऽभ्युवाच ॥ १४ ॥ वरं वृणीष्वेति च सुप्रतीक एवं श्रुत्वा वचनं तस्य
राजा सतम्भ्रमं देववरं प्रणम्य ॥ उवाच देवेश्वर मे प्रयच्छ लयं यदास्ते परमं वपुस्ते ॥ १५ ॥ इतीरिते राजवरः क्षणेन लयं तथाऽगदा
सुरश्रमूर्त्तौ ॥ ध्यानेन युक्तः पुरुषं गृणन्तं स्थितस्ततस्मिन्नात्मभूतो विमुक्तः स भूमिपः कर्म्मकाण्डैरनेकैः ॥१६॥ वराह उवाच ॥ इतीरितं ते तु
मया पुराणं स्वयम्भुवे चादिकृतैकदेशम् ॥ शक्यं न चास्यैर्वहुभिः सहस्रैरपीह केनापि सुखेन वक्तुम् ॥१७॥ उद्देशतः संस्तुतमात्रमेतन्मयापि
भद्रे कथितं पुराणम् ॥ समुद्रतोयात्परिमाणमल्पं क्वचिक्वचिद्दत्तमथो ह्यनर्घम् ॥१८॥ स्वयम्भुवा कथितं ब्रह्मणापि नारायणेनाप्यकुतोभयेन ॥
अशक्यमस्माभिरितीरितं ते न मूर्त्तमस्य स्मरणीयमाद्यम् ॥ १९ ॥ समुद्रे वालुकासङ्ख्या विद्यते रजसः क्षितौ ॥ न तु चास्य पुनः सङ्ख्या
क्रीडतः परमेष्ठिनः ॥२०॥ एष नारायणस्यांशो मया प्रोक्तः शुचिस्मिते ॥ कृतस्य वृत्तान्त एव किमन्यच्छ्रोतुमिच्छसि ॥ २१ ॥ इति

वराहपुराणे आदिकृतवृत्तान्ते दुर्जयचरिते नारायणेश्वर्यं द्वादशोध्यायः ॥ १२ ॥ अथ श्राद्धकल्पः ॥ धरण्युवाच ॥ एतन्मे महदाश्चर्यं दृष्ट्वा गौरमुखो मुनिः ॥ ते चापि मणिजाः प्राप्ताः किं फलं तु वरं गुरो ॥ १ ॥ क्रोडस्तो गौरमुखः श्रीमान्मुनिः परमधार्म्मिकः ॥ किं चकार हरेः कर्म्म दृष्ट्वातो मुनिपुङ्गवः ॥ २ ॥ वराह उवाच ॥ निमिषेण कृतं कर्म्म दृष्ट्वा भगवता मुनिः ॥ आरिराधयिषुर्देवं तमेव प्रययौ वनम् ॥ ३ ॥ प्रभासं नाम सोमस्य तीर्थं परमदुर्लभम् ॥ तत्र दैत्यान्तकुक्षेदः प्रोच्यते तीर्थचिन्तकैः ॥ ४ ॥ आराधयामास हरिं दैत्यसूदनसंज्ञितम् ॥ तस्याराधयतो देवं हरिं नारायणं प्रभुम् ॥ आजगाम महायोगी मार्कण्डेयो महामुनिः ॥ ५ ॥ स दृष्ट्वाभ्यागतं दूराद्दर्भाद्येन तं मुनिः ॥ अर्चयामास वै भक्त्या मुद्या परमया युतः ॥ ६ ॥ कौश्यां वृस्यां तदासीनं पप्रच्छेदं मुनिस्तदा ॥ शापि मां मुनिशार्दूल किं करोमि महाव्रत ॥ ७ ॥ एवमुक्तः स विप्रेन्द्रो मार्कण्डेयो महातपाः ॥ उवाच श्लक्ष्णया वाचा मुनिं गौरमुखं तदा ॥ ८ ॥ मार्कण्डेय उवाच ॥ सर्वेषामेव देवानामाद्यो नारायणो गुरुः ॥ तस्माद्ब्रह्मा समुत्पन्नः सोऽपि सप्तासृजन्मुनीन् ॥ ९ ॥ मां यजस्वेति तेनोक्तास्तदा ते परमेष्ठिना ॥ आत्मनात्मानमेवाग्रे अयजन्त इति श्रुतिः ॥ १० ॥ तेषां वै ब्रह्मजातानां महावैकारिकर्म्मणाम् ॥ अप्रशब्दश्चभिचारो हि महानेष कृतो यतः ॥ प्रब्रह्मज्ञानितः सर्वे भविष्यन्ति न संशयः ॥ ११ ॥ एवं शप्तास्ततस्ते वै ब्रह्मणात्मसमुद्भवाः ॥ सद्यो वंशकरान्पुत्रानुत्पाद्य त्रिदिवं ययुः ॥ १२ ॥ ततस्तेषु प्रयातेषु त्रिदिवं ब्रह्मवादिषु ॥ तत्पुत्राः श्राद्धदानेन तर्पयामासुरञ्जसा ॥ १३ ॥ ते च वैमानिकाः सर्वे ब्रह्मणः सप्त मानसाः ॥ तत्पिण्डदानं मन्त्रोक्तं प्रपश्यन्तो व्यवस्थिताः ॥ १४ ॥ गौरमुख उवाच ॥ ये च ते पितरो ब्रह्मन् यं च कालं समासते ॥ क्रियन्तो वै पितृगणास्तस्मिन् लोके व्यवस्थिताः ॥ १५ ॥ मार्कण्डेय उवाच ॥ प्रवर्तन्ते वराः केचिद्देवानां सोमवर्द्धनाः ॥ ते मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥ १६ ॥ चत्वारो मूर्तिमन्तो वै त्रयस्तस्यां ह्यमूर्तयः ॥ तेषां लोकनिसर्गं च कीर्तयिष्यामि तच्छृणु ॥ १७ ॥ लोकाः सन्तानका नाम यत्र तिष्ठन्ति भास्वराः ॥ देवानां पितरस्ते हि तान्यजन्तीह देवताः ॥ १८ ॥ एते वै लोक विप्रेन्द्रा लोकान् प्राप्य सनातनान् ॥ पुनर्युगशतान्तेषु जायन्ते ब्रह्मवादिनः ॥ १९ ॥ ते प्राप्य तां स्मृतिं भूयः साध्ययोगमनुत्तमम् ॥ चिन्त्य

योगगतिं शुद्धां पुनरावृत्तिदुर्लभाम् ॥ २० ॥ एते स्म पितरः श्राद्धे योगिनां योगवर्द्धनाः ॥ आप्यायितास्तु ते सर्वे योगियोगबलेन च ॥ २१ ॥ तस्माच्छ्राद्धानि देयानि योगिनां योगिवत्तम ॥ एष वै प्रथमः सर्गः सोमपानामनुत्तमः ॥ २२ ॥ एते त एकतनयो वर्तन्ते द्विज तत्तमाः ॥ भूर्लोकवासिनां याज्याः स्वर्गौलोकनिवासिनः ॥ २३ ॥ ब्रह्मयुजा मरीच्याद्यास्तेषां याज्या महर्गणाः ॥ कल्पवासिकसंज्ञानां तेषामपि जनैर्वृताः ॥ २४ ॥ सनकाद्यास्ततस्तेषां वैराजास्तपसि स्थिताः ॥ तेषां सत गणाः प्रोक्ता इत्येषा पितृसन्ततिः ॥ २५ ॥ तेऽपि याज्याः पृथग्वर्णैर्न शूद्रेभ्यः पृथक्कृताः ॥ वर्णत्रयाभ्यनुज्ञातः शूद्रः सर्वोऽपि नेतृभ्यतेत् ॥ २६ ॥ ते तु तस्य पृथङ् सन्ति पितरः शूद्रजातयः ॥ मुक्तात्मश्चेतनका ब्रह्मन्न दृश्यन्ते पितृष्वपि ॥ २७ ॥ विशेषशास्त्रदृष्ट्या तु पुराणानां च दर्शनात् ॥ एवं ऋषिस्मृतैः शास्त्रैर्ज्ञात्वा याज्यान् स्वसम्भवान् ॥ २८ ॥ स्वयं सृष्ट्वा स्वसृतिं लब्ध्वा पुत्राणां ब्रह्मणा ततः ॥ परं निर्योगमापन्नास्तेऽपि ज्ञानेन चैव हि ॥ २९ ॥ वस्वादीनां कश्यपाद्या वर्णानां वासवादयः ॥ अविशेषेण विज्ञेया गन्धर्वाद्या अपि ध्रुवम् ॥ ३० ॥ एष ते पैतृकः सर्ग उद्देशेन महामुने ॥ कथितो नान्त एषास्य वर्षकोटया हि दृश्यते ॥ ३१ ॥ अथश्राद्धकालाः ॥ श्राद्धस्य कालान्वक्ष्यामि तच्छृणुष्व द्विजोत्तम ॥ श्राद्धार्हमागतं द्रव्यं विशिष्टमथवा द्विजम् ॥ ३२ ॥ श्राद्धं कुर्वीत विज्ञाय व्यतीपातेऽयने तथा ॥ ३३ ॥ विषुवे चैव संप्राप्ते ग्रहणे शशिसूर्ययोः ॥ समस्तेष्वेव भिन्नेन्द्र राशिष्वर्केऽतिगच्छति ॥ ३४ ॥ नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने ॥ इच्छाश्राद्धानि कुर्वीत नक्षत्रस्यागमे तथा ॥ ३५ ॥ अमावस्या यदा आर्द्रा विशाखास्वातियोगिनी ॥ श्राद्धैः पितृगणस्तृप्तिं तदाप्नोत्यष्टवार्षिकीं ॥ ३६ ॥ अमावस्या यदा पुष्ये रौद्रऋक्षे च पुनर्वसौ ॥ द्वादशाब्दं तथा तृप्तिं प्रायान्ति पितरोऽर्चिताः ॥ ३७ ॥ वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छताम् ॥ वारुणे चाप्यमावस्या दैवानामपि दुर्लभा ॥ ३८ ॥ नक्षत्रस्वर्क्षेष्वमावास्या यदा तेषु द्विजोत्तम ॥ तदा श्राद्धानि देयानि अक्षय्यफलमिच्छताम् ॥ अपि कोटिसहस्रेण पुण्यस्यान्तो न विद्यते ॥ ३९ ॥ अथापरं पितरः श्राद्धकालं रहस्यमस्मात्प्रवदन्ति पुण्यम् ॥ वैशाखमासस्य तु या तृतीया नवम्यतो कार्त्तिकशुक्ल पक्षे ॥ ४० ॥ नभस्यमासस्य तामिस्रपक्षे त्रयोदशी पंचदशी च माघे ॥ उपप्लवे चन्द्रमसो रवेश्च चतसृष्वप्यष्टकास्वयनद्वये च ॥ ४१ ॥

पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ श्राद्धं कृतं तेन समासतोऽयं रहस्यमेतत्पितरो वदन्ति ॥४२॥ मार्गोसिते पंचदशी कदाचिदुपैति योगं यदि वारुणेन ॥ ऋक्षेण कालः परमः पितॄणां न स्वल्पपुण्यैर्द्विज लभ्यतेऽसौ ॥ ४३ ॥ काले धनिष्ठा यदि नाम तस्मिन् लभ्येत विप्रेन्द्र यदा पितृभ्यः ॥ दत्तं जलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैः ॥ ४४ ॥ तत्रैव चेद्वाद्रपदा तु पूर्वा काले तदा यैः क्रियते पितृभ्यः ॥ श्राद्धं परां तृप्तिमुपैत्यनेन युगं समग्रं पितरः स्वपन्ति ॥ ४५ ॥ गङ्गां शतद्रूमथवा विपाशां सरस्वतीं नैमिषगोमतीं वा ॥ ततो गवाद्यर्चनमादरेण कृत्वा पितॄणामहितानि हन्ति ॥ ४६ ॥ गायन्ति चैतत्पितरः कदा नु त्रयोदशीयुक्तपचासु भूयः ॥ वर्षासितान्ते शुभ तिथौतोयैर्यास्याम तृप्तिं तनयादिदत्तैः ॥४७॥ वित्तं च वित्तं च नृणां विशुद्धं शस्तश्च कालः कथितो विधिश्च ॥ पात्रं यथोक्तं परमा च भक्ति नृणां प्रयच्छन्त्यभिवाञ्छितानि ॥ ४८ ॥ अथ पितॄणां गीतम् ॥ पितृगीतांस्तथैवात्र श्लोकांस्तान्शृणु सत्तम ॥ श्रुत्वा तथैव भविता भाव्यं तत्र सदात्मना ॥ ४९ ॥ अपि धन्यः कुले जायादस्माकं मतिमान्नरः ॥ अकुर्वन्वित्तशाठ्यं यः पिण्डान्नो निर्वपिष्यति ॥ ५० ॥ रत्नरत्न महायानं सर्वं तोयादिकं वसु ॥ विभवे सति विप्रेभ्यः अस्मानुद्दिश्य दास्यति ॥ ५१ ॥ अन्नेन वा यथाशक्त्या कालेऽस्मिन्भक्तिनम्रधीः ॥ भोजयिष्यति विप्राग्र्यांस्तन्मात्रविभवो नरः ॥ ५२ ॥ असमर्थोऽन्नदानस्य वन्यशाकं स्वशक्तितः ॥ प्रदास्यति द्विजाग्र्येभ्यः स्वल्पां यो वापि दक्षिणाम् ॥ ५३ ॥ तत्राप्यतामर्थयुतः करैर्गृह्यासितांस्तिलान् ॥ प्रणम्य द्विजमुख्याय कस्मैचिद्वापि दास्यति ॥ ५४ ॥ तिलैः सताद्यभिर्वापि समवत्तं जलाञ्जलिम् ॥ भक्तिनम्रः समुद्दिश्य योऽस्माकं सम्प्रदास्यति ॥ ५५ ॥ यतः कुतश्चित्सम्प्राप्य गोभ्यो वापि गवाह्निकम् ॥ अभावे प्रीणयेत्तस्माद्भक्त्या युक्तः प्रदास्यति ॥५६॥ सर्वाभावे वनं गत्वा कक्षमूलप्रदर्शकः ॥ सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति॥५७॥ न मेऽस्ति वित्तं न धनं न चान्यच्छ्राद्धस्य योग्यं स्वपितॄन्नतोऽस्मि ॥ तृप्यन्तु भक्त्या पितरो मयैतौ भुजौ ततौ वर्त्मनि मारुतस्य ॥ ५८ ॥ इत्येवं पितृभिर्गीतं भावाभावप्रयोजनम् ॥ कृतं तेन भवेच्छ्राद्धं य एवं कुरुते द्विजः ॥ ५९ ॥ इति वराहपुराणे आदिकृतवृत्तान्ते श्राद्धकल्पोनाम त्रयादशोध्यायः ॥ १३ ॥ श्राद्धे केतनयोग्यायोग्यत्राह्मणादिनिरूपणम् ॥ मार्कण्डेय उवाच ॥ एतन्मे कथितं पूर्वं

॥१७॥

ब्रह्मपुत्रेण धीमता ॥ सनत्कानुजेन विप्रर्षे ब्रह्मणा शृणु साम्प्रतम् ॥ १ ॥ त्रिणाचिकेतत्रिसुपर्णत्रिसुपर्णैः षडङ्गवित् ॥ ऋत्विजं भागिनेयं च दौहित्रं श्वशुरं तथा ॥ २ ॥ जामातरं मातुलं च तपोनिष्ठं च ब्राह्मणम् ॥ पंचाग्न्यभिरतं चैव शिष्यं सम्बन्धिनं तथा ॥ ३ ॥ मातापितृरतं चैव एतान्श्राद्धे नियोजयेत् ॥ मित्रमश्रुनखी चैव श्यावदन्तस्तथा द्विजः ॥ ४ ॥ कन्याद्रुग्वित्ता चैव वह्निहः सोमविक्रयी ॥ अभिशप्तस्तथा स्तेनः पिशुनो ग्रामयाजकः ॥ ५ ॥ भृतकाध्यापकश्चैव सूतकाध्यापकश्च यः ॥ परपूर्वापतिश्चैव मातापित्रोस्त्यक्तकः ॥ ६ ॥ वृषलीसूतिपोष्यश्च वृषलीपतिरेव च ॥ तथा देवलकश्चैव श्राद्धे नार्हन्ति केतनम् ॥ ७ ॥ निमन्त्रणादिकम् ॥ प्रथमेह्नि बुधः कुर्याद्विप्राण्णां निमन्त्रणम् ॥ आनिमन्त्र्य द्विजान्पश्चादागतान्भोजयेद्बुधान् ॥ ८ ॥ पादशौचादिना गेहमागतान्भोजयेद्विजान् ॥ पवित्रपाणिरा चान्तानासनेषूपवेशयेत् ॥ ९ ॥ ब्राह्मणतंत्रमादिः ॥ पितृणामयुजो युग्मं देवानामपि योजयेत् ॥ देवानामेकपपि वा पितृणां च निवेदयेत् ॥ १० ॥ तथा मातामहश्राद्धं वैश्वदेवसमन्वितम् ॥ कुर्वीत भक्तिसम्पन्नस्तन्त्रं वा वैश्वदेविकम् ॥ ११ ॥ प्राङ्मुखं भोजयेद्विप्रं देवानाङ्मुभयात्मकम् ॥ पितृपैतामहानां च भोजयेच्चाप्युदङ्मुखान् ॥ १२ ॥ पृथङ् नृतयोः केचिद्गृह्यः श्राद्धस्य कारणं द्विजः ॥ एकत्रैकेन पात्रेण वदन्त्यन्ये महर्षयः ॥ १३ ॥ श्राद्धप्रकारः ॥ विष्टरार्थं कुशान्दत्त्वा सम्पूज्यार्घविधानतः ॥ कुर्यादावाहनं प्राज्ञो देवानां तदनुज्ञया ॥ १४ ॥ यवाम्बुना च देवानां दद्यादर्घं विधानवित् ॥ सुगन्धधूपदीपांश्च दत्त्वा तेभ्यो यथाविधि ॥ १५ ॥ पितृगामपसव्येन सर्वमेवोपकल्पयेत् ॥ अनुज्ञां च ततः प्राप्य दत्त्वा दर्भान्द्विराकृतान् ॥ १६ ॥ मन्त्रवर्जं पितृणां तु कुर्यादावाहनं बुधः ॥ तिलाम्बुना चापसव्यं दद्यादर्घादिकं बुधः ॥ १७ ॥ तत्रातिथ्यागमे ॥ काले तत्रातिथिं प्राप्तमन्त्रकामं द्विजाधमम् ॥ ब्राह्मणैरभ्यनुज्ञातः कामं तमपि पूजयेत् ॥ १८ ॥ योगिनो विविधैरूपैर्नराणामुपकारिणः ॥ भ्रमन्ति पृथिवीमेतामविज्ञातस्वरूपिणः ॥ १९ ॥ तस्मादभ्यर्चयेत्प्राज्ञः श्राद्धकालेऽतिथिं बुधः ॥ श्राद्धक्रियाफलं हन्ति द्विजेन्द्रा पूजितोऽतिथिः ॥ २० ॥ तत्र होमविधिः ॥ जुहुयाद्व्यञ्जनक्षारैर्वर्ज्यमन्नं ततोऽनले ॥ अनुज्ञातो द्विजैस्तैस्तु त्रिः कृत्वा पुरुषर्षभ ॥ २१ ॥ अग्नये कव्यवाहनाय स्वाहेति प्रथमाहुतिः ॥ सोमाय वै पितृमते दातव्या तदनन्तरम् ॥ २२ ॥ वैश्वस्वताय चैवान्या तृतीया दीयते तु सा ॥ हुताव

शिष्टमल्पालं विप्रपात्रेषु निर्वपेत् ॥ २३ ॥ ततो भोजनम् ॥ ततोऽन्नं मृष्टमत्यर्थमभीष्टमभिसंस्कृतम् ॥ दत्त्वा जुषध्वमिच्छातो वाच्य मेतदनिष्ठुरम् ॥ २४ ॥ भोक्तव्यं तैश्च तद्विज्ञैर्मौनिभिः सुमुखैः स्थिरम् ॥ अक्रुध्यताप्यन्नकृता देयं तेनापि भक्तितः ॥ २५ ॥ अभिश्रवणम् ॥ रक्षोघ्नमन्त्रपठनं भूमेरास्तरणं तिलैः ॥ कृत्वाज्यपाश्च पितरस्त एव द्विजसत्तमाः ॥ २६ ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ मम तृप्तिं प्रयान्त्वद्य होमाध्यासितमूर्त्तयः ॥ २७ ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ मम तृप्तिं प्रयान्त्वद्य विप्रदेहेषु संस्थिताः॥२८॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ तृप्तिं प्रयान्तु पिण्डेषु मया दत्तेषु भूतले॥२९ ॥पिता पितामहश्चैव तथैव प्रपितामहः ॥ तृप्तिं प्रयान्तु मे भक्त्या यन्मयैतदुदाहृतम् ॥३० ॥ मातामहस्तृप्तिमुपैतु तस्य तथा पिता तृप्तिमुपैतु योऽन्यः ॥ विश्वेऽथ देवाः परमां प्रयान्तु तृप्तिं प्रणश्यन्तु च यातुधानाः ॥ ३१ ॥ यज्ञेश्वरो यज्ञसमस्तनेता भोक्ताऽप्यथात्मा हरिरीश्वरोऽत्र ॥ तत्सन्निधानादपयान्तु सद्यो रक्षांस्यशेषाण्यसुराश्च सर्वे ॥ ३२ ॥ विकिरान्नदानादि॥ तृप्तेष्वेतेषु विप्रेषु क्रिरेद्भुव्यं महीतले ॥ दद्यादाचमनार्थाय तेभ्यो वारि सकृत्सकृत् ॥ ३३ ॥ सुतृप्तैस्तैस्तु कृतज्ञातः सर्वेणाग्रेण भूतले ॥ अथ पिण्डदानादि ॥ सलिलेन ततः पिण्डान् सम्यग्गृह्य समाहितः ॥ ३४ ॥ पितृतीर्थेन सलिलं तथैव सलिलाञ्जलिम् ॥ मातामहेभ्यस्तेनैव पिण्डांस्तीर्थेन निर्वपेत् ॥ ३५ ॥ दक्षिणाग्रेषु दर्भेषु पुष्पधूपादिपूजितम् ॥ स्वपित्रे प्रथमं पिण्डं दद्याद्युच्छिष्टसन्निधौ ॥ ३६॥ पितामहाय चैवान्यं तापित्रे च तथापरम् ॥ दर्भमूलेऽवलेपश्च लेपयेल्लेपवर्णतः ॥ ३७ ॥ पिण्डैर्मातामहांस्तद्वद्भक्त्या माल्यादिसंयुतैः ॥ पूजयित्वा द्विजाग्र्याणां दद्यादाचमनं बुधः ॥३८॥ पितृभ्यः प्रथमं भक्त्या तन्मनस्को द्विजेश्वरः ॥ स्वस्त्यादि वाचयित्वा तु दद्याच्छक्त्या च दक्षिणाम् ॥ ३९ ॥ दत्त्वा च दक्षिणां तेभ्यो वाचयेद्वैश्वदेविकम् ॥ प्रीयन्तामिति ये विश्वेदेवास्ते स इतीरयेत् ॥ ४० ॥ तथेति चोक्ते तैर्विप्रैः प्रार्थनीयास्तथाशिषः ॥ तथा विसर्ज्ययेद्देवान् पूर्वं पैत्र्यान्महामते ॥ ४१ ॥ मातामहानामप्येवं सह देवैः क्रमात्स्थितैः ॥ भोजने च स्वशक्त्या च दाने तद्वद्विसर्जने ॥ आपादशौचनात्पूर्वं कुर्यादेवं द्विजन्मसु ॥४२॥ ज्ञानिनं प्रथमं विप्रं विधु मातामहादिषु ॥ तथा विसर्ज्ययेत्प्राज्ञः सम्मान्याभ्यर्थिनस्ततः ॥ ४३ ॥ निवर्तेतानुज्ञात आद्धरान्तमनुव्रजेत् ॥ श्राद्धान्ते वैश्वदेवादि ॥ ततस्तु वैश्वदेवाख्यं

॥१८॥

कुर्याद्वित्यक्रियां ततः ॥ ४४ ॥ भुञ्जीयाच्च समं पूज्य भृत्यबन्धुभिरात्मना ॥ एवं श्राद्धं बुधः कुर्योत्पित्र्यं मातामहं तथा ॥ श्राद्धेराप्यायिता दद्युः सर्वान् कामान्पितामहाः ॥ ४५ ॥ त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ॥ रजतस्य तथा दानं तथा संदर्शनादिकम् ॥ ४६ ॥ वर्ज्यं तु कुर्वता श्राद्धं कोधोध्वगमनं त्वरा ॥ भोक्तुं रज्यति विप्रेन्द्रे त्रयमेतन्न संशयः ॥ ४७ ॥ विश्वेदेवाः सपितरस्तथा मातामहा द्विज ॥ कुलं चाप्यायितं पुंसा सर्वं श्राद्धं प्रकुर्वता ॥४८॥ सोमाधारः पितृगणो योगाधारस्तु चन्द्रमाः ॥ श्राद्धं योगनियुक्तं तु तस्माद्विप्रेन्द्र शस्यते ॥ ४९ ॥ सहस्रस्यापि विप्राणां योगी चेत्पुरतः स्थितः ॥ सर्वान् भोक्तॄंस्तारयति यजमानं तथा द्विज ॥ ५० ॥ इयं सर्वपुराणेषु सामान्या पैतृकी क्रिया ॥ एतत्कमात्कर्मकाण्डं ज्ञात्वा मुच्येत बन्धनात् ॥ ५१ ॥ एतदाश्रित्य निर्वाणमृषयः शांसितव्रताः ॥ प्राप्ता गौरमुखादाशु त्वमप्येतत्परो भव ॥ ५२॥ इति ते कथितं भक्त्या पृच्छतो द्विजसत्तम ॥ पितॄन्यङ्गा हरिं ध्यायेद्यस्तस्य किमतः परम् ॥ न तस्मात्परतः पितृतन्त्रमस्तीति निश्चयः ॥ ५३ ॥ इतिश्रीवराहपुराणे आदिकृतवृत्तान्ते श्राद्धकल्पनिरूपणं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ इति श्राद्धकल्पस्समाप्तः ॥ अथ गौरमुखस्य दशावतारस्तोत्रेण मोक्षः ॥ धरण्युवाच ॥ एवं श्राद्धविधिं श्रुत्वा मार्कण्डेयान्महामुनिः ॥ तदा गौरमुखो देवः किमूर्ध्वं कृतवानसौ ॥ १ ॥ वराह उवाच ॥ एतच्छ्रुत्वा तदा धात्रि पितृतन्त्रं महामुनिः ॥ तत्स्मारितो जन्मशतं मार्कण्डेयेन धीमता ॥ २ ॥ धरण्युवाच ॥ भवन् गौरमुखः कोऽसावन्यजन्मनि कः स्मृतः ॥ कथं च स्मृतवान् स्मृत्वा किं चकार च सत्तमः ॥३॥ वराह उवाच ॥ भृगुरासीत्स्वयं साक्षादन्यस्मिन् ब्रह्मजन्मनि ॥ तदन्वयात्मजस्त्वेष मार्कण्डेयो महामुनिः ॥ ४ ॥ पुत्रैस्तु बोधिता यूयं सुगतिं प्रापयेति यत् ॥ प्रागुक्तं ब्रह्मणा तेन मार्कण्डेयेन बोधितः ॥ ५ ॥ सस्मार सर्वजन्मानि स्मृत्वा चैव तु यत्कृतम् ॥ तच्छ्रुणुष्व वरारोहे कथयामि समासतः ॥ ६ ॥ एवं श्राद्धविधानेन द्वादशाब्दं ततः पितॄन् ॥ इङ्गा पश्चाद्धरेः स्तोत्रं स मुनिस्तु पचक्रमे ॥७॥ प्रभासं नाम यत्तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ तत्र दैत्यान्तकं देवं स्तोतुं गौरमुखः स्थितः॥८॥ गौरमुख उवाच ॥ दशावतार स्तोत्रम् ॥ स्तोष्ये महद्वं रिपुदर्पहं शिवं नारायणं ब्रह्मवरिष्ठं वरिष्ठम् ॥ आदित्यचन्द्राग्निधुगस्थमाद्यं पुरातनं दैत्यहरं सदा हरिम् ॥९॥चकार

मात्स्यं वपुरात्मनो यः पुरातनं वेदविनाशकाले ॥ महामहीभूद्वपुरप्रयुच्छच्छ्रद्दधार्बिः सुरशत्रुहाग्र्यः ॥ १० ॥ तथाऽद्रिमन्थानकृते गिरीन्द्रं
दधार यः कौर्म्मवपुः पुराणम् ॥ हितेच्छयात्मः पुरुषः पुराणः प्रपातु मां दैत्यहरः सुरेशः ॥ ११ ॥ महावराहः सततं पृथिव्यास्तलात्तलं
प्राविशद्यो महात्मा ॥ यज्ञाङ्गसंज्ञः सुरसिद्धसङ्घैः स पातु मां दैत्यहरः पुराणः॥१२॥नृसिंहरूपी च बभूव योऽसौ युगेयुगे योगिवरोग्र भीमः ॥
कराळवक्त्रः कनकाग्रवर्चा वराशयोऽस्मानसुरान्तकोऽव्यात् ॥ १३ ॥ बलेर्मखं ध्वंसकृदप्रमेयो योगात्मको योगवपुःस्वरूपः ॥ स दण्डकाष्ठा
जिनलक्षणः क्षितिं योऽसौ महान्कान्तवान्नः पुनातु ॥ १४ ॥ त्रिःसप्तकृत्वो जगतीं निगाय कृत्वा ददौ कश्यपाय प्रचण्डः ॥ स जामदग्ज्योऽ
भिजनस्य गोप्ता हिरण्यगर्भोऽसुरहा प्रपातु ॥ १५॥ चतुष्प्रकारं च वपुर्य आद्यं हैरण्यगर्भप्रतिमानलक्ष्यम् ॥ रामादिरूपैर्बहुरूपभेदं चकार
सोऽस्मानसुरान्तकोऽव्यात् ॥ १६ ॥ चाणूरकंसासुरदर्पभीतिभीतामराणामभयाय वेदः ॥ युगे युगे वासुदेवो बभूव कल्पे भवत्यद्भुतरूप
कारी ॥१७॥ युगे युगे कल्किनाम्ना महात्मा वर्णस्थितिं कर्त्तुमनेकरूपः ॥ सनातनो ब्रह्ममयः पुरातनो न यस्य रूपं सुरसिद्धदैत्याः ॥१८ ॥
पश्यन्ति विज्ञानगतिं विहाय अतो यमेनापि समर्चयन्ति ॥ मत्स्यादिरूपाणि चराणि सोऽव्यात् ॥ १९ ॥ नमोनमस्ते पुरुषोत्तमाय पुनश्च
भूयोऽपि नमो नमस्ते ॥ नमोनमः कारणकारणाय नयस्व मां मुक्तिपदं नमस्ते ॥ २० ॥ एवं नमस्यतस्तस्य महर्षेर्भावितात्मनः ॥
प्रत्यक्षताङ्गतो देवः स्वय चक्रगदाधरः ॥ २१ ॥ तं दृष्ट्वा तस्य विज्ञान निस्तरङ्गं स्वदेहतः ॥ उत्तस्थौ सोऽपि तं लब्ध्वा तास्मिन् ब्रह्मणि
शाश्वते ॥२२॥लयं जगाम देवात्मन्यपुनर्भवसांज्ञिते ॥ २३॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते गौरमुखस्य मोक्षनिरूपणं नाम पंचदशोऽ
ध्यायः ॥ १५ ॥ अथ सरमोपाख्यानम् ॥ धरण्युवाच ॥ तदा दुर्वासता शप्तो देवराजः शतक्रतुः ॥ वासिष्यासि त्वं मर्त्येषु सुप्रतीक
सुतेन तु ॥ १ ॥ उत्सादितो दिवो मूढेत्येवमुक्तस्तु भूधरः ॥ इन्द्रो मर्त्यमुपागम्य सर्वदेवसमन्वितः ॥ २ ॥ किं चकार च तस्मिंस्तु
दुर्ज्जये च निपातिते ॥ परमेष्ठिना भगवता तेन योग विदुत्तमो ॥ ३ ॥ स्वर्गे विद्युत्सुविद्युच्च तौ च किं चक्रतुस्तदा ॥ एतन्मे संशयं देव
कथयस्व प्रसादतः ॥ ४ ॥ वराह उवाच ॥ दुर्ज्जयेन जितो धात्रि देवराजः शतक्रतुः ॥ भारते हि तदा वर्षे वाराणस्यां तु पूर्वतः ॥ ५ ॥

आश्रित्य संस्थितो देवैः सह यक्षमहोरगैः ॥ विद्युत्सुविद्युच्च तदा योगमास्थाय शोभने ॥ ६ ॥ दीर्घतापज्वरं वायुकर्म्मयोगेन संश्रितौ ॥ लोकपालाय तं कृत्स्नं चक्रतुर्योगमायया ॥७॥ तं दुर्जयं मृतं श्रुत्वा समुद्रान्तः स्थितं सदा ॥ आनयि च तुरङ्गं तु देवान्प्राति विजग्मतुः ॥८॥ आगत्य तौ तदा दैत्यौ महासैन्येन पर्वतम् ॥ हिमवन्तं समाश्रित्य संस्थितौ तु बभूवतुः ॥ ९ ॥ देवा अपि महत्सैन्यं संहत्य कृतदंशिताः ॥ मन्त्रयाञ्चक्रुरव्यग्रा ऐन्द्रं पदमभीप्सवः ॥ १० ॥ अब्रवीत्तत्र देवानां गुरुराङ्गिरसो मुनिः ॥ गोमेधेन यजध्वं वै प्रथमं तदनन्तरम् ॥ ११ ॥ यष्टव्यं क्रतुभिः सर्वैरेषा स्थितिरथामराः ॥ उपदेशो मया दत्तः क्रियतां शीघ्र एष वै ॥ १२ ॥ एवमुक्तास्तदा देवा गाः पशूंश्चानु कल्प्य ते ॥ मुमुचुश्चारणार्थाय रक्षार्थं सरमां ददुः ॥ १३ ॥ ताश्च गावो देवशुन्या रक्ष्यमाणा धराधरे ॥ तत्र जग्मुस्तदा गावश्चरन्त्यो यत्र तेऽसुराः ॥ १४ ॥ ते च गावस्तु ता दृष्ट्वा शुक्रमूचुः पुरोहितम् ॥ पश्य त्वं देव गा ब्रह्मंश्चार्यन्ते रक्षमाणया ॥ देवशुन्या सरमया वद किं क्रियतेऽधुना ॥ १५ ॥ एवमुक्तस्तदा शुक्रः प्रत्युवाचासुरांस्तदा ॥ एता गा ह्रियतां शीघ्रमसुरा मा विलम्बथ ॥ १६ ॥ एवमुक्तास्तदा दैत्या जहुस्ता गा यदृच्छया ॥ हृतासु तासु सरमा मार्गान्वेषणतत्परा ॥ १७ ॥ अपश्यत्सा दितेः पुत्रैर्नीता गावो धराधरे ॥ दैत्यैरपि शुनी दृष्टा दृष्टमार्गा विशेषतः ॥ १८ ॥ दृष्ट्वा ते तां च सरमां सामपूर्वमिदं वचः ॥ आसां गवां तु दुग्धव्यं क्षीरं त्वं सरमे शुभे ॥ १९ ॥ पिब स्वैरमिति प्रोक्ता तस्यै तद्दुरजसा ॥ दत्त्वा तु क्षीरपानं तु तस्यै ते दैवनायकाः ॥ २० ॥ मा भद्रे देवराजाय गास्त्विमा विनिवेदय ॥ एवमुक्ता ततो दैत्या मुमुचुस्तां शुनीं वने ॥ २१ ॥ तैर्मुक्ता सा सुरांस्तूर्णं जगाम खलु वेपती ॥ नमश्चक्रे च देवेन्द्रं सरमा सुरसत्तमम् ॥ २२ ॥ तस्याश्च मरुतो देवा देवेन्द्रेण निरूपिताः ॥ गूढं गच्छत रक्षार्थं देवशुन्या महाबलाः ॥ २३ ॥ इत्युक्तास्तेन सूक्ष्मेण वपुषा जग्मुरञ्जसा ॥ तेऽप्यागम्य सुरेन्द्राय नमश्चक्रुर्धराधरे ॥ २४ ॥ तान्देवराजः पप्रच्छ गावः किं सरमेऽभवन् ॥ एवमुक्ता तु सरमा न जानामीति चात्रवीत् ॥ २५ ॥ तत इन्द्रो रुषा युक्तो यज्ञार्थेसुपकल्पिताः ॥ गावः क्व चेति मरुतः प्रोवाचेदं शुनी कथम् ॥ २६ ॥ एवमुक्तास्तु मरुतो देवेन्द्रेण धराधरे ॥ कथयामासुरव्यग्राः कर्म्म तत्सरमाकृतम् ॥ २७ ॥ तत इन्द्रः समुत्थाय पदा सन्ताडयच्छुनीम् ॥ क्रोधेन महताविष्टो देवेन्द्रः

पाकशासनः ॥ २८ ॥ क्षीरं पीतं त्वया मूढे गावस्ताश्चासुरेहिताः ॥ एवमुक्ता पदा तेन ताडिता सरमा घरे ॥ २९ ॥ तस्येन्द्रपादघातेन क्षीरं वक्त्रात्प्रसुस्रुवे ॥ स्रवता तेन पयसा सा शुनी यत्र गाभवत् ॥ ३० ॥ जगाम तत्र देवेन्द्रः सहसैन्यस्तदा घरे ॥ अपश्यत्तत्र देवेन्द्रस्तागा दैत्येरुपाहृताः ॥ ३१ ॥ चकुर्यैं पालनं दैत्यास्ते दैत्या बलिनो भृशम् ॥ तैः सैन्यैर्निहताः सद्यस्तत्यजुर्गाः स्वमूर्त्तिभिः ॥ ३२ ॥ सामन्तैश्च सुरेन्द्रोऽथ वृतः परमहर्षितैः ॥ ताश्च लब्ध्वा महेन्द्रस्तु मुदा परमया युतः ॥ ३३ ॥ चकार यज्ञान्विविधान् सहस्रानपि स प्रभुः ॥ क्रियमाणेस्ततो यज्ञैर्वृधेन्द्रस्य तद्बलम् ॥ ३४ ॥ वर्द्धितेन बलेनेन्द्रो देवसैन्यमुवाच ह ॥ सन्त्रस्यंतां सुराः शीघ्रं दैत्यानां वधकर्म्मणि ॥ ३५ ॥ एवमुक्तास्तदा देवाः सन्नद्धास्तत्क्षणेऽभवन् ॥ असुराणामभावाय जग्मुर्देवाः सवासवाः ॥ ३६ ॥ गत्वा तु युयुधुस्तूर्णं विजिग्युस्त्वासुरीं चमूम् ॥ जिताश्च देवैरसुरा हतशेषा धराघरे ॥ ३७ ॥ ममज्जुः सागरजले भयत्रस्ता विचेतसः ॥ देवराजोऽपि त्रिदिवं लोकपालैः समं घरे ॥ ३८ ॥ आरुह्य बुभुजे प्राग्वत्सदेवो देवराड्विभुः ॥ य एवं शृणुयान्नित्यं सरमारुद्यानमुत्तमम् ॥ ३९ ॥ स गोमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ भ्रष्टराज्यश्च यो राजा शृणोतीदं समाहितः ॥४०॥ स देवेन्द्र इव स्वर्गे राज्यं स्वं लभते नरः ॥ इतिश्री वराहपुराणे आदिकृतवृत्तान्ते सरमोपाख्यानं नाम षोडशोऽध्यायः ॥१६॥ अथ महातप उपाख्यानम् ॥ धरण्युवाच ॥ ये ते मणौ तदा देव उत्पन्ना नर पुङ्गवाः ॥ तेषां वरो भगवता दत्तस्त्वेतायुगे किल ॥१॥ राजानो भवितारो वै कथं तेषां समुद्भवः ॥ किं चकुर्वै हि ते कर्म्म पृथङ् नामानि शंस मे ॥ २ ॥ वराह उवाच ॥ सुप्रभो मणिजो यस्तु राजा नाम महामनाः ॥ तस्योत्पत्तिं वरारोहे शृणु त्वं भूतधारिणि ॥ ३ ॥ आसीद्राजा महाबाहुरादौ कृतयुगे पुरा ॥ श्रुतकीर्तिरिति ख्यात स्त्रैलोक्ये बलवत्तरः ॥४॥ तस्य पुत्रत्वमापेदे सुप्रभो मणिजो घरे ॥ प्रजापालेति वै नाम्ना श्रुत कीर्तिर्महाबलः ॥५॥ स एकस्मिन्दिने प्रायाद्वहनं स्वापदाकुलम् ॥ तत्रापश्यदृषेर्द्धन्यं महदाश्रममण्डलम् ॥६॥ तस्मिन्महातपा नाम ऋषिः परमधार्मिकः ॥ तपस्तेपे निराहारो जपन्ब्रह्म सनातनम् ॥ ७ ॥ तत्रासौ पार्थिवः श्रीमान्प्रवेशाय मतिं तदा ॥ चकार चाविशद्राजा प्रजापालो महातपाः ॥ ८ ॥ तस्मिन्वराश्रमपदे वनवृक्षजात्या धराप्रसूतेर्जितमार्गजुष्टाः ॥ लतागृहा इन्दुसमप्रकाशिनो नायासज्ञा यत्र याता हि

भृङ्गाः ॥९॥ सुरक्तपद्मोदरकोमलाग्रनखाङ्कुलीभिः प्रसृतैः सुरागाम् ॥ वराङ्गनाभिः पदपंक्तिमुर्व्वैर्विहाय भूमिं त्वपि वृत्रशत्रोः ॥ १०॥ क्वचित् समीपे तमतीव ह्रष्टैर्नानाद्विजैः षट्चरणैश्च मत्तैः ॥ वाशद्भिरुच्चैर्विविधप्रमाणाः शाखाः सुपुष्पाः समयोगयुक्ताः ॥११॥ कदम्बनीपार्ज्जुनशीलशालभृता गृहस्थैर्मधुरस्वरेण ॥ जुष्टा विहङ्गैः सुजनप्रयोगा निराकुला कार्यधृतिर्यथास्थैः ॥ १२ ॥ मखाग्निधूमैरुदितााग्रहोमैस्ततः समन्ता द्रहमेधिभिर्द्विजैः ॥ सिंहैरिवाधर्म्मकरी विदारितः सुतीक्ष्णदंष्ट्रैर्वरमत्तकेसरैः ॥ १३ ॥ एवं स राजा विविधानुपायान्वराश्रमे प्रेक्षमाणो विवेश्म॥ तस्मिन्प्रविष्टे तु स तीव्रतेजा महातपाः पुण्यकृतां प्रधानः ॥ १४ ॥ दृष्टो यथा भानुरनन्तभानुः कौशासने ब्रह्मविदां प्रधानः ॥ दृष्ट्वा स राजा विजये मृगाणां मतिं विसस्मार मुनेः प्रसङ्गात् ॥ १५ ॥ चकार धर्मं प्रति मानसं सो ह्युत्तमं चाप्रतिमं मुनिः सः ॥ स मुनिस्तं नृपं दृष्ट्वा प्रजापालमकल्मषम् ॥ अभ्यागतक्रियां चक्रे आसनस्वागतादिभिः ॥ १६ ॥ ततः कृतासनो राजा प्रणम्य ऋषिपुङ्गवम् ॥ पप्रच्छ वसुधे प्रश्नमिमं परमदुर्ह्डभम् ॥ १७॥ भगवन्दुःखसंसारमग्नैः पुम्भिर्जिगीषुभिः ॥ यत्कार्यं तन्ममाचक्ष्व प्रणते शांतितत्रत ॥ १८ ॥ महातपा उवाच ॥ संसारार्णवमज्जमानमनुजैः पोतः स्थिरोऽतिध्रुवः कार्यः पूजनहोमदानविधिभिर्यज्ञैः समं ध्यानकैः ॥ कीर्ह्डैः कीर्तितमोक्षकैः सुरभटै रूर्ध्वं महाराज्ञुभिः प्राणाद्यैरधुना कुरुष्व नृपते पोतं त्रिलोकेश्वरम् ॥ १९ ॥ नारायणं नरकहरं सुरेशं भक्त्या नमस्कुर्वति यो नृपेश ॥ स वीतशोकः परमं विशोकं प्राप्नोति विष्णोः पदमव्यय यत् ॥ २० ॥ नृप उवाच ॥ भगवन्सर्वधर्मज्ञ कथं विष्णुः सनातनः ॥ पूज्यते मोक्षमिच्छद्भिः पुरुषैर्वद तत्त्वतः॥२१॥महातपा उवाच ॥ शृणु राजन् महाप्राज्ञ यथा विष्णुः प्रसीदति ॥ पुरुषाणां तथा स्त्रीणां सर्वयोगीश्वरो हरिः ॥२२॥ सर्वे देवाः सपितरो ब्रह्माद्याश्चाण्डमध्यगाः ॥ विष्णोः सकाशादुत्पन्ना इतीयं वैदिकी श्रुतिः ॥२३ ॥ अग्निस्तथाश्विनौ गौरीगज वक्त्रभुजङ्गमाः ॥ कार्त्तिकेयस्तथादित्या मातरो दुर्गया सह ॥२४॥ दिशो धनपतिर्विष्णुर्यमो रुद्रः शशी तथा॥पितरश्चैव सम्भूताः प्राधान्येन जगत्पतेः॥२५॥ हिरण्यगर्भस्य तनौ सर्वे एव समुद्भवाः ॥ पृथक्पृथक्तनौ गर्वं वहमानाः समन्ततः ॥२६॥ अहं योग्यस्त्वहं याज्य इति तेषां स्वनो महान् ॥ श्रूयते देवसमितौ क्षुब्धसागर सन्निभः॥२७॥तेषां विवदमानानां वह्निरुत्थाय पार्थिव॥उवाच मां यजस्वेति ध्याय त्वं मामिति

ब्रुवन्॥२८॥ प्राज्ञापत्यमिदं नूनं शरीरं मद्विना कृतम् ॥ विनाशमुपपद्येत यतो नायं महानहम् ॥ २९ ॥ एवमुक्ता शरीरं तु त्यक्त्वा वह्निर्विनिर्ययौ ॥ निर्गतेऽपि ततस्तस्मिंस्तच्छरीरं न शीर्यते ॥ ३० ॥ ततोऽश्विनौ मूर्तिमन्तौ प्राणापानशरीरगौ ॥ आवां प्रयानाद्वित्यवेमूचतुर्याज्ययुत्तरौ॥ ३१॥एवमुक्त्वा शरीरं तु विहाय क्वचिदास्थितौ॥तयोरपि क्षयं कृत्वा क्षीणं तत्पुरमास्थितम् ॥ ३२॥ ततो वागब्रवीद्धोरी प्राधान्यं मयि संस्थितम् ॥ साप्येवमुक्त्वा क्षेत्रात्तु निश्चक्राम बहिः शुभा ॥ ३३ ॥ तया विनापि तत्क्षेत्रं वागूनं व्यवतिष्ठत ॥ ततो गणपतिर्वाक्य माकाशाख्योऽब्रवीत्तदा ॥३४॥ न मया रहितं किञ्चिच्छरीरं स्थापि दूरतः ॥ कालान्तरेत्येवमुक्त्वा सोऽपि निष्क्रम्य देहतः ॥३५॥पृथग्भूत स्तथाप्येतच्छरीरं नाप्यनीनशत् ॥ विनाशाख्यं च तत्तेन तथापि न विशीर्यते ॥ ३६ ॥ सुषिरैस्तु विहीनं तु दृष्ट्वा क्षेत्रं व्यवस्थितम् ॥ शरीरघातवः सर्वे ते ब्रूयुर्वाक्यमेव हि॥३७॥ अस्माभिर्व्यतीरिक्तस्य न शरीरस्य धारणम्॥ भवतीत्येवमुक्त्वा ते जहुः सर्वे शरीरिणः ॥३८॥ तैर्व्यपेतमपि क्षेत्रं पुरुषेण प्रपाल्यते ॥ तं दृष्ट्वा त्वब्रवत्सिकन्दः सोऽहङ्कारः प्रकीर्तितः ॥ ३९॥ मया विना शरीरस्य सम्भूतिरपि नेष्यते ॥ एवमुक्त्वा शरीरात्तु स व्यपेतः पृथक् स्थितः ॥ ४० ॥ तेनाक्षतेन तत्क्षेत्रं विना मुक्तवदास्थितम् ॥ तं दृष्ट्वा कुपितो भानुः स आदित्यः प्रकीर्तितः ॥ ४१ ॥ मया विना कथं क्षेत्रमिमं क्षणमपीष्यते ॥ एवमुक्त्वाथ यातः स तच्छरीरं न शीर्यते ॥ ४२ ॥ ततः कामादिरुत्थाय गणो मातृविसंज्ञितः ॥ न मया व्यतिरिक्तस्य शरीरस्य व्यवस्थितिः ॥ ४३ ॥ एवमुक्त्वा स यातस्तु शरीरं तन्न शीर्यते ॥ ततो मायाब्रवीत्कोपात्सा च दुर्गा प्रकीर्त्तिता ॥ ४४ ॥ न मयास्य विना भूतिरित्युक्त्वान्तर्दधे पुनः ॥ ततो दिशः समुत्तस्थुरूचुश्चेदं वचो महत् ॥ ४५ ॥ नास्माभी रहितं कार्यं भवतीति न संशयः ॥ चतस्र आगताः काष्ठास्ताः प्रयाताः क्षणात्तदा ॥ ४६ ॥ ततो धनपतिर्वायु र्मध्यतस्त्यक्तसम्भवः ॥ शरीरस्येति सोऽप्येवमुक्त्वा मूर्द्धानि सोऽभवत् ॥ ४७ ॥ ततो विष्णोर्मनो ब्रूयान्नायं देहो मया विना ॥ क्षणमप्यु त्सहेत्स्थातुमित्युक्त्वान्तर्दधे पुनः ॥ ४८ ॥ ततो धर्मोऽब्रवीत्सर्वमिदं पालितवाहनम् ॥ इदानीं मय्यपगते कथमेतद्भविष्यति ॥ ४९ ॥ एवमुक्त्वा गतो धर्मस्तच्छरीरं न शीर्यते ॥ ततोऽब्रवीन्महादेवः अव्यक्तो भूतभावनः ॥ ५० ॥ महासंज्ञो मया हीनं शरीरं नो भवेद्यथा ॥

॥२१॥

एवमुक्त्वा गतः शम्भुस्तच्छरीरं न शीर्यते ॥ ५१ ॥ तद्दृष्ट्वा पितरश्चोचुस्तन्मात्रं यावदस्माभिः ॥ प्राणान्तरेभिरेतच्च शरीरं शीर्यते ध्रुवम् ॥ ५२ ॥ एवमुक्त्वा तु तद्देहं त्यक्त्वान्तर्द्धानमागताः ॥ अग्निः प्राण अपानश्च आकाशं चैव धातवः ॥ ५३ ॥ क्षेत्रं तद्भदईकारो भानुः कामादयो मया ॥ काष्ठा वायुर्विष्णुधर्मो शम्भुश्चैवेन्द्रियार्थकाः ॥५४ ॥ एतैर्मुक्तं तु तत्क्षेत्रं मुक्ताविव तु संस्थितम् ॥ सोमेन पाल्यमानं तु पुरुषेणेन्दुरूपिणा ॥ ५५ ॥ एवं व्यवस्थिते सोमे षोडशात्मन्यथाक्षरे ॥ प्राग्वत्तत्र गुणोपेतं क्षेत्रमुत्थाय वभ्रम ॥ ५६ ॥ प्रागवस्थं शरीरं तु दृष्ट्वा सर्वज्ञपालितम् ॥ताः क्षेत्रदेवताः सर्वा वैलक्षं भावमास्थिताः॥५७॥ तमेवं तुष्टुवुः सर्वास्तं देवं परमेश्वरम् ॥ स्वस्थानं विविशुः सर्वास्तदा नृपतिसत्तम ॥५८॥ त्वमग्निस्त्वं तथा प्राणस्त्वमपानः सरस्वती ॥ त्वमाकाशं घनाध्यक्षस्त्वं शरीरस्य धातवः ॥५९ ॥ अहंकारो भवान्देव त्वमादित्योऽष्टको गणः ॥ त्वं माया पृथिवी दुर्गा त्वं दिशस्त्वं मरुत्पतिः॥६०॥ त्वं विष्णुस्त्वं तथा धर्मस्त्वं जिष्णुस्त्वं पराजितः ॥ अक्षरार्थस्वरूपेण परमेश्वरसंज्ञितः ॥ अस्माभिरपयातैस्तु कथमेतद्भविष्यति ॥६१॥ एवमत्र शरीरं तु त्यक्तमस्माभिरेव च ॥ न परं भवतो देव तदत्र त्वं च पालयेः ॥ ६२ ॥ स्थानभङ्गो न नः कार्यः स्वयं सृष्ट्वा प्रजापते ॥ एवं स्तुतस्ततो देवस्तेषां तोषं परं ययौ ॥ ६३ ॥ उवाच चैतान्कीर्त्यार्थं भवन्तोत्पादिता मया ॥ कृतकृत्यस्य चैकं तु भवद्भिर्मे प्रयोजनम् ॥ ६४ ॥ तथा चेदृप्रियं रूपे द्वे द्वे प्रत्येकशोऽधुना ॥ भूतकार्येष्वमूर्तेन देवलोके तु मूर्तिना ॥ ६५ ॥ तिष्ठध्वमपि कालान्ते लयं त्वाविशत द्रुतम् ॥ शरीराणि पुनर्नैव कर्त्तव्योऽहमिति क्वचित् ॥ ६६ ॥ मूर्तीनां च तथा तुभ्यमग्निनामानि वोऽधुना ॥ अग्निर्वैश्वानरो नाम प्राणापानौ तथाश्विनौ ॥ ६७ ॥ भविष्यति तथा गौरी हिमशैलसुता तथा ॥ पृथव्यादिगुणस्त्वेष गजवक्त्रो भविष्यति ॥ ६८ ॥ शरीरघातवश्चेमे नानाभूतानि चैव तु ॥ अहंकारस्तथा स्कंदः कार्त्तिकेयो भविष्यति ॥ ६९ ॥ शरीरमाया दुर्गेयं कारणान्ते भविष्यति ॥ दश कन्या भविष्यन्ति काष्ठास्त्वेतास्तु वारुणाः ॥ ७० ॥ अयं वायुर्द्धनेशस्तु कारणं ते भविष्यति ॥ अयं मनो विष्णुनामा भविष्यति न संशयः ॥ ७१ ॥ धर्मोऽपि यमनामा च भविष्यति न संशयः ॥ महत्तत्त्वं च भगवान्महादेवो भविष्यति ॥ ७२ ॥ इन्द्रियार्थाश्च पितरो भविष्यंति न संशयः ॥ अयं सोमः पुरा भूत्वा जामित्रं

सर्वदामराः ॥७३॥ एवं वेदान्तपुरुषः प्रोक्तो नारायणात्मकः ॥ स्वस्थाने देवताः सर्वा देवस्तु विरराम ह ॥ ७४ ॥ एवंप्रभावो देवोऽसौ वेद वेद्यो जनार्दनः ॥ कथितो नृपते तुभ्यं किमन्यच्छ्रोतुमिच्छसि ॥ ७५ ॥ इतिश्रीवराहपुराणे आदिकृतवृत्तान्ते महातप उपाख्याने सप्तदशोध्यायः ॥ १७ ॥ अथाभ्युत्पत्तिवर्णनम् ॥ प्रजापाल उवाच ॥ कथमग्रेः समुत्पत्तिरद्विजनोर्वा महामुने ॥ गौर्या गणपतेर्वापि नागानां वा गुहस्य च ॥ १ ॥ आदित्यचन्द्रमातॄणां दुर्गाया वा दिशां तथा ॥ धनदस्य च विष्णोर्वा धर्मस्य परमेष्ठिनः ॥ २ ॥ शम्भोर्वापि पितॄणां च तथा चन्द्रमसो मुने ॥ शरीरदेवताः सर्वाः कथं मूर्त्तित्वमागताः ॥ ३ ॥ किंच तासां मुने भोज्यं का वा संज्ञा तिथिश्च का ॥ यस्यां दत्त्वा स्वमी पुंसां फलं यच्छन्त्यनामयम् ॥ ४ ॥ एतन्मे सरहस्यं तु मुने त्वं वक्तुमर्हसि ॥ महातप उवाच ॥ योगसाध्यस्वरूपेण आत्मा नारायणात्मकः ॥ ५ ॥ सर्वज्ञः क्रीडतस्तस्य भोगेच्छा चात्मनात्मनि ॥ क्षोभितेऽस्मिन्महाभूते एतत्तद्वै तदद्भुतम् ॥ ६ ॥ तमद्य प्रीतिमतोऽयं विकारं समरोचयत् ॥ विकुर्वतस्तस्य तदा महानग्निः समुत्थितः ॥ ७ ॥ कोटिज्वालापरीवारः शून्यव्याप्तदहनात्मकः ॥ असावप्यतितेजस्वी विकारं समरोचयत् ॥ ८ ॥ विकुर्वतो बभौ वह्नेर्वायुः परमदारुणः ॥ तस्मादपि विकारस्थादाकाशं समपद्यत ॥ ९ ॥ तच्छब्दलक्षणं व्योम स च वायुः प्रतापवान् ॥ तच्च तेजोऽम्भसा युक्तं श्लिष्टमन्योन्यतस्तथा ॥ १० ॥ तेजसा शोषितं तोयं वायुना ऊष्मणामिना ॥ बोधितेन तथा व्योममार्गे दत्ते तु तत्क्षणात् ॥ ११ ॥ पिण्डीभूतं तथा सर्वं काठिन्यं समपद्यत ॥ सेयं पृथ्वी महाभाग तेषां वृत्तेतराभवत् ॥ १२ ॥चतुर्णां योगकाठिन्यादेकैकगुणवृद्धितः ॥ पृथ्वी पंचगुणा ज्ञेया तेऽप्येतस्यां व्यवस्थिताः ॥१३ ॥ स च कृत्स्नः काठिन्यकं कुर्वन्ब्रह्माण्डं समपद्यत ॥ तस्मिन्नारायणो देवश्चतुर्मूर्त्तिश्चतुर्भुजः ॥ १४ ॥ प्राजापत्येन रूपेण सिसृक्षुर्विविधाः प्रजाः ॥ चिन्तयन्नाविगच्छेतु सृष्टिं लोकपितामहः ॥ १५ ॥ ततोऽस्य सुमहान् कोपो जज्ञे परमदारुणः ॥ तस्मात्कोपात्सहस्रार्चिरुत्तस्थौ दहनात्मकः ॥ १६ ॥ स तं दिधक्षुब्रह्माणं ब्रह्मणोक्तस्तदा नृप ॥ हव्यं कव्यं वहस्वेति ततोऽसौ हव्यवाहनः ॥ १७ ॥ ब्रह्माणं क्षुधित प्रायाक्किङ्करोमि प्रशाधि माम् ॥ स ब्रह्मा प्रत्युवाचैनं त्रिधा तृप्तिमवाप्स्यसि ॥ १८ ॥ दत्तासु दक्षिणास्वादौ तृप्तिर्भूत्वा यतोऽमरान् ॥ नयसे दक्षिणाभागं दक्षिणाग्निस्ततोऽ

॥२२॥

भवत् ॥ १९ ॥ आ समन्ताद्धुतं किंचिद्यत्त्रिलोके विभावसो ॥ तद्ग्रहस्व सुरार्थाय ततस्त्वं हव्यवाहनः ॥ २० ॥ गृहं शरीरमित्युक्तं तत्पतिस्त्वं यतोऽधुना ॥ अतो वै गार्हपत्यस्त्वं भव सर्वगतो विभो ॥ २१ ॥ विश्वान्नराद् हुतो येन नयसे सद्गतिं प्रभो ॥ अतो वैश्वानरो नाम तव सत्यं भविष्यति ॥ २२ ॥ द्रविणं बलमित्युक्तं धनं च द्रविणं ततः ॥ ददाति तद्भवानेव द्रविणोदास्ततो ऽभवत् ॥ २३ ॥ पापस्तिरोभवेन्नित्यं निःशब्दो निश्चयात्मकः ॥ अतस्त्वं सर्वगत्वाच्च तेजोऽग्निस्ते भविष्यति ॥२४ ॥ ध्मापूरणशब्दो य इध्मानामपि कीर्त्यते ॥ पूरितस्य गतिर्येन तेनेध्मस्त्वं भविष्यसि ॥ २५ ॥ याज्यान्येतानि नामानि तव पुत्र महामखे ॥ यजन्तस्त्वां नराः कामैस्तर्पयिष्यन्त्यसंशयम् ॥ २६ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्यानेऽग्न्युत्पत्तिर्नामाष्टादशोऽध्यायः ॥ १८ ॥ अथाग्निप्राशस्त्यम्॥ महातप उवाच॥विष्णोर्विभूतिमाहात्म्यं कथितं ते प्रसङ्गतः ॥ तिथीनां शृणु माहात्म्यं कथ्यमानं मया नृप ॥१॥ इत्थम्भूतो महानग्निर्ब्रह्मक्रोधसमुद्भवः ॥ उवाच देवं ब्रह्माणं तिथिर्मे दीयतां विभो ॥ यस्यामहं समस्तस्य जगतः स्यातिमाप्नुयाम् ॥ २ ॥ ब्रह्मोवाच ॥ देवानामथ यक्षाणां गंधर्वाणां च सत्तम ॥ आद्यो प्रतिपद्व येन त्वमुत्पन्नोऽसि पावक ॥ ३ ॥ त्वत्पदात्प्रातिपदिकं सम्भविष्यन्ति देवताः ॥ अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥ ४ ॥ तस्यां तिथौ हविष्येण प्राजापत्येन मूर्तिना ॥ होष्यन्ति तेषां प्रीताः स्युः पितरः सर्व देवताः ॥ ५ ॥ चतुर्विंधानि भूतानि मनुष्याः पशवोऽसुराः ॥देवाः सर्वे सगन्धर्वाः प्रीताः स्युस्तर्पितास्त्वयि ॥६॥यश्चोपवासं कुर्वीत त्वद्भक्तः प्रतिपद्दिने ॥ क्षीराशनो वा वर्त्तेत शृणु तस्य फलं महत् ॥ चतुर्युगानि षष्टिं च स्वर्गलोके महीयते ॥ ७ ॥ तेजस्वी रूपसम्पन्नो ब्रूयवान् जायते नरः ॥ इह जन्मन्यसौ राजा प्रेत्य स्वर्गे महीयते॥८॥ तूष्णीम्बभूव सोऽप्यग्निर्ब्रह्मदत्ताश्रमं ययौ॥९॥य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः ॥ अग्नेर्जन्म स पापेभ्यो मुच्यते नात्र संशयः ॥ १० ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातप उपाख्यानेऽग्निप्राशस्त्यनिरूपणं नामैकोनविंशोऽध्यायः ॥ १९ ॥ अथाश्विनोरुत्पत्तिः ॥ प्रजापाल उवाच ॥ एवमग्नेः समुत्पत्तिर्जाता ब्रह्मन्महात्मनः ॥ प्राणापानौ कथं देवावश्विनौ सम्बभूवतुः ॥ १ ॥ महातपा उवाच ॥ मरीचिर्ब्रह्मणः पुत्रः स्वयं ब्रह्मा द्विसप्तभिः ॥ रूपैर्व्यवस्थितस्तेषां मरीचिः श्रेष्ठता

मगात्॥२॥ तस्य पुत्रो महातेजाः कश्यपो नाम वै मुनिः ॥ स्वयं प्रजापतिः श्रीमान्देवतानां पिताभवत्॥३॥ तस्य पुत्रा बभूवुर्हि आदित्या द्वादश प्रभो ॥ नारायणात्मकं तेजो द्वादशोति प्रकीर्तितम् ॥ ४ ॥ ते च मासास्त आदित्याः स्वयं संवत्सरो हरिः ॥ एवं ते द्वादशादित्या मार्त्तण्डश्च प्रतापवान् ॥ ५ ॥ तस्य त्वष्टा ददौ कन्यां संज्ञां नाम महाप्रभाम् ॥ तस्यापत्यद्वयं जज्ञे यमश्च यमुना तथा ॥ ६ ॥ तस्य तेजोऽप्यसहती बभूवाश्वा मनोजवा ॥ स्वां छायां तत्र संस्थाप्य सा जगामोत्तरान्कुरून् ॥ ७ ॥ तद्रूपां तां सवर्णां तु भेजे मार्त्तण्डभास्करः ॥ तस्मादपि द्वयं जज्ञे शनिं तपतीमेव च ॥८॥ यदा त्वसहशं भेजे पुत्रान् प्रति नरोत्तमः ॥ छायां प्रोवाच भगवान् क्रोधसंरक्तलोचनः ॥ असमत्वं न कर्त्तव्यं स्वेष्वपत्येषु भामिनि ॥९॥ एवमुक्ता यदा सा तु ह्यसमत्वं व्यरोचत॥ तदा यमः स्वपितरं प्रोवाच भृशदुःखितः ॥१०॥ नेयं माता भवेत्तात त्वस्माकं शत्रुवत्सदा ॥ सपत्नीव वृथाचारा स्वेष्वपत्येषु वत्सला ॥ ११ ॥ एवं यमवचः श्रुत्वा सा च्छाया क्रोध मूर्च्छिता ॥ शशाप प्रेतराजस्त्वं भविष्यस्यचिराद्दिव ॥ १२ ॥ एवं श्रुत्वाथ मार्त्तण्डस्तदा पुत्रहितेच्छया ॥ उवाच मध्यवर्त्ती त्वं भविता धर्मपापयोः ॥ लोकपालश्च भविता त्वं पुत्र दिवि शोभसे ॥ १३ ॥ शनिं शशाप मार्त्तण्डश्छायाकोपप्रधर्षितः ॥ त्वं क्रूरदृष्टिर्भविता मातृदोषेण पुत्रक ॥१४॥ एवमुक्त्वा समुत्थाय ययौ भानुर्दिदृक्षया ॥ तामपश्यत्त्वसावश्वाभुत्तरेषु करुष्वथ॥१५॥ ततोऽश्वरूपं कृत्वा स गत्वा तत्रोत्तरान् कुरून् ॥ प्राजापत्येन मार्गेण युयोजात्मानमात्मना ॥ १६॥ तस्यां त्वाष्ट्र्यामश्व रूपां मार्त्तण्डस्तीव्रतेजसा ॥ बीजं निषोपयामास तज्ज्वलद्वि द्विधापतत् ॥१७॥ तत्र प्राणस्त्वपानश्च योनौ चात्मजितौ पुरा ॥ वरदानेन च पुनर्मूर्तिमन्तौ बभूवतुः ॥१८॥ तौ त्वाष्ट्र्यामश्व रूपायां जातौ येन नरोत्तमौ ॥ ततस्तावश्विनौ देवौ कीर्त्येते रविनन्दनौ ॥ १९ ॥ प्राजापत्यं स्वयं भानुस्त्वाष्ट्री शक्तिः परापरा ॥ तस्याः प्राग्वच्छरीरस्थावमूर्त्तौ मूर्त्तिमाश्रितौ ॥२०॥ ततस्तावश्विनौ देवौ मार्त्तण्डमुपतस्थतुः॥ ऊचतुः स्वरूपिं तावत्किं कर्त्तव्यमथावयोः॥२१॥ मार्त्तण्ड उवाच ॥ पुत्रौ प्रजापतिं देवं भक्त्याराधयतां वरम् ॥ नारायणं स वो दाता वरं चूतमवाप्स्यथः ॥ २२ ॥ एवं तावश्विनौ प्रोक्तौ मार्त्तण्डेन महात्मना ॥ तेपतुस्तीव्रतपसौ तपः परमदुश्चरम् ॥ ब्रह्मणारमयं स्तोत्रं जप्यतौ तु समाहितौ ॥ २३ ॥ ततोः कालेन महता ब्रह्मा नारा

॥२३॥

यणात्मकः ॥ तुतोष परमप्रीत्या वरं चैवं ददौ तयोः ॥२४॥ प्रजापाल उवाच ॥ अश्विभ्यामीरितं स्तोत्रं ब्रह्मणो व्यक्तजन्मनः ॥ श्रोतुमिच्छाम्यहं ब्रह्मंस्तवत्प्रसादान्महामुने ॥२५॥ महातपा उवाच ॥ शृणु राजन्यथा स्तोत्रमश्विभ्यां ब्रह्मणः कृतम् ॥ ईदृशं च फलं प्राप्तं तयोः स्तोत्रस्य चानघ ॥ २६ ॥ ॐ नमस्ते निष्क्रिय निष्प्रपञ्च निराश्रय निरपेक्ष निरालम्ब ॥ निर्गुण निरालोक निराधार निर्मम निरालम्ब ॥ २७ ॥ ब्रह्मन्महाब्रह्मन्ब्राह्मणप्रिय पुरुष महापुरुष पुरुषोत्तम ॥ देव महादेव देवोत्तम स्थाणो स्थिति (त) स्थापक ॥ २८ ॥ भूत महाभूत भूताधिपते यक्ष महायक्ष यक्षाधिपत ॥ गुह्य महागुह्य गुह्याधिपते सौम्य महासौम्य सोम्याधिपते ॥ २९ ॥ पक्षिन् महापक्षिपते दैत्य महादैत्याधिपते ॥ रुद्र महारुद्राधिपते विष्णो महाविष्णुपते ॥ परमेश्वर नारायण प्रजापतये नमः ॥ ३० ॥ एवं स्तुतस्तदा ताभ्यामश्विभ्यां स प्रजापतिः ॥ तुतोष परमप्रीत्या वाक्यं चेदमुवाच ह ॥ ३१ ॥ वरं वरयतां शीघ्रं देवैः परमदुर्लभम् ॥ येन वो वरदानेन चरतश्चिरदिवे सुखम् ॥ ३२ ॥ अश्विनावूचतुः ॥ आवयोर्देवभागं तु देहि देव प्रजापते ॥ सोमपत्वं च देवानां सामान्यत्वं च शाश्वतम् ॥ ३३ ॥ ब्रह्मोवाच ॥ रूपं कान्तिरनोपम्यं भिषक्त्वं सर्ववस्तुषु ॥ सोमपत्वं च लोकेषु सर्वमेतद्भविष्यति ॥ ३४ ॥ महातपा उवाच ॥ एतत्सर्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा ॥ दत्तं यस्माद्ततस्तेषां तिथीनामुत्तमा तिथिः ॥ ३५ ॥ एतस्यां रूपकामस्तु पुष्पाहारो भवेन्नरः ॥ संवत्सरं शुचिर्नित्यं सुस्वरूपो भवेन्नरः ॥ ३६ ॥ अश्विनोर्ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च ॥ य इदं शृणुयान्नित्यमश्विनोर्जन्म चोत्तमम् ॥ सर्वपापविनिर्मुक्तः पुत्रवान्जायते नरः ॥ ३७ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्यानेऽश्विनोरुत्पत्तिनाम विंशोऽध्यायः ॥ २०॥ अथ गौर्युत्पातः ॥ प्रजापाल उवाच ॥ कथं गौरी महाप्राज्ञ संस्तुता वरदा ततः ॥ मूर्तिं लब्धवती पुंसः परस्य परमात्मनः ॥ १ ॥ महातपा उवाच ॥ पूर्वं प्रजापतिर्देवैः तिसृभुर्वैविधाः प्रजाः ॥ चिन्तयामास धर्मात्मा यदा ता नाध्यगच्छत ॥ २ ॥ तदास्य कोपात्सञ्जज्ञे स च रुद्रः प्रतापवान् ॥ रोदनात्तस्य रुद्रत्वं सञ्जातं परमेष्ठिनः ॥ ३ ॥ तस्य ब्रह्मा शुभः कन्यां भार्यार्थे मूर्त्तिसम्भवाम् ॥ गौरीनाम्नीं स्वयं देवीं भारतीं तां ददौ पिता ॥ रुद्रायामितदेहाय स्वयं ब्रह्मा प्रजापतिः ॥ ४ ॥ स तां लब्ध्वा वरा

रोहां मुदा परमया युतः ॥ सर्गकालेषु तं ब्रह्मा तपसा प्रत्युवाच ह ॥ ५ ॥ रुद्र प्रजाः सृजस्वेति पौनःपुन्येन चोदितः ॥ असमर्थोऽस्मीति
जले न्यमज्जत महाबलः ॥ ६ ॥ तपोऽर्थी त्वं तपोहीनः स्रष्टुं शक्नोति न प्रजाः ॥ एवं चिन्त्य जले मग्नस्ततो रुद्रः प्रतापवान् ॥ ७ ॥ तस्मिन्
निमग्ने देवेशे तां ब्रह्मा कन्यकां पुनः ॥ अन्तःशरीरगां कृत्वा गौरीं परमशोभनाम् ॥ ८ ॥ पुनः सिसृक्षुर्भगवानसृजत्तत मानसान् ॥ दक्षं च
तत आरभ्य प्रजाः सम्यग्विवर्धिताः ॥ ९ ॥ तत्र दाक्षायणीपुत्राः सर्वे देवाः सवासवाः॥ वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा ॥ १० ॥
सापि दक्षाय सुश्रोणी गौरी दत्ताथ ब्रह्मणा॥ दुहितृत्वे पुरा या हि रुद्रेणोढा महात्मना ॥११॥ सा च दाक्षायणी देवी पुनर्भूत्वा नृपोत्तम ॥१२॥
ततो दक्षः प्रहृष्टात्मा दौहित्रांस्तान्समृद्धिकृत ॥ दृष्ट्वा यज्ञमथारेभे प्रीणनाय प्रजापतेः ॥ १३ ॥ तत्र ब्रह्मसुताः सर्वे मरीच्यादय
एव च ॥ चक्रुरार्त्विज्यकं कर्म्म स्वे स्वे मार्गे व्यवस्थिताः ॥ १४ ॥ ब्रह्मा स्वयं मरीच्यस्तु बभूवाऽन्ये तथापरे ॥ अत्रिस्तु यज्ञकर्मस्थ
आग्नीध्रस्त्वङ्गिरा भवत् ॥ १५ ॥ होता पुळस्त्यस्त्वभवदुद्गाता पुळहोऽभवत् ॥ क्रतौ क्रतुस्तु प्रस्तोता तदा यज्ञे महातपाः ॥ १६ ॥
प्रतिहर्ता प्रचेतास्तु तस्मिन् क्रतुवरे बभौ ॥ सुब्रह्मण्यो वसिष्ठस्तु सनकाद्याः सभासदः ॥ १७ ॥ तत्र याज्यः स्वयं ब्रह्मा स च इज्यस्तु
विश्वकृत् ॥ पूज्य दक्षस्य दौहित्रा रुद्रादित्यौऽङ्गिरादयः ॥ १८ ॥ प्रत्यक्षं पितरस्ते हि तैः प्रीतैः प्रीयते जगत् ॥ तत्र भागार्थिनो देवा
आदित्या वसवस्तथा॥१९॥विश्वेदेवाः सापितरो गन्धर्वाद्या मरुद्गणाः ॥ जगृहुर्यज्ञभागांस्तान्यथावत्तो हविर्वापितः ॥ २०॥ तावत्कालं जळात्
सद्य उत्तस्थौ ब्रह्मणः पुनः ॥ रुद्रः कोपोद्भवो यस्तु पूर्वं मग्नो महाजले ॥२१॥ स सहस्रार्कपङ्काशो निश्चक्राम जळाततः॥ सर्वज्ञानमयो देवः
सर्वदेवमयोऽमलः ॥ २२ ॥ प्रत्यक्षदर्शी सर्वस्य जगतस्तपसा बभौ ॥ तस्मिंस्तु काले पञ्चानां जातः सर्गो नरोत्तम ॥ २३ ॥ दिव्यानां
पृथिवीस्थानां चतुर्णां सम्भवात्मनाम् ॥ रौद्रसर्गस्य सम्भूतिस्तदा सद्योऽपि जायते ॥ २४ ॥ इज्ञानीं रुद्रसर्गं त्वं शृणु पार्थिवसत्तम ॥ दशवर्ष
सहस्राणि तपस्तप्त्वा महाजले ॥ २५ ॥ अधिरुद्रो यदा रुद्रस्तथा चोर्वी सकाननाम् ॥ दृष्ट्वा सस्यवतीं रम्यां मनुष्यपशुवङ्कुलाम् ॥ २६ ॥
शुश्राव च तदा शब्दानृत्विजां दक्षसद्मनि॥ आश्रमे याज्ञियानांचैर्योगैस्थैरिति कीर्तितान् ॥ २७ ॥ ततः श्रुत्वा महातेजाः सर्वज्ञः परमेश्वरः ॥

चुकोप सुभृशं देवो वाक्यं चेदमुवाच ह ॥ २८ ॥ अहं पूर्वं तु कविना सृष्टः सर्वात्मना विभुः ॥ प्रजाः सृजस्वेति तदा वाक्यमेतत्तथोक्तवान् ॥ २९॥ इदानीं केन तत्कर्म्म कृतं सृष्ट्वादिवर्णनम् ॥ एवमुक्तो भृशं कोपान्ननाद परमेश्वरः ॥३० ॥ तस्यैव नदतो ज्वालाः श्रोत्रेभ्यो निर्ययुस्तदा ॥ तत्र भूतानि वेताला उच्छुष्माः प्रेतपूतनाः ॥ ३१ ॥ उत्तस्थुः कोटिशस्तत्र नानाप्रहरणावृताः ॥ तं दृष्ट्वा भूतसङ्घाता विविधायुधपाणयः ॥ ३२ ॥ सप्तजं वेदविद्याङ्गरथं परमशोभनम् ॥ तास्मिन्मृगद्वयं स्वश्वौ त्रितत्त्वं च त्रिवेणुकम् ॥ ३३ ॥ त्रिपूजकं त्रिपवणं धर्माक्षं मारुतध्वनिम् ॥ अहोरात्रे पताके द्वे धर्माधर्मे तु दण्डकम् ॥ ३४ ॥ शकटं सर्वविद्याश्च स्वयं ब्रह्मा हि सारथिः ॥ गायत्री च धनुस्तस्य ओङ्कारो गुण एव च ॥ ३५ ॥ स्वराः सप्त शरास्तस्य देवदेवस्य सुव्रत ॥ एवं कृत्वा स सामग्रीर्देवदेवः प्रतापवान् ॥ ३६ ॥ जगाम दक्षयज्ञाय कोपाद्रुद्रः प्रतापवान् ॥ गच्छतस्तस्य देवस्य अम्बराङ्गिरसन्नयत् ॥ ३७ ॥ ऋत्विजां मन्त्रनिचयो नष्टो रुद्रागमे तदा ॥ विपरीतमिदं दृष्ट्वा तदा सर्वऽत्र ऋत्विजः ॥ ३८ ॥ ऊचुः सन्नद्यतां देवा महद्भो भयमागतम् ॥ कश्चिदायाति बलवानसुरो ब्रह्म निर्मितः ॥ ३९ ॥ यज्ञभागार्थमेतस्मिन्क्रतो परमदुर्लभे ॥ एवमुक्तास्ततो देवा ऊचुर्मातामहं तदा ॥ ४० ॥ दक्ष तात किमत्रास्मत्कार्यं ब्रूहि विचक्षितम् ॥ दक्ष उवाच ॥ ऊह्यन्तां द्रुतमस्त्राणि सङ्ग्रामोऽत्र विधीयताम् ॥ ४१ ॥ एवमुक्ते तदा देवैर्विविधायुधधारिभिः ॥ रुद्रस्यानुचरैः सार्धं महद्युद्धं प्रवर्त्तितम् ॥ ४२ ॥ तत्र वेतालभूतानि कूष्माण्डा ग्रहपूतनाः ॥ युयुधुर्लोकपालैश्च नानायुधधराणि च ॥ ४३ ॥ दिवो रोद्राणि भूतानि निर्गच्छन्तो यमालयम् ॥ चिक्षिपुः सायकान्घोरानसीप्यासपरश्वधान् ॥ ४४ ॥ भूतान्यपि मृधे घोराण्युलुकैरस्थिभिः शरैः ॥ जघ्नुर्देवान्मृधे रोषाद्रुद्रस्य पुरतो बलात् ॥ ४५ ॥ ततस्तस्मिन्महारौद्रे संग्रामे भीमरूपिणि ॥ रुद्रो भगस्य नेत्रे तु विभेदैकेषुणा मृधे ॥४६॥ रुद्रस्य शरपातेन नष्टनेत्रं भगं तदा॥दृष्ट्वास्य क्रोधात्तेजस्वी पूषा रुद्रमयोधयत्॥४७॥सृजन्तमिषुजालानि पूषणं तु महामृधे ॥ दृष्ट्वा रुद्रोऽस्य दन्तांस्तु चकर्ष परवीरहा ॥ ४८ ॥ तस्य दन्तांस्तदा दृष्ट्वा पूष्णो रुद्रेण पातितान् ॥ दुद्रुवुः सर्वतो दिक्षु रुद्रास्त्वेकादश द्रुतम् ॥४९॥ ता भग्नां सहसा दिक्षु दृष्ट्वा विष्णुः प्रतापवान् ॥ आदित्यावरजो वाक्यमुवाच स्ववलं तदा ॥५०॥ क्व यात पौरुषं त्यक्त्वा

गृहाण भागं मखतः प्रधानम् ॥ प्रसीद देवेश्वर नालकण्ठ प्रपाहि नः सर्वगुणोपपन्न ॥ ७४ ॥ सिताङ्गरागाप्रातपत्रमूर्त्त कपालधारिस्त्रिपुरघ्न देव ॥ प्रपाहि नः सर्वभयेषु चैवमुमापते पुष्करनालजन्म ॥ ७५ ॥ पश्यामि ते देहगतान्सुरेश सर्गाद्यकान्वेदवरानन्त ॥ साङ्गान्सावित्र्यान्स पद्मकमांश्च सवा ानलानास्त्वाय देवदेव ॥ ७६ ॥ भव शर्व महादेव पिनाकिन् रुद्र त हर ॥ नताः स्म सर्वे विश्वेश त्राहि नः परमेश्वर ॥७७॥ इत्थं स्तुतस्तदा देवैर्देवैर्देवो महेश्वरः ॥ तुतोष सर्वदेवानां वाक्यं चेदमुवाच ह ॥ ७८ ॥ रुद्र उवाच ॥ भगस्य नेत्रं भवतु पूष्णो दन्तास्तथा मुखे ॥ दक्षस्याच्छिद्रतां यातु यज्ञश्चाप्यदितेः सुताः ॥ ७९ ॥ पशुभावं तथा चाप अपनेष्यामि वः सुराः ॥ मदर्शनेन यो जातः पशुभावो दिवौकसाम् ॥ ८० ॥ स मयापहृतः सद्यः पतित्वं वो भविष्यति ॥ अहं च सर्वविद्यानां पतिराद्यः सनातनः ॥ ८१॥ अहं वै पतिभावेन पशु मध्ये व्यवस्थितः ॥ अतः पशुपतिनाम मम लोके भावष्यति ॥ ८२ ॥ ये मां यजन्ति तेषां स्याद्दीक्षा पाशुपती भवेत् ॥ एवमुक्ते तु रुद्रेण ब्रह्मा लोकपितामहः ॥ ८३ ॥ उवाच रुद्रं सस्नेह स्तिमपूर्वमिदं वचः ॥ ध्रुव पशुपातस्त्व लोक ख्यातिमेष्यासि ॥ ८४ ॥ अयं च देवस्त आत्मा लोके ख्यातिं गमिष्यति ॥ आराध्यश्च समस्तानां लोकादानां गमिष्यति ॥ ८५ ॥ एवमुक्त्वा तदा ब्रह्मा दक्षं प्रोवाच बुद्धिमान् ॥ गौरीं प्रयच्छ रुद्राय पूर्वमेवोपपादिताम् ॥ ८६ ॥ एवमुक्त्वा तदा देवस्तां कन्यां दक्षसन्निधौ ॥ ददौ रुद्राय महते गौरीं परमशोभनाम् ॥ ८७ ॥ दक्षश्च च प्रियं कुर्वन्बहुमानपुरःसरम् ॥ गृहातायां तु कन्यायां दाक्षायण्यां पितामहः ॥ ८८ ॥ ददौ रुद्राय निलयं कैलासं सुरसन्निधौ ॥ रुद्रोऽपि प्रययौ भूतैः समं कैलासपर्वतम् ॥ ८९ ॥ देवाश्चाप यथास्थान स्वं स्वं जग्मुमुदान्विताः ॥ ब्रह्मापि दक्षसाहतः प्राजापत्यं पुरं ययौ ॥९०॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने गौर्युत्पत्तिर्नाम एकविंशोऽध्यायः ॥२१॥ अथ गौरीविवाहः ॥ महातपा उवाच ॥ तस्मिन्निवसतस्तस्य रुद्रस्य परमेष्ठिनः ॥ चुकोप गौरा देवेश्य पितुर्वैरमथास्मरत् ॥१॥ चिन्तयामास देवेश्य त्वनेनापहृतं पुरम् ॥ यज्ञो विध्वंसितो यस्मात्तस्माद्दह त्यजाम्यहम् ॥ २ ॥ आराध्य तपसा तस्य गृहे भूत्वा व्रजाम्यहम् ॥ कथं गच्छामि पितरं दृक्षं क्षपयेत बान्धवम् ॥३॥भवपत्नी च दुहिता एवं सांचिन्त्य सुःदरी ॥ जगाम तपसे देवी हिमवन्तं महागिरिम्॥४॥तत्र कालेन महता क्षपयन्ती कलेवरम् ॥

गृहाण भागं मखतः प्रधानम् ॥ प्रसीद देवेश्वर नालकण्ठ प्रपाहि नः सर्वगुणोपपन्न ॥ ७४ ॥ सिताङ्गरागाप्रातपत्रमूर्त्त कपालधारिस्त्रिपुरघ्न देव ॥ प्रपाहि नः सर्वभयेषु चैवमुमापते पुष्करनालजन्म ॥ ७५ ॥ पश्यामि ते देहगतान्सुरेश सर्गाद्यकान्वेदवरानन्त ॥ साङ्गान्सावित्र्यान्स पद्मकमांश्च सवा ानलानास्त्वाय देवदेव ॥ ७६ ॥ भव शर्व महादेव पिनाकिन् रुद्र त हर ॥ नताः स्म सर्वे विश्वेश त्राहि नः परमेश्वर ॥७७॥ इत्थं स्तुतस्तदा देवैर्देवैर्देवो महेश्वरः ॥ तुतोष सर्वदेवानां वाक्यं चेदमुवाच ह ॥ ७८ ॥ रुद्र उवाच ॥ भगस्य नेत्रं भवतु पूष्णो दन्तास्तथा मुखे ॥ दक्षस्याच्छिद्रतां यातु यज्ञश्चाप्यदितेः सुताः ॥ ७९ ॥ पशुभावं तथा चाप अपनेष्यामि वः सुराः ॥ मदर्शनेन यो जातः पशुभावो दिवौकसाम् ॥ ८० ॥ स मयापहृतः सद्यः पतित्वं वो भविष्यति ॥ अहं च सर्वविद्यानां पतिराद्यः सनातनः ॥ ८१॥ अहं वै पतिभावेन पशु मध्ये व्यवस्थितः ॥ अतः पशुपतिनाम मम लोके भावष्यति ॥ ८२ ॥ ये मां यजन्ति तेषां स्याद्दीक्षा पाशुपती भवेत् ॥ एवमुक्ते तु रुद्रेण ब्रह्मा लोकपितामहः ॥ ८३ ॥ उवाच रुद्रं सस्नेह स्तिमपूर्वमिदं वचः ॥ ध्रुव पशुपातस्त्व लोक ख्यातिमेष्यासि ॥ ८४ ॥ अयं च देवस्त आत्मा लोके ख्यातिं गमिष्यति ॥ आराध्यश्च समस्तानां लोकादानां गमिष्यति ॥ ८५ ॥ एवमुक्त्वा तदा ब्रह्मा दक्षं प्रोवाच बुद्धिमान् ॥ गौरीं प्रयच्छ रुद्राय पूर्वमेवोपपादिताम् ॥ ८६ ॥ एवमुक्त्वा तदा देवस्तां कन्यां दक्षसन्निधौ ॥ ददौ रुद्राय महते गौरीं परमशोभनाम् ॥ ८७ ॥ दक्षश्च च प्रियं कुर्वन्बहुमानपुरःसरम् ॥ गृहातायां तु कन्यायां दाक्षायण्यां पितामहः ॥ ८८ ॥ ददौ रुद्राय निलयं कैलासं सुरसन्निधौ ॥ रुद्रोऽपि प्रययौ भूतैः समं कैलासपर्वतम् ॥ ८९ ॥ देवाश्चाप यथास्थान स्वं स्वं जग्मुमुदान्विताः ॥ ब्रह्मापि दक्षसाहतः प्राजापत्यं पुरं ययौ ॥९०॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने गौर्युत्पत्तिर्नाम एकविंशोऽध्यायः ॥२१॥ अथ गौरीविवाहः ॥ महातपा उवाच ॥ तस्मिन्निवसतस्तस्य रुद्रस्य परमेष्ठिनः ॥ चुकोप गौरा देवेश्य पितुर्वैरमथास्मरत् ॥१॥ चिन्तयामास देवेश्य त्वनेनापहृतं पुरम् ॥ यज्ञो विध्वंसितो यस्मात्तस्माद्दह त्यजाम्यहम् ॥ २ ॥ आराध्य तपसा तस्य गृहे भूत्वा व्रजाम्यहम् ॥ कथं गच्छामि पितरं दृक्षं क्षपयेत बान्धवम् ॥३॥भवपत्नी च दुहिता एवं सांचिन्त्य सुःदरी ॥ जगाम तपसे देवी हिमवन्तं महागिरिम्॥४॥तत्र कालेन महता क्षपयन्ती कलेवरम् ॥

स्वशरीराग्निना दग्ध्वा ततः शैलसुताभवत्॥ उमा नाम्नातिमहती कृष्णा चेत्यभिधानतः॥५॥लब्ध्वा तु शोभनां मूर्तिं हिमवन्तगृहे शुभाम्॥ पुनस्तपश्चकारोग्रं देवं स्मृत्वा त्रिलोचनम्॥६॥असावेव पतिमर्ह्मीमित्युक्त्वा तपसि स्थिता॥ कुर्वन्त्या तत्तपश्चोग्रं हिमवन्ते महागिरौ ॥७॥ कालेन महता देवस्तपसाराधितस्तया ॥ आजगामाश्रमं तस्या विप्रो भूत्वा महेश्वरः ॥ ८॥ वृद्धः शिथिलसर्वाङ्गः स्खलंश्चैव पदेपदे ॥ कृच्छ्रात्तस्याः समीपं चाप्यागत्य द्विजसत्तमः ॥ बुभुक्षितोऽस्मि मे देहि भद्रे भोज्यं द्विजस्य तु ॥९॥ एवमुक्ता तदा कन्या उमा शैलसुता शुभा ॥ उवाच ब्राह्मणं भोज्यं दास्ये विप्र फलादिकम् ॥ कुरु स्नानं द्रुतं विप्र भुञ्जस्वान्नं यदृच्छया॥१०॥एवमुक्तस्तदा विप्रस्तस्याः पार्श्वं महानदीम् ॥ गङ्गां जगाम स्नानार्थं स्नानं कर्तुमथात्रत् ॥११॥ स्नानं तु कुर्वता तेन रुद्रेण द्विजरूपिणा ॥ भूत्वा मायामयं भीमं मकरं भयदर्शनम् ॥ ग्राहितस्तु तदा विप्रस्तेन दुष्टेन मद्भुना॥१२॥दृष्ट्वा धृतमथात्मान मकरेण बलीयसा॥वृद्धमात्मानमथ तां दर्शयन्वाक्यमब्रवीत्॥१३॥अब्रह्मण्यङ्कृतं कन्ये त्रायस्व मामतो झषात्॥यावन्न याति विकृतिं तावन्मात्रा तुमर्हसि॥१४॥एवमुक्त्वा तदा कन्या चिन्तयामास पार्वती ॥ पितृभावेन शैलेन्द्रं भर्तृभावेन शङ्करम्॥स्पृशामि तपसा पूता कथं विप्रं स्पृशाम्यहम् ॥१५॥ यद्येनं नापकर्षामि मकरेण जले धृतम्॥तदानीं ब्रह्मवध्या मे भविष्यति न संशयः॥१६॥ अन्यं व्यतिक्रमे धर्ममपनेतुं च शक्यते ॥ ब्रह्मवध्या पुनर्नैवमेवमुक्त्वा गताऽसा ॥१७॥सा गत्वा त्वरितं भीरुर्गृहीत्वा पाणिना द्विजम् ॥ चकर्षोन्तर्जलात्तावत्स्वयं भूतपतिर्हरः ॥ १८॥ यमाराध्य तपश्चर्तुमारब्धं शैलकन्यया ॥ स एव भगवाञ्छङ्करस्तस्याः पाण्यवलम्बितः ॥१९॥ तं दृष्ट्वा लज्जिता देवी पूर्वत्यागमसस्मरत् ॥ न किंचिदुत्तरं सुभ्रूर्वदति स्म सुलज्जया ॥२० ॥ तूष्णीम्भूतां तु तां दृष्ट्वा गौरीं रुद्रो हसन्निव ॥ पाणौगृहीत्वा मां भद्रे कथं त्यक्तुमिहार्हसि ॥ २१ ॥ मत्पाणिग्रहणं भद्रे वृथा यदि करिष्यसि ॥ तदानीं ब्रह्मणः पुत्र्यामाहारार्थं ॥२६॥
ब्रवीम्यहम् ॥२२॥ न भवेत्परिहासोऽयमुक्तं देवी परंपरा ॥ लज्जमाना तदा वाक्यं वदति स्मितपूर्वकम् ॥२३ ॥ देवदेव त्रिलोकेश त्वदर्थोऽयं समुद्यमः ॥ प्राग्जन्मारा धितो भर्त्ता भवान्देवो महेश्वरः॥२४॥ इदानीं मे भवान्देवः पतिर्नान्यो भविष्यति ॥ किन्तु स्वामी पिता मह्यं शैलेन्द्रो मे व्रजामि तम् ॥२५॥ अनुज्ञाप्य विधानेन ततः पाणिं ग्रहीष्यसि ॥२६॥ एवमुक्त्वा तदा देवी पितरं प्रति भामिनी ॥ कृताञ्जलिपुटा भूत्वा

हिमवन्तमुवाच ह ॥ २७ ॥ इतोऽन्यजन्मभर्त्ता मे रुद्रो दक्षमखान्तकः ॥ इदानीं तपसा सैव ज्ञातोऽभूद्गतिभावतः ॥ २८ ॥ स च विश्व
पतिर्भूत्वा ब्राह्मणो मे तपोवनम् ॥ आगत्य भोजनार्थं मां याचयामास शङ्करः॥२९॥ मया स्नातुं व्रजस्वेति चोदितो जाह्नवीं गतः॥ तत्रासौ
वृद्धभावेन द्विजरूपेण शङ्करः॥मत्करेण धृतः पूर्वमब्रह्मण्यमुवाच ह ॥३० ॥ ब्रह्महत्याभयात्तात मया पाणौ धृतस्ततः ॥ धृतमात्रः स्वकं देहं
दर्शयामास शंकरः॥३१॥ततो मामब्रवीद्देवः पाणिग्रहणमागतम् ॥ भवती देवि मा किंचिद्विचारय तपोधने ॥३२॥ एवमुक्ता त्वहं तेन शंकरेण
महात्मना ॥ तमनुज्ञाप्य देवेशं भवन्तं प्रष्टुमागता॥३३॥इदानीं यत्क्षमं कार्यं तच्छीघ्रं संविधीयताम् ॥३४॥एवं श्रुत्वा तदा वाक्यं शैलराजो
मुदा युतः॥ऊचे दुहितरं कन्यां तस्मिन्काले वरानने॥३५॥पुत्रि धन्योऽस्म्यहं लोके यस्य रुद्रः स्वयं हरः ॥ जामाता भविता देवस्त्वयाऽपत्य
वदस्म्यहम्॥३६॥स्थापितो मूर्ध्नि देवानामपि पुत्रि त्वया ह्यहम् ॥स्थीयतां क्षणमेकं तु यावदागमन मम॥३७॥एवमुक्त्वा गतो राजा शैलानां
ब्रह्मणोऽन्तिकम् ॥ तत्र दृष्ट्वा महात्मानं सर्वदेवपितामहम् ॥३८॥ उवाच प्रणतो भूत्वा ब्रह्माणं शैलराट् ततः ॥ देवोमा दुहिता मेऽद्य तां रुद्राय
ददाम्यहम् ॥३९॥ प्रयच्छोवाच देवानां तदा लोकपितामहः ॥४०॥ एवमुक्तः शैलराजः स्ववेश्मागम्य सत्वरम् ॥ तुम्बुरुं नारदं चैव हाहा हूहू
मथाह्वयत् ॥ स गत्वा किन्नरांश्चैव असुरान्राक्षसानपि ॥४१॥ पर्वताः सरितः शैला वृक्षा ओषधयस्तथा ॥ आगता मूर्त्तिमन्तो वै पर्वताः सङ्ग
मांपलाः॥ हिमवत्कन्यकां द्रष्टुं विवाहं शंकरेण ह ॥ ४२॥ तत्र वेदिः क्षितिश्वासीत्कलशाः सप्त सागराः ॥ सूर्यो दीपस्तथा सोमः सरितो ववहु
र्जलम् ॥४३॥ एवं विवाहसामग्रीं कृत्वा शैलवराधिपः ॥ प्रेषयामास रुद्राय समीपं मन्दरं गिरिम् ॥४४॥ स तदा शङ्करोऽस्तु मन्दरो द्रुत
मायथो॥विधिना सोमया पाणिं जग्राह परमेश्वरः॥४५॥ तत्रोत्सवे पर्वतनारदौ द्वौ जगुश्च सिद्धा ननृतुर्वनस्पतीः ॥ पुष्पाण्यनेकानि विचिक्षिपुः
शुभा ननृतुरुच्चैः सुरयोषितो भृशम् ॥४६॥ तस्मिन्विवाहे सलिलप्रवाहे चतुर्मुखो लोकपरः स्वसंस्थः ॥ उवाच कन्यां तव पुत्रि लोके नारी
सुभर्त्ता तव चान्यपुंसाम् ॥ ४७ ॥ इत्येवमुक्त्वा स उमां सरुद्रां पितामहः स्वं पुरमाजगाम ॥ ४८ ॥ स बभूव यथा प्रोक्तं प्रजापालाय
पृच्छते ॥ ऋषिणा महता पूर्वं तपसा भावितात्मना ॥४९ ॥ गौर्या उत्पत्तिरेषा वै कथिता परमर्षिणा ॥ विवाहश्च यथा वृत्तस्तत्सर्वं कथितं

तव ॥ ५० ॥ एतत्सर्वं तु गौर्या वै सम्पन्नं तु तृतीयया ॥ तस्यां तिथौ तृतीयायां लवणं वर्जयेत्सदा ॥ ५१ ॥ यश्चोपोष्यति नारी वा सा सौभाग्यं तु विन्दति ॥ ५२ ॥ दुर्भगा या तु नारा रयादुरुषश्चातिदुर्भगः ॥ एतच्छ्रुत्वा तृतीयायां लवणं तु विवर्जयेत् ॥ ५३ ॥ सर्वं कामानवाप्नोति सौभाग्यं द्रव्यसम्पदः ॥ आरोग्यं च सदा लाक कान्तिं पुष्टिं च विन्दति ॥५४॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महा तपउपाख्याने गोधुद्वाहो नाम द्वाविंशोऽध्यायः ॥ २२ ॥ अथ गणपत्युत्पत्तिः ॥ प्रजापाल उवाच ॥ कथं गणपतेर्जन्म मूर्तिमत्त्वं च सत्तम ॥ एतन्मे संशयं छिन्धि ह्यादि कष्टं व्यवस्थितम् ॥ १ ॥ महातपा उवाच ॥ पूर्वं देवगणाः सर्वे ऋषयश्च तपोधनाः ॥ कार्यारम्भं तथा चक्रुः सिद्धयन्ते च न संशयः ॥ २ ॥ सन्मार्गवर्तिषु तथा सिद्धयन्ते विघ्नतः क्रियाः ॥ असत्कार्यिषु सर्वेषु तद्देवमविघ्नतः ॥ ३ ॥ ततो देवाः सपितरश्चिन्तयामासुरोजसा ॥ असत्कार्येषु विघ्नार्थं सर्वे एवाभ्यमन्त्रयन् ॥ ४ ॥ ततस्तेषां तदा मन्त्रं कुर्वतां त्रिदिवौकसाम् ॥ बभूव बुद्धिर्गमने रुद्रं प्रति महात्मनि ॥५॥ ते तत्र रुद्रमामन्त्र्य कैलासनिलयं गुरुम् ॥ ऊचुः सविनयं सर्वे प्रणिपातपुरःसरम् ॥ ६ ॥ देवा ऊचुः ॥ देवदेव महादेव शूलपाणे त्रिलोचन ॥ विघ्नार्थमविशिष्टानामुपादयितुमर्हसि ॥ ७ ॥ एवमुक्तस्तदा देवैर्भवः परमया मुदा ॥ उमां निरीक्षयामास चक्षुषाऽनिमिषेण ह ॥८॥ देवानां सन्निधौ तस्य पश्यतस्तां महात्मनः ॥ चन्ताभूद्व्योग्नि मूर्तिर्नो दृश्यते केन हेतुना ॥९॥ पृथिव्या विद्यते मूर्तिरपां मूर्त्तिरतथैव च ॥ तेजसः श्वसनस्यापि मूर्तिरेषा तु दृश्यते ॥१०॥ आकाशं च कथं नाति मत्वा देवो जहास च ॥ ज्ञानशक्तिः पुमान् दृष्ट्वा यद्दृष्टं व्योम्नि शम्भुना ॥११॥ यथोक्तं ब्रह्मणा पूर्वं शरीरं तु शरीरिणाम्॥ यच्चापि हसितं तेन देवेन परमेष्ठिना ॥१२॥ एतत्कार्यं चतुष्केण पृथिव्यादिचतुर्ष्वापि ॥ मूर्तिमानातितेजस्वी हसतः परमेष्ठिनः ॥१३॥ प्रदीप्तास्यो महादीप्तः कुमारो भासयन्दिशः॥ परमेष्ठिगुणैर्युक्तः साक्षाद्रुद्र इवापरः॥ १४॥ उत्पन्नमात्रो देवानां द्युपतिः संप्रमोहयन्॥ कान्त्या दीप्त्या तथा मूर्त्या रूपेण च महात्मवान्॥ १५॥ तं दृष्ट्वा परमं रूपं कुमारस्य महात्मनः॥ उमाऽनिमेषनेत्राभ्यां तमपश्यच्च भामिनी ॥ १६॥ तं दृष्ट्वा कुपितो देवः स्त्रीभावं चञ्चलं तथा ॥ मत्वा कुमाररूपं तु शोभनं मोहनं दृशाम् ॥ १७ ॥ ततः शशाप तं देवो गणेशं परमेश्वरः ॥ कुमार गजवक्त्रस्त्वं प्रलम्बजठरस्तथा ॥ भविष्यसि तथा सर्पवतिगति

धुर्वम् ॥ १८ ॥ एवं शशाप तं देवस्तीव्रकोपसमन्वितः ॥ धुन्वन् शरीरमुत्थाप्य ततो देवो रुषान्वितः ॥१९॥ यथा यथासौ स्वशरीरमात्मं धुनोति देवस्त्रिशिखास्त्रपाणिः ॥ तथातथा चाङ्गरुहाच्चकासे जलं क्षितौ संन्यपतत्तथान्यत् ॥ २० ॥ विनायकानेकविधा गणास्यास्तमाल नीलाञ्जनसन्निकाशाः ॥ उत्तस्थुरुच्चैर्विविधास्त्रहस्तास्ततस्तु देवो मनसाकुलेन ॥२१॥ किमेतदित्यद्भुतकर्मकारी श्लेकः करोत्यप्रतिमं महच्च ॥ कार्यं सुराणां कृतमेतदिष्टं भवेदथैनं परितः कुतस्तत् ॥ २२ ॥ दिवौकसां चिन्तयतां तथा तु विनायकैः क्ष्मा क्षुभिता बभूव ॥ चतुर्मुखश्चा प्रतिमं विमानमारुह्य खे वाक्यमिदं जगाद ॥ २३॥ धन्याः स्थ देवाः सुरनायकेन त्रिलोचनेनाद्भुतरूपिणा च ॥ अनुगृहीताः परमेश्वरेण सुर द्विषां विघ्नकृतां नतो च ॥ २४ ॥ इत्येवमुक्त्वा प्रपितामहस्तानुवाच देवस्त्रिशिखास्त्रपाणिम् ॥ यस्ते विभो वक्त्रसमुद्भवः प्रभुर्विनायकानां भव सन्त्विमेऽनुगाः ॥२५॥ भवान्तथास्यात्मवरेण चाम्बरे त्वया चतुर्ष्वस्तु शरीरचारी ॥ आकाशमेतद्भवुधा व्यवस्थितं त्वया चैको वदतां तेऽपयाताः ॥ २६ ॥ प्रभुर्भव त्वं प्रतिमात्रपाणिना इमानि चास्राणि वरांश्च देहि ॥ इत्येवमुक्त्वा विगते पितामहे त्रिलोचनश्चात्मभवं जगाद॥२७॥ विनायको विघ्नकरो गजास्यो गणेशनामा च भवस्य पुत्रः॥ एते च सर्वे त्वपयान्तु भृत्या विनायकाः क्रूरदृशः प्रचण्डाः ॥२८॥ उच्छुष्मदानादिविवृद्धदेहाः कार्येषु सिद्धिं प्रतिपादयन्तः॥भवांश्च देवेषु तथा मखेषु कार्येषु चान्येषु महानुभावान् ॥२९॥ अग्रे तु पूजां लभते ऽन्यथा च विनाशयिष्यस्यथ कार्यसिद्धिम् ॥ इत्येवमुक्त्वा परमेश्वरेण सुरैः समं कांचनकुम्भसंस्थैः ॥ ३० ॥ जलैस्तथास्त्राभिषिक्तगात्रो रराज राजेंद्र विनायकानाम् ॥ ३१ ॥ दृष्ट्वाभिषिच्यमानं तु देवास्तं गणनायकम् ॥ तुष्टुवुः प्रयताः सर्वे त्रिशूलास्त्रस्य सन्निधौ ॥ ३२ ॥ देवा ऊचुः ॥ नमस्ते गजवक्त्राय नमस्ते गणनायक ॥ विनायक नमस्तेऽस्तु नमस्ते चण्डविक्रम ॥ ३३ ॥ नमोऽस्तु ते विघ्नकर्त्रे नमस्ते सर्पमेखल ॥ नमस्ते रुद्रवक्त्रोत्थ प्रलम्बजठराश्रित ॥ सर्वदेवनमस्कारादविघ्नं कुरु सर्वदा ॥३४॥ एवं स्तुतस्तदा देवैर्महात्मा गणनायकः ॥ अभिषिक्तस्तु रुद्रेण सोमयाऽपत्यतामृतः ॥ ३५ ॥ एतच्चतुर्थ्यां सम्पन्नं गणाध्यक्षस्य पार्थिव ॥ यतस्ततोऽयं महती तिथीनां परमा तिथिः ॥ ३६ ॥ एतस्यां यस्तिलान् भुक्त्वा भक्त्या गणपतिं नृप ॥ आराधयति तस्याशु तुष्यते नात्र संशयः ॥ ३७ ॥ यश्चैनत्पठति

स्तोत्रं यश्चैतच्छृणुयात्सदा ॥ न तस्य विघ्ना जायन्ते न पापं सर्वथा नृप ॥ ३८ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने विनायकोत्पत्तिर्नाम त्रयोविंशोऽध्यायः॥२३॥ अथ सर्पोत्पत्तिः ॥ धरण्युवाच ॥ कथं ते वासंस्पर्शान्मूर्त्तिमन्तो महाबलाः ॥ नागा बभूवु र्दैवस्य कारणं ते महीधर ॥ १ ॥ श्रीवराह उवाच ॥ श्रुता गणपतेर्जन्म प्रजापालो नराधिपः ॥ उवाच श्लक्ष्णया वाचा तं मुनिं शंसित व्रतम् ॥ २ ॥ प्रजापाल उवाच ॥ भगवंस्ताक्ष्यविषयाः कथं मूर्त्तिमुपागताः ॥ नागा बभूवुः कुटिला एतदाख्यातुमर्हसि ॥ ३ ॥ महातपा उवाच ॥ सृजता ब्रह्मणा सृष्टिं मरीचेः सूतिकारणम् ॥ प्रथमं मनसा ध्यातस्तस्य पुत्रस्तु कश्यपः ॥ ४ ॥ तस्य दाक्षायणी भार्या कद्रूर्नाम शुचिस्मिता ॥ मारीचो जनयामास तस्यां पुत्रान्महाबलान् ॥५॥ अनन्तं वासुकिं चैव कम्बलं च महाबलम् ॥ कर्कोटकं च राजेन्द्र पद्मं चान्यं सरीसृपम् ॥ ६ ॥ महापद्मं तथा शङ्खं कुलिकं पापराजिलम् ॥ एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः ॥७ ॥ एतेषां तु प्रसूत्या तु इदमापूरितं जगत् ॥ ८ ॥ कुटिला हीनकर्माणस्तीक्ष्णास्त्वोत्थविषोल्बणाः ॥ दृष्ट्वा सन्दश्य मनुजान् भस्म कुर्युः क्षणाद्ध्रुवम् ॥ ९ ॥ शब्दगामी यथा स्पर्शो मनुष्याणां नराधिप ॥ अहन्यहनि जायेत क्षयः परमदारुणः ॥ १० ॥ आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्वाः समन्ततः ॥ जग्मुः शरण्यं शरणं परं तु परमेश्वरम् ॥ ११ ॥ इममेवार्थमुद्दिश्य प्रजाः सर्वा महीपते ॥ ऊचुः कमलजन्मैवं पुराणं ब्रह्मसंज्ञितम् ॥ १२ ॥ त्राहि नस्तीक्ष्णदंष्ट्रेभ्यो भुजङ्गेभ्यो महाबल ॥ अहन्यहनि ये देव पश्येयुरुरगा दृशा ॥ मनुष्यं मृगयूथं वा तत्सर्वं भस्मता व्रजेत् ॥ १३ ॥ त्वया सृष्टिः कृता देव लीयते सा भुजङ्गमैः ॥ एतज्ज्ञात्वा तु दुर्वृत्तं तत्कुरुष्व महामते ॥१४॥ ब्रह्मोवाच ॥ अहं रक्षां विधास्यामि भवतीनां न संशयः ॥ व्रजध्वं स्वानि धिष्ण्यानि प्रजापालाः ससाध्वसाः ॥ १५॥ एवमुक्तास्तु जग्मुस्ते ब्रह्मणाव्यक्तमूर्त्तिना ॥ आगतासु प्रजास्वाद्यस्तानाहूय भुजङ्गमान् ॥ शशाप परमक्रुद्धो वासुकिप्रमुखांस्तथा ॥ १६ ॥ ब्रह्मोवाच ॥ यतो मत्प्रभवान्नित्यं क्षयं नयत मानुषान् ॥ भवान्तरे अथान्यस्मिन्मातुः शापात्सुदारुणात् ॥ भवितातिक्षयो घोरो नूनं स्वायम्भुवेऽन्तरे ॥ १७ ॥ एवमुक्तास्तु वेपन्तो ब्रह्मणा भुजगोत्तमाः ॥ निपत्य पादयोस्तस्य इदमूचुर्वचस्तदा ॥ १८ ॥ नागा ऊचुः ॥ भगवन्कुटिला जातिरस्माकं भवता कृता ॥ विषो

त्वणत्वं क्रूरत्वं दक्षशस्त्रत्वं च नोऽव्ययम् ॥ सम्पादितं त्वया देव इदानीं शमयाच्युत ॥ १९ ॥ ब्रह्मोवाच ॥ यदि नाम मया सृष्टा भवन्तः कुटिलाशयाः ॥ ततः किं मनुजान्नित्यं भक्षयध्वं गतव्यथाः ॥ २० ॥ नागा ऊचुः ॥ मर्यादां कुरु देवेश स्थानं चैव पृथक् पृथक् ॥ २१ ॥ नागानां वचनं श्रुत्वा देवो वचनमब्रवीत् ॥ अहं करोमि वो नागाः समयं मनुजैः सह ॥ २२ ॥ तदेकमनसः सर्वे शृणुध्वं मम शासनम् ॥ पातालं वितलं चैव सुतलाख्यं तृतीयकम् ॥ २३ ॥ दत्तं वै वस्तुकामानां गृहं तत्र गमिष्यथ ॥ तत्र भोगान्बहुविधान्भुञ्जाना मम शासनात् ॥ २४ ॥ तिष्ठध्वं सप्तमं यावद्वाव्यन्तं मे पुनः पुनः॥ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ ॥ २५ ॥ दायादाः सर्वदेवानां सुपर्णस्य च धीमतः ॥ तदा प्रसूतिर्वः सर्वा भोक्ष्यते चित्रभानुना ॥ २६ ॥ भवतां नैव दोषोऽयं भविष्यति न संशयः ॥ ये वै क्रूरा भोगिनो दुर्विनीतास्तेषामन्तो भविता नान्यथैतत् ॥२७॥ कालप्राप्तं भक्षयध्वं दृशध्वं तथाऽपकारे च कृते मनुष्यान् ॥२८॥ मन्त्रौषधैर्गारुडमण्डलैश्च बद्धेर्देष्टैर्मानवा ये चरन्ति ॥ तेषां भीतैर्वर्त्तितव्यं न चान्यच्चिन्त्यं कार्यं चान्यथा वो विनाशः ॥ २९ ॥ इतीरिता ब्रह्मणा ते भुजङ्गा जग्मुः स्थानं क्ष्मातलाख्यं हि सर्वे ॥ ३० ॥ एवं शापं ते तु लब्ध्वा प्रसादं च चतुर्मुखात् ॥ तस्थुः पातालनिलयं सुदितेनान्तरात्मना॥३१॥ एतत् सर्वं च पंचम्यां तेषां जातं महात्मनाम् ॥ अतः प्रिया तिथिर्धन्या सर्वपापहरा शुभा ॥ ३२ ॥ एतस्यां संयतो यस्तु अग्लं तु परिवर्जयेत् ॥ क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम् ॥ ३३ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने सर्पोत्पत्तिर्नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ अथ कार्त्तिकेयोत्पत्तिः ॥ प्रजापाल उवाच ॥ अहङ्कारात्कथं जज्ञे कार्त्तिकेयो द्विजोत्तम ॥ एतन्मे संशयं छिन्धि पृच्छतो वै महामुने ॥ १ ॥ महातपा उवाच ॥ सर्वेषामेव तत्त्वानां यः परः पुरुषः स्मृतः ॥ तस्मादव्यक्तमुत्पन्नं तत्त्वादि त्रिविधं तु तत् ॥ २ ॥ पुरुषाव्यक्तयोर्मध्ये महत्त्वं समपद्यत ॥ स चाहङ्कार इत्युक्तो यो महान्समुदाहृतः ॥३॥ पुरुषो विष्णुरित्युक्तः शिवो वा नामतः स्मृतः ॥ अव्यक्तं तु उमा देवी श्रीर्वा पद्मनिभेक्षणा ॥ ४ ॥ तत्संयोगादहङ्कारः स च सेनापतिर्गुहः ॥ तस्योत्पत्तिं प्रवक्ष्यामि शृणु राजन्महामते ॥ ५ ॥ आद्यो नारायणो देवस्तस्माद्ब्रह्मा ततोऽभवत् ॥ अतः स्वयम्भुवश्चान्ये मरीच्याद्यार्कसम्भवाः ॥ ६ ॥ तदारभ्य सुरा दैत्या गन्धर्वा मानुषाः

खगाः ॥ पशवः सर्वभूतानि सृष्टिरेषा प्रकीर्तिता ॥ ७ ॥ सृष्ट्यां विस्तारितायां तु देवदैत्या महाबलाः ॥ सात्वतं भावमास्थाय युयुधुर्वीर्जिगीषवः ॥ ८ ॥ दैत्यानां बलिनः सन्ति नायका युद्धदुर्मदाः ॥ हिरण्यकशिपुः पूर्वं हिरण्याक्षो महासुरः ॥ ९॥ विप्रचित्तिर्विचित्रस्तु भीमाक्षः क्रोञ्च एव च ॥ एतेऽतिबलिनः शूरा देवसैन्यं महामृधे ॥ १० ॥ अमरांश्च क्षितौ जेतुं जयन्त्यनुदिनं मृधे ॥ तेषां पराजयं दृष्ट्वा देवानां च बृहस्पतिः ॥ ११ ॥ उवाच हीनं वै सैन्यं नायकेन विना सुराः ॥ एकेनेन्द्रेण दिव्यं तु सैन्यं पातुं न शक्यते ॥ १२॥ अतः सेनापतिं कञ्चिदन्वेषयत मा चिरम् ॥ एवमुक्तास्ततो देवा जग्मुर्लोकपितामहम् ॥ १३ ॥ सेनापतिं च नो देहि वाक्यमूचुः ससम्भ्रमम् ॥ ततो दध्यौ चतुर्वक्त्रः किमेषां क्रियते मया ॥ १४ ॥ ब्रह्मणश्चिन्त्यमानस्य रुद्रं प्रति मनो गतम् ॥ ततो देवाः सगन्धर्वा ऋषयः सिद्धचारणाः ॥ १५ ॥ ब्रह्माणं पुरतः कृत्वा जग्मुः कैलासपर्वतम् ॥ तत्र दृष्ट्वा महादेवं शिवं पशुपतिं विभुम् ॥ तुष्टुवुर्विविधैः स्तोत्रैः शक्राद्याश्चदिवौकसः ॥ १६ ॥ देवा ऊचुः ॥ नमाम सर्वे शरणार्थिनो वयं महेश्वरं त्र्यम्बकभूतभावनम् ॥ उमापते विश्वपते मरुत्पते जगत्पते शङ्कर पाहि नः स्वयम् ॥१७॥ जटाकलापाग्रशशाङ्कदीधितिप्रकाशिताशेषजगत्र्यमालम ॥ त्रिशूलपाणे पुरुषोत्तमाच्युत त्वं पाहि नो दैत्यभयादुपस्थितात् ॥१८ ॥ त्वमादिदेवः पुरुषोत्तमो हरिर्भवो महेशस्त्रिपुरान्तको विभुः ॥ भगाक्षहा दैत्यरिपुः पुरातनो वृषध्वजः पाहि सुरोत्तमोत्तम ॥ १९ ॥ गिरीशजानाथ गिरिप्रियाप्रिय प्रभो समस्तामरलोकपूजित ॥ गणेश भूतेश शिवाऽक्षयायन त्वं पाहि नो दैत्यवरान्तकाच्युत ॥ २० ॥ पृथ्व्यादितत्त्वेषु भवान्प्रतिष्ठितो ध्वनिस्वरूपो गगने विशेषतः ॥ लीनो द्विधा तेजसि स त्रिधा जले चतुः क्षितौ पञ्च गुणप्रधानः ॥ २१ ॥ अग्निस्वरूपोऽसि तरौ तथोपले सत्यस्वरूपोऽसि तथा तिलेष्वपि ॥ तैलस्वरूपो भगवान्महेश्वरस्त्वं पाहि नो दैत्यगणार्दितान्हरा॥२२॥ नासीद्यदाऽकाण्डमिदं त्रिलोचन प्रभाकरेन्द्वेदुमुखान् विना कुतः ॥ तदा भवानेव विरुद्धलोचन प्रमाणबाधादिविवर्जितः स्थितः ॥ २३ ॥ कपालमालिन् शशि खण्डशेखर श्मशानवासिन् सितभस्मगुण्ठित ॥ फणीन्द्रसंवीततनोऽन्तकान्तक त्वं पाहि नो दक्षधिया सुरेश्वर॥२४॥भवान्पुमान् शक्तिरियं गिरेः सुता सर्वाङ्गरूपा भगवंस्तथा त्वयि ॥ त्रिशूलरूपेण जगद्रयङ्करे स्थितं त्रिनेत्रेषु मखाग्रयस्त्रयः ॥ २५ ॥ जटास्वरूपेण समस्तसागराः

कुलाचलाः सिन्धुवहाश्च सर्वेशः ॥ शरीरजं ज्ञानमिदं त्ववस्थितं तदेव पश्यन्ति कुदृष्टयो जनाः ॥ २६॥ नारायणस्त्वं जगतां समुद्भवस्तथा भवानेव चतुर्मुखो महान् ॥ सत्त्वाग्निभेदेन तथाग्निभेदतो युगादिभेदेन च संस्थितस्त्रिधा ॥ २७ ॥ भवन्तमेते सुरनायकाः प्रभे भवार्थिनोऽन्यस्य वदन्ति तोषकम् ॥ यतस्ततो नो भव भूतिभूषण त्वं पाहि विश्वेश्वर रुद्र ते नमः ॥ २८॥ महातपा उवाच ॥ एवं स्तुत स्तदा देवो रुद्रः पशुपतिः सुरैः ॥ उवाच देवानव्यग्रः किं कार्यं ब्रूत मा चिरम् ॥२९॥ देवा ऊचुः ॥ सेनापतिं च देवेश देहि दैत्यक्षयाय वै॥ देवाना ब्रह्ममुख्यानामेतदेव हितं भवेत् ॥३०॥ रुद्र उवाच ॥ ददामि सेनानाथं वो देवा भवत विज्वराः ॥ भविष्यमस्ति पौराणां योगादीना मचिन्तयत् ॥ ३१ ॥ एवमुक्त्वा हरो देवान्विसृज्य स्वाङ्गसंस्थिताम् ॥ शक्तिं संक्षोभयामास पुत्रहेतोः परन्तप ॥ ३२ ॥ तस्य क्षोभयतः शक्तिं ज्वलनाकसमप्रभः ॥ कुमारः सहजां शक्तिं बिभ्रज्ज्ञानैकशालिनीम् ॥ ३३ ॥ उत्पत्तिस्तस्य राजेन्द्र बहुरूपा व्यवस्थिता ॥ मन्वन्तरे ष्वनेकेषु देवसेनापतिः किल॥३४॥योऽसौ शरीरगो देवस्त्वहङ्कारेति कीर्त्तितः॥ प्रयोजनवशाद्देवः देवसेनापतिर्भो॥३५॥तस्मिन्जाते स्वयं ब्रह्मा सर्वदेवैः समान्वतः ॥पूजयामास देवेशं शिवं पशुपतिं तदा॥ ३६॥सर्वैश्च देवैर्ऋषिभिश्च सिद्धैः सेनापतिर्द्दीनवरेण तत॥ आप्यायितः सोऽपि सुरानुवाच सहायो मे क्रीडनकं च दद्धम् ॥३७॥श्रुत्वा वचस्तस्य महानुभावो वाक्यं महादेव इदं जगाद् ॥ ददामि ते क्राडनकं तु कुक्कुटं तथा तुगौ शाखविशाखसंज्ञौ॥ ३८॥कुमार भूतग्रहनायको भवान् सेनापतिस्त्वं भव देवसंघे॥ एवमुक्त्वा ततो देवः सवदवांश्च पार्थिव ॥ ३९॥ तुष्टुवुश्च गिभारद्याभः स्कन्दं सेनापतिं तदा॥देवा ऊचुः॥भव त्वं देवसेनानीर्महेश्वरसुत प्रभो ॥ ४०॥ एवमुक्त स्कन्द विश्वेश कुक्कुटध्वज पावके॥ कम्पितारे कुमारेश स्कन्द बालग्रहाधुग ॥४१॥ जितारे क्रौंचविध्वंस कृत्तिकाज शिवात्मज ॥ भूतग्रहपतिश्रेष्ठ पावकप्रियदर्शन ॥ ४२ ॥ महाभूतपतेः पुत्र त्रिलोचन नमोऽस्तु ते ॥ एवं स्तुतस्तदा देवैर्विबुधैन भवनन्दनः॥४३॥ द्वादशादित्यवद्भाशो बभूवानुपविक्रमः ॥ त्रैलोक्यं तेजसा स्वेन तापयामास पार्थिव ॥४४॥प्रजापाल उवाच ॥ कथं त्वं कृत्तिकापुत्रमुक्तवान् शत मे गुरो ॥ कथं वा पावकिरसौ कथं पण्मातृनन्दनः ॥४५॥ महातपा उवाच ॥ आदिमन्वन्तरे देवस्योत्पत्तिर्या मयोदिता ॥ परोक्षदर्शिभिर्देवैरेवमेव स्तुतः प्रभो ॥ ४६ ॥ कृत्तिका पावकस्तस्य मातरो

गिरिजा तथा ॥ द्वितीयजन्मनि गुहस्येते उत्पत्तिहेतवः ॥ ४७ ॥ एवमेतत्तवाख्यातं पृच्छतः पार्थिवोत्तम ॥ आत्माविद्यामृतं गुह्यमहङ्कारस्य सम्भवः ॥ ४८ ॥ स्वयं स्कन्दो महादेवः सर्वपापप्रणाशनः ॥ तस्य षष्ठी तिथिं प्राहादाभिषेके पितामहः ॥ ४९ ॥ अस्यां फलाशने यस्तु पूजयेद्यतमानसः ॥ अपुत्रो लभते पुत्रमधनोऽपि धनं लभेत् ॥ ५० ॥ यं यमिच्छेत्तु मनसा लभते तं तु मानवः ॥ यश्चैतत्पठति स्तोत्रं कार्तिकेयस्य मानवः ॥ ५१ ॥ तस्य गेहे कुमाराणां क्षेमारोग्यं भविष्यति ॥ ५२ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने स्कन्दोत्पत्तिर्नाम पंचविंशोऽध्यायः ॥ २५ ॥ अथादित्योत्पत्तिः ॥ प्रजापाल उवाच ॥ शरीरस्य कथं मूर्त्तिग्रहणं ज्योतिषो द्विज ॥ एतन्मे संशयं छिन्धि प्रणतस्य द्विजोत्तम ॥ १ ॥ महातपा उवाच ॥ योऽसावात्मा ज्ञानशक्तिरेक एव सनातनः ॥ स द्वितीयं यदा चैच्छत्तदा तेजः समुत्थितम् ॥ २ ॥ तत्सूर्य इति भास्वांस्तु अन्योन्येन महात्मनः ॥ लीनीभूतानि तेजांसि भासयन्ति जगत्त्रयम् ॥ ३ ॥ तस्मिन् सर्वे सुराः सिद्धा गणाः सर्वर्महर्षिभिः ॥ स्वयंभूत इति प्रोक्तस्तस्मात्सूर्यस्तु सोऽभवत् ॥ ४ ॥ लीनीभूतस्य तस्याशु तेजसोऽभूच्छरीरकम् ॥ पृथक्त्वेन रविः सोऽथ कीर्त्यते वेदवादिभिः ॥५॥ भासयेत्सर्वलोकांस्तु यतोऽसावुत्थितो दिवि ॥ अतोऽसौ भास्करः प्रोक्तः प्रकाशाच्च प्रभाकरः ॥६॥ दिवा दिवस इत्युक्तस्तत्कारित्वाद्दिवाकरः ॥ सर्वस्य जगतस्त्वादिरादित्यस्तेन चोच्यते ॥ ७ ॥ एतस्य तेजसा जाता आदित्या द्वादश पृथक् ॥ प्रधान एक एवायं जगत्सु परिवर्तते ॥८ ॥ तं दृष्ट्वा जगतो व्याप्तिं कुर्वाणं परमेश्वरम् ॥ तस्यैवान्तःस्थिता देवा विनिष्क्रम्य स्तुतिं जगुः ॥९॥ देवा ऊचुः ॥ भवान् प्रसूतिर्जगतः पुराणः प्रपासि विश्वं प्रलये च हंसि ॥ समुत्थितस्त्वं सततं प्रयासि विश्वं सदा त्वां प्रणताः स्म नित्यम् ॥ १० ॥ त्वया ततं सर्वत एव तेजः प्रतापितं सूर्य जगत्प्रवृत्तो ॥ सप्ताश्वयुक्ते च रथे स्थितस्त्वं कालाक्षमन्वन्तरवेगयुक्ते ॥११॥ प्रभाकरस्त्वं रविरादिदेव आत्मा समस्तस्य चराचरस्य ॥ पितामहस्त्वं वरुणो यमश्च भूतं भविष्यच्च वदन्ति सिद्धाः ॥ १२ ॥ तेजोऽरिविध्वंसन वेदमूर्त्ते प्रपाहि चास्मान् शरणागतान् सदा ॥ वेदान्तवेद्योऽसि मखेषु देव त्वं हूयसे विष्णुरिति प्रसन्न ॥ १३ ॥ इति स्तुतस्तैः सुरनाथ भक्त्या प्रपाहि शम्भो न इति प्रसह्य ॥ १४ ॥ एवमुक्तस्तदा देवैः सौम्यां मूर्त्तिमथाकरोत् ॥ प्रकाशत्वं जगामाशु देवतानां

महाप्रभः ॥ १५ ॥ एतत्सर्वसुराणां तु दहनं शामितं त्वया ॥ सप्तम्यां खलु सूर्येण मूर्त्तिस्त्वङ्गीकृता भुवि ॥ १६ ॥ एतां यः पुरुषो भक्त्या उपास्ते सूर्यमर्च्चयेत् ॥ भास्करश्चैव तस्यासौ फलमिष्टं प्रयच्छति ॥ १७ ॥ एतत्ते कथितं राजन् सूर्याख्यानं पुरातनम् ॥ आदि मन्वन्तरे वृत्तं मत्तस्त्वं शृणु साम्प्रतम् ॥ १८ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने आदित्योत्पत्तिनाम षड्विंशोऽध्यायः ॥ २६ ॥ अथाष्टमाद्युत्पत्तिः ॥ महातप उवाच ॥ पूर्वमासीन्महादैत्यो बलवानन्धको भुवि ॥ स देवान्वशमानिन्ये ब्रह्मणो वरदर्पितः ॥१॥ तेनात्मसात्सुराः कृत्वा त्याजिता मेरुपर्वतम् ॥ ब्रह्माणं शरणं जग्मुरन्धकस्य भयार्दिताः ॥२॥ तानागतान्तदा ब्रह्मा उवाच सुरसत्तमान् ॥ किमागमनकृत्यं वो देवा ब्रूत किमास्यते ॥ ३ ॥ देवा ऊचुः ॥ अन्धकेनार्दिताः सर्वे वयं देवा जगत्पते ॥ त्राहि सर्वांश्चतुर्वक्त्र पितामह नमोऽस्तु ते ॥ ४ ॥ ब्रह्मोवाच ॥ अन्धकान्नैव शक्तोऽहं त्रातुं वै सुरसत्तमाः ॥ भवं शर्वं महादेवं व्रजामः शरणार्थिनः॥ ५ ॥ किन्तु पूर्वं मया दत्तो वरस्तस्य सुरोत्तमाः ॥ अवध्यस्त्वं हि भविता न शरीरं स्पृशेन्महीम् ॥ ६ ॥ तस्येवं बलिनस्त्वेको हन्ता रुद्रः परन्तपः ॥तत्र गच्छामहे सर्वे कैलासनिलयं प्रभुम् ॥ ७ ॥ एवमुक्त्वा ययौ ब्रह्मा सदेवो भवसन्निधौ ॥ तस्य सन्दर्शनाद्रुद्रः प्रत्युत्थानादिकाः क्रियाः ॥८॥ कृत्वाभ्युवाच देवेशो ब्रह्माणं भुवनेश्वरम् ॥ शम्भुरुवाच ॥ किं कार्यं देवताः सर्वा आगता मम सन्निधौ ॥ ९ ॥ येनाहं तत्करोम्याशु आज्ञा कार्या हि सत्वरम् ॥ रक्षस्व देव बलिनस्त्वन्धकाद्दुष्टचेतसः ॥ १० ॥ यावदेव सुराः सर्वे शंसन्ति परमेष्ठिनः ॥ तावत्तेनेन महता तत्र चान्धक आययौ ॥११ ॥ बलेन चतुरङ्गेण हन्तुकामो भवं मृधे ॥ तस्य भार्यां गिरिसुतां हन्तुमिच्छन्ससाधनः ॥ १२ ॥ तं दृष्ट्वा सहसायान्तं देवी दैत्यं प्रहारिणम् ॥ सब्रह्म सहसा देवा रुद्रस्यानुचराभवन् ॥ १३ ॥ रुद्रोऽपि वासुकिं ध्यात्वा तक्षकं च धनञ्जयम् ॥ वलयं कटिसूत्रं च चकार परमेश्वरः ॥ १४ ॥ नीलनामा तु दैत्येन्द्रो हस्ती भूत्वा भवान्तिकम् ॥ आगतस्त्वरितः शत्रुर्हस्तीवाद्भुतरूपवान् ॥ १५ ॥ स ज्ञातो नन्दिना दैत्यो वीरभद्राय दर्शितः ॥ वीरभद्रोऽपि सिंहेन रूपेणाहत्य तं द्रुतम् ॥ १६ ॥ तस्य क्रान्तिं विदार्याशु करिणस्त्वङ्गनप्रभाम्॥ रुद्रायार्पितवान्सोऽपि तमेवाम्बरमावृणोत् ॥१७॥ ततःप्रभृति रुद्रोऽपि गजचर्मपटोऽभवत् ॥ गजचर्मपटो भूत्वा भुजङ्गाभरणोज्ज्वलः ॥१८॥

आदाय त्रिशिखं शूलं सगणोऽन्धकमभ्ययात् ॥ ततः प्रवृत्ते युद्धं देवदानवयोर्महत् ॥ १९ ॥ इन्द्राद्या लोकपालास्तु रुक्मदः सेनापतिस्तथा ॥ सर्वे देवगणाश्चान्ये युयुधुः समरे तदा ॥ २० ॥ तद्दृष्ट्वा नारदस्तूर्णं ययौ नारायणं प्रति ॥ शशंस च महद्युद्धं कैलासे दानवैः सह ॥ २१ ॥ तच्छ्रुत्वा चक्रमादाय गरुडस्थो जनार्दनः ॥ तमेव देशमागत्य युयुधे दानवैः सह ॥ २२ ॥ आगत्य च ततो देवा हरिणाप्यायिता रणे ॥ विषण्णवदनाः सर्वे पलायनपरा भवन् ॥२३॥ तत्र भग्नेषु देवेषु स्वयं रुद्रोऽन्धकं ययौ ॥ तत्र तेन महद्युद्धमभवल्लोमहर्षणम् ॥२४॥ तत्र देवोऽप्यसौ दैत्यं त्रिशूलेनाहनद्बृशम् ॥ तस्याहतस्य यद्रक्तमपतद्भूतले किल ॥ २५ ॥ तत्रान्धका असंख्याता बभूवुरपरे भृशम् ॥ तद्दृष्ट्वा महदाश्चर्यं रुद्रो मूलान्धकं मृधे॥२६॥गृहीत्वा त्रिशिखाग्रेण ननर्त्त परमेश्वरः ॥ इतरेऽप्यन्धकाः सर्वे चक्रेण परमेष्ठिना ॥२७॥ नारायणेन निहतास्तत्र येऽन्ये समुत्थिताः ॥ असृग्धारातुपोरस्तु शूलप्रोतस्य चासकृत् ॥२८॥अनारतं समुत्तस्थौ ततो रुद्रो रुषान्वितः ॥ तस्य क्रोधेन महता मुखाज्ज्वाला विनिर्ययौ ॥ २९ ॥ तद्रूपधारिणी देवी या तां योगेश्वरीं विदुः ॥ स्वरूपधारिणी चान्या विष्णुनापि विनिर्मिता ॥ ३० ॥ ब्रह्मणा कार्त्तिकेयेन इन्द्रेण च यमेन च ॥ वराहेण च देवेन विष्णुना परमेष्ठिना ॥ ३१ ॥ पातालोद्धारणं रूपं तस्या देव्या विनिर्ममे ॥ माहेश्वरी च माहेन्द्री इत्येता अष्ट मातरः ॥३२ ॥ कारणं यस्य यत्प्रोक्तं क्षेत्रज्ञेनावधारितम् ॥ शरीरं देवतानां तु तदिदं कीर्त्तितं मया ॥३३ ॥ कामः क्रोधस्तथा लोभो मदो मोहोऽथ पञ्चमः ॥ मात्सर्यं षष्ठमित्याहुः पैशुन्यं सप्तमं तथा ॥३४॥ अनसूयाष्टमी ज्ञेया इत्येता अष्ट मातरः ॥ कामं योगीश्वरीं विद्धि क्रोधो माहेश्वरीं तथा ॥३५॥ लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ॥ मोहः स्वयम्भूः कौमारी मात्सर्यं चेन्द्रजां विदुः ॥३६ ॥ यमदण्डधरा देवी पैशुन्यं रवयमेव च ॥ अनसूया वराहास्या इत्येताः परिकीर्तिताः ॥ ३७ ॥ कामादिगण एषोऽयं शरीरं परिकीर्त्तितः ॥ जग्राह मूर्तिं तु तथा यथा ते कीर्त्तितं मया ॥३८॥ एताभिर्देवताभिश्च तस्य रक्तेऽतिशोषिते ॥ क्षयं गतासुरी माया स च सिद्धोऽन्धकोऽभवत् ॥३९॥ एतत्ते सर्वमाख्यातमात्मविद्यामृतं मया ॥ य एतच्छृणुयान्नित्यं मातृणामुद्भवं शिवम् ॥४०॥ तस्य ताः सर्वतो रक्षां कुर्वन्त्यनुदिनं नृप ॥ यश्चैतत्पठते जन्म मातृणां पुरुषोत्तम ॥४१ ॥ स धन्यः सर्वथा लोके शिवलोकं च गच्छति ॥ तासां च

ब्रह्मणा दत्ता त्वष्टमी तिथिरुत्तमा ॥४२॥ एताः स म्पूजयेद्भक्त्तया बिल्वाहारो नरः सदा ॥ तस्य ताः परितुष्टाः स्युः क्षेमारोग्यं ददति च॥४३॥
इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउप। ख्यानेऽष्टमाद्युत्पत्तिर्नाम सप्तविंशोऽध्यायः ॥२७॥अथ दुर्गाया उत्पत्तिः ॥ प्रजापाल उवाच॥
कथं माया समुत्पन्ना दुर्गा कात्यायनी शुभा ॥ आदिक्षेत्रे स्थिता सूक्ष्मा पृथङ्मूर्त्या व्यजायत ॥ १॥ महातप उवाच ॥ आसीद्राजा पुरा
राजन् सिन्धुद्वीपः प्रतापवान् ॥ वरुणांशो महाराज सोऽरण्ये तपसि स्थितः ॥ २ ॥ पुत्रो मे शक्रनाशाय भवेदिति नराधिपः ॥ एवं कृतमतिः
सोऽथ महता तपसा स्वकम् ॥ ३ ॥ कलेवरं स्थिरो भूत्वा शोषयामास सुव्रत ॥ प्रजापाल उवाच ॥ कथं तस्य द्विजश्रेष्ठ शक्रेणापकृतं
भवेत् ॥४॥यनासौ ताद्दिनाशाय पुत्रमिच्छन् व्रते स्थितः ॥ महातप उवाच ॥ सोऽन्यजन्मनि पुत्रोऽभूत्त्वष्टुर्बलभृतां वरः ॥५॥ अवध्यः सर्व
शस्त्रौघैरपां फेनेन नाशितः ॥ जलफलेन निहत स्तस्मिंस्त्रैलोक्यमवाप्तवान् ॥ ६ ॥ पुनर्ब्रह्मान्वये जातः सिन्धुद्वीपः प्रतापवान् ॥ स तेपे परमं तीव्रं
शक्रवैरमनुस्मरन् ॥७॥ ततः कालेन महता नदी वेत्रवती शुभा॥ मानुषं रूपमास्थाय सालङ्कारं मनोरमम् ॥८॥ आजगाम यतो राजा तेपे
स परमं तपः ॥ तां दृष्ट्वा रूपसम्पन्नां स राजा क्षुब्धमानसः॥९॥ उवाच काऽसि सुश्रोणि सत्यं कथय भामिनि॥नद्युवाच॥ अहं जलपतेः पत्नी
वरुणस्य महात्मनः॥१०॥नाम्ना वेत्रवती एषा त्वामिच्छन्तात्र चागता॥साभिलाषां परस्त्रीं च भजमानां विसर्जयेत्॥११॥स पापः पुरुषा ज्ञेयो
ब्रह्महत्यां च विन्दति ॥ एवं ज्ञात्वा महाराज भजमानां भजस्व माम् ॥१२ ॥ एवमुक्तस्तया राजा साभिलोषोपभुक्तवान्॥तस्य सद्योऽभवत्पुत्रो
द्वादशार्कसमप्रभः ॥१३॥ वेत्रवत्युदरे जातो नाम्ना वेत्रासुराऽभवत्॥ बलवानतितेजस्वी प्राग्ज्योतिषपतिस्त्वभूत्॥१४॥स कालेन युवा जातो
बलवान्दृढविक्रमः ॥ महायोगेन संयुक्तो जिगायेमां वसुन्धराम् ॥ सप्तद्वीपवतीं पश्चान्मेरुपर्वतमारुहत् ॥ १५॥ तत्रेन्द्रं प्रथमं जिग्ये पश्चादग्निं
यमं ततः ॥ इन्द्रो भग्नो गतः सोऽग्निमग्निर्भग्नो यमं ययौ ॥ यमो निर्ऋतिमागच्छन्निर्ऋतिर्वरुणं ययौ ॥ १६ ॥ इन्द्रादिभिरुपेतस्तु वरुणो
वायुमन्वगात् ॥ वायुर्धनपतिं त्वागात्सर्वैरिन्द्रादिभिः सह ॥१७॥धनदोऽपि स्वकं मित्रमशि देवैः समन्वितः ॥ इयाय गदया सोऽपि दानवो
बलगर्वितः ॥ १८ ॥ गदामादाय दुद्राव शिवलोकं प्रति प्रभो ॥ शिवोऽप्यवध्यं तं मत्वा देवान् गृहान्ययौ पुरीम् ॥ १९ ॥ ब्रह्मणः

सुरसिद्धाद्यैर्वन्दिता पुण्यकारिभिः ॥ तत्र ब्रह्मा जगत्स्रष्टा विष्णुपादोद्भवे जले ॥२०॥ नियमेन च संयुक्तो जपन्नन्तर्जले शुभे ॥ क्षेत्रज्ञमायां गायत्रीं ततो देवा विचुक्रुशुः ॥ २१ ॥ त्राहि प्रजापते सर्वान्देवानृषिवरानपि ॥ असुराद्भयमापन्नान्त्राहि त्राहीत्यचादयत् ॥२२॥एवमुक्तस्तदा ब्रह्मा दृष्ट्वा देवांस्तदागतान् ॥ चिन्तयामास देवस्य मायेयं विगतं जगत् ॥२३॥ नासुरा न च रक्षोऽत्र मायेयं क्रीडशी मता ॥ एवं चिन्त यतस्तस्य प्रादुरासीदयोनिजा ॥ २४ ॥ शुक्लाम्बरधरा कन्या स्रक्किरीटोज्ज्वलानना ॥ अष्टभिर्बाहुभिर्युक्ता दिव्यप्रहरणोद्यता ॥ २५ ॥ चक्रं शंखं गदां पाशं खड्गं घण्टां तथा धनुः ॥ धारयन्ती तथा चान्याबद्धतूणा जलाद्बहिः ॥ २६ ॥ निश्चक्राम महायोगा सिंहवाहनवेगिता॥ युयुधे चासुरान्सर्वानेकैव बहुधा स्थिता ॥ २७ ॥ दिव्यं वर्षसहस्रं तु दिव्यैरस्त्रैर्महाबला ॥ युद्धा कालात्यये देव्या हतो वेत्रासुरो रणे ॥२८॥ ततः किलकिलाशब्दो देवसैन्येऽभवन्महान् ॥ हते वेत्रासुरे भीमे तदा सर्वे दिवौकसः ॥ २९ ॥ प्रणेमुर्जय युद्धे त्वमित्थमीशः स्तुतिं जगौ ॥ महेश्वर उवाच ॥ जयस्व देवि गायत्रि महामाये महाप्रभे ॥ ३० ॥ महादेवि महाभागे महासत्त्वे महोत्सवे ॥ दिव्यगन्धाबुलिप्ताङ्गि दिव्यस्रग्दामभूषिते ॥ ३१ ॥ वेदमातर्नमस्तुभ्यमक्षरस्थे महेश्वरि ॥ त्रिलोकस्थे त्रितत्त्वस्थे त्रिवह्निस्थे त्रिशूलिनि ॥ ३२ ॥ त्रिनेत्रे भीम वक्त्रे च भीमनेत्रे भयानके ॥ कमलासनजे देवि सरस्वति नमोऽस्तु ते ॥ ३३ ॥ नमः पङ्कजपत्राक्षि महामायेऽमृतस्रवे ॥ सर्वगे सर्वभूतेशि स्वाहाकारे स्वधेऽस्त्रिके ॥ ३४ ॥ सम्पूर्णे पूर्णचन्द्राभे भास्वराङ्गे भवोद्भवे ॥ महाविद्ये महावेद्ये महादैत्यविनाशिनि ॥ ३५ ॥ महाबुद्ध्युद्भवे देवि वीतशोके किरातिनि ॥ त्वं नीतिस्त्वं महाभागे गीङ्कं त्वं गौस्त्वमक्षरम् ॥ ३६ ॥ त्वं धीस्त्वं श्रीस्त्वमोङ्कारस्तत्त्वे चापि परि स्थिता ॥ सर्वसत्त्वहिते देवि नमस्ते परमेश्वरि ॥ ३७ ॥ इत्येवं संस्तुता देवी भवेन परमेष्ठिना ॥ देवैरपि जयेत्युच्चैरुक्ता सा परमेश्वरी॥३८॥ यावदास्ते चतुर्वक्त्रस्तावदन्तर्जलाद्बहिः ॥ निश्चक्राम ततो देवी कृतकृत्यां ददर्श सः ॥३९ ॥ तां दृष्ट्वा देवकार्यं च सिद्धं मत्वा पितामहः ॥ भविष्यं कार्यमुद्दिश्य ततो वचनमब्रवीत् ॥ ४० ॥ ब्रह्मोवाच ॥ इयं देवी वरारोहा यातु शैलं हिमालयम् ॥ तत्र यूयं सुराः सर्वे गत्वा नंदत मा चिरम् ॥ ४१ ॥ नवम्यां च सदा पूज्या इयं देवी समाधिना ॥ वरदा सर्वलोकानां भविष्यति न संशयः ॥ ४२ ॥ नवम्यां यस्तु

पिष्टाशी भविष्यति हि मानवः ॥ नारी वा तस्य सम्पन्ना भविष्यति मनोगतम् ॥ ४३ ॥ यश्च स्वयं सदा प्रातरिदं स्तोत्रं पठिष्यति ॥
स्त्रयेरितं महादेव तस्य देव्या समं भवान् ॥ ४४ ॥ वरदो देव सर्वासु आपत्स्वप्युद्धरेत्स्वयम् ॥ एवमुक्त्वा भवं ब्रह्मा पुनर्देवीं स चाब्रवीत् ॥ ४५ ॥ त्वया देवि महाकार्यं कर्त्तव्यं चान्यदस्ति नः ॥ भविष्यं महिषाख्यस्य असुरस्य विनाशनम् ॥४६॥ एवमुक्त्वा ततो ब्रह्मा
सर्वे देवाश्च पार्थिव ॥ यथागतं ततो जग्मुर्देवीं स्थाप्य हिमे गिरौ ॥४७॥ संस्थाप्य नन्दिता यस्मात्तस्मान्नन्दाऽभवत्तु सा ॥ यश्चेदं शृणुया
ज्जन्म देव्या यश्च स्वयं पठेत् ॥ ४८ ॥ सर्वपापविनिर्मुक्तः परं निर्वाणमृच्छति ॥ ४९ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातप
उपख्याने दुर्गादेव्युत्पत्तिनौमाष्टाविंशोऽध्यायः ॥ २८ ॥ अथ दिग्युत्पत्तिः ॥ महातपा उवाच ॥ शृणु राजन्नवहितः प्रजापाल कथामिमाम् ॥
यदा दिशः समुत्पन्नाः श्रोत्रेभ्यः पृथिवीपते ॥ १ ॥ ब्रह्मणः सृजतः सृष्टिमादिसर्गे समुत्थिते ॥ चिन्ताभून्महती को मे प्रजाः सृष्टा धरि
ष्यति ॥ २ ॥ एवं चिन्तयतस्तस्य अवकाशं व्रजन्त्विह ॥ प्रादुर्बभूवुः श्रोत्रेभ्यो दशकन्या महाप्रभाः ॥ ३ ॥ पूर्वा च दक्षिणा चैव प्रतीची
चोत्तरा तथा ॥ ऊर्ध्वधरा च षण्मुख्याः कन्या ह्यासंस्तदा नृप ॥ ४ ॥ तासां मध्ये चतस्रस्तु कन्याः परमशोभनाः ॥ रूपवत्यो महाभागा
गाम्भीर्येण समन्विताः ॥ ५ ॥ ता ऊचुः प्रणयाद्देवं प्रजापतिमकल्मषम् ॥ अवकाशं तु नो देहि देवदेव प्रजापते ॥ ६ ॥ तिष्ठामो यत्र वा
सर्वा भर्तृभिः सहिताः सुखम् ॥ पतींश्चैव महाभागान्दोहि नोऽव्यक्तसम्भव ॥ ७ ॥ ब्रह्मोवाच ॥ ब्रह्माण्डमेतत्सुश्रोण्यः शतकोटिप्रविस्तरम् ॥
तस्यान्ते स्वेच्छया तुष्टा उष्यतां मा विलम्बथ ॥ ८ ॥ भतॄंश्च वः प्रयच्छामि सृष्ट्वा रूपवतोऽनघान् ॥ यथेष्टं गम्यतां देशो यस्ये यो
रोचतेऽधुना ॥ ९ ॥ एवमुक्ताश्च ताः सर्वा यथेष्टं प्रययुस्तदा ॥ ब्रह्मा ससर्ज तूर्णं ताँल्लोकपालान्महाबलान् ॥ १० ॥ सृष्ट्वा तु लोकपालां
स्तांस्तांस्ताः कन्याः पुनरानुहयत् ॥ विवाहं कारयामास ब्रह्मा लोकपितामहः ॥ ११ ॥ एकामिन्द्राय स प्रादादग्नयेऽन्यां यमाय च ॥ निर्ऋताय
च देवाय वरुणाय महात्मने ॥ १२ ॥ वायवे धनदेशाय ईशानाय च सुव्रत ॥ ऊर्ध्वां स्वयमधिष्ठाय शेषायाधो व्यवस्थिताम् ॥ १३ ॥ एवं
दत्त्वा पुनर्ब्रह्मा तिथिं प्रादादिशां तथा ॥ दशमीं च तिथिंस्तासामतीव दयिताभवत् ॥ १४ ॥ तस्यां दग्ध्यशनो यस्तु सुव्रतो ना भविष्यति ॥

तस्य पापक्षयं तास्तु कुर्वन्त्यहरहर्नृप ॥ १५ ॥ यश्चैतच्छृणुयाज्जन्म दिशां नियतमानसः ॥ स प्रतिष्ठामवाप्नोति ब्रह्मलोके न संशयः ॥ १६ ॥
इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने दिग्युत्पत्तिर्नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ अथ धनदोत्पत्तिः ॥ महातपा उवाच ॥
शृणु चान्यां वसुपतेरुत्पत्तिं पापनाशिनीम् ॥ यथा वायुकुमारस्थो धनदः सम्बभूव ह ॥ १ ॥ आद्यं शरीरं यत्तस्मिन्वायुरन्तःस्थितोऽभवत् ॥ प्रयोजनान्मूर्त्तिमत्त्वमास्थितः क्षेत्रदेवता ॥ २ ॥ तत्र सूर्त्तस्य वायोरनु उत्पत्तिः कीर्त्तिता मया ॥ तां शृणुष्व महाभाग कथ्यमानां मयानघ ॥ ३ ॥ ब्रह्मणः सृष्टिकामस्य मुखाद्वायुर्विनिर्यथौ ॥ प्रचण्डश्चंक्रवर्षी तं ब्रह्मा प्रत्यषेधयत् ॥ ४ ॥ सूर्त्तो भव त्वं शान्तश्च तेनोक्तो मूर्त्तिमानभूत् ॥ सर्वेषां चैव देवानां यद्दित्तं फलमेव च ॥ ५ ॥ तत्सर्वं पाहि येनोक्तं तस्माद्धनपतिर्भवान् ॥ तस्य ब्रह्मा ददौ तुष्टस्तिथिमेकादशीं प्रभुः ॥ ६ ॥ तस्यामनग्निपक्काशी यो भवेन्नियतं शुचिः ॥ तस्यापि धनदो देवस्तुष्टः सर्वं प्रयच्छति ॥ ७ ॥ एषा धनपतेर्मूर्त्तिः सर्वं किल्विषनाशिनी ॥ य एतां शृणुयाद्भक्त्या पुरुषः पठतेऽपि वा ॥ सर्वकामानवाप्नोति स्वर्गलोकं च गच्छति ॥ ८ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने धनदोत्पत्तिर्नाम त्रिंशोऽध्यायः ॥ ३० ॥ अथ विष्णूत्पत्तिः ॥ महातपा उवाच ॥ मनोर्नाम मनुत्वं च यदेतत्पठ्यते किल ॥ प्रयोजनवशाद्विष्णुरसावेव तु मूर्त्तिमान् ॥ १ ॥ योऽसौ नारायणो देवः परात्परतरो नृप ॥ तस्य चिन्ता समुत्पन्ना सृष्टिं प्रति नरोत्तम ॥ २ ॥ सृष्टा चेयं मया सृष्टिः पालनीया मयेव ह ॥ कर्मकाण्डं त्वमूर्त्तेन कर्तुं नेवेह शक्यते ॥ ३ ॥ तस्मान्मूर्तिं सृजाम्येकां ययां पास्यमिदं जगत् ॥ एवं चिन्तयतस्तस्य सत्याभिध्यायिनो नृप ॥ ४ ॥ प्रावसृष्टिजातं राजन्वै मूर्त्तिमत्तत्पुरो बभौ ॥ पुरोभूतस्तत स्तस्मिन्देवो नारायणः स्वयम् ॥ ५ ॥ प्रविशन्तं ददर्शाथ त्रैलोक्यं तस्य देहतः ॥ ततः सस्मार भगवान्वरदानं पुरातनम् ॥ ६ ॥ वागादीनां ततस्तुष्टः प्रादात्तस्य पुनर्वरम् ॥ सर्वज्ञः सर्वकर्ता त्वं सर्वलोकनमस्कृतः ॥ ७ ॥ त्रैलोक्यप्रतिपालाच्च भव विष्णुः सनातनः ॥ देवानां सर्वदा कार्यं कर्त्तव्यं ब्रह्मणः सदा ॥ ८ ॥ सर्वज्ञत्वं च भवतु तव देव न संशयः ॥ एवमुक्त्वा ततो देवः प्रकृतिस्थो बभूव ह ॥ ९ ॥ विष्णुरप्यधुना पूर्वां बुद्धिं सस्मार स प्रभुः ॥ तदा सञ्चिन्त्य भगवान्योगनिद्रां महातपाः ॥ १० ॥

तस्या संस्थाप्य भगवानिन्द्रियार्थोद्भवाः प्रजाः ॥ ध्यात्वा परेण रूपेण ततः सुष्वाप वै प्रभुः ॥ ११ ॥ तस्य सुप्तस्य जठरा न्महत्पद्म विनिःसृतम् ॥ सप्तद्वीपवती पृथ्वी ससमुद्रा सकानना ॥ १२ ॥ तस्य रूपस्य विस्तारं पातालातलसंस्थितम् ॥ कर्णिकायां तथा मेरुरुत्तन्मध्ये ब्रह्मणो भवः ॥१३ ॥ एवं दृष्ट्वा परं तस्य शरीरस्य तु सम्भवम् ॥ मुमुदे तच्छरीरस्थो वायुर्वायुं ससर्ज ह ॥१४॥अविद्या विजयं चेमं शङ्करूपेण धारय ॥ अज्ञानच्छेदनार्थाय खड्गं तेऽस्तु सदा करे ॥१५॥ कालचक्रमयं चोरं चक्रं तद्वारयाच्युत ॥ अघमैराजचातार्थं गदां धारय केशव ॥ १६ ॥ मालेयं भूतमातां ते कण्ठे तिष्ठतु सर्वदा ॥ श्रीवत्सकौस्तुभौ चेमौ चन्द्रादित्यच्छलेन ह ॥ १७॥ मारुतस्ते गतिर्वीर गरुत्मान्स च कीर्त्तितः ॥ त्रैलोक्यगामिनी देवी लक्ष्मीस्तेऽस्तु सदाश्रये ॥ १८ ॥ द्वादशी च तिथिस्तेऽस्तु कामरूपी च जायते॥ धृताशनो भवेद्यस्तु द्वादश्यां त्वत्परायणः ॥ १९ ॥ स स्वर्गवासी भवतु पुमान्स्त्री वा विशेषतः ॥ स च विष्णुस्तदाख्यातो मूर्त्तयो देवदानवाः ॥२० ॥ हन्ति पाति शरीराणि सृजत्यन्यानि चात्मनः ॥ युगे युगे सर्वगोऽयं वेदान्तपुरुषो ह्यजो ॥२१ ॥ न हीनबुद्ध्या वक्तव्यो मनुष्योऽयं कदाचन ॥ य एवं शृणुयात्सर्गं वैष्णवं पापनाशनम् ॥ २२ ॥ स कीर्त्तिमिह सम्प्राप्य स्वर्गलोके महीयते ॥ २३ ॥ इति श्रीवराहपुराणे आदिकृत वृत्तान्ते महातपउपाख्याने परापरनिर्णयो नाम एकत्रिंशोऽध्यायः ॥३१॥अथ धर्मोत्पत्तिः ॥ महातपा उवाच॥ अयोत्पत्तिं प्रवक्ष्यामि धर्मस्य महतो नृप ॥ माहात्म्यं च तिथिं चैव तन्निबोध नराधिप ॥ १ ॥ पूर्वं ब्रह्माव्ययः शुद्धः परादपरसंज्ञितः ॥ स सिसृक्षुः प्रजास्त्वादौ पालनं च विचिन्तयन् ॥ २ ॥ तस्य चिन्तयतस्त्वङ्गादक्षिणाच्छेतकुण्डजः ॥ प्रादुर्बभूव पुरुषः श्वेतमाल्यानुलेपनः ॥ ३ ॥ तं दृष्ट्वोवाच भगवांश्चतु ष्पादं वृषाकृतिम् ॥ पालयेमाः प्रजाः साधो त्वं ज्येष्ठो जगतो भव ॥४॥ इत्युक्तः समवस्थोऽसौ चतुष्पात्स्थाक्षते युगे॥ त्रेतायां त्रिपदश्चासौ द्विपदो द्वापरेऽभवत्॥ ५॥कलावेकेन पादेन प्रजाः पालयते प्रभुः ॥ षड्भेदो ब्राह्मणानां स त्रिधा क्षत्रे व्यवस्थितः॥६॥द्विधा वैश्ये तथा शूद्रे एकः सर्वगतः स्थितः ॥ रसातलेषु सर्वेषु द्वीपवर्षेष्वयं प्रभुः॥७॥ गुणद्रव्यक्रियाजातिचतुष्पात्संप्रकीर्त्तितः॥त्रिशृङ्गोऽसौ स्मृतो वेदे ससांहित पदक्रमः ॥ ८ ॥ तथा आद्यन्त ओङ्कारद्विशिराः सप्तहस्तवान् ॥ उदात्तादित्रिभिर्बद्ध एवं धर्मो व्यवस्थितः ॥ ९ ॥ स धर्मः पीडितः पूर्वं

सोमेनाद्भुतकर्मणा ॥ तारां जिघृक्षुणा पत्नीं भ्रातुरङ्गिरसस्य च ॥ १० ॥ सोऽपायाद्भ्रंशितस्तेन बलिना क्रूरकर्मणा ॥ अरण्यं गहनं घोर मविवेश तदा प्रभुः ॥ ११ ॥ तस्मिन्गते सुराः सर्वे असुराणां तु पक्षतः ॥ जिघृक्षन्तस्तदा दोर्भ्यां बभ्रुर्युद्धमवाञ्छिताः ॥ १२॥ असुरा अपि तद्रक्ष सुरवेषमनि बभ्रुवुः ॥ निर्मर्यादे तथा जाते धर्मनाशे च पार्थिव ॥ १३ ॥ देवासुरा युयुधिरे सोमदोषेण कोपिताः ॥ स्त्रीहेताश्च महा भाग विविधायुधपाणयः ॥ १४ ॥ तान्दृष्ट्वा युध्यतो देवानसुरैः सह कोपितान् ॥ नारदः प्राह सङ्क्रम्य पितरं प्रति हर्षितः ॥ १५ ॥ स हंस यानमारुह्य सर्वलोकपितामहः ॥ निवारयामास तदा कस्यार्थं युद्धमद्य वः ॥ १६ ॥ सर्वे शंशसुः सोमं तुस तु बुद्ध्या स्वकं सुतम् ॥ पीड नादपयातं तु गहनं वनमाश्रितम् ॥ १७ ॥ ततो ब्रह्मा ययौ तत्र देवासुरयुतेऽध्वरे ॥ ददर्श च सुरैः सार्द्धं चतुष्पादं वृषाकृतिम् ॥ १८ ॥ चरन्तं शशिसङ्काशं दृष्ट्वा देवानुवाच ह ॥ ब्रह्मोवाच ॥ अयं मे प्रथमः पुत्रः पीडितः शशिना भृशम् ॥ १९ ॥ पत्नीं जिघृक्षुणा भ्रातुर्द्धर्मं संज्ञो महामुनिः ॥ इदानीं तोपयध्वं तं सर्वे एव सुरासुराः ॥ २० ॥ येन स्थितिर्भवति समं देवासुरा इति ॥ ततः सर्वे स्तुतिं चक्रुस्तस्य देवस्य हर्षिताः ॥ २१ ॥ विदित्वा ब्रह्मणो वाक्यात्तस्मपूर्णंशशिसन्निभम् ॥ देवा ऊचुः ॥ नमोऽस्तु शशिसङ्काश नमस्ते जगतः पते ॥२२॥ नमोऽस्तु देवरूपाय स्वर्गमार्गप्रदर्शक ॥ कर्ममार्गस्वरूपाय सर्वगाय नमो नमः ॥२३॥ त्वयैव पाल्यते पृथ्वी त्रैलोक्यं च त्वयैव हि ॥ जन स्तपस्तथा सत्यं त्वया सर्वं तु पाल्यते ॥२४॥न त्वया रहितं किंचिज्जगत्स्थास्नुचरजङ्गमम्॥विद्यते त्वद्विहीनं तु सद्यो नश्यति वै जगत् ॥२५॥ त्वमात्मा सर्वभूतानां सतां सत्त्वस्वरूपवान् ॥ राजसीनां रजस्त्वं च तामसीनां तमोमयः ॥ २६ ॥ चतुष्पादो भवान्वेदश्चतुः शृङ्ग स्त्रिलोचनः ॥ सप्तहस्तस्त्रिबन्धश्च वृषरूप नमोऽस्तु ते ॥ २७ ॥ त्वया हीना वयं देव सर्वे उन्मार्गवर्तिनः ॥ तन्मार्गं यच्छ यूढानां त्वं हि नः परमा गतिः ॥२८॥ एवं स्तुतस्तदा देवैर्वृषरूपी प्रजापतिः ॥ तुष्टः प्रसन्नमनसा शान्तचक्षुरभाषत ॥ २९ ॥ दृष्टमात्रास्तु ते देवाः स्वयं धर्मेण चक्षुषा ॥ क्षणेन गतसम्मोहाः सम्यक्तद्धर्मसंहिताः ॥ ३० ॥ असुरा अपि तद्रक्ष ततो ब्रह्माऽवदत्तम् ॥ अद्यप्रभृति ते धर्मे तिथिरस्तु त्रयोदशी ॥ ३१ ॥ यस्तामुपोष्य पुरुषो भवन्तं समुपाचर्येत् ॥ कृत्वा पापसमाचारं तस्मान्मुंचति मानवः ॥ ३२ ॥ यच्चारण्य ॥२४॥

मिदं धर्म्मं त्वया व्याप्तं चिरं प्रभो ॥ नाम्ना भविष्यति ह्येतद्धर्म्मारण्यामीति प्रभो ॥ ३३ ॥ चतुस्त्रिपाद्वचेकपाच्च प्रभो त्वं कृतादिभिर्लक्ष्यसे येन लोकैः ॥ तथा तथा कर्मधूमो नभश्च प्रायो युक्तः स्वगृहं पाहि विश्वम् ॥ ३४ ॥ इत्युक्तमात्रः प्रपितामहोऽब्रुवा सुरासुराणामथ पश्यतां नृप ॥ अदृश्यतामगमत्स्वालयांश्च जग्मुः सुराः सवृषा वीतशोकाः ॥ ३५ ॥ धर्मोत्पत्तिं य इमां श्रावयीत पितॄंश्राद्धे तर्पयीतैव मेव ॥ त्रयोदश्यां पायसेन स्वशक्त्या स्वर्गं गत्वा देवसङ्घानुपेयात् ॥ ३६ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने धर्म्मोत्पत्तिर्नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥ अथ रुद्रोत्पत्तिः ॥ महातपा उवाच ॥ अथापरां रुद्रसम्भूतिमार्य्यां शृणुष्वेमां यत्नतः सोऽभ्युवाच ॥ महातपाः पातितो धर्म्मवृक्षः क्षमाम्लधारी ऋषिरुग्रतेजाः ॥ १ ॥ जातः प्रजानां पतिरुग्रतेजा ज्ञानं परं तत्त्वभावं विदित्वा ॥ सृष्टिं सिसृक्षुः क्षुभितोऽतिरोषादवृद्धिकाले जगतः प्रकामम् ॥ २ ॥ तपस्यतोऽन्तःस्थिरकीर्तिपुण्यो रजस्तमोध्वस्तगतिर्वभूव ॥ वरो वेरण्यो वरदः प्रतापी कृष्णारुणः पुरुषः पिङ्गनेत्रः ॥ ३ ॥ रुदन्मुखो ब्रह्मणा मा रुद स्वं रुद्रस्ततोऽसावभवत्पुराणः ॥ नयस्व सृष्टिं वितत स्वरूपां भवान् समर्थोऽसि महानुभाव ॥ ४ ॥ इत्युक्तमात्रः सलिले ममज्ज मग्ने सलज्जोत्प्लवभाय दक्षः ॥ क्रुध्ये तदा देववरेऽपि ते तु सृष्टिं चकुर्मानसा ब्रह्मजाताः ॥ ५ ॥ तस्यां ततायां तु सुरापिये तु पैतामहं यज्ञवरं प्रकामम् ॥ मग्नः पुरा यत्सलिले स रुद्र उत्सृज्य विघ्नं तु सुरान् सिसृक्षुः ॥ ६ ॥ सुत्रावे यज्ञे सुरसिद्धयक्षानुपागतान्क्रोधवशं जगाम ॥ कन्यां च दीतां परिभाव्य केन सृष्टं जगन्मां व्यतिरिच्य मोहात् ॥ ७ ॥ हा हेति चोक्ते ज्वलनाच्चिषस्तु निश्चेरुरस्यात्परिपिङ्गलस्य ॥ तत्राभवन्भूप्रपिशाचसङ्घा वेताळभूतानि च योगिसङ्घाः ॥ ८ ॥ घनं यदा तैर्विततं वियच्च भूमिश्च सर्वांश्च दिशश्च लोकाः ॥ तदा स सर्वज्ञतया चकार धनुश्चतुर्विंशतिहस्तमात्रम् ॥ ९ ॥ गुणं त्रिवृत्तं च चकार रोषादादत्त दिव्ये इषुधी शरांश्च ॥ ततश्च पूष्णो दशनानपातयद्भगस्य नेत्रे वृषणौ क्रतोश्च ॥ १० ॥ स विद्धबीजो व्यपपात्क्रतुश्च मार्गं वायुर्द्धारयन्यज्ञवाटात् ॥ देवाश्च सर्वे पशुतामुपेयुर्मृगश्च सर्वे प्रणतिं भवस्य ॥ ११ ॥ आगम्य तत्रैव पितामहस्तु भवं प्रतीतः सम्परिष्वज्य देवान् ॥ भक्त्योपेतानी क्षयन्देवदेवान्विज्ञाय रुद्रेण कृतापकारान् ॥ १२ ॥ रुद्रं दृष्ट्वा देवदेवो जगाद मा तात कोपेन गतो हि यज्ञः ॥ इति ब्रह्मवचः श्रुत्वा रुद्रः

प्रोवाच कोपवान् ॥ १३ ॥ रुद्र उवाच ॥ सृष्टः पूर्वं भवताहं तवेमे कस्मान्न भागं परिकल्पयन्ति ॥ यज्ञोद्भवं तेन रूपं मयेमे वीतज्ञाना
विकृता देवदेव ॥ १४ ॥ ब्रह्मोवाच ॥ देवाः शम्भुं स्तुतिभिर्ज्ञानहेतोर्यज्ञध्वमुच्चैरसुराश्च सर्वे ॥ येन रुद्रो भगवांस्तोषमेति सर्वज्ञता तोषमात्रा
दिह स्यात् ॥ १५ ॥ इत्युक्तास्तेन ते देवाः स्तुतिभिश्चक्रुरीड्यमेहात्मनः ॥ देवा ऊचुः ॥ नमो देवातिदेवाय त्रिणेत्राय महात्मने ॥ १६ ॥ रक्तपिङ्गल
नेत्राय जटामुकुटधारिणे ॥ भूतवेतालजुष्टाय महाभोगोपवीतिने ॥ १७ ॥ भीमाट्टहासवक्त्राय कपर्दीस्थाणवे नमः ॥ पूष्णो दन्तविनाशाय
भगनेत्रभिदे नमः ॥ १८ ॥ भविष्यवृषचिह्नाय महाभूतपते नमः ॥ भविष्यत्रिपुरघ्नाय तथान्धकविनाशिने ॥ १९ ॥ कैलासवरवासाय
करिकृत्तिनिवासिने ॥ विकरालोर्द्धकेशाय भैरवाय नमो नमः ॥२०॥ अग्निज्वालाकरालाय शशिमौलिकृते नमः ॥ भविष्यकृतकापालि व्रताय
परमेष्ठिने ॥२१॥ तथा दारुवनध्वंसकारिणे तिग्मशूलिने ॥ कृतकङ्कणभोगीन्द्रनीलकण्ठत्रिशूलिने ॥२२॥प्रचण्डदण्डहस्ताय वडवाग्निमुखाय
च ॥ वेदान्तवेद्याय नमो यज्ञमूर्ते नमो नमः॥२३॥ दक्षयज्ञविनाशाय जगद्भयकराय च ॥ विश्वेश्वराय देवाय शिव शम्भो भवाय च ॥२४॥
कपर्दिने करालाय महादेवाय ते नमः ॥ एवं देवैः स्तुतः शम्भुरुग्रधन्वा सनातनः ॥ २५ ॥ उवाच देवदेवोऽहं यत्करोमि तदुच्यते ॥ देवा
ऊचुः ॥ वेदशास्त्राणि विज्ञानं देहि नो भव मा चिरम् ॥ २६ ॥ यज्ञश्च सरहस्यो भो यदि तुष्टोऽसि नः प्रभो ॥ महादेव उवाच ॥ भवन्तः
पशवः सर्वे भवन्तु सहिता इति ॥ २७ ॥ अहं पतिश्च भवतां ततो मोक्षमवाप्स्यथ ॥ तथेति देवास्ते प्राहुस्ततः पशुपतिर्भवान् ॥ २८ ॥
ब्रह्मा पशुपतिं प्राह प्रसन्ननान्तरात्मना ॥ चतुर्दशी ते देवेश तिथिरस्तु न संशयः ॥ २९ ॥ तस्यां तिथौ भवन्तं ये यजन्ति श्रद्धयान्विताः ॥
उपोष्य भोजनीयास्तु गोधूमान्नेन वै द्विजाः ॥ ३० ॥ तेषां त्वं तुष्टिमापन्नो देहि स्थानमनुत्तमम् ॥ ३१ ॥ एवमुक्तस्तथा रुद्रो ब्रह्मणाव्यक्त
जन्मना ॥ दन्ताग्रेत्रे फलं प्रादाद्भगपूष्णोः क्रतोरपि ॥ ३२ ॥ परिज्ञानं च सकलं स प्रादादमरेष्वपि ॥ एवं रुद्रस्य सम्भूतिः सम्भूता ब्रह्मणः ॥ ३५ ॥
पुरा ॥ ३३ ॥ अनेनैव प्रयोगेण देवानां पतिरुच्यते ॥ यथैतच्छ्रृणुयान्नित्यं प्रातरुत्थाय मानवः ॥ ३४ ॥ सर्वपापविनिर्मुक्तो रुद्रलोकमवा
प्नुयात् ॥ इति श्रीवराहपुराणे महात० उपा० रुद्रोत्पत्तिर्नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ अथ पितृसर्गस्थितिवर्णनम् ॥ महातपा उवाच ॥

पितॄणां सम्भवं राजन्कथ्यमानं निबोध मे ॥ १ ॥ पूर्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥ एकाग्रमनसः सर्वास्तन्मात्रा मनसो बहिः ॥ कृत्वा परमकं ब्रह्मा ध्यायन्सर्वेषु रूपकैः ॥ २ ॥ तस्यात्मानि तदा योगं गतस्य परमेष्ठिनः ॥ तन्मात्रा निर्ययुर्देहाद्भूम वर्णकृतत्विषः ॥ ३ ॥ पिबाम इति भाषन्तः सुरान्सोममिति स्म ह ॥ ऊर्ध्वं जिगमिषन्तो वै वियत्संस्थास्तपस्विनः ॥ ४ ॥ तान्दृष्ट्वा सहसा ब्रह्मा तिर्यक्संस्थांस्तथोन्मुखान् ॥ भवन्तः पितरः सन्तु सर्वेषां गृहमेधिनाम् ॥ ५ ॥ ऊर्ध्वंकारस्तु ये तत्र ते नान्दीमुखसंज्ञिताः ॥ इत्युक्त्वा तु तदा ब्रह्मा तेषां पन्थानमाकरोत् ॥ ६ ॥ दक्षिणायनसंज्ञं तु पितॄणां च पितामहः ॥ तूष्णीं ससर्ज भूतानि तमूचुः पितरस्ततः ॥ वृत्तिं नो देहि भगवन् यथा विन्दामहे सुखम् ॥ ७ ॥ ब्रह्मोवाच ॥ अमावास्यादिनं घोऽस्तु तस्यां कृप्ततिलोदकैः ॥ तर्पिता मानुषैस्तृप्तिं परां गच्छत नान्यथ ॥ ८ ॥ तिळा देयास्तथैतस्यामुपोष्य पितृभक्तितः ॥ परमं तस्य संतुष्टा वरं यच्छत मा चिरम् ॥९ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने पितृसर्गस्थितिवर्णनं नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ अथ सोमोत्पत्तिस्थितिरहस्यम् ॥ महातपा उवाच ॥ ब्रह्मणो मानसः पुत्रो ह्यत्रिर्नाम महायशाः ॥ तस्य पुत्रोऽभवत्सोमो दक्षजामातृताङ्कृतः ॥ १ ॥ याः सप्तविंशतिः कन्या दाक्षायण्यः प्रकीर्त्तिताः ॥ सोमपत्न्योऽतिमान्यास्तासां श्रेष्ठा तु रोहिणी ॥ २ ॥ तामेव रमते सोमो नेतरास्त्विति शुश्रुम ॥ इतराः प्रोचुरागत्य चन्द्रस्यासमतां पितुः ॥ दक्षोऽप्यसकृदागत्य तमुवाच स नाकरोत् ॥ ३ ॥ समतां सोऽपि तं दक्षः शशापान्तर्हितो भव ॥ एवमुक्तः क्षयं सोम अगमद्दक्षशापतः ॥ ४ ॥ देवा मनुष्याः पशवो नष्टे सोमे सवरुधः ॥ क्षीणाभवंस्तदा सर्वा ओषध्यश्च विशेषतः ॥ ५ ॥ क्षयं गच्छद्भिरत्यर्थमोषधीभिः सुरर्षभाः ॥ मूलेषु वीरुधां सोमः स्थित इत्यनुशुश्रुमः ॥ ६ ॥ तेषां चिन्ताभवत्तीव्रा विष्णुं च शरणं ययुः ॥ भगवानाह तान्सर्वान्नूनं किं क्रियते मया ॥ ७ ॥ ते चोचुर्देव दक्षेण शप्तः सोमो विनाशितः ॥ तानुवाच तदा देवो मथ्यतां कल शोदधिः ॥ ओषध्यः सर्वतो देवाः प्रक्षिप्याशु सुसंयतैः ॥८ ॥ एवमुक्त्वा ततो देवान्दध्यौ रुद्रं हरिः स्वयम् ॥ ब्रह्माणं च तथा दध्यौ वासुकिं नेत्ररूपिणम् ॥ ९ ॥ ते सर्वे तत्र सहिता ममन्थुर्वरुणालयम् ॥ तस्मिन्त्सुमथिते जातः पुनः सोमो महीपते ॥ १० ॥ योऽसौ क्षेत्रज्ञ

संज्ञो वै देहेऽस्मिन्पुरुषः परः ॥ स एव सोमो मन्तव्यो देहिनां जीवसंज्ञकः ॥ ११ ॥ परोक्षया स मूर्त्या तु पृथक्सोम्यां प्रपेदिवान् ॥ तमेव देवमनुजाः पोडशेमाश्च देवताः ॥ १२ ॥ उपजीवन्ति वृक्षाश्च तथैवौषधयः प्रभुम् ॥ रुद्रस्तमेव सकलं दधार शिरसा तदा ॥ १३ ॥ तद्लिङ्गा भवन्त्यापो विश्वमूर्तिरसौ स्मृतः ॥ तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीं तिथिं प्रभुः॥ १४ ॥ तस्यामुपोषणेद्राजंस्तमर्थं प्रतिपादयेत् ॥ स चान्नाहारश्च भवेत्तस्य ज्ञानं प्रयच्छति ॥ कान्तिं पुष्टिं च राजेंद्र धनं धान्यं च केवलम् ॥ १५ ॥ इति श्रीवराहपुराणे आदिकृतवृत्तान्ते महातपउपाख्याने सोमोत्पत्तिस्थितिरहस्यं नाम पंचत्रिंशोऽध्यायः ॥ ३५ ॥ अथ प्राचिनेतिहासवर्णनम् ॥ महातपा उवाच ॥ आदित्रेतासु राजानो मणिजा ये प्रकीर्त्तिताः ॥ कथयिष्यामि तान्राजन्यत्र जातोऽसि पार्थिवः ॥ १ ॥ थोऽतो सुप्रभनामासीत्स त्वं राजन्कृते युगे ॥ जातोऽसि नाम्ना विख्यातः प्रजापालेति शोभनः ॥ २ ॥ शेषास्त्रेतायुगे राजन्भविष्यन्ति महबलाः ॥ यो दीप्ततेजा मणिजः स शान्त इति कीर्त्तितः ॥ ३ ॥ सुरश्मिर्भविता राजा शशकर्णो महाबलः ॥ शुभदर्शनः पाञ्चालो भविष्यति न संशयः ॥ ४ ॥ सुशान्तिरङ्गवंशे वै सुन्दरोऽप्यङ्ग इत्युत ॥ सुन्दश्च सुकुकुन्दोऽभूत्सुद्युम्नस्तुरुवेव च ॥ ५ ॥ सुमनाः सोमदत्तस्तु शुभः संवरणोऽभवत् ॥ सुशीलो वसुदानस्त्वसु पतिः सुखदोऽभवत् ॥ ६ ॥ शम्भुः सेनापतिरभूत्क्रान्तो दशरथः स्मृतः ॥ सोमोऽभूज्जनको राजा एते त्रेतायुगे नृपाः ॥ ७ ॥ सर्वे भूमिमिमां राजन् भुक्त्वा ते वसुधाधिपाः ॥ इष्ट्वा च विविधैर्यज्ञैर्दिवं प्राप्स्यन्त्यशेषम् ॥ ८॥ वराह उवाच ॥ एवं श्रुत्वा स राजर्षिर्ब्रह्मविद्यामृतं प्रभुः ॥ आख्यानं परमं प्रीतस्तपश्चर्तुमगाद्वनम् ॥ ९ ॥ ऋषिरध्यात्मयोगेन विहायेदं कलेवरम् ॥ ब्रह्मभूतोऽभवद्धात्रि हरौ लयमवाप च ॥ १० ॥ वृन्दावनं च राजासौ तपोर्थे गतवान्प्रभुः ॥ तत्र गोविन्दनामानं हरिं स्तोतुमथारभत् ॥ ११॥ राजोवाच ॥ नमामि देवं जगतां च मूर्त्तिं गोपेन्द्रमिन्द्रानुजमप्रमेयम् ॥ संसारचक्रक्रमणैकदक्षं पृथ्वीधरं देववरं नमामि ॥ १२ ॥ भवोदधौ दुःखशतोर्म्मिभीमे जरावर्त्ते कृष्ण पातालमूले ॥ तदन्त एको ददते सुखं मे नमोऽस्तु ते गोपतयेऽप्रमेय ॥ १३ ॥ व्याध्याद्यिधुक्तैः पुरुषैर्यदैश्च सङ्कट्टमानं पुनरेव देव ॥ नमोऽस्तु ते बुद्धरते महात्मञ्जनार्दनोपेन्द्र समस्तबन्धो ॥ १४॥ त्वमुत्तमः सर्वविदां सुरेश त्वया ततं विश्वमिदं समस्तम् ॥ गोपेन्द्र त्वं पाहि

॥ ३६ ॥

महानुभाव भवाद्भीतं तिग्मस्थाङ्गपाणे ॥ १५ ॥ परोऽसि देवः प्रवरः सुराणां पुराणरूपोऽसि शशिप्रकाशः ॥ हुताशवक्राच्युत तीव्रभाव गोपेन्द्र मां पाहि भवे पतन्तम् ॥ १६ ॥ संसारचक्रक्रमणान्यनेकान्याविर्भवन्त्यच्युत देहिनां यत् ॥ त्वन्मायया मोहितानां सुरेश कस्ते माया तरते द्वन्द्वधामा ॥ १७ ॥ अगोत्रमस्पर्शमरूपगन्धमनामनिर्देशमजं वरेण्यम् ॥ गोपेन्द्र ये त्वामुपासन्ति धीरास्ते मुक्तिभाजो भवधर्म मुक्ताः ॥ १८ ॥ शब्दातिगं व्योमरूपं विभूर्त्ति विकर्मिणं शुभभावं वरेण्यम् ॥ चक्राब्जपाणिं तु तथोपचारादुक्तं पुराणे सततं नमामि॥ १९॥ त्रिविक्रमं कीर्तजगत्त्रयं च चतुर्भूर्त्तिं वि श्वजगत्स्थितीशम् ॥ शम्भुं विभुं भूतपतिं सुरेशं नमाम्यहं विष्णुमनन्तमूर्त्तिम् ॥ २० ॥ त्वं देव सर्वाणि चराचराणि सृजस्यथो संहरसे त्वमेवं ॥ मां मुक्तिकामं नय देव शीघ्रं यस्मिन्गता योगिनो नोपयान्ति ॥ २१ ॥ जयस्व गोविन्द महानुभाव जयस्व विष्णो जय पद्मनाभ ॥ जयस्व सर्वज्ञ जयाप्रमेय जयस्व विश्वेश्वर विश्वमूर्त्ते ॥ २२ ॥ श्रीवराह उवाच ॥ एवं स्तुत्वा तदा राजा निधाय स्वं कलेवरम् ॥ परमात्मनि गोविन्दे मोक्षमागाच्च शाश्वतम् ॥२३॥ इति श्रीवराहपुराणे सत्यतपउपाख्याने प्रागितिहासे पट्त्रिंशोऽध्यायः ॥ ३६ ॥ अथ प्राचीनतिहासवर्णनम् ॥ धरण्युवाच ॥ कथमाराध्यसे देव भक्तिमद्भिर्नरैर्विभो ॥ स्त्रीभिर्वा सर्वमेतन्मे शंस त्वं भूत भावन ॥ १ ॥ श्रीवराह उवाच ॥ भावसाध्योऽस्म्यहं देवि न वित्तैर्न जपैरहम् ॥ साध्यस्तथापि भक्तानां कायक्लेशं वदामि ते ॥ २ ॥ कर्मणा मनसा वाचा मच्चित्तो यो नरो भवेत् ॥ तस्य व्रतानि वक्ष्येऽहं विविधानि निबोध मे ॥ ३ ॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं प्रकीर्त्तितम् ॥ एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥ ४ ॥ एकभक्तं तथा नक्तमुपवासादिकं च यत् ॥ तत्सर्वं कायिकं पुसां व्रतं भवति नान्यथा॥५॥ वेदस्याध्ययनं विष्णोः कीर्त्तनं सत्यभाषणम् ॥ अपैशुन्यं हितं धर्मं वाचिकं व्रतमुत्तमम् ॥ ६ ॥ अत्रापि श्रूयते चान्यदपिरूयतपाः पुरा ॥ ब्रह्मपुत्रः पुरा कल्पे आरुणिर्नाम नामतः ॥ ७ ॥ सोऽरण्यमगमत्किंचित्तपोऽर्थी द्विजसत्तमः ॥ तपस्तेपे ततस्तस्मिन्नुपवासपरायणः ॥ ८ ॥ देविकायास्तटे रम्ये सोऽवसद्ब्राह्मणः किल ॥ कदाचिद्दभिपेकाय स जगाम महानदीम् ॥ ९ ॥ तत्र स्नात्वा जपन्विप्रो ददर्शायान्तमग्रतः ॥ व्याघं महाधनुःपाणिमुग्रनेत्रं विभीषणम् ॥ १० ॥ तं द्विजं हन्तुमायात्स वल्कलानां जिघृक्षया ॥ तं दृष्ट्वा क्षुभितो विप्रो ब्रह्मग्रस्य भय

दिति ॥ ११ ॥ ध्यायन्नारायणं देवं तस्थौ तत्रैव स द्विजः ॥ तं दृष्ट्वान्तर्गतद्वारं व्याधो भीत इवाग्रतः ॥ १२॥ विहाय तशरं चापं ततो

वचनमब्रवीत् ॥ व्याध उवाच ॥ हन्तुमिच्छन्नहं ब्रह्मन्भवन्तं प्रागिहागतः ॥ १३॥ इदानीं दर्शनात्तुभ्यं सा मतिः क्वापि मे गता ॥ ब्राह्मणानां सहस्राणि सत्स्त्रीणामयुतानि च ॥ १४ ॥ निहतानि मया ब्रह्मन्सततं पापकारिणा ॥ कां गतिं प्रतिपत्स्यामि ब्रह्मघ्नोऽहं द्विजोत्तम ॥ १५ ॥ इदानीं तन्तुमिच्छामि तपोऽहं त्वत्समर्पितः ॥ उपदेशप्रदानेन प्रसादं कर्तुमर्हसि ॥ १६ ॥ एवमुक्तोऽप्यसौ विप्रो नोत्तरं प्रत्यपद्यत ॥ ब्रह्महा पापकर्मोति मत्वा ब्राह्मणपुङ्गवः॥ १७॥ अनुक्तोऽपि स धर्मेप्सुर्व्याधस्तत्रैव तस्थिवान्॥ स्नात्वा नद्यां द्विजः सोऽपि वृक्षमूलमुपाश्रितः ॥ १८ ॥ कस्यचित्त्वथ कालस्य तां नदीमगमत्किल ॥ व्याघ्रो बुभुक्षितः शान्तं तं विप्रं हन्तुमुद्यतः ॥ १९ ॥ अन्तर्जलगतं विप्रं यावद्व्याघ्रो निभृक्षति ॥ तावद्व्याघेन व्याघ्रोऽसौ सद्यः प्राणैर्वियोजितः ॥ २० ॥ तस्माद्व्याघ्रशरीरात्तु उत्थाय पुरुषः किल ॥ विप्रश्चान्तर्जले मग्नः श्रुत्वा तं शब्दमाकुलम् ॥ २१ ॥ नमो नारायणायेति वाक्यमेतदुवाच ह ॥ व्याघ्रेणापि श्रुतो मन्त्रः प्राणैः कण्ठस्थितैस्ततः ॥ २२ ॥ श्रुतमात्रे जहौ प्राणान्पुरुषश्चाभवच्छुभः ॥ सोऽब्रवीद्याम्यि तं देशं यत्र विष्णुः सनातनः ॥ २३ ॥ त्वत्प्रसादाद्विजश्रेष्ठ मुक्तपाप्मा निरामयः ॥ इत्युक्तो ब्राह्मणः प्राह कोऽसि त्वं पुरुषोत्तम ॥ २४ ॥ सोऽब्रवीत्तस्य राजेन्द्र यद्वृत्तं पूर्वजन्मनि ॥ दीर्घबाहुरिति ख्यातः सर्वधर्मविशारदः ॥ २५ ॥ अहं जानामि वेदांश्च अहं वेत्मि शुभाशुभम् ॥ ब्राह्मणैर्नैव मे कार्यं किंवस्तु ब्राह्मणा इति ॥ २६ ॥ तस्यैवंवादिनो विप्राः सर्वे कोपसमन्विताः ऊचुः शापं दुराधर्षं क्रूरो व्याघ्रो भविष्यसि॥ २७॥ अवमानात्तु विप्राणां नात्यर्थं स्मरणं तव॥ मृत्युकाले तु संमूढ केशवेत्येव श्रोष्यसि॥ २८॥ इत्युक्तोऽहं पुरा तेस्तु ब्राह्मणैर्वेदपारगैः ॥ तदेव सर्वं सम्प्राप्तो ब्रह्मशापं सुपुष्कलम् ॥ २९ ॥ ततस्ते ब्राह्मणाः सर्वे प्रणिपत्य मयासुने ॥ उक्तानुग्रहहेतोर्वै त ऊचुर्मामिदं पुरा ॥ ३० ॥ षष्ठाह्नकालिकस्याग्रे यस्ते स्थास्यति कश्चन ॥ स भक्ष्यस्ते तु भविता कंचित्कालं नराधिप ॥ ३१ ॥ यदेवुघातं लब्ध्वा तु प्राणैः कण्ठगतैर्भवान् ॥ श्रोष्यति द्विजवक्त्रात्तु नमो नारायणेति च ॥ ३२ ॥ तदा स्वर्गगतिस्तुभ्यं भविता नात्र संशयः ॥ पश्चक्रगतं चापि विष्णोर्नाम श्रुतं मया ॥ ३३ ॥ कृतद्वेषस्य विप्राणां प्रत्यक्षोऽभवदच्युतः ॥ यः पुनर्ब्राह्मणान्पूज्य

स्ववक्त्रेण नमो हरिम् ॥ ३४ ॥ वदन्प्राणैर्विमुच्येत मुक्तोऽसौ वीतकिल्बिषः ॥ सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते ॥ ३५ ॥ जङ्गमा ब्राह्मणा देवाः कूटस्थः पुरुषोत्तमः ॥ एवमुक्त्वा गतः स्वर्गं स राजा वीतकल्मषः ॥ ३६ ॥ ब्राह्मणोऽपि तदा मुक्तस्तं व्याधं प्रत्यभाषत ॥ ऋषिरुवाच ॥ जिघृक्षोर्मृगराजस्य यत्त्वया रक्षितो ह्यहम् ॥ ३७ ॥ तत्पुत्र तुष्टस्ते दास्ये वरं वरय सुव्रत ॥ व्याध उवाच ॥ एष एव वरो मह्यं यत्त्वं मां भाषसे द्विज ॥ ३८ ॥ अतः परं वरेणाहं किं करोमि प्रशाधि माम् ॥ ऋषिरुवाच ॥ अहं त्वया पुरा व्याध प्रार्थितोऽस्मि तपोऽर्थिना ॥ ३९ ॥ बहुपातकयुक्तेन घोररूपेण चानघ ॥ इदानीं तव पापानि दैविकाभिषवेण च ॥ ४० ॥ मद्दर्शनेन च चिरं विष्णुनामश्रुतेन च ॥ नष्टानि शुद्धदेहोऽसि साम्प्रतं नात्र संशयः ॥ ४१ ॥ इदानीं वरमेकं त्वं गृहाण मम सन्निधौ ॥ तपः कुरुष्व साधो त्वं चिरकालं यदीच्छसि ॥ ४२ ॥ व्याध उवाच ॥ य एष भवता प्रोक्तो विष्णुर्नारायणः प्रभुः ॥ स कथं प्राप्यते मर्त्यैरेष एव वरो मम ॥४३॥ ऋषिरुवाच॥ तमुद्दिश्य व्रतं कुर्याद्यत्किंचित्पुरुषोऽच्युतम् ॥ स परं तमवाप्नोति भक्त्या युक्तः पुमानिति॥ ४४ ॥ एवं ज्ञात्वा भवान्पुत्र व्रतमेतत्समाचर ॥ न भक्षयेद्व्रणान्नं तु न वदेदनृतं क्वचित् ॥ ४५ ॥ एतत्ते व्रतमादिष्टं मया व्याधवरं ध्रुवम् ॥ अत्रैव तपसा युक्तस्तिष्ठ त्वं यावदिच्छसि ॥४६॥ श्रीवराह उवाच ॥ एवं चिन्तान्वितं मत्वा वरदो ब्राह्मणोऽभवत् ॥ मोक्षार्थिनमथो बुध्वा वंचयित्वा गतो मुनिः ॥४७॥ इति श्रीवराहपुराणे सत्यतपउपाख्याने प्रागितिहासे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ वराह उवाच ॥ स शुभं शोभनं मार्गमास्थाय व्याधसत्तमः ॥ तपस्तेपे निराहारस्तं गुरुं मनसा स्मरन् ॥ १ ॥ भिक्षाकाले तु सम्प्राते शीर्णपर्णान्यभक्षयत् ॥ स कदाचित् क्षुधाविष्टो वृक्षमूलं समाश्रितः ॥ २ ॥ बभुक्षित स्तरोः पर्णान्नेच्छद्भक्षितुमन्तिकात् ॥ इत्येवं कुर्वतो व्योम्नि वायुवाचाशरीरिणी ॥ ३ ॥ मा भक्षयस्व सकठमुञ्छैरेवं प्रभाषिते ॥ ततोऽसौ तद्धि ह्यान्यद्वाक्षीं पतितमग्रहीत् ॥ ४ ॥ तदप्येवं निषिद्धं स्यादन्यदेव तथैव च ॥ एवं स सकठं मत्वा व्याधः किञ्चिन्न भक्षयत् ॥ ५ ॥ निराहार स्तपस्तेपे स्मरन् गुरुमतान्द्रितः ॥ एवं तपस्यतस्तस्य काले ऋषिवरोऽभ्ययात् ॥ ६ ॥ दुर्वासाः शांसितात्मा वै प्राणयुक्तमपश्यत ॥ व्याधं तपोरथतेजोभिर्ज्वलमानं हविर्यथा ॥ ७ ॥ सोऽपि व्याधस्तु तं नत्वा शिरसाऽथ महामुनिम् ॥ उवाच तं कृतार्थोऽस्मि भगवन्दर्शनात्तव ॥८॥

इदानीं श्राद्धकाले त्वं प्राप्तोऽसि मम दैवतम् ॥ शीर्णपर्णादिभिः कृत्वा प्रीणयामि द्विजोत्तमम् ॥९॥ दुर्वासा अपि तं शुद्धभावपूतं जितेन्द्रियम् ॥ जिज्ञासुस्तत्तपो वाक्यमिदमुच्चैरुवाच ह ॥ १० ॥ यवगोधूमशालीनामन्नं चैव सुसंस्कृतम् ॥ दीयतां मे क्षुधार्त्ताय त्वामुद्दिश्यागताय च ॥ ११ ॥ इत्युक्ते नन्वसौ व्याधश्चिन्तां परमिकां गतः ॥ क्व संभविष्यते मह्यमिति चिन्तापरोऽभवत् ॥ १२ ॥ तस्य चिन्तयतः पात्र माकाशात्पतितं शुभम् ॥ सौवर्णं सिद्धिसंयुक्तं तज्जग्राह करेण सः ॥ १३ ॥ तद्गृहीत्वा मुनिं प्राह दुर्वासाख्यं ससाध्वसः ॥ अत्रैव स्थीयतां ब्रह्मन्यावद्भिक्षाटनं त्वहम् ॥ १४ ॥ करोमि मत्प्रसादोऽयं क्रियतां ब्रह्मवित्तम ॥ एवमुक्ता ततो भिक्षां याचितुं व्याधसत्तमः ॥ १५ ॥ नाति दूरेण नगरं वनघोषसमन्वितम् ॥ तस्य तत्र प्रयातस्य अग्रतः सर्वशोभनाः ॥ १६ ॥ वृक्षेभ्यो निर्ययुश्चान्या हेमपात्राग्रपाणयः ॥ विविधान्नानि तस्याशु दत्त्वा पात्रं प्रपूरितम् ॥१७॥ स च भूतार्थमात्मानं मत्वा पुनरथाश्रमम् ॥ आजगाम ततोऽपश्यत्तमृषिं जपतां वरम् ॥१८॥ तं दृष्ट्वा स्थाप्य तां भिक्षां शुचौ देशे प्रसन्नधीः ॥ प्रणम्य तमृषिं वाक्यमुवाच व्याधसत्तमः ॥ १९ ॥ ब्रह्मन् क्षालय पादौ त्वमुपविश्यासने शुभे ॥ यदि मेऽनुग्रहो देव तदेवं कर्तुमर्हसि ॥ २० ॥ एवमुक्तः स जिज्ञासुस्तपोवीर्यं शुभं मुनिः ॥ नदीं गन्तुं न शक्नोमि जलपात्रं न चास्ति मे ॥ २१ ॥ कथं प्रक्षालनं व्याध पादयोर्मे भविष्यति ॥ इत्येवं मुनिना प्रोक्तो व्याधश्चिन्तापरोऽभवत् ॥ २२ ॥ किं करोमि कथं चास्य भोजनं वै भविष्यति ॥ एवं संचिन्त्य मनसा गुरुं स्मृत्वा विचक्षणः ॥ २३ ॥ जगाम शरणं तां तु सीरतं देविकां सुधीः ॥ व्याध उवाच ॥ व्याधोऽस्मि पापकर्माऽस्मि ब्रह्महास्मि सरिद्वरे ॥ २४ ॥ तथापि संस्मृता देवि पाहि मां शरणागतम् ॥ देवतां नैव जानामि न मन्त्रं न तथाचनम् ॥ २५ ॥ गुरुपादौ परं ध्यात्वा पश्यामि सततं शुभम् ॥ एवंविधस्य मे देवि दयां कुरु सरिद्वरे ॥ २६ ॥ ऋषेरास्रन्नतां याहि पादशौचार्थमापगे ॥ एवमुक्ता तु व्याधेन देविका पापनाशिनी ॥ २७ ॥ आजगाम यतस्तस्थौ दुर्वासा शांसितव्रतः ॥ तद्दृष्ट्वा महदाश्चर्यं दुर्वासा विस्मयं ययौ ॥ २८ ॥ प्रक्षाल्य हस्तपादौ च तद्दत्तं श्रद्धयान्वितम् ॥ बुभुजे परमप्रीतस्तथाचम्य विचक्षणः ॥२९॥ तमस्थिशेषं व्याधं तु क्षुधा दुर्बलताङ्गतम् ॥ उवाच वेदाः साङ्गास्ते सरहस्यपदक्रमाः ॥३०॥

ब्रह्मविद्या पुराणानि प्रत्यक्षाणि भवन्तु ते ॥ एवं प्रादाद्वरं तस्य दुर्वासा नाम चाकरोत् ॥ ३१ ॥ भवान्सत्यतपा नाम ऋषिराद्यो भविष्यति ॥ एवं दत्तवरो व्याधस्तमाह मुनिसत्तमम् ॥ ३२ ॥ व्याधो भूत्वा कथं ब्रह्मन्वेदानध्यापयाम्यहम् ॥ ऋषिरुवाच ॥ प्राक्तशरीरं गतं तेऽद्य निराहारस्य सप्तम ॥ ३३ ॥ तपोमयं शरीरं ते पृथग्भूतं न संशयः ॥ प्राग्विज्ञानं गतं नाशमिदानीं शुद्धमक्षरम् ॥ ३४ ॥ उत्पन्नं शुद्धकायोऽसि सत्यमेतद्ब्रवीमि ते ॥ तेन वेदाश्च शास्त्राणि प्रतिभास्यन्ति वै मुने ॥ ३५ ॥ इति श्रीवराहपुराणे सत्यतपउपाख्याने प्रागितिहासे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥ अथ मत्स्यद्वादशीव्रतम् ॥ सत्यतपा उवाच ॥ भगवन्द्वे शरीरे तु इति यत्परिकीर्त्तितम् ॥ तन्मे कथय भेदं वै केन ब्रह्मविदां वर ॥ १ ॥ दुर्वासा उवाच ॥ न द्वे त्रीणि शरीराणि वाच्यं तद्विपरीतकम् ॥ विभोगायतनं चैव शरीराणीति देहिनाम् ॥ २ ॥ प्रागवस्थमधर्माख्यं परिज्ञानविवर्जितम् ॥ अपरं सत्त्वतं ताद्धि ज्ञेयमत्यन्तधार्म्मिकम् ॥ ३ ॥ धर्म्माधर्म्मोपभोगाय यत्तृतीयमतीन्द्रियम् ॥ तत्त्रिभेदं विनिर्दिष्टं ब्रह्मविद्भिर्विचक्षणैः ॥ ४ ॥ यावता धर्म्मभोगश्च भुक्तिश्चेति त्रिभेदकम् ॥ यस्तु भावः पुरा ह्यासीत्प्राणिनो निम्नतस्तव ॥ ५ ॥ तत्पापाख्यं शरीरं ते पापसंज्ञमतोऽभवत् ॥ इदानीं शुभवृत्तिं तु कुर्वतस्तप आर्जवम् ॥ ६ ॥ अपरं धर्मरूपं तु शरीरं ते व्यवस्थितम् ॥ तेन वेदपुराणानि ज्ञातुमर्हस्यसंशयम् ॥ ७ ॥ यदाष्टके सम्परिवर्तिते पुमांस्तदान्यवृत्तो भवतीह निश्चितम् ॥ गताष्टवर्षस्तु पुमान् यदा भवेत्तदान्यचेष्टो भवतीह मानवः ॥ ८ ॥ एकं शरीरं हि पृथक् निर्दिष्टं ब्रह्मवादिभिः ॥ अवस्थाभेदतश्चैवं तदेतत्कथितं त्रिधा ॥ ९ ॥ अन्तरं नाभ्रि चैतस्य यथा मृद्घटयोरिव ॥ कर्म्मकाण्डं चतुर्भेदं ब्राह्मणादिषु कीर्त्तितम् ॥ १० ॥ तत्र वेदोक्तकर्म्माणि त्रयः कुर्वन्ति नित्यशः ॥ निशुश्रूषामथैकस्तु एता वेदोदिताः क्रियाः ॥ ११ ॥ एतान्धर्म्मांस्तु विज्ञाय ब्राह्मणो यस्तपस्यति ॥ तस्य मुक्तिर्भवेन्नूनं वेदवादरतस्य च ॥ १२ ॥ सत्यतपा उवाच ॥ यत्तदेतत्परं ब्रह्म त्वया प्रोक्तं महामुने ॥ तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः ॥ अनाम गोत्र रहितममूर्त्तं मूर्तिवर्जितम् ॥ १३ ॥ कथं तज्ज्ञायते ब्रह्म संज्ञानामविवर्जितम् ॥ तत्तस्य संज्ञां कथय येन जानाम्यहं गुरो ॥ १४ ॥ यदेतत्परमं ब्रह्म वेदे शास्त्रेषु पठ्यते ॥ स वेदः पुण्डरीकाक्षः स्वयं नारायणो हरिः ॥ स यज्ञैर्विविधैरिष्टैर्दानैर्दत्तैश्च सत्तम ॥ १५ ॥

प्राप्यते परमो देवः स्वयं नारायणो हरः ॥ भगवन् बहुवित्तेन ऋत्विग्भिर्वेदपारगैः ॥ १६ ॥ प्राप्यते पुण्यकृद्भिर्हि देवो नारायणो भृशम् ॥ अधनेन कथं देवः प्राप्यते तद्वदस्व मे ॥ १७ ॥ वित्तेन च विना दानं दातुं विप्र न शक्यते ॥ विद्यमानेऽपि न मतिः कुटुम्बासक्त चेतसः ॥ १८ ॥ तस्य नारायणो दूरे सर्वथा प्रतिभाति मे ॥ अत्यायासेन लभ्येत येन देवः सनातनः ॥१९॥ तन्मे विशेषतो ब्रूहि सर्ववर्णैः कृतं भवेत् ॥ दुर्वासा उवाच ॥ कथयामि परं गुह्यं रहस्यं देवनिर्मितम् ॥२०॥धरण्या यत्कृतं पूर्वं मज्जन्त्या तु रसातले ॥ पृथिव्याः पार्थिवो भावः सलिलेनातिरेचितः ॥ २१ ॥ तस्यां सलिलमग्नायां पृथ्वी प्रायाद्रसातलम् ॥ सा भूतधारिणी देवी रसातलगता शुभा ॥ २२ ॥ आराधयामास विभुं देवं नारायणं प्रभुम् ॥ उपवासव्रतैर्देवि नियमैश्च पृथग्विधैः ॥२३॥ कालेन महता तस्याः प्रसन्नो गरुडध्वजः ॥ उज्जहार क्षितिं स्थित्यां स्थापयामास सोऽव्ययः ॥ २४ ॥ सत्यतपा उवाच ॥ कोऽसौ धरण्या सञ्चीर्ण उपवासो महाप्रभुने ॥ कानि व्रतानि च तथा एतन्मे वक्तुमर्हसि॥२५॥दुर्वासा उवाच ॥ यदा मार्गशिरे मासि दशम्यां नियतात्मवान् ॥ कृत्वा देवार्चनं धीमानग्निकार्यं यथाविधि ॥२६॥ शुचिवासाः प्रसन्नात्मा हव्यमग्नं सुसंस्कृतम् ॥ भुक्त्वा पञ्चपदं गत्वा पुनः शौचं तु पादयोः ॥ २७ ॥ कृत्वाष्टाङ्गुलमात्रं तु क्षीरवृक्षसमुद्भवम् ॥ भक्षयेद्दन्तकाष्ठं तु तत आचम्य यत्नतः ॥२८॥ स्पृष्ट्वा द्वादशपाणि सर्वाणि चिरं ध्यात्वा जनार्दनम् ॥ शङ्खचक्रगदापाणिं पीताम्बरधरं विभुम् ॥२९॥ प्रसन्नवदनं देवं सर्वलक्षणपूजितम् ॥ ध्यात्वा पुनर्जलं हस्ते गृह्य भावैर्जनार्दनम् ॥३० ॥ दद्याद्दर्भं च देवाय करतोयेन मानवः ॥ एवमुच्चारयन्वाचं तस्मिन्काले महाप्रभुने ॥ ३१ ॥ एकादश्यां निराहारः स्थित्वा चैवापरेऽहनि ॥ भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥३२॥ एवमुक्त्वा ततो रात्रौ देवदेवस्य सन्निधौ ॥ जपन्नारायणायेति स्वपेत्तत्र विधानतः॥३३॥ ततः प्रभाते विमले नदीं गत्वा समुद्रगाम् ॥ इतरां वा तडागं वा ॥३९॥ गृहे वा नियतात्मवान् ॥ ३४ ॥ आनीय मृत्तिकां शुद्धां मन्त्रेणानेन मानवः ॥ धारणं पोषणं त्वत्तो भूतानां देवि सर्वदा ॥ ३५ ॥ तेन सत्येन मे पापं यावन्मोक्ष्य सुव्रते ॥ ब्रह्माण्डोदरतीर्थानि त्वया पृष्टानि काश्यपि ॥ ३६ ॥ तेनेमां मृत्तिकां त्वत्तो गृह्य स्थास्येऽद्य मेदिनि ॥ त्वयि सर्वे रसा नित्याः स्थिता वरुण सर्वदा॥३७॥तैरिमां मृत्तिकां प्राप्य पूतां कुरु च मा चिरम् ॥ एवं मृदं तथा तोयं प्रगृह्यात्मानमालभेत् ॥३८॥

त्रिः कृत्वा शेषमुत्स्नाभिः सर्वाङ्गं लेपयेद्गुरुः ॥ वारुणेरेव मन्त्रैस्तु स्नानं कुर्याद्यथाविधि ॥३९॥ स्नात्वा चावश्यकं कृत्वा पुनर्देवगृहं व्रजेत् ॥ तत्राराध्य मया युक्तं देवं नारायणं प्रभुम् ॥४०॥ केशवाय नमः पादौ कटिं दामोदराय च ॥ ऊरुयुग्मं नृसिंहाय उरः श्रीवत्सधारिणे ॥४१॥ कण्ठं कौस्तुभधारायं वक्षः श्रीपतये तथा॥त्रैलोक्यविजयायेति बाहू सर्वात्मने शिरः॥४२॥ स्थाङ्गधारिणे चक्रं शंङ्करायेति वारिजम् ॥गम्भीरायेति च गदामम्भोजं शान्तिमूर्तये ॥४३॥ एवमभ्यर्च्य देवेशं देवं नारायणं प्रभुम् ॥ पुनस्तस्याग्रतः कुम्भांश्चतुरः स्थापयेद्गुरुः ॥ ४४ ॥ जलपूर्णांस्समाल्यांश्च तिलपूर्णैः सकाञ्चनैः॥चत्वारस्ते समुद्दिष्टास्तु कुशाः परिकीर्तिताः॥४५॥तेषां मध्ये शुभं पीठं स्थापयेद्ब्रह्मगर्भितम् ॥ सौवर्णं राजतं पात्रं ताम्रं वा दारवं तथा ॥ ४६ ॥ अलाभे सर्वपात्राणां पालाशं पत्रमिष्यते ॥ तोयपूर्णं तु तत्कृत्वा तस्मिन्पात्रे ततो न्यसेत् ॥ ४७॥ सौवर्णं मत्स्यरूपेण कृत्वा देवं जनार्दनम् ॥ सर्वावयवयुक्तं सर्वाभरणभूषितम् ॥ ४८ ॥ तत्रानेकविधैर्भक्ष्यैः फलैः पुष्पैश्च शोभितम् ॥ गन्धधूपैश्च वस्त्रैश्च ह्यर्चयित्वा यथाविधि ॥ ४९ ॥ रसातलगता वेदा यथा देव त्वया हृताः॥ मत्स्यरूपेण तद्वन्मां भवाम्बुद्धर केशव ॥ ५० ॥ एवमुच्चार्य तस्याग्रे जागरं तत्र कारयेत् ॥ यथाविभवसारेण प्रभाते विमले तथा॥५१॥ चतुर्णां ब्राह्मणानां च चतुरो दापयेद्वटान् ॥ पूर्वे तु बह्वृचे दद्याच्छन्दोगे दक्षिणं तथा ॥ ५२ ॥ यजुःशाखान्विते दद्यात्पश्चिमं घटयुग्मम् ॥ उत्तरं कामतो दद्यादेष एव विधिः स्मृतः ॥५३॥ ऋग्वेदः प्रीयतां पूर्वे सामवेदस्तु दक्षिणे ॥ यजुर्वेदः पश्चिमतो ह्यथर्वश्चोत्तरेण तु ॥५४॥ अनेन क्रमयोगेण प्रीयतामिति वाचयेत् ॥ सौवर्णं मत्स्यरूपं तु आचार्याय निवेदयेत्॥५५॥ गन्धधूपादिवस्त्रैश्च संपूज्य विविधक्रमात् ॥ यस्त्वमं सरहस्यं च मन्त्रं चैवोपपादयेत् ॥५६॥ विधानं तस्य वै दत्त्वा फलं कोटिगुणोत्तरम् ॥ प्रतिपद्य गुरुं यस्तु मोहाद्विप्रतिपद्यते ॥५७॥स कोटिजन्म नरके पच्यते पुरुषाधमः ॥ विधानस्य प्रदातारो गुरुरित्युच्यते बुधैः ॥५८॥ एवं दत्त्वा विधानेन द्वादश्यां विष्णुमर्च्य च॥विप्राणां भोजनं दद्याद्यथाशक्त्या सदक्षिणम् ॥५९॥ सतिलं ताम्रपात्रं च स्थापितं कलशोपरि ॥ तत्सर्वं जलपात्रस्थं ब्राह्मणाय कुटुम्बिने ॥६०॥ देवं दद्यान्महाभागस्ततो विप्रांश्च भोजयत्॥भूरिणा परमान्नेन ततः पश्चात्स्वयं नरः॥६१॥भुञ्जीत सहितो बालैर्गायतः संयतेन्द्रियः॥अनेन विधिना यस्तु धरणीव्रतकुञ्जरः॥६२

तस्य पुण्यफलं चाग्र्यं शृणु बुद्धिमतां वर ॥ यदि वक्त्रसहस्राणि भवन्ति मम सुव्रत॥६३॥आयुश्च ब्रह्मणस्तुल्यं भवेद्यदि महाव्रत ॥ तदानीमस्य धर्मस्य फलं कथयितुं भवेत् ॥ ६४ ॥ तथाप्युद्देशतो ब्रह्मन्कथयिष्यामि तच्छृणु ॥ दशसप्तदशाब्दे च अष्टौ चत्वार एव च ॥६५॥ लक्षायुतानि चत्वारि एकस्यास्य चतुर्युगम्॥ तेरेकसप्ततियुगं भवेन्मन्वन्तरं मुने ॥६६॥चतुर्दशाहोरात्रस्तु तावती रात्रिरिष्यते॥एवं त्रिंशद्दिनो मासस्ते द्वादश समाः स्मृताः ॥ ६७ ॥ तेषां शतं ब्रह्मणस्तु आयुर्नास्त्यत्र संशयः ॥ यः सकृद्वादशीमेतामनेन विधिना क्षिपेत् ॥ ६८ ॥ स ब्रह्मलोकमाप्नोति तावत्कालं च तिष्ठति ॥ ततो ब्रह्मोपसंहारः संहारे तद्भयोऽचिरम् ॥ ६९ ॥ पुनः सृष्टौ भवेद्देवो राजा नाम महातपाः ॥ ब्रह्महत्यादिपापानि इहलोककृतान्यपि ॥ ७० ॥ अकामः कामतो वापि तानि नश्यन्ति तत्क्षणात् ॥ इह लोके दरिद्रो यो भ्रष्टराज्योऽथवा नृपः ॥ ७१ ॥ उपोष्य तां विधानेन स राजा जायते ध्रुवम् ॥ वन्ध्या नारी भवेद्या तु अनेन विधिना शुभा ॥ ७२ ॥ उपोष्यति भवेत्तस्याः पुत्रः परमधार्मिकः ॥ अगम्यागमनं येन कृतं जानाति मानदः ॥ ७३ ॥ स इमं विधिमास्थाय तस्मात्पापाद्विमुच्यते ॥ ब्रह्मक्रियाया लोपेन बहुवर्षकृतेन च ॥ ७४ ॥ उपोष्येमां सकृद्भक्त्या वेदसंस्कारमाप्नुयात् ॥ किमत्र बहुनोक्तेन न तदस्ति महाद्युते ॥ ७५ ॥ अप्राप्यं प्रापयति या अतः कार्या सदा नरैः ॥ अनेन विधिना ब्रह्मन्स्वयमेव ह्युपोषिता ॥ ७६ ॥ धरण्या मम्रया तात नात्र कार्या विचारणा ॥ अदीक्षिताय नो देयं विधानं नास्तिकाय च ॥ ७७ ॥ देवब्रह्मद्विषे वापि न श्राव्यं तु कदाचन ॥ गुरुभक्ताय दातव्यं सद्यः पापप्रणाशनम्॥७८॥ इह जन्मनि सौभाग्यं धनं धान्यं वराः स्त्रियः ॥ भवन्ति विविधास्तस्य य उपोष्यति मानवः ॥ ७९ ॥ य इमं श्रावयेद्भक्त्या द्वादशीकल्पमुत्तमम् ॥ शृणोति वा स पापैस्तु सर्वैरेव प्रमुच्यते ॥ ८० ॥ इति श्रीवराहपुराणे धरणीव्रते मत्स्यद्वादशीव्रतं नाम ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥ अथ कूर्मद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ तथैव पौषमासे तु अमृतं मथितं सुरैः ॥ तत्र कूर्मो भवेद्देवः स्वयमेव जनार्दनः ॥१॥ तस्येयं तिथिरुद्दिष्टा महती कूर्मरूपिणः ॥ पौषमासस्य या शुक्ला दशमीति निगद्यते ॥ २ ॥ तस्यां प्रागेव संकल्प्य प्राग्वत्स्नानादिकाः क्रियाः ॥ निर्वर्त्यारोधयेद्भक्त्या एकादश्यां जनार्दनम् ॥ पृथङ्मन्त्रैर्मुनिश्रेष्ठ देवदेवं जनार्दनम् ॥ ३ ॥ कूर्माय पादौ प्रथमं प्रपूज्य

॥४०॥

नारायणायेति हरेः कटिं च ॥ सङ्कर्षणायेत्युदरं विशोकेत्युरोभवायेति तथैव कण्ठम् ॥ ४ ॥ सुवाहवे चैव भुजौ शिरश्च नमो विशालाय नमोऽस्तु देवः ॥ स्वनामभिर्मन्त्रेण सुगन्धपुष्पैर्धूपादिनैवेद्यफलैर्वरैश्चैः ॥ ५ ॥ अभ्यर्च्य देवं कलशं तदग्रे संस्थाप्य मालासितवस्त्रयुक्तम् ॥ तं रत्नगर्भं तु पुरेव कृत्वा स्वशक्तितो हेममयं च देवम् ॥ ६ ॥ समुद्धरं कूर्मरूपेण कृत्वा संस्थाप्य ताम्रे घृतपूर्णेपात्रे ॥ पूर्णे घटस्योपरि सन्निवेश्य तद्ब्राह्मणं पूज्य तथैव दद्यात् ॥ ७ ॥ इमो ब्राह्मणान्पूज्याहं दक्षिणादिभिर्यथाशक्त्या प्रीणये देवदेवम् ॥ नारायणं कूर्मरूपेण युक्तं पश्चात्तु भुञ्जीत सभृत्यवर्गः ॥८॥ एवं कृते विप्र समस्तपापं विनश्यते नात्र कुर्याद्विचारः ॥ संसारचक्रं स विहाय शुद्धं प्राप्नोति लोकं च हरेः पुराणम्॥९॥प्रयांति पापानि विनाशमाशु श्रीमांस्तथा जायते सत्यधर्मः॥अनेकजन्मान्तरसञ्चितानि नश्यन्ति पापानि नरस्य भक्त्या ॥ १०॥ प्रागुक्तरूपं तु फलं लभेत नारायणस्तुष्टिमायाति सद्यः॥ ११॥इति श्रीवराहपुराणे धरणीव्रते कूर्मद्वादशीव्रतं नाम चत्वारिंशोऽध्यायः ॥४०॥ अथ वराहद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ एवं माघे सिते पक्षे द्वादशी धरणीभृतः ॥ वराहस्य शृणुष्वाद्यां मुने परमधार्मिक ॥ १॥ प्रागुक्तेन विधानेन सङ्कल्पस्थानमेव च॥कृत्वा देवं समभ्यर्च्य एकादश्यां विचक्षणः ॥२॥धूपनैवेद्यगन्धैश्च अर्चयित्वाच्युतं नरः॥पश्चात्तस्याग्रतः कुम्भं जलपूर्णं तु विन्यसेत् ॥ ३ ॥ वराहायेति पादौ तु माधवायेति वै कटिम् ॥ क्षेत्रज्ञायेति जठरं विश्वरूपायेत्युरो हरेः॥४॥सर्वज्ञायेति कण्ठं तु प्रजानां पतये शिरः॥प्रद्युम्नायेति च भुजौ दिव्याब्जाय सुदर्शनम् ॥५॥अमृतोद्भवाय शंखं तु एष देवार्चने विधिः॥एवमभ्यर्च्य मेधावी तस्मिन्कुंभे तु विन्यसेत् ॥६॥ सौवर्णं रौप्यताम्रे वा पात्रे भिन्नशक्तितः ॥ सर्ववित्तैस्तु सम्पूर्णं स्थापयित्वा विचक्षणः ॥७ ॥ तत्र शक्त्या तु सौवर्णं वराहं कारयेद्बुधः॥वृंद्राग्रेणोद्धृतां भूमिं सपर्वतवनद्रुमाम् ॥८॥माधवं मधुहन्तारं वाराहं रूपमास्थितम्॥सर्वबीजभृतं पात्रं रत्नगर्भं घटोपरि॥९॥ स्थापयेत्परमं देवं जातरूपमयं हरिम् ॥ सितवस्त्रयुगाच्छन्नं ताम्रपात्रे तु वै मुने ॥१०॥ स्थाप्यार्चयेद्गन्धपुष्पैर्नैवेद्यैर्विविधैः शुभैः ॥ पुष्पमण्डलिकां कृत्वा जागरं तत्र कारयेत् ॥११॥ प्रादुर्भावाद्धरेस्तत्र वाचयेद्वा वयेद्बुधः॥ एवं पूजां विधायाथ प्रभाते उदिते रवौ॥१२॥ शुचिः स्नात्वा हरिं पूज्य ब्राह्मणाय निवेदयेत्॥वेदवेदाङ्गविदुषे साधुवृत्ताय धीमते॥१३॥ विष्णुभक्ताय शान्ताय श्रोत्रियाय कुटुम्बिने ॥ एवं सकुम्भंतं दत्त्वा

हरिं वाराहरूपिणम्॥ १४॥ दत्त्वा चाथ लभेद्यत्तु फलं तन्मे निशामय ॥ इह जन्मनि सौभाग्यं श्रीः कान्तिस्तुष्टिरेव च॥ १५॥ दरिद्रो वित्तवान्तस्य अपुत्रो लभते सुतम् ॥ अलक्ष्मीर्नश्यते सद्यो लक्ष्मीः संविशते बलात् ॥ १६॥ इह जन्मनि सौभाग्यं परलोके निशामय ॥ अस्मिन्नर्थे पुरा वृत्तमितिहासं पुरातनम् ॥ १७॥ प्रतिष्ठानेऽभवद्राजा वीरधन्वेति विश्रुतः ॥ स कदाचिद्वनं प्रायान्मृगहेतोः परन्तपः ॥ १८ ॥ व्यापादयन्मृग गणान्तत्रर्षिर्वनमध्यगः ॥ जघान मृगरूपान्तोऽज्ञानतो ब्राह्मणान्नृपः ॥ १९ ॥ भ्रातरस्तत्र पञ्चाशन्मृगरूपेण संस्थिताः॥ संवत्तेस्य सुता ब्रह्मन् वेदाध्ययनतत्पराः ॥ २० ॥ सत्यतपा उवाच ॥ कारणं किं समाश्रित्य ते चक्रुर्मृगरूपताम् ॥ एतन्मे कौतुकं ब्रह्मन्प्रणतस्य प्रसीद मे ॥ २१ ॥ दुर्वासा उवाच ॥ ते कदाचिद्वनं याता दृष्ट्वा हरिणपोतकान् ॥ जातमात्रान्स्वमात्रा तु विहीनान्नृपसत्तम ॥ २२ ॥ एकैकं जगृहुस्ते हि ते सृताः कन्दरास्थिताः ॥ ततस्ते दुःखिताः सर्वे ययुः पितरमन्तिकम् ॥ २३ ॥ ऊचुश्च वचनं चेदं मृगहिंसानृते मुने ॥ ऋषिपुत्रा ऊचुः ॥ जातमात्रा मृगाः पञ्च अस्माभिर्निहता मुने ॥ २४ ॥ अकामतस्ततोऽस्माकं प्रायश्चित्तं विधीयताम् ॥ संवर्त उवाच ॥ मत्पिता हिंसकश्चासीद्दंष्ट तस्माद्विशेषतः॥ २५॥ भवन्तः पापकर्माणः सञ्जाता मम पुत्रकाः॥ इदानीं मृगचर्माणि परिधाय यतव्रताः॥ २६ ॥ चरध्वं पञ्च वर्षाणि ततः शुद्धा भविष्यथ ॥ एवमुक्तास्तु ते पुत्रा मृगचर्मोपवीतिनः ॥ २७ ॥ वनं विविशुरत्यर्थ्या जपन्तो ब्रह्म शाश्वतम् ॥ तथा वर्षे व्यतिक्रान्ते वीरधन्वा महीपतिः ॥ २८॥ तत्राजगाम यत्रैसस्ते चरन्ति मृगरूपिणः ॥ ते चाप्येकतरोर्मूले मृगचर्मोपवीतिनः ॥ २९ ॥ जपन्तः संस्थिता स्ते हि राज्ञा दृष्टा मृगा इति ॥ मत्वा विद्धास्तु युगपन्मृतास्ते ब्रह्मवादिनः ॥ ३० ॥ तान्दृष्ट्वा तु मृतान् राजा ब्राह्मणान्तसंशितव्रतान् ॥ भयेन वेपमानस्तु देवराताश्रमं ययौ ॥ ३१॥ तत्रापृच्छद्भ्रह्महत्या मम जाता महामुने ॥ आमूलोत्तद्वधं वृत्तं कथयित्वा नराधिपः ॥ ३२ ॥ भृशं शोकपरीतात्मा रुरोदातीव दुःखितः ॥ स ऋषिर्दैवरातस्तु रुदन्तं नृपसत्तमम् ॥ ३३॥ उवाच मा भैर्नृपते अपनेष्यामि पातकम् ॥ पाताळे सुतळाख्ये च यथा धात्री निमज्जती ॥ ३४॥ उद्धता देवदेवेन विष्णुना क्रोडमूर्त्तिना ॥ तस्माद्वन्तं राजेन्द्र ब्रह्मवध्यापरिप्लुतम् ॥ ३५ ॥ उद्धरिष्यति देवोऽसौ स्वयमेव जनार्दनः ॥ एवमुक्तस्ततो राजा हर्षितो वाक्यमब्रवीत् ॥ ३६॥ कतरेण प्रकारेण स मे देवः प्रसीदति ॥ प्रतत्रे

॥४१॥

चाशुभं सर्वं येन नश्यति सत्तम ॥ ३७॥ दुर्वासा उवाच ॥ एवमुक्तो मुनिस्तेन देवराज इदं व्रतम् ॥ आचख्यौ सोऽपि तत्कृत्वा भुक्त्वा भोगान् सुपुष्कलान् ॥ ३८॥ मृत्युकाले मुनिश्रेष्ठ सोत्तमेन विराजता ॥ विमानेनागमत्स्वर्गमिन्द्रलोकं स पार्थिवः ॥ ३९॥ तस्येन्द्रस्त्वर्चमादाय प्रत्युत्थानेन निर्ययौ ॥ आयान्तमिंद्रं दृष्ट्वा तु तमूचुर्विष्णुकिंकराः ॥ ४० ॥ न द्रष्टव्यो देवराजस्त्वं हीनस्तपसा इति ॥ एवं सर्वे लोकपाला निर्ययुस्तस्य तेजसा ॥ ४१॥ प्रत्याख्याताश्च तैर्विष्णुकिंकरैर्हीनकर्मणः ॥ एवं स सत्यलोकान्तं गतो राजा महामुने ॥ ४२॥ अपुनर्मारके लोके दाहप्रलयवर्जिते ॥ अद्यापि तिष्ठते देवैः स्तूयमानो महानृपः ॥ ४३ ॥ प्रस्तुत्ये यत्नपुरुषे किं चित्रं येन तद्भवेत् ॥ इह जन्मनि सौभाग्यमायुरारोग्यसम्पदः॥ ४४॥एकैका विधिनोपास्ता ददात्यमृतमुत्तमम् ॥ किं पुनः सर्वसंपूर्णैः स दादाति स्वकं पदम् ॥ ४५॥नारायणश्चतुर्मूर्त्तिः पराद्धेचश्च न संशयः ॥ यथैवोद्धृतवान्वेदान्मत्स्यरूपेण केशवः ॥ ४६॥ श्रीराम्बुधौ मथ्यमाने मन्दरं धृतवान् प्रभुः ॥ तद्वच्च कूर्मरूपी स्याद्वितीयां पश्य वैष्णवीम् ॥ ४७॥ यथा रसातलात्क्ष्मांच धृतवान्पुरुषोत्तमः ॥ वराहरूपी तद्वच्च तृतीयां पश्य वैष्णवीम् ॥ ४८ ॥ इति श्रीवराह पुराणे धरणीव्रते वराहद्वादशीव्रतं नाम एकचत्वारिंशोऽध्यायः ॥ ४१ ॥ अथ नरसिंहद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ तद्व्रतकालगुणमासे तु या शुक्लैकादशी भवेत् ॥ तामुपोष्य विधानेन हरिमाराधयेत्सुधीः ॥ १॥ नरसिंहाय पादौ तु गोविन्दायेत्युरू तथा ॥ कटिं विश्वधृते पूज्य अनिरुद्धेत्युरस्तथा॥ २॥कण्ठं तु शितिकण्ठाय पिङ्गकेशाय वै शिरः॥अपुरुषंसनायेति चक्रं तोयात्मने तथा॥ ३॥शंखात्मेत्येव सम्पूज्य गंधपुष्पफलैस्तथा ॥ तदग्रे घटमादाय सितवस्त्रयुगान्वितम् ॥४॥ तस्योपरि नृसिंहं तु सौवर्णं ताम्रभाजने॥यथाविभवतः कृत्वा दारुवंशमयेऽपि वा॥५ ॥ रत्नगर्भे घटे स्थाप्य तं सम्पूज्य च मानवः॥ द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत् ॥६॥एवंकृते फलं प्राप्तं यत्पुरा पार्थिवेन तु ॥तस्याहं सम्प्रवक्ष्यामि वत्सनामा महामुने॥ ७॥ आसीत् किम्पुरुषे वर्षे राजा परमधार्मिकः॥भारतेति च विख्यातस्तस्य वत्सः सुतोऽभवत्॥ ८॥स शत्रुभिर्जितः संख्ये हृतकोशो द्विपादवान्॥वनं प्रायात्तपत्नीको वसिष्ठस्याश्रमेऽवसत् ॥९॥कालेन महता सोऽथ वसिष्ठेन महात्मना॥किं कार्यमिति स प्रोक्तो वसस्यस्मिन्महाश्रमे ॥ १० ॥ राजोवाच ॥ भगवन्हृतकोशोऽहं हृतराज्योऽवशायवान् ॥ शत्रुभिर्हृतसर्वस्वो भवन्तं शरणं गतः ॥ ११ ॥

उपदेशमदानेन प्रसादं कर्तुमर्हसि ॥ दुर्वासा उवाच ॥ एवमुक्तो वसिष्ठस्तु तस्येमां द्वादशीं मुने ॥ १२ ॥ आदिदेश विधानेन सोऽपि सर्वमथाकरोत् ॥ तस्य व्रतान्ते भगवान्नरसिंहस्तुतोष ह ॥ १३ ॥ चक्रं प्रादाच्च शत्रूणां विध्वंसनकरं मृधे ॥ तेनास्त्रेण स्वकं राज्यं जितवान्स नृपोत्तमः ॥ १४ ॥ राज्ये स्थित्वाश्वमेधानां सहस्रमकरोत्प्रभुः ॥ अन्ते च विष्णुलोकाख्यं पदमागाच्च सत्तमः ॥ १५ ॥ एषा धन्या पापहरा द्वादशी भवता मुने ॥ कथितां तां प्रसन्नेन श्रुत्वा कुरु यथेप्सितम् ॥ १६ ॥ इति श्रीवराहपुराणे धरणीव्रते नरसिंहद्वादशीव्रतं नाम द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥ अथ वामनद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ एवमेव मुने माघि चैत्रे सङ्कल्प्य द्वादशीम् ॥ उपोष्याराधयेद्भक्त्या देवदेवं जनार्दनम् ॥ १ ॥ वामनायेति पादौ तु विष्णवे कटिमर्चयेत् ॥ वासुदेवाय जठरमुरः संकर्षणाय च ॥ २ ॥ कण्ठं विश्वभृते पूज्य शिरो वै व्योमरूपिणे ॥ बाहू विश्वजिते पूज्यौ स्वनाम्ना शंखचक्रकौ ॥ ३ ॥ अनेन विधिनाभ्यर्च्य देवदेवं सनातनम् ॥ प्राग्द्रव्नोदकं कुम्भं सम्पूतं पुरतो न्यसेत् ॥ ४ ॥ प्राग्वत्कपोत्रे संस्थाप्य कांचनं वामनं बुधः ॥ यथाशक्त्या कृतं सर्वं सितयज्ञोपवीतिनम् ॥५॥ कुण्डिकां स्थापयेत्पार्श्वे छत्रिकां पादुकें तथा ॥ अक्षमालां च संस्थाप्य वृसिकां च विशेषतः ॥ ६॥ एतैरुपस्करैर्युक्तं प्रभाते ब्राह्मणाय च ॥ दापयेत्प्रीयतां विष्णुर्हरस्वरूपीत्युदीरयेत् ॥ ७ ॥ मासनाम्ना तु संयुक्तं प्राहुर्भोवाभिधानकम् ॥ प्रीयतामिति सर्वत्र विधिरेष प्रकीर्तितः ॥८॥ श्रूयते च पुराजा हर्यश्वः पृथिवीपतिः ॥ अपुत्रः स तपस्तेपे पुत्रमिच्छंस्तपोधनः ॥ ९ ॥ तस्यैवं कुर्वतस्तिष्टि पुत्रार्थे मुनिसत्तम ॥ आजगाम हरिर्देवो द्विजरूपं समाश्रितः ॥ १० ॥ स उवाच नृपं राजन् किं ते व्यवसितं त्विति ॥ पुत्रार्थमिति सोवाच तं विप्रः प्रत्युवाच ह ॥ ११ ॥ इदमेव विधानं तु कुरु राजन्प्रयत्नतः ॥ एवमुक्त्वा तु राजानं क्षणादन्तर्हितः प्रभुः ॥ १२ ॥ राजापि तं चकाराशु मन्त्रवित्तं द्विजातये ॥ दीक्षाय तथा प्रादाद्राज्यीतिगेभ्यं धीमते ॥ १३ ॥ यथाऽदितेरपुत्रायाः स्वयं पुत्रत्वमागतः ॥ भगवंस्तेन सत्येन ममाप्यस्तु सुतो वरः ॥१४॥ अनेन विधिनोक्तेन तस्य पुत्रोऽभवन्मुने ॥ उग्राश्व इति विख्यातश्चक्रवर्ती महाबलैः ॥१५॥ अपुत्रो लभते पुत्रं धनार्थी लभते धनम् ॥ अष्टराज्यो लभेद्राज्यं मृतो विष्णुपुरं व्रजेत् ॥ १६ ॥ क्रीडित्वा सुचिरं तत्र इह मर्त्येमुपागतः ॥ चक्रवर्ती भवेद्धीमान्यथातिरिव नाहुषः ॥ १७ ॥ इति

श्रीवराहपुराणे धरणित्रते वामनद्वादशीव्रतं नाम त्रयश्चत्वारिंशोऽध्यायः ॥ ४३ ॥ अथ जामदग्न्यद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ वेश खेऽप्येवमेवं तु संङ्कल्प्य विधिना नरः॥ तद्वन्नानं मृदा कृत्वा ततो देवालयं व्रजेत् ॥ १ ॥ तत्राराध्य हरिं भक्त्या एभिर्मन्त्रैर्विचक्षणः ॥ जामदग्न्याय पादौ तु चोदरं सर्वधारिणे ॥ २ ॥ मधुसूदनायेति कटिमूरू श्रीवत्सधारिणे ॥ क्षरान्तकायेति भुजौ शितिकण्ठाय कूर्चकम् ॥ ३ ॥ स्वनाम्ना शङ्खचक्रौ तु शिरो ब्रह्माण्डधारिणे ॥ एवमभ्यर्च्य मेघावी प्राग्वत्तस्यात्रतो घटम् ॥४ ॥ विन्यसेत्तस्थापितं तद्वद्व्रयुग्मं विशेषतः ॥ वैणवेन तु पात्रेण तस्मिंस्तु स्थापयेद्धरिम् ॥ ५॥ जामदग्न्येन रूपेण कृत्वा सौवर्णमव्रतः ॥ दक्षिणे परशुं हस्ते तस्य देवस्य कारयेत् ॥६॥ अर्घदानन्तु सम्पूज्य पुष्पैर्नानाविधैस्तथा ॥ ततस्तस्याग्रतः कृत्वा जागरं भक्तिभावितः ॥ ७ ॥ प्रभाते विमले सूर्ये ब्राह्मणाय निवेदयेत् ॥ एवं नियमयुक्तस्य तत्फलं तु निबोध मे ॥ ८ ॥ आसीद्राजा महाभागो वीरसेनो महाबलः ॥ अपुत्रः स पुरा तीव्रं तपस्तेपे महामनाः ॥९ ॥ चरतस्तु तपो घोरं याज्ञवल्क्यो महामुनिः ॥ आजगाम महायोगी तं द्रष्टुं नातिदूरतः ॥ १० ॥ तमायान्तमथो दृष्ट्वा ऋषिं परमवर्चसम् ॥ कृताञ्जलिपुटो भूत्वा राजाभ्युत्थानमाकरोत् ॥ ११ ॥ स पूजितो मुनिः प्राह किमर्थं क्रियते तपः ॥ राजन्कथय धर्मज्ञ किं कार्यं ते विवक्षितम् ॥ १२ ॥ राजोवाच ॥ अपुत्रोऽहं महाभाग नास्ति मे पुत्रसन्ततिः ॥ तेनेदं तप आस्थाय क्षपिष्ये स्वतनुं द्विज ॥ १३ ॥ याज्ञवल्क्य उवाच ॥ अलं ते तपसानेन महाक्लेशेन पार्थिव ॥ अल्पायासेन ते पुत्रो भविष्यति न संशयः ॥ १४ ॥ राजोवाच ॥ कथं मे भविता पुत्रः स्वल्पायासेन वै द्विज ॥ एतन्मे कथय प्रत्रिया भगवन्प्रणतस्य वै ॥ १५ ॥ दुर्वासा उवाच ॥ एवमुक्तो मुनिस्तेन पार्थिवेन यशस्विना ॥ आचख्यौ द्वादशीं चेमां वैशाखे सितपक्षजाम् ॥ १६ ॥ स हि राजा विधानेन पुत्रकामो विशेषतः ॥ उपोष्य लब्धवान्पुत्रं नलं परमधार्मिकम् ॥ १७ ॥ योऽद्यापि कीर्त्यते लोके पुण्यश्लोको नरोत्तमः ॥ प्राप्तोङ्गिकं फलं ह्येतद्व्रतस्यास्य महामुने ॥ १८ ॥ सुपुत्रो जायते तस्य विद्या श्रीः कान्तिरुत्तमा ॥ इह जन्मनि किं चित्रं परलोके शृणुष्व मे ॥ १९ ॥ कल्पमेकं ब्रह्मलोके उषित्वाप्सरसां गणैः ॥ क्रीडन्ति ते पुनः सृष्टौ जायन्ते चक्रवर्तिनः॥ २० ॥ त्रिंशत्कल्पसहस्राणि जीवन्ते नात्र संशयः॥२१ ॥ इति श्रीवराहपुराणे द्वादशीमाहात्म्ये जामदग्न्यद्वादशी

व्रतं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ अथ श्रीरामद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ ज्येष्ठमासेऽप्येवमेव सङ्कल्प्य विधिना नरः ॥
अर्चयेत्परमं देवं पुष्पैर्नानाविधैः शुभैः ॥ १॥ नमो रामाभिरामाय पादौ पूर्वं समर्चयेत् ॥ त्रिविक्रमायेति कटिं भूतविश्राय चोदरम् ॥ २ ॥
उरः संवत्सरायेति कण्ठं संवर्त्तकाय च ॥ सर्वास्त्रधारिणे बाहू स्वनाम्नाऽजरथाङ्गकैः ॥ ३ ॥ सहस्रशिरसेऽभ्यर्च्य शिरस्तस्य महात्मनः ॥
एवमभ्यर्च्य विधिवत्प्राग्वत्कुम्भं तु विन्यसेत् ॥ ४ ॥ प्राग्वद्व्रतेन संछन्नं सौवर्णं रामलक्ष्मणौ ॥ अर्चयित्वा विधानेन प्रभाते ब्राह्मणाय
तौ ॥ ५ ॥ दातव्यौ मनसा काममहिता पुरुषेण तु ॥ अपुत्रेण पुरा पृष्टो राज्ञा दशरथेन च ॥ ६ ॥ पुत्रकामपरः पश्चाद्व्रतमिदं चरेत् ॥
परमार्द्धितः ॥ इदमेव विधानं तु कथयामास स द्विजः ॥ ७ ॥ प्राप्तवरस्यं विदित्वा तु स राजा कृतवानिदम् ॥ तस्य
पुत्रः स्वयं जज्ञे रामनामा महाबली ॥ ८ ॥ चतुर्द्धा सोऽभ्ययो विष्णुः परितुष्टो महामुने ॥ एतदैहिकमाख्यानं पारत्रिकमथो शृणु ॥ ९ ॥
तावद्भोगान्भुञ्जते स्वर्गलोके यावदिन्द्रो देवसङ्घाश्च सर्वे ॥ अतीतकाले पुनरेत्य मर्त्ये भवेत्स राजा शतयज्ञयाजी ॥ १० ॥ निष्काम एवं व्रत
मस्य कृत्वा नश्यन्ति पापानि च तस्य पुंसः ॥ प्राप्नोति निर्वाणमलं च (?) शाश्वतम् ॥११॥ इति श्रीवराहपुराणे श्रीरामद्वादशीव्रतं नाम पंचच
त्वारिंशोऽध्यायः ॥ ४५ ॥ अथ श्रीकृष्णद्वादशी व्रतम् ॥ दुर्वासा उवाच ॥ आषाढेऽप्येवमेव स्यात्सङ्कल्प्य विधिना नरः ॥ चक्रपाणयेति
भुजौ कण्ठं भूपतये तथा ॥ १ ॥ स्वनाम्ना शङ्खचक्रौ तु पुरुषायेति वै शिरः ॥ एवमभ्यर्च्य मेधावी प्राग्वत्तस्यामतो घटम् ॥ २ ॥ विन्यस्य
वस्त्रसंयुक्तं तस्योपरि ततो न्यसेत् ॥ काञ्चनं वासुदेवं तु चतुर्व्यूहं सनातनम्॥ ३ ॥ तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात् ॥ प्राग्वत्तं
ब्राह्मणे दद्याद्भेदवादरते तथा ॥ ४ ॥ एवं नियमयुक्तस्य यत्पुण्यं तच्छृणुष्व मे ॥ वसुदेवोऽभवच्छ्रेष्ठो यदुवंशाविवर्द्धनः ॥ ५ ॥ देवकी तस्य
भार्या तु समानव्रतधारिणी ॥ सा त्वपुत्राभवत्साध्वी पतिधर्मपरायणा ॥ ६ ॥ तस्य कालेन महता नारदोऽभ्यगमद्गृहम् ॥ पूजितो वसुदेवेन ॥४३॥
भक्त्यासौ वाक्यमब्रवीत् ॥ ७ ॥ वसुदेव शृणुष्वेदं देवकार्यं ममानघ ॥ श्रुत्वैतां च कथां शीघ्रमागतोऽस्मि तवान्तिकम् ॥ ८ ॥ पृथिवी देव
सामितिं मया दृष्टा यदुत्तम ॥ गत्वा च जलपतीं भारं न शक्ता ऊहितुं सुराः ॥ ९ ॥ पीडयन्ति समेता मां तान् हनिष्यं सुरोत्तमाः ॥ एवमुक्ताः

पृथिव्या ते देवा नारायणं गताः ॥ मनसा ध्यातमात्रः स देवैः प्रत्यक्षतां ययौ ॥१०॥ उवाच स सुरश्रेष्ठः स्वयं कार्यामिदं सुराः ॥ साधयामि न सन्देहो मर्त्यैङ्गत्वा मनुष्यवत् ॥ ११ ॥ किन्त्वापाढे शुक्लपक्षे या नारी सह भर्तृणा ॥ उपोष्यति मनुष्येषु तस्या गर्भं भवाम्यहम् ॥ १२ ॥ एवमुक्ता गता देवाः स्वयं चाहमिहागतः ॥ उपदिष्टं तु भवतः अपुत्रस्य विशेषतः ॥ १३॥ एतां च द्वादशीं कृत्वा वसुदेवो महायशाः ॥ पुत्रं लेभे स कृष्णाख्यं महतीं च श्रियं तथा॥१४॥भुक्त्वा प्राज्यश्रिय सोऽथ गतिं परमिकां ययौ ॥ एष ते विधिरुद्दिष्ट आषाढे मासि वै मुने ॥१५॥ इति श्रीवराहपुराणे श्रीकृष्णद्वादशीव्रतं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ अथ बुद्धद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ श्रावणे मासि शुक्लायामेकादश्यां चरेद्व्रतम् ॥ अर्चयेत्पूर्वविधिना गन्धपुष्पैर्जनार्दनम् ॥ १ ॥ दामोदराय पादौ तु हृषीकेशाय वै कटिम् ॥ सनाभ नेति जठरमुरः श्रीवत्सधारिणे ॥ २ ॥ चक्रपाणयेति भुजौ कण्ठं च हरये तथ ॥ मुञ्जकेशायेति शिरो भद्राय च शिखां तथा ॥ ३ ॥ एवं सम्पूज्य संस्थाप्य कुम्भं पूर्ववदेव तु ॥ संवेष्टच वस्त्रयुग्मेन तस्योपरि ततो न्यसेत् ॥ ४ ॥ काञ्चनं देवदेवं तु दामोदरसनामकम् ॥ तमभ्यर्च्य विधानेन गन्धपुष्पादिभिः क्रमात् ॥ ५ ॥ प्राग्वत्तं ब्राह्मणे दद्याद्देवदेवाङ्गपारगे ॥ एवं नियमयुक्तस्य प्रभावं तच्छृणुष्व मे ॥ ६ ॥ एष वै विधिरुद्दिष्टः श्रावणे मासि वै मुने ॥ यत्तस्याश्च प्रभावं तच्छृणु पापप्रणाशनम् ॥ ७ ॥ पुरा कृतयुगे राजा नृगो नाम महाबलः ॥ बभ्रामस वनं घोरं मृगयातत्तमानसः ॥ ८ ॥ स कदाचित्तुरङ्गेण गतो दूरं महद्वनम् ॥ व्याघ्रसिंहगजाकीर्णं दस्युसर्पनिषेवितम् ॥ ९ ॥ एकाकी तत्र राजा तु अश्वं मुच्य तरोरधः ॥ स्वयं कुशमथास्तीर्य सुतो दुःखसमन्वितः ॥ १० ॥ तावत्तत्रैव लुब्धानां सहस्राणि चतुर्दश ॥ आगतानि मृगान्हन्तुं रात्रौ राज्ञः समन्ततः ॥ ११ ॥ तत्रापश्यन् ततः सुप्तं हेमरत्नविभूषितम् ॥ नृगं राजानमत्युग्रं श्रिया परमया युतम् ॥ १२ ॥ ते गत्वा त्वरितं व्याधाः स्वभर्त्रे तं न्यवेदयन् ॥ सोऽपि रत्नसुवर्णार्थं राजानं हन्तुमुद्यतः ॥ १३ ॥ तुरगस्य च हेतोस्तु निस्त्रिंशान्वनचारिणः ॥ राजानं सुप्तमासाद्य निगृह्णीतुं प्रचक्रमुः ॥१४॥ तावद्राज्ञः शरीरात्तु श्वेताभरणभूषिता ॥ नारी काचित्समुत्तस्थौ स्रक्चन्दनविभूषिता ॥१५॥ उत्थाय चक्रमादाय ते म्लेच्छा विनिपातिताः ॥ दस्यून्निहत्य सा देवी तस्य राज्ञस्तनुं पुनः ॥ १६ ॥ प्राविशन्त्याशु राजापि प्रतिबुद्धः प्रदि

ष्टवान् ॥ म्लेच्छांस्तु निहतान्दृष्ट्वा तां स्वमूर्त्तौ लयङ्गताम् ॥ १७ ॥ अश्वमारुह्य स पुनर्वामदेवाश्रमं ययौ ॥ तत्रापृच्छद्दृषिं भक्त्या का स्त्री के ते निपातिताः ॥ १८ ॥ एतत्कार्यमृषे मह्यं प्रसादं कथयस्व मे ॥ वामदेव उवाच ॥ त्वमासीच्छूद्रजातीयः अन्यजन्मनि पार्थिव ॥ १९ ॥ तत्र त्वया ब्राह्मणेभ्यः श्रुता चेयं कृता पुरा ॥ श्रावणस्य तु मासस्य शुक्लपक्षेषु द्वादशीं ॥ २० ॥ सा विधानात्त्वया राजन्भक्त्या च समुपोषिता ॥ उपोषितायां तस्यां तु राज्यं लब्धं त्वयाऽनघ ॥ २१ ॥ सर्वापत्सु च सा देवी भवन्तं परिरक्षति ॥ यया विनिहताः क्रूरा म्लेच्छाः पापसमन्विताः ॥ २२ ॥ भवांश्च रक्षितो राजन् श्रावणद्वादशीति सा ॥ एकैव पाति चापत्सु राज्यमेकैव यच्छति ॥ २३ ॥ किं पुनर्द्वादशैतास्तु याभ्य ऐन्द्रं च गच्छति ॥ २४ ॥ इति श्रीवराहपुराणे धरणीव्रते बुद्धद्वादशीव्रतं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ अथ कल्किद्वादशीव्रतम् ॥ दुर्वासा उवाच ॥ तद्भद्राद्रपदस्यापि या शुक्लैकादशी भवेत् ॥ तस्यां सङ्कल्प्य विधिना देवदेवं समर्च्चयेत् ॥ १ ॥ नमोऽस्तु कल्किने पादौ रूपीकेशाय वै कटिम् ॥ म्लेच्छविध्वंसनायेति जगन्मूर्त्तेति तथोदरम् ॥ २ ॥ शितिकण्ठाय कण्ठं तु खड्गपाणे तथा भुजौ ॥ चतुर्भुजायेति हस्तौ विश्वमूर्त्ते तथा शिरः ॥ ३ ॥ एवमभ्यर्च्य मेधावी प्राग्वत्तस्याग्रतो घटम् ॥ विन्यसेत्कल्किनं देवं सौवर्णं तत्र कारयेत् ॥४ ॥ सितवस्त्रेण संयुक्तं गन्धपुष्पोपशोभितम् ॥ कृत्वा प्रभाते विप्राय प्रदेयं शास्त्रवित्तमे ॥ ५ ॥ एवं कृते भवेद्यत्तु तन्निबोध महामुने ॥ पूर्वं राजा विशालोऽभूत्काशीपुर्यां महाबलः ॥ ६ ॥ गोत्रजैर्हैहयराज्योऽसौ गन्धमादनमाविशत् ॥ तस्य द्रोण्यां महाराज बदर्यां प्राप शोभनाम् ॥ ७ ॥ इतराज्यो विशेषेण गतश्रीको नरोत्तमः ॥ कदाचिदागतो तत्र पुराणावृषिसत्तमो ॥ ८ ॥ नरनारायणो देवौ सर्वदेवनमस्कृतौ ॥ तौ दृष्ट्वा तत्र राजानं पूर्वोगतमरिन्दमौ ॥९॥ ध्यायन्तं परमं ब्रह्म विष्व्याख्यं परमं पदम् ॥ तौ प्रीतावूचतुश्चैवं राजानं क्षीणकल्मषम् ॥१०॥ वरं वृणीष्व राजेन्द्र वरदौ स्वस्तवागतौ ॥ राजोवाच ॥ भवन्तौ को न जानामि कस्य गृह्णम्यहं वरम् ॥ ११ ॥ आराधयामि यं तस्माद्वर मिच्छामि शोभनम् ॥ एवमुक्तौ तु तौ प्रोचुः कुमाराधयसे प्रभो ॥ १२ ॥ कं वा वरं वृणीषि त्वं कथयस्व कुतूहलात् ॥ एवमुक्तस्ततो राजा विष्णुमाराधयाम्यहम् ॥ १३ ॥ कथयित्वा स्थितस्तूष्णीं ततस्तावूचतुः पुनः ॥ राजंस्तस्यैव देवस्य प्रसादादावयोर्वरः ॥ १४ ॥ दातव्यस्ते

वरं ब्रूहि करस्ते मनसि वर्त्तते ॥ राजोवाच ॥ यथा यज्ञेश्वरं देवं यज्ञैर्विविधदक्षिणैः ॥ १५ ॥ यष्टुं समर्थता मे स्यात्तथा मे दत्तां वरम् ॥
स्वयं नारायणो देवो लोकमार्गप्रदर्शकः ॥ १६ ॥ मया सह तपः कुर्वन्बर्षां लोकभावनः ॥ अयं मत्स्योऽभवत्पूर्वं पुनः कूर्म्मः सुरूप
वान् ॥ १७ ॥ वराहश्चाभवद्देवो नरसिंहस्ततोऽभवत् ॥ वामनस्तु ततो जातो जामदग्न्यो महाबलः ॥ १८ ॥ पुनर्दाशरथिर्भूत्वा मोहयामास
पार्थिवः ॥ सकलान्दस्यवो म्लेच्छान्घातयित्वा महीमिमाम् ॥ १९॥ प्रकृतिस्थां चकारायं स एष भगवान्हरिः ॥ नारसिंहेन रूपेण तद्वत्पाप
भयान्नरैः ॥ २० ॥ वामनं मोहनाशाय वित्तार्थं जमदग्निजम् ॥ क्रूरशस्त्रविनाशाय यजेद्दाशरथिं बुधः ॥ २१ ॥ बलकृष्णौ यजेद्धीमान्पुत्र
कामो न संशयः ॥ रूपकामो यजेद्बुद्धं शत्रुघाताय कल्किनम् ॥ २२ ॥ एवमुक्त्वा नरस्तस्य इमामेवाब्रवीन्मुनिः ॥ द्वादशीं कृतवान्तोऽपि
चक्रवर्त्ती बभूव ह ॥ २३ ॥ तस्यैव नाम्ना बदरी विशालाख्याभवन्मुने ॥ इह जन्मनि राजासौ राज्यं कृत्वा त्रिषाद्वनम् ॥ यज्ञैश्च विविधै
रिष्ट्वा परं निर्वाणमाप्तवान् ॥ २४ ॥ इति श्रीवराहपुराणे कल्किद्वादशीव्रतं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ अथ पद्मनाभद्वादशीव्रतम् ॥
दुर्वासा उवाच ॥ तद्वदाश्वयुजे मासि द्वादशी शुक्लपक्षजा ॥ तस्यामभ्यर्च्चयेद्देवं पद्मनाभं सनातनम् ॥ १ ॥ पद्मनाभाय पादौ तु कटिं वै पद्म
योनये ॥ उदरं सर्वदेवाय पुष्कराक्षाय वै उरः ॥ २ ॥ अव्ययाय तथा पाणिं प्राग्वदङ्गानि पूजयेत् ॥ प्रभवाय शिरः पूज्य प्राग्वदग्रे घटं
न्यसेत् ॥ ३ ॥ तस्मिन्सौवर्णकं देवं पद्मनाभं तु विन्यसेत् ॥ तमेव देवं सपूज्य गन्धपुष्पादिभिः क्रमात् ॥ ४ ॥ प्रभातायां तु शर्वर्यां ब्राह्म
णाय निवेदयेत् ॥ एवं कृते तु यत्पुण्यं तन्निबोध महामते ॥ ५ ॥ आसीत्कृतयुगे राजा भद्राश्वो नाम वीर्यवान् ॥ यस्य नाम्नाभवद्वर्षं भद्राश्वं
नाम नामतः ॥ ६ ॥ तस्यागस्त्यः कदाचित्तु गृहमागत्य सत्तमः ॥ उवाच सप्तरात्रं तु वसामि भवतो गृहे ॥ ७ ॥ तं राजा शिरसा नत्वा
स्थीयतामित्यभाषत ॥ तस्य कान्तिमती नाम भार्या परमशोभना ॥ ८ ॥ तस्यास्तेजः समभवद्वादशादित्यसन्निभम् ॥ शतानि पञ्च
तस्यासन्सपत्नीनां यतव्रताः ॥ ९ ॥ ता दास्य इव कर्माणि कुर्वन्त्यहरहः शुभाः ॥ महाभागा कान्तिमती भार्या तस्य विशेषतः ॥ १० ॥
तामगस्त्यस्तथा दृष्ट्वा रूपतेजोऽन्वितां शुभाम् ॥ सपत्न्यश्च भयात्तस्याः कुर्वन्त्यः कर्म्म शोभनाः ॥ ११ ॥ राजा तु तस्या मुदितं मुख

भेवान्वलोकयत् ॥ एवम्भूतामथो दृष्ट्वा राज्ञीं परमशोभनाम् ॥१२॥ साधु साधु जगन्नाथेत्याहागस्त्यः प्रहर्षितः ॥ द्वितीये दिवसेऽप्येवं राज्ञीं दृष्ट्वा महाप्रभाम् ॥ १३ ॥ अहो मुष्टमहो मुष्टं ज गदेतच्चराचरम् ॥ इत्यगस्त्यो द्वितीयेऽह्नि राज्ञीं दृष्ट्वाभ्युवाच ह ॥ १४ ॥ तृतीयेऽह्नि तां दृष्ट्वा पुनरेवमुवाच ह ॥ अहो मूढा न जानन्ति गोविन्दं परमेश्वरम् ॥ १५ ॥ य एकेन दिनेनैव राज्ञस्तुष्टः प्रदत्तवान् ॥ चतुर्थे दिवसे हस्ता वुत्क्षिप्य पुनरब्रवीत् ॥१६॥ साधु साधु जगन्नाथ स्त्री शूद्राः साधु साध्विति ॥ द्विजाः साधु नृपाः साधु वैश्याः साधु पुनः पुनः ॥ १७॥ साधु भद्राश्च साधुस्त्वं साधु भोऽगस्त्य साधु ते॥साधु ब्रह्मद् साधुस्ते ध्रुव साधो महाव्रत ॥१८॥ एवमुक्त्वा ननर्तोच्चैरगस्त्यो राजसन्निधौ ॥ एवम्भूतं च तं दृष्ट्वा सपत्नीको नृपोत्तमः ॥१९॥ किं हर्षकारणं ब्रह्मन्येनेत्थं नृत्यते भवान् ॥ अगस्त्य उवाच ॥ अहो मूर्खः कुराजा त्वं अहो मूर्खाऽनुगास्त्वमी ॥ २० ॥ अहो पुरोहिता मूर्खा ये न जानन्ति मे मतम् ॥ एवमुक्ते ततो राजा कृताञ्जलिरभाषत ॥ २१ ॥ न जानीमो वयं ब्रह्मन्प्रश्नमेतत्त्वयेरितम् ॥ कथयस्व महाभाग यद्यनुग्रहकृद्भवान् ॥ २२ ॥अगस्त्य उवाच ॥ इयं राज्ञी पुरा चाभूद्दासी वैश्यस्य वै गृहे ॥ नगरे हरिदत्तस्य त्वमस्याः पतिरेव च ॥ २३ ॥ तस्यैव कर्म्मकारोऽभूच्छूद्रः सेवनतत्परः ॥ स वैश्योऽश्वयुजे मासि द्वादश्यां नियतः स्थितः ॥ २४ ॥ स्वयं विष्ण्वालयं गत्वा पुष्पधूपादिभिर्हरिम्॥ अभ्यर्च्य स्वगृहं प्राप्ताद्भवन्तौ रक्षपालकौ ॥ २५ ॥ स्थाप्य द्वावपि दीपानां ज्वलनार्थं महामते ॥ गते वैश्ये भवन्तौ तौ दीपान्प्रज्वाल्य संस्थितौ ॥ २६ ॥ यावत्प्रभाता रजनी निशामेकां नरोत्तम ॥ ततः काले मृतौ तौ तु उभौ द्वावपि दम्पती ॥ २७ ॥ तेन पुण्येन ते जन्म प्रियव्रतगृहेऽभवत् ॥ इयं पत्नी तु ते जाता पुरा वैश्यस्य दासिका ॥२८॥ पारक्य स्यापि दीपस्य ज्वालितस्य हरेर्गृहे ॥ यः पुनः स्वेन वित्तेन विष्णोरग्रे प्रदीपकम् ॥ २९ ॥ ज्वालयेत्तस्य यत्पुण्यं तत्संख्यातुं न शक्यते ॥ तेन साधो हरे साधु चेत्युक्तं वचनं मया ॥ ३० ॥ पूर्णे संवत्सरे भक्तिं हरेः कृत्वा विचक्षणः ॥ संवत्सरार्द्धे त्रेतायां सममेतन्न संशयः ॥३१ ॥ त्रिमासे द्वापरे भक्त्या पूजयल्लँभते फलम् ॥ नमो नारायणेत्युक्त्वा कलौ तु लभते फलम् ॥ ३२ ॥ तेन मुष्टं जगत्सर्वं भक्तिमात्रं मयेरितम् ॥ पारक्यदीपस्योत्कर्षा देवाग्रे फलमीदृशम् ॥ ३३ ॥ भो रोजन् यत्त्वया प्राप्तं फलमेतन्मयेरितम् ॥ अहो मूढा न जानन्ति हरेर्दीप

क्रियाफलम् ॥ ३४ ॥ एवंविधा द्विजाग्रे च राजानो ये च भक्तितः ॥ यजन्ते विविधैर्यज्ञैस्तेन ते साधवः स्मृताः ॥ ३५ ॥ अहं तमेव मुक्त्वान्यं न पश्यामि महीतले ॥ तेन साधो अगस्त्येति मया चात्मा प्रशंसितः ॥३६॥ सा स्त्री धन्या स शूद्रस्तु तथा धन्यतरो मतः ॥भर्तुः शुश्रूषणं कृत्वा तत्परोक्षे हरेरिति ॥३७॥ सा स्त्री धन्या तथा शूद्रो द्विजशुश्रूषणे रतः ॥ तदाज्ञया हरेर्भक्तिः स्त्रीशूद्रौ तेन साधिति ॥३८॥ आसुरं भावमाश्रित्य प्रह्लादः पुरुषोत्तमम् ॥ मुक्त्वा चान्यं न जानाति तेनासौ साधुरुच्यते ॥ ३९ ॥ प्रजापतिकुले भूत्वा बाल एव वनं गतः ॥ आराध्य विष्णुं प्राप्तश्च स्थानं परमशोभनम्॥४०॥तेन साधो ध्रुवेत्येवं मयोक्तं राजसत्तम ॥इति राजा वचः श्रुत्वा त्वगस्त्यस्य महात्मनः ॥४१॥अल्पोपदेशं राजासौ पप्रच्छ मुनिपुङ्गवम् ॥ अगस्त्यश्च महाभागः कार्तिक्यां पुष्करं व्रजन्॥४२॥गतेऽगस्त्ये प्रगच्छन्वै भद्राश्वस्य निवेशनम्॥पृष्टश्च राजा तामेव द्वादशीं मुनिसत्तमः॥४३॥दुर्वासा उवाच ॥ इदमेव मया तुभ्यं कथितं ते तपोधन॥ कथयित्वा पुनर्वाक्यमगस्त्यो नृपसत्तमम्॥४४॥उवाच पुष्करं यामि सपुत्रं चास्तु ते गृहम् ॥ एवमुक्त्वा जगामाशु सद्योऽदर्शनतां मुनिः॥४५॥ द्वादशीं पद्मनाभस्य राजा स विधिना ततः ॥उपोष्य परमं कामामिह जन्मनि चाप्तवान् ॥४६॥ पुत्रपौत्रैः परिवृतो भुक्त्वा भोगानथोत्तमान् ॥ पद्मनाभप्रसादेन वैष्णवं स्थानमाप सः ॥ ४७ ॥ इति श्रीवराहपुराणे पद्मनाभद्वादशीव्रतं नामोनपञ्चाशोऽध्यायः ॥४९॥अथ धरणीव्रतम् ॥ दुर्वासा उवाच ॥ गत्वा तु पुष्करं तीर्थमगस्त्यो मुनिपुङ्गवः ॥ कार्त्तिक्यामाजगामाशु पुनर्भद्राश्वमन्दिरम् ॥ १ ॥ तमागतं मुनिं प्रेक्ष्य राजा परमधार्मिकः ॥ अर्घपाद्यादिभिः पूज्य कृतासनपरिग्रहम् ॥२॥ उवाच लपितो राजा तमृषिं संशितव्रतम् ॥ राजोवाच ॥ भगवन्कथितं पूर्वं त्वया ऋषिवरोत्तम ॥३॥ आश्विने मासि द्वादश्यां विधानं तत्कृतं मया ॥ इदानीं कार्तिके मासि यत्स्यात्पुण्यं वदस्व मे ॥४॥ अगस्त्य उवाच ॥ कार्त्तिकी द्वादशी राजन्मुक्ता परमपावनी ॥ उपोष्य विधिना येन यच्चास्याः प्राप्यते फलम् ॥५॥ तदहं संप्रवक्ष्यामि शृणोत्ववहितो भवान् ॥ पूर्वोक्तविधिना सम्यक्संकल्प्य स्नानमाचरेत् ॥६॥ तमेव पूजयेद्देवं नारायणमकल्मषम् ॥ नमः सहस्रशिरसे शिरः सम्पूजयेद्धरेः ॥७॥ पुरुषायेति च भुजौ कण्ठं वै विश्वरूपिणे ॥ ज्ञानाख्यायेति चाख्याणि श्रीवत्साय तथा ह्युरः ॥ ८ ॥ जगद्रक्षिष्णवे तुभ्यमुदरं दिव्यमूर्त्तये ॥ कटिं

सहस्रपादाय पादौ देवस्य पूजयेत् ॥९॥ अनुलेमेन देवेशं पूजयित्वा विचक्षणः ॥ नमो दामोदरायेति सर्वाङ्गं पूजयेद्धरेः ॥१०॥एवं सम्पूज्य विधिना तस्याग्रे चतुरो घटान्॥स्थापयेद्ब्रह्मगर्भांस्तु सितचन्दनचर्चितान् ॥११॥ ब्रह्मादमबद्धश्रीवांस्तु सितवस्त्रावगुण्ठितान् ॥ स्थापितांस्तताम्र पात्रेस्तु तिलपूर्णैः सकांचनैः ॥१२॥ चत्वारः सागरांश्चैव कल्पयेद्राजसत्तम ॥ तन्मध्ये प्राग्विधानेन सौवर्णं स्थापयेद्धरिम् ॥ १३ ॥ योगीश्वरं योगिगम्यं पीताम्बरधरं विभुम् ॥ एवं सम्पूज्य विधिवज्जागरं तत्र कारयेत् ॥१४ ॥ कुर्याच्च वैष्णवं यज्ञं यजेद्योगीश्वरं हरिम्॥ षोडशारे तथा चक्रे योगिभिर्बहुभिः कृते॥१५॥एवं कृत्वा प्रभातेषु ब्राह्मणाय निवेदयेत्॥चत्वारः सागरा देयाश्चतुर्णां पञ्चमस्य च ॥१६॥योगीश्वरं तु देवेशं दद्यात्प्रयतमानसः ॥ वेदार्थं तु समं दत्तं द्विगुणं तद्विदे तथा ॥ १७ ॥ आचार्ये पञ्चरात्राणां सहस्रगुणितं भवेत्॥ यस्त्विमं सरहस्यं तु समन्त्रं चोपपादयेत् ॥ १८॥ विधानं तस्य वै दत्तं कोटिकोटिगुणोत्तरम् ॥ गुरौ सति तु यश्चान्यमाश्रयेत्पूजकेषुधीः ॥ १९ ॥ स दुर्गतिमवाप्नोति दत्तमस्य च निष्फलम् ॥ प्रयत्नेन गुरो पूर्वंपश्चादन्यस्य दापयेत् ॥२०॥ आविद्यो वा सविद्यो वा गुरुरेव जनार्दनः ॥ मार्गस्थो वाप्यमार्गस्थो गुरुरेव परा गतिः ॥ २१ ॥ प्रतिपद्य गुरुं यस्तु मोहाद्विप्रतिपद्यते ॥ युगकोटिं स नरके पच्यते पुरुषाधमः ॥ २२ ॥ एवं दत्त्वा विधानेन द्वादश्यां विष्णुमर्च्य च ॥ विप्राणां भोजनं दद्याद्यथाशक्ति सदक्षिणम् ॥ २३ ॥ धरणीव्रतमेतद्धि पुरा कृत्वा प्रजापतिः ॥ प्राजापत्यं तथा लेभे मुक्तिं ब्रह्म च शाश्वतम् ॥ २४ ॥ तथा च हैहयो राजा कृतवीर्यो नराधिपः ॥ कार्त्तवीर्यं सुतं लेभे परं ब्रह्म च शाश्वतम् ॥ २५ ॥ शकुन्तलाप्येव मेव व्रतं कृत्वा महामते ॥ लेभे च भरतं पुत्रं दौष्यन्तं चक्रवर्त्तिनम् ॥ २६ ॥ तथातीताश्च राजानो वेदोक्ताश्चक्रवर्त्तिनः ॥ अनेन विधिना प्राताश्चक्रवर्त्तित्वमुत्तमम् ॥ २७ ॥ धरण्या चापि पाताले मग्नया च पुरा कृतम् ॥ व्रतमेतत्ततो नाम्ना धरणीव्रतमुत्तमम् ॥ २८ ॥ समातेऽस्मिन्धरा देवी हरिणा क्रोडमूर्त्तिना ॥ उद्धृता चापि तुष्टेन स्थापिता नोरिवाम्भसि ॥ २९ ॥ धरणीव्रतमेतद्धि कीर्त्तितं ते मया मुने ॥ य इदं शृणुयाद्भक्त्या यश्च कुर्यान्नरोत्तमः ॥ ३० ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ ३१ ॥ इति श्रीवराहपुराणे धरणीव्रतं नाम पञ्चाशोऽध्यायः ॥ ९० ॥ अथाऽगस्त्यगतिारभ्यते ॥ श्रीवराह उवाच ॥ श्रुत्वा दुर्वाससो वाक्यं धरणीव्रतमुत्तमम् ॥ ययौ सत्यतपाः सद्यो

हिमवत्पार्श्वमुत्तमम् ॥ १ ॥ पुष्पभद्रा नदी यत्र शिला चित्राशिला तथा ॥ वटो भद्रवटो यत्र तत्र तस्याश्रमो बभौ॥२॥ तत्रोपरि महत्तस्य चरितं सम्भविष्यति ॥ धरण्युवाच ॥ बहुकल्पसहस्राणि व्रतस्यास्य सनातन ॥ ३ ॥ मया कृतस्य तपसस्तन्मया विस्मृतं प्रभो ॥ इदानीं त्वत्प्रसादेन पात्कनं स्मारितं मम ॥४॥ जातं जातिस्मरत्वं च विशोका परमेश्वर ॥ यदि नाम परं देव कौतुकं यदि वर्त्तते॥५॥अगस्त्यः पुनरागत्य भद्राश्वस्य निवेशनम् ॥ यच्चकार स राजा तु तन्ममाचक्ष्व भूधर॥६॥श्रीवराह उवाच ॥ प्रत्यागतमृषिं दृष्ट्वा भद्राश्वः श्वेतवाहनः ॥ वारासनगतं दृष्ट्वा कृत्वा पूजां विशेषतः ॥ ७ ॥ अपृच्छन्मोक्षधर्मस्थं प्रश्नं सकलधारिणि ॥ भद्राश्व उवाच ॥ भगवन्कर्मणा केन छिद्यते भवसंसृतिः ॥ ८ ॥ किं वा कृत्वा न शोचन्ति मूर्त्तामूर्त्तोपपत्तिषु ॥ अगस्त्य उवाच ॥ शृणु राजन्कथां दिव्यां दूरात्तत्रव्यवस्थिताम् ॥ दृश्यादृश्यविभागोत्थां समाहितमना नृपः ॥९ ॥ नाह्नो न रात्रिर्न दृशो दिशश्च न द्यौर्न देवा न दिनं न सूर्यः॥तस्मिन्काले पशुपालेति राजा स पालयामास पशूनलेनकान् ॥१०॥ तान्पालयन् स कदाचिदिदधुः पूर्वं सधुद्रं च जगाम तूर्णम्॥अनन्तपारस्य महोदधेस्तु तीरे वनं तत्र वसन्ति सर्पाः ॥ ११ ॥ अष्टौ द्रुमाः कामवहा नदी च तीर्थेऊ चोर्द्ध वप्रश्चतस्त्र चान्ये ॥ पंच प्रधानाः पुरुषास्तथैकः स्त्रियं विभ्रत्ते जसा दीप्यमानाम् ॥ १२ ॥ सापि स्त्री स्वे वक्षसि धारयन्ती सहस्रसूर्यप्रतिमं विशालम् ॥ तस्याश्चरस्त्रिविकारास्त्रिवर्णस्तं राजानं पश्य परिश्रमन्तम् ॥ १३ ॥ तूष्णीम्भूता मृतकल्पा ज्वालसृपोऽप्यसौ तद्वनं संविवेश ॥ तस्मिन्प्रविष्टे विविशुः सर्वे एते भयादेवर्य गतवन्तः क्षणेन॥१४॥ तैः सर्पैः स नृपो दुर्विनीतैः संवेष्टितो दस्युभिश्चिन्तयानः ॥ कथं चेतं न भविष्यन्ति येन कथं चेतं संस्मृताः सम्भवेयुः ॥ १५ ॥ एवं राज्ञश्चिन्तयतस्त्रिवर्णः पुरुषोऽपरः ॥ श्वेतं रक्तं तथा पीतं त्रिवर्णं धारयन्नरः ॥ १६ ॥ स संज्ञां कृतवान्मह्यमपरोऽथ क यास्यसि ॥ एवं तस्य ब्रुवाणस्य महन्नाम व्यजायत ॥ १७ ॥ तेनापि राजा संवीतः स बुध्यस्वेति चाब्रवीत् ॥ एवमुक्ते ततः स्त्री तु तं राजानं रुरोध ह ॥ १८ ॥ मायाततं तं मा भैष्ट ततोऽन्यः पुरुषो नृपम् ॥ संवेष्टच्यास्थितवान्वीरस्ततः सर्वैश्वरेश्वरः ॥ १९ ॥ ततोऽन्ये पंच पुरुषा आगत्य नृपसत्तमम् ॥ संवेष्टच संस्थिताः सर्वे ततो राजावरोधितः ॥ २०॥ रुद्धा राजत्रितः सर्वे एकीभूतास्तु दस्यवः ॥ मथितुं शस्त्रमादाय लीनान्योऽन्यं

ततो भयात् ॥ २१ ॥ तैर्ज्ञानैर्नृपतेर्वेश्म बभौ परमशोभनम् ॥ अन्येषामपि पापानां कोटिः साम्राभवन्नृप ॥ २२ ॥ गृहे भूः सलिलं वह्निः सुखशीतश्च मारुतः ॥ सावकाशानि शुभ्राणि पञ्चैक्ये सुगुणानि च ॥ २३ ॥ एकैव तेषां सुचिरं संवेष्टयाक्षज्य संस्थितम् ॥ एवं स पशुपालोऽसौ कृतवानज्ञया नृप ॥ २४ ॥ तस्य तद्धावं दृष्ट्वा रूपं च नृपतेर्मृधे ॥ त्रिवर्णः पुरुषो राजन्नत्रीद्राजत्तमम् ॥ २५ ॥ अपुत्रोऽस्मि महाराज ब्रूहि किं करवाणि ते ॥ अस्माभिर्वर्द्धमिच्छद्भिर्भवन्तं निश्चयः कृतः ॥ २६ ॥ यदि नाम कृतास्सर्वे वयं देव पराजिताः ॥ एवमेव शरीरेषु लीनास्तिष्ठाम पार्थिव॥२७॥मय्येके तव पुत्रत्वं गते सर्वेषु सम्भवः॥ एवमुक्तस्ततो राजा तं नरं पुनरब्रवीत् ॥२८॥ पुत्रो भवति मे कर्त्ता अन्येषामपि सत्तम॥ पुष्यन्पुत्रेनरैर्भावैनाहं लिप्से कदाचन॥२९॥एवमुक्त्वा स नृपतिस्तमात्मजमथाकरोत्॥तेविंमुक्तः स्वयं तेषां मध्ये स विरराम ह॥३०॥इति श्रीवराहपुराणेऽगस्त्यगीतासु मोक्षधर्मनिरूपणं नामैकपंचाशोऽध्यायः॥५१॥अथ पुनस्तदेव॥ अगस्त्य उवाच ॥ स त्रिवर्णो नृपः सृतः स्वतंत्रत्वाच्च पार्थिवः ॥ अहंनामानमसृजत्पुत्रं पुत्रत्रिवर्णकः॥१॥ तस्यापि चाभवत्कन्याप्यवबोधस्वरूपिणी ॥ सा तु विज्ञानदं पुत्रं मनोज्ञं विससर्ज ह॥२॥ तस्यापि सर्वरूपाः स्युस्तनयाः पञ्च भोगिनः॥ यथासंख्येन पुत्रास्तु ते स्युरक्षाभिधानकाः॥३॥ एते पूर्वं दृस्यवस्तु ततो राज्ञा वशीकृताः ॥ अमृत्तों इव ते सर्वे चकुरायतनं शुभम् ॥ ४ ॥ नवद्वारं पुरं तस्य त्वेकस्तम्भं चतुष्पथम् ॥ नदीसहस्रसंकीर्णं जलकृत्यसमाश्रितम् ॥५॥ तत्पुरं ते प्रविविशुरेकीभूतास्ततो नव ॥ पुरुषो मूर्त्तिमात्राजा पशुपालोऽभवत्क्षणात् ॥६॥ ततस्तत्पुरसंस्थस्तु पशुपालो महानृपः ॥ संमूच्य वाचकान्च्छब्दान्वेदान्तस्मार तत्पुरे ॥ ७ ॥ आत्मस्वरूपिणो नित्यांस्तदुक्तानि व्रतानि च ॥ नियमान्कृतवश्चैव सर्वान्राजा चकार ह ॥ ८ ॥ स कदाचित्पृथः खिन्नः कर्म्मकाण्डमरोचयत् ॥ सर्वज्ञो योगनिद्रायां स्थित्वा पुत्रं ससर्ज ह ॥ ९ ॥ चतुर्वक्त्रं चतुर्बाहुं चतुर्वेदं चतुष्पथम् ॥ तस्मादारभ्य नृपतेर्वैषयः स्वपदा स्थितः ॥ १० ॥ तस्मिन्समुद्रे स नृपो वने तस्मिंस्तथैव च ॥ तृष्णादिषु नृपश्चैव इस्त्यादिषु तथैव च ॥ समोऽभवत्कर्मकाण्डादनुजानन्महामते ॥ ११ ॥ इति श्रीवराहपुराणे अगस्त्यगीतासु मोक्ष० नि० नाम द्वापंचाशोऽध्यायः ॥ ५२ ॥ तत्र पशुपालोपाख्यानम् ॥ भद्राश्व उवाच ॥ मत्यश्रविषये ब्रह्मन्कथेयं कथिता त्वया ॥ तस्याविर्भूतिरभवत्

कस्य केन कृतेन ह ॥ १ ॥ अगस्त्य उवाच ॥ आगतेयं कथा चित्रा सर्वस्य विषये स्थिता ॥ त्वदेहे मम देहे च सर्वजन्तुषु सा समा ॥ २ ॥ तस्याः सम्भूतिमिच्छन्यस्तस्योपायं स्वयं परम् ॥ पशुपाळात्समुत्पन्नो यश्चतुष्पाच्चतुर्मुखः ॥ ३ ॥ स गुरुः स कथायास्तु तस्याश्चैव प्रवर्त्तकः ॥ तस्य पुत्रः स्वरो नाम सत्यमूर्त्तिरसौ स्मृतः ॥ ४ ॥ तेन प्रोक्तं तु यत्किंचिच्चतुर्णी साधनं नृप ॥ ऋगर्थानां चतुर्भिस्ते तद्भक्त्याराध्यतां ययुः ॥ ५ ॥ चतुर्णी प्रथमो यस्तु चतुःशृङ्गः समास्थितः ॥ वृषद्वितीयस्तत्प्रोक्तमार्गेणैव तृतीयकः ॥ चतुर्थस्तु त्प्रणीतस्तां पूज्य भक्त्याशु तं व्रजेत् ॥ ६ ॥ सप्तमूर्त्तेस्तु चरितं शुश्रुवुः प्रथमं नृप ॥ ब्रह्मचर्येण वर्त्तेत द्वितीयोऽस्य सनातनः ॥ ७ ॥ ततो भृत्यादिभरणं वृषभारोहणं नवु ॥ वनवासश्च निर्दिष्ट आत्मस्थे वृषभे सति ॥ ८ ॥ अहमास्मिन्वदत्यन्यश्चतुर्द्धा चैकधा द्विधा ॥ भेद भिन्नसहोत्पन्नास्तस्यापत्यानि जग्मिरे ॥ ९॥ नित्यानित्यस्वरूपाणि दृष्ट्वा पूर्वं चतुर्मुखः ॥ चिन्तयामास जनकं कथं पश्याम्यहं नृप ॥१०॥ मदीयस्य पितुर्यै हि गुणा ह्यासन्महात्मनः ॥ न ते सम्प्राप्ति दृश्यन्ते स्वरापत्येषु केषुचित् ॥ ११ ॥ पितुः पुत्रस्य यः पुत्रः स पितामह नामकः ॥ एवं श्रुतिः स्थिता चेयं स्वरापत्येषु नान्यथा ॥१२॥ क्वापि सम्पत्स्यते भ्रातो द्रष्टव्यश्चापि ते पिता ॥ एवं नीतेऽपि किङ्कार्यमिति चिन्तापरोऽभवत् ॥१३॥ तस्य चिन्तयतः शल्ये पैतृकं पुरतो बभौ ॥ तेन पुत्रेण ते रोषान्मन्थ स्वरमन्तिके ॥१४॥ तास्मिन्मथेत मात्रे तु शिरस्तस्याप्तिदुर्ग्रहम् ॥ नासिकेळफळाकारं चतुर्वक्त्रोऽन्वपश्यत ॥ १५ ॥ तच्चावृतं प्रधानेन दशधा संवृतो बभौ॥ चतुष्पादेन शल्येन चिच्छेद तिळकाण्डवत् ॥ १६ ॥ प्रकामं तिळशश्छिन्ने तदमूळो न मे बभौ ॥ अहं त्वहं वदन्भूतं तमप्येवमथाच्छिनत् ॥ १७॥ तास्मिन् भागे दृशं कृत्वा हस्वमन्यमवैक्षत ॥ अहं भूतादि वः पञ्च वदन्तं भूतिमन्तिकात्॥१८॥तमप्येवमथो छित्त्वा पञ्चामून्यान्ददर्श सः ॥ कृत्वावकाशं ते सर्वे ज्वलन्त इदमन्तिकात् ॥१९॥ तमप्यसङ्गशल्येन चिच्छेद तिळकाण्डवत्॥तस्मिंश्छिन्ने दशांशेन हस्वमन्यमपश्यत ॥२०॥ पुरुषं रूपशल्येन तश्छित्त्वान्यमपश्यत॥तद्वद्भस्वं सितं सौम्यं तमप्येवं तथाकरोत् ॥२१॥एवं कृते शरीरं तु ददर्श स पुनः प्रभुः ॥ स्वकीयमेव तस्यान्तः पितरं नृपसत्तम ॥२२॥ततरेणुसमं मूर्त्या स्वव्यक्तं सर्वजन्तुषु ॥ स मे दृष्ट्वा परं हर्षमुभौ हि स स्वरोऽभवत् ॥२३॥ एवंविधोऽतो पुरुषः स्वरनामा

महातपाः ॥ मूर्त्तिस्तस्य प्रवृत्ताख्यं निवृत्ताख्यं शिरो महत् ॥२४॥ एतस्मादेव तस्याशु कथया राजसत्तम ॥ सम्भूतिरभवद्राजा विवृतस्त्वेष एव तु ॥ २५ ॥ एषेतिहासः प्रथमः सर्वस्य जगतो भृशम् ॥ य इमं वेत्ति तत्त्वेन साक्षात्कर्मपरो भवेत् ॥ २६ ॥ इति श्रीवराहपुराणे अगस्त्यगीतासु पशुपालोपाख्यानं नाम त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥ अथोत्तमभर्तृप्राप्तित्रतम् ॥ भद्राश्व उवाच ॥ विज्ञानोत्पत्तिकामस्य क आराध्यो भवेद्विज ॥ कथं चाराध्यतेऽसौ हि एतदाख्याहि भो द्विज ॥ अगस्त्य उवाच ॥ विष्णुरेव सदाराध्यः सर्वदेवैरपि प्रभुः ॥ तस्योपायं प्रवक्ष्यामि येनासौ वरदो भवेत् ॥ २ ॥ रहस्यं सर्ववेदानां मुनीनां मनुजन्मनाम् ॥ नारायणः परो देवस्तं प्रणम्य न सीदति ॥ ३ ॥ श्रूयते च पुरा राजन्नारदेन महात्मना ॥ कथितं तुष्टिदं विष्णोस्त्रैतमप्सरसां तथा ॥ ४ ॥ अप्सरस ऊचुः ॥ भगवन् ब्रह्मतनय भर्तृकामा वयं द्विज ॥ नारायणश्च भर्त्ता नो यथा स्यात्तत्प्रचक्ष्व नः ॥ ५ ॥ नारद उवाच ॥ प्रणामपूर्वकः प्रश्नः सर्वत्र विहितः शुभः ॥ स च मे न कृतो गर्वा युष्माभिर्यौवनस्मयात् ॥ ६ ॥ तथापि देवदेवस्य विष्णोर्यन्नाम कीर्त्तितम् ॥ भवतीभिस्तथा भर्त्ता भवित्रि वरः कृतः ॥७॥ तन्नामोच्चारणादेव कृतं सर्वं न संशयः ॥ इदानीं कथयाम्याशु व्रतं येन हरिः स्वयम् ॥ ८ ॥ वरदत्वमवाप्नोति भर्तृदत्वं नियच्छति ॥ नारद उवाच ॥ वसन्ते शुक्लपक्षस्य द्वादशी या भवेच्छुभा ॥ ९ ॥ तस्यामुपोष्य विधिवन्निशायां हरिमर्चयेत् ॥ तस्योपरि रक्तपुष्पैर्मण्डलं कारयेद्बुधः ॥१०॥ नृत्यवादित्रगीतैश्च जागरं तत्र कारयेत् ॥ नमो भगवते शिरः अनङ्गायेति वै कटिम् ॥ ॥ ११ ॥ कामाय बाहुयुग्मे तु सुशास्त्रायेति चोदरम् ॥ मन्मथायेति पादौ तु हृदये इति सर्वतः ॥ १२ ॥ चक्षुर्दद्यु भृशं तस्य प्रणतस्य ततो नृप ॥ एवंकृत्वा प्रभाते तु दापयेद्ब्राह्मणाय च ॥ १३ ॥ वेदवेदाङ्गयुक्ताय सम्पूर्णाङ्गाय धीमते ॥ ब्राह्मणांश्च तथा पुज्य व्रतमेतत्समापयेत् ॥ १४ ॥ एवंकृते तथा विष्णुर्भर्त्ता वो भक्तिमान् ध्रुवम् ॥ पश्चात् रसमादाय इक्षुकाण्डात्सुशोभनात् ॥ १५ ॥ पुष्पैः सम्पूज्य देवेशं मल्लिकाजातिभिस्तथा ॥ अकृत्वा मत्प्रणामं तु पृष्ठो गर्वेण शोभनाः ॥ १६ ॥ अवमानस्य तस्यापं विषाक्तो वो भविष्यति ॥ एतस्मिन्नेव सरसि अष्टावक्रो महामुनिः ॥ १७ ॥ तस्यो पहासं कृत्वा तु शापं लप्स्यथ शोभनाः ॥ व्रतेनानेन देवेशं पतिं लब्ध्वाभिमानतः ॥ १८ ॥ अवमानेन हरणं गोपालैर्वो भविष्यति ॥ पुरा

॥ ४८ ॥

हर्त्ता च कन्यानां देवो भर्त्ता भविष्यति ॥ १९॥ अगस्त्य उवाच ॥ एव मुक्त्वा स देवर्षिः प्रययौ नारदः क्षणात् ॥ ता अप्येतद्व्रतं चकुस्तुष्ट श्चासां स्वयं हरिः ॥ २० ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासूत्तरखण्डउत्तमभर्तृप्राप्तिव्रतं नाम चतुःपंचाशोऽध्यायः ॥ ५४ ॥ अथ शुभ व्रतम् ॥ अगस्त्य उवाच ॥ शृणु राजन्महाभाग व्रतानामुत्तमं व्रतम् ॥ येन सम्प्राप्यते विष्णुः शुभेनैव न संशयः ॥ १ ॥ मार्गशीर्षस्य मासे तु प्रथमेऽह्नि समारभेत् ॥ सिते पक्षे दशम्यां तु एकभक्तं समाचरेत् ॥ २ ॥ ततो दशम्यां स्नत्वा तु मध्याह्ने विष्णुमर्चयेत् ॥ भुक्त्वा सङ्क ल्पयेत्प्राग्वद्दादशीमक्षतां नृप ॥ ३ ॥ विप्रेभ्यश्च यवान्दद्यात्तामुपोष्य विधानतः ॥ सर्वदा च हरिर्वाच्यो दाने होमे तथार्चने ॥ ४ ॥ चातु र्मास्यमथैवं तु क्षपित्वा राजसत्तम ॥ चैत्रादिषु पुनस्तद्वदुपोष्य प्रयतः सुधीः ॥ ५ ॥ सत्पात्राणि दद्यात्तु विप्रेभ्यः प्रीतिपूर्वकम् ॥ श्राव णादिषु मासेषु शालीन्दद्यात्प्रयत्नतः ॥ ६ ॥ त्रिषु मासेषु यावच्च कार्त्तिकस्यादि रागतः ॥ तमप्येवं क्षपित्वा तु दशम्यां प्रयतः शुचिः ॥७ ॥ अर्चयित्वा हरिं भक्त्या मासनाम्ना विचक्षणः ॥ सङ्कल्प्य पूर्ववद्व्रत्या द्वादश्यां संयतेन्द्रियः॥८॥ एकादश्यां यथाशक्ति कारयेत्पृथिवीं नृप ॥ काञ्चनाङ्कां च पातालकुर्मयुक्तसंयुताम् ॥ ९॥ भूमिन्यासविधानेन स्थापयेत्तां हरेः पुरः ॥ सितवस्त्रयुगच्छन्नां सर्ववीजसमन्विताम् ॥ १०॥ सम्पूज्य प्रियदत्तेति पञ्चरत्नैर्विचक्षणः ॥ जागरं तत्र कुर्वीत प्रभाते तु पुनर्द्विजान् ॥ ११ ॥ आमन्त्र्य संख्यया राजंश्चतुर्विंशति यत्नतः ॥ एकैकस्मै च गां दद्यादनड्वाहं सदक्षिणम् ॥ १२॥ एकैकं वस्त्रयुग्मं च अङ्गुलीयकमेव च ॥ कटकानि च सौवर्णकर्णाभरणकानि च ॥ १३ ॥ एकैकं ग्राममेतेषां राजा राजन् प्रदापयेत् ॥ स्वशक्त्या भरणं चैव दरिद्रस्य स्वशक्तितः ॥१४ ॥ यथाशक्त्या महीं कृत्वा काञ्चनीं गोयुगं तथा ॥ वस्त्रयुग्मं च दातव्यं यथाविभवशक्तितः ॥ १५ ॥ सर्वाभरणसंयुक्तां गां च दद्याद्विशेषतः ॥ एवंकृते सकृद्दानज्नुष्टिमायाति वै विभुः ॥ १६ ॥ रौप्यां वा पृथिवीं कृत्वा यथाविभवशक्तितः ॥ दद्यात्तां ब्राह्मणेभ्यश्च यथाशक्ति हरिं स्मरन् ॥ १७ ॥ तथा भोजनमेतेषा मुपानच्छत्रिकां तथा ॥ पादुके च तथा दद्यात्कृष्णो दामोदरो मम ॥ १८ ॥ प्रीयतां सर्वदेवो देवो विश्वरूपो हरिर्मम ॥ दानं सुभोजनं दत्त्वा सकृद्यत्फलमाप्यते ॥ १९ ॥ वर्षाणां च सहस्रेण कीर्त्तितुं नैव शक्यते ॥ तथाप्युद्देशतः किञ्चित्फलं वक्ष्यामि तेऽनघ ॥ २० ॥ व्रतेनानेन

यद्वृत्तं शुभं यस्य शृणुष्व तत् ॥ आसीदादियुगे राजा ब्रह्मवादी दृढव्रतः ॥ २१ ॥ स पुत्रकामः पप्रच्छ ब्रह्माणं परमेश्वरम् ॥ तस्येदं व्रत माचख्यौ ब्रह्मा स कृतवान्पुरा ॥२२ ॥ तस्य व्रतान्ते विश्वात्मा स्वयं प्रत्यक्षतां गतः ॥ दृष्ट्वा प्रोवाच भो राजन्वरो मे त्रियतां नृप ॥२३ ॥ राजोवाच ॥ पुत्रं मे देहि देवेश वेदमन्त्रविशारदम् ॥ याजकं यजनासक्तं कीर्त्या युक्तं चिरायुषम् ॥ २४ ॥ असंख्यातगुणं चैव ब्रह्मभूतमकल्मषम् ॥ एवमुक्त्वा ततो राजा पुनर्वचनमब्रवीत् ॥ २५ ॥ ममाप्येतच्छुभं स्थानं प्रयच्छ परमेश्वर ॥ यत्तन्मुनिपदं नाम यत्र गत्वा न शोचति ॥ २६ ॥ एवमस्त्विति तं देवः प्रोक्त्वा चादर्शनं गतः ॥ तस्यापि राज्ञः पुत्रोऽभूद्वत्सश्रीर्नाम नामतः ॥ २७ ॥ वेदवेदाङ्गसम्पन्नो यज्ञयाजी बहुश्रुतः ॥ तस्य कीर्त्तिर्महाराज विस्तृता धरणीतले ॥ २८ ॥ राजापि तं सुतं लब्ध्वा विष्णुदत्तं प्रतापिनम् ॥ जगाम तपसे युक्तः सर्वद्वन्द्वसहः प्रभुः ॥ २९ ॥ आराधयामास हरिं निराहारो जितेन्द्रियः ॥ हिमवत्पर्वते रम्ये स्तुतिं चापि सदापठत् ॥ ३० ॥ भद्राश्व उवाच ॥ कीदृशी सा स्तुतिर्ब्रह्मन् यां चकार स पार्थिवः ॥ किंच तस्याभवद्देवं स्तुवतः पुरुषोत्तमम् ॥ ३१ ॥ दुर्वासा उवाच ॥ हिमवन्तं समाश्रित्य राजा तद्गतमानसः ॥ स्तुतिं चकार देवस्य विष्णोरद्भुतकर्मणः ॥ ३२ ॥ राजोवाच ॥ क्षराक्षरं क्षीरसमुद्रशायिनं पृथ्वीधरं मूर्त्तिमतां परम्पदम् ॥ अतीन्द्रियं विश्वभुजां पुरः कृतं नीराकृतिं स्तौमि जनार्दनं प्रभुम् ॥ ३३ ॥ त्वमादितस्त्वं परमार्थरूपी विभुः पुराणः पुरुषोत्तमश्च ॥ अतीन्द्रियो वेदविदां प्रधानः प्रपाहि मां शङ्खगदाम्बुपाणे ॥३४॥ कृतं त्वया देव सुरासुराणां सङ्कीर्त्यमानेन अनन्तमूर्त्ते ॥ सृष्टयर्थमेतत्तव देव विष्णो संचेष्टितं कूटगतस्य तत्स्यात् ॥ ३५ ॥ तथापि कूर्मत्वमृगत्वमुच्चैस्त्वया कृतं रूपमनेकरूप ॥ सर्वज्ञभावादसकृच्च जन्म सङ्कीर्त्यते तेऽच्युत नैतदस्ति ॥ ३६ ॥ नृसिंह वामन नमो जमदग्निनाम दशास्यगोत्रान्तक वासुदेव ॥ नमोऽस्तु ते बुद्ध कल्किन्वरेश शम्भो नमस्ते विबुधारिनाशन ॥ ३७ ॥ नमोऽस्तु नारायण पद्मनाभ नमो नमस्ते पुरुषोत्तमाय ॥ नमः समस्तामरसङ्घपूज्य नमोऽस्तु ते सर्वविदां प्रधान ॥ ३८ ॥ नमः कृरालास्य नृसिंहमूर्त्ते नमो विशालाद्रिसमान कूर्म ॥ नमः समुद्रप्रतिमान मत्स्य नमामि त्वां क्रोडरूपिन्नमन्त ॥३९॥ सृष्टयर्थमेतत्तव देव चेष्टितं न मुख्यपक्षे तव मूर्त्तिता विभो ॥ अजानता ध्यानमिदं प्रकाशितं न लक्ष्यसे त्वं पुरुषः पुराणः॥ ४० ॥

॥ ४९ ॥

आद्यो मखस्त्वं स्वयमेव विष्णो मखाङ्गभूतोऽसि हविस्त्वमेव ॥ पशुर्भवान् ऋत्विगाज्यं त्वमेव त्वां देवसङ्घा मुनयो यजन्ति ॥ ४१ ॥
चलाचलं जगदेतच्च यस्मिन् सुरादिकालानलसंस्थमुत्तमम् ॥ न त्वं विभक्तोऽसि जनार्दनेश प्रयच्छ सिद्धिं हृदयोप्सितां मे ॥ ४२ ॥ नमः
कमलपत्राक्ष मूर्त्तामूर्त्त नमो हरे ॥ शरणं त्वां प्रपन्नोऽस्मि संसारान्मां समुद्धर ॥ ४३ ॥ एवं स्तुतस्ततो देवस्तेन राज्ञा महात्मना ॥ विज्ञा
लाग्रतलस्थेन तुतोष परमेश्वरः ॥४४॥ कुञ्जरूपस्ततो भूत्वा आजगाम हरिः स्वयम् ॥ तस्मिन्नागतमात्रे तु सोप्याम्रः कुञ्जकोऽभवत् ॥४५॥
तद्दृष्ट्वा महदाश्चर्यं स राजा संशितव्रतः ॥ विशालस्य कथं कोऽञ्जमिति चिन्तापरोऽभवत् ॥ ४६ ॥ तस्य चिन्तयतो बुद्धिर्जातेयं
ब्रह्मसन्निधौ ॥ अनेनागतमात्रेण कृतमेतन्न संशयः ॥ ४७ ॥ एतस्मादेव भविता भगवान्पुरुषोत्तमः ॥ एवमुक्त्वा नमश्चक्रे तं विप्रं स नृपो
त्तमः ॥ ४८ ॥ अनुग्रहाय भगवन्नूनं त्वं पुरुषोत्तमः ॥ आगतोऽसि स्वरूपं मे दर्शयस्वाधुना हरे ॥ ४९ ॥ एवमुक्तस्तदा देवः शङ्खचक्र
गदाधरः ॥ बभौ तत्पुरतः सोम्यो वाक्यं चेदमुवाच ह ॥ ५० ॥ वरं वृणीष्व राजेन्द्र यत्ते मनसि वर्त्तते ॥ मयि प्रसन्ने त्रैलोक्यं तिलमात्रमिति
प्रभो ॥ ५१ ॥ एवमुक्तस्ततो राजा रूपौत्फुल्लितलोचनः ॥ मोक्षं प्रयच्छ देवेशेत्युक्त्वा नोवाच किंचन ॥५२॥ एवमुक्तः स भगवान् पुनर्वाक्य
मुवाच ह ॥ मय्यागते विशालोऽयमाम्रः कुञ्जत्वमागतः ॥ ५३ ॥ यस्मात्तस्मात्तीर्थमिदं कुञ्जकाम्रं भविष्यति ॥ तीर्थग्योन्यादयोऽप्यस्मिन्
ब्राह्मणा वा यदि स्वकम् ॥ ५४ ॥ कलेवरं त्यजिष्यन्ति तेषां पंचशतानि च ॥ विमानानि भविष्यन्ति योगिनो मुक्तिरेव च ॥ ५५ ॥ एव
मुक्त्वा नृपं देवः शङ्खाग्रेण जनार्दनः ॥ स्पृश्य संस्पृष्टमात्रोऽसौ पर निर्वाणमाप्तवान् ॥५६ ॥ तस्मात्त्वमपि राजेन्द्र तं देव शरणं व्रज ॥ येन
भूयः पुनः शोच्यपदवीं नो प्रयास्यसि ॥५७॥ य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः ॥ पठेद्यश्चरितं ताभ्यां मोक्षधर्मार्थदो भवेत् ॥५८॥
शुभव्रतमिदं पुण्यं यश्च कुर्याज्जनेश्वर ॥ स सर्वसम्पदं चेह भुक्त्वान्ते तल्लयं व्रजेत् ॥ ५९ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु शुभ
व्रतं नाम पंचपंचाशोऽध्यायः ॥ ५५ ॥ अथ धन्यव्रतम् ॥ अगस्त्य उवाच ॥ अतः परं प्रवक्ष्यामि धन्यव्रतमनुत्तमम् ॥ येन सद्यो भवेद्धन्य
स्त्वधनोऽपि हि यो भवेत् ॥ १ ॥ मार्गशीर्षे सिते पक्षे प्रातिपद्र या तिथिर्भवेत् ॥ तस्यां नक्तं प्रकुर्वीत विष्णुमग्निं प्रपूजयेत् ॥२॥ वैश्वानराय

पादौ तु अग्नयेत्युदरं तथा ॥ हविर्भुजाय च उरो द्रविणोदेति वै भुजौ ॥ ३ ॥ संवर्तायेति च शिरो ज्वलनायेति सर्वतः ॥ अभ्यर्च्चैवं विधानेन देवदेवं जनार्दनम् ॥ ४ ॥ तस्यैव पुरतः कुण्डं कारयित्वा विधानतः ॥ होमं तत्र प्रकुर्वीत एभिर्मन्त्रैर्विचक्षणः ॥ ५ ॥ ततः सयावकं चान्नं भुञ्जीयाद्घृतसंयुतम् ॥ कृष्णपक्षेऽप्येवमेव चातुर्मास्यं तु यावता ॥ ६ ॥ चैत्रादिषु च भुञ्जीत पायसं सघृतं बुधः ॥ श्रावणादिषु सक्तूंश्च ततश्चैतत्समाप्यते ॥ ७ ॥ समाप्ते तु व्रते वह्निं काञ्चनं कारयेद्बुधः ॥ रक्तवस्त्रयुगच्छन्नं रक्तपुष्पानुलेपनम् ॥८ ॥ कुङ्कुमेन तथालिप्य ब्राह्मणं सत्त्वमेव च ॥ सर्ववयवसम्पूर्णं ब्राह्मणं प्रियदर्शनम् ॥ ९ ॥ पूजयित्वा विधानेन रक्तवस्त्रयुगेन च ॥ दद्यात्पश्चाच्च तं तस्य मन्त्रेणानेन बुद्धिमान् ॥ १० ॥ धन्योऽस्मि धन्यकर्मास्मि धन्यचेष्टोऽस्मि धन्यवान् ॥ धन्येनानेन चीर्णेन व्रतेन स्यां सदा सुखी ॥ ११ ॥ एवमुक्त्वा यं विप्रे न्यस्य कोशं महात्मने ॥ सद्यो धन्यत्वमाप्नोति योऽपि स्याद्रोगवर्जितः ॥१२॥ इह जन्मनि सौभाग्यं धनं धान्यं च पुष्कलम् ॥ अनेन कृतमात्रेण जायते नात्र संशयः॥ १३॥ प्राग्जन्मजनितं यावदग्निर्दहति पातकम् ॥ दग्धे पापे विमुक्तात्मा इह जन्मन्यसौ भवेत् ॥ १४॥ योऽपीदं शृणुयान्नित्यं यश्च भक्त्या पठेद्विजः ॥ उभौ ताविह लोके तु धन्यौ सद्यो भविष्यतः ॥ १५ ॥ श्रूयते च व्रतं चैतच्चीर्णमासीन्महात्मना ॥ धनदेन पुरा कल्पे शूद्रयोनौ स्थितेन हि ॥ १६ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु धन्यव्रतं नाम षट्पंचाशोऽध्यायः ॥ ५६ ॥ अथकान्तिव्रतम् ॥ अगस्त्य उवाच ॥ अतःपरं प्रवक्ष्यामि कान्तिव्रतमनुत्तमम् ॥ यत्कृत्वा तु पुरा सोमः कान्तिमानभवत्पुनः ॥ १ ॥ यक्ष्मणा दक्षशापेन पुराक्रान्तो निशाचरः ॥ एतत्कृत्वा व्रतं सद्यः कान्तिमानभवत्किल ॥ २ ॥ द्वितीयायां तु राजेन्द्र कार्त्तिकस्य सितेन्दिनम् ॥ नक्तं कुर्वीत यत्नेन त्वर्चयेन्बलकेशवम् ॥ ३ ॥ बलदेवाय पादौ तु केशवाय शिरोऽर्चयेत्॥ एवमभ्यर्च्य मेधावी वैष्णवं रूपमुत्तमम् ॥ ४ ॥ परं तु रूपं सोमाख्यं द्विकलं तद्दिने हि यत् ॥ तस्य देवस्य चार्घ्यं तु दद्यान्मन्त्रेण सुव्रत ॥ ५ ॥ नमोऽस्त्वमृतरूपाय स वै विधिवराय च ॥ यज्ञलोकाधिपतये सोमाय परमात्मने ॥ ६ ॥ रात्रौ स विप्रो भुञ्जीत यवान्नं सघृतं नरः ॥ फाल्गुनादिचतुष्कं तु पायसं भक्षयेच्छुचिः ॥ ७ ॥ शालिहोमं प्रकुर्वीत कार्त्तिके तु यवैस्तथा ॥ आषाढादिचतुष्के तु तिलहोमं तु

कारयेत् ॥ ८ ॥ तद्वत्तिलान्नं भुञ्जीत एष एव विधिः स्मृतः ॥ ततः संवत्सरे पूर्णे कांचनं शाशिनं व्रती ॥ ९ ॥ सितवस्त्रयुगच्छत्रं सितपुष्पानुलेपनम् ॥ दद्याद्विजाय सम्पूज्य कांचनं शशिनं तथा ॥ १० ॥ अथ संवत्सरे पूर्णे कृत्वा सोमं तु राजतम् ॥ सितवस्त्रयुगच्छत्रं सितपुष्पानुलेपनम् ॥ ११ ॥ एवमेव द्विजं पूज्य ततस्तं प्रतिपादयेत् ॥ कान्तिमानपि लोकेऽस्मिन् सर्वज्ञः प्रियदर्शनः ॥ १२ ॥ त्वत्प्रसादात्सोम रूपिन्नारायण नमोऽस्तु ते ॥ अनेन किल मन्त्रेण दत्त्वा विप्राय वाग्यतः ॥ १३ ॥ दत्तमात्रे ततस्तस्मिन्कान्तिमाआयते नरः ॥ आत्रेयेणापि सोमेन कृतमेतत्पुरा नृप ॥ १४ ॥ तस्य व्रतान्ते सन्तुष्टः स्वयमेव जनार्दनः ॥ यक्ष्माणमपनीयाशु अमृतारूयां कलां ददौ ॥ १५ ॥ तां कलां सोमराजासौ तपसा लब्धवान्त्रिशि ॥ सोमत्वं चागमत्सोमो द्विजराजत्वमेव च ॥ १६ ॥ द्वितीयामश्विनौ सोमधुजौ कीर्त्यौ तु तद्दिने ॥ तौ शेषविष्णू विख्यातौ शुक्लपक्षौ न संशयः ॥ १७ ॥ न विष्णोर्व्यतिरिक्तः स्यादेवतं नृपसत्तम ॥ नामभेदेन सर्वत्र संस्थितः पुरुषोत्तमः ॥ १८ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु कान्तिव्रतं नाम सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥ अथ सौभाग्यव्रतम् ॥ अगस्त्य उवाच ॥ अतःपरं महाराज सौभाग्यकरणं व्रतम् ॥ शृणु येनाशु सौभाग्यं स्त्रीपुंसोरुपजायते ॥ १ ॥ फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षगा ॥ उपासितव्या नक्तेन शुचिना सत्यवादिना ॥ २ ॥ सस्त्रीकं च हरिं पूज्य रुद्रं वा चोमया सह ॥ या श्रीः सा गिरिजा प्रोक्ता यो हरिः स त्रिलोचनः ॥ ३ ॥ एवं सर्वेषु शास्त्रेषु पुराणेषु च गद्यते ॥ एतस्मादन्यथा यस्तु ब्रूते शास्त्रं पृथक्तया ॥ ४ ॥ रुद्रो जनानां मर्त्यानां काव्यं शास्त्रं न तद्भवेत् ॥ विष्णुं रुद्रकृतं ब्रूयाच्छ्रीर्गौरीति निगद्यते ॥ ५ ॥ एतयोरन्तरं यत्र सोऽधमेत्युच्यते जनैः ॥ तं नास्तिकं विजानीयात्तत्रवंधमं वहिष्कृतम् ॥ ६ ॥ एवं ज्ञात्वा सलक्ष्मीकं हरिं सम्पूज्य यत्नतः ॥ मन्त्रेणानेन राजेन्द्र ततस्तं परमेश्वरम् ॥ ७ ॥ गम्भीरायेति पादौ तु सुभगायेति वै कटिम् ॥ उदरं देवदेवाय त्रिनेत्रायेति वै मुखम् ॥ ८ ॥ शिरश्च वाचस्पतये रुद्रायेति च सर्वतः ॥ एवमभ्यर्च्य मेधावी विष्णुं लक्ष्म्या समन्वितम् ॥ ९ ॥ हरं च गौरीसंयुक्तं गन्धपुष्पादिभिः क्रमात् ॥ ततस्तस्यामतो होमं कारयेन्मधुसर्पिषा ॥ १० ॥ तिलैः सह महाराज सौभाग्यपतये परम् ॥ ततस्त्वक्षारविरसं निस्नेहं धरणीतले ॥ ११ ॥ गोधूमान्नं तु भुञ्जीत कृष्णेऽप्येवं विधिः स्मृतः ॥ आषाढादि

द्वितीया तु पारणां तत्र कल्पयेत् ॥१२॥ यवान्नेन ततः पश्चात्कार्त्तिकादिषु पार्थिव ॥ श्यामाकं तत्र भुञ्जीत त्रीन्मासान्नियतः शुचिः ॥१३॥
ततो माघासिते पक्षे तृतीयायां नराधिप ॥ सौवर्णं कारयेद्वीरीं रुद्रं चैकत्र बुद्धिमान् ॥ १४ ॥ सलक्ष्मीकं हरिं वापि यथाशक्ति प्रसन्नधीः ॥
ततस्तान्ब्राह्मणे दद्यात्पात्रभूते विचक्षणे ॥१५॥ अन्नेन हीने वेदानां पारगे साधुवर्त्तिनि ॥ सदाचारेऽथ वा दद्याद्विष्णुभक्ते विशेषतः ॥१६॥
षड्भिः पात्रैरुपेतं तु ब्राह्मणाय निवेदयेत् ॥ एकं मधुमयं पात्रं द्वितीयं घृतपूरितम् ॥१७॥ तृतीयं तिलतैलस्य चतुर्थं गुडसंयुतम् ॥ पंचमं लवणैः पूर्णं षष्ठं गोक्षीरसंयुतम् ॥ १८ ॥ एतान दत्त्वा पात्राणि सप्त जन्मान्तरे भवेत् ॥ सुभगो दर्शनीयश्च नारी वा पुरुषोऽपि वा ॥१९॥
इति श्रीवराहपुराणेऽगस्त्यगीतासु सौभाग्यव्रतं नामाष्टपञ्चाशोऽध्यायः ॥५८॥ अथाऽविघ्नव्रतम् ॥ अगस्त्य उवाच ॥ अथ विघ्नहरं राजन् कथयामि शृणुष्व मे ॥ सम्यक्कृतेन येनाशु न विघ्नैः परिभूयते ॥ १ ॥ चतुर्थ्यां फाल्गुने मासि गृहीतव्यं व्रतं त्विदम् ॥ नक्ताहारेण राजेन्द्र तिलान्नं पारणं स्मृतम् ॥ २॥ तदेवाग्नौ तु होतव्यं ब्राह्मणाय च तद्भवेत् ॥ चातुर्मास्यं व्रतं चैतत्कृत्वा वै पञ्चमे तथा ॥३॥ विघ्नाय दद्यात् सौवर्णं गजवक्त्रं सुपूजितम् ॥ पायसैः पञ्चभिः पात्रैरुपेतं तु तिलैस्तथा ॥ ४ ॥ एवं कृत्वा व्रतं चैतत्सर्वविघ्नैर्विमुच्यते ॥ हयमेधस्य विघ्ने तु सञ्जाते सगरस्तथा ॥ ५ ॥ एतदेव चरित्वा तु हयमेधं स आप्तवान् ॥ तथा रुद्रेण देवेन त्रिपुरं निघ्नता पुरा ॥ ६ ॥ एतदेव कृतं तस्मात्रि पुरस्तेन पातितः ॥ मया समुद्रं पिबता एतदेव कृतं व्रतम् ॥ ७ ॥ अन्येरपि महीपालैरेतदेव कृतं पुरा ॥ तपोऽर्थिभिर्ज्ञानकृद्भिरविघ्नार्थं पर न्तप ॥ ८ ॥ शूराय धीराय गजाननाय लम्बोदरायैकदंष्ट्राय चैव ॥ एवं सम्पूज्य तादृग्वै पुण्यकृद्भिर्होमं कुर्याद्घृतान्नाशस्य हेतोः ॥ ९ ॥ अनेन कृतमात्रेण सर्वविघ्नैः प्रमुच्यते ॥ विनायकस्य दानेन कृतकृत्यो नरो भवेत् ॥१०॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु अविघ्नव्रतं नामोनषष्टितमोऽध्यायः ॥ ५९ ॥ अथ शान्तिव्रतम् ॥ अगस्त्य उवाच ॥ शान्तिव्रतं प्रवक्ष्यामि तव राजन् शृणुष्व तत् ॥
येन चीर्णेन शान्तिः स्यात्सर्वदा गृहमेधिनाम् ॥ १ ॥ पञ्चम्यां शुक्लपक्षस्य कार्त्तिके मासि सुव्रत ॥ आरंभे वर्षमेकं तु भुञ्जीयादुष्णवाँज तम् ॥ २ ॥ नक्ते देवं तु सम्पूज्य हरिं शेषोपरि स्थितम् ॥ अनन्तायेति पादौ तु कटिं वासुकिने नमः ॥ ३ ॥ तक्षयकायोति जठरमुरः

कर्कोटकाय च ॥ पद्माय कण्ठं सम्पूज्य महापद्माय दोर्युगम् ॥ ४ ॥ शङ्खपालाय वक्त्रं तु कुटिलायेति वै शिरः ॥ एवं विष्णुगतं पूज्य पृथगेव च पूजयेत् ॥ ५ ॥ क्षीरेण स्नपनं कुर्यात्तानुद्दिश्य हरेः पुनः ॥ तदग्रे होमयेत् क्षीरं तिलैः सह विचक्षणः ॥ ६ ॥ एवं संवत्सरस्यान्ते ब्राह्मणान् भोजयेत्ततः ॥ नागं तु कांचनं कुर्याद्ब्राह्मणाय निवेदयेत् ॥ ७ ॥ एवं यः कुरुते भक्त्या व्रतमेतन्नराधिपः ॥ तस्य शान्तिर्भवेच्चूनं नागेभ्यो न भयं तथा ॥ ८ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु शान्तिव्रतं नाम षष्टितमोऽध्यायः ॥ ६० ॥

अथ कामव्रतम् ॥ अगस्त्य उवाच ॥ कामव्रतं महाराज शृणु मे गदतोऽधुना ॥ येन कामाः समृद्ध्यन्ते मनसा चिन्तिता अपि ॥ १ ॥ षष्ठ्यां फलाशनो यस्तु वर्षमेकं व्रतं चरेत् ॥ पौषमासे सिते पक्षे पंचम्यां कृतभोजनः ॥ २ ॥ षष्ठ्यां तु प्राश्नयेद्धीमान्प्रथमं तु फलं नृप ॥ ततो भुञ्जीत यत्नेन वाग्यतः शुद्धमोदनम् ॥ ३ ॥ ब्राह्मणैः सह राजेन्द्र अथवा केवलैः फलैः ॥ तमेकं दिवसं स्थित्वा सप्तम्यां पारये नृप ॥ ४ ॥ अग्निकार्यं तु कुर्वीत गुहरूपेण केशवम् ॥ पूजयित्वा विधानेन वर्षमेकं व्रतं चरेत् ॥ ५ ॥ षड्वक्त्रः कार्त्तिकेयश्च सेनानीः कृत्तिकासुतः ॥ कुमारः स्कन्द इत्येवं पूज्यो विष्णुः स्वनामभिः ॥ ६ ॥ समाप्तौ तु व्रतस्यास्य कुर्याद्ब्राह्मणभोजनम् ॥ पण्मुखं मूर्त्तसौवर्णं ब्राह्मणाय निवेदयेत् ॥ ७ ॥ सर्वे कामाः समृद्ध्यन्तां मम देव कुमारक ॥ त्वत्प्रसादादिमं भक्त्या गृह्यतां विप्र मा चिरम् ॥ ८ ॥ अनेन दत्तमात्रेण ब्राह्मणाय सवस्त्रकम् ॥ ततः कामाः समृद्ध्यन्ते सर्वे वै इह जन्मनि ॥ ९ ॥ अपुत्रो लभते पुत्रं धानार्थी लभते धनम् ॥ भ्रष्ट राज्यो लभेद्राज्यं नात्र कार्या विचारणा ॥ १० ॥ एतद्व्रतं पुरा चीर्णं नलेन नृपसत्तम ॥ ऋतुपर्णस्य विषये वसता व्रतचर्यया ॥ ११ ॥ तथा राज्यच्युतैरन्यैर्बहुभिर्नृपसत्तमैः ॥ पौराणिकैर्व्रतं चैव सिद्धयर्थं नृपसत्तम ॥ १२ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु कामव्रतं नाम एकषष्टितमोऽध्यायः ॥ ६१ ॥

अथाऽऽरोग्यव्रतम् ॥ अगस्त्य उवाच ॥ अथापरं महाराज व्रतमारोग्यसंज्ञितम् ॥ कथयामि परं पुण्यं सर्व पापप्रणाशनम् ॥ १ ॥ आदित्य भास्कर रवे भानो सूर्य दिवाकर ॥ प्रभाकरेति सम्पूज्य एवं व्रतमुपाचरेत् ॥ २ ॥ षष्ठ्यां चैव कृताहारः सप्तम्यां भानुमर्चयेत् ॥ अष्टम्यां चैव भुञ्जीत एष एव विधिक्रमः ॥ ३ ॥ अनेन वत्सरं पूर्णं विधिना योऽर्चयेद्रविम् ॥ तस्यारोग्यं धनं

धान्यामिह जन्मनि जायते ॥ ४ ॥ परत्र च शुभं स्थानं यद्गत्वा न निवर्त्तते ॥ सार्वभौमः पुरा राजा अनरण्यो महाबलः ॥ ५ ॥ तेनाथ मचिंतो देवो व्रतेनानेन पार्थिव ॥ यस्य तुष्टोऽभवद्देवः प्रादादारोग्यमुत्तमम् ॥ ६ ॥ भद्राश्व उवाच ॥ किमसौ रोगवान्राजा येनारोग्यमवाप्तवान् ॥ सार्वभौमस्य च कथं ब्रह्मत्रोगस्य सम्भवः ॥ ७ ॥ अगस्त्य उवाच ॥ स राजा सार्वभौमोऽभूद्यशस्वी च सुरूपवान् ॥ स कदाचिन्महाराज नृपश्रेष्ठो महाबलः ॥ ८ ॥ गतवान्मानसं दिव्यं सरो देवगणान्वितम् ॥ तत्रापश्यद्बृहत्पद्मं सरोमध्यगतं सितम् ॥ ९ ॥ तत्र चाङ्कुष्ठमात्रं तु स्थितं पुरुषसत्तमम् ॥ रक्तवासोभिराच्छन्नं द्विभुजं तिग्मतेजसम् ॥ १० ॥ तं दृष्ट्वा सारथिं प्राह पद्ममेतन्ममानय ॥ इदं तु शिरसा विभ्रत्सर्वलोकस्य सन्निधौ ॥ ११ ॥ शीघ्रनीयो भविष्यामि तस्मादानय मा चिरम् ॥ एवमुक्तस्तदा तेन सारथिः प्रविवेश ह ॥ १२॥ ग्रहीतुमुपचक्राम तत्पद्मं नृपसत्तम ॥ स्पृष्टमात्रे ततः पद्मे हुङ्कारः समजायत ॥ १३ ॥ तेन शब्देन वित्रस्तः स पपात ममार च ॥ राजा च तत्क्षणादेव शब्देन समपद्यत ॥ १४ ॥ कुष्ठी विगतवर्णश्च बलवीर्यविवर्जितः ॥ तथागतमथात्मानं दृष्ट्वा स पुरुषर्षभः ॥ १५ ॥ तस्थौ तत्रैव शोकार्त्तः किमेतदिति चिन्तयन् ॥ तस्य चिन्तयतो धीमानाजगाम महातपाः ॥ १६ ॥ वसिष्ठो ब्रह्मपुत्रोऽथ स तं पप्रच्छ पार्थिवम् ॥ कथं ते राजशार्दूल चेह देहस्य शासनम् ॥ १७ ॥ इदानीं मे च किं कार्यं तन्ममाचक्ष्व पृच्छतः ॥ एवमुक्तस्ततो राजा वसिष्ठेन महात्मना ॥ १८ ॥ सर्वं पद्मस्य वृत्तान्तं कथयामास च प्रभुः ॥ तं श्रुत्वा स मुनिस्तत्र साधु राजन्त्थात्रवीत् ॥ १९ ॥ असाधुरय चातिदुस्तस्मात्कुष्ठित्वमागतः ॥ एवमुक्तस्तदा राजा वेपमानः कृताञ्जलिः ॥ २० ॥ पप्रच्छ साध्वहं विप्र कथं वासाध्वहं मुने ॥ कुष्ठं कथं मे सञ्जातमेतन्मे क्कुमर्हसि ॥ २१ ॥ वसिष्ठ उवाच ॥ एतद्ब्रह्मोद्भवं नाम पद्मं त्रैलोक्यविश्रुतम् ॥ दृष्टमात्रेण चानेन दृष्टाः स्युः सर्वदेवताः ॥ २२ ॥ एतस्मिन्दृश्यते चैतत् पण्मासं कापि पार्थिव ॥ एतस्मिन्दृष्टमात्रे तु यो जलं विशते नरः ॥ २३ ॥ सर्वपापाद्विनिर्मुक्तः परं निर्वाणमर्हति ॥ ब्रह्मणः प्रागवस्थायां मूर्त्तिरप्सु व्यवस्थिता ॥ २४ ॥ एतां दृष्ट्वा जले मग्नः संसाराद्धि प्रमुच्यते ॥ इमं च दृष्ट्वा ते सूतो जले मग्नो नरोत्तम ॥ २५ ॥ प्रविष्टोयं पुनरिमं हन्तुमिच्छन्नराधिप ॥ प्रातवानासि दुर्बुद्धे कुष्ठित्वं पापपूरुष ॥ २६ ॥ दृष्टमेतत्त्वया यस्मात्त्वं

साध्विति ततः प्रभो ॥ मयोक्तो मोहमापन्नस्तेनासावुरितीरितः ॥ २७ ॥ ब्रह्मपुत्रो वदन्नेवं नृपादन्तोर्हितोऽभवत् ॥ स तद्वचनमाकर्ण्य राजापि परमेश्वरम् ॥ २८ ॥ अहन्यहनि चागच्छत्तं पुनर्दृष्टवानपि ॥ देवा अपि वदन्त्येते पद्मं काञ्चनमुत्तमम् ॥ २९ ॥ मानसे ब्रह्मपद्मं तु दृष्ट्वा चात्रगतं हरिम् ॥ प्राप्स्यामस्तत्परं ब्रह्म यद्गत्वा न पुनर्भवेत् ॥३०॥ इदं च कारणं चान्यत्कुष्ठस्य शृणु पार्थिव ॥ आदित्यः पद्मगर्भोऽस्मिन् स्वयमेव व्यवस्थितः ॥ ३१ ॥ तं दृष्ट्वा तत्त्वतो भावः परमात्मेष शाश्वतः ॥ धारयामि शिरस्येनं ततः ख्यातिर्भविष्यति ॥ ३२ ॥ इतीमं भावमास्थाय मृतोऽयं प्रेषितस्त्वया ॥ तत्क्षणादेव स मृतः त्वं च कुष्ठित्वमागतः ॥ ३३ ॥ तस्मात्त्वमपि राजेन्द्र व्रतमेतत्समाचर ॥ व्रतस्यास्य प्रभावेण कुष्ठरोगात्प्रमुच्यसे ॥ ३४ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतास्वारोग्यव्रतं नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ अथ पुत्रप्राप्तिव्रतम् ॥ अगस्त्य उवाच ॥ अथापरं महाराज पुत्रप्राप्तिव्रतं शुभम् ॥ कथयामि समासेन तन्मे निगदतः शृणु ॥ १ ॥ मासे भाद्रपदे या तु कृष्णपक्षे नरेश्वर ॥ अष्टम्यामुपवासेन पुत्रप्राप्तिव्रतं हि तत् ॥ २ ॥ सप्तम्यां चैव सङ्कल्प्य अष्टम्यामर्चयेद्धरिम् ॥ देवक्युत्सङ्गगं विष्णुं मातृभिः परिवेष्टितम् ॥ ३ ॥ प्रभाते विमलेऽष्टम्यामर्चयेत्प्रयतो हरिम् ॥ प्राग्विधानेन गोविन्दमर्चयित्वा विधानतः ॥ ४ ॥ ततो यवैः कृष्णतिलैः सघृतैर्होमयेद्धवि ॥ ब्राह्मणान्भोजयेद्भक्त्या यथाशक्त्या सदक्षिणम् ॥ ५ ॥ ततः स्वयं तु भुञ्जीत प्रथमं बिल्वमुत्तमम् ॥ पश्चाद्यथेष्टं भुञ्जीत क्षेत्रैः सर्वैरसंयुतम् ॥ ६ ॥ प्रतिमासमनेनैव विधिनोपोष्य मानवः ॥ कृष्णाष्टम्यां व्रतं कृत्वा अपुत्रः पुत्रवान्भवेत् ॥ ७ ॥ श्रूयते च पुरा राजा शूरसेनः प्रतापवान् ॥ अपुत्रः स तपस्तेपे पर्वते च हिमालये ॥ ८ ॥ तस्यैवं कुर्वतो देवो व्रतमेतज्जगाद ह ॥ सोऽप्येतत्कृतवाञ्राजा पुत्रं चैवोपलब्धवान् ॥९॥ वसुदेवं महाभागमनेकव्रतयाजिनम् ॥ तं लब्ध्वा सोऽपि राजर्षिः परं निर्वाणमाप्तवान् ॥१०॥ एवं कृष्णाष्टमी राजन्मया ते परिकीर्त्तिता ॥ संवत्सरान्ते दातव्यं गोयुग्मं तु द्विजातये ॥ ११ ॥ एतत्पुत्रव्रतं नाम मया ते परिकीर्त्तितम् ॥ एवंकृत्वा नरः पापैः सर्वैरेव प्रमुच्यते ॥१२ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु पुत्रप्राप्तिव्रतं नाम त्रिषष्टितमोऽध्यायः ॥६३॥ अथ शौर्यव्रतम् ॥ अगस्त्य उवाच ॥ अथापरं प्रवक्ष्यामि शौर्यव्रतमनुत्तमम् ॥ येन भीरोरपि महच्छौर्यं भवति तत्क्षणात् ॥१॥ मासि चाश्वयुजे शुद्ध

नवम्यां समुपोषयेत् ॥ सप्तम्यां कृतसङ्कल्पः स्थित्वाष्टम्यां निरोदनः ॥ नवम्यां प्राशयेत्पिष्टं प्रथमं भक्तितो नृप ॥ २ ॥ ब्राह्मणान्भोजये
द्भक्त्या देवीं चैव तु पूजयेत्॥दुर्गां देवीं महाभागां महमायां महाप्रभाम्॥३॥एवं संवत्सरं यावदुपोष्येतिविधानतः ॥व्रतान्ते भोजयेद्धीमान्यथा
शक्त्या कुमारिकाः ॥४॥ हेमवस्त्रादिभिस्तास्तु भूषयित्वा तु शक्तितः ॥ पश्चात्समापयेत्तां तु देवीं मे प्रीयतामिति॥५॥ एवं कृते अष्टराज्यो
लभेद्राज्यं न संशयः ॥ अविद्यो लभते विद्यां भीतः शौर्यं च विन्दति ॥ ६ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु शौर्यव्रतं नाम चतुःषष्टित
मोऽध्यायः ॥ ६४ ॥ अथ सार्वभौमव्रतम् ॥ अगस्त्य उवाच ॥ सार्वभौमव्रतं चान्यत्कथयामि समासतः ॥ येन सम्यक्कृतेनाशु सार्वभौमो
नृपो भवेत् ॥ १॥ कार्त्तिकस्य तु मासस्य दशमी शुक्लपक्षगा ॥ तस्यां नक्ताशनो भूत्वा दिक्षु शुद्धबलिं हरेत् ॥२॥ विचित्रैः कुसुमैर्भक्त्या
पूजयित्वा द्विजोत्तमान् ॥ दिशां तु प्रार्थनां कुर्यान्मन्त्रेणानेन सुव्रतः ॥३ ॥ सर्वा भवत्यः सिध्यन्तु मम जन्मनि जन्मनि ॥ एवमुक्त्वा बलिं
ताभ्यो दत्त्वा शुद्धेन चेतसा ॥४ ॥ ततो रात्रौ स भुञ्जीत दध्यन्नं तु सुसंस्कृतम् ॥ पूर्वं पश्चाद्यथेष्टं तु एवं संवत्सरं नृप ॥ ५ ॥ यः करोति
नरो नित्यं तस्य दिग्विजयो भवेत् ॥ एकादश्यां निराहारो नरः कुर्याद्व्यथाविधि ॥६॥ मार्गशीर्षे शुक्लपक्षादारभ्याद्यं विचक्षणः ॥ तद्व्रतं धन
दस्येष्टं कृत वित्तं प्रयच्छति ॥ ७ ॥ एकादश्यां निराहारो यो भुंक्ते द्वादशीदिने ॥ शुक्ले वाप्यथवा कृष्णे तद्व्रतं वैष्णवं महत् ॥ ८ ॥ एवं
चीर्णं सुघोराणि हन्ति पापानि पार्थिव ॥ त्रयोदश्यां तु नक्तेन धर्मव्रतमथोच्यते ॥ ९ ॥ शुक्लपक्षे फाल्गुनस्य तथारभ्य विचक्षणः ॥ रौद्रव्रतं
चतुर्दश्यां कृष्णपक्षे विशेषतः ॥ १०॥ माघमासात्तथारभ्य पूर्णं संवत्सरं नृप ॥ इदं व्रतं तु पञ्चम्यां शुद्धायां नक्तभोजनम् ॥ पितृव्रतममायां
स्यादिति राजन् तथेरितम् ॥११॥दश पञ्च च वर्षाणि य एवं कुरुते नृप ॥ तिथिव्रतादिकं तस्य फलं स्यात्तत्प्रमाणतः ॥ १२॥ अश्वमेध
सहस्राणि राजसूयशतानि च ॥ इष्टानि तेन राजेन्द्र कल्पोक्तव्रतकारिणा॥१३॥ एकमेव कृतं हन्ति व्रतं पापानि नित्यशः ॥१४॥ यः पुनः
सर्वमेतद्धि कुर्यान्नरवरात्मजः ॥ स शुद्धो विरजाँल्लोकानाप्नोति सकलाञ्नृप ॥ १५ ॥ इति श्रीवराहपुराणेऽगस्त्यगीतासु सार्वभौमव्रतं नाम
पञ्चषष्टितमोऽध्यायः ॥६५॥ अथ नारदपुराणार्थपांचरात्रम् ॥ भद्राश्व उवाच ॥ आश्चर्यं यदि ते किंचिद्विदितं दृष्टमेव च ॥ तन्मे कथय

धर्मज्ञ परं कौतूहलं महत्॥ १ ॥अगस्त्य उवाच ॥ आश्चर्यरूपो भगवानेष एव जनार्दनः ॥ तस्याश्चर्याणि दृष्टानि बह्वानि विविधानि वै ॥२॥
श्वेतद्वीपगतः पूर्वं नारदः किल पार्थिव ॥ सोऽपश्यच्छंखचक्राब्जान्पुरुषांस्तिग्मतेजसः॥३॥ अयं विष्णुरयं विष्णुरेष विष्णुः सनातनः ॥ चिन्ताऽ
भूत्तस्य तान्दृष्ट्वा कोऽस्मिन्विष्णुरिति प्रभुः ॥ ४ ॥ एवं चिन्तयतस्तस्य चिन्ता कृष्णं प्रति प्रभो ॥ आराधयामि च कथं शंखचक्रगदा
धरम् ॥५॥ येन वेद्मि परं देवं कृष्णं नारायणं प्रभुम् ॥ एवं सञ्चिन्त्य दध्यौ स तं देवं परमेश्वरम् ॥६॥दिव्यं वर्षसहस्रं तु साग्रं ब्रह्मसुतस्तदा॥
ध्यातस्तस्य स देवोऽसौ परितोषं जगाम ह ॥ ७ ॥ उवाच स प्रसन्नात्मा प्रत्यक्षत्वं गतः प्रभुः ॥ वरं ब्रह्मसुत ब्रूहि किं ते दद्मि महामुने ॥८ ॥
नारद उवाच ॥ सहस्रमेकं वर्षाणां ध्यातस्त्वं भुवनेश्वर ॥ त्वत्प्राप्तियेन तद्ब्रूहि यदि तुष्टोऽसि मेऽच्युत ॥ ९ ॥ देवदेव उवाच ॥ पौरुषं
सूक्तमास्थाय ये यजन्ति द्विजाशु माम् ॥ ते मां प्राप्स्यन्ति सततं संहिताध्ययनेन च ॥ १० ॥ अलाभे वेदशास्त्राणां पञ्चरात्रोदितेन हि ॥
मार्गेण मां यजन्ते ये ते मां प्राप्स्यन्ति मानवाः ॥११॥ ब्राह्मणक्षत्रियविशां पञ्चरात्रं विधीयते ॥ शूद्रादीनां तु मे क्षेत्रपदवीगमनं द्विज ॥१२॥
मन्नाम विहितं तेषां नान्यत्पूजादिकं चरेत् ॥ एवं मयोक्तं विप्रेन्द्र पुराकल्पे पुरातनम् ॥ १३ ॥ पञ्चरात्रं सहस्राणां यदि कश्चिद्ग्रहीष्यति ॥
कर्मक्षये च मां काश्चिद्यदि भक्तो भविष्यति॥१४॥तस्य चेदं पञ्चरात्रं नित्यं हृदि वसिष्यति ॥ इतरे राजसैर्भावैस्तामसैश्च समावृताः ॥ १५ ॥
भविष्यन्ति द्विजश्रेष्ठ मय्यासनपराङ्मुखाः ॥ कृतं त्रेतां द्वापरं च युगानि त्रीणि नारद ॥ १६ ॥ सत्त्वस्था मां समेष्यन्ति कलौ रजस्त
मोऽधिकाः ॥ अन्यच्च ते वरं दद्मि शृणु नारद साम्प्रतम् ॥ १७ ॥ यदिदं पञ्चरात्रं मे शास्त्रं परमदुर्लभम् ॥ तद्भवान्वेत्स्यते सर्वं मत्प्रसादा
न्न संशयः ॥ १८ ॥ वेदेन पञ्चरात्रेण भक्त्या यज्ञेन च द्विज ॥ प्राप्योऽहं नान्यथा वत्स वर्षकोट्यायुतैरपि ॥ १९ ॥ एवमुक्त्वा स भगवा
न्नारदं परमेश्वरः ॥ जगामादर्शनं सद्यो नारदोऽपि दिवं ययौ ॥ २० ॥ इति श्रीवराहपुराणे अगस्त्यगीतासु नारदपुराणार्थसूचनं नाम षट्
पष्टितमोऽध्यायः ॥ ६६ ॥ अथ विष्वाश्वर्यम् ॥ भद्राश्व उवाच ॥ भगवन्तिसकृष्णे द्वे ये ते जगति सत्तम ॥ स्त्रियौ बभूवतुः के द्वे सिता
कृष्णा च का शुभा ॥ १ ॥ कश्चासौ पुरुषो ब्रह्मन्पावकः सप्तधाऽभवत् ॥ कोऽसौ द्वादशधा विप्र द्विर्देहः षट्शिराः प्रभुः ॥२॥ दाम्पत्यं च

द्विजश्रेष्ठ कृतसुयोंदयादलम् ॥ कस्मादेतच्जगदिदं वितर्तं द्विजसत्तम ॥३॥ अगस्त्य उवाच ॥ सितकृष्णे स्त्रियौ ये हि ते भगिन्यौ प्रकीर्तिते ॥
सितासिता द्विवर्णा च नारी रात्रिरुदाहृता ॥४॥ यः पुमान् सत्तया जात एकीभूत्वा नरेश्वर ॥ स समुद्रस्तु विज्ञेयः सप्त चैको व्यवस्थितः ॥५॥
योऽसौ द्वादशधा राजन्द्विदेहः षट्शिराः प्रभुः॥ संवत्सरः स विज्ञेयः शरीरे द्वे गती स्मृते ॥६॥ ऋतवः षट् च वक्राणि एष संवत्सरः स्मृतः ॥
दाम्पत्यं तदहोरात्रं सूर्याचन्द्रमसौ यतः ॥ ७॥ ततो जगत्समुत्तस्थौ देवादस्माच्च सत्तम ॥ स विष्णुः परमो देवो विज्ञेयो नृपसत्तम ॥८ ॥ नच
वेदक्रियाहीनः पश्यते परमेश्वरम् ॥ ९ ॥ इति श्रीवराहपुराणे अगस्त्यगतिासु विष्ण्वाश्चर्यं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ अथ प्राणि
तिहासवर्णनम् ॥ भद्राश्व उवाच ॥ योऽसौ सर्वगतो देवः परमात्मा व्यवस्थितः ॥ चतुर्युगे त्वसौ कीदृग्विज्ञेयः परमेश्वरः ॥ १ ॥ युगे युगे क
आचारो वर्णानां भविता मुने ॥ कथञ्च शुद्धिर्नियाणामन्यस्त्रीसङ्करे मुने ॥ २ ॥ अगस्त्य उवाच ॥ कृते युगे महीदेवैर्युज्यते वेदकर्मणा ॥
यजद्भिश्च सुरांस्त्रेता तद्वद्देवैश्च सत्तम ॥ ३ ॥ द्वापरे सत्त्वरजसा बहुले नृपसत्तम ॥ यावद्धर्ममुतो राजा भविष्यति महामते ॥४॥ ततस्तमः
प्रभविता कलिरूपो नरेश्वर ॥ तस्मिन् कलौ वर्तमाने स्वमार्गाच्यविता द्विजाः ॥ ५ ॥ राजानो वैश्यशूद्राश्च प्रायशो हीनजातयः ॥ भवि
ष्यन्ति नृपश्रेष्ठ सत्यशौचविवर्जिताः ॥ ६ ॥ ततो विनश्यते लोको वर्णधर्मश्च नश्यति ॥ भद्राश्व उवाच ॥ अगम्यागमनं कृत्वा ब्राह्मणः
क्षत्रियोऽपि वा ॥ ७ ॥ शूद्रोऽपि शुध्यते केन किं वागम्यं तु शुस्यते ॥ अगस्त्य उवाच ॥ चतुर्गामी भवेद्विप्रस्त्रिगामी क्षत्रियः स्मृतः ॥ ८ ॥
द्विगामी तु भवेद्वैश्यः शूद्र एकगमः स्मृतः ॥ अगम्या ब्राह्मणी प्राहुः क्षत्रियस्य नरेश्वरः ॥ ९ ॥ क्षत्रिया चापि वैश्यस्य शूद्रस्य स्वा च
पार्थिव ॥ अधमस्योत्तमा नारी त्वगम्या मनुरब्रवीत् ॥ १० ॥ माता मातृष्वसा श्वश्रूर्भ्रातृपत्नी च पार्थिव ॥ अधमस्योत्तमा नारी यत्नेन
परिवर्ज्यते ॥ ११ ॥ स्नुषां दुहितरं चैव मित्रपत्नीं च सर्वदा ॥ जाया स्वमातृजा चैव अगम्यास्ताः सुतास्त्रियः ॥१२॥ रजक्यादिषु चान्याश्च
स्त्रियोऽगम्याः प्रकीर्तिताः ॥ अगम्यागमनं चैतत्कृतं पापाय जायते ॥१३॥ वियोनिगमनादाशु ब्राह्मणाय भवत्यलम् ॥ शेषस्याशुद्धिरेषैवं
प्राणायामशतं भवेत् ॥ १४ ॥ बहुनापि हि कालेन यत्पापं समुपार्जितम् ॥ वर्णसङ्करसङ्कृत्या ब्राह्मणेन नरर्षभ ॥ १५ ॥ दशप्रणवगायत्री

प्राणायामशतैस्त्रिभिः ॥ मुच्यते ब्रह्महत्यायाः किम्पुनः शेषपातकैः ॥ १६ ॥ अथवा पररूपं यो देवं ब्राह्मणपुङ्गवः ॥ वेत्ति व्यानादिभिः पूजां
न स पापैर्हि लिप्यते ॥ १७ ॥ वेदाध्यायी पापशतैः कृतैरपि न लिप्यते ॥ स्मरन्विष्णुं पठन्वेदं ददन्दानं यजन्हरिम् ॥ १८ ॥ ब्राह्मणः शुद्ध
एवास्ते विरुद्धमपि तारयेत् ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोऽहं त्वया नृप ॥ १९ ॥ मन्वादिभिर्विस्तरशः कथितं यच्च पार्थिव ॥ समासत
स्तच्च मया कथितं नृपसत्तम ॥ २० ॥ इति श्रीवराहपुराणे प्रागितिहासेऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥ अथ नारायणाश्चर्यवर्णनम् ॥ भद्राश्व
उवाच ॥ भगवंस्त्वच्छरीरे तु यद्वृत्तं द्विजसत्तम ॥ चिरजीवी भवांस्तन्मे वक्तुमर्हसि सत्तम ॥ १ ॥ अगस्त्य उवाच ॥ मच्छरीरमिदं
राजन् बहुकोतूहलान्वितम् ॥ अनेककल्पसंस्थायि वेदाविद्याविशोधितम् ॥ २ ॥ अटन्नहं महीं सर्वां गतवानस्मि पार्थिव ॥ इलावृतं महावर्ष
मेरोः पार्श्वे व्यवस्थितम् ॥ ३ ॥ तत्र रम्यं सरो दृष्टं तस्य तीरे महाकुटी ॥ तत्रोपवासशिथिलं दृष्टवानस्मि तापसम् ॥ ४ ॥ अस्थिचर्मा
वशेषं तु चीरवल्कलधारिणम् ॥ तं दृष्ट्वाहं नृपश्रेष्ठ एष कस्तापसोत्तमः ॥५॥ विश्वस्य प्रतिपत्त्यर्थं मयोक्तः स द्विजोत्तमः ॥ ब्रह्मन्मे दयितां
किंचिद्गतोऽहं तवान्तिके॥६॥ इति मां स मुनिः प्राह स्वागतं ते द्विजोत्तम ॥ स्थीयतां स्थीयतां ब्रह्मन्नातिथ्य करवाणि ते ॥७॥एतच्छ्रुत्वा
वचस्तस्य प्रविष्टोऽहं कुटीं तु ताम् ॥ तावत्पश्याम्यहं विप्रं ज्वलन्तमिव तेजसा ॥ ८ ॥ भ्रूमौ स्थितं तु मां दृष्ट्वा हुङ्कारमकरोद्द्विजः ॥ तद्धु
ङ्कारात्र पातालं भित्त्वा पंच हि कन्यकाः ॥ ९ ॥ निर्ययुः कांचनं पीठमेका तासां तु गृह्य वै ॥ सा मां प्रादात्तदा कन्या सलिलं करसंस्थि
तम् ॥ १० ॥ गृहीत्वान्या तु मे पादौ क्षालितुं चोपचक्रमे ॥ अन्ये द्वे व्यजनं गृह्य मत्पक्षाभ्यां व्यवस्थिते ॥ ११ ॥ ततो हुङ्कारमकरोत्पुन
रेव महातपाः ॥ तच्छब्दानन्तरं हेमद्रोणीं योजनावस्तृताम् ॥ १२ ॥ गृह्याजगाम अकरोत्पूर्वं सरसि पार्थिव ॥ तस्यां तु कन्याः शतशो
हेमकुम्भकराः शुभाः ॥ १३ ॥ आययुस्ता अथो दृष्ट्वा स मुनिः प्राह मां नृप ॥ स्नानार्थं कल्पितं ब्रह्मन्नेदं ते सर्वमेव तु ॥ १४ ॥ द्रोणीं
प्रविश्य चैनां त्वं स्नातुमर्हसि सत्तम ॥ ततोऽहं तस्य वचनात्तस्यां द्रोण्यां नराधिप ॥ १५ ॥ विशामि तावत्सरसि सा द्रोणी प्रत्यमज्जत ॥
द्रोण्यां जले निमग्नोऽहं तमृषिं तच्च वै पुरम्॥ १६॥तावन्मेरुगिरेर्मूर्ध्नि पश्याम्यात्मानमात्मना॥समुद्रान् सप्त पश्यामि तथैव कुलपर्वतान्॥ १७॥

सप्तद्वीपवतीं पृथ्वीं दृष्टवानस्मि पार्थिव ॥ अद्यापि तं लोकवरं ध्यायंस्तिष्ठामि सुव्रत ॥ १८ ॥ कदा प्राप्स्येऽथ तं लोकमिति चिन्तापरोऽ
भवम् ॥ एवं ते कौतुकं राजन् कथितं परमेष्ठिनः ॥ यद्वृत्तं मम देहे तु किमन्यच्छ्रोतुमिच्छसि ॥ १९ ॥ इति श्रीवराहपुराणे नारायणाश्चर्य
कथनं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ अथ कृतत्रेताद्वापरादिविषयाः ॥ भद्राश्व उवाच ॥ भगवन् किं कृतं लोकं त्वया तमनुपश्यता ॥
व्रतं तपो वा धर्मो वा प्रार्थ्यर्थं तस्य वै मुने ॥ १ ॥ अगस्त्य उवाच ॥ अनाराध्य हरिं भक्त्या न लोकान् कामयेद्बुधः ॥ आराधिते हरौ लोकाः
सर्वे करतलेऽभवन् ॥ २ ॥ एवं संचिन्त्य राजेन्द्र मया विष्णुः सनातनः ॥ आराधितो वर्षशतं क्रतुभिर्भूरिदक्षिणैः ॥ ३ ॥ ततः कदाचि
द्बहुना कालेन नृपनन्दन ॥ यजतो मम देवेशं यज्ञमूर्त्तिं जनार्दनम् ॥ ४ ॥ आहूता आगता देवाः सममेव सवासवाः ॥ स्वे स्वे स्थाने स्थिता
आसन्यावद्देवाः सवासवाः ॥ ५ ॥ तावत्तत्रैव भगवानागतो वृषभध्वजः ॥ महादेवो विरूपाक्षस्त्र्यम्बको नलिलोहितः ॥ ६ ॥ सोऽपि रौद्रे
स्थितः स्थाने बभूव परमेश्वरः ॥ तान्सर्वानागतान्दृष्ट्वा देवानृषिमहोरगान् ॥ ७ ॥ सनत्कुमारो भगवानाजगामाब्जसम्भवः ॥ त्रसरेणुप्रमाणेन
विमाने सूर्यसन्निभे ॥ ८ ॥ अवस्थितो महायोगी भूतभव्यभविष्यवित् ॥ आगम्य शिरसा रुद्र स ववन्दे महामुनिः ॥ ९ ॥
तानहं संस्थितान्देवान्नारदादिनृषींस्तथा ॥ सनत्कुमाररुद्रौ च दृष्ट्वाहमिदमब्रुवम् ॥ १० ॥ कं एषां भवतां याज्यो वरिष्ठश्च नृपोत्तम ॥ एव
मुक्ते तदोवाच रुद्रो मां सुरसन्निधौ ॥ ११ ॥ रुद्र उवाच ॥ शृण्वन्तु विबुधाः सर्वे तथा देवर्षयोऽमलाः ॥ ब्रह्मर्षयश्च विख्याता सर्वे शृण्वन्तु
मे वचः ॥ १२ ॥ त्वं चागस्त्य महाबुद्धे शृणु मे गदतो वचः ॥ यो यज्ञैरिज्यते देवो यस्मात्सर्वमिदं जगत् ॥ १३ ॥ उत्पन्नं सर्वदा
यस्मिँल्लीनं भवति सामरम् ॥ नारायणः परो देवः सर्वरूपो जनार्दनः ॥ १४ ॥ त्रिधात्मानं स भगवान्ससर्ज परमेश्वरः ॥ रजस्तमोभ्यां
युक्तोऽभूद्ब्रह्मजः सत्त्वाधिकं विभुः ॥ १५ ॥ ससर्ज नाभिकमलाद्ब्रह्माणं कमलासनम् ॥ रजसा तमसा युक्तः सोऽपि मामसृजद्विभुः ॥ १६ ॥ ॥६६॥
यत्सत्त्वं स हरिर्देवो यो हरिस्तं परं पदम् ॥ ये सत्त्वरजसी सोऽपि ब्रह्मा कमलसम्भवः ॥ १७ ॥ यो ब्रह्मा सैव देवस्तु यो देवः स चतुर्मुखः ॥
यद्रजस्तमसोपेतं सोऽहं नास्त्यत्र संशयः ॥ १८ ॥ सत्त्वं रजस्तमश्चैव त्रितयं चेतदुच्यते ॥ सत्त्वेन मुच्यते जन्तुः सत्त्वं नारायण.

त्मकम् ॥ १९ ॥ रजसा सत्ययुक्तेन भवेत्सृष्टी रजोऽधिका ॥ तच्च पैतामहं वृत्तं सर्वशास्त्रेषु पठ्यते ॥ २० ॥ यद्वेदवाह्यं कर्म स्याच्छास्त्र मुद्दिश्य सेव्यते ॥ तद्रौद्रमिति विख्यातं तन्नेष्टं गदितं नृणाम् ॥ २१ ॥ यद्वा न रजसा कर्म केवलं तामसं तु यत् ॥ तद्दुर्गतिपरं नृणामिह लोके परत्र च ॥ २२ ॥ सत्त्वेन मुच्यते जन्तुः सत्त्वं नारायणात्मकम् ॥ नारायणश्च भगवान्यज्ञरूपी विभाव्यते ॥ २३॥ कृते नारायणः शुद्धः सूक्ष्मरूप उपास्यते ॥ त्रेतायां यज्ञरूपेण पंचरात्रेस्तु द्वापरे ॥ २४ ॥ कलौ मत्कृतमार्गेण बहुरूपेण तामसैः ॥ इज्यते द्वेषबुद्ध्या सः परमात्मा जनार्दनः ॥ २५ ॥ न तस्मात्परतो देवो भविता न भविष्यति ॥ यो विष्णुः स स्वयं ब्रह्मा यो ब्रह्मासो महेश्वरः ॥ २६ ॥ वेद त्रये च यज्ञेऽस्मिन्पिण्डतेष्येष निश्चयः ॥ यो भेदं कुरुतेऽस्माकं त्रयाणां द्विजसत्तम ॥२७॥ स पापकारी दुष्टात्मा दुर्गतिं समवाप्नुयात् ॥ इदं च शृणु मेऽगस्त्य गदतः प्राक्तनं तथा ॥ २८ ॥ यथाकल्पं हरेर्भक्तिं न कुर्वन्तीह मानवाः॥भूर्लोकवासिनः सर्वे पुरा यज्ञा जनार्दनम् ॥२९॥ भुवर्लोकं प्रपद्यन्ते तत्रस्था अपि केशवम् ॥ आराध्य स्वर्गतिं यान्ति क्रमान्मुक्त्वा व्रजन्ति हि ॥ ३० ॥ एवं मुक्तिपदे व्याप्ते सर्वलोकै स्तथैव च॥ मुक्तिभाजस्ततो देवास्तं दध्युः प्रयता हरिम् ॥३१ ॥ सोऽपि सर्वगतत्वाच्च प्रादुर्भूतः सनातनः॥उवाच ब्रूत किं कार्यं सर्वे योगि वराः सुराः॥ ३२॥ ते तं प्रणम्य देवेशमूचुश्च परमेश्वरम् ॥ देवदेव जनः सर्वो मुक्तिमार्गे व्यवस्थितः ॥३३॥ कथं सृष्टिश्च भविता नरकेषु च को वसेत् ॥ एवमुक्तस्ततो देवैस्तानुवाच जनार्दनः ॥ ३४ ॥ यूगानि त्रीणि बहवो मामुपेष्यन्ति मानवाः ॥ अन्त्ये युगे प्रविरला भविष्यन्ति मदाश्रयाः ॥ ३५ ॥ एष मोहं सृजाम्याशु यो जनं मोहयिष्यति ॥ त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥ ३६ ॥ अल्पायासं दर्शयित्वा मोहयाशु महेश्वर ॥ एवमुक्त्वा तदा तेन देवेन परमेष्ठिना ॥ ३७॥ आत्मा तु गोपितः सद्यः प्रकाशोऽहं कृतस्तदा ॥ तस्मादारभ्य कालात्तु मत्प्रणीतेषु सत्तम ॥ ३८ ॥ शास्त्रेष्वभिरतो लोको बाहुल्येन भवेदृतः ॥ वेदानुवर्तिनं मार्गं देवं नारायणं तथा ॥ ३९ ॥ एकीभावं च पश्यन्तो मुक्ताश्चैव भवन्ति ते ॥ मां विष्णोर्व्यतिरिक्तं ये ब्रह्मणश्च द्विजोत्तम ॥ ४० ॥ भजन्ते पापकर्माणस्ते यान्ति नरकं नराः ॥ ये वेदमार्गेनिर्मुक्तास्तेषां मोहार्थमेव च ॥४१॥ नयसिद्धान्तसंज्ञाभिर्मया शास्त्रं तु दर्शितम्॥पाशोऽयं पशुभावस्तु स यदा पतितो भवेत् ॥४२॥

तदा पाशुपतं शास्त्रं जायते वेदसंज्ञितम् ॥ वेदमूर्त्तिरहं विप्र नान्यशास्त्रार्थवादिभिः ॥ ४३ ॥ ज्ञायते मत्स्वरूपं तु मुक्त्वा देवमनादिवत् ॥ वेदवेद्योऽस्मि विप्रर्षे ब्राह्मणैश्च विशेषतः ॥ ४४ ॥ युगानि त्रीण्यहं विप्र ब्रह्मा विष्णुस्तथैव च ॥ त्रयोऽपि सत्त्वादिगुणास्त्रयो वेदास्त्रयोऽग्नयः ॥ ४५ ॥ त्रयो लोकास्त्रयः सन्ध्यास्त्रयो वर्णास्तथैव च ॥ सवनानि तु तावन्ति त्रिधा बद्धमिदं जगत् ॥ ४६ ॥ य एवं वेत्ति विप्रर्षे परं नारायणं तथा ॥ अपरं पञ्चयोनिं तु ब्रह्माणं त्वपरं तु माम् ॥ गुणतो मुख्यतस्त्वेक एवाहं मोह इत्युभे ॥ ४७ ॥ इति श्रीवराहपुराणे रुद्रगीतासु कृतत्रेताद्वापरवृत्तवर्णनं नाम सप्ततितमोऽध्यायः॥७०॥अथ कलियुगीया विषयाः ॥अगस्त्य उवाच॥एवमुक्तास्ततो देवा ऋषयश्च पिनाकिना ॥ अहं च नृपते तस्य देवस्य प्रणतोऽभवम् ॥ १ ॥ प्रणम्य शिरसा देवं यावत्पश्यामि भो नृप ॥ तावत्तस्यैव रुद्रस्य देहस्थं कमलासनम् ॥ २ ॥ नारायणं च हृदये त्रसरेणुसुसूक्ष्मकम् ॥ ज्वलद्भास्करवर्णाभं पश्यामि भवदेहतः ॥ ३ ॥ तं दृष्ट्वा विस्मिताः सर्वे याजका ऋषयोऽभवन् ॥ जयशब्दरवांश्चक्रुः सामऋग्यजुषां स्वनम् ॥ ४ ॥ कृत्वोचुस्तं तदा देवं किमिदं परमेश्वरम् ॥ एकस्यामेव मूर्त्तौ ते लक्ष्यन्ते च त्रिमूर्त्तयः ॥ ५ ॥ रुद्र उवाच ॥ यज्ञेऽस्मिन्यद्धुतं हव्यं मामुद्दिश्य महर्षयः ॥ ते त्रयोऽपि वयं भागं गृह्णीमः कविसत्तमाः ॥६॥ नास्माकं विविधो भावो वर्त्तते मुनिसत्तमाः ॥ सम्यग्दृशः प्रपश्यन्ति विपरीतेष्वनेकशः ॥७॥एवमुक्ते तु रुद्रेण सर्वे ते मुनयो नृप ॥ पप्रच्छुः शङ्करं देवं मोहशास्त्रप्रयोजनम् ॥ ८ ॥ ऋषय ऊचुः ॥ मोहनार्थं तु लोकानां त्वया शास्त्रं पृथक्कृतम् ॥ तत्त्वया हेतुना केन कृतं देव वदस्व नः ॥ ९ ॥ रुद्र उवाच ॥ अस्त्येकं भारते वर्षं वनं दण्डकसंज्ञितम् ॥ तत्र तीव्रं तपो घोरं गौतमो नाम वै द्विजः ॥ १० ॥ चकार तस्य ब्रह्मा तु परितोषं गतः प्रभुः ॥ उवाच तं मुनिं ब्रह्मा वरं ब्रूहि तपोधन ॥ ११ ॥ एवमुक्तस्तदा तेन ब्रह्मणा लोककर्तृणा ॥ उवाच तस्यपर्क्तिं मे धान्यानां देहि सङ्गता ॥ १२ ॥ एवमुक्तो ददौ तस्य तमेवार्थं पितामहः ॥ लब्ध्वा तु तं वरं विप्रः शतशृङ्गे महाश्रमम् ॥ १३ ॥ चकार तस्योपरि च पाकान्ते शालयो द्विजैः ॥ लूयन्ते तेन मुनिना मध्याह्ने पच्यते तथा ॥ १४ ॥ सर्वातिथ्यमसौ विप्रो ब्राह्मणेभ्यो ददात्यलम् ॥ कस्यचित्त्वथ कालस्य महती द्वादशाब्दिका ॥ १५ ॥ अनावृष्टिर्द्विजवर ह्यभवल्लोमहर्षिणी ॥ तां दृष्ट्वा

मुनयः सर्वे अनावृष्टिं वनेचराः ॥ १६ ॥ क्षुधया पीड्यमानाश्च प्रययुर्गौतमं तदा ॥ अथ तानागतान्दृष्ट्वा गौतमः शिरसा नतः ॥ १७ ॥
उवाच स्थीयतां मह्यं गृहे मुनिवरात्मजाः ॥ एवमुक्तास्तु ते तेन तस्थुर्वर्षविधभोजनम् ॥ १८ ॥ भुञ्जाना अनावृष्टिर्यावत्सा निवृत्ताऽभवत्॥
निवृत्तायां च ते तस्यामनावृष्ट्यां तु ते द्विजाः ॥ १९ ॥ तीर्थयात्रानिमित्तं तु प्रयातुमनसोऽभवन् ॥ तत्र शाण्डिल्यनामानं तापसं मुनिसत्तमम् ॥ २० ॥ प्रत्युवाचेति संचिन्त्य मारीचः परमो मुनिः ॥ मारीच उवाच ॥ शाण्डिल्य शोभनं वक्ष्ये पिता ते गौतमो मुनिः ॥ २१ ॥
तमनुक्त्वा न गच्छामस्तपश्चर्तुं तपोवनम् ॥ एवमुक्तेऽथ जहसुः सर्वे ते मुनयस्तथा ॥ २२ ॥ किमस्माभिः स्वको देहो विक्रीतोऽस्यान्नभक्षणात्॥एवमुक्त्वा पुनश्चेतुः सोपाधिं गमनं प्रति ॥२३ ॥ कृत्वा मायामयीं गां तु तच्छालायां व्यसर्जयन् ॥ तां चरन्तीं ततो दृष्ट्वा शालायां गौतमो मुनिः ॥ २४ ॥ गृहीत्वा सलिलं पाणौ प्राणिरुद्धे (?) त्यभाषत ॥ ततो मायामयी सा गौः पपात जलबिन्दुवत् ॥ २५ ॥ निहतां तां ततो दृष्ट्वा मुनीन् जिगमिषूंस्तथा ॥ उवाच गौतमो धीमांस्तान्मुनीन्प्रणतः स्थितः ॥२६॥ किमर्थं गम्यते विप्राः साधु शंसत मा चिरम्॥
मां विहाय सदा भक्तं प्रणतं च विशेषतः ॥ २७ ॥ ऋषय ऊचुः ॥ गोवध्येयमिह ब्रह्मन्यावत्तत्र शरीरगा ॥ तावद्वत्र न भुञ्जामो भवतोऽन्नं महामुने ॥ २८ ॥ एवमुक्तो गौतमस्तु तान्मुनीन्प्राह धर्मवित् ॥ प्रायश्चित्तं गोवधस्य दीयतां मे तपोधनाः ॥ २९ ॥ ऋषय ऊचुः ॥ इयं गौरमृता ब्रह्मन्मूर्च्छितेव व्यवस्थिता ॥ गङ्गाजलप्लुता चेयमुत्थास्यति न संशयः ॥३०॥ प्रायश्चित्तं मृतायाः स्यादमृतायाः कृतं त्विदम् ॥
व्रतं वा मा कृथाः कोपमित्युक्त्वा प्रययुस्तु ते ॥३१ ॥ गतेस्तेगौतमो धीमान् हिमवन्तं महागिरिम् ॥ आरिराधयिषुः प्रायात्तपुं चाशु महा तपः ॥ ३२ ॥ शतमेकं तु वर्षाणामहमाराधितोऽभवम् ॥ तुष्टेन च मया प्रोक्तो वरं वरय सुव्रत ॥ ३३ ॥ सोऽब्रवीन्मां जटासंस्थां देहि गङ्गां तपस्विनीम् ॥ मया सार्द्धं प्रयात्वेषा पुण्या भागीरथी नदी ॥३४॥ एवमुक्ते जटास्थडमेकं स प्रददौ शिवः ॥ तां गृह्य गतवान्सोऽपि यत्रास्ते सा तु गौर्मृता ॥ ३५ ॥ तज्जलप्लाविता सा गौर्गता चोत्थाय भामिनी ॥ नदी च महती जाता पुण्यतोया शुचिह्रदा ॥ ३६ ॥ तं दृष्ट्वा महदाश्चर्यं तत्र सप्तर्षयोऽमलाः ॥ आजग्मुश्च विमानस्थाः साधु साध्विति वादिनः ॥ ३७ ॥ साधु गोतम साधूनां कोऽस्ति वा सदृशं तव ॥ यदेवं

जाह्नवी देवी दण्डके चावतारिता ॥ ३८॥ एवमुक्तस्तदा तेस्तु गौतमः किमिदं त्विति ॥ गोवध्याकारणं मह्यं तावत्पश्यति गौतमः ॥ ३९ ॥ ऋषीणां मायया सर्वमिदं जातं विचिन्त्य वै ॥ शशाप तान् जटाभस्ममिथ्याव्रतधरांस्तथा ॥ ४० ॥ भविष्यथ त्रयीबाह्या वेदकर्म बहिष्कृताः ॥ तच्छ्रुत्वा क्रूरवचनं गौतमस्य महामुनेः॥४१॥ ऊचुः सप्तर्षयो मैवं सर्वकालं द्विजोत्तम ॥ एवन्तु किन्तु ते वाक्यं मोघं नास्त्यत्र संशयः ॥ ४२ ॥ यदि नाम कलौ सर्वं भविष्यन्ति द्विजोत्तमाः ॥ उपकाराण एते हि अपकर्त्तोर एव तु ॥ ४३ ॥ इत्थम्भूता अपि कलौ भक्तिभाजो भवन्तु ते ॥ त्वद्वाक्यवह्निनिर्दग्धाः सदा कलियुगे द्विजाः ॥ ४४ ॥ भविष्यन्ति क्रियाहीना वेदकर्मबहिष्कृताः ॥ अस्याश्च गौणं नामेह नदी गोदावरीति च ॥ ४५ ॥ एतां प्राप्य कलौ ब्रह्मन्गां ददन्ति जनाश्च ये ॥ यथाशक्त्या तु दानानि मोदन्ते त्रिदशैः सह ॥ ४६ ॥ सिंहस्थे च गुरौ तत्र यो गच्छति समाहितः ॥ स्नात्वा च विधिना तत्र पितॄंस्तर्पयते तथा॥४७॥स्वर्गं गच्छन्ति पितरो निरये पतिता अपि॥ स्वर्गस्थाः पितरस्तस्य मुक्तिभाजो न संशयः ॥ ४८ ॥ त्वं स्यातिं महतीं प्राप्य मुक्तिं यास्यसि शाश्वतीम् ॥ एवमुक्त्वाथ मुनयो ययुः कैलासपर्वतम् ॥ ४९ ॥ यत्राहमुमया सार्द्धं सदा तिष्ठामि सत्तमाः ॥ ऊचुर्मां ते च मुनयो भवितारो द्विजोत्तमाः ॥ ५० ॥ कलौ त्वद्रूपिणः सर्वे जटामुकुटधारिणः ॥ स्वेच्छया प्रेतवेषाश्च ममथ्यालिङ्गधराः प्रभो ॥ ५१ ॥ तेषामनुग्रहार्थाय किंचिच्छास्त्रं प्रदीयताम् ॥ ये चास्म द्वंशजाः सर्वे वर्त्तेयुः कलिपीडिताः ॥ ५२ ॥ एवमभ्यर्थितस्तैस्तु पुराहं द्विजसत्तम ॥ वेदाक्रियासमायुक्तां कृतवानस्मि संहिताम् ॥ ५३ ॥ निःश्वासाख्यां ततस्तस्यां लीना वाभ्रव्यशाण्डिलाः ॥ अल्पापराधं श्रुत्वैव गतास्ते दाम्भिकाभवन् ॥ ५४ ॥ मयैव मोहितास्ते तु भविष्य ज्ञानता द्विजाः ॥ लोल्यार्थिनः स्वशास्त्राणि कारिष्यन्ति कलौ नराः ॥ ५५ ॥ निःश्वाससंहिताया हि लक्षमात्रं प्रमाणतः ॥ सैव पाशुपती दीक्षा योगः पशुपतेस्तथा ॥ ५६ ॥ एतस्माद्वेदमार्गाद्धि यदन्यादेह जायते ॥ तत्क्षुद्रकर्म विज्ञेयं रौद्रं शौचविवर्जितम् ॥ ५७ ॥ ये रुद्रमुप जीवन्ति कलौ वेदान्तिका नराः ॥ लोल्यार्थिनः स्वशास्त्राणि कारिष्यन्ति कलौ नराः ॥ ५८ ॥ उच्छुष्मरुद्रास्ते ज्ञेया नाहं तेषु व्यवस्थितः ॥ भैरवेण स्वरूपेण देवकार्यं यदा पुरा ॥ ५९ ॥ नत्तिं तु मया सोऽयं सम्बन्धः क्रूरकर्मणाम् ॥ क्षयं निनीषता दैत्यान्सोऽट्टहासो मया

कृतः॥६०॥ यः पुरा तत्र ये मह्यां पतिता अश्रुबिन्दवः॥ असंख्यातास्तु ते रौद्रा भविताशे महीतिळे॥६१॥ उच्छुष्मनिरता रौद्राः सुरामांस प्रियाः सदा॥ स्त्रीलोलाः पापकर्माणः सम्भूता भूतलेषु ते॥ ६२॥ तेषां गोतमशापाद्धि भविष्यन्त्यन्त्ये द्विजाः॥ तेषां मच्छासनरताः सदा चाराश्च ये द्विजाः॥ ६३॥ स्वर्गं चैवापवर्गं च इत्युक्ता संशयात्पुरा॥ वेदान्तिकाऽधो यास्यन्ति मम सन्ततिदूषकाः॥ ६४॥ प्रागोतमाऽग्निना दग्धाः पुनर्मद्वचनाद्विजाः॥ नरकं तु गमिष्यन्ति नात्र कार्या विचारणा॥ ६५॥ रुद्र उवाच॥ एवं मया ब्रह्मसुताः प्रोक्ता जग्मुर्यथागतम्॥ गोतमोऽपि स्वकं गेहं जगामाशु परन्तपः॥ ६६॥ एतद्वः कथितं विप्रा मया धर्मस्य लक्षणम्॥ एतस्माद्विपरीतो यः स पाषण्डरतो भवेत्॥ ६७॥ इति श्रीवराहपुराणे रुद्रगीतासु ब्राह्मणानां शापो नाम एकसप्ततितमोऽध्यायः॥ ७१॥ अथ प्रकृतिपुरुषनिर्णयः॥ वराह उवाच॥ सर्वज्ञं सर्वकर्तारं भवं रुद्रं पुरातनम्॥ प्रणम्य प्रयतोऽगस्त्यः पप्रच्छ परमेश्वरम्॥१॥ अगस्त्य उवाच॥ भवान् ब्रह्मा च विष्णुश्च त्रयमेतत्त्रयी स्मृता॥ दीपोऽग्निर्दीपसंयोगैः सर्वशास्त्रेषु सर्वगः॥ २॥ कस्मिन् प्रधानो भगवान् काले कस्मिन्नधोक्षजः॥ ब्रह्मा वा एतदाचक्ष्व मम देव त्रिलोचन॥ ३॥ रुद्र उवाच॥ विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते॥ वेदासिद्धान्तमार्गेषु तन्न जानन्ति मोहिताः॥ ४॥ विश्व प्रवेशने धातुस्तत्र स्रुप्त्ययादनु॥ विष्णुर्यः सर्वदेवेषु परमात्मा सनातनः॥ ५॥ योऽयं विष्णुस्तु दशधा कीर्त्यते चैकधा द्विजाः॥ स आदित्यो महाभाग योगैश्वर्यसमन्वितः॥ ६॥ यो देवकार्याणि सदा कुरुते परमेश्वरः॥ मनुष्यभावमाश्रित्य स मां स्तौति युगे युगे॥ ७॥ लोकमार्गप्रवृत्त्यर्थं देवकार्यार्थसिद्धये॥ अहं च तौ सदा स्तौमि श्वेतद्वीपे कृते युगे॥ ८॥ सृष्टिकाले चतुर्वक्त्रं स्तौमि कालो भवानिति च॥ ब्रह्मा देवासुराः स्तौति मां सदा तु कृते युगे॥९॥ लिङ्गघ्रार्त्ते च मां देवा यजन्ते भोगकाङ्क्षिणः॥ सहस्रशीर्षकं देवं मनसा तु मुमुक्षवः॥१०॥ यजन्ते यं स विश्वात्मा देवो नारायणः स्वयम्॥ ब्रह्मयज्ञेन ये नित्यं यजन्ते द्विजसत्तम॥११॥ ते ब्रह्माणं प्रीणयन्ति वेदो ब्रह्मा प्रकीर्त्तितः॥ नारायणः शिवो विष्णुः शङ्करः पुरुषोत्तमः॥१२॥ एतेषु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्॥ कर्म्मवेदयुजां विप्र ब्रह्मा विष्णुर्महेश्वरः॥ १३॥ वयं त्रयोऽपि मन्त्राद्या नात्र कार्या विचारणा॥ अहं विष्णुस्तथा वेदा ब्रह्मकर्माणि

चाप्युत ॥ १४ ॥ एतत्त्रयं त्वेकमेव न पृथग्भावयेत्सुधीः ॥ योऽन्यथा भावयेदेतत्पक्षपातेन सुव्रत ॥ १५ ॥ स याति नरकं घोरं तेनैवं पापपूरुषाः ॥ अहं ब्रह्मा च विष्णुश्च ऋग्यजुःसाम चैव तु ॥ तेनास्मिन् भेदमप्याहुः सर्वेषां द्विजसत्तमाः ॥ १६ ॥ इति श्रीवराहपुराणे प्रकृतिपुरुषनिर्णये द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ अथ वैराजवृत्तम् ॥ रुद्र उवाच ॥ शृणु चान्यद्विजश्रेष्ठ कौतूहलसमन्वितम् ॥ अभूतपूर्वं सलिले मग्नेन मुनिपुङ्गव ॥ १ ॥ ब्रह्मणाहं पुरा सृष्टः प्रोक्तश्च सृज वै प्रजाः ॥ अविज्ञानसमर्थोऽहं निमग्नः सलिले द्विज ॥ २ ॥ तत्र यावत्क्षणं चैकं तिष्ठामि परमेश्वरम् ॥ अंगुष्ठमात्रपुरुषं ध्यायन्प्रयतमानसः ॥ ३ ॥ तावज्जलात्समुत्तस्थुः प्रलयाग्निसमप्रभाः ॥ पुरुषा दश चैकश्च ताप यन्तोंशुभिर्जलम् ॥ ४ ॥ मया पृष्टाः के भवन्तो जलादुत्तीर्य तेजसा ॥ तापयन्तो जलं चेदं क वा यास्यथ शंसत ॥५॥ एवमुक्ता मया ते तु नोचुः किंचन सत्तमाः ॥ एवमेव गतास्तूष्णीं ते नरा द्विजपुङ्गवाः ॥ ६ ॥ ततस्तेषामनु महापुरुषोऽतीव शोभनः ॥ स तस्मिन्मेघ सङ्काशः पुण्डरीकनिभेक्षणः ॥ ७ ॥ तमहं पृष्टवान्कस्त्वं के चेमे पुरुषा गताः ॥ किं वा प्रयोजनमिह कथ्यतां पुरुषर्षभ ॥ ८ ॥ पुरुष उवाच ॥ य एते वै गताः पूर्वं पुरुषा दीप्ततेजसः ॥ आदित्यास्तेऽजया यान्ति ध्याता वै ब्रह्मणाभवन् ॥ ९ ॥ सृष्टिं सृजति वै ब्रह्मा तदर्थं यान्त्यमी नराः ॥ प्रतिपालनाय तस्यास्तु सृष्टेर्देवं न संशयः ॥ १० ॥ शम्भुरुवाच ॥ जानीयां भगवन्कथं महापुरुषसत्तमम् ॥ भवेति नाम्ना तत्तत्त्वं कथयस्व परो ह्यहम् ॥ ११ ॥ एवमुक्तस्तु रुद्रेण स पुमान्प्रत्यभाषत ॥ अहं नारायणो देवो जलशायी सनातनः ॥ १२ ॥ दिव्यं चक्षुर्भवति वै तव मां पश्य यत्नतः ॥ एवमुक्तस्तदा तेन यावत्पश्याम्यहं तु तम् ॥ १३ ॥ तावदङ्गुष्ठमात्रं तु ज्वलद्भास्करतेजसम् ॥ तमेवाहं प्रपश्यामि तस्य नाभौ तु पङ्कजम् ॥ १४ ॥ ब्रह्माणं तत्र पश्यामि आत्मानं च तदंतिके ॥ एवं दृष्ट्वा महात्मानं ततो हर्षपुरा गतः ॥ १५ ॥ तं स्तोतुं द्विजशार्दूल मतिर्मे समजायत ॥ तस्यां मतौ तु जातायां स्तोत्रेणानेन सुव्रत ॥ १६ ॥ स्तुतो मया स विश्वात्मा तपसा स्मृतकर्मणा ॥१७॥ रुद्र उवाच ॥ नमोऽस्त्वनन्ताय विशुद्धचेतसे सरूपरूपाय सहस्रबाहवे ॥ सहस्रशीर्षप्रवराय वेधसे विशालदेहाय विशुद्धकर्मणे ॥ १८ ॥ समस्तविद्यार्त्तिहराय शम्भवे सहस्रसूर्यानिलतिग्मतेजसे ॥ समस्तविद्याविधृताय चक्रिणे समस्तगीर्वाणनुते सदा

॥५८॥

नमः ॥१९॥ अनादिदेवाच्युत शेषशेखर प्रभो विभो भूतपते महेश्वर॥मरुत्पते सर्वपते जगत्पते भुवःपते भुवनपते सदा नमः ॥२०॥ जलेश नारायण विश्वशङ्कर क्षितीश विश्वेश्वर विश्वलोचन॥शशाङ्क सूर्याच्युत वीर विश्वग प्रतर्क्यमूर्त्तेऽमृतमूर्त्तिरव्यय॥२१॥ ज्वलद्धुताशार्चिविरुद्ध मण्डल प्रपाहि नारायण विश्वतोमुख ॥ नमोऽस्तु देवातिहराभृताव्यय प्रपाहि मां शरणगतं सदाच्युत ॥ २२ ॥ वक्राण्यनेकानि विभो तवाहं पश्यामि मध्यस्तगतं पुराणम् ॥ ब्रह्माणमीशं जगतां प्रसूतिं नमोऽस्तु मह्यं तु पितामहाय ॥ २३ ॥ संसारचक्रभ्रमणैरनेकैः कचिद्भवान्देववरा दिदेव ॥ सन्मार्गिभिर्ज्ञानविशुद्धसत्त्वैरुपास्यसे किं प्रणमाम्यहं त्वाम् ॥ २४ ॥ एकं भवन्तं प्रकृतेः परस्ताद्यो वेत्ति वा सर्वविदादिदेव ॥ गुणा न तेषु प्रसभं विभेद्या विशालमूर्त्तिर्हि सुसूक्ष्मरूपः ॥ २५ ॥ वाग्योनिमात्रो विगतेन्द्रियोऽसि विकर्म्ममात्रान्न विगतैककर्म्मा ॥ संसारवांस्त्वं हि न तादृशोऽसि परं वपुर्दैव विशुद्धभावैः ॥ २६ ॥ संसारविच्छित्तिकरैर्यजद्भिरतोऽवसीयेत चतुर्मुखस्त्वम् ॥ परं न जानाति यतो वपुस्ते देवाद्ययोऽप्यद्भुतकारणं तत् ॥ २७ ॥ अतोऽवतारोक्तवतुं पुराणमाराधयेयुः कमलासनाद्याः ॥ न ते वपुर्विश्वसृगञ्जयोनिरेकान्ततो वेद महानुभावः ॥ २८ ॥ परं त्वहं वेद्मि कविं पुराणं भवन्तमाद्यं तपसा विशुद्धः ॥ पद्मासनो मे जनकः प्रसिद्धश्चेतः प्रसूतावतकृत्पुराणैः ॥ २९ ॥ सम्बुध्यते नाथ न मद्विधाऽपि विद्वर्भवन्तं तपसा विहीनाः ॥ ब्रह्मादिभिस्तत्प्रवरैरबोध्यं त्वां देवरूपाः समनन्तनत्या ॥ ३० ॥ प्रबोध मिच्छन्ति न तेषु बुद्धेरुदारकीर्त्तिष्वपि वेदहीनाः ॥ जन्मान्तरैर्वेदविदां विवेकैर्बुद्धिर्भवेन्नाथ तव प्रसादात् ॥३१॥ त्वद्भक्त्यलाभस्य न मानुषत्वं न देवगन्धर्वगतिः शिवं स्यात् ॥ त्वं विश्वरूपोऽसि भवान्सुसूक्ष्म स्थूलोऽसि चेदं कृतकृत्यताद्य ॥ ३२ ॥ स्थूलः सुसूक्ष्मः सुलभोऽसि देव त्वद्भाव्यवृत्त्या नरके पतन्ति ॥ किमुच्यते वा भवति स्थितेऽस्मिन्नाथे तु वस्त्वर्कमरुन्महीभिः ॥ ३३ ॥ सत्त्वैः सतोयैः समरूपधारि ण्यात्मस्वरूपे विततस्वभावे ॥ इति स्तुतीमें भगवाननन्त जुषस्व भक्तस्य विशेषतश्च ॥ ३४ ॥ सृष्टिं सृजस्वेति तवोदितस्य सर्वज्ञतां देहि नमोऽस्तु विष्णो ॥ चतुर्मुखो वा यदि कोटिवक्त्रो भवेन्नरः कोऽपि विशुद्धचेताः ॥ ३५ ॥ स मे गुणानामयुतैरनेकैर्वेदैस्तदा देववर प्रसीद ॥ समो विमुक्तस्य विशुद्धभावस्तद्भावभावैकमनोऽनुगस्य ॥ ३६ ॥ सदा हृदिस्थोऽसि भवान्नमस्ते न सर्वगस्यास्ति

पृथग्व्यवस्था ॥ इति प्रकाशं कृतमेतदीश स्तवं मया सर्वगतं विबुद्धा ॥ ३७ ॥ संसारचक्रक्रममाणयुक्त्या भीतं पुनीह्यच्युत केवल त्वम् ॥३८॥ वराह उवाच ॥ इति स्तुतस्तदा देवो रुद्रेणामिततेजसा ॥ उवाच वाक्यं सन्तुष्टो मेघगम्भीरनिःस्वनः ॥ ३९ ॥ विष्णुरुवाच ॥ वरं वरय भद्रं ते देवदेव उमापते ॥ न भेदश्चावयोर्देव एकावावामुभावपि ॥ ४० ॥ रुद्र उवाच ॥ ब्रह्मणाहं नियुक्तस्तु प्रजाः सृज इति प्रभो ॥ तत्र ज्ञानं प्रयच्छस्व त्रिविधं भूतभावन ॥४१॥ विष्णुरुवाच ॥ सर्वज्ञस्त्वं न सन्देहो ज्ञानराशिः सनातनः ॥ देवानां च परं पूज्यः सर्वथा त्वं भविष्यसि ॥४२॥ एवमुक्तः पुनर्वाक्यमुवाचोमापतिस्तदा ॥ अन्यं देहि वरं देव प्रसिद्धं सर्वजन्तुषु ॥ ४३॥ मूर्तौ भूत्वा भवानेव मामाराधय केशव ॥ मां वहस्व स देवेश वरं मत्तो गृहाण च ॥ येन त्वं सर्वदेवानां पूज्यात्पूज्यतरो भव ॥ ४४ ॥ देवकार्यावतारेषु मानुषत्वमुपागतः ॥ त्वामेवाराधयिष्यामि त्वं च मे वरदो भव ॥४५॥ यस्त्वयोक्तं वहस्वेति देवदेव उमापते ॥ सोऽहं वहामि देव त्वां मेघो भूत्वा शतं समाः ॥४६॥ एवमुक्त्वा हरिर्मेघः स्वयं भूत्वा महेश्वरम् ॥ उज्जहार जलात्तस्माद्वाक्यं देवमुवाच ह ॥४७॥ य एते दश चैकस्य पुरुषाः प्राकृताः प्रभो॥ते वैराजा महीं याता आदित्या इति संज्ञिताः॥४८॥मदंशो द्वादशो यस्तु विष्णुनामा महीतले ॥ अवतीर्णो भवन्तं तु आराधयति शंकर॥४९॥ एवमुक्त्वा स्वकादंशात्मद्वा दिव्यं धनं तथा ॥ नारायणः शार्ङ्गवच्च न विघ्नः क लयं गतः॥५०॥ रुद्र उवाच ॥ एवमेष हरिर्देवः सर्वगः सर्व भावनः ॥ वरदोऽभूत्पुरा मह्यं तेनाहं देवतैर्वरः॥५१॥नारायणात्परो देवो न भूतो न भविष्यति॥ एतद्रहस्यं वेदानां पुराणानां च सत्तम॥५२॥ मया वः कीर्तितं सर्वं यथा विष्णुरिहेज्यते ॥५३॥ इति श्रीवराहपुराणे रुद्रगीतासु वैराजवृत्तं नाम त्रयःसप्ततितमोऽध्यायः ॥ ७३ ॥ अथ भुवनकोशवर्णनम् ॥ वराह उवाच ॥ पुनस्ते ऋषयः सर्वे तं पप्रच्छुः सनातनम् ॥ रुद्रं पुराणपुरुषं शाश्वतं क्रतुमव्ययम् ॥ १ ॥ विश्वरूपमजं शम्भुं त्रिणेत्रं शूलपाणिनम् ॥ ऋषय ऊचुः ॥ त्वं परः सर्वदेवानामस्माकं च सुरेश्वर॥२॥ पृच्छामस्तेन त्वां प्रश्नमेकं तद्वक्तुमर्हसि ॥ भूमि प्रमाणं संस्थानं पर्वतानां च विस्तरम् ॥३॥ अस्माकं ब्रूहि कृपया देवदेव उमापते ॥रुद्र उवाच॥सर्वेष्वेव पुराणेषु भूर्लोकः परिकीर्त्यते ॥४॥ इदानीं च प्रवक्ष्यामि समासाद्धः क्षमातलम् ॥ तान्निबोधत धर्मज्ञा गदतो मम सत्तमाः ॥ ५ ॥ योऽसौ सकलविद्याबोधितपरमात्मरूपी विगत

कल्मषः परमाणुरचिन्त्यात्मा नारायणः सकलजोकव्यापी पीताम्बरोरुवक्षःक्षितिधरो गुणतः सूच्यते ॥ तमस्त्वप्रपंचमदीर्घमहस्वमकृशमजो हितमित्येवमाद्युपलक्षितविज्ञानमात्ररूपः स भगवांस्त्वप्रकारः सत्त्वरजस्तमोद्रिक्तः सलिलं ससर्ज ॥ तत्सृष्ट्वा आदिपुरुषः परमेश्वरो नारायणः सकलजगन्मयः सर्वमयो देवमयो यज्ञमय आपोमय आपोमूर्तिः॥ योगनिद्रया सुतस्य तस्य नाभौ तदब्जं निःससार ॥ तस्मिन्सकलवेदनिधिरिरचिन्त्यात्मा परमेश्वरो ब्रह्मा प्रजापतिरभवत् ॥ स च सनकसनन्दनसनातनसनत्कुमारादीञ्ज्ञानधर्मपूर्वमुत्पाद्य पश्चान्मनुं स्वायम्भुवं मरीच्यादीन्दक्षाद्यान्सासृजे ॥ यः स्वायम्भुवो मनुर्भगवता सृष्टः ॥ तस्मादारभ्य ध्रुवनस्यातिविस्तरो वर्ण्यते ॥ तस्य च मनोर्द्वौ पुत्रौ बभूवतुः प्रियव्रतोत्तानपादौ ॥६॥ प्रियव्रतस्य दश पुत्राः बभूवुः आग्नीध्रोऽग्निबाहुर्मेधो मेधातिथिर्ध्रुवो ज्योतिष्मान्द्युतिमान्हव्यो वपुष्मान्सवनान्तात्रः॥द्वितीयः स च प्रियव्रतः सप्तद्वीपेषु सप्तपुत्रान्स्थापयामास ॥ तत्र चाग्नीध्रं जम्बूद्वीपेश्वरं चक्रे शाकद्वीपेश्वरं मेधातिथिं ज्योतिष्मन्तं क्रौंचे द्युतिमन्तं शाल्मळे गोमेदस्येश्वरं हव्यं वपुष्मन्तं पुष्करद्वीपेश्वरं पुष्कराधिपतिं सवनमिति ॥ पुष्करेशस्यापि सवनस्य द्वौ पुत्रौ महावीतिधातकौ भवेताम्॥ तयोर्नाम्ना तो देशौ व्यवस्थितौ॥ धातके धातकीखण्डं कुमुदस्य च कौमुदम्॥शाल्मळाधिपतेरपि ज्योतिष्मतस्त्रयः पुत्राः स्युः कुशरेद्युतजीमूतवाहनाः ॥ तेषां नाम्ना ते देशा जाताः ॥ तथा च द्युतिमतः सप्त पुत्राः कुशळो मनुगव्यो रुतः पीवरोऽन्धकारकमुनिर्दुन्दुभिश्चेति तन्नाम्ना क्रौंचे सप्त महादेशनामानि ॥७॥ कुशद्वीपेश्वरस्यापि ज्योतिष्मतः सप्त पुत्राः। उद्भिदो वेणुमांश्चैव रथपाळो मनो धृतिः प्रभाकरः कपिळ इति ॥ तत्तन्नामानि वर्षाणि द्रष्टव्यानि ॥ शाकाधिपस्यापि मेधातिथेः सप्त पुत्राः नाभिशान्तभयाशीशिरसुखोदमनन्दाशिवक्षेमकध्रुवा इति ॥ तन्नामान्येव वर्षाणि नाभेर्हिमवन्तं हेमकूटं किम्पुरुषं नैषधं हरिवर्षं मेरुमध्यमिळावृतं नीलं रम्यकं श्वेतं हिरण्मयमुत्तरं च शृङ्गवन्तं कुरवो माल्यवन्तं भद्राश्वं गन्धमादनम् ॥ केतुमाळे तु ॥ एवं स्वायम्भुवेऽन्तरे भुवनप्रतिष्ठा ॥ कल्पे कल्पे चैवमेव सप्तसप्तपार्थिवैः क्रियते भूमेः पालनव्यवस्था च ॥ एष स्वभावः कल्पस्य सदा भवताति ॥८॥अत्र नाभेः सर्गं कथयामि । नाभिर्मेरुदेव्यां पुत्रमजनयद्यज्ञभनामानं तस्य भरतो जज्ञे पुत्रश्च तावदग्रजः तस्य भरतस्य पिता ऋषभः हेमाद्रेर्दक्षिणं वर्षं महद्भारतं नाम शशासा॥भरतस्य पुत्रः सुमतिस्तस्यं राज्यं दत्त्वा सोऽपि वनं ययौ ॥

सुनतेस्तेजस्तत्पुत्रः सत्सुतस्तत्स्याऽपीन्द्रद्युम्नस्तस्यापि परमेष्ठी तस्य प्रतिहर्ता तस्य निखातः निखातस्य उन्नेता उन्नेतुस्त्यभावस्तत्स्योद्गाता तस्य प्रस्तोता प्रस्तोतुर्विभुर्विभोः पृथुः पृथोरनन्तः अनन्तस्य गयः गयस्य नयः तस्य विराटः तस्य महावीर्यस्य सुधीमान्॥ ९॥ तस्य पुत्रशतं जज्ञे तेनेमा वर्द्धिताः प्रजाः ॥ तैरिदं भारतं वर्षं सप्तद्वीपं समाङ्कितम्॥१०॥ तेषां वंशप्रसूत्या तु भुक्तेयं भूमिरुत्तमा ॥ कृतत्रेतादि युक्त्या तु युगाख्या ह्येकसप्ततिः ॥११॥ भुवनस्य प्रसङ्गेन मन्वन्तरमिदं शुभम्॥ स्वायम्भुवं च कथितमपरं यन्निबोधत ॥१२॥ इति श्रीवराहपुराणे रुद्र गीतासु भुवनकोशवर्णनं नाम चतुःसप्ततितमोऽध्यायः॥७४॥ अथ जम्बूद्वीपमेरुनिरूपणम्॥ रुद्र उवाच ॥ अत ऊर्द्धं प्रवक्ष्यामि जम्बूद्वीपं यथा तथम् ॥ संख्या चापि समुद्राणां द्वीपानां चैव विस्तरम्॥१॥यावन्ति चैव वर्षाणि तेषु नद्यश्च याः स्मृताः ॥ महाभूतप्रमाणं च गतिं चंद्रार्कयोः पृथक् ॥ २ ॥ द्वीपभेदसहस्राणि सप्तस्वन्तर्गतानि च ॥ न शक्यन्ते क्रमेणेह वक्तुं येवैंततं जगत् ॥३॥ सप्त द्वीपान्प्रवक्ष्यामि चन्द्रादित्यग्रहैः सह ॥ येषां मनुष्यास्तर्कैण प्रमाणानि प्रचक्षते ॥ ४ ॥ अचिन्याः खलु ये भावा न तांस्तर्कैण साधयेत् ॥ प्रकृतेश्च परं यत्तु तदचिन्त्यं विभाव्यते ॥ ५ ॥ नववर्षं प्रवक्ष्यामि जम्बूद्वीपं यथातथम् ॥ विस्तारं मण्डलं चैव योजनैस्तन्निबोधत ॥ ६ ॥ शतमेकं सहस्राणां योजनानां समन्ततः ॥ नानाजनपदाकीर्णं योजनैर्विविधैः शुभैः ॥ ७ ॥ सिद्धचारणसङ्घीर्णं पर्वतैरुपशोभितम् ॥ सर्वधातुविवृद्धैश्च शिलाजालतसमुद्भवैः ॥ ८ ॥ पर्वतप्रभवाभिश्च नदीभिः सर्वतश्चितम् ॥ जम्बूद्वीपं पृथु श्रीमत्सर्वतः परिमण्डलम् ॥ ९ ॥ नवभिश्चावृतं श्रीमान्यत्रास्ते भूतभावनः ॥ लवणेन समुद्रेण सर्वतः परिवारितः ॥ १० ॥ जम्बूद्वीपश्च विस्तारात्समेन तु समन्ततः ॥ तस्य प्रागायता दीर्घाः षडेते वर्ष पर्वताः ॥ ११ ॥ उभयत्रावगाहाश्च समुद्रौ पूर्वपश्चिमौ ॥ हिमप्रायश्च हिमवान्हेमकूटश्च हेमवान् ॥ १२ ॥ सर्वत्र सुसुखश्चापि निषधः पर्वतो महान् ॥ चतुर्वर्णः ससौवर्णो मेरुश्चोक्तो मया गिरिः ॥ १३ ॥ वृत्ताकृतिप्रमाणश्च चतुरस्रः समुत्थितः ॥ नानावर्णः सुपाश्वैषु प्रजापति गणान्वितः ॥ १४ ॥ नाभिमण्डलसम्भूतो ब्रह्मणः परमेष्ठिनः ॥ पूर्वतः श्वेतवर्णस्तु ब्राह्मण्यं तेन तस्य तत् ॥ १५ ॥ पीतश्च दक्षिणेनासौ तेन वैश्यत्वमिष्यते ॥ भुङ्क्तपत्रनिभश्चासौ पश्चिमेन यतोऽथ सः ॥ १६ ॥ तेनास्य शूद्रता प्रोक्ता मेरोर्ग्रामार्थकर्मणः ॥ पाश्वैमुत्तरस्तस्य रक्त

वर्ण विभाव्यते ॥ १७॥ तेनास्य क्षत्रभावः स्यादिति वर्णाः प्रकीर्त्तिताः ॥ वृत्तः स्वभावतः प्रोक्तो वर्णतः परिमाणतः ॥१८॥ नलिश्च वैदूर्य मयः श्वेतशुक्लो हिरण्मयः ॥ मयूरबर्हिवर्णस्तु शातकौम्भस्य शृङ्गवान् ॥ १९॥ एते पर्वतराजा वै सिद्धचारणसेविताः ॥ तेषामन्तरविष्कम्भो नवसाहस्र उच्यते ॥ २० ॥ मध्ये त्विलावृतं नाम महामेरोस्तु सम्भवः ॥ तेनैव तु सहस्राणि विस्तीर्णः सर्वतश्च सः ॥ २१ ॥ मध्ये तस्य महामेरुर्विधूम इव पावकः ॥ वेद्यर्द्धे दक्षिणे मेरोरुत्तरार्द्धे तथोत्तरम् ॥ २२ ॥ षडत्र वर्षाणि यानि तेषां ते वर्षपर्वताः ॥ योजनाग्रं तु वर्षाणां सर्वेषां तद्विधीयते ॥ २३ ॥ द्वे द्वे वर्षे सहस्राणां राजन्यानां समुच्छ्रयः ॥ जम्बूद्वीपस्य विस्तारस्तेषामायाम उच्यते ॥ २४ ॥ योजनानां सहस्राणां शते द्वे चापि तौ गिरी ॥ नीलश्च निषधश्चैव ताभ्यां हनिश्च ये परे ॥ २५ ॥ श्वेतश्च हेमकूटश्च हिमवाञ्छृङ्गवांश्च यः ॥ जम्बूद्वीप प्रमाणेन निषधः परिकीर्त्तितः ॥ २६ ॥ तस्माद्दादशभागेन हेमकूटः प्रहीयते ॥ हिमवान्त्रिंशभागेन हेमकूटात्प्रहीयते ॥२७॥ अर्धांशाद्धिमवा ञ्छैल आयतः पूर्वपश्चिमे ॥ द्वीपस्य मण्डलीभावाद्भासवृद्धी प्रकीर्त्यते ॥ २८ ॥ वर्षाणां पर्वतानां च यथा चेमे तथोत्तरम् ॥ तेषां मध्ये जनपदास्तानि वर्षाणि चैव तत् ॥ २९ ॥ प्रपातविषमैस्तैस्तु पर्वतैरावृतानि तु ॥ सन्ततानि नदीभिर्दैरगम्यानि परस्परम् ॥ ३० ॥ वसन्ति तेषु सत्त्वानि नानाजातीनि सर्वशः ॥ एतद्धैमवतं वर्ष भारती यत्र सन्ततिः ॥ ३१ ॥ हेमकूटे परं यत्र नाम्ना किम्पुरुषोत्तमः ॥ हेमकूटात्तु निषधं हरिवर्षं तदुच्यते ॥ ३२ ॥ हरिवर्षात्परं चैव हेमपार्श्वे इलावृतम् ॥ इलावृतात्परं नीलं रम्यकं नाम विश्रुतम् ॥ ३३ ॥ रम्यकाच्च परं श्वेतं विश्रुतं तद्धिरण्मयम् ॥ हिरण्मयात्परं चैव शृङ्गवन्तं कुरु स्मृतम् ॥ ३४ ॥ धनुःसंस्थे तु द्वे वर्षे विज्ञेये दक्षिणोत्तरे ॥ द्वीपानां खलु चत्वारि चतुरस्रमिलावृतम् ॥ ३५ ॥ अर्वाक् च निषधस्याथ वेद्यर्द्धे दक्षिणं स्मृतम् ॥ परं शृङ्गवतो यच्च वेद्यर्द्धे हि तदुत्तरम् ॥ ३६ ॥ वेद्यर्द्धे दक्षिणे त्रीणि वर्षाणि त्रीणि चोत्तरे ॥ तयोर्मध्ये तु विज्ञेयो यत्र मेरुस्त्विलावृतः ॥ ३७ ॥ आयामतश्चतुस्त्रिंशत्सह स्राणि प्रकीर्त्तितः ॥ तस्य प्रतीच्यां विज्ञेयः पर्वतो गन्धमादनः ॥ ३८ ॥ आयामोच्छ्रायविस्तारात्तुल्यो माल्यवता तु सः ॥ परिमण्डल स्तयोर्मध्ये मेरुः कनकपर्वतः ॥३९॥ चतुर्वर्णः स सौवर्णश्चतुरस्रः समुत्थितः ॥ अव्यक्तघाततः सर्वे समुत्पन्ना जनादयः ॥ ४० ॥ अव्यक्त

पृथिवी पद्मं मेरुस्तस्य च कर्णिका ॥ चतुष्पत्रं समुत्पन्नं व्यक्तं पंचगुणं महत् ॥ ४१ ॥ ततः सर्गाः समुत्पन्ना विविता हि प्रवृत्तयः ॥ अनेक कल्पजीवाद्भिः पुरुषैः पुण्यकारिभिः ॥ ४२ ॥ कृतात्मभिर्महात्माभिः प्राप्यते पुरुषोत्तमः ॥ महायोगी महादेवो जगद्वन्द्यो जनार्दनः ॥४३॥ सर्वलोकगतोऽनन्तो व्यापको मूर्त्तिरव्ययः ॥ न तस्य प्राकृता मूर्त्तिर्मांसमेदोऽस्थिसम्भवा ॥ ४४ ॥ योगित्वाच्चेश्वरत्वाच्च सर्वरूपधरो विभुः ॥ तान्निमित्तं समुत्पन्नं लोके पद्म सनातनम् ॥ ४५ ॥ कल्पशेषस्य तस्यासौ कालस्य गतिरीदृशी ॥ तस्मिन्पद्मे समुत्पन्नो देवदेवश्चतुर्मुखः ॥ ४६ ॥ प्रजापतिर्तिदेवं ईशानो जगतः प्रभुः ॥ तस्य बीजनिसर्गे हि पुष्करस्य यथार्थवत् ॥ ४७ ॥ कृत्स्नं प्रजानिसर्गेण विस्तरेणैव वर्ण्यते ॥ तद्ग्रु वैष्णवः कायो यतो रत्नविभूषितः ॥ ४८ ॥ पद्माकारा समुत्पन्ना पृथिवी सवनहृदा ॥ तत्तस्य लोकपद्मस्य विस्तरं सिद्धभाषितम् ॥ ४९ ॥ वर्ण्यमानं विभागेन क्रमशः शृणुत द्विजाः ॥ महावर्षाणि ख्यातानि चत्वार्यत्र च संस्थिताः ॥ ५० ॥ तत्र पर्वतसंस्थानो मेरुर्नाम महाबलः ॥ नानावर्णैः स पार्श्वेषु पूर्वतः श्वेत उच्यते ॥५१॥ पीतं च दक्षिणे तस्य शृङ्गवर्णं तु पश्चिमम् ॥ उत्तरं रक्तवर्णं तु तस्य पार्श्वं महात्मनः ॥५२॥ मेरुस्तु शोभते शुङ्गो राजवंशैश्चधिष्ठितः ॥ तरुणादित्यसङ्काशो विधूम इव पावकः ॥५३॥ योजनानां सहस्राणि चतुरशीति समुच्छ्रितः ॥ प्रविष्टः षोडशाधस्ताद्विस्तृतः षोडशैव तु ॥५४॥ शरावसंस्थितत्वाच्च द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ विस्तारत्रिगुणश्चास्य परिणाहः समन्ततः ॥५५॥ मण्डलेन प्रमाणेन व्यस्यमानं तदिष्यते ॥ नवतिश्च सहस्राणि योजनानां समन्ततः ॥५६॥ ततः षट्काधिकानां च व्यस्यमानं प्रकीर्त्तितम् ॥ चतुरस्रेण मानेन परिणाहः समन्ततः ॥५७॥ स पर्वतो महादिव्यो दिव्योषधिसमन्वितः ॥ भवनैरावृतः सर्वैर्जीतरूपमयैः शुभैः ॥५८॥ तत्र देवगणाः सर्वे गन्धर्वोरगराक्षसाः ॥ शैलराजे प्रमोदन्ते तथैवाप्सरसां गणाः ॥५९॥ स तु मेरुः परिवृतो भवनैर्भूतभावनैः ॥ चत्वारो यस्य देशास्तु नानापाश्चष्वाधिष्ठिताः ॥६०॥ भद्राश्वो भारतश्चैव केतुमालश्च पश्चिमे ॥ उत्तरे कुरवश्चैव कृतपुण्यप्रतिश्रयाः ॥६१॥ कर्णिका तस्य पद्मस्य समन्तात्तं परिमण्डलम् ॥ योजनानां सहस्राणि योजनानां प्रमाणतः ॥६२॥ तस्य केसरजालानि नव पट्र च प्रकीर्त्तिताः ॥ चतुरशीतिरुत्सेधो विवरान्तर गोचराः ॥ ६३ ॥ त्रिंशच्चापि सहस्राणि योजनानां प्रमाणतः ॥ तस्य केसरजालानि विकीर्णानि समन्ततः ॥ ६४ ॥ शतसाहस्र आयामः

अर्शीतिः पृथुलानि च ॥ चत्वारि तत्र पर्वाणि योजनानां चतुर्दश ॥ ६५ ॥ तत्र या सा मया तुभ्यं कर्णिकेत्यभिविश्रुता ॥ तां वर्ण्यमानां मे काश्यारसमासेन निबोधत ॥ ६६॥ मणिपर्णशृतेश्चित्रां नानावर्णप्रभासिताम् ॥ अनेकपर्णनिचयं सौवर्णमरुणप्रभम् ॥ ६७ ॥ कान्तं सहस्रपर्णाणं सहस्रोदरकन्दरम् ॥ सहस्रशतपत्रं च वृतमेकं नगोत्तमम् ॥६८॥ मणिरत्नार्पितैः श्वभ्रैर्मणिचित्रिततोरणैः ॥ तत्र ब्रह्मसभा रम्या ब्रह्मर्षि जनसङ्कुला ॥ ६९ ॥ नाम्ना मनोवती सा तु सर्वलोकेषु विश्रुता ॥ तत्रेशानस्य देवस्य सहस्रादित्यवर्चसः ॥ ७० ॥ महाविमानसंस्थस्य महिमा वर्त्तते सदा ॥ तत्र सर्वे देवगणाश्चतुर्वक्त्रं स्वयं प्रभुम् ॥ ७१ ॥ इष्ट्वा पूज्य नमस्कारैरर्चनीयमुपस्थिताः ॥ येस्तदा जितसङ्कल्पैर्ब्रह्मचर्यं महात्मभिः ॥ ७२ ॥ चीर्णं चारुमनोभिश्च सदाचारपरिस्थितैः ॥ सम्यग्भक्तया सुतुष्टया च पितृदेवार्चने रताः ॥ ७३ ॥ गृहाश्रमपरास्तत्र विनीता अतिथिप्रियाः ॥ गृहिणः शुक्लकर्मस्था विरक्ताः कारणात्मकाः ॥ ७४ ॥ यमैर्नियमदानैश्च दृढनिर्दग्धकिल्बिषाः ॥ तेषां निवासः शुक्ले च ब्रह्मलोके ह्यनिन्दिते ॥ ७५ ॥ उपर्युपरि सर्वासां गतीनां परमा गतिः ॥ चतुर्दशसहस्राणि योजनानां तु कीर्तितम् ॥ ७६ ॥ तथोर्द्धरुचिरे कृष्णे तरुणादित्यवर्चसि ॥ महागिरौ ततो रम्ये रत्नधातुविचित्रिते ॥ ७७ ॥ नैकरत्नसमावासे मणितोरणमन्दिरे ॥ मेरुः सर्वेषु पार्श्वेषु समन्तात्परिमण्डले ॥ ७८ ॥ त्रिंशद्योजनताम्रं चक्रपादो नगोत्तमः ॥ दशयोजनविस्तीर्णा चक्रपादोपनिर्गता ॥ ७९ ॥ सा तूर्द्ध वाहिनी चापि नदी भूमौ प्रतिष्ठिता ॥ सा पुर्यामसमरावत्यां क्रममाणेन्दुसप्रभा ॥ ८० ॥ तया तिरस्कृता वापि सूर्येन्दुज्योतिषां गणाः ॥ उदयास्तमिते सन्ध्ये ये सेवन्ते द्विजोत्तमाः ॥ ८१ ॥ तानुष्यन्ते द्विजाः सर्वानष्टावप्यचलोत्तमान् ॥ परिश्रमज्योतिषां या सा रुद्रेन्द्रमता शुभा ॥ ८२ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे जम्बूद्वीपमेरुनिरूपणं नाम पंचसप्ततितमोऽध्यायः ॥ ७५ ॥ अथाष्टदिक्पालपुर्यः ॥ रुद्र उवाच ॥ तस्यैव मेरोः पूर्वे तु देशे परमवर्चसे ॥ चक्रपादपरिक्षिप्ते नानाधातुविराजिते ॥ १ ॥ तत्र सर्वामरपुरं चक्रपादसमुद्भवम् ॥ दुर्धर्षबलदृप्तानां देवदानवरक्षसाम् ॥ २ ॥ तत्र जाम्बूनदमयः सुप्राकारः सुतोरणः ॥ तस्याप्युत्तरपूर्वे तु देशे परमवर्चसे ॥ ३ ॥ अलोकजनसम्पूर्णा विमानशतसङ्कुला ॥ महावापीसमायुक्ता नित्यं प्रमुदिता शुभा ॥ ४ ॥ शोभिता पुष्पशबलैः पताकाध्वजमालिनी ॥ देवै

यक्षोऽप्सरोभिश्च ऋषिभिश्च सुशोभिता ॥५॥ पुरन्दरपुरी रम्या समृद्धा त्वमरावती ॥ तस्या मध्येऽमरावत्या वज्रवैदूर्यवेदिका ॥६॥ त्रैलोक्ये गुणविख्याता सुधर्मा नाम वै सभा ॥ तत्रास्ते श्रीपतेः श्रीमान्सहस्राक्षः शचीपतिः ॥ ७ ॥ सिद्धादिभिः परिवृतः सर्वाभिर्दैवयोनिभिः ॥ तत्र चैव तु वंशः स्याद्भास्करस्य महात्मनः ॥ ८ ॥ साक्षात्तत्र सुराध्यक्षः सर्वदेवनमस्कृतः ॥ तस्याश्च दिक्षु विस्तीर्णा तत्तद्गुणसमन्विता ॥ ९ ॥ तेजोवती नाम पुरी हुताशस्य महात्मनः ॥ तद्वद्धनवती रम्या पुरी वैवस्वतस्य च ॥ १० ॥ नाम्ना संयमनी नाम पुरी त्रैलोक्यविश्रुता ॥ तथा चतुर्थे दिग्भागे नैर्ऋताधिपतेः श्रुता ॥ ११ ॥ नाम्ना कृष्णवती नाम विरूपाक्षस्य धीमतः ॥ पंचमे ह्युत्तरपुटे नाम्ना शुद्धवती पुरी ॥ १२ ॥ उदकाधिपतेः ख्याता वरुणस्य महात्मनः ॥ तथा पंचोत्तरे देवस्यास्योत्तरपुटे पुरी ॥ १३ ॥ वायोर्गन्धवती नाम ख्याता सर्वगुणोत्तरा ॥ तस्योत्तरपुटे रम्या गुह्यकाधिपतेः पुरी ॥ १४ ॥ नाम्ना महोदया नाम शुभा वैदूर्यवेदिका ॥ तथाष्टमेऽन्तरपुटे ईशानस्य महात्मनः ॥ १५ ॥ पुरी मनोहरा नाम भूतैर्नानाविधैर्युता ॥ पुष्पैर्धर्म्यैश्च विविधैर्वनैराश्रमसंस्थितैः ॥ प्रार्थ्यते देवलोकोऽयं स स्वर्ग इति कीर्त्तितः ॥ १६ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशेऽष्टदिक्पालपुरीनिरूपणं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥ अथ मेरुवर्णनम् ॥ रुद्र उवाच ॥ यदेतत्कर्णिकामूलं मेरोर्मध्यं प्रकीर्त्तितम् ॥ तद्योजनसहस्राणि संख्यया मानतः स्मृतम् ॥ १ ॥ चत्वारिंशत्तथा चाष्टौ सहस्राणि तु मण्डलैः ॥ शैलराजस्य तत्तत्र मेरुमूलमिति स्मृतम् ॥ २ ॥ तेषां गिरिसहस्राणामनेकानां महोच्छ्रयः ॥ दिगष्टौ च पुनस्तस्य मर्यादापर्वताः शुभाः ॥ ३ ॥ जठरो देवकूटश्च पूर्वस्यां दिशि पर्वतौ ॥ मर्यादापर्वतानेतानतिक्रम्यावाङ्मनीषिणः ॥ ४ ॥ योऽसौ मेरुर्द्विजश्रेष्ठाः प्रोक्तः कनकपर्वतः ॥ दिक्स्थानस्य तु वक्ष्यामि शृणुध्वं गदतस्ततः ॥ ५॥ मर्यादायास्तु चत्वारो मेरोरस्य चतुर्दिशं ॥ येनाचलाः विधृन्धा सप्तद्वीपवती मही ॥ ६ ॥ दशयोजनसाहस्रं व्यायामस्तेषु शङ्क्यते ॥ तिर्यगूर्द्धं च रचिता हरितालतलैर्वृता ॥ ७ ॥ मनःशिलादरीभिश्च सुवर्णमणिचित्रिता ॥ अनेकसिद्धभवनैः क्रीडास्थानैश्च सप्रभा ॥ ८ ॥ पूर्वेण मन्दरस्तस्य दक्षिणे गन्धमादनः ॥ विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्थितः ॥ ९ ॥ तेषां शृङ्गेषु चत्वारो महावृक्षाः प्रतिष्ठिताः ॥ देवदैत्याप्सरोभिश्च सेविताः सुसमृद्धिभिः ॥ १० ॥ मन्दरस्य गिरेः शृङ्गे

कदम्बो नाम पादपः ॥ प्रलम्बशाखाशिखरः कदम्बश्चैव पादपः ॥ ११ ॥ महाकुम्भप्रमाणैश्च पुष्पैर्वर्षकचकसरैः ॥ महागन्धमनोज्ञैश्च शोभितः सर्वकालजः ॥ १२॥ समसेनापरिवृतो भुवनैर्भूतभावनैः ॥ सहस्रमधिकं सोऽथ गन्धेनापूरयन्दिशः ॥१३॥ भद्राश्वो नाम वृक्षोऽयं वर्षद्रिः केतुसम्भवः ॥ कीर्त्तिमान् रूपवाञ्छ्रीमान्महापादपपादपः ॥ १४॥ यत्र साक्षाद्ऋषीकेशः सिद्धमन्त्रैर्निषेवितः ॥ तस्य लोकसहस्रस्य तथा स्ववदनो हरिः ॥ १५ ॥ पृष्ठवांश्चामरश्रेष्ठः स हि सानुं पुनः पुनः ॥ तेन चालोकितं वर्षं सर्वद्रिपदनायकः ॥ यस्य नाम्ना समाख्यातो भद्राश्वेति न संशयः ॥ १६॥ दक्षिणस्यापि शैलस्य शिखरे द्वे च सेविते ॥ जम्बूसङ्गः पुष्पफलमहाशाखोपशोभितः ॥ १७॥ सदा ह्यतिसना मानि स्वादूनि सुरभीणि च॥फलान्यमृतकल्पानि पतन्ति गिरिमूर्धनि॥१८॥तस्माद्गिरिवरश्रेष्ठात्फलप्रस्तरवाहिनीः॥तत्र जाम्बूनदं नाम सुवर्णं मनलप्रभम् ॥ १९ ॥ देवालङ्कारमतुलमातिसुन्दरवर्चसम् ॥ देवदानवगन्धर्वयक्षराक्षसगुह्यकाः ॥ २० ॥ पिबन्त्यमृतकल्पं च प्रीत्या जम्बू फलासवम् ॥ मोक्षते दक्षिणे वर्षे जम्बूलोकेति विश्रुता ॥ २१ ॥ यस्या नाम्ना समाख्यता जम्बूद्वीपेति मानवैः ॥ विपुलस्य च शैलस्य दक्षिणेन महात्मनः ॥ २२ ॥ जातिशृङ्गोऽतिसुमहानश्वत्थश्चेति पादपः ॥ महोच्छ्रायो महास्कन्धो नैकसत्त्वगुणालयः ॥ २३ ॥ कुम्भ प्रमाणै रुचिरैः फलैः सर्वर्तुकैः शुभैः ॥ सकेतुकेतुमालाक्ष्य देवगन्धर्वसेवितैः ॥ २४ ॥ केतुमालेति यः ख्यातो नाम्ना तत्र प्रकीर्तितः ॥ तान्नि बोधत विप्रेन्द्रा निरुक्तं तेन वर्षकं ॥ २५ ॥ क्षीरोदमथने वृत्ते मालां स्कन्धानिषेवितां ॥ इन्द्रेण चैत्य केतोश्च केतुमालस्ततः स्मृतः ॥२६ ॥ तेन तच्चिह्नितं वर्षं केतुमालेति विश्रुतम् ॥ सुपार्श्वस्योत्तरे शृङ्गे वटो नाम महाद्रुमः ॥ २७ ॥ न्यग्रोधो विपुलस्कन्धो यस्त्रियोजनमण्डलः ॥ मात्यमानः कलापैश्च विविधैस्तु समन्ततः ॥२८॥ शाखाभिर्लम्बमानाभिः सेविते सिद्धसेविते ॥ प्रलम्बकुम्भसदृशैर्हेमवर्णफलैः सदा ॥ २९॥ सद्यस्ते वै ततस्तस्मिन्वटवृक्षप्रकाशकाः ॥ सनत्कुमारावरजा मानसा ब्रह्मणः सुताः ॥ ३० ॥ सत तत्र महाभागाः कुरवो नाम विश्रुताः ॥ तत्र स्थिरगतैः क्षान्तैर्नीरजस्कैर्महात्मभिः॥३१॥ अन्यैः स्वपक्षपर्यन्तैः खंप्राप्तास्ते सनातनाः॥तस्य नामाङ्कितं वर्षं सततिर्वै महात्मनः ॥३२॥ दिवि देवे च विख्याता भर्त्तारः कुरवः सदा ॥३३॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे मेरुवर्णनं नाम सप्तसप्ततितमोऽध्यायः ॥७७॥

अथ मन्दरादिपर्वतचतुष्टयवर्णनम् ॥ रुद्र उवाच ॥ तथा चतुर्णां वक्ष्यामि शैलेन्द्राणां यथाक्रमम् ॥ अनुविन्ध्यानि रम्याणि विहङ्गैः कूजितानि च ॥ १ ॥ अकेनपक्षियुक्तात्मशृङ्गाणि सुबहूनि च ॥ देवानां दिव्यनारीभिः समं क्रीडामयानि च ॥ २ ॥ किन्नरोद्गीतघुष्टानि शीतमन्दसुगन्धिभिः ॥ पवनैः सेव्यमानानि रमणीयतराणि च ॥३ ॥ चतुर्दिक्षु विराजन्ते नामतः शृणु ता नदीः॥ पूर्वे चैत्ररथं नाम दक्षिणे गन्धमादनम् ॥ ४ ॥ प्रभावेण सुतोयानि नवखण्डयुतानि च ॥ वनषण्डास्तथाक्रम्य देवता ललनायुताः ॥ ५ ॥ यत्र क्रीडन्ति चोद्देशे मुदा परमया युताः ॥ रत्नौघकीर्णतीर्थानि महापुण्यजलानि च ॥ ६ ॥ अनेकजलयन्त्रैश्च नादितानि महान्ति च ॥ शाखाभिर्लम्बमानाभिरुपक्षिप्तकुलालिभिः॥७॥ कमलोत्पलकल्हारशोभितानि सरांसि च ॥ चतुर्षु तेषु गिरिषु नानागुणयुतेषु च ॥ ८ ॥ अरुणोदं तु पूर्वेण दक्षिणे मानसं स्थितम्॥ असितोदं पश्चिमे च महाभद्रं तथोत्तरे॥९॥ कुमुदैः श्वेतकापिलैः कडारैर्भूषितानि च ॥ अरुणोदस्य ये शैलाः प्राच्या वै नामतः स्मृताः ॥ १० ॥ तान्कीर्त्यमानान्तत्त्वेन शृणुध्वं गदतो मम ॥ विकङ्को मणिशृङ्गश्च सुपात्रश्चोपलो महान् ॥ ११ ॥ महानीलोऽथ कुम्भश्च सुबिन्दुर्मदनस्तथा ॥ वेणुमद्धः सुमेदाश्च निषधो देवपर्वतः ॥ १२ ॥ इत्येते पर्वतवराः पुण्याश्च गिरयोऽपि च ॥ सरसो मानसस्येह दक्षिणेन महाचलाः ॥ १३ ॥ ये कीर्तिता मया तुभ्यं नामतस्तान्निबोध मे ॥ शैलाश्शिशिखरश्चैव शिशिरश्चाचलोत्तमः ॥ १४ ॥ कपिश्च शतमक्षश्च तुरगश्चैव सानुमान् ॥ ताम्राहश्च विषश्चैव तथा श्वेतोदनो गिरिः ॥ १५ ॥ समूलश्चैव सरलो रत्नकेतुश्च पर्वतः ॥ एकमूलो महाशृङ्गो गजमूलोऽपि शाल्वकः ॥ १६ ॥ पंचशैलश्च वैडालो हिमवानचलोत्तमः ॥ उत्तरा ये महाशैलास्तान्वक्ष्यामि निबोधत ॥ १७ ॥ कपिलः पिङ्गलो भद्रः सरसश्च महाचलः ॥ कुमुदो मधुमांश्चैव गर्जनो मर्कटस्तथा ॥१८॥ कृष्णश्च पाण्डवश्चैव सहस्रशिरसस्तथा ॥ पारियात्रश्च शैलेन्द्रः शृङ्गवानचलोत्तमः ॥ १९ ॥ इत्येते पर्वतवराः श्रीमन्तः पश्चिमे स्मृताः ॥ महाभद्रस्य सरस उत्तरेण द्विजोत्तमाः ॥ २० ॥ ये पर्वता स्थिता विप्रास्तान्वक्ष्यामि निबोधत ॥ हंसकूटो महाशैलो वृषहंसश्च पर्वतः ॥२१ ॥ कपिञ्जलश्च शैलेन्द्र इन्द्रशैलश्च सानुमान् ॥ नीलः कनकशृङ्गश्च शतशृङ्गश्च पर्वतः ॥२२॥ पुष्करो मेघशैलोथ विराजश्चाचलोत्तमः ॥ जारुचिश्चैव शैलेन्द्र इत्येते उत्तराः स्मृताः ॥२३॥ इत्येतेषां तु मुख्याना

सुत्तरेषु यथाक्रमम् ॥ स्थलीर्नगरद्रोणीश्च सरांसि च निबोधत ॥ २४ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे मन्दरादिपर्वतचतुष्टयवर्णनं नाम अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ अथ मेरोर्द्रोणीनां निरूपणम् ॥ रुद्र उवाच ॥ सीतान्तस्यांचलेन्द्रस्य कुमुदस्यान्तरेण च ॥ द्रोण्यां विहङ्गजुष्टायां नानासत्त्वनिषेवितायाम् ॥ १ ॥ त्रियोजनशतायामां शतयोजनविस्तृताम् ॥ सुरक्षामलपानीयां रम्यां तत्र सुरोचनीम् ॥ २ ॥ द्रोणमात्रप्रमाणैश्च पुण्डरीकैः सुगन्धिभिः ॥ सहस्रशतपत्रैश्च महापद्मैरलङ्कृतम् ॥३॥ देवदानवगन्धर्वैर्महासर्पैरधिष्ठितम् ॥ पुण्यं तच्छ्रीसरो नाम सप्रकाशमिवैव च ॥ ४ ॥ प्रसन्नसलिलैः पूर्णं शरण्यं सर्वदेहिनाम् ॥ तत्र त्वेकं महापद्मं मध्ये पद्मवनस्य च ॥ ५ ॥ कोटिपत्रप्रकलितं तरुणादित्यवर्चसम् ॥ नित्यं व्याकोचमधुरं चरत्वादतिमण्डलम् ॥६॥ चारुकेसरजालाढ्यं मत्तभ्रमरनादितम् ॥ तस्मिन्मध्ये भगवती साक्षाच्छ्री र्नित्यमेव हि ॥ ७ ॥ लक्ष्मीस्तु तं तदावासं मूर्त्तिमन्तं न संशयः ॥ सरसस्तस्य तीरे तु तस्मिन्सिद्धनिषेवितम् ॥ ८ ॥ सप्त पुष्पफलं रम्यं तत्र बिल्ववनं महत् ॥ शतयोजनविस्तीर्णं द्वियोजनशतायतम् ॥ ९ ॥ अर्द्धक्रोशोच्छ्रितैर्मेहावृक्षैः समन्ततः ॥ शाखाव्यूहैश्च कलितैर्महास्कन्धैः समाकुलम् ॥ १० ॥ फलैः सहस्रतङ्कारैर्हरितैः पाण्डुरैस्तथा ॥ अमृतस्वादुसदृशैर्भैरीमात्रैः सुगन्धिभिः ॥ ११ ॥ शीर्यद्भिश्च पतद्भिश्च कीर्णभूमिवनान्तरम् ॥ नाम्ना तच्छ्रीवनं नाम सर्वलोकेषु विश्रुतम् ॥ १२ ॥ देवादिभिः समाकीर्णं मद्याभिः ककुभिः शुभम् ॥ बिल्वाशिभिश्च मुनिभिः सेवितं पुण्यकारिभिः ॥ १३ ॥ तत्र श्रीः संस्थिता नित्यं सिद्धसङ्घनिषेविता ॥ एकैकस्याच्च लेन्द्रस्य मणिशैलस्य चान्तरम् ॥ १४ ॥ शतयोजनविस्तीर्णं द्वियोजनशतायतम् ॥ विमलं पङ्कजवनं सिद्धचारणसेवितम् ॥ १५ ॥ पुष्पं लक्ष्म्या धृतं भाति नित्यं प्रज्वलतीव ह ॥ अर्द्धक्रोशं च शिखरैर्महास्कन्धैः समावृतम् ॥ १६॥ प्रफुल्लशाखाशिखरं पित्तरं भाति तद्वनम् ॥ द्विबाहुपरिणाहस्तैस्त्रिहस्तायामविस्तृतैः ॥ १७ ॥ मनश्शिलापूर्वनिभैः पाण्डुकेसरशालिभिः ॥ पुष्पैर्मनोहरैर्व्याप्तं व्याकोचैर्गन्ध शालिभिः ॥ १८ ॥ विराजते वनं सर्वं मत्तभ्रमरनादितम् ॥ तद्वनं दानवैर्देवैर्गन्धर्वैर्यक्षराक्षसैः ॥ १९ ॥ किन्नरैरप्सराभिश्च महाभोगैश्च सेवितम् ॥ तत्राश्रमो भगवतः कश्यपस्य प्रजापतेः ॥ २० ॥ सिद्धसाधुगणाकीर्णं नानाश्रमसमाकुलम् ॥ महानीलस्य मध्ये तु ककुभस्य गिरे

स्तथा ॥ २१ ॥ मध्ये सुखा नदी नाम तस्यास्तीरे महद्वनम् ॥ पञ्चाशद्योजनायामं त्रिंशद्योजनमण्डलम् ॥ २२ ॥ रम्यं तालवनं श्रीमत् क्रोशार्द्धोच्छ्रितपादपम् ॥ महाबलैर्महासारैः स्थिरैरविचलैः शुभैः ॥ २३ ॥ महद्दत्तवनस्थानैः परिवृत्तैर्महाफलैः ॥ मृष्टगन्धगुणोपेतैरुपेतं सिद्धसेवितम् ॥ २४ ॥ ऐरावतस्य करिणस्तत्रैव सुमहाकृतिः ॥ ऐरावतस्य रुद्रस्य देवशीलस्य चान्तरे ॥ २५ ॥ सहस्रयोजनायामः शत योजनविस्तृतः ॥ सर्वो ह्येकशिला भूमिर्वृक्षवीरुधवर्जिता॥२६॥आप्लुता पादमात्रेण सलिलेन समन्ततः॥इत्येता अन्तरे द्रोण्यो नानाकाराः प्रकीर्त्तिताः ॥ २७ ॥ मेरोः पाश्चैन विप्रेन्द्रा यथावदनुपूर्वशः ॥ २८ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे मेरुद्रोणीनां निरूपणं नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ अथ मेरोर्द्रोण्यादिवर्णनम् ॥ रुद्र उवाच ॥ अथ दक्षिणदिव्यवस्थिताः पर्वतद्रोण्यः सिद्धाचरिताः कीर्त्यन्ते ॥ शिशिरपतङ्गयोर्मध्ये शुक्ला भूमिः स्त्रिया सुक्ता गलितपादपा ॥ इक्षुसेपे च शिखरे पादपैरुपशोभिते ॥ उदुम्बरवनं रम्यं पक्षि सङ्घनिषेवितम्॥१॥ फलिनं तद्वनं भाति महाकूर्मोपमैः फलैः ॥ तद्वनं देवयोग्याऽग्रो सेवन्ते सर्व एव हि॥२ ॥ तत्र प्रसन्नस्वादुसलिला बहू दका नद्यो वहन्ति॥ तत्राश्रमो भगवतः कर्दमस्य प्रजापतेः नानामुनिजनाकीर्णस्तत्र्यशतयोजनमेकं परिमण्डलं वनं च ॥ तथा च ताम्राभस्य शैलस्य पतङ्गस्य चान्तरे शतयोजनविस्तीर्णं द्विगुणायतं बालार्कसदृशराजीवपुण्डरीकैः समन्ततः सहस्रपत्रैरविरलैरलंकृतं महत्सरोऽनेकगन्ध सिद्धगन्धर्वाप्सरोवृतम् ॥३॥तस्य च मध्ये महाशिखरः शतयोजनायामस्त्रिंशद्योजनविस्तीर्णोऽनेकधातुरत्नभूषितः।तस्य चोपरि महती रथ्या रत्न प्राकारतोरणा॥तस्यां महद्विद्याधरपुरम्॥तत्र पुलोमनामा विद्याधरराजः।शतसहस्रपरिवारः॥तथाच॥विशाखाचलेन्द्रस्य श्वेतस्य चान्तरे सरः॥ तस्य च पूर्वतीरे महदाम्रवनं कनकसङ्काशैः फलैरतिसुगन्धिभिर्महाकुम्भमात्रैः सर्वतश्चितम्॥देवगन्धर्वादयश्च तत्र निवसन्ति ॥४॥सुमूलस्या चलेन्द्रस्य वसुधारस्य चान्तरे॥त्रिंशद्योजनविस्तीर्णे पञ्चाशद्योजनायते॥५॥ बिल्वस्थली नाम तत्र फलानि महाकुम्भसङ्काशानि तैश्च पतद्भिः स्थलमृत्तिका क्षिन्ना तां च स्थलीं सुगुह्यकादयः सेवन्ते बिल्वफलाशिनः॥तथा च वसुधारस्तन्धारयोर्मध्ये त्रिंशद्योजनविस्तीर्णे शतयोजनायतं सुगन्धि किंशुकवनं सदा कुसुमचयस्य गन्धेन वासयते योजनशतम् ॥ तत्र सिद्धाध्युषितं जलोपेतञ्च ॥६ ॥ तत्र चादित्यस्य देवस्य महदा

यतनम् ॥ स मासे मासे भगवान्वर्तते सूर्यः ॥ प्रजापतिं लोकजनकं देवादयो नमस्यन्ति ॥ तथा च पञ्चकूटस्य कैलासस्य चान्तरे सहस्र योजनायामं विस्तीर्णं शतयोजनं हेमपाण्डुरं क्षुद्रसत्त्वैरनाधृष्यं स्वर्गसोपानमिव भूमण्डलम् ॥ ७ ॥ अथ पश्चिमे दिग्भागे व्यवस्थिता गिरि द्रोण्यः कीर्त्यन्ते ॥ सुपार्श्वशिखिशैलयोर्मध्ये समन्ताद्योजनशतमेकं भौमशिलातलं नित्यततं दुस्पर्शं तस्य मध्ये त्रिंशद्योजनविस्तीर्णं मण्डलं वह्निस्थानम् । स च सर्वकालमनिन्धनो भगवाँल्लोकक्षयकारी संवर्तको ज्वलते॥ अन्तरे च शैलवरयोः कुमुदाञ्जनयोः शतयोजनविस्तीर्णा मातुलुङ्गस्थली सर्वसत्त्वानामगम्या पीतवर्णैः फलैरावृता सा स्थली शोभते ॥ तत्र च पुण्यो हदः सिद्धैरुपेतः ॥ वृहस्पतेस्तद्वनम्॥तथा च शैलयोः पिञ्जरगौरयोरन्तरे सरोद्रोण्यो ह्यनेकशतयोजनायताः ॥ महद्भिश्च पद्मपद्मोदुम्बरैः कुमुदैरुपशोभिताः ॥ ८ ॥ तत्र च भगवतो विष्णोः परमेश्वरस्यायतनम् ॥ तथा च शुक्लपाण्डुरयोरपि महागिर्योरन्तरे त्रिंशद्योजनविस्तीर्णो नवत्यायत एकशिलोद्देशो वृक्षविवर्जितः ॥ तत्र च निष्कम्पा दीर्घिका सवृक्षा स्थलपद्मिनी अनेकजातिनैश्च पक्षैः शोभिता ॥ तस्याश्च मध्ये पञ्चयोजनप्रमाणो न्यग्रोधो वृक्षः ॥ तस्मिंश्चन्द्रशेखरोमापतिर्नीलवासाश्च देवो निवसति यक्षादिभिरीड्यमानः॥सहस्रशिखरस्य गिरेः कुमुदस्य चान्तरे वर्त्तमानं पञ्चाशद्योजनायामं त्रिंशद्योजनविस्तृतमिक्षुशेषोच्चशिखरमनेकपक्षिसेवितमनेकवृक्षफलैर्मधुरसैरुपशोभितम् ॥ तत्र चन्द्रस्य महानाश्रमो दिव्याभिप्रायानिर्मितः ॥ तथा च शङ्ख कूटऋषभयोर्मध्ये पुरुषस्थलीरम्याऽनेकगुणानेकयोजनायता बिल्वप्रमाणैः कङ्कोलकैः सुगन्धिभिरुपेता॥तत्र पुरुषरसोन्मत्ताः अनेक वृक्षसञ्छन्नशिरुपेता नागाद्याः प्रतिवसन्ति॥९॥तथा कपिञ्जलनागशैलयोरन्तरे द्विशतयोजनमायता शतयोजनविस्तीर्णास्थली नानाजनविभूषिता द्राक्षा खर्जूरखण्डेरुपेता सा स्थली॥तथाच पुष्करमहामेघयोरन्तरे षष्ठियोजनविस्तीर्णा शतायामा पाणितलप्रख्या महती स्थली वृक्षवीरुद्विवर्जिता तस्याश्च पार्श्वे चत्वारि महावनानि सरांसि चानेकयोजनानि ॥ दश पञ्च सप्त तथाष्टौ त्रिंशद्भिंशतियोजनाः स्थलयो द्रोण्यश्च तत्र काश्चिन्महाघोराः पर्वतक्षयाः ॥ १० ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे मेरुरुत्थद्रोण्यादिवर्णनंनामाशीतितमोऽध्यायः ॥ ८० ॥ अथ तेषु पर्वतेषु देवानामवकाशा वर्ण्यन्ते ॥ रुद्र उवाच ॥ अतः परं पर्वतान्तेषु देवानामवकाशा वर्ण्यन्ते॥तत्र योऽसौ सीताख्यः पर्वतस्तस्योपरि

महेन्द्रस्य क्रीडास्थानम् ॥ तत्र देवराजस्य पारिजातकवृक्षवनम् ॥ तस्य पूर्वपार्श्वे कुञ्जरो नाम गिरिः ॥ तस्योपरि दानवानामष्टौ पुराणि च ॥ १ ॥ तथा वज्रके पर्वते राक्षसानामनेकानि पुराणि ॥ ते च नाम्ना नालकाः कापरूपिणः ॥ महानिले च शैलेन्द्रे पुराणि पंचदश सहस्राणि किन्नराणां ख्यातानि ॥ तत्र देवदत्तचन्द्रादयो राजानः पंचदश किन्नराणां गर्वितताः ॥ तानि सौवर्णानि विलप्रवेशानानि च पुराणि चन्द्रोदये च पर्वतवरे नागानामधिवासः ॥ ते च विलप्रवेशा विलेषु वैनतेयविषपरीतिना व्यवस्थितत्वादुरगे च दानवेन्द्रा व्यवस्थिताः ॥ वेणुमत्यपि विद्याधरपुरत्रयं त्रिंशद्योजनशतविस्तीर्णमेकैकं तावदायतम् ॥ उलूकरोमशमहावेत्रादयो राजानो विद्याधराणां च॥२॥ तत्र एकैकं शैलराजानि स्वयमेव गरुडो व्यवस्थितः ॥ कुञ्जरे तु पर्वतवरे नित्यं पशुपतिर्व्यवस्थितः ॥ वसुधारे च वृषभाङ्को महादेवः शङ्करो योगिनां वरोऽनेकगणभूतकोटिसहस्रपरिवारोऽनादिपुरुषो व्यवस्थितः ॥ वसुधारे च पुष्पवतां वसूनां समवासः ॥ ३ ॥ वसुधारस्त्रधारयोर्मूर्ध्नि अष्टौ सप्त च संख्यया पुराणि वसुसप्तधीनां चेति ॥ एकशृङ्गे च पर्वतोत्तम प्रजापतेः स्थानं चतुर्वक्त्रस्य ब्रह्मणः ॥ गजपर्वते च महाभूतपरिवृता स्वयमेव भगवती तिष्ठतीति ॥ ४ ॥ वसुधारे च पर्वतवरे मुनिसिद्धविद्याधराणामायतनं चतुराशीत्यं वरपुरमिह प्राकारतोरणाः ॥ तत्र चानेकपर्वता नाम गन्धर्वा युद्धशालिनो निवसन्ति ॥ तेषां चाधिपतिर्दैत्यो राजराजैकपिङ्गलः ॥ सुराक्षसाः पंचकूटे दानवाः शतशृङ्गे दानवयक्षाणां पुरःशतम् ॥ ५ ॥ प्रभेदकस्य पश्चिमे दले देवदानवसिद्धादिपुराणि ॥ तस्य गिरेर्मूर्ध्नि महती नाम शिला तिष्ठति । तस्यां च पर्वणि पर्वणि सोमः स्वयमेवावतरति ॥ तस्यैवोत्तरपार्श्वे त्रिकूटं नाम । तत्र ब्रह्मा तिष्ठति क्वचित्तत्र ॥ तथा च बृहद्यायतनम् ॥ मूर्त्तिमान्वह्निरूपा स्थत देवैः ॥ ६ ॥ उत्तरे च शृङ्गाख्ये पर्वतवरे देवतानामायतनानि ॥ पूर्वेण नारायणस्यायतनम् ॥ मध्ये ब्रह्मणः ॥ शङ्करस्य पश्चिमे ॥ तत्र यक्षादीना काानाचत्पुराण ॥ तस्य चोत्तरे तीरे जातुच्छमहापर्वत त्रिंशद्योजनमण्डलं नन्दनलं नाम सरः ॥ तत्र नन्दो नाम नागराजो वसति ॥ ६९ ॥ शतशाखप्रचण्ड इति ॥ ७ ॥ इत्येतेऽष्टौ देवपर्वता विज्ञेयाः ॥ ते चानुक्रमेण हेमरजतत्रैवैदूर्यमनःशिलादिवर्णाः ॥ इयं च पृथ्वी लक्षकोटिशतानेकसंख्याता पूर्णा तेषु च सिद्धविद्याधराणां निलयाः ॥ तद्यथा मेरोः पार्श्वतः केसरवलयालवालं सिद्धलोक इति कीर्त्यते ॥ इयंच पृथ्वी

पद्माकारेण व्यवस्थिता ॥ एष सर्वपुराणेषु क्रमः सामान्यतः प्रतिपाद्यते ॥ ८ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे मेरुवर्णने देवानामवकाशवर्णनंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ अथ नद्यवतारः ॥ रुद्र उवाच ॥ अथ नदीनामवतारं शृणुत ॥ आकाशप्रभवो यः प्राच्यते तस्मादाकाशगामिनी नदी प्रवृत्ता ॥ सा चानवरतमिन्द्रगजेन क्षोभ्यते ॥ सा च चतुरशीतिसहस्रोच्छ्रायान्मेरोरुपरि पतति ॥ सा च मेरुकूटतटान्तेभ्यः प्रस्खलिता चतुर्द्धा सञ्जाता षष्टिसहस्रयोजनान्निरालम्बा पतमाना प्रदक्षिणमनुसरन्ती चतुर्द्धा जगाम सीता चालकनन्दा चक्षुर्भद्रा चेतिनामभिः ॥ तासां मध्ये एकाशीतिसहस्रपर्वतान्दारयन्ती गांगता गङ्गेत्युच्यते ॥ १ ॥ अथ गन्धमादनपार्श्वेऽमरगण्डिका वर्ण्यते ॥ एकत्रिंशद्योजनसहस्राणि आयामश्चतुःशतविस्तीर्णम् ॥ तत्र केतुमालाः सर्वे जनपदाः कृष्णवर्णाः पुरुषा महाबलिन उत्पलवर्णाः स्त्रियः शुभदर्शनाः ॥ तत्र च महावृक्षाः पनसाः सन्ति ॥ तत्रेश्वरो ब्रह्मपुत्रस्तिष्ठति ॥ तत्रोदपानाच्च जरारोगविवर्जिता वर्षायुतायुषो जुह्वतपश्च नराः ॥ माल्यवतः पूर्वपार्श्वे पूर्वगण्डिका एकपृङ्क्त्याद्योजनसहस्राणि मानतः ॥ ते च भद्राश्वा नाम जनपदाः ॥ २॥ भद्रशालवनं च तत्र व्यवस्थितम् ॥ कालाम्रवृक्षाः पुरुषाः श्वेताः पद्मवर्णिनः स्त्रियः कुमुदवर्णा दशवर्षसहस्राणि तेषामायुः ॥ तत्र च पंच कुलपर्वताः ते च शैलवर्णा माल्याख्यःकोरजस्काख्यिपर्णः नीलश्वेति ताद्विनिर्गताः ॥ तद्मभःस्थितानां देशानां तान्येव नामानि ॥ ३ ॥ ते च देशा एता नदीः पिबन्ति ॥ तद्यथा सीता सुवाहिनी ह्लादवती कासा महावक्रा चन्द्रवती कावेरी सुरसाख्यावती इन्द्रवती अङ्गारवाहिनी हरिस्तोया सोमावर्त्ता शतहृदा वनमाला वसुमती हंसा सुपर्णा पंचगङ्गा धनुष्मती मणिवप्रा सुत्रह्मभागा विलासिनी कृष्णतोया पुण्योदा नागवती शिवा शैलाऽलिनी मणिवटा क्षीरोदा वरुणतालीं विष्णुपदी महानदीनां पयो ये पिबन्ति ते दशवर्षसहस्रायुषो रुद्रोमाभक्ता इति ॥ ४ ॥ इति श्रीवि० रुद्रगीतासु भुवनकोशे नद्यवतारनिरूपणं नाम द्व्यशीतितमोऽध्यायः ॥ ८२ ॥ अथ नैषधस्थकुठाचल जनपदनदीवर्णनम् ॥ रुद्र उवाच ॥ निसर्गं एष भद्राश्वानां कीर्तितो नः केतुमालानां विस्तरे कथितम् ॥ नैषधस्याचलेन्द्रस्य पश्चिमेन कुठाचलजनपदनद्यः कीर्त्यन्ते ॥ तथाच विशालकम्बलनयन्त कृष्णहरिताशोकवर्द्धमान इत्येते सप्त कुलपर्वतानां कोटिशः प्रसूतिः ॥ तन्निवासिनो जनपदास्तन्नामान एव द्रष्टव्याः ॥ १ ॥ तद्यथा सौर

यामान्तसातपः कुतपुराश्रवणकम्बलमाहेयाचल कूटवासमूलतपकोचकुरुण्डाङ्गमणिपङ्कज चूडमल सोमीय समुद्रांतक कुरकुञ्जसुवर्णतट कुद
श्वेताङ्ग कुरुण्डपाद विंद् कपिल कर्णिक महिष कुञ्ज करनाट महोत्कट शुक्र नाकं सगज भूम ककुरुञ्जन महानाद किंकिंपर्ण भौमक चोरक
धूमजन्माङ्गारज जीवलोकिता वाचांसहाङ्गमधुरेय शुक्रेय चक्रेय श्रवण मत्तकाशिक गोदावाम कुलपञ्जाव वर्ज्जह मोदशालका एते जनपदा
स्तत्पर्वतस्था नदीः पिबन्ति ॥ २ ॥ तद्यथा प्लाक्षा महाकदम्बा मानसी श्यामा सुवेधा बहुला विवर्णा पुङ्गा माला दर्भवती भद्रनदी शुक्लनदी
पल्वसा भीमा प्रभञ्जना काम्बा कुशावती दक्षा कासवती तुङ्गा पुण्योदा चन्द्रावती सुमूलावती ककुद्मिनी विशाला करण्टका पीवरी महामाया
महिषी मानुषी चण्डा एताः नदीः प्रधानाः ॥ शेषाः क्षुद्रनद्यः सहस्रशश्चेति ॥ ३ ॥ इति श्रीवराहपुराणे रुद्रगीतासु नैपथस्थकुलाचलजन
पदनदीनिरूपर्णनाम त्र्यशीतितमोऽध्यायः ॥८३॥ अथ मेरोर्दक्षिणोत्तरवर्षवर्णनम् ॥ रुद्र उवाच ॥ उत्तराणांच वर्षाणां दक्षिणानां च सर्वशः ॥
आचक्षते यथान्यायं ये ये पर्वतवासिनः ॥१॥ तच्छृणुध्वं मया विप्राः कीर्त्यमानं समाहिताः ॥ दक्षिणेन तु मेरोश्च श्वेतस्य चोत्तरेण च ॥ २ ॥
वायव्यं रम्यकं नाम जायन्ते तत्र मानवाः ॥ मतिप्रधाना विमला जरादुर्गतिवर्जिताः ॥ ३ ॥ तत्रापि सुमहान्वृक्षो न्यग्रोधो रोहितः
स्मृतः ॥ तत्फलरसपानाच्च दशवर्षसहस्रिणः ॥४॥आयुषा सर्वमनुजा जायन्ते देवरूपिणः ॥ उत्तरेण च श्वेतस्य त्रिशृङ्गस्य च दक्षिणे ॥५॥
वर्षं हिरण्मयं नाम तत्र हैरण्वती नदी ॥ यक्षा वसन्ति तत्रैव बलिनः कामरूपिणः ॥ ६ ॥ एका दशसहस्राणि समानां तत्र जीवितम् ॥
शतान्यन्यानि जीव्यन्ते वर्षाणां दश पंच च ॥ ७ ॥ लकुचाः पनसा वृक्षास्तस्मिन्देशे व्यवस्थिताः ॥ तत्फलप्राशनादेव जीवन्ति बहु
वासरम् ॥ ८ ॥ तथा त्रिशृङ्गे च मणिकांचनसर्वरत्नशिखरोरुकमेण तस्य चोत्तरशृङ्गादक्षिणसमुद्रान्तं चोत्तरकुरवः ॥ तत्र च क्षीरवृक्षाश्चासवाः
सन्ति तेषु वृक्षेष्वेव वस्त्राण्याभरणानि च । मणिमया भूमिः सुवर्णवालुका । तस्मिन् स्वर्गेच्युताः पुरुषा वसन्ति त्रयोदशवर्षसहस्रायुषः ॥९॥
तस्यैव द्वीपस्य पश्चिमेन चतुर्योजनसहस्रमतिक्रम्य देवलोकाच्चंद्रद्वीपो भवति योजनसहस्रपरिमण्डलः ॥ तस्य मध्ये चन्द्रकान्तसूर्यकान्त
नामानौ गिरिप्रस्रवणौ । तयोर्मध्ये चंद्रावर्त्तो नाम महानदी अनेकवृक्षसमाकुलानेकनदीयुक्ता ॥ १० ॥ एतत्कुरुवर्षान्तस्योत्तरपार्श्वे समुद्रोमि

मालाढ्यं पंचयोजनसहस्रमतिक्रम्य देवलोकात्सूर्यद्वीपो भवति योजनसहस्रपरिमण्डलः ॥ तस्य मध्ये गिरिवरः शतयोजनविस्तीर्णस्तदुच्छ्रितः । तस्मात्सूर्यावर्त्तनामा नदी निर्गता । तत्र च सूर्यस्याधिष्ठानम् । तत्र सूर्यदेवत्यास्तद्वर्णाश्च प्रजाः दशवर्षसहस्रायुषः ॥ ११ ॥ तस्य च द्वीपस्य पश्चिमेन चतुर्योजनसहस्रमतिक्रम्य समुद्रदेशे योजनसाहस्रपरिमण्डलेन द्वीपो भद्राकारो नाम ॥ तत्र च भद्रासनं वायोरनेकरत्नशोभितम् । तत्र सकलविग्रहवान्वायुस्तिष्ठति ॥ तपनीयवर्णाश्च प्रजाः पंचवर्षसहस्रायुषः ॥ १२ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे दक्षिणोत्तरवर्षवर्णनं नाम चतुरशीतितमोऽध्यायः॥८४॥अथ भारते नवखण्डवर्णनम् ॥ रुद्र उवाच॥ इयं भूः पद्मन्यवस्था कथिता । इदानीं भारतं नवभेदं शृणुत । तद्यथा । इन्द्रः कसेरुः ताम्रवर्णो गभस्तिः नागद्वीपः तथा सौम्यो गन्धर्वो वारुणो भारतं चेति ॥ सागरसंवृत मेकैकं योजनसहस्रप्रमाणम् ॥ तत्र च सप्त कुलपर्वताः सन्ति ॥ १ ॥ तद्यथा । महेन्द्रो मलयः सह्यः शुक्तिमान्ऋक्षपर्वतः ॥ विन्ध्यश्च पारियात्रश्च इत्येते कुलपर्वताः ॥ २ ॥ अन्ये च मन्दरशारददुर्दरकैलासामेनाकेवेद्युतवारुन्धमपाण्डुरतुंगप्रस्थकृष्णगिरिजयन्तै रावतऋष्यमूकगोमन्तचित्रकूटश्रीपर्वतचक्रोकुटश्रीशैलकृतस्थळा इत्येते क्षुद्रपर्वताः ॥ एतेषामपि क्षुद्रतराः ॥ तेषामार्या म्लेच्छा जनपदा वसन्ति ॥ पिबन्ति चैतासु नदीषु पानीयम् ॥ ३ ॥ तद्यथा गङ्गा सिंधुः सरस्वती शतद्रुर्वितस्ता विपाशा चन्द्रभागा सरयूर्यमुना इरावती देविका कुहुर्गोमती धूतपापा बाहुदा दृषद्वती कौशिकी निस्वीरा गण्डकी चक्षुष्मती लोहिता इत्येता हिमवत्पादनिर्गताः ॥ वेदस्मृतिर्वेदवती सिन्धुपर्णा चन्दनाभा नाशदाचारा रोहिपारा चर्मण्वती विदिशा वेत्रवती वपन्ती इत्येता पारियात्रोद्भवाः ॥४ ॥ शोणो ज्योतीरथा नर्मदा सुरसा मन्दाकिनी दशार्णा चित्रकूटा तमसा पिप्पळा करतोया पिशाचिका चित्रोत्पळा विशाळा वंजुळा वालुवाहिनी शुक्तिमती विरजा पङ्किनी रात्री इत्येताः ऋक्षप्रसूताः ॥ मणिजाळा शुभा तापी पयोष्णी शीघ्रोदा वेण्णो पाशा वैतरणी वैदिपाळा कुमुद्वती तोया दुर्गा अन्त्या गिरा एता विन्ध्यपादोद्भवाः ॥ गोदावरी भीमरथी कृष्णा वेणी वंजुळा तुंगभद्रा सुप्रयोगा वाह्य कावेरी इत्येताः सह्यपादोद्भवाः ॥ ५ ॥ शतमाळा ताम्रपर्णी पुष्पावती उत्पळावती इत्येता मलयजाः॥ त्रियामा ऋषिकुल्या इक्षुळा त्रिविक्राळ,

मूलिनी वंशवरा महेन्द्रतनयाः ॥ ऋषिका लुप्तती मन्दगामिना पलाशिनी इत्येताः शुक्तिसम्भवाः । एताः प्राधान्येन कुलपर्वतनद्यः ॥ शेषाः क्षुद्रनद्यः ॥ एष जम्बूद्वीपो योजनलक्षप्रमाणः ॥ ६ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे भारतीयनवखण्डनिरूपणं नाम पञ्चाशीतितमोऽध्यायः ॥८५॥ अथ शाकद्वीपनिरूपणम् ॥ रुद्र उवाच ॥ अतः परं शाकद्वीपं निबोधत ॥ जम्बूद्वीपस्य विस्तारादिद्विगुणपरीणाहाल्लवणोदकश्च जम्बूद्वीपसमः ॥ तेन द्विगुणावृत्तः ॥ तत्र च पुण्याः जनपदाश्चिरात्मानः ते दुर्भिक्षजराव्याधिरहिताश्च ॥ देशेऽत्र सप्तैव कुलपर्वतास्तावत्तिष्ठन्ति तस्य चोभयतो लवणक्षीरोदधी व्यवस्थितौ ॥१॥ तत्र च प्रागायता शैलेन्द्र उदयो नाम पर्वतः तस्यापरेण जलधारो नाम गिरिः स एव चन्द्रेति कीर्त्यितः ॥ तस्य जलं च इन्द्रो गृहीत्वा वर्षति ॥ तस्यापरः श्वेतकोनाम गिरिः ॥ तस्मिन्पट्चेति कीर्तिताः ॥ प्रजा अनेकविधाः क्रीडन्ति तस्यापरो रजतो गिरिः ॥ स एव शाको नाम्नोच्यते ॥ तस्य परेणाम्बिकेयः ॥ स च विभ्राजसो भण्यते ॥ २ ॥ स एव केसरीत्युच्यते ॥ ततो वायुः प्रवर्त्तते ॥ गिरिनामान्येव वर्षाणि॥ तद्यथा ॥ उदयसुकुमारो जलधारक्षेमकमहाद्रुमा इति प्रधानना मानि द्वितीयपर्वतनामभिरपि वक्तव्यानि तस्य च मध्ये शाकवृक्षः तत्र च सप्त महानद्यो द्विनाम्यः तद्यथा सुकुमारी कुमारी नन्दा वेणिका धेनुरिक्षुमती गभिस्तिरित्येता नद्यः ॥ ३ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे शाकद्वीपनिरूपणं नाम षडशीतितमोऽध्यायः ॥ ८६ ॥ अथ कुशद्वीपवर्णनम् ॥ रुद्र उवाच ॥ अथ तृतीयं कुशद्वीपं शृणुत कुशद्वीपेन क्षीरोदः परिवृतः शाकद्वीपस्य विस्तारद्विगुणेन । तत्रापि सप्त कुलपर्वताः सर्वे च द्विनामानः तद्यथा कुमुदः विद्रुमेति च उच्यते स उन्नतो हेमपर्वतः स एव द्रोणः पुष्पवान् स एव कङ्कश्च पर्वतः स एव कुशेशयोऽग्निमान् स एव तथा षष्ठो महिषनामा स एव हरिरूच्यते तत्राग्निर्वसति ॥१॥ सप्तमस्तु ककुभ्ननामा स एव मन्दरः कीर्त्यते इत्येते पर्वताः कुशद्वीपे व्यवस्थिताः ॥ एतेषां वर्षभेदो भवति द्वि नामरुङ्नः ॥ कुमुदस्य श्वेतमुद्रिदं तदेवादो कीर्त्यते उन्नतस्य लोहितं वेणुमण्डलं तदेव भवति बलाहकस्य जीमूतं तदेवास्य स्थाकार इति ॥ द्रोणस्य हरिं तदेव बलाधनं भवति ॥ २ ॥ तत्र द्विनाम्न्यो नद्यः प्रतीया प्रदेशा सैवोच्यते ॥ द्वितीया शिवा यशोदा सा च भवति ॥ तृतीया चित्रा नाम सैव कृष्णा भण्यते ॥ चतुर्थी ह्लादिनी नाम सैव चन्द्रा

॥६७॥

निगद्यते ॥ विद्युल्लता पञ्चमी शुक्ला सैव वर्णा षष्ठी सैव विभावरी महती सप्तमी सैव धृतिः ॥ एताः प्रधानाः ज्ञेषाः क्षुद्रनद्यः ॥ इत्येष कुशद्वीपस्य संनिवेशः ॥ ३ ॥ शाकद्वीपोऽपि द्विगुणसन्निवेशश्च कथितः ॥ तस्य च मध्ये महाकुशस्तम्बः ॥ एष च कुशद्वीपः दधिमण्डोदेनामृतसम्मितेन क्षीरोदद्विगुणेन संवृतः ॥ ४ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे कुशद्वीपवर्णनं नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ अथ क्रौंचद्वीपवर्णनम् ॥ रुद्र उवाच ॥ अथ क्रौंचो भवति चतुर्थः शुक्लद्वीपाद्विगुणमानतः समुद्रः क्रौंचेन द्विगुणेनावृतः ॥ तस्मिंश्च सप्तैव प्रधानपर्वताः॥ प्रथमः क्रौंचो विद्युल्लतो रैवतो मानसः स एव पावकः तथैवान्धकारः स एवाच्छोदकः ॥ देवावृत्तो देवावृतः स च सुरापो भण्यते ॥ ततो देविष्टः स एव काञ्चनशृङ्गो भवति ॥१ ॥ देवनन्दात्परो गोविन्दो द्विविन्द इति ॥ ततः पुण्डरीकः स एव तोयासङ्गः ॥ एते सप्त रत्नमयाः पर्वताः क्रौंचद्वीपे व्यवस्थिताः सर्वे च परस्परेणोच्छ्रयाः ॥ २ ॥ तत्र वर्षाणि । तथा क्रौंचस्य कुशलो देशः स एव माधवः स्मृतो वामकस्य मनोऽनुगः स एव संवर्त्तकः ॥ तत उष्णवान् स सप्रकाशः ॥ ततः पावकः सएव सुदर्शनः ॥ तथा चान्धकारः सएव संमोहः ततो मुनिदेशः स च प्रकाशः ततो दुन्दुभिः स एवानर्थ उच्यते ॥ ३॥ तत्रापि सप्तैव नद्यः गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ॥ ख्यातिश्च पुण्डरीका च नद्यः सप्तविधाः स्मृताः ॥ ४ ॥ गौरी सैव पुष्पवहा कुमुद्वती नाद्रेवती रौद्रा सन्ध्या सुखावहा भोगवती क्षिप्रोदा चारुख्यातिः सैव बहुला पुण्डरीका चित्रवर्णदेशा क्षुद्रनद्यः ॥ क्रौंचद्वीपो घृताङ्केनावृतो घृतोदः ॥ शाल्मलेनेति ॥५ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे क्रौंचद्वीपवर्णनंनाम अष्टाशीतितमोऽध्यायः ॥ ८८ ॥ अथ शाल्मलिद्वीपवर्णनम् ॥ रुद्र उवाच ॥ त्रिषु त्रिष्टेषु वक्ष्यामि द्वीपेषु मनुजानथ ॥ शाल्मलिं पंचमं वर्षं प्रवक्ष्यन्तं निबोधत ॥१ ॥ क्रौंचद्वीपस्य विस्ताराच्छाल्मलो द्विगुणो मतः ॥२ ॥ घृतसमुद्रमावृत्य व्यवस्थितः ॥ तद्वित्तारो द्विगुणः ॥ तत्र च सप्त पर्वताः प्रधानाः ॥ तावत्यो नद्यः ॥ तत्र च पर्वताः सुमहान्पीतशातकोऽभ्रात्सर्वगुणसौवर्णरोहितसुमनसकुशलजाम्बूनदवैद्युता इत्यते कुलपर्वताः वर्षाणि चेति ॥ ३ ॥ अथ षष्ठं गोमेदं कथ्यते ॥ शाल्मलं यथा सुरोदनावृतं तद्वत्सुरोदोऽपि तद्विगुणेन गोमेदेनावृतः ॥ तत्र च प्रधानपर्वतौ द्वावेव ॥ एकश्च तावतावत्सरः अपरश्च कुमुद इति ॥ समुद्र इक्षु

रसस्तद्वियुगेन पुष्करेणावृतः तत्र च पुष्करारण्ये मानसो नाम पर्वतः तदपि द्विधा च्छिन्नं वर्षं तत्प्रमाणेन च स्वादूदकेनावृतम् ॥ ४ ॥
ततश्च कटाहम् । एतत्पृथिव्याः प्रमाणम् ॥ ब्रह्माण्डस्य च सकटाहविस्तारप्रमाणम् ॥ एवंविधानां मण्डलानां परिसंख्यानं विद्यते ॥ एतानि
कल्पेकल्पे भागवान्नारायणः क्रोडरूपी रसातलान्तःप्रविश्यादंष्ट्रयैकयोद्धृत्य स्थितो स्थापयति ॥ ५ ॥ एष वः कथितो मार्गो भूमेरायाम
विस्तरः ॥ स्वस्ति वोऽस्तु गमिष्यामि कैलासनिलयं द्विजाः ॥६॥ श्रीवराह उवाच ॥ एवमुक्त्वा गतो रुद्रः क्षणात्कैलासपर्वतम् ॥ ते च सर्वे
गता देवा ऋषयश्च यथागतम् ॥ ७ ॥ इति श्रीवराहपुराणे रुद्रगीतासु भुवनकोशे शालमलिद्वीपवर्णनंनाम ऊननवतितमोऽध्यायः ॥ ८९ ॥
अथ त्रिशत्किगतमाहात्म्यम् ॥ धरण्युवाच॥परमात्मा शिवः पुण्य इति केचिद्भवं विदुः ॥ अपरे हरिमीशानमिति केचिच्चतुर्मुखम् ॥१॥
एतेषां कतमो देवः परः को वाथ वापरः ॥ एतदेव ममाचक्ष्व परं कौतूहलं हि मे ॥ २ ॥ श्रीवराह उवाच ॥ परो नारायणो देवस्ततस्तस्मा
च्चतुर्मुखः ॥ तस्माद्रुद्रोऽभवद्देवि स च सर्वज्ञतां गतः ॥ ३ ॥ तस्याश्चर्याण्यनेकानि विविधानि वरानने ॥ शृणु सर्वाणि चार्वङ्गि कथ्यमानं
मयानघे ॥ ४ ॥ कैलासशिखरे रम्ये नानाधातुविचित्रिते ॥ वसत्यनुदिनं देवः शूलपाणिस्त्रिलोचनः ॥ ५ ॥ सैकस्मिन्दिवसे देवः सर्वभूत
नमस्कृतः ॥ गणैः परिवृतो देव्या महानासीत्पिनाकधृक् ॥६॥ तत्र सिंहमुखाः केचिद्गणा नर्दन्ति सिंहवत् ॥ अपरे हस्तिवक्त्राश्च हयवक्त्रास्त
थापरे ॥ ७ ॥ अपरे शिशुमाराख्या अपरे सूकराननाः ॥ अपरेऽश्वमुखा रौद्राः खराख्याजाननास्तथा ॥ ८ ॥ छागमत्स्याननाः शूरा
अनन्ताः शस्त्रपाणयः ॥ केचिद्गायन्ति नृत्यन्ति धावन्ति स्फोटयन्ति च ॥ ९ ॥ हसन्ति किलकिलायन्ति गर्जन्ति च महाबलाः ॥ केचि
च्छोर्ष्टास्तु संगृह्य युयुधुर्गणनायकाः ॥१०॥ अपरे मल्लयुद्धेन युयुधुर्बलदर्पिताः ॥ एवं गणतहस्रेण वृतो देवो महेश्वरः ॥११॥ यावदास्ते स्वयं
देव्या क्रीडन्देववरः स्वयम् ॥ तावद्ब्रह्मा स्वयं देवैरुपायात्तह सत्वरः ॥ १२ ॥ तमागतमथो दृष्ट्वा पूजयित्वा विधानतः ॥ उवाच परमो देवो
रुद्रो ब्रह्माणमव्ययम् ॥ १३ ॥ किमागमनकृत्यं ते ब्रह्मन्ब्रूहि ममाचिरम् ॥ किंच देव त्वरायुक्त आगतो मम सन्निधौ ॥ १४ ॥ ब्रह्मोवाच ॥
अस्त्यन्धको महादैत्यस्तेन सर्वे दिवौकसः ॥ अर्दिता मत्समीपं तु दृष्ट्वा मां शरणैषिणः ॥ १५ ॥ ततश्चैते मया प्रोक्ताः सर्वे देवा भवं

प्राप्ति ॥ गच्छाम इति देवेश ततस्त्वेते समागताः ॥ १६ ॥ एवमुक्त्वा स्वयं ब्रह्मा वीक्षाञ्चक्रे पिनाकिनम् ॥ नारायणं च मनसा सस्मार परमेश्वरम् ॥ १७ ॥ ततो नारायणो देवो द्वाभ्यां मध्ये व्यवस्थितः ॥ ततस्त्वेकीकृतास्ते तु ब्रह्मविष्णुमहेश्वराः ॥ १८ ॥ परस्परं सूक्ष्मदृष्ट्या वीक्षाञ्चक्रुर्मुदा युताः ॥ ततस्तेषां त्रिधा दृष्टिर्भूत्वैका समजायत ॥ १९ ॥ तस्यां दृष्ट्यां समुत्पन्ना कुमारी दिव्यरूपिणी ॥ नीलोत्पलदलश्यामा नीलकुंचितमूर्द्धजा ॥ २० ॥ सुनासा सुललाटान्ता सुवक्त्रा सुप्रतिष्ठिता ॥ त्वष्ट्रा यद्प्रिजिह्वं तु लक्षणं परिभाषितम् ॥ २१॥ तत्सर्वमेकतः संस्थं कन्यायां सम्प्रदृश्यते ॥ अथ तां दृश्य कन्यां तु ब्रह्मविष्णुमहेश्वराः ॥ २२ ॥ ऊचुः कासि शुभे ब्रूहि किं वा कार्यं विपश्चिते ॥ त्रिवर्णा च कुमारी सा कृष्णा शुक्ला च पीतिका ॥ २३ ॥ उवाच भवतां दृष्टेर्योगाज्जाताऽस्मि सत्तमाः ॥ किं मां न वेत्थ सुश्रोणीं स्वशक्तिं परमेश्वरीम् ॥ २४ ॥ ततो ब्रह्मादयस्ते च तस्यास्तुष्टा वरं ददुः ॥ नाम्नासि त्रिकला देवी पाहि विश्वं च सर्वदा ॥ २५ ॥ अपराण्यपि नामानि भविष्यन्ति तवानघे ॥ गुणोत्थानि महाभागे सर्वसिद्धिकराणि च ॥ २६ ॥ अन्यच्च कारणं देवि त्रिवर्णासि वरानने ॥ मूर्त्तित्रयं त्रिभिर्वर्णैः कुरु देवि स्वकं द्रुतम् ॥ २७ ॥ एवमुक्ता तदा देवैरकरोत्त्रिविधां तनुम् ॥ सितां रक्तां तथा कृष्णां त्रिमूर्तित्वं जगाम सा ॥ २८ ॥ या सा ब्राह्मी शुभा मूर्तिस्तया सृजति वै प्रजाः ॥ सौम्यरूपेण सुश्रोणी ब्रह्ममूर्तिविधानतः ॥ २९ ॥ या सा रक्तेन वर्णेन सुरूपा तनुमध्यमा ॥ शंखचक्रधरा देवी वैष्णवी सा कला स्मृता ॥ ३० ॥ सा पाति सकलं विश्वं विष्णुमायेति कीर्त्यते ॥ या सा कृष्णेन वर्णेन रौद्रा मूर्त्तिस्त्रिशूलिनी ॥ ३१ ॥ दंष्ट्राकरालिनी देवी सा संहरति वै जगत् ॥ या सृष्टिर्ब्रह्मणो देवी श्वेतवर्णा विभावरी ॥ ३२ ॥ सा कुमारी महाभागा विपुलाञ्जदलेक्षणा ॥ सद्यो ब्रह्माणमामन्त्र्य तत्रैवान्तरधीयत ॥ ३३ ॥ सान्तर्हिता ययौ देवी वरदा श्वेतपर्वतम् ॥ तपस्तप्तुं महत्तीव्रं सर्वज्ञत्वमभीप्सती ॥ ३४ ॥ या वैष्णवी कुमारी तु साप्यनुज्ञाय केशवम् ॥ मन्दराद्रिं ययौ तप्तुं तपः परमदुश्चरम् ॥ ३५ ॥ या सा कृष्णा विशालाक्षी रौद्री दंष्ट्राकरालिनी ॥ सा नीलपर्वतवरं तपश्चर्तुं ययौ शुभा ॥ ३६ ॥ अथ कालेन महता प्रजाः स्रष्टुं प्रजापतिः ॥ आरब्धवान्न तास्तस्य ववृधुः सृजतः प्रजाः ॥ ३७ ॥ यदा न ववृधुस्तस्य ब्रह्मणो मानस

प्रजाः ॥ तदा दक्ष्यौ किमेतन्मे न तथा वर्द्धते प्रजाः ॥ ३८ ॥ ततो ब्रह्मा ह्रदा दक्ष्यौ योगाभ्यासेन सुव्रते ॥ चिन्तयन्बुबुधे देवस्तां कन्यां श्वेतपर्वते ॥ ३९ ॥ तपश्चरन्तीं सुमहत्तपश्चा दग्धकिल्बिषाम् ॥ ततो ब्रह्मा ययौ तत्र यत्र सा कमलेक्षणा ॥ ४० ॥ तपश्चरन्तीं तां दृष्ट्वा वाक्यमेतदुवाच ह ॥ ब्रह्मोवाच ॥ किं तपः क्रियते भद्रे कार्यमापेक्ष्य शोभने ॥ ४१ ॥ तुष्टोऽस्मि ते विशालाक्षि वरं वरय कन्यके ॥ सृष्टिरुवाच ॥ भगवन्नेकदेशस्था नोत्सहे स्थातुमञ्जसा ॥ ४२ ॥ अतोऽर्थं त्वां वरं याचे सर्वगत्वमभीप्सती ॥ एवमुक्तस्तदा देव्या सृष्ट्या ब्रह्मा प्रजापतिः॥४३॥ उवाच तां तदा देवीं सर्वगा त्वं भविष्यसि ॥ एवमुक्ता तदा तेन सृष्टिः सा कमलेक्षणा॥४४॥ तस्य ह्यङ्के लयं प्राप्ता सा देवी पद्मलोचना॥तस्मादारभ्य कालात्तु ब्रह्मसृष्टिर्व्यवर्द्धत ॥ ४५॥ ब्रह्मणो मानसाः सप्त तेषामन्ये तपोधनाः ॥ तेषामान्ये ततस्त्वन्ये चतुर्द्धा भूत संग्रहः ॥४६॥संस्थाणुजङ्गमानां च सृष्टिः सर्वत्र संस्थिता॥यत्किंचिद्ब्राङ्मयं लोके जगत्स्थावरजङ्गमम् ॥तत्सर्वं स्थापितं सृष्ट्या भूतं भव्यं च सर्वदा॥४७॥इति श्रीवराहपुराणे सृष्टिविभागे त्रिशक्तिमाहात्म्ये सृष्टिदेवतानिरूपणं नाम नवतितमोऽध्यायः ॥९०॥ अथ सरस्वतीवर्णनादि कम् ॥ श्रीवराह उवाच ॥ शृणु चान्यं वरारोहे तस्या देव्या महाविधिम् ॥ या सा त्रिशक्तिरुद्दिष्टा शिवेन परमेष्ठिना ॥ १ ॥ तत्र सृष्टिः पुरा प्रोक्ता श्वेतवर्णा सुरूपिणी ॥ एकाक्षरेति विख्याता सर्वाक्षरमयी शुभा ॥ २ ॥ वागीशेति समाख्याता कचिद्देवी सरस्वती ॥ सैव विद्येश्वरी देवी सैव काप्यमिताक्षरा॥३॥सैव ज्ञाननिधिः काप्यि सैव देवी विभावरी ॥ यानि सौम्यानि नामानि यानि ज्ञानोद्भवानि च॥४॥ तानि तस्या विशालाक्षि द्रष्टव्यानि वरानने ॥ या वैष्णवी विशालाक्षी रक्तवर्णा सुरूपिणी॥५॥ अपरा सा समाख्याता रौद्री चैव परायणा ॥ एतास्त्रयोऽपि विध्यन्ति यो रुद्रं वेत्ति तत्त्वतः ॥ ६ ॥ सर्वा सेयं वरारोहे एकैव त्रिविधा स्मृता ॥ एषा सृष्टिर्वरारोहे कथिता ते पुरातनी ॥ ७ ॥ तया सर्वमिदं व्याप्तं जगत्स्थावरजङ्गमम् ॥ या सादौ वर्द्धिता सृष्टिर्ब्रह्मणोऽव्यक्तजन्मनः ॥ ८ ॥ तया तुल्यां स्तुतिं चक्रे तस्या देव्याः पितामहः ॥ ब्रह्मोवाच ॥ जयस्व सत्यसम्भूते ध्रुवे देवि धरेऽक्षरे ॥ ९ ॥ सर्वगे सर्वजनने सर्वभूतमहेश्वरि ॥ सर्वज्ञा त्वं वरारोहे सर्वसिद्धि प्रदायिनी ॥ १० ॥ सिद्धिबुद्धिकरे देवि प्रसूतिः परमेश्वरी ॥ त्वं स्वाहा त्वं स्वधा देवि त्वमुत्पत्तिर्वरानने ॥ ११ ॥ त्वमोङ्कारः स्थित.

देवि देवोत्पत्तिस्त्वमेव च ॥ देवानां दानवानां च यक्षगन्धर्वरक्षसाम् ॥ १२ ॥ पशूनां वीरुधां चापि त्वमुत्पत्तिर्वरानने ॥ विद्या विद्येश्वरी सिद्धा प्रसिद्धाहं सुरेश्वरी ॥ १३ ॥ सर्वज्ञा त्वं वरारोहे सर्वसिद्धिविधायिनी ॥ सर्वगा गतसन्देहा सर्वशत्रुनिबर्हिणी ॥ १४ ॥ सर्वविद्येश्वरी देवी नमस्ते स्वस्तिकारिणि ॥ ऋतुस्नातां स्त्रियं गच्छेद्यस्त्वां स्मृत्वा वरानने ॥ १५ ॥ तस्यात्रेश्यं भवेत्सृष्टिस्त्वत्प्रसादात्प्रजेश्वरि ॥ स्वरूपा विजया भद्रे सर्वशत्रुविनाशिनी ॥ १६ ॥ इति श्रीवराहपुराणे त्रिशक्तिमाहात्म्ये सृष्टिवरस्वतीवर्णनादिकं नामैकनवतितमोऽध्यायः ॥ ९१ ॥ अथ वैष्णवीमाहात्म्यम् ॥ श्रीवराह उवाच ॥ या मन्दरगता देवा तपः कर्तुं तु वैष्णवी ॥ राजसी परमा शक्तिः कौमारव्रत धारिणी ॥ १ ॥ सैकाकिनी तपस्तेपे विशालायां तु शोभना ॥ तस्यास्तपन्त्याः कालेन महता क्षुभितं मनः ॥२॥ तस्मात्क्षोभात्समुत्तस्थुः कुमार्यः सोम्यलोचनाः ॥ नीलकुञ्चितकेशान्ता बिम्बोष्ठ्यायतलोचनाः ॥ ३ ॥ नितम्बरशनोद्दामपुराढ्याः सुवर्चसः ॥ एवंविधाः स्त्रियो दृष्ट्वा क्षोभिते मनसि द्रुतम् ॥ ४ ॥ उत्तस्थुः शतसाहस्राः कोटिशो विविधाः प्रजाः ॥ दृष्ट्वा कुमार्यः सा देवी तस्मिन्नेव गिरौ शुभाः ॥५॥ तपसा निर्ममे देवि पुरं हर्म्यशताकुलम् ॥ विशालाख्यं सौवर्णप्रासादैरुपशोभितम् ॥ ६ ॥ अन्तर्जलानि वेश्मानि मणिसोपानवन्ति च ॥ रत्नजालगवाक्षाणि आसन्नोपवनानि च ॥ ७ ॥ आसंस्तथातानि हर्म्याणि तथा कन्या धरावरे ॥ प्राधान्येन प्रवक्ष्यामि कन्यानामानि शोभने ॥ ८ ॥ विद्युत्प्रभा चन्द्रकान्तिः सूर्यकान्तिस्तथापरा ॥ गम्भीरा चारुकेशी च सुजाता सुव्रतेक्षिणी ॥ ९ ॥ घृताची चोर्वशी चान्या शशिनी शीलमण्डिता ॥ चारुकन्या विशालाक्षी धन्या पीनपयोधरा ॥ १० ॥ चन्द्रप्रभा गिरिसुता तथा सूर्यप्रभासुता ॥ स्वयम्प्रभा चारुमुखी शिवदूती विभावरी ॥ ११॥ जया च विजया चैव जयन्ती चापराजिता ॥ एताश्चान्याश्च शतशः कन्यास्तस्मिन्पुरोत्तमे ॥१२॥ देव्या अनुचराः सर्वाः पाशाङ्कुशधराः शुभाः॥ ताभिः परिवृता देवी सिंहासनगता शुभा॥ १३॥ सुस्तिते श्वासरैः स्त्रीभिर्गीयमाना विलासिनी ॥ कौमारं व्रतमास्थाय तपः कर्तुं समुद्यता ॥१४॥ पूज्यमाना वरस्त्रीभिः कुमारीभिः समन्ततः ॥ सर्वाङ्गशोभिनी देवी यावद्वास्ते तपोऽन्विता ॥१५॥ तावदागतवांस्तत्र नारदो ब्रह्मणः सुतः ॥ तं दृष्ट्वा सहसा देवी ब्रह्मपुत्रं तपोधनम् ॥ १६ ॥ विद्युत्प्रभाभुजाश्चेद्वासनं दीयतामिति ॥ पाद्य

माचमनीयं च क्षिप्रमस्मै प्रदीयताम् ॥ १७॥ एवमुक्ता तदा देव्या कन्या विद्युत्प्रभा शुभा॥आसनं पाद्यमर्घ्यं च नारदाय न्यवेदयत् ॥ १८॥
ततः कृतासनं दृष्ट्वा प्रणतं नारदं मुनिम् ॥ उवाच देवी वचनं हर्षेण महतान्विता ॥ १९ ॥ स्वागतं भो मुनिश्रेष्ठ कस्माल्लोकादिहागतः ॥
किं कार्यं वद ते कृत्यं मा ते कालात्ययो भवेत् ॥ २०॥ एवमुक्तस्तदा देव्या नारदः प्राह लोकवित् ॥ ब्रह्मलोकादिन्द्रलोकं तस्माद्रौद्रमथाच
लम् ॥ २१ ॥ ततस्त्वामिह देवेशि द्रष्टुमभ्यागतः शुभे ॥ एवमुक्त्वा मुनिः श्रीमांस्तां देवीमन्वैक्षत ॥२२॥ दृष्ट्वा मुहूर्तं देवेशो विस्मितो
नारदोऽभवत् ॥ अहो रूपमहो कान्तिरहो धैर्यमहो वयः ॥ २३ ॥ अहो निष्कामता देव्या इति खेदमुवाययौ ॥ देवगन्धर्वसिद्धानां यक्षकिन्नर
रक्षसाम् ॥ २४ ॥ न रूपमीदृशं क्वापि स्त्रीषून्यासु प्रदृश्यते ॥ एवं संचिन्त्य मनसा नारदो विस्मयान्वितः ॥ २५ ॥ प्रणम्य देवीं सहसा
उत्पपात नभस्तलम् ॥ गतश्च त्वरया युक्तः पुरीं दैत्येन्द्रपालिताम् ॥ २६ ॥ महिषाख्येन भूतेशि तपुद्दान्तःस्थितां पुरीम् ॥ तत्रासतादं
भगवानसुरं महिषाकृतिम् ॥ २७ ॥ दृष्ट्वा लब्धवरं वीरं देवसैन्यान्तकं महत् ॥ स तेन पूजितो भक्त्या तदा लोकचरो मुनिः ॥ २८ ॥
प्रीतात्मा नारदस्तस्मै देव्या रूपमनुत्तमम् ॥ आचचक्षे यथान्यायं यद्दृष्टं देवतापुरे ॥ २९ ॥ नारद उवाच ॥ असुरेन्द्र शृणुष्वैकं कन्यारत्नं
समाहितः ॥ त्रैलोक्यं वरदानेन स्वाधीनं ते चराचरम् ॥ ३० ॥ ब्रह्मलोकादहं दैत्य मन्दराद्रिमुपागतः ॥ तत्र देवीपुरं दृष्टं कुमारीशतसङ्कु
लम् ॥ ३१ ॥ तत्र प्रधाना या कन्या तापसी व्रतचारिणी ॥ सा देवदैत्ययक्षाणां मध्ये काचित्र दृश्यते ॥ ३२ ॥ यादृशी सा मया दृष्टा
तादृशी काण्डमध्यतः ॥ भ्रमता चेदृशी दृष्टा न कदाचिन्मया सती ॥ ३३ ॥ तस्याश्च देवगन्धर्वा ऋषयः सिद्धचारणाः ॥ उपासाञ्चक्रिरे सर्वे
येऽप्यन्ये दैत्यनायकाः ॥ ३४ ॥ तां दृष्ट्वा वरदां देवीमहं तूर्णमिहागतः ॥ अजित्वा देवगन्धर्वांस्त्रि तां जयति कश्चन ॥ ३५ ॥ एवमुक्त्वा क्षणं
स्थित्वा तमनुज्ञाप्य नारदः ॥ ययागतं ययौ धीमानन्तर्द्धानेन तत्क्षणात् ॥ ३६ ॥ इति श्रीवराहपुराणे प्राणितिहासे त्रिशक्तिमाहात्म्ये श्री ॥७०॥
वैष्णवीमाहात्म्यं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥ अथ मन्त्रिमहिषासुरसंवादः ॥ श्रीवराह उवाच ॥ गते तु नारदे दैत्यश्चिन्तयामास तां
शुभाम् ॥ कथितां नारदमुखाच्छ्रुत्वा विस्मितमानसः ॥ १ ॥ तामेव चिन्तयन् शर्म न लेभे दैत्यसत्तमः ॥ मन्त्रिणं चानयामास अलंशर्माण

मुत्तमम् ॥ २ ॥ तस्याष्टौ मन्त्रिणः शूरा नीतिमन्तो बहुश्रुताः ॥ प्रवसो विषसश्चैव शङ्खकर्णो विभावसुः ॥ ३ ॥ विद्युन्माली सुमाला च पर्जन्यः क्रूर एव च ॥ ऐते मन्त्रिवरास्तस्य प्राधान्येन प्रकीर्त्तिताः ॥ ४ ॥ ते दानवेन्द्रमासीनमूचुः कृत्यं विधीयताम् ॥ तेषां तद्वचनं श्रुत्वा दानवेन्द्रो महाबलः ॥ ५ ॥ उवाच कन्यालाभार्थं नारदावातानिश्चयः ॥ महिष उवाच ॥ मह्यं तु कथिता बाला नारदेन महर्षिणा ॥ ६ ॥ सा चाजित्य सुराध्यक्षं न लभ्यत वराङ्गना ॥ एतदर्थं भवन्तो वै कथयन्तु विमृश्य मे ॥ ७ ॥ कथं सा लभ्यते बाला कथं देवाश्च निर्जिताः ॥ भवेयुरिति तत्सर्वं कथयन्तु द्रुतं मम ॥ ८ ॥ एवमुक्तास्ततः सर्वे कथयामासुरञ्जसा ॥ एवमुक्तस्तथोवाच प्रवसो दानवेश्वरम् ॥ ९ ॥ या सा ते कथिता दैत्य नारदेन महासती ॥ सा शक्तिः परमा देवी वैष्णवी रूपधारिणी ॥१० ॥ गुरुपत्नी राजपत्नी तथा सामन्तयोषितः ॥ जिघृक्षन् नश्यते राजा तथागम्यागमेन च ॥ ११ ॥ प्रवसेनैवमुक्तस्तु विषसो वाक्यमब्रवीत् ॥ सम्यगुक्तं प्रवसेन तां देवीं प्रति पार्थिव ॥ १२ ॥ यदि नाम मतैक्यन्तु बुद्धिः स्मरणमागता ॥ वरणीया कुमारी तु सर्वदा विजिगीषुभिः ॥ १३ ॥ न स्वतन्त्रेण कन्यायाः कार्यं क्वापि प्रकर्षणम् ॥ यदि वो रोचते वाक्यं मदीयं मन्त्रितत्तमाः ॥ १४ ॥ तदानीं तां शुभां देवीं गत्वा याचन्तु मन्त्रिणः ॥ यो महात्मा भवेत्तस्या बन्धुस्तं याचयामहे ॥ १५ ॥ साम्नैवादौ ततः पश्चात्करिष्यामः प्रदानकम् ॥ ततो भेदं करिष्यामस्ततो दण्डं क्रमेण च ॥ १६ ॥ अनेन क्रमयोगेन यदि सा नैव लभ्यते ॥ ततः सन्नह्य गच्छामो बलाद्गृह्णीम तां शुभाम् ॥ १७ ॥ विषसेनैवमुक्तास्तु शेषास्तु मन्त्रिणो वचः ॥ शुभमूचुः प्रशंसन्तः सर्वे हर्षितमानसाः ॥ १८ ॥ साधूक्तं विषसेनेदं यत्तां प्रति वरानना ॥ तदेव क्रियतां शीघ्रं दूतस्तत्र विसर्ज्यताम् ॥ १९ ॥ यः सर्वशास्त्र नीतिज्ञः शुचिः शौर्यसमन्वितः ॥ तस्माज्ज्ञात्वा तु तां देवीं वर्णतो रूपतो गुणैः॥२०॥ पराक्रमेण शौर्येण शौण्डीर्येण बलेन च ॥ बंधुवर्गेण सामथ्या त्वस्थानकरणेन च ॥ २१ ॥ एवं ज्ञात्वा तु तां देवीं ततः कार्यं विधीयताम् ॥ ततः सपदि दैत्यस्य तद्वचः साधु साधितं ॥२२॥ प्रशशंसुर्वरारोहे विषसं मन्त्रिसत्तमम् ॥ प्रशस्य सर्वे तं दूतं सन्देष्टुमुपचक्रमुः ॥ २३ ॥ विद्युत्प्रभं महाभागं बहुमायाविदं शुभम् ॥ विसर्जयित्वा तं दूतं विषसो वाक्यमब्रवीत् ॥ २४ ॥ क्रियतां विजयस्तावद्देवसैन्यं प्रति प्रभो ॥ सन्नह्यन्तां दानवेन्द्राश्चतुरङ्गबलेन ह ॥ २५॥ अनु

रेन्द्र सुरेभ्यस्त्वत्पराक्रमभीपितैः ॥ सा कन्या वशतामेति त्वयि शक्रे समागते ॥२६॥ लोकपालैर्जितैः सर्वैस्तथैव मरुतां गणैः ॥ नागैर्विद्याधरैः सिद्धैर्गन्धर्वैः सर्पभोजनैः ॥२७॥ रुद्रैर्वसुभिरादित्यैस्त्वमेवेन्द्रो भविष्यसि ॥ इन्द्रस्य ते शतं कन्या देवगन्धर्वयोषितः ॥ २८ ॥ वशमायान्ति सापि स्यात्सर्वथा वशमागता ॥ एवमुक्तस्तदा दैत्यः सेनापतिमुवाच ह ॥२९॥ विरूपाक्षं महामेघवर्णं नीलाञ्जनप्रभम् ॥ आनीयतां द्रुतं सैन्यं हस्त्यश्वरथपत्तिनाम् ॥३०॥ येन देवान्सगन्धर्वान्क्षयामि युधि दुर्जयान् ॥ एवमुक्ते विरूपाक्षे तदा सेनापतिर्द्रुतम् ॥३१॥ आनिनाय महत्ते न्यमनन्तमपराजितम् ॥ एकैको दानवस्तत्र वज्रहस्तसमो युधि ॥ ३२ ॥ एकैकं स्पर्धते देवं जेतुं स्वेन बलेन ह ॥ तेषां प्रधानभूतानामर्बुदं नव कोटयः॥३३॥ एकस्य येषामनुपाति तावद्बलमथोर्जितम् ॥ तेषां नैकसहस्राणि दैत्यानां तु महात्मनाम्॥३४॥समिते चक्रुरुत्थास्तदा दैत्याः प्रहारिणः ॥ प्रयाणं कारयामासुर्दैत्यैस्तैन्यजिवांतया ॥३५॥ विचित्रयाना विविधध्वजाश्च विचित्रशस्त्रा विविधोग्रूपाः ॥ दैत्याः सुराजेतुमिच्छन्त उच्चैर्ननर्तुरुत्तायुधयुक्तहस्ताः ॥ ३६ ॥ इति श्रीवराहपुराणे त्रिशक्तिमाहात्म्ये मन्त्रिमहिषासुरसंवादो नाम त्रिनवतितमोध्यायः ॥ ९३ ॥

अथ सुरासुरयुद्धवर्णनम् ॥ वराह उवाच ॥ ततो महिषदैत्यस्तु कामरूपी महाबलः ॥ मत्तहस्तिनमारुह्य विषासुरैरुपवेतम् ॥ १ ॥ तत्रेन्द्रपुरमासाद्य देवैः सह शतक्रतुम् ॥ अभिदुद्राव दैत्येन्द्रो देवान्कोपसमन्वितः ॥ २ ॥ आदाय स्वानि शस्त्राणि वाहनानि विशेषतः ॥ अधिष्ठाय सुरानाजौ दुद्रुवुर्युदिता भृशम् ॥ ३ ॥ तेषां प्रवृत्ते युद्धं तुमुलं लोमहर्षणम् ॥ घोरं प्रचण्डयोधानामन्योन्यमभिगर्जताम् ॥ ४ ॥ तत्रानो नीलकुक्षिर्मेघवर्णो बलाहकः ॥ उग्राक्षो लम्बाटाक्षः सुभीमो भीमविक्रमः ॥ ५ ॥ स्वर्भानुश्चाष्ट दैत्यास्ते वमूर्दुद्रुवुराहवे ॥ ययासंख्येन तद्वच्च दैत्या द्वादश चापरे ॥६॥ आदित्यान्दैत्यवर्यास्तु तेषां प्राधान्यतः शृणु ॥ भीमो घ्राणोऽथ घस्तःकर्णः शङ्कुकर्णस्तथैव च ॥७॥ वज्रको ज्योतिरीर्यश्च विद्युन्माली तथैव च ॥ रक्ताक्षो भीमदंष्ट्रस्तु विद्युज्जिह्वस्तथैव च ॥ ८ ॥ अतिह्रायो महाकायो दीर्घबाहुः कृता कृतः॥ एते द्वादश दैत्येन्द्रा आदित्यान्युधि दुद्रुवुः ॥९॥ स्वकं सैन्यमुदायय तद्वद्दैत्येऽपि दानवाः॥ रुद्रान्दुद्रुवुरुग्रयत्ना यथासंख्येन कोपिताः ॥१०॥ कालः कृतान्तो रक्ताक्षो हरणो मित्रहा नलः ॥ यज्ञहा ब्रह्महा गोघ्नः स्त्रीघ्नः संवर्तकस्तथा ॥ ११ ॥ इत्येते दश चैकश्च दैत्येन्द्रा युद्ध

॥ ७१ ॥

दुर्मदाः ॥ यथासंख्येन रुद्रांस्तु दुद्रुवुर्भीमविक्रमाः ॥ १२ ॥ शेषान्देशाद् शेवेत्या यथायोगमुपाद्रवन् ॥ स्वयं महिषदैत्यस्तु इन्द्रं दुद्राव वेगतः ॥ १३॥ स चापि बलवान्दैत्यो ब्रह्मणो वरदर्पितः ॥ अवध्यः पुरषेणाजौ यत्रापि स्यात्पिनाकधृक् ॥१४॥ आदित्यैर्वसुभिः सार्द्धं रुद्रैश्च निहता भृशम् ॥ असुरा यातुधानाश्च संख्यापूरणकारकाः ॥ देवानामपि सेन्यानि निहतान्यसुरैर्युधि ॥ १५ ॥ एवम्भूते तदा भग्ने देवेन्द्रो विद्रुतास्ततः सुराः ॥ अर्दिता विविधैः शस्त्रैः शूलपट्टिशमुद्गरैः ॥ १६ ॥ गतवन्तो ब्रह्मलोकमसुरैरर्दिताः सुराः ॥ १७ ॥ इति श्रीवराहपुराणे त्रिंशत्किमाहात्म्ये सुरासुरयुद्धवर्णनं नाम चतुर्नवतितमोऽध्यायः ॥९४॥ अथ महिषासुरवधः ॥ श्रीवराह उवाच॥अथ विद्युत्प्रभो दैत्यस्तया दूतो विसर्जितः ॥ प्रणम्य प्रयतो भूत्वा कुमारीशतसंकुलाम् ॥ १ ॥ अस्थाने विजयोपन्नस्ततो वचनमब्रवीत् ॥ विद्युत्प्रभ उवाच ॥ देवि पूर्वंनृपस्त्वासादादिसर्गेकसम्भवः ॥ २ ॥ सखा सारस्वतो जातः सुपाश्वों नाम वै विभुः ॥ तस्याभवन्महातेजाः सिन्धुद्वीपः प्रतापवान्॥३॥ स हि तीव्रं तपस्तेपे माहिष्मत्यां पुरोत्तमे ॥ कुर्वतस्तु तपो घोरं निराहारस्य शोभने॥४॥ आद्या तु विप्रचित्तेः सा सुता परमशोभना ॥ माहिष्मतीति विख्याता रूपेण सदृशी भुवि॥५॥ सा सखीभिः परिवृता विहरन्ती यदृच्छया ॥ आगता मन्दरद्रोणीं तत्रापश्यत्तपोवनम् ॥६॥ मुनेस्वरस्वरूपस्य विविधद्रुममालितम्॥लतागृहैस्तु विवधैर्बकुलैर्बकुचैस्तथा ॥७॥ चन्द्रनैः सुपलाशैः साखैः सरलैरुपशोभितम्॥विचित्रवनखण्डैश्च भूषितं तु महात्मनः ॥८॥ दृष्ट्वाश्रमपदं रम्यं साऽसुरी कन्यका शुभम्॥ माहिष्मती वरारोहा चिन्तयामास भामिनी ॥९॥ भीषयित्वाऽहमेनं तु तापसं त्वाश्रमे स्वयम्॥तिष्ठामि क्रीडती सार्द्धं सखीभिः परमार्चिता॥१०॥एवं सञ्चिन्त्य सा देवी महिषी सम्बभूव ह॥सखीभिः सह विश्रेशेशि तीक्ष्णशृङ्गाग्रधारिणी॥११॥ तमृषिं भीषियुं ताभिः सह गत्वा वरानना ॥ अतो विभीषितस्ताभिस्तां ज्ञात्वा ज्ञानचक्षुषा ॥१२॥ आसुरीं क्रोधसम्पन्नः शशाप शुभलोचनाम् ॥ यस्माद्भीषयसे मां त्वं महिषीरूपधारिणी ॥ १३ ॥ अतो भव महिष्येव पापकर्मं शतं समाः ॥ एवमुक्ता ततः सा तु सखीभिः सह वेपती ॥ १४ ॥ पादयोर्न्यपतत्तस्य शापान्तं कुरु जल्पती ॥ तस्यास्तद्वचनं श्रुत्वा स मुनिः करुणान्वितः ॥ १५॥ शापान्तमकरोत्तस्य वाक्यं चेदमुवाच ह ॥ अनेनैव स्वरूपेण पुत्रमेकं प्रसूय वै॥ शापान्तो भविता भद्रे मद्वाक्यं न मृषा

भवेत् ॥ १६ ॥ एवमुक्ता गता सा तु नर्मदातरिसुत्तमम् ॥ यत्र तेपे तपो घोरं सिंधुद्वीपो महातपाः ॥ १७ ॥ तत्र चेन्दुमती नाम दैत्य कन्यातिरूपिणी ॥ सा दृष्टा तेन मुनिना विवस्त्रा मज्जती जले ॥ १८ ॥ चस्कन्द स मुनिः शुक्रं शिलाद्रोण्यां महातपाः ॥ तच्च माहिष्मती दृङ्घा दिव्यगंधि सुगंधि च ॥ १९ ॥ ततः सलीलमुवाचेदं पिबामीदं जलं शुभम् ॥ एवमुक्त्वा तु सा पीत्वा तच्छुक्रं मुनिसम्भवम् ॥ २० ॥ प्राप्ता गर्भं मुनेर्वीर्यात्सुषुवे च तदा सती ॥ तस्याः पुत्रोऽभवद्धीमान्महाबलपराक्रमः ॥ २१ ॥ महिषेति स्मृतो नाम्ना ब्रह्मवंशविवर्धनः ॥ स त्वां वरयते देवि देवसैन्यविमर्दनः ॥ २२ ॥ स सुरानपि जित्वाजौ त्रैलोक्यं च तवानघे ॥ दास्यते देवि सुप्रीतस्तव सर्वं महासुरः ॥ २३ ॥ तस्यात्मोपप्रदानेन कुरु देवि महत्कृतम् ॥ एवमुक्ता तदा देवी तेन दूतेन शोभना ॥ २४ ॥ जहास परमा देवी वाक्यं नोवाच किंचन ॥ तस्या हसन्त्या दूतोऽसौ त्रैलोक्यं सचराचरम् ॥ २५ ॥ ददर्श कुक्षौ सम्भ्रान्तस्तत्क्षणात्तमजायत ॥ ततो देव्याः प्रतीहारी जयारूया अतितेजना ॥ २६ ॥ देव्या ह्यदि स्थित वाक्यमुवाच तनुमध्यमा ॥ जयोवाच ॥ कन्यार्थी वदते यत्तु तत्त्वया समुदीरितम् ॥२७॥ यदि नाम व्रतं चास्याः कौमारं सार्वकालिकम् ॥ अपि चान्याः कुमार्योऽत्र संति देव्याः पदानुगाः॥२८॥ तासामेकापि नो लभ्या किमु देवी स्वयं शुभा ॥ याहि दूत त्वरन्मा ते किंचिदन्यद्भविष्यति॥२९॥एवमुक्तो गतो दूतस्तावद्वचोऽत्रि महामुनिः ॥ आयातो नारदस्तूर्णं गृह्णञ्छ्वेतेहातपाः॥३०॥ दिष्ट्या दिष्ट्येति चागत्य तां कन्यां प्रणिपत्य च ॥ उपविष्टो जगादाथ आसने परमेऽचितः ॥ ३१ ॥ प्रणम्य देवीः सर्वास्ता उवाच च महातपाः ॥ देवि देवैरहं प्रीतः प्रेषितोऽस्मि तवान्तिकम् ॥ ३२ ॥ महिषाख्येन दैत्येन युधि देवा विनिर्जिताः ॥ त्वां गृहीतुं प्रयत्नं स कृत वान्देवि दैत्यराट् ॥ ३३ ॥ एवमुक्तोऽस्मि देवैस्त्वां बोधयामि वरानने॥स्थिरीभूता महादेवि तं दैत्यं प्रतिघातय ॥३४॥उक्त्वेत्यन्तर्हितः सद्यो नारदः स्वेच्छया ययौ॥देवी च कन्यास्ताः सर्वाः सन्नद्धयन्तामुवाच ह॥ ३५॥ततः कन्या महाभागाः सर्वास्ता देविशासनात् ॥ बभूवुर्वीरूपिण्यः खड्गचर्मधनुर्धराः॥३६॥संग्रामहेतोः संतस्थुर्दैत्यविध्वंसनाय ताः ॥ तावद्दैत्यबलं सर्वं मुक्त्वा देवचमूं द्रुतम् ॥ ३७ ॥ आययौ यत्र तद्देव्याः सन्नद्धं स्त्रीबलं महत् ॥ ततस्ता युयुधुः कन्या दानवैः सह दर्पिताः ॥ ३८ ॥ क्षणेन तद्बलं ताभिश्चतुरङ्गं निपातितम् ॥ शिरांसि तत्र केषा

॥ ७२ ॥

श्चिच्छिन्नानि पतितानि च ॥ ३९ ॥ अपरेषां विदार्योरः कव्यादाः पान्ति शोणितम् ॥ अन्ये कबन्धभूतास्तु ननृतुर्दैत्यनायकाः ॥ ४० ॥
एवं क्षणेन ते सर्वे विद्रुताः पापचेतसः ॥ अपरे विद्रुताः सर्वे यत्रासौ महिषासुरः ॥ ४१ ॥ ततो हाहाकृतं सर्वं तथा दैत्यबलं महत् ॥
एवं तदाकुलं दृष्ट्वा महिषो वाक्यमब्रवीत् ॥४२॥ सेनापते किमेतद्धि बलं भग्नं ममाग्रतः ॥ ततो यज्ञहनुर्नामा दैत्यो हस्तिस्वरूपवान् ॥४३॥
उवाच भग्नमेतद्धि कुमारीभिः समन्ततः ॥ ततो दुद्राव महिषस्ताः कन्याः शुभलोचनाः ॥ ४४ ॥ गदामादाय तरसा घातितुं तास्ततोऽसुरः ॥ यत्र तिष्ठति सा देवी देवगन्धर्वपूजिता ॥ ४५ ॥ तत्रैव सोऽसुरः प्रायाद्यत्र देवी व्यवस्थिता ॥ सा च दृष्ट्वा तमायान्तं विंशद्भस्ता बभूव ह ॥ ४६ ॥ धनुः खड्गं तथा शक्तिं शराञ्छूलं गदां तथा ॥ मुसलं च तथा चक्रं भिन्दिपालं तथैव च ॥४७ ॥ दण्डं पाशं ध्वजं चैव पद्मं चेति च विंशतिः ॥ भूत्वा विंशद्भुजा देवी सिंहमास्थाय दंशिता ॥ ४८ ॥ सस्मार रुद्रं देवेशं रौद्रं संहारकारणम् ॥ ततो वृषध्वजः साक्षाद्द्रुतं तत्रैव आययौ ॥४९॥ तया प्रणम्य विज्ञप्तः सर्वान्दैत्यान्जयाम्यहम् ॥ त्वयि सान्निधिमात्रे तु देवदेव सनातन ॥५०॥एवमुक्ताऽसुरान् सर्वाञ्जिगाय परमेश्वरी ॥ मुक्त्वा तमेकं महिषं शेषं हत्वा तमभ्यधात् ॥ ५१ ॥ यावद्देवी ततः सापि तां दृष्ट्वा सोऽपि दुद्रुवे ॥ क्वचिद्युध्यति दैत्येन्द्रः क्वचिच्चैव पलायते ॥ ५२ ॥ ॥ कचित्पुनर्मृधं चक्रे कचित्पुनरुपारमत् ॥ एवं वर्षसहस्राणि दश तस्य तया सह ॥ ५३ ॥ दिव्यानि विगतानि स्युर्युध्यतश्चैव शोभने ॥ बभ्राम सकलं त्वाजौ ब्रह्माण्ड भीतमानसम् ॥ ५४ ॥ ततः कालेन महता शतशृङ्गे महागिरौ ॥ पद्भ्यामाक्रम्य शूलेन निहतो दैत्यनायकः ॥ ५५ ॥ शिरश्चिच्छेद खड्गेन तत्र चान्तः स्थितः पुमान् ॥ निर्गत्य विगतः स्वर्गं देव्याः शस्त्रनिपातनात् ॥ ५६ ॥ ततो देवगणाः सर्वे महिषं वीक्ष्य निर्जितम् ॥ सब्रह्मकाः स्तुतिं चक्रुर्दैव्यास्तुष्टेन चेतसा ॥ ५७ ॥ देवा ऊचुः ॥ नमो देवि महाभागे गम्भीरे भीमदर्शने ॥ जयस्थे स्थितिसिद्धान्ते त्रिनेत्रे विश्वतोमुखि ॥ ५८ ॥ विद्याविद्ये जपे जाप्ये महिषासुरमर्दिनि ॥ सर्वगे सर्वदेवेशि विश्वरूपिणि वैष्णवि ॥ ५९ ॥ वीतशोके ध्रुवे देवि पद्मपत्रशुभेक्षणे ॥ शुद्धसत्त्वव्रतस्थे च चण्डरूपे विभावरि ॥ ६० ॥ ऋद्धिसिद्धिप्रदे,देवि विद्येऽविद्येऽमृते शिवे ॥ शाङ्करी वैष्णवी ब्राह्मी सर्वदेवनमस्कृते ॥ ६१ ॥ घण्टाहस्ते त्रिशूलाग्रे

महामहिषमर्दिनि ॥ उग्ररूपे विरूपाक्षि महामायेऽमृतप्लवे ॥ ६२ ॥ सर्वसत्त्वहिते देवि सर्वसत्त्वमये ध्रुवे ॥ विद्यापुराणशिल्पानां जननी भूतधारिणि ॥ ६३ ॥ सर्ववेदरहस्यानां सर्वसत्त्ववतां शुभे ॥ त्वमेव शरणं देवि विद्येऽविद्ये नमोऽम्बिके ॥ ६४ ॥ विरूपाक्षि तथा क्षान्तिः क्षोभितान्तर्जलेऽमले ॥ नमोऽस्तु ते महादेवि नमस्ते परमेश्वरि ॥ ६५ ॥ शरणं त्वां प्रपद्यन्ते ये देवि परमेश्वरि ॥ स तेषां जायते किंचिदशुभं रणसङ्कटे ॥ ६६॥ यश्च व्याघ्रभये घोरे चौरराजभये तथा ॥ स्तवमेनं सदा देवि पठिष्यति यतात्मवान् ॥६७॥ निगडस्थोऽपि यो देवि ते स्मरिष्यति मानवः ॥ सोऽपि बन्धैर्विनिर्मुक्तः सुसुखं वसते सुखी ॥ ६८ ॥ वराह उवाच ॥ एवं स्तुता तदा देवी देवैः प्रणतिपूर्वकम् ॥ उवाच देवान्सुश्रोणि वृणुध्वं वरमुत्तमम् ॥ ६९ ॥ देवा ऊचुः ॥ देवि स्तोत्रमिदं ये हि पठिष्यन्ति तवानघे ॥ सर्वकामसमापन्नान् कुरु देवि स नो वरः ॥ ७० ॥ एवमस्त्विति तान्देवानुक्त्वा देवी परापरा ॥ विससर्ज ततो देवान्स्वयं तत्रैव संस्थिता ॥ ७१ ॥ एतद्वितीयं यो जन्म वेद देव्या धराधरे ॥ स वीतशोको विरजाः पदं गच्छत्यनामयम् ॥ ७२ ॥ इति श्रीवराहपुराणे त्रिशक्तिमाहात्म्ये महिषासुरवधो नाम पंचनवतितमोऽध्यायः ॥ ९५ ॥ अथ त्रिशक्तिरहस्ये रौद्रीव्रतम् ॥ श्रीवराह उवाच ॥ या सा नीलगिरिं याता तपसे धृतमानसा ॥ रौद्री तमोद्भवा शक्तिस्तस्याः शृणु धरे व्रतम् ॥ १ ॥ तपः कृत्वा चिरं कालं पालयाम्यखिलं जगत् ॥ एवमुद्दिश्य पंचाग्निं साधयामास भामिनी ॥ २ ॥ तस्याः कालान्तरे देव्यास्तपन्त्यास्तप उत्तमम् ॥ रुरुर्नाम महातेजाः ब्रह्मदत्तवरोऽसुरः ॥ ३ ॥ समुद्रमध्ये रत्नाढ्यं पुरमस्ति महावनम् ॥ तत्र राजा स दैत्येन्द्रः सर्वदेवभयङ्करः॥४॥ अनेकशतसाहस्रकोटिकोट्युत्तरोत्तरैः ॥ असुरैरन्वितः श्रीमान्द्वितीयो नमुचिर्यथा ॥ ५ ॥ कालेन महता चासौ लोकपालपुराण्यथ ॥ जिगीषुः सैन्यसंवीतो देवैर्युद्धमरोचयत् ॥ ६ ॥ उत्तिष्ठतस्तस्य महासुरस्य समुद्रतोयं ववृधेऽतिमात्रम् ॥ अनेकनक्रग्रहमीनसङ्कटमाप्लावयत्पर्वतसानुदेशान् ॥ ७ ॥ अन्तःस्थितानेकसुरारिसङ्घाद्विचित्रवर्माद्युधचित्रशोभम् ॥ भीमं बलं वर्मितचारुयोधं विनिर्ययौ सिन्धुजलाद्विशालात् ॥८॥ तत्र द्विपा दैत्यवरैरुपेताः समानघण्टायुतकिंकिणीकाः ॥ विनिर्ययुः स्वाकृतिभीषणाश्च समत्वमुच्चैः खलु दर्शयन्तः ॥ ९ ॥ अश्वास्तथा काञ्चनपीठबद्धा रोहैस्तु युक्ताः सितचामरैश्च ॥

॥७२॥

व्यवस्थितास्ते समभेव तूर्णं विनिर्ययुर्लक्षशः कोटिशश्च ॥ १० ॥ रथा रविस्यन्दनतूल्यवेगाः सुचक्रदण्डाक्षविषेणयुक्ताः ॥ सुशस्त्रयन्त्राः
पि र्षीडताङ्गाश्चलन्त्यनन्तास्त्वरितं विशक्ताः ॥ ११ ॥ तथैव योधाः स्थगितेतरेतरास्तितर्षिणो ये वरतूणपाणयः ॥ पदे पदे लब्धजयाः
प्रहारिणो विरेजुरुच्चैरसुरानुगा भृशम् ॥ १२ ॥ देवेषु चैव भग्नेषु विनिर्गत्य जलात्ततः ॥ चतुरङ्गबलोपेतः प्रायादिन्द्रपुरं प्रति ॥ १३ ॥
युयोध च सुरैः सार्द्धं रुरुर्दैत्यपतिस्तथा ॥ मुद्गरैर्मुसलैर्घोरैः शरैर्दण्डायुधैस्तथा ॥ १४ ॥ जघ्नुर्देत्याः सुरान्संख्य सुराश्चैव तथासुरान् ॥ एवं
क्ष णमथो युध्वा तदा देवाः सवासवाः ॥ १५ ॥ असुरैर्निर्जिताः सद्यो दुद्रुवुर्विमुखा भृशम् ॥ देवेषु चैवम्भग्नेषु विद्रुतेषु विशेषतः ॥ १६ ॥
असुरः सर्वदेवानामन्वधावत वीर्यवान्॥ततो देवगणाः सर्वे द्रवन्तो भयविह्वलाः॥१७॥नीलं गिरिवरं जग्मुर्यत्र देवी व्यवस्थिता ॥ रौद्री तपोरता
देवी तामसी शक्तिरुत्तमा ॥ १८ ॥ संहारकारिणी देवी कालरात्रीति तां विदुः ॥ सा दृष्ट्वा तान् तदा देवान् भयत्रस्तान्विचेतसः ॥ १९ ॥ मा
भैष्टेत्युच्चकैर्देवी तानुवाच सुरोत्तमान् ॥ देव्युवाच ॥ किमियं व्याकुला देवा गतिर्वः उपलक्ष्यते ॥ २० ॥ कथयध्वं द्रुतं देवाः सर्वथा भयकार
णम् ॥ देवा ऊचुः ॥ अयमायाति दैत्येन्द्रो रुरुर्भीमपराक्रमः ॥ २१॥ एतस्य भीतान् रक्षस्व त्वं देवान्परमेश्वरि ॥ एवमुक्ता तदा देवैर्देवी भीम
पराक्रमा ॥ २२ ॥ जहास परया प्रीत्या देवानां पुरतः शुभा ॥ तस्या हसन्त्या वक्त्रान्तु बह्वयो देव्यो विनिर्ययुः ॥ २३ ॥ याभिर्विश्वमिदं
व्याप्तं विकृताभिरनेकशः ॥ पाशांकुशधराः सर्वाः सर्वाः पनिषधोधराः ॥ २४ ॥ सर्वाः शूलधरा भीमाः सर्वाश्चापधराः शुभाः ॥ ताः सर्वाः
कोटिशो देव्यस्तां देवीं वेष्टच संस्थिताः ॥ २५ ॥ युयुधुर्दानवैः सार्द्धं बद्धतूणा महाबलाः ॥ क्षणेन दानवबलं तत्सर्वं निहतं तु तैः ॥२६ ॥
देवाश्च सर्वे सम्पन्ना युयुधुर्दानवं बलम् ॥ कालरात्र्या बलं चैव यच्च देववलं महत् ॥ २७ ॥ तत्सर्वं दानवबलमनयद्यमसादनम् ॥ एक एव
महादैत्यो रुरुस्तस्थौ महामृधे ॥ २८ ॥ स च मायां महारौद्रीं रौरवीं विससर्ज ह ॥ सा माया ववृधे भीमा सर्वदेवप्रमोहिनी ॥ २९ ॥ तया
विमोहिता देवाः सर्वे निद्रां तु लेभिरे ॥ देवी च त्रिशिखेनाजौ तं दैत्यं समताडयत् ॥ ३० ॥ तया तु ताडितस्यास्य दैत्यस्य शुभलोचने ॥
चर्ममुण्डे उभे सम्यक् पृथग्भूते व भूवतुः॥ ३१॥रुरोस्तु दानवेन्द्रस्य चर्ममुण्डे क्षणाद्यतः॥अपतत्याहरद्देवी चामुण्डा तेन साऽभवत् ॥ ३२॥

सर्वभूतमहारौद्री या देवी परमेश्वरी ॥ संहारिणी तु या चैव कालरात्रिः प्रकीर्त्तिता ॥ ३३ ॥ तस्या ह्यनुचरा देव्यो बह्वचोऽसंख्यात कोटयः ॥ तास्तां देवीं महाभागां परिवार्य व्यवस्थिताः ॥ ३४ ॥ याचयामासुरव्यग्रास्तास्तां देवीं बुभुक्षिताः ॥ वयं देवि क्षुधार्त्ताः स्मो देहि नो भोजनं शुभे ॥ ३५ ॥ एवमुक्ता तदा देवी दध्यौ तासां तु भोजनम् ॥ न चाध्यगच्छच्च यदा तासां भोजनमन्तिकात्॥ ३६ ॥ ततो दध्यौ महादेवं रुद्रं पशुपतिं विभुम् ॥ सोऽपि ध्यानात्समुत्तस्थौ परमात्मा त्रिलोचनः ॥ ३७ ॥ उवाच च द्रुतं देवीं किं ते कार्यं विवक्षितम् ॥ ब्रूहि देवि वरारोहे यत्ते मनसि वर्त्तते ॥ ३८ ॥ देव्युवाच ॥ भक्ष्यार्थमासां देवेश किञ्चिद्दातुमिहार्हसि ॥ बलात्कुर्वन्ति मामेता भक्षार्थिन्यो महाबलाः ॥ ३९ ॥ अन्यथा मामपि बलाद्भक्ष्यिष्यन्ति ताः प्रभो ॥ रुद्र उवाच ॥ एतासां शृणु देवेशि भक्ष्यमेकं मयोदितम् ॥ ४० ॥ कथ्यमानं वरारोहे कालरात्रे महाप्रभे ॥ या स्त्री सगर्भा देवेशि त्वन्यस्त्रीपरिधानकम् ॥ ४१ ॥ परिधत्ते स्पृशेच्चापि पुरुषस्य विशेषतः ॥ स भागोस्तु महाभागो कासाञ्चित्पृथिवीतले ॥ ४२ ॥ अन्याश्छिद्रेषु वाऽज्ञानां गृहीत्वा तत्र वै बालिम् ॥ लब्ध्वा भवन्तु सुप्रीता आपि वर्षशतान्यपि ॥ ४३ ॥ अन्याः सूतिगृहे च्छिद्रं गृह्णीयुस्तत्र पूजिताः ॥ निवसिष्यन्ति देवेशि तथान्या जातदारिकाः ॥ ४४ ॥ गृहे क्षेत्रे तडागेषु वाप्युद्यानेषु चैव हि ॥ अन्यचित्ता रुदन्त्यो याः स्त्रियास्तिष्ठन्ति नित्यशः ॥४५॥ तासां शरीराण्याविश्य कांचिन्नृतिमवाप्स्यथ ॥ एवमुक्त्वा तदा देवीं स्वयं रुद्रः प्रतापवान् ॥ ४६ ॥ दृष्ट्वा रुरुं च सबलमसुरेन्द्रं निपातितम् ॥ स्तुतिं चकार भगवान् स्वयं देवस्त्रिलोचनः॥ ४७॥ रुद्र उवाच ॥ जयस्व देवि चामुण्डे जय भूतापहारिणि ॥ जय सर्वगते देवि कालरात्रे नमोऽस्तु ते ॥ ४८ ॥ विश्वमूर्त्ते शुभे शुद्धे विरूपाक्षि त्रिलोचने ॥ भीमरूपे शिवे वैद्ये महामाये महोदये ॥ ४९ ॥ मनोजवे जये जृम्भे भीमाक्षि क्षुभितक्षये ॥ महामारि विचित्राङ्गे जय नृत्यप्रिये शुभे ॥५०॥ विकराले महाकालि कालिके पापहारिणि ॥ पाशहस्ते दण्डहस्ते भीमरूपे भयानके ॥५१॥ चामुण्डे ज्वलमानास्ये तीक्ष्णदंष्ट्रे महाबले ॥ शतयानस्थिते देवि प्रेतासनगते शिवे॥५२॥ भीमाक्षि भीषणे देवि सर्वभूतभयङ्करि॥ कराले विकराले च महाकाले कपालिनि॥५३॥ काली करालीं विक्रान्ता कालरात्रि नमोऽस्तु ते ॥ इति स्तुता तदा देवी रुद्रेण परमेष्ठिना ॥ ५४ ॥ तुतोष परमा देवी वाक्यं चेद

सुवाच ह ॥ वरं वृणीष्व देवेश यत्ते मनसि वर्त्तते ॥ ५५ ॥ रुद्र उवाच ॥ स्तोत्रेणानेन ये देवि त्वां स्तुवन्ति वरानने ॥ तेषां त्वं वरदा देवि भव सर्वगता सती ॥ ५६ ॥ यश्चेमं त्रिःप्रकारं तु देवि भक्त्या समान्वितः ॥ स पुत्रपौत्रपशुमान् समृद्धिमुपगच्छति ॥ ५७ ॥ यश्चेमं शृणुया द्भक्त्या त्रिशक्त्यास्तु समुद्भवम् ॥ सर्वपापविनिर्मुक्तो पदं गच्छत्यनामयम् ॥ ५८ ॥ एवं स्तुत्वा भवो देवीं चामुण्डां च सुरेश्वरीम् ॥ क्षणा दन्तर्हितो देवस्ते च देवा दिवं ययुः ॥५९॥ य एतां वेद वै देव्या उत्पत्तिं त्रिविधां वराम् ॥ स कर्मपाशनिर्मुक्तः परं निर्वाणमृच्छति ॥ ६० ॥ श्रद्दराज्यो यदा राजा नवम्यां नियतः शुचिः ॥ अश्वम्यां च चतुर्दश्यामुपवासी नरोत्तमः ॥ ६१ ॥ संवत्सरेण लभते राज्यं निष्कण्टकं नृपः॥ एषा त्रिशक्तिरुद्दिष्टा नयसि द्धान्तगामिनी ॥६२॥ एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता ॥ एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता ॥६३॥ एषैव कृष्णा तमसि रौद्री देवी प्रकीर्त्तिता ॥ परमात्मा यथा देव एक एव त्रिधा स्थितः ॥ ६४ ॥ प्रयोजनवशाच्छक्तिरेकैव त्रिधि धाऽभवत् ॥ य एतं शृणुयात्सर्गं त्रिशक्त्याः परमं शिवम् ॥ ६५ ॥ सर्वपापविनिर्मुक्तः परं निर्वाणमाप्नुयात् ॥ यश्चेमं शृणुयान्नित्यं नवम्यां नियतः स्थितः ॥ ६६ ॥ स राज्यमतुलं लेभे भयेभ्यश्च प्रमुच्यते ॥ यस्येदं लिखितं गेहे सदा तिष्ठति धारितम् ॥ ६७ ॥ न तस्याग्निभयं घोरं सर्पचौरादिजं भवेत् ॥ यश्चेमं पूजयेद्भक्त्या पुस्तकेऽपि स्थितं बुधः ॥ ६८ ॥ तेन चेष्टं भवेत्सर्वं त्रैलोक्यं सचराचरम् ॥ जायन्ते पशवः पुत्रा धने धान्यं वराः स्त्रियः ॥ ६९ ॥ रत्नान्यश्वास्तथा गावो दासा दास्यो भवन्ति हि ॥ यस्येदं तिष्ठते गेहे तस्य सम्पद्भवेद्ध्रुवम् ॥ ७० ॥

श्रीवराह उवाच ॥ एतदेव रहस्यं ते कीर्त्तितं भूतधारिणि ॥ रुद्रस्य खलु माहात्म्यं सकलं कीर्त्तितं मया ॥ ७१ ॥ नवकोट्यस्तु चामुण्डा भेदभिन्ना व्यवस्थिताः ॥ या रौद्री तामसी शक्तिः सा चामुण्डा प्रकीर्तिता ॥ ७२ ॥ अष्टादश तथा कोट्यो वैष्णव्या भेद उच्यते ॥ या विष्णो राजसी शक्तिः पालनी चैव वैष्णवी ॥७३॥ या ब्रह्मशक्तिः सत्त्वस्था सा ह्यनन्ता प्रकीर्तिता ॥ एतासां सर्वभेदेषु पृथगेकैकशो धरे ॥७४॥ सर्वासां भगवान् रुद्रः सर्वगश्च पतिर्भवेत् ॥ यावन्त्यस्या महाशक्त्यास्तावद्भूपाणि शङ्करः ॥ ७५ ॥ कृतवांस्ताश्च भजते पतिरूपेण सर्वदा ॥ यश्चाराधयते तस्य रुद्रस्तुष्टो भविष्यति॥सिध्यन्ति तस्य कामाश्च मनसा चिन्तिता अपि॥७६॥इति श्रीवराहपुराणे त्रिशक्तिमाहात्म्ये त्रिशक्ति

रहस्यं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥ अथ रुद्रमाहात्म्यम् ॥ वराह उवाच ॥ अथ रुद्रव्रतोत्पत्तिं शृणु देवि वरानने ॥ येन ज्ञातेन पापेभ्यो मुच्यते नात्र संशयः ॥१॥ ब्रह्मणा तु यदा सृष्टः पूर्व रुद्रो वरानने ॥ तृतीये जन्मनि विभुः पिङ्गाक्षो नीललोहितः ॥२॥ तदा कौतूहलाद्ब्रह्मा स्कन्धे तं जगृहे प्रभुः ॥ स्कन्धारूढस्तदा रुद्रो ब्रह्मणोऽव्यक्तजन्मनः ॥ ३ ॥ जन्मतश्च शिरो याद्धि पंचमं तज्जगाद ह ॥ मन्त्रमाथर्वणं रुद्रो येन सद्यः प्रमुच्यते ॥ ४ ॥ कपालिन् रुद्र बभ्रोऽथ भव केरात सुव्रत ॥ पाहि विश्वं विशालाक्ष कुमार वरविक्रम ॥ ५ ॥ एवमुक्तस्तदा रुद्रो भविष्यैनांमभिर्भवः ॥ कपालशब्दात्कुपितस्तच्छिरो विचकर्त्त ह ॥ ६ ॥ वामाङ्गुष्ठनखेनाद्यं प्राजापत्यं विचक्षणः ॥ तान्निकृत्तं शिरो धात्रि हस्तलग्नं बभूव ह॥७॥ तस्मिन्निकृत्ते शिरसि प्राजापत्यं त्रिलोचनः॥ब्रह्माणं प्रयतो भूत्वा रुद्रो वचनमब्रवीत् ॥८॥ रुद्र उवाच ॥ कथं कपालं मे देव करात्पतति सुव्रत ॥ नश्यते च कथं पापं ममेतद्वद सुव्रत ॥ ९ ॥ ब्रह्मोवाच ॥ इदमेव व्रतं देव चर कापालिकं विभो ॥ समयाचारसंयुक्तं कृत्वा स्वेनैव तेजसा ॥१०॥ एवमुक्तस्तदा रुद्रो ब्रह्मणाऽव्यक्तमूर्त्तिना ॥ आजगाम गिरिं गन्तुं माहेन्द्रं पापनाशनम् ॥ ११ ॥ तत्र स्थित्वा महादेवस्तच्छिरो विभिदे त्रिधा ॥ तस्मिन् भिन्ने पृथक्केशान्यदुद्दीप्त्या भगवान्भवः ॥ १२ ॥ यज्ञोपवीतं केशं तु महास्थ्नाक्षमणीस्तथा ॥ कपालशकलं चैकमसृक्पूर्णं करे स्थितम् ॥ १३ ॥ अपरं खण्डशः कृत्वा जटाजूटे न्यवेशयत् ॥ एवं कृत्वा महादेवो बभ्रामेमां वसुन्धराम् ॥ १४ ॥ सप्तद्वीपवतीं पुण्यां मज्जंस्तीर्थेषु नित्यशः ॥ समुद्रे प्रथमं स्नात्वा ततो गङ्गां व्यगाहत ॥ १५ ॥ सरस्वतीं ततो गत्वा यमुनासङ्गमं ततः॥ शतद्रुं च ततो गत्वा देविकां च महानदीम् ॥१६॥ वितस्तां चन्द्रभागां च गोमतीं सिन्धुमेव च ॥ तुङ्गभद्रां तथा गोदामुत्तरे गण्डकीं तथा ॥ १७ ॥ नेपालं च ततो गत्वा ततो रुद्रमहालयम् ॥ ततो दारुवनं गत्वा केदारगमनं पुनः ॥ १८ ॥ भद्रेश्वरं ततो गत्वा गयां पुण्यामथागमत् ॥ तत्र फल्गुकृतस्नानः पितॄन्सन्तर्प्य यत्नतः ॥ १९ ॥ एवं वेगेन सकलं ब्रह्माण्डं भूतधारिणि ॥ बभ्राम सर्वदेवेशः षष्ठेऽब्दे तस्य चापतत् ॥ २० ॥ परिधानं तु कौपीनं नग्नः कापालिकोऽभवत् ॥ भ्रमतः परिधानं तु कौपीनं रशनागतम् ॥ २१ ॥ तस्मिंस्तु पतिते देवि नग्नः कापालिकोऽभवत् ॥ २२ ॥ पुनरब्दद्वयं भ्रान्तस्तीर्थे तीर्थे हरः स्वयम् ॥ कपालं त्यक्तुकामः

सन्तद्धस्तात्तत्तु नापतत् ॥२३॥ पुनरुद्वृत्यं भ्रान्तो ब्रह्माण्डं तीर्थकारणात् ॥ तीर्थतीर्थहरः स्नात्वा कपालं त्यक्तुमिच्छति॥२४॥त्यजतोऽपि न तद्धस्ताच्च्यवते भूतधारिणि ॥ ततोऽन्द्वमेकं बभ्राम हिमवत्पर्वते शुभे ॥२५॥ ततोऽन्यद्वत्वर्षमेकं तु वर्त्तते हिमवद्गिरौ ॥ भ्रमतो विभ्रमो जात स्त्रिणेत्रस्य महात्मनः॥ २६ ॥ पुनरुद्वृत्यं चान्यत्परमेष्ठी वृषाकपिः ॥ बभ्राम रुद्रस्तीर्थानि पुराणानि समन्ततः ॥ २७ ॥ कस्यचित्त्वथ कालस्य द्वादशेऽब्दे धराधरे ॥ वाराणसीं गतो देवस्तत्र स्नानमथारभत् ॥ २८ ॥ गङ्गायां देवदेवेशो यावन्मज्जति भामिनि ॥ भवेत्कपालं पतितं हस्तान्माद्ब्रह्मणः पुरा ॥ २९ ॥ कपालमोचनं नाम ततस्तीर्थमनुत्तमम् ॥ पृथिव्या ख्यातिमगमद्वाराणस्यां धराघरे ॥ ३० ॥ गत्वा हरिहरक्षेत्रं स्नात्वा देवाङ्कदे तथा ॥ सोमेश्वरं समभ्यर्च्य गतोऽसौ चक्रतीर्थकम् ॥ ३१ ॥ तत्र स्नात्वा तथा नत्वा त्रिजलेश्वरसंज्ञितम् ॥ अयोध्यायां तथा गत्वा वाराणस्यां ततोऽगमत् ॥ ३२ ॥ द्वादशाब्देर्गतवतः सीमाचारिगणेस्तथा ॥ बलात्कारेण तद्धस्तात्कपालं पतितं भुवि ॥ ३३ ॥ कपालमोचनं तीर्थं ततो जातमघापहम् ॥ गङ्गाम्भसि ततः स्नाप्य विश्वेशं पूज्य भक्तितः ॥ ३४ ॥ रुद्रो विशुद्धिमापन्नो मुक्तः स ब्रह्महत्यया ॥ कपालमोचनं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ ३५ ॥ यत्राप्लुतो नरो भक्त्या ब्रह्महा तु विशुध्यति ॥ कपालं पतितं दृष्ट्वा रुद्रहस्ताच्चतुर्मुखः ॥ ३६ ॥ आगतो देवतहितो वाक्यं चेदमुवाच ह ॥ ब्रह्मोवाच ॥ भव रुद्र विशालाक्ष लोकमार्गव्यवस्थित ॥ ३७ ॥ (भव रुद्र विरूपाक्ष लोकमार्गे व्यवस्थितः ॥ व्रतानि कुरु ते देव त्वच्चीर्णानि महाप्रभो ॥) कपालं गृह्य यद्भ्रान्तं कपाल व्यपणाणिना ॥ तद्भ्रतं नग्नकापालं भविष्यति नृणां भुवि ॥ ३८ ॥ यच्च ते बधुता जाता हिमवत्यचलोत्तमे ॥ अमतस्तद्भ्रतं देव बाभ्रव्यं तद्भविष्यति ॥ ३९ ॥ यच्चेदानीं विशुद्धस्य तीर्थेऽस्मिन्देहशुद्धता ॥ तच्छुद्धशैवं भवतु व्रतं ते पापनाशनम् ॥ ४० ॥ ये पुरस्कृत्य देवास्त्वां पूज्यं यद्विधिनान्विताः ॥ शास्त्राणि तानि सर्वेषां कथयिष्यामि नान्यथा ॥ ४१ ॥ व्रतानि कुरुते देव त्वत्कृतानि हि पुत्रक ॥ स त्वत्प्रसादा देवेश ब्रह्महापि विशुध्यति ॥ ४२ ॥ यद्व्रतं नग्नकापालं यद्बाभ्रव्यं त्वया कृतम् ॥ यत्कृतं शुद्धशैवं च तत्तन्नाम्ना भविष्यति ॥ ४३ ॥ मां पुरस्कृत्य देवस्त्वं पूज्यसे यैर्विधानतः ॥ तेषां शास्त्राणि सर्वाणि शास्त्रं पाशुपतं तथा ॥ ४४ ॥ कथयस्व महादेव सविधानं समासतः ॥

एवमुक्तस्ततो रुद्रो ब्रह्मणाऽव्यक्तमूर्तिना ॥ ४५ ॥ देवैर्जयेति संतुष्टः कैलासनिलयं ययौ ॥ ब्रह्मा चापि सुरैः सार्द्धं गतः स्वलोकमुत्तमम् ॥ ४६ ॥
देवा अपि ययुः खं च स्वस्थानं ते यथागतम् ॥ एतद्रुद्रस्य माहात्म्यं मया ते परिकीर्त्तितम् ॥ ४७ ॥ चरितं यच्च देवस्य वित्तं समभवद्भुवि ॥ ४८ ॥ इति श्रीवराहपुराणे रुद्रमाहात्म्यं नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥ अथ पर्वोध्यायः ॥ धरण्युवाच ॥ योऽसौ सत्यतपा नाम लुप्तो भूत्वा द्विजो बभौ ॥ येनारुणिर्व्याघ्रभयाद्रक्षितो यः स्वशक्तितः ॥ १ ॥ दुर्वासाः संशुतार्थश्च हिमवन्तं नगं ययौ ॥ तस्योपरि महच्चित्रं भवतीति त्वयेरितम् ॥ २ ॥ कीदृशं तन्ममाचक्ष्व महत्कौतूहलं विभो ॥ श्रीवराह उवाच ॥ स हि सत्यतपाः पूर्वं भृगुवंशोद्भवो द्विजः ॥ ३ ॥ दस्युसंसर्गसम्भूतो दस्युवत्तमजायत ॥ ततः कालेन महता ऋषिसङ्घात्तुदुर्द्विजः ॥ ४ ॥ बभौ दुर्वाससा सम्यग्बोधितश्च विशेषतः ॥ हिमाद्रेरुत्तरे पादे पुण्यभद्रा नदी शुभा ॥ ५ ॥ तस्याश्चीरे शिला दिव्या नाम्ना चित्रशिलाधरे ॥ न्यग्रोधश्च महांस्तत्र नाम्ना भद्रो महाव्रतः ॥ ६ ॥ तत्र सत्यतपाः स्थित्वा तपः कुर्वन्महातपाः ॥ स कदाचित्कुठारेण चकर्त समिधः किल ॥ ७ ॥ चिच्छेद चांगुलीमेकां वामतर्जनिकां मुनिः ॥ छिन्नायामंगुलौ तस्य भस्मचूर्णं भवत्किल ॥ ८ ॥ न लोहितं न मांसं तु न मज्जा तत्र दृश्यते ॥ अंगुली सन्धिता तेन पूर्ववच्चाभवत्क्षणे ॥ ९ ॥ तस्मिन् भद्रवटे चैकं मिथुनं किन्नरं स्थितम् ॥ रात्रौ सुतपृषेस्तस्य दृष्ट्वा तन्महदद्भुतम् ॥ १० ॥ प्रभाते विमले प्राप्तमिन्द्रलोकमिति स्मृतिः ॥ अथेन्द्रेण सुराः सर्वे यक्षगन्धर्वकिन्नरैः ॥ ११ ॥ पृष्टाः किंचिदिहाश्चर्यमपूर्वं कथ्यतामिति ॥ तत्र रुद्रसरस्तीरे यदेतन्मिथुनं शुभम् ॥ १२ ॥ स्थितं किन्नरयोस्तच्च वाक्यं चेदमुवाच ह ॥ दृष्टं तु महदाश्चर्यं पुण्यभद्रातटे शुभे ॥ १३ ॥ यदेतत्सत्यतपसः समवोचत्ततः शुभे ॥ दृष्टं किंचिदिहाश्चर्यं दृष्टिस्तु हिमवद्गिरौ ॥ १४ ॥ पुण्यभद्रानदीतीरे महदाश्चर्यमुत्तमम् ॥ यदेतत्सत्यतपसः समवोचस्ततः शुभे ॥ १५ ॥ श्रवणं भस्मनश्चैव श्रुतं सर्वं शशंस ह ॥ तच्छ्रुत्वा सहसा शक्रो विस्मितो विष्णुमब्रवीत् ॥ १६ ॥ आगच्छ विष्णो गच्छामो हिमवत्पार्श्वमुत्तमम् ॥ तत्राश्चर्यमपूर्वं मे कथितं किन्नरेण ह ॥ १७ ॥ एवमुक्तस्ततो विष्णुर्वाराहं रूपमग्रहीत् ॥ मृगयुश्च तथैवेन्द्रो जग्मतुस्तत्समीपं प्रति ॥ १८ ॥ विष्णुर्वाराहरूपेण ऋषिदृष्टिपथे स्तितः ॥ भूत्वा

दृश्योऽप्यदृश्योऽभूत्पुनरेव च दृश्यते ॥ १९ ॥ तावदिन्द्रो धनुष्पाणिस्तीक्ष्णसायकभृन्नवने ॥ आगत्य सत्यतपसमृषिमेनमुवाच ह ॥ २० ॥ भगवन्निह दृष्टस्ते वराहः पृथुलो महान् ॥ येन तं हन्मि भृत्यानां पोषणाय महामुने ॥ २१॥ एवमुक्तो मुनिस्तेन चिन्तयामास तत्क्षणात् ॥ यदिदं तं दर्शयाम्यस्मै वराहं हन्यते तदा ॥ २२ ॥ नो चेत्कुटुंबः क्षुधया सीदत्यस्य न संशयः ॥ जायापुत्रसमायुक्तो लुब्धकोऽयं क्षुधान्वितः ॥ २३ ॥ सशल्यश्च वराहोऽयं ममाश्रममुपागतः ॥ एवं गते तु किं कार्यमथासौ चिन्तयन् प्रभुः ॥ २४ ॥ नाध्यगच्छत बुद्धिश्च क्षणात्तस्य व्यजायत ॥ २५ ॥ दृष्टं चक्षुर्निहितं जङ्घमेषु जिह्वा वकुं मृगयो तद्विसृष्टम् ॥ द्रष्टुं चक्षुर्नास्ति जिह्वेह वकुं जिह्वायाः स्यात्तत्त्व तोऽस्तीह चक्षुः ॥ २६ ॥ एवं श्रुत्वा द्वापि तस्य तुष्टो इन्द्राविष्णू दर्शयन्तौ स्वमूर्तिम् ॥ वाक्यं चेदमूचतुर्ब्रूहि नौ ते तुष्टौ धन्यं वरमेकं वृदस्व ॥ तच्छ्रुत्वाऽसौ सत्यतपा उवाच (?) ॥२७॥ न चातिरिक्तोऽस्ति वरः पृथिव्यां यद्दृष्टो मे पुरतो देवदेवाः ॥ बडं वरेणापि कृतार्थता सीत् तथापीदं ये सदा पर्वकाले ॥ २८ ॥ विप्रा विप्राश्चार्चयन्तीह भक्त्या तेषां पापं नश्यतां मासमेकम् ॥ यत्साञ्चितं त्वेष एको वराऽस्तु ह्यभीष्टो मे साप्रतं देहि मह्यम् ॥ २९ ॥ मुक्तिं चाहं त्रनामीति द्वितीयोऽस्तु वरो मम॥तथेत्युक्त्वा तु तौ देवौ दत्त्वा तस्य वरं शुभम्॥३०॥ अदर्शनं गतौ देवौ सोऽपि तत्र व्यवस्थितः ॥ लब्ध्वा वरं सत्यतपा ब्रह्मभूतोऽभवद्धदि ॥ ३१ ॥ यावदास्ते शुभे देशे कृतकृत्यो महामुनिः ॥ तावत्तस्य गुरुस्तत्र त्वारुणिः समदृश्यत ॥ ३२ ॥ पृथ्वीं प्रदक्षिणीकृत्य तीर्थहेतोर्विचक्षण ॥ तेन चासौ महाभक्त्या पूजितो मुनि पुङ्गवः ॥ ३३ ॥ पाद्याचमनगोदानैः कृतासनपरिग्रहः ॥ ज्ञात्वा स शिष्यं सिद्धं तु तपसा दग्धकिल्बिषम् ॥३४॥ उवाच विनयापन्नं प्राञ्जलिं पुरतः स्थितम् ॥ आरुणिरुवाच ॥ पुत्र सिद्धोऽसि तपसा ब्रह्मभूतोऽसि सुव्रत ॥३५॥ इदानीमात्मना सार्द्धं मुक्तिकालो मतोऽस्ति ते ॥ उत्तिष्ठ गम्यतां पुत्र मया सार्द्धं परं पदम् ॥३६॥ यद्गत्वा न पुनर्जन्म भवतीति न संशयः ॥ एवमुक्त्वा तु तौ सिद्धौ उभौ सत्यतपारुणी ॥ ३७ ॥ ध्यात्वा नारायणं देवं तद्देहे तौ लयं गतौ ॥ यश्चापि शृणुयात्पादं पर्वाध्यायं सविस्तरम् ॥ ३८ ॥ श्रावयेद्वापि स नरो गतिमिष्टामवाप्नुयात् ॥ इति श्रीवराहपुराणे पर्वाध्यायो नाम अष्टनवतितमोऽध्यायः ॥ ९८ ॥ अथ तिलधेनुमाहात्म्यम् ॥ धरण्युवाच ॥ या सा माया शरीरानु

ब्रह्मणोऽव्यक्तजन्मनः ॥ गायत्र्यष्टभुजा भूत्वा चै (वै) त्रासुरमयोधयत् ॥ १ ॥ सैव नन्दा भवेद्देवी देवकार्यचिकीर्षया ॥ महिषाख्यासुरवधं कुर्वती ब्रह्मणेरिता ॥ २ ॥ वैष्णव्याख्या ततो देव कथयेतद्धि शंस मे ॥ श्रीवराह उवाच ॥ इयं जगद्धिता देवी गङ्गा शङ्करसुप्रिया ॥ ३ ॥ ऋचिर्त्किचिद्भवेदत्तं स्वपदं वेद सर्ववित् ॥ स्वायम्भुवे हतो दैत्यो वैष्णव्या मन्दरे गिरौ ॥ ४ ॥ महिषाख्यः परः पश्चात्स वै चैत्रासुरो हतः ॥ नन्दया निहतो विन्ध्ये महाबलपराक्रमः ॥ ५ ॥ अथवा ज्ञानशक्तिः सा महिषोऽज्ञानमूर्त्तिमान् ॥ अज्ञानं ज्ञानसाध्यं तु भवतीति न संशयः ॥ ६ ॥ मूर्त्तिपक्षे चेतिहासममूर्त्तं चैकवद्भवेत् ॥ रूपाप्यते वेदवाक्यैश्च इह सा वेदवादिभिः ॥ ७ ॥ इदानीं शृणु मे देवि पंचपातक नाशनम् ॥ यजनं देवदेवस्य विष्णोः पुत्रवमुप्रदम् ॥ ८ ॥ इहजन्मनि दारिद्र्यव्याधिकुष्ठादिपीडितः ॥ अलक्ष्मीवानपुत्रस्तु यो भवेत्पुरुषो भुवि ॥ ९ ॥ तस्य सद्यो भवेल्लक्ष्मीरायुर्वित्तं सुतः सुखम् ॥ दृष्ट्वा तु मण्डलगतं देवं देव्या समन्वितम् ॥ १० ॥ नारायणं परं देवं यः पश्यति विधानतः ॥ आचार्यदर्शितं देवि मन्त्रमूर्त्तिमयोनिजम् ॥ ११ ॥ कार्त्तिके मासि शुक्लायां द्वादश्यां तु विशेषतः ॥ सर्वासु वा यजेद्देवं द्वादशीषु विधानतः ॥ १२ ॥ संक्रांत्यां वा महाभागं चन्द्रसूर्यग्रहे तथा ॥ यः पश्यति हरिं देवि पूजितं गुरुणा शुभे ॥ १३ ॥ तस्य सद्यो भवेद्दृष्टिः पापध्वंसश्च जायते ॥ सामान्यदेवतानां च भवतीति न संशयः ॥ १४ ॥ ब्राह्मणक्षत्रियविशां भक्तानां तु परीक्षणम् ॥ संवत्सरं गुरुः कुर्या ज्ञातिशौचक्रियादिभिः ॥ १५ ॥ उपासन्नं ततो ज्ञात्वा ह्यदयेनावधारयेत् ॥ तेषि भक्तिमतो ज्ञात्वा स्वात्मानं परमेश्वरम् ॥ १६ ॥ संवत्सरं गुरोर्भक्तिं कुर्युर्विष्णोरिवाचलाम् ॥ संवत्सरे ततः पूर्णे गुरुं चैव प्रसादयेत् ॥ १७ ॥ भगवंस्त्वत्प्रसादेन संसारार्णवतारणम् ॥ इच्छामस्त्वे हिकीं लक्ष्मीं विशेषेण तपोधन ॥ १८ ॥ एवमभ्यर्च्य मेधावी गुरुं विष्णुमिवाग्रतः ॥ अभ्यर्चितस्तैः सोऽप्याशु दशम्यां कार्त्तिकस्य तु ॥१९॥ क्षीरवृक्षसमुद्भूतं दन्तकाष्ठं समन्त्रकम् ॥ भक्षयित्वा स्वपेयुर्हि देवदेवस्य सन्निधौ ॥२०॥ स्वप्नान्तदृष्ट्वा गुरोरग्रे श्रावयेत विचक्षणः ॥ ततः शुभाशुभ तत्र लक्षयेत्परमो गुरुः ॥ २१ ॥ एकादश्यामुपोष्यैवं स्नात्वा देवालयं व्रजेत् ॥ गुरुश्च मण्डलं भूमौ कल्पितायां तु वर्त्तयेत् ॥२२॥ लक्षणावावधभ्राम लक्षयित्वा विधानतः ॥ षोडशारं लिखेच्चक्रं सर्वतोभद्रमेव च ॥२३॥ अथवा अष्टपत्रं च लिखित्वा दर्शये

दुधः॥ नेत्रबन्धं तु कुर्वीत सितवस्त्रेण यत्नतः॥२४॥वर्णानुक्रमतः शिष्यान्पुष्पहस्तान्प्रवेशयेत्॥ नवनाभं यशं कुर्यान्मण्डलं वर्णकैर्बुधः॥२५॥ तदानीं पूर्वतो देवमिन्द्रपूर्वं तु पूजयेत्॥ लोकपालैः समं पूज्य अग्निं सम्पूजयेच्छुभे॥२६॥ स्वदिक्षु तद्वह्न्याद्यायां नैर्ऋत्यां निर्ऋतिं न्यसेत्॥ वरुणं वारुणायां च वायुं वायव्यतो न्यसेत्॥२७॥धनदं चोत्तरे न्यस्य रुद्रमीशानगोचरे॥ पूज्यैवं तु विधानेन दिक्ष्वेतेषु व्यवस्थिताम्॥२८॥ पद्ममध्ये तथा विष्णुमर्चयेत्परमेश्वरम्॥ पूर्वपत्रे बलं पूज्य प्रद्युम्नं दक्षिणे तथा॥२९॥ अनिरुद्धं तथा पूज्य पश्चिमे चोत्तरे तथा॥ पूजयेद्वायुं देवं तु सर्वपातकशान्तिदम्॥३०॥ ऐशान्यां विन्यसेच्छंखमाग्नेय्यां चक्रमेव तु॥ याम्यायां तु गदां पूज्य वायव्यां पद्ममेव च॥३१॥ ऐशान्यां मुसलं पूज्य दक्षिणे गरुडं न्यसेत्॥ वामतो विन्यसेल्लक्ष्मीं देवदेवस्य बुद्धिमान्॥३२॥धनुश्चैव तु खड्गं तु देवस्य पुरतो न्यसेत्॥श्रीवत्सं कौस्तुभं चैव नवमं तत्र कल्पयेत्॥३३॥ एवं पूज्य यथान्यायं देवदेवं जनार्दनम्॥ दशेषु दिक्षु विन्यस्य अष्टौ कुम्भान्विधानतः॥३४॥ वैष्णवं कलशं चैव नवमं तत्र कल्पयेत्॥ स्नापयेन्मुक्तिकामं तु वैष्णवेन घटेन ह॥ ३५॥ श्रीकामं स्नापयेत्तद्वदैन्द्रेण तु घटेन ह॥ प्राज्यधनधान्यकामं च आग्नेयेन तु स्नापयेत्॥३६॥ मृत्युञ्जयादिधानाय याम्येन स्नपनं तथा॥ दुष्टग्रर्व्यतनाथालं निर्ऋतेन विधीयते॥३७॥ शान्तये वारुणेनाशु पापनाशाय वायवे॥ द्रव्यसम्पत्तिकामस्य कौबेरेण विधीयते॥ ३८॥ रौद्रेण ज्ञानहेतोश्च लोकपालप्रशान्तये॥ एकैकेन नरः स्नातः सर्वपाप विवर्जितः॥३९॥ भवेद्दृष्ट्याहृत ज्ञानं श्रीमान्त्रियो विचक्षणः॥ किं पुनर्नवभिः स्नातो नरः पातकवर्जितः॥४०॥ जायते विष्णुसदृशः सद्यो राजाथवा भवेत्॥ अथशा दिक्षु सर्वासु यथासंख्येन लोकपान्॥ पूजयीत स्वशास्त्रोक्तविधानेन विधानवित्॥ ४१॥ एवं सम्पूज्य देवांश्च लोकपालान्प्रसन्नधीः॥ पश्चात्प्रदक्षिणान्शिष्यान्बद्धनेत्रान्प्रवेशयेत्॥ आग्नेयी दग्धा वायुना विधिना ततः॥४२॥ सौमेनाप्या यिता पश्चाच्छावयेत्समयान्बुधः॥अनिन्द्यान्ब्राह्मणान्वेदान्विष्णुं ब्रह्माणमेव च॥ ४३॥ रुद्रमादित्यमग्निं च लोकपालप्रहर्षितः॥ गुरूंश्च वैष्णवांश्चापि पुरुषः पूर्वदीक्षितः॥ ४४॥ एवं तु समयं ख्याप्य पश्चाद्धोमं तु कारयेत्॥ ओं नमो भगवते सर्वरूपिणे हुं फट् स्वाहा॥ ४५॥ षोडशाक्षरमन्त्रेण होमयेज्ज्वलिताग्नये॥ गर्भाधानादिकाश्चैव क्रियाः समवधारयेत्॥४६॥ त्रिभिराहुतिभिश्चापि देवदेवस्य सन्निधौ॥ होमान्ते

दीक्षितः पश्चाद्व्याच्च गुरुदक्षिणांम् ॥४७॥ हस्त्यश्वकटकादीनि हेमग्रामादिकं नृपः॥ दद्याच्च गुरवे प्राज्ञो मध्यमे मध्यमं तथा ॥४८॥ एवं कृते तु यत्पुण्यं माहात्म्यं जायते धरे ॥ तत्र शक्यं तु गदितुमपि वर्षशतैरपि॥४९॥दीक्षितात्मा पुनर्भूत्वा वराहं शृणुयाद्यदि ॥तेन वेदपुराणानि सर्वे मन्त्राः सतंग्रहाः॥५०॥जप्ताः स्युः पुष्करे तीर्थे प्रयागे सिन्धुसङ्गमे ॥ देवागारे कुरुक्षेत्रे वाराणस्यां विशेषतः ॥५१॥ ग्रहणे विषुवे चैव यत्फलं जपतां भवेत् ॥ तत्फलं द्विगुणं तस्य दीक्षितो यः शृणोति च ॥५२॥ देवा अपि तपः कृत्वा ध्यायंति च वदंति च ॥ कदा नो भारते वर्षे जन्म स्याद्भुवधारिणि॥५३॥दीक्षिताश्च भविष्यामो वराहं शृणुमः कथम्॥वराहं षोडशात्मानं त्यक्त्वा देहं कदा वयम्॥५४॥यास्यामः परमं स्थानं यद्गत्वा न पुनर्भवेत् ॥ एवं जल्पन्ति विबुधा मनसा चिन्तयन्ति च॥५५॥अत्राप्युदाहरन्तीममितिहासं पुरातनम्॥वसिष्ठस्य च संवादं श्वेतस्य च महात्मनः ॥५६ ॥ स्वर्गवासे स्थितो ह्यासीच्छ्वेतो राजा महायशाः॥आसीदिलावृते वर्षे श्वेतो राजा बृहत्तपाः॥ ५७॥स महीं सकलान्देवि सपञ्चवनदुमाम् ॥ दातुमिच्छन्स चोवाच वसिष्ठं तपसां निधिम् ॥ ५८ ॥ भगवन्दातुमिच्छामि ब्राह्मणेभ्यो वसुन्धराम्॥देह्यनुज्ञां स चोवाच वसिष्ठो राजसत्तमम् ॥५९॥ अन्नं देहि सदा राजन् सर्वकालसुखावहम् ॥ अन्नेन चैव दत्तेन किं न दत्तं महीतले ॥६०॥ सर्वेषामेव दानानामन्नदानं विशिष्यते ॥ अन्नाद्भवंति भूतानि अन्नेनैव च वर्द्धते ॥६१॥ तस्मात्सर्वप्रयत्नेन अन्नदानं ददस्व भोः ॥ वसिष्ठस्य वचः श्रुत्वा स राजा न तथाकरोत् ॥६२॥ रत्नवस्त्रमलंकारान् श्रीमन्ति नगराणि च ॥ यत्किञ्चित्कोशजातं स द्विजानाहूय तद्ददौ ॥६३॥ प्रदत्तं ब्राह्मणस्याथ कुंजरानजिनानि च ॥ स कदाचिन्नृपः पृथ्वीं जित्वा परमधर्मवित् ॥ ६४ ॥ पुरोहितमुवाचेदं वसिष्ठं जपतां वरम् ॥ भगवन्नश्वमेधाना सहस्रं कर्तुमुत्सहे ॥६५॥ सुवर्णरौप्यताम्राणि यागं कृत्वा द्विजातिषु ॥ दत्तानि तेन राज्ञा वै नान्नं दत्तं तथा जलम्॥६६॥वस्तु स्वल्पामिति ज्ञात्वा प्रभुः सोऽन्नं तु नाददत् ॥ एवं विभवयुक्तस्य तस्य राज्ञो महात्मनः ॥६७ ॥ कालधर्मवशाद्देवि मृत्युः समभवत्तदा ॥ परलोके वर्तमानः स च राजा महामनाः ॥६८॥ क्षुधया पीडितो ह्यासीत्तृषया च विशेषतः ॥ आनिनायाप्सरोभागं गत्वा श्वेताख्यपर्वतम् ॥६९॥ तत्र प्राग्जन्ममूर्तीश्च पुरा दग्धा महात्मनः ॥ तत्रास्थीनि स संगृह्य लिह्नास्ते स पार्थिवः ॥ ७० ॥ पुनर्विमानमारुह्य दिव्यमाचक्रमे नृपः ॥ अथ कालेन महता स

॥७८॥

राजा संशितव्रतः ॥७१॥ तान्यस्थानि लिहन्दृष्टो वसिष्ठेन महात्मना ॥ उक्तश्च तेन किञ्च त्वं स्वास्थि भुंक्षे नराधिप ॥ ७२ ॥ एवमुक्त स्तदा राजा वसिष्ठेन महात्मना ॥ उवाच वचनं चेदं श्वेतो राजा मुनिं तदा ॥ ७३ ॥ भगवन्क्षुधितश्चास्मि अन्नपानं पुरा मया ॥ न दत्तं मुनिशार्दूल तेन मां बाधते क्षुधा ॥ ७४ ॥ एवमुक्तस्ततो राज्ञा वसिष्ठो मुनिपुंगवः ॥ उवाच च मुनिर्भूयः श्वेतं वाक्यं महानृपम् ॥ ७५ ॥ किं ते करोमि राजेंद्र क्षुधितस्य विशेषतः ॥ अदत्तं नोपतिष्ठेत कस्यचित्किञ्चिदुत्तमम् ॥ ७६ ॥ रत्नहेमप्रदानेन भोगवान् जायते नरः ॥ अन्नपानप्रदानेन सर्वकामैस्तु तर्पितः ॥ ७७ ॥ तन्न दत्तं त्वया राजन् स्तोकं मत्वा नराधिप ॥ श्वेत उवाच ॥ अदत्तस्य च सम्प्राप्तिस्तन्ममाचक्ष्व पृच्छतः ॥ ७८ ॥ शिरसा भक्तियुक्तेन याचितोऽसि महामुने ॥ वसिष्ठ उवाच ॥ अस्त्येकं कारणं येन जायते तन्न संशयः ॥ ७९ ॥ तच्छृणुष्व नरव्याघ्र कथ्यमानं मयाऽनघ ॥ आसीद्राजा पुराकल्पे विनीताश्वोतिविश्रुतः ॥ ८० ॥ स सर्वमेध मारेभे स्वयं क्रतुवरं नृपः ॥ यजतानेन विप्रेभ्यो दत्ता गावो द्विपा वसु ॥ ८१ ॥ नान्नं तेन तदा दत्तं स्वल्पं मत्वा यथा त्वया ॥ ततः कालेन महता मृतोऽसौ जाह्नवीजले ॥ ८२ ॥ कृत्वा पुण्यं विनीताश्वः सार्वभौमो नृपोत्तमः ॥ स्वर्गं च गतवान्सोऽपि यथा राजन् भवान् प्रभो ॥ ८३ ॥ असावपि क्षुधाविष्ट एवमेव गतो नृपः ॥ मर्त्यलोके नदीतीरे गंगायां नीलपर्वतम् ॥ ८४ ॥ विमानेनार्कवर्णेन भास्वता देववन्नृपः ॥ ददर्श च तदा राजा क्षुधितः स्वं कलेवरम् ॥ ८५ ॥ पुरोहितं ददर्शाथ होतारं जाह्नवीतटे ॥ तद्दृष्ट्वाऽसावपि नृपः पप्रच्छ मुनि सत्तमम् ॥ ८६ ॥ क्षुधायाः कारणं किं मे स होता तमुवाच ह ॥ तिलधेनुं भवान्राजन्नलधेनुं च सत्तम ॥८७॥ घृतधेनुं च धेनुं च रसधेनुं च पार्थिव ॥ देहि शीघ्रं येन भवान्क्षुधया वर्जितो भवेः ॥ ८८ ॥ तपते यावदादित्यस्तपते वापि चन्द्रमाः ॥ एवमुक्तस्ततो राजा तं पुनः पृष्टवानिदम् ॥८९॥ विनीताश्व उवाच ॥ कथ सा दीयते ब्रह्मंस्तिलधेनुर्जिगीषुभिः ॥ भुङ्क्ते स्वर्गं च विप्रेन्द्र तन्ममाचक्ष्व पृच्छतः ॥९०॥ होतोवाच ॥ विधानं तिलधेनोश्च त्वं शृणुष्व नराधिप ॥ चतुर्भिः कुडवैश्चैव प्रस्थ एकः प्रकीर्त्तितः ॥९१ ॥ सा तु षोडशभिः कार्या चतुर्भि र्वत्सको भवेत् ॥ नासा गन्धमयी तस्या जिह्वा गुडमयी शुभा ॥ ९२ ॥ पुच्छे प्रकल्पनीया सा घण्टाभरणभूषिता ॥ ईदृशीं कल्पयित्वा

तु स्वर्णशृङ्गीं तु कारयेत् ॥ ९३॥ कांस्यदोहां रौप्यखुरां पूर्वधेनुविधानतः ॥ कृत्वा तां ब्राह्मणायाशु दद्याच्चैव नराधिप ॥ ९४ ॥ कृष्णाजिनं धेनुनासो नन्दितां कल्पितां शुभाम् ॥ सूत्रेण सूत्रितां कृत्वा सर्वरत्नसमन्विताम् ॥ ९५ ॥ सर्वौषधिसमायुक्तां मन्त्रपूतां तु दापयेत् ॥ अन्नं मे जायतामन्यत्पान सर्वरसास्तथा ॥ ९६॥ सर्वं सम्पादयास्माकं तिलधेनो द्विजार्पिता ॥ गृह्णामि देवि त्वां भक्त्या कुटुम्बार्थं विशेषतः ॥९७॥ भजस्व कामान्मां देवि तिलधेनो नमोऽस्तु ते ॥ एवंविधां ततो दद्यात्तिलधेनुं नृपोत्तम ॥ ९८ ॥ सर्वेकामसमावाप्तिं कुरुते नात्र संशयः ॥ यश्चेदं शृणुयाद्भक्त्या कुर्यात्कारयतेऽपि वा ॥ ९९ ॥ सर्वपापाद्विनिर्मुक्तो विष्णुलोकं च गच्छन्ति ॥ गोमये मण्डले कृत्वा गोचर्म्मे तदनन्तरम् ॥ १०० ॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने तिलधेनुदानमाहात्म्यं नाम नवनवतितमोऽध्यायः ॥ ९९ ॥ अथ जलधेनुदान विधिः ॥ होतोवाच ॥ जलधेनुं प्रवक्ष्यामि पुण्येऽह्नि विधिपूर्वकम् ॥ गोचर्म्ममात्रं भूभाग गोमयेनोपलेपयेत् ॥ १॥ तत्र मध्ये तु राजेन्द्र पूर्णं कुम्भं च विन्यसेत् ॥ जलपूर्णं सुगन्धाढ्यं कर्पूरागुरुचन्दनैः ॥ २ ॥ वासितं गन्धतोयेन तां धेनुं परिकल्पयेत् ॥ वत्सं तथापरं कल्प्य जलेन परिपूरितम् ॥३॥ वर्द्धनीकं महाराज यन्त्रपुष्पैः समन्वितम् ॥ दूर्वाकुरैरुपस्तीर्य स्रग्भिश्चैव विभूषितम् ॥ ४ ॥ पंचरत्नानि निःक्षिप्य तस्मिन् कुम्भे नराधिप ॥ मांसीमुशीरं कुष्ठं च तथा शैलेयबालुकम् ॥ ५ ॥ धात्रीफलं सर्षपाश्च सर्वधान्यानि पार्थिव ॥ चतुर्दिक्ष्वपि पात्राणि चत्वा यैव प्रकल्पयेत् ॥ ६ ॥ एकं घृतमयं पात्रं द्वितायं दधिपूरितम् ॥ तृतीयं मधुनश्चैव चतुर्थं शर्करायुतम् ॥ ७ ॥ सुवर्णमुखचक्षूंषि शृंगं कृष्णांगरेषु च ॥ प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम् ॥८॥ ताम्रपृष्ठां कांस्यदोहां दर्भरोमसमन्विताम् ॥ पुच्छं सूत्रमयंकृत्वा कृष्णाभरण णघण्टिकाम् ॥ ९ ॥ कम्बले पुष्पमालां च गुडास्यां शुक्तिदन्तिकाम् ॥ जिह्वा शर्करया कृत्वा नवनीतेन च स्तनान् ॥ १० ॥ इक्षुपादां तु राजेन्द्र गन्धपुष्पोपशोभिताम् ॥ कृष्णाजिनोपरि स्थाप्य वस्त्रेणाच्छादयेत्तां तु ताम् ॥ ११ ॥ गन्धपुष्पैः समभ्यर्च्य विप्राय विनिवेदयेत् ॥ एवं धेनुं तदा दत्त्वा ब्राह्मणे वेदपारगे ॥१२॥ साधुविप्राय राजेन्द्र श्रोत्रियायाहिताग्नये ॥ तपोवृद्धाय पात्राय दातव्या च कुटुम्बिने ॥१३ ॥ यो ददाति नरो राजन् यः पश्यति शृणोति च ॥ प्रतिगह्णाति यो विप्रः सर्वे मुच्यन्ति पातकात् ॥ १४ ॥ ब्रह्महा पितृहा ॥७९॥

गोघ्नः सुरापो गुरुतल्पगः ॥ विमुक्ताः सर्वपापेस्तु गन्तारो विष्णुमंदिरे ॥ १५ ॥ विमुक्तः सर्वपापेस्तु विष्णुलोकं स गच्छति ॥ योऽश्व मेधेन यजते समाप्तवरदक्षिणः ॥ १६ ॥ जलधेनुं च यो दद्यात्सममेतन्नराधिप ॥ जलाहारस्त्वेकदिनं तिष्ठेच्च जलधेनुदः ॥ १७ ॥ ग्राहकोऽपि तिरात्रं वै तिष्ठेद्देवं न संशयः ॥ यत्र क्षीरवहा नद्यो मधुपायसकर्दमाः ॥१८॥ यत्र चाप्सरसां गीतं तत्र यान्ति जलप्रदाः ॥ दाता च दापकश्चैव प्रतिग्राही च यो द्विजः ॥ १९ ॥ सर्वपापविनिर्मुक्ता विष्णुसायुज्यमाप्नुयुः ॥ जलधेनुविधानं यः शृणुयात्कीर्त्तयेदपि ॥ २० ॥ सर्वपापविनि र्मुक्तः स्वर्गमेति जितेन्द्रियः ॥ २१ ॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने जलधेनुविधिर्नाम शततमोऽध्यायः ॥ १०० ॥ अथ रस धेनुदानमाहात्म्यम् ॥ होतोवाच ॥ रसधेनुविधानं ते कथयामि समासतः ॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे ॥ १ ॥ रसस्य तु घटं राजन् सम्पूर्णं त्वेक्षवस्य तु ॥ तद्वत्सङ्कल्पयेत्प्राज्ञश्चतुर्थांशेन वत्सकम् ॥ २ ॥ तुरीयांशेन वत्सं तु तत्पार्श्वे स्थापयेत्सुधीः ॥ इक्षुदण्डमयाः पादा रजतस्य खुरैर्युताः ॥ ३ ॥ एवं कार्या रसेधैनुरिक्षुपादसमान्विता ॥ ४ ॥ सुवर्णशृंगाभरणा वस्त्रपुच्छा घृतस्तनी ॥ पुष्पकम्बलसंयुक्ता शर्करामुखजिह्वका ॥ ५ ॥ दन्ताः फलमयास्तस्याः पृष्ठं ताम्रमयं शुभम् ॥ पुष्परोमां तु राजेन्द्र मुक्ताफलकृतेक्षणाम् ॥ ६ ॥ सप्तधान्यहिरण्मायुक्तां चतुर्दिक्षु च दीपिताम् ॥ सर्वौषस्करसंयुक्तां सर्वगन्धादिवासिताम् ॥ ७ ॥ चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत् ॥ सवैलक्षणयुक्ताय श्रोत्रियाय कुटुम्बिने ॥ ८ ॥ रसधेनुः प्रदातव्या स्वर्गकामेन नित्यदा ॥ दाता स्वर्गमवाप्नोति सर्वपापविवर्जितः ॥ ९ ॥ दाता च ग्राहकश्चैव एककालमभोजनः ॥ सोमपानफलं तस्य सर्वत्र तु फलं भवेत् ॥ १० ॥ दीयमानां तु पश्यन्ति ते च यान्ति परां गतिम् ॥ धेनुं च पूजयित्वाग्रे गन्धधूपस्रगादिभिः ॥ ११ ॥ पूर्वोक्तैरेव मन्त्रैस्तु ततस्तां प्रार्थयेत्सुधीः ॥ प्रार्थनापूर्वकं भक्त्या द्विजाय्याय निवेदयेत् ॥ १२ ॥ दशपूर्वान्परांश्चैव आत्मानं चैकविंशकम् ॥ प्रापयेत्परमं स्थानं स्वर्गान्नावर्त्तते पुनः ॥ १३ ॥ एषा ते कथिता राजन्रसधेनुरनुत्तमा ॥ ददस्व च महाराज परं स्थानमवाप्नुहि ॥ १४ ॥ य इदं पठते नित्यं शृणुयादथ भक्तितः ॥ सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ १५ ॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने रसधेनुदानमाहात्म्यं

नाम एकाधिकशततमोऽध्यायः ॥ १०१॥ अथ गुडधेनुदानमाहात्म्यम् ॥ होतोवाच ॥ गुडधेनुं प्रवक्ष्यामि सर्वकामार्थसाधिनीम् ॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तृते ॥ १ ॥ तस्योपरिकृते वस्त्रं गुडमानीय पुष्कलम् ॥ कृत्वा गुडमयीं धेनुं सवत्सां कांस्यदोहनीम् ॥ २ ॥ सौवर्णं मुखशृङ्गे च दन्ताश्च मणिमौक्तिकैः ॥ ग्रीवा रत्नमयी त्वस्या घ्राणं गन्धमयं तथा ॥ ३ ॥ शृङ्गे त्वगुरुकाष्ठेन पृष्ठं ताम्रमयं तथा ॥ पुच्छं क्षौममयं तस्याः सर्वाभरणभूषिताम् ॥४॥ इक्षुपादां रौप्यखुरां कम्बलं पट्टसूत्रकम् ॥ आच्छाद्य पट्टवस्त्रेण घण्टाचामरशोभिताम् ॥५॥ प्रशस्तपत्रश्रवणां नवनीतस्तनीं बुधः ॥ फलैर्नानाविधैस्तस्या उपशोभां प्रकल्पयेत् ॥ ६ ॥ उत्तमा गुडधेनुः स्यात्सदाधारचतुष्टयम् ॥ भागार्द्धेन तु तौल्येन चतुर्थांशेन वत्सकम् ॥ ७ ॥ मध्यमा च तदर्द्धेन भारेणैकेन चाधमा ॥ वित्तहीनो यथाशक्ति शतैरष्टाभिरेव च ॥८॥ अत ऊर्ध्वं तु कर्त्तव्या गृहवित्तानुसारतः ॥ गन्धपुष्पादिभिः पूज्य ब्राह्मणाय निवेदयेत् ॥ ९ ॥ गन्धपुष्पादिभिः कृत्वा घृतनैवेद्यदीपकान् ॥ एवं कृत्वा द्विजेन्द्राय आहिताग्नेर्विशेषतः ॥ १०॥ श्रोत्रियाय प्रदातव्या सहस्रकनकेन तु ॥ तदर्द्धेन महाराज तस्याप्यर्द्धेन वा पुनः ॥११॥ शतेन वा शतार्द्धेन यथाशक्ति निवेदयेत् ॥ गन्धपुष्पादिभिः पूज्य मुद्रिकाकर्णभूषणैः ॥ १२ ॥ छत्रिका पादुके दत्त्वा इमं मन्त्रमुदीरयेत् ॥ गुडधेनो महावीर्ये सर्वसम्पत्प्रदे शुभे॥१३॥ दानादस्माच्च भो देवि भक्ष्यभोज्यं प्रयच्छ मे॥था श्रियादीनि मन्त्राणि पूर्वोक्तानि स्मरेद्बुधः ॥१४॥ प्राङ्मुखो वापि दाता च ब्राह्मणाय निवेदयेत् ॥ वाचा कृतं कर्मकृतं मनसा यद्विचिन्तितम् ॥ १५ ॥ मानकूटं तुलाकूटं कन्यागोऽर्थे उदाहृतम् ॥ अनृतं नाशमायातु गुडधेनो द्विजार्पिता ॥ १६ ॥ दीयमानां प्रपश्यन्ति ते यांति परमां गतिम् ॥ यत्र क्षीरवहा नद्यो घृतपायस कर्दमाः ॥ १७ ॥ ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥ दश पूर्वान्दश परानात्मानं चैकविंशतिम् ॥१८॥ विष्णुलोकं नयत्याशु गुडधेनोः प्रसादतः ॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥ एतदेव विधानं स्यादेते चोपस्करः स्मृताः ॥ १९ ॥ मन्त्रावाहनसंयोगः सदा पर्वणिपर्वणि ॥ सर्वदैव प्रदातव्या पात्रं दृष्ट्वा महामते ॥ २० ॥ श्रद्धान्वितेन दातव्या भुक्तिमुक्तिफलप्रदा ॥ सर्वकामप्रदा नित्यं सर्वपापहरा स्मृता ॥ २१ ॥ गुडधेनोः प्रसादात्तु सौभाग्यमखिलं लभेत् ॥ इह सौभाग्यमतुलमायुरारोग्यसम्पदः ॥ २२ ॥ वैष्णवं पदमाप्नोति दौर्गत्यं

तस्य नश्यति ॥ दशद्वादश साहस्रा दश चाष्टौ च जन्मनि ॥ २३ ॥ न शोकदुःखदौर्गत्यं तस्य संजायते क्वचित् ॥ २४ ॥ इति पठति शृणोति चेह सम्यक् मतिमपि चैव ददाति धोजनानाम् ॥ स इह च विभवैश्चिरं वसित्वा वसति चिरं दिवि देवतादिपूज्यः ॥ २५ ॥ इति श्रीवराहपुराणे श्वेतवितीतांश्वोपाख्याने गुडधेनुदानमाहात्म्यं नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ अथ शर्करांधेनुदानमाहात्म्यम् ॥ होतोवाच ॥ तद्वच्च शर्करांधेनुं शृणु राजन्यथार्थतः ॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशास्तरे ॥ १ ॥ धेनुं शर्करया राजन्कृत्वा भारचतुष्टयम् ॥ उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकम् ॥ २ ॥ तदर्द्धं मध्यमा प्रोक्ता कनिष्ठा भारकेण तु ॥ तद्वद्वत्सं प्रकुर्वीत चतुर्थांशेन तत्त्वतः ॥ ३ ॥ अथ कुर्योद्दृष्टशतेरूर्ध्वं नृपतिसत्तम ॥ स्वशक्त्या कारयेद्धेनुं तथात्मानं न पीडयेत् ॥ ४ ॥ सर्वबीजानि संस्थाप्य चतुर्दिक्षु समन्ततः॥ सुवर्णस्य मुखं शृङ्गे मौक्तिकैर्नयने तथा ॥ ५॥ सौवर्णमुखशृङ्गाणि मौक्तिके नयनानि च ॥ गुडेन तु मुखं कार्यं जिह्वा पिष्टमयी तथा ॥ ६ ॥ कम्बलैः पट्टसूत्रेण कण्ठाभूषैश्च भूषिताम् ॥ इक्षुपादां रौप्यखुरां नवनीतस्तनीं तथा ॥ ७ ॥ प्रशस्तपत्रश्रवणां सितचामरभूषिताम् ॥ पंचरत्नसमायुक्तां वस्त्रेणाच्छादितां तथा ॥ ८ ॥ गन्धपुष्पैरलंकृत्य ब्राह्मणाय निवेदयेत् ॥ श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते ॥ ९ ॥ वेदवेदांङ्गविदुषे साग्निकाय कुटुम्बिने ॥ अदुग्धाय प्रादतव्यं न तु मत्सरिणे द्विज ॥ १० ॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥ एषु पुण्येषु कालेषु यथाविभवशक्तितः ॥ ११ ॥ सत्पात्रं च द्विजं दृष्ट्वा त्वागतं श्रोत्रियं गृहे ॥ आगताय प्रदातव्या पुच्छदेशे विमृश्य च ॥ १२ ॥ पूर्वाभिमुखमास्थाय अथवा स उदङ्मुखः ॥ गां पूर्वाभिमुखीं कृत्वा वत्समुत्तरतो न्यसेत् ॥ १३ ॥ दानकाले तु ये मन्त्रास्तान्पठित्वा समर्पयेत् ॥ सम्पूज्य विधिवद्विप्रं मुद्रिकाकर्णभूषणैः ॥१४॥स्वशक्त्या दक्षिणा देया वित्तशाठ्यविवर्जितः॥हस्ते तु दक्षिणां दत्त्वा गन्धपुष्पाढ्यचन्दनाम् ॥१५॥धेनुं समर्पयेत्तस्य मुखं च न विलोकयेत्॥एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत्॥१६॥ सर्वपापहरा धेनुः सर्वकामप्रदायिनी ॥ सर्वकामसमृद्धस्तु जायते नात्र संशयः ॥१७॥दीयमानं प्रपश्यन्ति ते यांति परमां गतिम् ॥ य इदं शृणुयाद्वक्त्या पठते वापि मानवः॥१८॥मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ १९ ॥ इति श्रीवराहपुराणे श्वेतवितीताश्वोपाख्याने शर्करांधेनुमाहात्म्यं नाम

व्यधिकशततमोऽध्यायः॥ १०३॥ अथ मधुधेनुदानमाहात्म्यम्॥ द्वोतोवाच॥ मधुधेनुं प्रवक्ष्यामि सर्वपातकनाशिनीम्॥ अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे॥ १॥ धेनुं मधुमयीं कृत्वा सम्पूर्णघटषोडशाम्॥ चतुर्थेन तथांशेन वत्सकं परिकल्पयेत्॥ २॥ सौवर्णौ तु मुखं कृत्वा शृङ्गाण्यगुरुचंदनैः॥ पृष्ठं ताम्रमयं कृत्वा साक्षां पटमयीं तथा॥ ३॥ पादानिक्षुमयान्कृत्वा सितकम्बलसंवृतान्॥ मुखं गुडमयं कृत्वा जिह्वां शर्करया तथा॥ ४॥ ओष्ठौ पुष्पमयौ तस्या दन्ताः फलमयाः स्मृताः॥ दर्भरोममयी देवी खुरैरौप्यैश्च भूषिता॥ ५॥ प्रशस्तपत्रश्रवणा प्रमाणात्परितस्तता॥ सर्वलक्षणसंयुक्ता सप्तधान्यान्विता तथा॥ ६॥ चत्वारि तिलपात्राणि चतुर्दिक्षु प्रकल्पयेत्॥ छादितां वस्त्रयुग्मेन कण्ठाभरणभूषिताम्॥ ७॥ कांस्योपदोहिनीं कृत्वा गन्धपुष्पैस्तु पूजिताम्॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये॥ ८॥ संक्रांत्यामुपरागे च सर्वकालेऽथवेच्छया॥ द्रव्यब्राह्मणसम्पत्तिं दृष्ट्वा तां प्रतिपादयेत्॥ ९॥ ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये॥ आर्यावर्त्ते समुत्पन्ने वेदवेदाङ्गपारगे॥ १०॥ तादृशाय प्रदातव्या मधुधेनुर्नरोत्तमे॥ पुच्छदेशे विमृद्याथ जलपूर्णां सदक्षिणाम्॥ ११॥ दद्याद्विप्राय धेनुं तां मन्त्रपूर्वां विचक्षणः॥ (पुच्छदेशोपविष्टस्तु गन्धधूपादिपूजिता॥ आच्छाद्य वस्त्रयुग्मेन मुद्रिकावर्णमात्रकैः॥ स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः॥ जलपूर्वं तु कर्त्तव्यं पश्चाद्यानं समर्पयेत्॥) रसज्ञा सर्वदेवानां सर्वभूतहिते रता॥ १२॥ प्रीयन्तां पितरो देवा मधुधेनो नमोऽस्तुते॥ एवमुच्चार्य तां धेनुं ब्राह्मणाय निवेदयेत्॥ १३॥ अहं गृह्णामि त्वां देवि कुटुम्बार्थं विशेषतः॥ कामं कामदुघे कामान्मधुधेनो नमोऽस्तु ते॥ १४॥ मधुवातोति मन्त्रेण दद्यादाज्यचिकेन तु॥ दत्त्वा धेनुं महाराज छत्रिकोपानहौ तथा॥ १५॥ एवं यः कुरुते भक्त्या मेधुधेनुं नराधिप॥ दत्त्वा दानं पायसेन मधुना च दिनं नयेत्॥ १६॥ ब्राह्मणश्च त्रिरात्रं तु मधुपायससंयुतम्॥ एवं कृते तु यत्पुण्यं तान्निबोध नराधिप॥ १७॥ यत्र नद्यो मधुवहा यत्र पायसकर्दमाः॥ ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः॥ १८॥ तत्र भोगानथो भुङ्क्ते ब्रह्मलोकं स गच्छति॥ क्रीडित्वा सुचिरं कालं पुनर्मर्त्यमुपागतः॥ १९॥ स भुक्त्वा विपुलान्भोगान्विष्णुलोकं स गच्छति॥ दश पूर्वान् दश परानात्मानं चैकविंशकम्॥ २०॥ नयते विष्णुसायुज्यं मधुधेनुप्रदानतः॥ य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः॥ सर्वपापाविनिर्मुक्तो विष्णुलोकं स गच्छति॥ २१॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने मधु

धेनुमाहात्म्यं नाम चतुरधिकशततमोऽध्यायः ॥१०४॥ अथ क्षीरधेनुदानविधिः ॥ होतोवाच ॥ क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप ॥ अनुलिप्ते महीपृष्ठे गोमयेन नृपोत्तम ॥१॥ गोचर्ममात्रमानेन कुशानास्तीर्य सर्वतः ॥ तस्योपरि महाराज न्यसेत्कृष्णाजिनं बुधः ॥२॥ तत्र कृत्वा कुण्डलिकां गोमयेन सुविस्तृताम् ॥ क्षीरकुम्भं ततः स्थाप्य चतुर्थांशेन वत्सकम् ॥३॥ सुवर्णमुखशृङ्गाणि चन्दनागुरुकाणि च ॥ पञ्च स्तपत्रश्रवणां तिलपात्रोपरि न्यसेत् ॥४॥ मुखं गुडमयं तस्या जिह्वां शर्करया तथा ॥ फलशस्तद्दशनां मुक्ताफलमयेक्षणाम् ॥५॥ इक्षुदण्डां दभैरोमां सितकम्बलसंवृताम् ॥ ताम्रपृष्ठां कांस्यदोहां पट्टसूत्रमयीं शुभाम्॥६॥ पुच्छं च नृपशार्दूल नवनीतमयस्तनीम्॥ स्वर्णश्रङ्गीं रौप्यखुरां पञ्चरत्नसमन्विताम् ॥७॥ चत्वारि तिलपात्राणि चतुर्दिक्ष्वपि विन्यसेत् ॥ सप्तधान्ययुतं पात्रं दिक्षु दिक्षु च विन्यसेत् ॥८॥ एवं लक्षणसंयुक्तां क्षीरधेनुं प्रकल्पयेत् ॥ आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्चयेत् ॥ ९ ॥ भूपट्टीपादिकं कृत्वा ब्राह्मणाय निवेदयेत् ॥ वस्त्रादिभिरलंकृत्य मुद्रिकाकर्णकुण्डलैः ॥१०॥ पादुकोपानहौ छत्रं दत्त्वा दानं समर्पयेत् ॥ दद्यादनेन मन्त्रेण क्षीरधेनुं प्रयत्नतः ॥११॥ आप्यायस्वेति मन्त्रेण वेदोक्तेन विधानतः ॥ आश्रयः सर्वभूतानामित्यादि नरपुङ्गव॥१२॥ आप्यायस्वेति मन्त्रेण क्षीरधेनुं प्रदापयेत् ॥ प्रतिग्राही पठेन्मन्त्रमेष दान विधिः स्मृतः ॥१३॥ दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ॥ एतां हेमप्रदानेन शतेनाथ स्वशक्तितः॥१४॥ दत्त्वा धेनुं महाराज शृणु तस्यापि यत्फलम् ॥ षष्टिवर्षसहस्रं तु इन्द्रलोके महीयते॥१५॥ पित्रादिभिश्च सहितो ब्रह्मणो भवनं व्रजेत् ॥ दिव्यं विमानमारूढो दिव्यस्त्रग नुलेपनः ॥१६॥ क्रीडित्वा सुचिरं कालं विष्णुलोकं स गच्छति ॥ द्वादशादित्यसंकाशे विमानवरमण्डिते ॥ १७ ॥ गीतवाद्यनिनादैश्च वेणुवीणरवैरपि श्च सेविते ॥ तत्रोष्य विष्णोर्भवने विष्णुसायुज्यमाप्नुयात् ॥१८॥ यं इमं शृणुयाद्वाजन्पठेद्वा भक्तिभावतः॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥१९॥ इति श्रीवराहपुराणे श्वेतवितीताश्वापाख्याने क्षीरधेनुदानविधिर्नाम पञ्चाधिकशततमोऽध्यायः ॥१०५॥ अथ दधिधेनुदान माहात्म्यम् ॥ होतोवाच ॥ दधिधेनोर्महाराज विधानं शृणु सांप्रतम् ॥ अनुलिप्ते महीभागे गोमयेन नराधिपः ॥१॥ गोचर्ममात्रं तु पुनः पुष्प प्रकरशोभिते ॥ कुशैरास्तीर्य वसुधां कृष्णाजिनकुशोत्तरीम् ॥ २ ॥ दधिकुम्भं तु संस्थाप्य सप्तधान्यचयोपरि ॥ चतुर्थांशेन वत्सं तु सौवर्णं

मुखमण्डितम् ॥ ३॥ आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजितम् ॥ ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ॥ ४॥ क्षमादिगुणयुक्ताय दद्यात्तां दधिधेनुकाम् ॥ पुच्छदेशोपविष्टस्तु मुद्रिकाकर्णभूषणैः ॥ ५॥ पादुकोपानहौ छत्रं दत्त्वा मंत्रमिमं पठेत् ॥ दधिक्राव्णेति मंत्रेण दद्याद्धेनुं सुपूजिताम् ॥ ६ ॥ एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ॥ एकाहारी दिनं तिष्ठेदध्रा च नृपनन्दन ॥ ७॥ यजमानो वसेद्रात्रीस्त्रीरात्रिं च द्विजोत्तमः ॥ दीयमानां प्रपश्यन्ति ते यान्ति परमं पदम् ॥ ८ ॥ य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ॥ सोऽश्वमेधफलं प्राप्य विष्णुलोकं च गच्छति ॥ ९ ॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने दधिधेनुदानमाहात्म्ये नाम षडधिकशततमोऽध्यायः ॥ १०६ ॥

अथ नवनीतधेनुदानमाहात्म्यम् ॥ होतोवाच ॥ नवनीतमयीं धेनुं शृणु राजन्प्रयत्नतः ॥ यां श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ १ ॥ गोमयेनानुलिप्तायां भूमौ गोचर्ममानतः ॥ चर्म कृष्णमृगस्यैव तस्योपरि च धारयेत् ॥ २ ॥ कुम्भं तु नवनीतस्य प्रस्थमात्रस्य धारयेत् ॥ वत्सं चतुर्थभागस्य तस्यामुत्तरतो न्यसेत् ॥ ३ ॥ कृत्वा विधानेन च राजसिंह सुवर्णशृङ्गी सुमुखा च कार्या ॥ नेत्रे च तस्या मणिमौक्तिकैस्तु कृत्वा तथान्यच्च गुडेन जिह्वाम् ॥ ४ ॥ ओष्ठौ च पुष्पैश्च फलैश्च दन्ताः प्रकल्प्य सास्रां च सितैश्च सूत्रैः ॥ जिह्वां तथा शर्करया प्रकल्प्य फलानि दन्ताः कम्बलं पट्टसूत्रम् ॥ ५ ॥ नवनीतस्तनीं राजन्निक्षुपादां प्रकल्पयेत् ॥ ताम्रपुटां रौप्यखुरां दर्भरोमकृतच्छविम् ॥ ६ ॥ स्वर्णशृङ्गां रौप्यखुरां पंचरत्नसमन्विताम् ॥ चतुर्भिस्तिलपात्रैश्च संवृतां सर्वतो दिशि ॥ ७ ॥ आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलंकृताम् ॥ दीपांश्च दिक्षु प्रज्वाल्य ब्राह्मणाय निवेदयेत् ॥ ८॥ मन्त्रास्तत एव जप्तव्याः सर्वधेनुषु ये स्मृताः ॥ पुरा देवासुरैः सर्वैः सागरस्य तु मन्थने ॥ ९ ॥ उत्पन्नं दिव्यममृतं नवनीतमिदं शुभम् ॥ आप्यायनं तु भूतानां नवनीत नमोऽस्तु ते ॥ १० ॥ एवमुच्चार्य तां दद्याद्ब्राह्मणाय कुटुम्बिने ॥ धेनुं च दत्त्वा सुदुग्धां सोपधानां नयेद्गृहम् ॥ ११॥ हविरेवं रसं चैव विप्रवर्यस्य भूपते॥ भुक्त्वा तिष्ठेद्दिनं राजन् धेनुदस्त्रीणि वै द्विजः ॥ १२ ॥ यः प्रपश्यति तां धेनुं दीयमानां नरोत्तम ॥ सर्वपापविनिर्मुक्तः शिवसायुज्यतां व्रजेत् ॥ १३॥ पितृभिः पूर्वजैः सार्द्धं भविष्यद्भिश्च मानवः ॥ विष्णुलोकं व्रजत्याशु यावदाभूतसंप्लवम् ॥१४॥ य इदं शृणुयाभक्त्या श्रावयेद्वापि मानवः ॥ सर्वपापविशुद्धात्मा

॥८२॥

विष्णुलोके महीयते ॥ १५ ॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने नवनीतधेनुदानमाहात्म्यं नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥
अथ लवणधेनुदानमाहात्म्यम् ॥ होतोवाच ॥ लवणधेनुं प्रवक्ष्यामि तां निबोध नृपोत्तम ॥ षोडशप्रस्थसंयुक्तां धेनुं कृत्वा तु मानवः ॥ १ ॥
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥ धेनुं लवणमयीं कृत्वा षोडशप्रस्थसंयुताम् ॥ २ ॥ वत्सं चतुर्भी राजेन्द्र इक्षुपादांश्च कारयेत् ॥
सुवर्णमुखशृङ्गाणि क्षुरा रौप्यमयास्तथा ॥ ३ ॥ मुखं गुडमयं तस्या दन्ताः फलमया नृप ॥ जिह्वां शर्करया राजन्घ्राणं गन्धमयं तथा ॥
नेत्रे रत्नमये कुर्यात्कर्णौ पत्रमयौ तथा ॥ श्रीखण्डमयकोष्ठौ च नवनीतमयाः स्तनाः ॥ ४ ॥ सूत्रपुच्छां ताम्रपृष्ठां दर्भरोमां पयस्विनीम् ॥
कांस्योपदोहां राजेन्द्र घंटाभरणभूषिताम् ॥५॥ सुगन्धपुष्पधूपैश्च पूजयित्वा विधानतः ॥ आच्छाद्य वस्त्रयुग्मेन ब्राह्मणाय निवेदयेत् ॥ ६ ॥
नक्षत्रग्रहपीडां च सर्वकालं प्रदापयेत् ॥ ग्रहणे वाथ संक्रान्तौ व्यतीपाते तथायने ॥ ७ ॥ द्विजाय साधुवृत्ताय वेदवेदाङ्गवेदिने ॥ द्विजाय
साधुवृत्ताय कुलीनाय च धीमते ॥ ८ ॥ वेदवेदाङ्गविदुषे श्रोत्रियायाहिताग्नये ॥ ईदृशाय प्रदातव्या तथाऽमत्सरिणे नृप ॥ ९ ॥ इङ्गा
चैवं च मन्त्रं तु पुच्छदेशोपविश्य च ॥ छत्रकोपानहौ देये सुद्रिकाकर्णमात्रकैः ॥ १० ॥ आच्छाद्य वस्त्रयुग्मेन दक्षिणां कम्बलं ददेत् ॥
पूर्वोक्तेन विधानेन स्वशक्त्या कनकेन तु ॥ ११ ॥ ब्राह्मणं पूज्य विधिवत्पूर्वोक्तविधिना नृप ॥ सदक्षिणं च गोपुच्छं दत्त्वा ब्राह्मणहस्तके ॥ १२ ॥
इमं मन्त्रं समुच्चार्य ततस्तां प्रतिपादयेत् ॥ इमां गृहाण भो विप्र रुद्ररूपां नमोऽस्तु ते ॥ १३ ॥ रसज्ञा सर्वभूतानां सर्वदेनमस्कृता ॥ कामं
पूरय मे देवि रुद्ररूपे नमोऽस्तु ते ॥ १४ ॥ दत्त्वा धेनुं तु लवणेनैकाहं चैव तिष्ठति ॥ स्वयं त्रिरात्रं विप्रेण तथैव लवणाशिना ॥ १५ ॥
सहस्रेण शतेनाथ स्वशक्त्या कनकेन तु ॥ दत्त्वेमां स्वर्गमाप्नोति यत्र देवो वृषध्वजः ॥ १६ ॥ य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ॥
मुच्यते सर्वपापेभ्यो रुद्रलोकं च गच्छति ॥ १७ ॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने लवणधेनुमाहात्म्यं नाम अष्टाधिकशत
तमोऽध्यायः ॥ १०८ ॥ अथ कर्पासधेनुदानमाहात्म्यम् ॥ होतोवाच ॥ अथातः सम्प्रवक्ष्यामि धेनुं कार्पासकीं नृप ॥ यत्प्रदानान्नरो
याति ऐन्द्रलोकमनुत्तमम् ॥ १ ॥ विष्णुवे त्वयने पुण्ये युगादिग्रहणे तथा ॥ ग्रहपीडासु घोरासु दुःस्वप्नेऽरिष्टदर्शने ॥ २ ॥ नृणां च ग्रहपीडासु

दुःखप्राद्भुतदर्शने ॥ पुण्येष्वायतने राजञ्छुचिर्देशे गवां गणे ॥ ३ ॥ गोमयेनोपलिप्तायां दर्भानास्तर्यि वै तिलान् ॥ तन्मध्ये स्थापयेद्धेनुं वस्त्रमाल्यानुलेपनाम् ॥ ४ ॥ धूपदीपादिनैवेद्यैः पूजयेच्च विमत्सरः ॥ उत्तमा च चतुर्भारैरर्द्धेनैव तु मध्यमा ॥ ५ ॥ भारेण चाधमा प्रोक्ता वित्तशाठ्यं विवर्ज्जयेत् ॥ चतुर्थांशेन वत्सं तु कल्पयित्वा विधानतः ॥ ६ ॥ कर्त्तव्या रुक्मशृङ्गी तु रजतस्य खुरान्विता ॥ नानाफलमया दन्ता रत्नगर्भसमन्विताः ॥७॥ इत्येवं सर्वसम्पूर्णां कृत्वा श्रद्धासमन्वितः ॥ आवाहयेत्तां कापोतधेनुं मन्त्रैर्द्विजातये ॥ ८ ॥ दद्याद्धेनुं चर्मपाणिः प्रयतः श्रद्धयाऽन्वितः ॥ पूर्वोक्तस्तु विधिः कार्यो दानमन्त्रपुरःसरः ॥ ९ ॥ यथा देवगणः सर्वैस्त्वया हीनो न वर्त्तते ॥ तथा ऊर्द्धरं मां देवि पाहि संसारसागरात् ॥ १० ॥ इति श्रीवराहपुराणे श्वेतविनीतायोपाख्याने कापोतधेनुदानमाहात्म्यं नाम नवाधिकशततमोऽध्यायः ॥ १०९ ॥ अथ धान्यधेनुदानमाहात्म्यम् ॥ होतोवाच॥ शृणु राजन्प्रवक्ष्यामि धान्यधेनुमनुत्तमाम् ॥ यस्याः संकीर्त्तनादेव सा तुष्येत् पार्वती स्वयम् ॥ १॥ विधुवे चायने वापि कार्त्तिक्यां तु विशेषतः ॥ यां दत्त्वा मुच्यते पापाच्छशांक इव राहुणा ॥ २ ॥ (तद्दिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम्) दशधेनुप्रदानेन यत्फलं राजसत्तम ॥ तत्सर्वमेव प्राप्नोति व्रीहिधेनुप्रदानतः ॥ ३ ॥ कृष्णाजिनं ततः कृत्वा प्राग्वत्संस्थाप येद्बुधः ॥ गोमयेनानुलिप्तायां भूमौ तां परिपूजयेत् ॥ ४ ॥ उत्तमा तु भवेद्धेनुर्द्रोणैश्चापि चतुष्टयैः ॥ मध्यमा च तदर्द्धेन वित्तशाठ्यं न कारयेत् ॥ ५ ॥ चतुर्थांशेन वत्सं तु कल्पयित्वा विधानतः ॥ चतुर्थांशेन धेनोर्वै वत्सं तु परिकल्पयेत् ॥ ६ ॥ कर्त्तव्यो रुक्मशृङ्गो तु राजतखुरसंयुतौ ॥ गोमेदैः कुर्वीत घ्राणं अगुरुं चन्दनं तथा ॥ ७ ॥ मुक्ताफलमया दंता वृतक्षौद्रमयं मुखम् ॥ प्रशस्तपत्रश्रवणं कांस्यदोहनकारितम् ॥ ८ ॥ इक्षुपृष्टिमयाः पादाः क्षौम्यपुच्छसमन्विताम् ॥ नानाफलसमोपेतां रत्नगर्भसमन्विताम् ॥ ९ ॥ पादुकोपानहच्छत्रभाजनं तर्पणं तथा ॥ अङ्गं तु पूर्ववत्कार्यं मुखं क्षौद्रमयं शुभम् ॥ १० ॥ पूर्ववच्चार्चयित्वा तां कृत्वा दीपार्चनादिकम् ॥ पुण्यकालं च सम्प्राप्य स्नातः शुक्लांबरो गृही ॥ ११ ॥ त्रिः प्रदक्षिणमावृत्य दंडवत्प्रणमेच्च ताम् ॥ त्वं हि विप्र महाभाग वेदवेदाङ्गपारग ॥ १२ ॥ मया दत्तां च गृहीष्व प्रसीद त्वं द्विजोत्तम ॥ प्रीयतां मम देवेशो भगवान्मधुसूदनः ॥ १३ ॥ या च लक्ष्मीस्तु गोविन्दे स्वाहा या च विभावसौ ॥ शक्रे शचीति विख्याता शिवे गौरी च संस्थिता ॥ १४ ॥ गायत्री ब्रह्मणः प्रोक्ता ज्योत्स्ना चन्द्रे

खेः प्रभा ॥ बुद्धिर्बृहस्पतेः रूपात्तो मेधा मुनिषु सत्तमा ॥ १५ ॥ तस्मात्सर्वमयी देवी धान्यरूपेण संस्थिता ॥ एवमुच्चार्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥ १६ ॥ दत्त्वा प्रदक्षिणं कृत्वा तं क्षमाप्य द्विजोत्तमम् ॥ यावच्च पृथिवी सर्वा वसुरत्नानि भूपते ॥ १७ ॥ तावत्पुण्यं समधिकं व्रीहिधेनोश्च तत्फलम् ॥ तस्मान्नरेन्द्र दातव्या मुक्तिमुक्तिफलप्रदा ॥ १८ ॥ इहलोके च सौभाग्यमायुरारोग्यवर्द्धनम् ॥ विमानेनार्कवर्णेन किङ्किणीजालमालिना ॥ १९ ॥ स्तूयमानोऽप्सरोभिश्च स याति शिवमन्दिरम् ॥ यावच्च स्मरते जन्म तावत्स्वर्गे महीयते ॥ २० ॥ ततः स्वर्गात्परिभ्रष्टो जम्बूद्वीपपतिर्भवेत् ॥ एवं हरेण चोद्दीर्णं श्रुत्वा वाक्यं नरोत्तमः ॥ २१ ॥ सर्वपापविशुद्धात्मा रुद्रलोके महीयते ॥ २२ ॥ इति श्रीवराहपुराणे श्वेतवितानाश्वोपाख्याने धान्यधेनुदानमाहात्म्यं नाम दशाधिकशततमोऽध्यायः ॥ ११० ॥ अथ कपिलाधेनुदानमाहात्म्यम् ॥ होतोवाच ॥ अथातः सम्प्रवक्ष्यामि कपिलां धेनुमुत्तमाम् ॥ यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥ १ ॥ पूर्वोक्तेन विधानेन दद्याद्धेनुं सवत्सकाम् ॥ सर्वालङ्कारसंयुक्तां सर्वरत्नसमन्विताम् ॥ २ ॥ कपिलायाः शिरो ग्रीवा सर्वतीर्थानि भामिनि ॥ पितामहनियोगाच्च निवसन्ति हि निश्चयः ॥ ३ ॥ प्रातरुत्थाय यो मर्त्यः कपिलागलमस्तकात् ॥ च्युतं तु भक्त्या पानीयं शिरस्या वन्दते शुचिः ॥ ४ ॥ स तेन पुण्यतोयेन तत्क्षणादग्घाकिल्बिषः ॥ त्रिंशद्वर्षैकृतं पापं दहत्यग्निरिवेन्धनम् ॥५॥ कल्यमुत्थाय यो मर्त्यः कुर्यात्तासां प्रदक्षिणम् ॥ प्रदक्षिणी कृता तेन पृथिवी स्याद्वसुन्धरे॥६॥प्रदक्षिणेन चैकेन श्रद्धायुक्तेन तत्क्षणात् ॥ दशजन्मकृतं पापं तस्य नश्यत्यसंशयम् ॥७॥ कपिलायास्तु मूत्रेण स्नायाच्चैव शुचित्रतः॥ स गङ्गादिषु तीर्थेषु स्नातो भवति मानवः ॥८॥तेन स्नानेन चैकेन भावयुक्तेन वै नरः ॥ यावज्जीवकृतात्पापा न्मुच्यते नात्र संशयः ॥ ९ ॥ गोसहस्रं च यो दद्याद्वेकां वा कपिलां नरः ॥ सममेतत्पुरा प्राह ब्रह्मा लोकपितामहः ॥ १०॥ गवामस्थि ततोऽप्येतन्मूतगन्धेन दूषयेत् ॥ यावज्जिघ्रति तं गन्धं तावत्पुण्यैस्तु पूर्यते ॥ ११ ॥ गवां कण्डूयनं श्रेष्ठं तथा च परिपालनम् ॥ तुल्यं गोशत दानस्य भयरोगादिपालने ॥१२॥ तृणोदकानि यो दद्यात्क्षुधितेन गवाह्निकम् ॥ गोमेधस्य फलं दिव्यं लभते मानवोत्तमः ॥ १३ ॥ विमाने त्रिविधैर्दिव्यैः कन्याभिरभितोऽर्चितैः ॥ सेव्यमानः सुगन्धैर्वै दीप्यमान इवाग्नयः॥१४॥तुरगैर्कपिला पूर्वा द्वितीया गौरपिङ्गला ॥ तृतीया चैव

रक्ताक्षी चतुर्थी गुडपिंगला॥१५॥ पंचमी बहुवर्णा स्यात्षष्ठी च श्वेतपिङ्गला॥ सप्तमी श्वेतपिंगाक्षी त्वष्टमी कृष्णपिंगला ॥१६॥ नवमी पाटलौ ज्ञेया दशमी पुच्छपिंगला ॥ एकादशी खुरश्वेता त्वेतासां सर्वलक्षणाः ॥ १७ ॥ सर्वलक्षणसंयुक्ता सर्वालंकृतसुन्दरी ॥ ब्राह्मणाय प्रदातव्या भुक्तिमुक्तिप्रदायिनी ॥ १८ ॥ भुक्तिमुक्तिप्रदा तेषां विष्णुमार्गप्रदायिनी ॥ १९ ॥ इति श्रीवराहपुराणे श्वेतविनीताश्वोपाख्याने कपिलादान माहात्म्यं नाम एकादशाधिकशततमोऽध्यायः ॥ १११ ॥ अथोभयतोमुखीगोदानहेमकुम्भदानपुराणप्रशंसाः ॥ होतोवाच ॥ अतः परं महाराज शृणूभयमुखीं ततः ॥ विधानं तद्वरारोहे धरण्या कथितं पुरा ॥ १॥ तदहं सम्प्रवक्ष्यामि तव पुण्यफलं महत् ॥ धरण्युवाच ॥ या त्वया कपिला प्रोक्ता पूर्वमुत्पादिता प्रभो॥२॥ होमधेनुः सदा पुण्या सा ज्ञेया कतिलक्षणा ॥ कियत्यः कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा ॥३॥ प्रसूयमाना दानेन किं पुण्यं स्याच्च माधव ॥ एतदिच्छाम्यहं श्रोतुं विस्तरेण जगद्गुरो ॥ ४ ॥ श्रीवराह उवाच ॥ शृणुष्व देवि तत्त्वेन पवित्रं पापनाशनम् ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ५ ॥ कपिला ह्यग्निहोत्रार्थं यज्ञार्थं च वरानने ॥ उद्धृत्य सर्वतेजोभिर्ब्रह्मणा निर्मिता पुरा ॥ ६ ॥ पवित्राणां पवित्रं च मङ्गलानां च मङ्गलम् ॥ पुण्यानां परमं पुण्यं कपिला च वसुन्धरे ॥ ७ ॥ तपसस्तप एवाग्र्यं व्रतानां व्रतमुत्तमम् ॥ दानानामुत्तमं दानं निधीनां ह्येतदक्षयम् ॥ ८ ॥ पृथिव्यां यानि तीर्थानि गुह्यान्यायतनानि च ॥ पवित्राणि च पुण्यानि सर्वलोकेषु सुन्दरि ॥ ९ ॥ होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ॥ कपिलाया घृतेनेह दध्ना क्षीरेण वा पुनः॥ १० ॥ जुह्वते ह्यग्निहोत्राणि मन्त्रैश्च विविधैः सदा ॥ पूजयन्नतिथींश्चैव परां भक्तिमुपागता ॥ ११ ॥ ते यान्त्यादित्यवर्णैश्च विमानैर्द्विजसत्तमाः ॥ सूर्यमण्डलमध्यात्तु ब्रह्मणा निर्मिता पुरा ॥१२॥ कपिला या पिङ्गलाक्षी सर्वसौख्यप्रदायिनी ॥ तिद्धिर्बुद्धिप्रदा धेनुः कपिलानन्तरूपिणी ॥ १३॥ पूर्वोक्ता यास्तु कपिलाः सर्वलक्षणलक्षिताः ॥ सर्वा ह्येता महाभागास्तारयन्ति न संशयः ॥ १४ ॥ संगमेषु प्रशस्ताश्च सर्वपापविनाशनाः ॥ अग्निपुच्छा अग्निमुखी अग्निलोमानलप्रभा ॥ १५ ॥ तथाग्र्यायी तथा देवी सुवर्णाख्या प्रवर्तते ॥ गृहीत्वा कपिलां शूद्रात्कामतः सदृशः पिबेत् ॥ १६ ॥ पतितैः स हि विज्ञेयश्चाण्डालसदृशोऽधमः ॥ तस्मात्र प्रतिगृह्णीयाच्छूद्राद्विप्रः प्रतिग्रहम् ॥ १७ ॥ दूरात्ते परिहर्तव्याः

॥ ८४ ॥

श्वभिस्तुल्या ह्यावध्वरे ॥ पर्वकाले हि सर्वे वै वर्जिताः पितृदेवतैः ॥ १८ ॥ असम्भाष्याः प्रतिग्राह्या शूद्रास्ते पापकर्मणः ॥ पिबन्ति यावत् कपिलां तावत्तेषां पितामहः ॥ १९ ॥ भूमेर्मलं समश्नन्ति जायन्ते विड्भुजश्चिरम् ॥ तासां क्षीरं घृतं वापि नवनीतमथापि वा ॥ २० ॥ उपजीवन्ति ये शूद्रास्तेषां गतिमतः शृणु ॥ कपिलाजीविनः शूद्राः क्रूरा गच्छन्ति रौरवम् ॥ २१ ॥ रौरवे तु महारौद्रे वर्षकोटिशतं धरे ॥ ततो विमुक्ताः कालेन शुनो योनिं व्रजन्ति हि ॥ २२ ॥ शुनो योन्या विमुक्तास्तु विष्ठाभुक्कृमयस्ततः ॥ विष्ठास्थानेषु पापिष्ठः सुदुर्गन्धिषु नित्यशः ॥ २३ ॥ भूयोभूयो जायमानस्तथोत्तारं न विन्दति ॥ ब्राह्मणश्चैव यो विद्वान्कुर्यात्तेषां प्रतिग्रहम् ॥ २४ ॥ ततः प्रभृत्यमेध्यान्तः पितरस्तस्य शेरते ॥ न तं विप्रं तु सम्भाषेन्न चैवैकासनं विशेत् ॥ २५ ॥ स नित्यं वर्जनीयो हि दूरात्तु ब्राह्मणैर्धरे ॥ यस्तेन सह सम्भाषेत्तथा चैकासनं व्रजेत् ॥२६॥ प्राजापत्यं चरेत्कृच्छ्रं तेन शुध्यति स द्विजः॥एकस्य गोप्रदानस्य सहस्राशेन पूर्यते ॥२७॥ किमन्यैर्बहुभिर्दानैः कोटिसंख्यानविस्तरैः ॥ श्रोत्रियाय दरिद्राय सुवृत्तायाहिताग्नये ॥ २८ ॥ आसन्नप्रसवां धेनुं दानार्थी प्रतिपालयेत् ॥ कपिलाद्धेप्रसूता वै दातव्या च द्विजन्मने ॥ २९ ॥ जायमानस्य वत्सस्य मुखं योन्यां प्रदृश्यते ॥ तावत्सा पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ॥ ३० ॥ धेन्वा यावन्ति रोमाणि सवत्साया वसुन्धरे ॥ तावत्यो वर्षकोट्यस्तु ब्रह्मवादिभिरर्चिताः ॥ ३१ ॥ वसन्ति ब्रह्मलोके वै ये नित्यं कपिलाप्रदाः ॥ सुवर्णशृङ्गीं यः कृत्वा रौप्ययुक्तखुरां तथा ॥ ३२ ॥ ब्राह्मणस्य करे दत्त्वा सुवर्णं रौप्यमेव च ॥ कपिलायास्तदा पुच्छं ब्राह्मणस्य करे न्यसेत् ॥ ३३ ॥ उदकं च करे दत्त्वा वाचयेच्छुद्धया गिरा ॥ ससमुद्रवना तेन सशैलवनकानना ॥ ३४ ॥ रत्नपूर्णा भवे दत्ता पृथिवी नात्र संशयः ॥ पृथिवीदानतुल्येन दानेनैतेन वै नरः ॥ ३५ ॥ नन्दितो याति पितृभिर्विष्णवाख्यं परमं पदम् ॥ ब्रह्मस्वहारी गोघ्नो वा भ्रूणहा पापदेहकः ॥ ३६ ॥ महापातकयुक्तोऽपि वंचको ब्रह्मदूषकः ॥ निन्दको ब्राह्मणानां च तथा कर्मावदूषकः ॥ ३७ ॥ महा पातकयुक्तोऽपि गवां दानेन शुध्यति ॥ यश्चोभयमुखीं दद्यात्प्रभूतकनकान्विताम् ॥ ३८ ॥ तादृनं पायसाहारं पयसा वापि वा भवत् ॥ सुव र्णस्य सहस्रेण तदर्द्धेनापि भामिनि ॥३९॥ तस्याप्यर्द्धशतेनाथ पंचाशच्च ततोऽर्द्धकम् ॥ यथाशक्त्या प्रदातव्या वित्तशाठ्यं विवर्जयेत् ॥४०॥

इमां गृह्णोभयमुखीमुभयत्र शमोऽस्तु वै ॥ ददे वंशविवृद्ध्यर्थं सदा स्वस्तिकरी भव ॥ ४१ ॥ प्रतिगृह्णामि त्वां धेनो कुटुम्बार्थं विशेषतः ॥ शुभं भवतु मे नित्यं देवधात्रि नमोऽस्तु ते ॥ ४२ ॥ मे नित्यं स्वस्ति भवतु रुद्राङ्गेति नमोनमः ॥ ॐ द्योस्त्वा ददातु पृथिवी त्वा प्रति गृह्णातु ॥ ४३ ॥ क इदं कस्मा अदादिति जपित्वा वै वसुन्धरे ॥ विसृज्य ब्राह्मणं देवि तां धेनुं तद्गृहं नयेत् ॥ ४४ ॥ एवं प्रसूयमानां यो गां ददाति वसुन्धरे ॥ पृथिवी तेन दत्ता स्यात्सप्तद्वीपा न संशयः ॥४५॥ वदन्ति तां चन्द्रसमानवक्त्रां प्रतप्तजाम्बूनदतुल्यवर्णाम् ॥ महासितं त्वां तनुवृत्तमध्यां सेवन्त्यजस्रं कुलिता हि देवाः ॥ ४६ ॥ प्रातरुत्थाय यो मर्त्यः कल्पं चेदं समाहितः ॥ जितेन्द्रियः शुचिर्भूत्वा पठेद्भक्त्या समन्वितः ॥४७॥ त्रिः सदावर्त्तनं कृत्वा पापं वर्षकृतं च यत् ॥नश्यते तत्क्षणादेव वायुना पांसवो यथा ॥४८॥श्राद्धकाले पठेद्यस्तु इदं पावनमुत्तमम् ॥ तस्यान्नं संस्कृतं तद्धि पितरोऽश्नन्ति धीमतः ॥ ४९ ॥ अमायां वाथ यः कश्चिद्विजानामग्रतः पठेत् ॥ पितरस्तस्य तृप्यन्ति वर्षाणां शतमेव च ॥ ५० ॥ यश्चैतच्छृणुयान्नित्यं तद्भक्तेनान्तरात्मना ॥ संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥ ५१ ॥ होतोवाच ॥ इदं रहस्यं राजेन्द्र वराहेण पुरातनम् ॥ धरण्यै कथितं राजन्धेनुमाहात्म्यमुत्तमम् ॥ ५२ ॥ मया ते कथितं सर्वं सर्वपापप्रणाशनम् ॥ द्वादश्यां माघमासस्य शुक्लायां तिलधेनुदः॥५३॥सर्वकामसमृद्ध्यर्थो वैष्णवं पदमाप्नुयात्॥द्वादश्यां श्रावणे मासि शुक्लायां राजसत्तम॥५४॥ प्रत्यक्षधेनुर्दातव्या सहिरण्या नृपोत्तम ॥ सर्वदा सर्वधेनूनां प्रदानं राजसत्तम ॥५५॥ सर्वपापप्रशमनं मुक्तिमुक्तिप्रदायकम् ॥ एतत्ते सर्वमाख्यातं समासाद्भुविस्तरम् ॥ ५६ ॥ धेनूनां फलमुद्दिश्य सर्वकामप्रदं नृणाम् ॥ अथवा पीड्यतेऽत्यन्तं क्षुधया पार्थिवोत्तम ॥ ५७ ॥ इदानीं कार्त्तिकी चेयं वर्त्तते च नराधिप ॥ ब्रह्माण्डं सर्वसम्पन्नं भूतरत्नोपधेर्युतम् ॥ ५८ ॥ देवदानवयक्षेस्तु युक्तमेतत्सदा विभो ॥ एतद्धेममयं कृत्वा सर्वबीजरसान्वितम् ॥ ५९॥ सरत्नं पुरुषः कृत्वा कार्त्तिक्यां द्वादशीं दिने॥अथवा पंचदश्यां च कार्त्तिकस्य विशेषतः ॥ ६० ॥ पुरोहिताय गुरवे दद्याद्भक्तिसमन्वितः ॥ ब्रह्माण्डोदरवर्तीनि यानि भूतानि पार्थिव ॥६१ ॥ तानि दत्तानि तेन स्युः समासात्कथितं तव ॥ यो यज्ञे यजते राजन् सहस्रशतदक्षिणैः ॥ ६२ ॥ सैकदेशो यजेत्तस्य ब्रह्माण्डस्य विशेषतः ॥ यः पुनः सकलं चेदं ब्रह्माण्डं यजते नरः ॥ ६३ ॥ तेन चेष्टं हुतं

दत्तं पठितं कीर्त्तितं भवेत् ॥ एवं श्रुत्वा ततो राजा हेमकुम्भप्रकल्पितम् ॥ ६४ ॥ ब्रह्माण्डमृषये प्रादात्सविधानं च तत्क्षणात् ॥ सर्वकामैः सुसंवीतो ययौ स्वर्गं नराधिपः ॥ ६५ ॥ तस्मात्त्वमपि राजेन्द्र तद्दत्त्वा तु सुखी भव ॥ एवमुक्तो वसिष्ठेन सोऽप्येवमकरोन्नृपः ॥ ६६ ॥ जगाम परमां सिद्धिं यत्र गत्वा न शोचति ॥ श्रीवराह उवाच ॥ इयं ते कथिता देवि संहिता सर्वकामिका ॥ ६७ ॥ वराहाख्या वरारोहे सर्वपातकनाशिनी ॥ सर्वज्ञाद्युत्थिता चेयं ततो ब्रह्मा बुबोध ह॥६८॥ ब्रह्मा स्वसूनवे प्रादात्पुलस्त्याय महात्मने ॥ सोऽपि रामाय च प्रादाद्भार्गवाय महात्मने ॥६९॥ असावपि स्वशिष्याय प्रादाद्वसाय धारिणि ॥ उशोऽपि मनवे प्रादादेष वः कीर्तितो मया ॥ ७० ॥ सम्बन्धः पूर्वकल्पीयो द्वितीयं शृणु साम्प्रतम् ॥ सर्वज्ञाल्लब्धवानार्सि त्वं च मत्तो धराधरे ॥ ७१ ॥ त्वत्तश्च तपसा सिद्धा वेत्स्यन्ते कापिलादयः ॥ क्रमेण यावद्व्यासेन ज्ञातमेतद्भविष्यति ॥ ७२ ॥ तस्यापि शिष्यो भविता नाम्ना वै रोमहर्षणिः ॥ असौ शुनकपुत्राय कथयिष्यति नान्यथा ॥ ७३ ॥ अष्टादश पुराणानि वेद द्वैपायनो गुरुः ॥ ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ॥ ७४ ॥ तथान्यं नारदीयं च मार्कण्डेयं च सप्तमम् ॥ आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा ॥ ७५ ॥ दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम् ॥ वाराहं द्वादशं प्रोक्तं स्कान्दं चापि त्रयोदशम् ॥ ७६ ॥ चतुर्दशं वामनकं कौर्म्मं पंचदशं स्मृतम् ॥ मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम् ॥ ७७ ॥ य एतत्पाठयेद्भक्त्या कार्तिक्यां द्वादशीदिने ॥ तस्य नूनं भवेत्पुत्रो ह्यपुत्रस्यापि धारिणि ॥ ७८ ॥ यस्येदं तिष्ठते गेहे लिखितं पूज्यते सदा ॥ तस्य नारायणो देवः स्वयं तिष्ठति धारिणि ॥ ७९ ॥ यश्चैतच्छृणुयाद्भक्त्या नैरन्तर्येण मानवः ॥ श्रुत्वा तु पूजयेद्यस्तु शास्त्रं वाराहसंज्ञितम् ॥ ८० ॥ श्रुत्वा तु पूजयेच्छास्त्रं तथा विष्णुं सनातनम् ॥ गन्धैः पुष्पैस्तथा वस्त्रैर्ब्राह्मणानां च तर्पणैः ॥८१॥ यथाशक्त्या नृपो ग्रामैः पूजयेद्वत्सकं घरे ॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥८२॥ इति श्रीवराहपुराणे श्वेतवितीताश्वोपाख्याने उभयतोमुखीगोदानेहेमकुम्भदानपुराणप्रशंसनं नाम द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ अथ भगवत्स्तुतिः ॥ ॐ नमो वराहाय नमो ब्रह्मपुत्राय सनत्कुमाराय नमः ॥ १ ॥ नमस्तस्मै वराहाय लीलयोद्धरते महीम् ॥ खुरमध्यगतो यस्य मेरुः खण

खणायते ॥ २ ॥ दंष्ट्राग्रेणोद्धृता गौरुदधिपरिवृता पर्वतैर्निम्नगाभिर्भक्तानां भीतिहानो सुरनरकदशास्यान्तकः क्रोडरूपी ॥ विष्णुः सर्वेश्व रोऽयं यमिह हतमला लीलया प्राप्नुवन्ति त्यक्त्वात्मानो न पापे प्रभुभवतु मुदितातिपक्षक्षितीशम् ॥३॥ यस्मिन् काले क्षितिः पूर्वकल्पे वाराह मूर्तिना ॥ उद्धृता च यथा भक्त्या पप्रच्छ परमेश्वरम् ॥ ४ ॥ धरण्युवाच ॥ कल्पे कल्पे भवानेव मां समुद्धरते भवान् ॥ न बाहुश्लेष्टते मूर्तिर्मादृशीं गां च केशव॥५॥ स तेन सान्त्वितायां वै पृथिव्यां यः समागतः ॥ सनत्कुमारस्तत्क्षेत्रे दृष्ट्वा तां संस्थितां महीम् ॥६॥ स्वस्ति वाच्याह पुण्याग्रे प्रत्युवाच वसुन्धराम् ॥ सनत्कुमार उवाच ॥ यं दृष्ट्वा वर्द्धसे देवि त्वं च यस्यासि माधवि ॥ ७ ॥ विष्णुना धार्यमाणा च किं त्वया दृष्टमद्भुतम् ॥ एतदाचक्ष्व तत्त्वेन यत्ते हरिसुखाच्छ्रुतम्॥८॥ ब्रह्मपुत्रवचः श्रुत्वा पृथिवी वाक्यमब्रवीत् ॥ धरण्युवाच ॥ यद्गह्यं स मया पृष्टो यच्च मे सम्प्रभाषितम् ॥९॥ शृणु तत्त्वेन विप्रेन्द्र गुह्यं धर्मं महौजसम् ॥ भगवत्प्रोक्तधर्मेषु यद्गह्यं कथयाम्यहम्॥१०॥ तेन मे कथितं ह्येतत्संसारन्तु विमोक्षणम् ॥ विष्णुभक्तेन यत्कार्यं यत्क्रियया परितिष्ठता ॥ ११ ॥ उवाच परमं गुह्यं धर्माणां व्याप्तनिश्चयम् ॥ अयं धर्मो मया ह्येतच्छ्रुते धर्मे सनातने ॥१२॥ ततो महीवचः श्रुत्वा ब्रह्मपुत्रो महातपाः ॥ कोकामुखे मम क्षेत्रे जपन्तो ब्रह्मवादिनः ॥१३॥ तान्सर्वानानया मास यत्र देवी व्यवस्थिता ॥ सनत्कुमारः पूतात्मा प्रत्युवाच महीं प्रति ॥१४॥ सनत्कुमार उवाच ॥ यन्मया पूर्वमुक्तासि कथयस्व वरानने॥ अप्रमेयगतिं चैव धर्ममाचक्ष्व तत्त्वतः ॥१५॥ ततस्तस्य वचः श्रुत्वा प्रणम्य ऋषिपुंगवम् ॥ उवाच परमप्रीता धात्री मधुरया गिरा ॥१६॥ धरण्युवाच ॥ शृण्वन्तु ऋषयः सर्वे यत्तद्विष्णुमुखाच्छ्रुतम् ॥ बाढमित्येव तां देवि स्वस्ति ब्रूहीति सोऽब्रवीत् ॥ १७ ॥ नष्टचन्द्रानिले लोके नष्टभास्करतारके ॥ स्तम्भिताश्च दिशः सर्वा न प्राज्ञायत किञ्चन ॥ १८॥न वाति पवनस्तत्र नैव चाग्निर्न विद्युतः ॥ न किंचित्तत्र विद्येत न तारा नच राशयः ॥१९॥ वेदेषु चैव नष्टेषु मत्स्यो भूत्वा रसातलम् ॥ प्राविश्य तानथोत्कृष्य ब्रह्मणे दत्तवानसि॥२०॥ अन्यदैवः कूर्मरूपस्त्वं समुद्रस्य मन्थने ॥ धृतवानसि कौर्मेण मन्दरं मधुसूदन ॥ २१ ॥ पुनर्वराहरूपेण मां गच्छन्तीं रसातले ॥ उज्जहारैकदंष्ट्रेण भवानेव महार्णवात ॥२२॥ अन्यद्धिरण्यकशिपुवैरदानेन दर्पितः ॥ असावपि नृसिंहेन वपुरास्थाय नाशितः ॥ २३ ॥ पुनर्नैःक्षत्ररूपेण त्वयाऽहं विक्रता

पुरा ॥ जामदग्न्येन रामेण त्वया दृष्टा सकृत्प्रभो ॥ २४ ॥ पुनश्च रावणो रक्षः क्षयितं स्वेन तेजसा ॥ बलिश्च बद्धो भगवन्त्वया वामन रूपिणा ॥२५॥ न च जानाम्यहं देव तव किंचिद्विचेष्टितम् ॥ उद्धर्त्य मां कथं देव सृजसे किंच कारणम् ॥२६॥ सृङ्गा किमादिशः सर्वा न प्राज्ञायत किंचन ॥ न वाति पवनस्तत्र नचैवाग्निर्ज्वलत्यपि ॥२७॥ अंशवश्च न विद्यन्ते न नक्षत्रा न वा ग्रहाः ॥ न चैवाङ्गारकस्तत्र न शुक्रो न बृहस्पतिः॥२८॥ शनैश्चरो बुधो नात्र न चन्द्रो धनदो यमः ॥ वरुणोऽपि न विद्येत नान्ये केचिद्दिवौकसः ॥२९॥ वर्जयित्वात्र त्रीन्देवान् ब्रह्मविष्णुमहेश्वरान् ॥ पृथिवी भारसन्तप्ता ब्रह्माणं शरणं गता ॥ ३० ॥ गत्वा च शरणं देवी दैन्यं वदति माधवी ॥ प्रसीद मम देवेन्द्र मग्नाहं भारपीडिता ॥३१॥ सपर्वतवनैः सार्द्धं मां तारय पितामह ॥ पृथिव्या वचनं श्रुत्वा ब्रह्मा लोकपितामहः॥३२॥मुहूर्तं ध्यानमास्थाय पृथिवीं तामुवाच ह ॥ नाहं तारयितुं शक्तो विषमस्थां वसुन्धरे ॥३३॥ लोकनाथं सुरश्रेष्ठमादिकर्त्तारमजंसा ॥ लोकेशं धन्विनं श्रेष्ठं याहि मायाकरण्डकम् ॥३४॥ सर्वेषामेव नः कार्यं यच्च किञ्चित्प्रवर्त्तते ॥ सर्वोस्तारयितुं शक्तः किं पुनस्त्वां वसुन्धरे ॥ ३५ ॥ अनन्तशयने देवं शयानं योगशायिनम् ॥ ततः कमलपत्राक्षी नानाभरणभूषिता ॥३६॥ कृताञ्जलिपुटा देवी प्रसादयति माधवम् ॥ धरण्युवाच ॥ अहं भारसमायुक्ता ब्रह्माणं शरणङ्गता ॥३७॥ प्रत्याख्याता भगवता तेनाप्युक्तमिदं वचः ॥ नाहं तारयितुं शक्तः सुश्रोणि व्रज माधवम् ॥३८॥ स त्वां तारयितुं शक्तो मग्नासि यदि सागरे ॥ प्रसीद मम देवेश लोकनाथ जगत्प्रभो॥३९॥भक्त्या त्वां शरणं याामि प्रसीद मम माधव॥त्वमादित्यश्च चन्द्रश्च त्वं यमो धनदस्तु वै ॥४०॥वासवो वरुणश्चासि ह्यग्निर्मारुत एव च ॥ अक्षरश्च क्षरश्चासि त्वं दिशो विदिशो भवान् ॥ ४१॥ मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽसि वामनः ॥ रामो रामश्च कृष्णश्च बुद्धः कल्की महात्मवान् ॥४२ ॥ एवं पश्यसि योगेन श्रूयते त्वं महायशाः ॥ युगायुग सहस्राणि व्यतीतान्यासि संस्थितः॥४३॥पृथिवी वायुराकाशमापोज्योतिश्च पञ्चमम्॥शब्दस्पर्शस्वरूपोऽसि रसो गन्धोऽसि नो भवान्॥४४॥ सप्तर्षाणि च ऋक्षाणि कलाकाष्ठामुहूर्त्तकाः ॥ ४५ ॥ सप्तहा ये च नक्षत्रा कला कालमुहूर्त्तकाः ॥ ज्योतिश्चक्रं ध्रुवश्चाऽसि सर्वेषु द्योतते भवान् ॥ ४६ ॥ मासः पक्षमहोरात्रमृतुः संवत्सराण्यपि ॥ ४७ ॥ कला काष्ठापि षण्मासाः षड्ऋतुश्चापि संयमः ॥ सरितः

सागराश्च त्वं पर्वताश्च महोरगाः ॥ ४८ ॥ त्वं मेरुर्मन्दरो विन्ध्यो मलयो दर्दुरो भवान् ॥ हिमवान्निषधश्चासि सचक्रोऽसि वरायुधः॥४९॥
धनुषां च पिनाकोऽसि सांख्ययोगोऽसि चोत्तमः ॥ परम्परोऽसि लोकानां नारायणः परायणः॥५०॥संक्षिप्तश्चैव विस्तारो गोप्ता यज्ञश्च शाश्वतः॥
यज्ञानां च महायज्ञो यूपानामसि संस्थितः ॥५१॥वेदानां सामवेदोऽसि साङ्गोपाङ्गो महाव्रतः ॥ गर्जनं वर्षणं चासि त्वं वेधा अनृतानृते॥५२॥
अमृतं सृजसे विष्णो येन लोकानधारयत् ॥ त्वं प्रीतिस्त्वं परा प्रीतिः पुराणः पुरुषो भवान् ॥ ५३ ॥ धेयाधेयं जगत्सर्वं यच्च किंचित् प्रवर्त्तते ॥ सतामपि लोकानां त्वं नाथस्त्वमसंग्रहः॥५४॥त्वं च कालश्च मृत्युश्च त्वं भूतो भूतभावनः॥आदिमध्यान्तरूपोऽसि मेधा बुद्धिः स्मृतिर्भवान् ॥५५॥ आदित्यस्त्वं युगावर्त्तास्त्वं तपस्वी महातपाः ॥ अप्रमाणः प्रमेयोऽसि ऋषीणां च महानृषिः ॥ ५६ ॥ अनन्तश्चासि नागानां सर्पाणामसि तक्षकः ॥ उद्वहः प्रवहश्चासि वरुणो वारुणो भवान् ॥ ५७ ॥ क्रीडाविक्षेपणश्चासि गृहेषु गृहदेवताः ॥ सर्वात्मकः सर्वगतो वर्द्धनो मन एव च ॥ ५८ ॥ साङ्गस्त्वं विद्युतीनां च वैद्युतानां महाद्युतिः ॥ युगे मन्वन्तरे चापि वृक्षाणां च वनस्पतिः ॥ ५९॥ श्रद्धासि त्वं च देवेश दोषहन्तासि माधव ॥ अण्डजोद्भिज्जस्वेदानां जरायूनां च माधव ॥ ६० ॥ गरुडोऽसि महात्मानं वहसि त्वं परायणः ॥ दुन्दुभिर्नैमिघोषैश्च आकाशममलो भवान् ॥ ६१ ॥ जयश्च विजयश्चासि गृहेषु गृहदेवताः ॥ सर्वात्मकः सर्वगतश्चेतनो मन एव च ॥ ६२ ॥ भग स्त्वं विषलिङ्गश्च परस्त्वं परमात्मकः ॥ सर्वभूतनमस्कार्यो नमो देव नमो नमः ॥ ६३ ॥ मां त्वं मग्नमसि त्रातुं लोकनाथ इहार्हसि ॥ आदि कालात्मकः कृष्णः सर्वलोकात्मको विभुः ॥ ६४ ॥ य इदं पठते स्तोत्रं केशवस्य दृढव्रतः ॥ व्याधितो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ ६५ ॥ अपुत्रो लभते पुत्रं दरिद्रो धनमाप्नुयात् ॥ अभार्यो लभते भार्यामपतिः पतिमाप्नुयात् ॥ ६६ ॥ उभे सन्ध्ये पठेत्स्तोत्रं माधवस्य महात्मनः ॥ स गच्छेद्विष्णुलोकं च नात्र कार्या विचारणा ॥ ६७ ॥ एवं तु अक्षरोक्तोऽपि भवेत्तु परिकल्पना ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ६८ ॥ इति श्रीवराहपुराणे विष्णुस्तवनं नाम त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ अथ श्रीवराहावतारः ॥
श्रीवराह उवाच ॥ संस्तूयमानो भगवान्मुनिभिर्मन्त्रवादिभिः ॥ तुष्टो नारायणो देवः केशवः परमो विभुः ॥ १ ॥ ततो ध्यानं समास्थाय

दिव्यं योग्यं च माधवः ॥ मधुरं स्वरमास्थाय प्रत्युवाच वसुन्धराम् ॥ २ ॥ तव देवि प्रियार्थाय भक्त्या यं त्वं व्यवस्थिता ॥ कारयिष्यामि ते सर्वं यत्ते हृदि व्यवस्थितम् ॥ ३ ॥ अहं त्वां धारयिष्यामि सशैलवनकाननाम् ॥ ससागरां ससरितं सप्तद्वीपसमन्विताम् ॥ ४ ॥ एवमाश्वासयित्वा तु वसुधां स च माधवः ॥ रूपं संकल्पयामास वाराहं सुमहोजसम् ॥ ५ ॥ षट् सहस्राणि चोच्छ्रायो विस्तारेण पुनस्त्रयः ॥ एवं नवसहस्राणि योजनानां विधाय च ॥ ६ ॥ वामया दंष्ट्रया गृह्य उज्जहार च मेदिनीम् ॥ सपर्वतवनाकारां सप्तद्वीपां सपत्तनाम् ॥ ७ ॥ नगा विप्राः पतिताः केचिद्विज्ञानसंश्रिताः ॥ शोभन्ते च विचित्रांगभेदाः सन्ध्यागमे यथा ॥ ८ ॥ चन्द्रनिर्मलसङ्काशा वराहमुखसंस्थिताः ॥ शोभन्ते चक्रपाणेश्च मृणालं कर्दमे यथा ॥ ९ ॥ एवं हि धार्यमाणा सा पृथिवी सागरान्विता ॥ वर्षाणां च सहस्रं हि वज्रदंष्ट्रेण साधुना ॥ १० ॥ तस्यामेव तु कालस्य परिमाणं युगेषु च ॥ एकसप्ततिके कल्पे कर्दमोऽयं प्रजापतिः ॥ ११ ॥ ततः पृथिव्या देवश्च भागशाश्विष्णुरव्ययः ॥ अन्योन्याभिमताश्चैव वाराहे कल्प उत्तमे ॥ १२ ॥ सा गौः स्मृवृति तं चैव पुराणं परमव्ययम् ॥ योगेन परमेणैव शरणं चैव गच्छति ॥ १३ ॥ आधारः कीदृशो देव उपयोगश्च कीदृशः ॥ कालेकाले च देवेश कर्मणश्चापि कीदृशः ॥ १४ ॥ कीदृशा पश्चिमा संध्या कीदृशी ह्यपराह्णतः ॥ शेषाः समानास्त्वा देव ये तु कर्माणि कुर्वते ॥ १५ ॥ किंतु संस्थापने देव आवाहनविसर्जने ॥ अगुरुं गन्धधूपं च प्रमाणं गुह्यसे कथम् ॥ १६ ॥ कथं पाद्यं च गृह्णाति स्नापनालेपनानि च ॥ कथं दीपश्च दातव्यः कन्दमूलफलानि च ॥ १७ ॥ आसनं शयनं चैव किङ्कर्म्मोपि विधीयते ॥ कथं पूजादि कर्तव्यं प्राणास्तत्र च वै कति ॥ १८ ॥ पश्चिमा पूर्वसंध्यायां किं पुण्यं चापि तत्र वै ॥ शरदि कीदृशं कर्म शिशिरे कर्म कीदृशम् ॥ १९ ॥ वसन्ते कीदृशं कर्म ग्रीष्मे किं कर्म कारयेत् ॥ प्रावृट्काले च किं कर्म वर्षान्ते किञ्च कारयेत् ॥ २० ॥ यानि तत्रोपभोग्यानि पुष्पाणि च फलानि च ॥ कर्मण्यास्ते अकर्मण्या ये च शास्त्रबहिष्कृताः ॥ २१ ॥ किं कर्मणा भोगवता तावद्गच्छन्ति माधवम् ॥ कथं कर्म न चाप्नेषु आतिगच्छति कीदृशम् ॥ २२ ॥ अर्घ्यायाः किं प्रमाणं तु स्थापनं चापि कीदृशम् ॥ परिमाणं कथं देव उपवासश्च कीदृशः ॥ २३ ॥ पीतकं शुक्लकं वा कथं गृह्णाति वाससाम् ॥ तेषां तु कानि वस्त्राणि यैर्हितं प्रतिपद्यते ॥ २४ ॥ केषु

द्रव्येषु संयुक्तं मधुपर्कं प्रदीयते ॥ के तु कर्मगुणास्तस्य मधुपर्कस्य माधव ॥२५॥ केषु लोकेषु गच्छन्ति मधुपर्कस्य भक्षणात् ॥ स्तवे परमकालेऽपि तव भक्तस्य माधव॥२६॥ किम्प्रमाणं तु दातव्यं मधुपर्कसमन्वितम् ॥ कानि मांसानि ते देव फलं शाकस्य कीदृशः ॥२७॥ प्रापणेष्वपि युज्येत कर्म शास्त्रसमायुतम् ॥ आहूतस्य च मन्त्रेण आगते धर्मवत्सल ॥२८॥ केन मन्त्रविधानेन प्राशनं ते प्रदीयते ॥ व्रतस्य चोपचारेषु अर्चयित्वा यथाविधि॥२९॥ कानि कर्म्माणि कुर्वीत तव भक्तस्य भोजनात् ॥ यस्तु तं प्रापणं देव न च दोषप्रसादिकम् ॥३०॥ के ऽत्र भुंजन्ति तद्देव सर्वशुद्धिकरं परम् ॥ ये तु एकाशिनो देवमुपवर्षन्ति माधवम्॥३१॥ तेषां तु का गतिर्देव तव मार्गानुसारिणाम् ॥ व्रतं कृत्वा यथोक्तेन येऽभिगच्छन्ति माधवम् ॥३२॥ तेषां तु का गतिर्देव तव भक्तिं प्रकुर्वताम् ॥ कृच्छ्रसांतपने कृत्वा येऽभिगच्छन्ति माधवम् ॥३३॥ कां गतिं ते प्रपद्यन्ते तव कर्मपरायणाः ॥ वाय्वाहारं ततः कृत्वा कृष्णं समधिगच्छति ॥ ३४ ॥ तेषां तु का गतिः कृष्ण तव भक्तौ व्यवस्थिताः ॥ अक्षारलवणं कृत्वा येऽभिगच्छन्ति चाच्युतम् ॥३५॥ कां गतिं ते प्रपद्यन्ते तव कर्मानुसारिणः ॥ कृत्वा पयोव्रतं चैव येऽभिगच्छंति चाच्युतम् ॥ ३६ ॥ ते कां गतिं प्रपद्यन्ते नरा ये व्रतकारिणः॥ दत्त्वा गवाह्निकं चैव ये प्रपद्यन्ति माधवम् ॥३७॥ कां गतिं ते प्रपद्यन्ते तव भक्त्या व्यवस्थिताः ॥ उञ्छवृत्तिं समास्थाय येऽभिगच्छन्ति माधवम् ॥३८॥ कां गतिं ते प्रपद्यन्ते नरा भिक्षोपजीविनः॥ गृहस्थधर्मं कृत्वा वै येऽभिगच्छन्ति माधवम् ॥३९॥ कां गतिं ते प्रपद्यन्ते तव कर्मपरायणाः ॥ तव क्षेत्रेषु वैकुण्ठ ये तु प्राणान्विमुञ्चते ॥४०॥ काँल्लोकांस्ते प्रपद्यन्ते तव क्षेत्रेषु ये मृताः ॥ कृत्वा पंचातपं चैव माधवाय प्रयच्छति ॥४१ ॥ कां गतिं वै परायान्ति ये तु पंचातपे मृताः ॥ कण्टशय्यां समासाद्य ये प्रपद्यन्ति चाच्युतम्॥४२॥ तेषां तु का गतिर्देव कण्टशय्यां समाश्रिताः॥ आकाशशयनं कृत्वा ये प्रपद्यन्ति चाच्युतम् ॥ ४३॥ तेषां तु का गतिः कृष्ण तव भक्तिपरायणाः ॥ गोव्रजे शयनं कृत्वा ये प्रपद्यन्ति केशवम् ॥ ४४ ॥ तेषां तु का गतिर्ब्रह्मस्तव भक्तिपथे स्थिताः ॥ शाकाहारं ततः कृत्वा येऽभिगच्छन्ति चाच्युतम् ॥ ४५ ॥ तेषां तु का गतिर्देव कणभक्षास्तु ये नराः ॥ पंचगव्यं ततः पीत्वा येऽभिगच्छन्ति माधवम् ॥ ४६ ॥ तेषां तु का गतिर्देव ये नरा यावकाशिनः ॥ आहारं गोमयं कृत्वा येऽभिगच्छन्ति केशवम् ॥ ४७ ॥

नारायण गतिस्तेषां कीदृशोऽत्र विधिः स्मृतः ॥ सकुं वै भक्षयित्वा तु ये प्रपद्यन्ति चाच्युतम् ॥ ४८ ॥ तेषां तु का गतिर्देव तव कर्मपरायणाः ॥ शिरसा दीपकं कृत्वा येऽभिगच्छन्ति केशवम् ॥ ४९ ॥ तेषां तु का गतिर्देव शिरसा दीपधारणात् ॥ ये हि नित्यं पयः पीत्वा तव चिन्ताव्यवस्थिताः ॥ ५० ॥ ते गतिं कां प्रपद्यन्ते तव चिंतापरायणाः ॥ अश्माशनं व्रतं कृत्वा ये प्रपद्यन्ति नित्यशः ॥ ५१ ॥ तेषां तु का गतिर्देव तव भक्तिपरायणाः ॥ भक्षयित्वा तु दूर्वां ये प्रपद्यन्ते मनीषिणः ॥ ५२ ॥ तेषां तु का गतिर्देव स्वधर्मगुणचारिणः ॥ जानुभ्यां प्रतिपद्यन्ते तव प्रीत्या च माधव ॥५३॥ तेषां तु का गतिर्देव तन्ममाचक्ष्व पृच्छतः ॥ उत्तानशयनं कृत्वा धारयन्ति हि दीपिकाम् ॥ ५४ ॥ ते यांति कां गतिं देव कथ्यते या च शाश्वती ॥ जानुभ्यां दीपकं कृत्वा केशवाय प्रपद्यते॥५५॥ तेषां तु का गतिर्देव कथ्यते चैव शाश्वती ॥ अवाङ्मुखस्तु भूत्वा वै यः प्रपद्येज्जनार्दनम् ॥ ५६ ॥ भगवन् का गतिस्तस्य अवाक्शिरिति शाायिनः ॥ पुत्रदारगृहं चैव मुक्त्वा योऽनुप्रपद्यते ॥ ५७ ॥ का गतिस्तस्य सिद्धा तु कथयस्व सुरोत्तम ॥ भाषितोऽसि मया ह्येवं सर्वलोकसुखावहम् ॥ ५८ ॥ गमनागमनं चैव त्वत्प्रसन्नेन माधव ॥ त्वं ज्ञाता त्वं पिता चैव सर्वधर्मविनिश्चयः ॥ ५९ ॥ अतस्त्वयैव वक्तव्यो योगताङ्क्यविनिश्चयः ॥ त्वां भजंश्च गते जीवे मधुपर्कसमन्वितम् ॥ ६० ॥ भस्माकुलेषु निःक्षिप्य कथं चाग्नौ प्रपद्यते ॥ कां गतिं प्रतिपद्यन्ते त्वद्भक्ता जलमास्थिताः ॥ ६१ ॥ त्वत्क्षेत्रसंस्थितो वापि तन्ममाचक्ष्व पृच्छतः ॥ स्मरण पुत्र ते कृष्ण यैस्तु नाम प्रकीर्त्यते ॥ ६२ ॥ नमो नारायणेत्युक्त्वा तेषां वै का गतिर्भवेत् ॥ उद्यतेष्वपि शस्त्रेषु हन्यमाना रणे नराः ॥ ६३ ॥ नामप्रकीर्त्तनात्तेषां कीदृशी तु गतिर्भवेत् ॥ अहं शिष्या च दासी च तव भक्त्या व्यवस्थिता ॥ ६४ ॥ रहस्यं धर्मसंयुक्तं तन्ममाचक्ष्व माधव ॥ एवं तत्परमं गुह्यं मम प्रीत्या जगद्गुरो ॥ ६५ ॥ संचिन्त्य लोकधर्मार्थं तद्भवान् वक्तुमर्हति ॥ इति श्रीवराहपुराणे पृथिव्याः प्रश्नो नाम चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ अथ विविधधर्मोत्पत्तिः ॥ ततो महीवचः श्रुत्वा देवो नारायणोऽब्रवीत् ॥ कथयिष्यामि ते देवि कर्म स्वर्गसुखावहम् ॥ १ ॥ यत्त्वया पृच्छ्यते देवि तच्छृणुष्व वसुन्धरे ॥ स्थिते सत्त्वं तु मर्त्यानां भक्त्या ये च व्यवस्थिताः ॥२ ॥ नाहं दानसहस्रेण नाहं यज्ञशतैरपि ॥ तुष्यामि न तु वित्तेन ये नराः स्वल्पचेतसः ॥३॥

एकचित्तं समाधाय यो मां जानाति माधवि ॥ नित्यं तुष्याम्यहं तस्याहं पुरुषं बहुदोषकृत् ॥ ४ ॥ यच्च पृच्छसि मां भद्रे कर्म स्वर्गसुखावहम् ॥ तच्छृणुष्व वरारोहे गदतो मे शुचिस्मिते ॥ ५ ॥ ये नमस्यंति मां नित्यं पुरुषा बहुचेतसः ॥ अर्द्धरात्रेऽन्धकारे च मध्याह्ने वापराह्णके ॥ ६ ॥ यस्य चित्तं न नश्येत मम भक्तिव्यवस्थितम् ॥ द्वादश्यामुपवासं तु यः कुर्यान्मम तत्परः ॥ ७ ॥ ते मामेव प्रपश्यन्ति मयि भक्तिपरायणाः ॥ लब्धचेतो गुणज्ञश्च नरोभक्तिव्यवस्थितः ॥ ८ ॥ इच्छयाऽपि भवेद्भद्रे स्वर्गे वसति सुन्दरि ॥ स्वल्पकेन न गम्यन्ते दुष्प्राप्योऽहं वरानने ॥ ९ ॥ यानि कर्माणि कुर्वन्तु मां प्रपश्यन्ति माधवि ॥ तानि ते कथयिष्यामि येन भक्त्या व्यवस्थिताः ॥ १० ॥ द्वादश्यामुपवासं तु ये च कुर्वन्ति ते नराः ॥ तेषामेव प्रपश्यन्ति मम भक्तिपरायणाः॥११॥ कृत्वा चैवोपवासं प्रगृह्य चैव जलाञ्जलिम् ॥नमो नारायणेत्युक्त्वा आदित्यं चावलोकयेत्॥१२॥ यावन्तो बिन्दवः किंचित्पतन्त्येवाञ्जलेर्जलात् ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥१३॥ अथ चैव तु द्वादश्यां पुरुषा धर्मवादकाः॥विधिना च प्रयत्नेन ये मां कुर्वन्ति मानुषाः ॥१४॥ पाण्डुरैश्चैव पुष्पैश्च सृष्टैर्धूपैस्तु धूपयेत्॥ यो मे धारयते धूमो तस्यापि शृणु या गतिः॥१५॥दत्त्वा शिरसि पुष्पाणि इमं मन्त्रमुदीरयेत् ॥ हृदि कृत्वा तु मन्त्रांश्च शुक्लाम्बरधरो नरे ॥१६॥ सुमान्यः सुमना गृह्य प्रीयंतां भगवान्हरिः ॥ १७ ॥ नमोऽस्तु विष्णवे व्यक्ताव्यक्तगन्धिगन्धान्सुगन्धान्या गृह्ण गृह्ण नमो भगवते विष्णवे ॥ अनेन मन्त्रेण गन्धं दद्यात् ॥ श्रुत्वा प्रत्यागतमाधारसक्षनं पतये भवं प्रविष्टं मे धूप धूपनं गृह्णातु मे भगवानच्युतः ॥ अनेन मन्त्रेण धूपं दद्यात् ॥ १८ ॥ श्रुत्वा चैवं च शास्त्राणि यो मामेव तु कारयेत् ॥ मम लोकं च गच्छेत जायेतैव चतुर्भुजः ॥ १९ ॥ एतत्ते कथितं देवि श्रेष्ठं चैव मम प्रियम् ॥ तव चैवं प्रियार्थाय मन्त्रपूजां सुखावहाम् ॥२०॥ श्यामाकं स्वस्तिकं चैव गोधूमं मुद्गकं तथा ॥ शालयस्तु यवाश्चैव तथा नीवारकाङ्गुकाः ॥ २१ ॥ एतानि यस्तु भुञ्जीत मम कर्मपरायणः ॥ शङ्खं चक्रं लाङ्गलं च मुसलं स च पश्यति ॥ २२ ॥ ब्राह्मणस्य तु वक्ष्यामि शृणु कर्म वसुन्धरे ॥ यानि कर्माणि कुर्वीत मम भक्तिपरायणः ॥ २३ ॥ षट्कर्मनिरता भूत्वा अहङ्कारविवर्जितः ॥ लाभालाभं

१ भक्तिपरायणः । २ प्रियो मे । इत्यपि पाठः ।

परित्यज्य भिक्षाहारो जितेन्द्रियः ॥ २४ ॥ मम कर्मसमायुक्तः पैशुन्येन विवर्जितः ॥ शास्त्रानुसारिमध्यस्थो नवृद्धशिशुचेतनः ॥ २५ ॥
एतद्वै ब्रह्मणः कर्म एकचित्तो जितेन्द्रियः ॥ इष्टापूर्तं च कुरुते स मामेति वसुन्धरे ॥ २६ ॥ क्षत्रियाणां प्रवक्ष्यामि मम
कर्मसु तिष्ठताम् ॥ यानि कर्माणि कुर्वीत क्षत्रियो मध्यसंस्थितः ॥ २७ ॥ दानशूरश्च कर्मज्ञो यज्ञेषु कुशलः शुचिः ॥
मम कर्मसु मेधावी अहङ्कारविवर्जितः ॥ २८ ॥ अल्पभाषी गुणज्ञश्च नित्यं भागवतप्रियः ॥ गुरुवित्र्योऽनसूयश्च नित्यक्रमविवर्जितः॥२९॥
अभ्युत्थानादिकुशलः पैशुन्येन विवर्जितः॥ एतैर्गुणैः समायुक्तो यो मां व्रजति क्षत्रियः ॥ ३० ॥ भजते मम यो नित्यं मम लोकाय
गच्छति ॥ वैश्यानां तु प्रवक्ष्यामि मम कर्मसु तिष्ठताम् ॥ ३१ ॥ यानि कर्माणि कुरुते मम भक्तिपथे स्थितः ॥ एतैर्गुणैः स्वधर्मेण
लाभालाभविवर्जितः ॥ ३२ ॥ ऋतुकालाभिगामी च शान्तात्मा मोहवर्जितः ॥ शुचिर्देशो निराहारो मम कर्मरतः सदा ॥ ३३ ॥ गुरुसम्पू
जको नित्यं युक्तो भक्तानुवत्सलः ॥ वैश्योऽप्येवं सुसंयुक्तो यस्तु कर्माणि कारयेत् ॥ ३४ ॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
अथ शूद्रस्य वक्ष्यामि कर्माणि शृणु माधवि ॥ ३५ ॥ कर्माणि यानि कुरुते ह शूद्रो मह्यं व्यवस्थितः ॥ दम्पती मम भक्तौ यौ मम कर्म
परायणौ ॥ ३६ ॥ उभौ भागवतौ भक्तौ मद्भक्तौ कर्मनिष्ठितौ ॥ देशकालौ च जानीतो रजसा तमसोज्झितौ ॥ ३७ ॥ निरहङ्कारशुद्धात्मा
आतिथेयो विनीतवान् ॥ श्रद्धावानोऽतिपूतात्मा लोभमोहविवर्जितः ॥ ३८ ॥ नमस्कारप्रियो नित्यं मम चिन्ताव्यवस्थितः ॥ शूद्रः कर्माणि
मे देवि य एवं सममाचरेत् ॥ ३९ ॥ त्यक्त्वा ऋषिसहस्राणि शूद्रमेव भजाम्यहम् ॥ चातुर्वर्ण्यस्य कर्माणि यत्रस्था परिपृच्छितम् ॥ ४० ॥
एवं कर्मगुणाश्चैव येन भक्त्या व्यवस्थितः ॥ सर्ववर्णाश्च मां देवि अपरं क्षत्रिये शृणु ॥ ४१ ॥ येन तत्प्राप्यते योगं तच्छृणुष्व वसुन्धरे ॥
त्यक्त्वा लाभमलाभं च मोहं कामं च वर्जयेत् ॥ ४२ ॥ न शीते च न चोष्णे च लब्धाऽलब्धं विचिन्तयेत् ॥ न तिक्तेनास्ति कटुना मधुरान्नेन
लावणैः ॥ ४३ ॥ न कषायैः स्पृहा यस्य प्राप्तुयात्सिद्धिमुत्तमाम् ॥ भार्या पुत्राः पिता माता उपभोगार्थसंयुतम् ॥ ४४ ॥ य एतान् हि परि
त्यज्य मम कर्मरतः सदा ॥ धृतिज्ञः कुशलश्चैव श्रद्धावानो धृतव्रतः ॥ ४५ ॥ तत्परो नित्यमुयुक्तः अन्यकार्यजुगुप्सकः ॥ बाले वयसि

कल्पश्च अल्पभोगी कुलान्वितः ॥ ४६ ॥ कारुण्यः सर्वसत्त्वानां प्रत्युत्थायी महाक्षमः ॥ काले मौनक्रियां कुर्याद्यावत्तत्कर्म कारयेत् ॥४७॥
त्रिकालं च दिशो भागं सदा कर्मपथि स्थितः ॥ उपपन्नानभुञ्जानः कर्माण्यभोजनानि च ॥ ४८ ॥ अनुष्ठानपरश्चैव मम पार्श्वे मनश्चरः ॥ काले
मूत्रपुरीषाणि विसृज्य स्नानवत्तलः ॥ ४९ ॥ पुष्पे गन्धे च धूपे च मत्कर्मणि सदा रतः ॥ कदाचित्कन्दमूलानि फलानि च कदाचन॥५०॥
पयसा यावकेनापि कदाचिद्वायुभक्षणः ॥ कदाचित्पष्ठकालेन कदाचिदृष्टमहाफलः ॥ ५१ ॥ कदाचित्तु चतुर्थेन कदा चित्फलभेव
च ॥ कदाचिदृशमे भुञ्जेत्पक्षे मासे वसुन्धरे ॥ ५२ ॥ य एतत्तत्र जन्मानि मम कर्माणि कुर्वते ॥ योगिनस्तान्प्रपश्यन्ति पूर्वो
क्तान्कर्मसु स्थितान् ॥ ५३ ॥ इति श्रीवराहपुराणे विविधकर्मोत्पत्तौ पंचदशाधिकशततमोऽध्यायः ॥ ११५ ॥ अथ सुखदुःखनिरूपणम्॥
श्रीवराह उवाच ॥ मया प्रोक्तविधानेन यस्तु कर्माणि कारयेत् ॥ तच्छृणुष्व महाभागे येन साफल्यमाप्नुयात् ॥ १ ॥ एकचित्तः समास्थाय
अहङ्कारविवर्जितः ॥ मच्चित्तसंहतो नित्यं क्षान्तो दांतो जितेन्द्रियः ॥ २ ॥ फलमूलानि शाकानि द्वादृश्यां वा कदाचन॥ पयोव्रतं च तत्काले
पुनरेव निरामिषः ॥ ३ ॥ षष्ठचष्टमी ह्यमावास्या तू भयत्र चतुर्दशी ॥ मैथुनं नाभिसेवेत द्वादृश्यां च तथा प्रिये ॥४॥ एवं योगविधानेन कर्म
कुर्याद्दृढव्रतः ॥ पूतात्मा धर्मसंयुक्तो विष्णुलोकं तु गच्छति ॥ ५ ॥ न ह्यानिर्न जरा तस्य न मोहो रोग एव च॥ भुजाष्टादश जायन्ते चन्द्रो
खड्गी शरी गदी ॥ ६ ॥ तेषां व्युष्टि प्रवक्ष्यामि मम कर्मसमुत्थिताम् ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ ७ ॥ ममाचैनविधिं कृत्वा
मम लोके महीयते ॥ दुःखमेवं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ ८ ॥ उचितेनोपचारेण दुःखमोक्षविनाशनम् ॥ अहङ्कारावृतो नित्यं नरो
मोहेन चावृतः ॥ ९ ॥ यो मां नैव प्रपद्येत ततो दुःखतरं नु किम् ॥ सर्वांशी सर्वविकेता नमस्कारविवर्जितः ॥ १० ॥ यो न मां प्रतिपद्येत ॥ ९० ॥
ततो दुःखतरं नु किम् ॥ प्राप्तकाले वैश्वदेवे दृष्ट्वा चातिथिमागतम् ॥ ११ ॥ अदृत्वा तस्य यो भुंक्ते ततो दुःखतरं नु किम् ॥ सर्वान्नानि तु
सिद्धानि पाकभेदं करोति यः ॥ १२ ॥ तस्य देवा न चाश्नन्ति ततो दुःखतरं नु किम् ॥ असन्तुष्टस्तु वैपम्ये परदाराभिमर्शकः ॥ १३ ॥
परोपतापी मन्दात्मा ततो दुःखतरं नु किम् ॥ अकृत्वा पुष्कलं कर्म गृहे संवसते नरः ॥ १४॥ मृत्युकालवशं प्राप्तस्ततो दुःखतरं नु किम् ॥

इस्त्यश्वरथयानानि गम्यमानानि पश्यति ॥ १५ ॥ धावन्त्यस्यायतः पृष्ठे ततो दुःखतरं नु किम् ॥ अश्नन्ति पिशितं केचित्केचिच्छाळेषमन्वितम् ॥ १६ ॥ शुष्कान्नं केचिदश्नन्ति ततो दुःखतरं नु किम् ॥ वरवस्त्रावृतां शय्यां समासेवति भूपिताम् ॥ १७ ॥ केचित्तृणेषु शेरन्ते ततो दुःखतरं नु किम् ॥ सुरूपो दृश्यते कश्चित्पुरुषश्चात्मकर्मभिः ॥ १८ ॥ केचिद्विरूपा दृश्यन्ते ततो दुःखतरं नु किम् ॥ विद्वान् कृती गुणज्ञश्च सर्वशास्त्रविशारदः ॥१९॥ केचिन्मूकाश्च दृश्यन्ते ततो दुःखतरं नु किम् ॥ विद्यमाने धने केचित्कृपणा भोगवर्जिताः ॥२०॥ दरिद्रो जायते दाता ततो दुःखतरं नु किम् ॥ द्विभार्यः पुरुषो यस्तु तयोरेकां प्रशंसति ॥ २१ ॥ एका तु दुर्भगा तत्र ततो दुःखतरं नु किम् ॥ ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णाः सुमध्यमे ॥ २२ ॥ पापकर्मरता ह्यासन्ततो दुःखतरं नु किम् ॥ लब्ध्वा तु मानुषीं संज्ञां पंचभूतसमन्विताम् ॥ २३ ॥ मामेव न प्रपद्यन्ते ततो दुःखतरं नु किम् ॥ एतत्ते कथितं भद्रे दुःखकर्मविनिश्चयम् ॥ २४ ॥ सर्वभूताहितं पापं यत्त्वया परिपृच्छितम् ॥ यच्च मां पृच्छसे भद्रे शुभं कीदृशमुच्यते ॥ २५ ॥ तच्छृणुष्वानवद्याङ्गि मम कर्मविनिश्चयम् ॥ कृत्वा तु विपुलं कर्म मद्भक्तेषु निवेदयेत् ॥ २६ ॥ यस्य बुद्धिर्विजायेत स दुःखायोपजायते ॥ मां पूजयित्वा नैवेद्यं विशिष्टं परिकल्प्य च ॥ २७ ॥ शेषमन्नं समश्नाति ततः सौख्यतरं नु किम् ॥ त्रिकालं ये प्रपद्यन्ते मयोक्तेन वसुन्धरे ॥ २८ ॥ कृत्वा सायाह्निकं कर्म ततः सौख्यतरं नु किम् ॥ देवतातिथिमर्त्यानां त्यक्त्वा चान्नं वसुन्धरे ॥ २९ ॥ यश्चात्मा वै समश्नाति ततः सौख्यतरं नु किम् ॥ प्रविष्टस्त्वतिथिर्यस्य निराशो यत्र गच्छति ॥ ३० ॥ येन केनचिदत्तेन ततः सौख्यतरं नु किम् ॥ मासि मास्येकादश्यां सस्त्रीकावास्योति योच्यते ॥ ३१ ॥ पितरो यस्य तृप्यन्ति ततः सौख्यतरं नु किम् ॥ भोजनेषु प्रपन्नेषु यवान्न यः प्रयच्छति ॥ ३२ ॥ अभिन्नमुखरागेण ततः सौख्यतरं नु किम् ॥ उभयोरपि भार्यासु यस्य बुद्धिर्न नश्यति ॥ ३३ ॥ समं पश्यति यो देवि ततः सौख्यतरं नु किम् ॥ अहिंसनं तु कुर्वीत विशुद्धेनान्तरात्मना ॥ ३४ ॥ अहिंसोपरतः शुद्धः स सुखायोपजायते ॥ परभार्यां सुरूपां तु दृष्ट्वा दृष्टिर्न चाल्यते ॥ ३५ ॥ यस्य चित्तं न गच्छेत्तु ततः सौख्यतरं नु किम् ॥ मौक्तिकादीनि रत्नानि तथैव कनकानि च ॥ ३६ ॥ लोष्टवत्पश्यते यस्तु ततः सौख्यतरं नु

किम् ॥ मुदिते वाश्वनागेन्द्रे उभे सैन्ये पथि स्थिते ॥ ३७ ॥ यस्तु प्राणान्प्रमुच्येत ततः सौख्यतरं नु किम्॥ लब्धेन चाप्यलब्धेन कुत्सितं कर्म गर्हयन् ॥ ३८ ॥ यस्तु जीवति संतुष्टः स सुखायोपपद्यते ॥ भर्तुस्तु वै व्रतं स्त्रीणामेवमेव वसुन्धरे ॥ ३९ ॥ या तोषयति भर्त्तारं ततः सौख्यतरं नु किम् ॥ विद्यते विभवेनापि पुरुषो यस्तु पण्डितः ॥ ४० ॥ निगृहीतेन्द्रियः पंच ततः सौख्यतरं नु किम् ॥ सहते चावमानं तु व्यसने न तु दुर्मनाः ॥ ४१ ॥ यस्येदं विदितं सर्वं ततः सौख्यतरं नु किम् ॥ अकामो वा सकामो वा मम क्षेत्रे वसुंधरे ॥ ४२ ॥ यस्तु प्राणान्प्रमुच्येत ततः सौख्यतरं नु किम् ॥ मातरं पितरं चैव यः सदा पूजयेन्नरः ॥ ४३॥ देवतेव सदा पश्येत्ततः सौख्यतरं नु किम् ॥ ऋतुकाले तु यो गच्छेन्मासेमासे च मैथुनम्॥४४॥अन्यमानसो भूत्वा ततः सौख्यतरं नु किम्॥प्रयुक्तः सर्वदेवानां यो मामेवं प्रपूजयेत् ॥४५॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ एतत्ते कथितं भद्रे शुभनिर्देशनिश्चयः ॥ सर्वलोकहितार्थाय यन्मां त्वं परिपृच्छसि ॥ ४६ ॥ इति श्रीवराहपुराणे सुखदुःखनिरूपणं नाम षोडशाधिकशततमोऽध्यायः ॥११६॥ अथ द्वात्रिंशदपराधाः॥ श्रीवराह उवाच॥ शृणु भद्रे महाश्चर्यमाहारादीधिनिश्चयम् ॥ आहारं चाप्य नाहारं तच्छृणुष्व वसुन्धरे ॥ १ ॥ भुञ्जानो याति चाश्नाति मम योगाय माधवि ॥ अशुभं कर्म कृत्वापि पुरुषो धर्ममाश्रितः ॥ २॥ आहारं चैव धर्मज्ञ उपभुञ्जीत नित्यशः ॥ सर्वं चात्रैव कर्मण्या व्रीहयः शालयस्तथा ॥३॥ अकर्मण्यानि वक्ष्यामि येन भोज्यंति मां प्रति ॥ तेन वै भुक्तमार्गेण अपराधो महोजसः ॥ ४॥ प्रथमं चापराधान्न न रोचेत मम प्रिये ।। भुक्त्वा तु परकीयान्नं तत्परस्तन्निवर्त्तनः ॥ ५॥ द्वितीयस्त्वपराधोऽयं धर्मविघ्नाय वै भवेत् ॥ गत्वा मैथुनसंयोगं यो नु मां स्पृशते नरः ॥६॥ तृतीयमपराधं तु कल्पयामि वसुंधरे ॥ दृष्ट्वा रजस्वलां नारीमस्माकं यः प्रपद्यते ॥ ७॥ चतुर्थमपराधं तु दृष्टं नैव क्षमाम्यहम् ॥ स्पृष्ट्वा तु मृतकं चैव असंस्कारकृतं तु वै ॥८॥ पंचमं चापराधं च न क्षमामि वसुंधरे ॥ दृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम् ॥९ ॥ षष्ठं तं चापराधं वै न क्षमामि वसुंधरे ॥ ममार्चनस्य काले तु पुरीषं यस्तु गच्छति ॥ १०॥ सप्तमं चापराधं तु कल्पयामि वसुंधरे ॥ यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपद्यते ॥ ११ ॥ अष्टमं चापराधं च कल्पयामि वसुन्धरे ॥ ममैवार्चनकाले तु यस्त्वसमं प्रभाषते ॥१२॥ नवमं चापराधं

तं न रोचामि वसुन्धरे ॥ अविधानं तु यः स्पृश्य मामेव प्रतिपद्यते ॥ १३ ॥ दशमश्चापराधोऽयं मम चाप्रियकारकः ॥ कुद्धस्तु यानि कर्माणि कुरुते कर्मकारकः ॥१४॥ एकादशापराधं तु कल्पयामि वसुंधरे ॥ अकर्मण्यानि पुण्यानि यस्तु मामुपकल्पयेत् ॥ १५ ॥ द्वादशं चापराधं तं कल्पयामि वसुंधरे ॥ यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति ॥ १६ ॥ त्रयोदशं चापराधं कल्पयामि वसुन्धरे ॥ अन्धकारे च मां देवि यः स्पृशेत कदाचन ॥१७॥ चतुर्दशापराधं तु कल्पयामि सुवन्धरे ॥ यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत् ॥१८॥ अपराधं पंचदशं कल्पयामि वसुंधरे ॥ अधौतेन तु वस्त्रेण यस्तु मामुपकल्पयेत् ॥ १९ ॥ षोडशं त्वपराधानां कल्पयामि वरानने ॥ स्वयमन्नं तु यो ह्यद्याद्ज्ञानादपि माधवि ॥ २० ॥ अपराधं स तदृशं कल्पयामि वसुन्धरे ॥ यस्तु मात्स्यानि मांसानि भक्षयित्वा प्रपद्यते ॥२१ ॥ अष्टादशापराधं च कल्पयामि वसुंधरे ॥ जालपादं भक्षयित्वा यस्तु मामुपसर्पति ॥ २२ ॥ एकोनविंशापराधं कल्पयामि वसुंधरे ॥ यस्तु मे दीपकं स्पृष्ट्वा मामेव प्रतिपद्यते ॥२३॥ विंशकं चापराधं तं कल्पयामि वरानन ॥ श्मशानं यस्तु वै गत्वा मामेव प्रतिपद्यते॥२४॥ एकविंशापराधं तं कल्पयामि वसुन्धरे ॥ पिण्याकं भक्षयित्वा तु यो मामेवाभिगच्छति ॥ २५ ॥ द्वाविंशं चापराधं तं कल्पयामि प्रिये सदा ॥ यस्तु वाराह मांसानि प्रापणेनोपपादयेत् ॥ २६ ॥ अपराधं त्रयोविंशं कल्पयामि वसुन्धरे ॥ सुरां पीत्वा तु यो मर्त्यः कदाचिदुपसर्पति ॥ २७ ॥ अपराधं चतुर्विंशं कल्पयामि वसुन्धरे ॥ यः कुसुम्भं च मे शाकं भक्षयित्वोपचक्रमे ॥ २८ ॥ अपराधं पंचविंशं कल्पयामि वसुन्धरे ॥ परप्रावरणेनैव यस्तु मामुपसर्पति ॥ २९ ॥ अपराधेषु षड्विंशं कल्पयामि वसुन्धरे ॥ नवान्नं यस्तु भक्षेत न देवान्न पितॄन्यजेत् ॥ ३० ॥ सप्तविंशं चापराधं कल्पयामि गुणान्विते ॥ उपानद्दो च प्रपदे तथा वार्षी च गच्छति ॥३१॥ अपराधं त्वष्टविंशं कल्पयामि गुणान्विते ॥ शरीरं मर्दयित्वा तु यो मामाप्नोति माधवि ॥ ३२ ॥ एकोनत्रिंशापराधो न स स्वर्गेषु गच्छति ॥ अजीर्णेन समाविष्टो यस्तु मामुपगच्छति ॥ ३३ ॥ त्रिंशकं चापराधं तं कल्पयामि यशस्विनि ॥ गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति ॥ ३४॥ एकत्रिंशं चापराधं कल्पयामि मनस्विनि ॥ विना भेर्यादिशब्देन द्वारस्योद्घाटनं मम ॥ ३५ ॥ महापराधं जानीयाद्द्वात्रिंशं तं मम प्रिये ॥ अन्यच्च शृणु वक्ष्यामि दृढव्रतमनुत्तमम् ॥ ३६ ॥

कृत्वा चावश्यकं कर्म मम लोकं च गच्छति ॥ नित्ययुक्तश्च शास्त्रज्ञो मम कर्मपरायणः ॥ ३७ ॥ अहिंसापरमश्चैव सर्वभूतदयापरः ॥ सामान्यश्च शुचिर्दक्षो मम नित्यं पथि स्थितः ॥ ३८ ॥ निगृह्य चेन्द्रियग्राममपराधविवर्जितः ॥ उदारो धार्मिकश्चैव स्वदारेषु सुनिष्ठितः ॥३९॥ शास्त्रज्ञः कुशलश्चैव मम कर्मपरायणः ॥ चातुर्वर्ण्यस्य मे भद्रे सन्मार्गेषु व्यवस्थितः ॥ ४० ॥ आचार्यभक्ता देवेषु भक्ता भर्तरि वत्सला ॥ संसारेष्वपि वर्त्तन्ती गच्छन्ती त्वव्रतो यदि ॥४१॥ मम लोकस्थिता सा वै भर्त्तारं प्रसमीक्षते ॥ पुरुषो यदि मद्भक्तः स्त्रियं त्यक्त्वा च गच्छति ॥४२॥ स ततोऽत्र प्रतीक्षेत भार्या भर्त्तरि वत्सलाम् ॥ अन्यच्च ते प्रवक्ष्यामि कर्मणां कर्म चोत्तमम् ॥४३॥ ऋषयो मां न पश्यन्ति मम कर्मपथे स्थिताः ॥ द्रष्टव्या मम लोकेषु ऋषयोऽपि वरानने ॥ ४४ ॥ किं पुनर्मानुषा ये च मम कर्मव्यवस्थिताः ॥ अन्यदेवेषु ये भक्ता मूढा वै पापचेतसः ॥४५॥ मम मायाविमूढास्तु न प्रपद्यन्ति माधवि ॥ मां तु ये वै प्रपद्यन्ते मोक्षकामा वसुन्धरे ॥४६॥ तानहं भावसंसिद्धान्बुद्धा संविभजामि वै ॥ येन त्वं परया शक्त्या धारितासि मया धरे ॥४७॥ तेनेदं कथितं देवि आख्यानं धर्मसंयुतम् ॥ पिशुनाय न दातव्यं न च मूर्खाय माधवि ॥४८॥ ततो न चोपदिष्टाय न शठाय प्रदापयेत् ॥ नादीक्षिताय दातव्यं नोपक्षर्याय यत्नतः ॥४९॥ शठाय च न दातव्यं नास्तिकाय न माधवि ॥ वर्जयित्वा भागवतं मम कर्मपरायणम् ॥ ५० ॥ एतत्ते कथितं देवि मम धर्मं महौजसम् ॥ सर्वलोकहितार्थाय किमन्यत्परिपृच्छसि ॥ ५१ ॥ इति श्रीवराहपुराणे द्वात्रिंशदपराधकथनं नाम सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥ अथ देवोपचारविधिः ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे भद्रे प्रायश्चित्तं यथाविधि ॥ यथावत्स च दातव्यो मम भक्तेन विद्यया ॥ १ ॥ वक्ष्यमाणेन मन्त्रेण उद्धृत्य दन्तकाष्ठकम् ॥ दीपं न ज्वालयेत्तावद्यावन्न स्पृश्यते धरा ॥ २ ॥ दीपे प्रज्वालिते तत्र हस्तशौचं तु कारयेत् ॥ ततः प्रक्षाल्य हस्तौ तु पुनरेवमुपागतः ॥ ३ ॥ वन्दयित्वास्य चरणौ दन्तधावनमानयेत् ॥ अनेनैव तु मन्त्रेण दद्याद्वै दन्तकाष्ठकम् ॥ ४ ॥ मन्त्रश्च-भुवनभवन रविसंहरण अनन्तो मध्यश्चेति गृह्णेमं भुवनं दन्तधावनम् ॥ ५ ॥ यत्त्वया भाषितं सर्वमेतं धर्मविनिश्चयम् ॥ दन्तधावनं दन्ते दद्याद्यावत्कर्म वसुन्धरे ॥ ६ ॥ निर्माल्यं शिरसोत्तार्य धृत्वा शिरसि चात्मनः ॥ पश्चात्तु जलपूतेन ततो हस्तेन सुन्दरि ॥ ७ ॥ कार्याणि मुखकर्माणि

स्वल्पेन सलिलेन च ॥ मुखप्रक्षालने चेमं शृणु मन्त्रं च सुन्दरि ॥ ८ ॥ इष्टेमसुक्तमन्त्रेण संसारात्तु प्रमुच्यते ॥ ९ ॥ मन्त्रश्च-तद्भगवत्त्वां गुणश्च आत्मनश्चापि गृह्य वारिणः सर्वदेवतानां मुखमेवं प्रक्षालयेत् ॥ एतेन मन्त्रेण सुगन्धधूपदीपनैवेद्यं पुनरेवं समर्पयेत् ॥ १० ॥ ततः पुष्पाञ्जलिं दत्त्वा भगवन् भक्तवत्सल ॥ नमो नारायणेत्युक्त्वा इमं मन्त्रमुदारयेत् ॥ ११ ॥ मन्त्रज्ञानां यज्ञयद्वारं भूतन्नद्वारमेव च ॥ अन्य पुष्पाणि संगृह्य कल्यमुत्थाय माधवि ॥ १२ ॥ पूजयेद्देवदेवेशं ज्ञानी भागवतः शुचिः ॥ निपतेद्दण्डवद्भूमौ सर्वकर्मसमन्वितः ॥१३॥ कायं निपतितं कृत्वा प्रसीदेति जनार्दनम् ॥ शिरसा चाञ्जलिं कृत्वा इमं मंत्रमुदाहरेत्॥१४॥ मन्त्रैर्लब्ध्वा संज्ञां त्वायि नाथ प्रसन्ने त्वद्दिच्छातो ह्यपि योगिनां चैव मुक्तिः ॥ १५ ॥. यतस्त्वदीयः कर्मकरोऽहमस्मि त्वयोक्तं यत्तेन देवः प्रसीदतु ॥ १६ ॥ एवं मन्त्रविधिं कृत्वा मम भक्तिव्यव स्थितः ॥ पृष्ठतोऽनुपदं गत्वा शीघ्रं यावन्न ह्रीयते ॥ १७ ॥ एवं सर्वं समादाय मम कर्म दृढव्रतः ॥ शीघ्रं मेऽभ्यञ्जनं दद्यात्तैलेनाथ घृतेन वा ॥ १८ ॥ ततः स्नेहं समुद्दिश्य मंत्रज्ञः कर्मकारकः ॥ एवं चित्तं समाधाय इमं मंत्रमुदीरयेत् ॥ १९ ॥ मंत्रा ऊचुः ॥ स्नेहं स्नेहेन संगृह्य लोकनाथ मया हृतम् ॥ सर्वलोकेषु सिद्धात्मा दद्याम्यात्मकरेण च ॥ २० ॥ मया प्रोक्तः क्षमस्वेति तुभ्यं चैव नमो नमः ॥ एवं मंत्रः समा ख्यातस्तेनाज्यात्यथमं शिरः ॥२१॥दक्षिणाङ्गं ततोऽभ्यज्याद्धाममङ्गं ततोऽनु च ॥ पश्चात्पृष्ठं समभ्यज्य ततोऽभ्यज्यात्कटिं तथा ॥ २२ ॥ पश्चाच्छिम्पेत्ततो भूमिं गोमयेन दृढव्रतः॥ तस्य दृष्ट्वा श्रुतं भद्रे गोमयेन सुनिश्चितम् ॥२३ ॥ यानि पुण्यान्यवाप्नोति तानि मे गदतः शृणु ॥ आज्यमानमपि तथा यावन्तस्तैलबिन्दवः ॥ २४ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ततः पुण्यकृतॉल्लोकान्पुरुषो योऽनुलिप्यते ॥ २५ ॥ एकैककणसंख्यातः स्वर्गलोके महीयते ॥ एवं योऽभ्यञ्जयेद्गात्रं तैलेन तु घृतेन वा ॥ २६ ॥ तावद्वर्षसहस्राणि मम लोके प्रतिष्ठति ॥ अथ चोद्वर्त्तनं भद्रे प्रवक्ष्यामि प्रियं मम ॥ २७ ॥ येन शुष्यन्ति चाङ्गानि मम प्रीतिश्च जायते ॥ भोगिना यदि वा रोग्रं यदि पिप्पलिकामधु ॥ २८ ॥ मधूकमश्वपर्णी वा रोहिणं चैव कर्कटम् ॥ एतेषां प्राप्य लभते शास्त्रज्ञः कर्मकारकः ॥ २९ ॥ करेण यस्य चूर्णेन पिष्टचूर्णेन वा पुनः ॥ एतदुद्वर्त्तनं कुर्यान्मम गात्रसुखावहम् ॥ ३० ॥ यदीच्छेत्परमां सिद्धिं मम कर्मानुसारकः ॥ एवमुद्वर्त्तनं कृत्वा स्नान

कर्म तु कारयेत् ॥ ३१॥ तत आमलकं चैव वसुगन्धाणमुत्तमम् ॥ तेन मे सर्वगात्राणि मर्द्दयित्वा दृढव्रतः ॥३२॥ जलकुम्भं ततो गुह्य इमं मन्त्रमुदाहरेत् ॥ देवानां देव देवोऽसि देवोऽनादिरभूःपरः ॥३३॥तव व्यक्तस्वरूपेण स्नानं गृह्णीष्व मेऽनघ ॥ एवं तु स्नपनं कुर्यान्मम मार्गानुसारकः ॥ ३४ ॥ अथ सौवर्णकुम्भेन रजतस्य घटेन वा ॥ एतेषामप्यलाभेतु कर्मज्ञः कर्म कारयेत् ॥ ३५॥ ताम्रकुम्भमथैनैव कुर्यात्स्नपन मुत्तमम् ॥ एवं तु स्नपनं कृत्वा विधिदृष्टेन कर्मणा ॥ ३६ ॥ पश्चाद्वन्धः प्रदातव्यः प्रकृष्टो मन्त्रसंयुतः ॥ सर्वगन्धाः सौमनस्याः सर्ववर्णाश्च ते मताः ॥ ३७ ॥ उत्पन्नाः सर्व लोकेषु त्वया सत्येषु योजिताः ॥ मया च ते तवाङ्गेषु तानावह शुचीन्प्रभो ॥ ३८ ॥ मम भक्त्या सुसन्तुष्टः प्रतिगृह्णीष्व माधव ॥ एवं गन्धांस्ततो दत्त्वा उत्कृष्ट कर्म कारयेत् ॥ ३९ ॥ कर्मण्यान्यपि माल्यानि ततो मह्यं प्रदापयेत् ॥ तदैव चार्चनं कृत्वा कर्मण्यः कर्मसम्मितः ॥ ४० ॥ ततः पुष्पाञ्जलिं दत्त्वा इमं मन्त्रमुदीरयेत् ॥ जलजं स्थलजं चैव पुष्पं कालोद्भवं शुचि ॥ ४१ ॥ मम संसारमोक्षाय गृह्ण गृह्ण ममाच्युत ॥ एवंविधोपचारेण अर्चयित्वा मम प्रियम् ॥ ४२ ॥ पश्चाद्रूपं च मे दद्यात्सुगन्धद्रव्यसम्मितम् ॥ धूपं गृह्य विधानेन ममोक्तं मुखवल्लभम् ॥ ४३ ॥ उभयेषु कुलेष्वात्मा धूपमंत्रमुदीरयेत् ॥ वनस्पतिरसं दिव्यं बहुद्रव्यसमन्वितम् ॥ ४४ ॥ मम संसारमोक्षाय धूपोऽयं प्रतिगृह्यताम् ॥ मन्त्रः—शान्तिर्वै सर्वदेवानां शान्तिर्मम परायणम् ॥ ४५ ॥ सांख्यानां शान्तियोगेन धूपं गृह्ण नमोऽस्तु ते ॥ त्राता नान्योऽस्ति मे कश्चित्त्वां विहाय जगद्गुरो ॥ ४६ ॥ एवमभ्यर्च्चनं कृत्वा माल्यगन्धानुलेपनैः॥पश्चाद्वस्त्रं च वै दद्यात् क्षौमशुक्लं सपीतकम् ॥ ४७ ॥ एवं चैव समादाय कृत्वा शिरसि चाञ्जलिम् ॥ दिव्ययोगं समादाय इमं मन्त्रमुदीरयेत् ॥ ४८ ॥ प्रीयतां भगवान्पुरुषोत्तमः श्रीनिवासः श्रीमानानन्दरूपः ॥ गोता कर्ताधिकर्ता मान्यनाथ भूतनाथ आदिरव्यक्तरूपः ॥ क्षौमं वस्त्रं पीतरूपं मनोज्ञं देवांगे स्वे गात्रप्रच्छादनाय ॥ ४९ ॥ वस्त्रैर्विभूषणं कृत्वा मम गात्रानुसारि यत् ॥ पश्चाद्दुष्पं गृहीत्वा तु आसनं चोपकल्पयेत्॥५०॥ गृहीत्वा प्रणवाद्येन धर्मपुण्येन संवृतः ॥ ५१ ॥ इदं परायणं परस्परप्रीतिकरं प्राण रक्षणं प्राणिनां स्विष्टं तदनुकल्पं सत्यमुपयुक्तमात्मने तदेव गृहाण ॥५२॥ एवं तु प्रापणं कृत्वा मम मार्गानुसारकः ॥ मुखप्रक्षालनं दत्त्वा शीघ्रमेव

प्रकल्पितम्॥५३॥शुचिः स्तुवति देवानामेतदेव परायणम्॥शौचार्थं तु जलं गृह्य कृत्वा प्रापणमुत्तमम्॥५४॥एवं तु भोजनं दत्त्वा व्यपनीय तु प्रापणम्॥ताम्बूलं तु ततो गृह्य चेमं मन्त्रमुदीरयेत् ॥ ५५ ॥ मन्त्रः—अलङ्कारं सर्वेषां देवानां द्रव्यानुक्तो सर्वसौगन्धिकादिभिः गृह्य ताम्बूलं लोकनाथ विशिष्टमस्माकं च भवनं तव प्रतिमा च ह ॥ ५६ ॥ अलङ्कारं मुखे श्रेष्ठं तव प्रीत्या मया कृतम् ॥ मुखप्रसाधनं श्रेष्ठं देव गृह्य मया कृतम् ॥ ५७ ॥ एतेनैवोपचारेण मद्भक्तः कर्म कारयेत् ॥ अनुमुक्तो महालोकान्पश्यते मम नित्यशः ॥ ५८ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे देवोपचारविधिर्नामाद्यादशाधिकशततमोऽध्यायः ॥ ११८ ॥ अथ भोज्यनियमविधिः ॥ धरण्युवाच ॥ एवं कर्मविधिं श्रुत्वा सर्वं संसारमोक्षणम् ॥ प्रसन्नवदनं देवं पुनर्वाक्यमुवाच ह ॥ १ ॥ एवं महोत्तमं कर्म तव मार्गानुसारतः ॥ त्वत्तस्तु प्रापणविधिस्तव प्रीत्या मया श्रुतः ॥ २ ॥ केन द्रव्येण संयुक्तं तन्ममाचक्ष्व माधव ॥ वसुधाया वचः श्रुत्वा वराहः प्रीतमानसः ॥ ३ ॥ उवाच धर्मसंयुक्तं धर्मज्ञो वाक्य कोविदः ॥ श्रीवराह उवाच ॥ येन मन्त्रेण संयुक्तो मम प्रापणकं नयेत् ॥ ४ ॥ सप्त व्रीहींस्ततो गृह्य पयसा सह संयुतम् ॥ परमं तस्य शाकानि मधूकोदुम्बरं तथा ॥ ५ ॥ एते चान्ये च बहवः शतशोऽथ सहस्रशः ॥ कमण्याश्च त एतेषां ये मया परिकीर्त्तिताः ॥ ६ ॥ व्रीहीणां च प्रवक्ष्यामि उपयोग्यानि माधवि ॥ एकाग्रं मानसं कृत्वा प्रापणं शृणु सुन्दर ॥ ७ ॥ धर्मचिह्निकशाकं च सुगन्धं रक्तशालिकौ ॥ दीर्घशालिमहाशाली वरकुङ्कुममाक्षिकौ ॥८॥ आमोदा शिवसुन्दर्यौ शिरीकाकुडशालिकाः ॥ विविधं यावकान्नं च ज्ञेयान्येतानि कर्मणि ॥९॥ कर्मण्या मुद्गमाषा वै तिलकङ्कुकुलित्थकाः ॥ गवेधुकं महामोहं मकुष्ठमथवाहिनाम्॥१०॥श्यामाकमिति चोक्तानि कर्मण्यानि वसुन्धरे ॥ कर्मण्यानि च शाकानि विजानीहि वसुन्धरे॥११॥एतानि प्रतिगृह्यानि यच्च भागवतं प्रियम्॥मार्गमांसं वरं छागं शास्त्रे समनुयुज्यते ॥१२ ॥एतानि प्रापणे द्रव्यान्मम चैतत्प्रियावहम्॥युञ्जानो विततं यज्ञे ब्राह्मणे वेदपारगे॥१३॥भागो ममास्ति तत्रापि पशूनां छागलस्य च॥माहिषं वर्ज्जयेन्मह्यं क्षीरं दधि घृतं ततः ॥ १४ ॥ वर्ज्जयेत्तत्र मांसानि यजुषा वैष्णवोऽश्नुत ॥ परं पायसमपि वर्ज्यानि तन्मांसं चेतकः खुरे ॥ १५ ॥ पक्षिणां च प्रवक्ष्यामि ये प्रयोज्या वसुन्धरे ॥ ये चैव मम क्षेत्रेषु उपयुज्यन्ति नित्यशः ॥ १६ ॥ लावकं वार्त्तिकं चैव प्रशस्तं च कपिञ्जलम् ॥ एते

चान्ये च बहवः शतशोऽथ सहस्रशः ॥ १७ ॥ मम कर्मणि योग्या ये ते मया परिकीर्त्तिताः ॥ यस्त्वेतत्तु विजानीयात्कर्मकर्त्ता तथैव च ॥ १८ ॥ नापराध्नोति स नरो मम चोक्तं वचः प्रिये ॥ ते च भोज्याश्च मङ्गल्या मम भक्तसुखावहाः॥१९॥ ततो यष्टव्यमेवं हि य इच्छेत्सिद्धिमुत्तमाम् ॥ य एतेन विधानेन यजिष्यंति वसुन्धरे ॥ २० ॥ प्राप्नुवन्ति परां सिद्धिं ममैव कृतकर्मिणः ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे प्रापणद्रव्यकर्मण्यभोज्यनियमविधिर्नामोनविंशत्यधिकशततमोऽध्यायः ॥११९॥ अथ त्रिसन्ध्यामन्त्रोपस्थानम् ॥ श्रीवराह उवाच ॥ शृणुष्व परमं गुह्यं पृष्टं त्वया धरे ॥ देवि सर्वं प्रवक्ष्यामि संसारतरणं महत् ॥ १ ॥ स्नानं कृत्वा यथान्यायं मम कर्मपरायणाः॥उपसर्पन्ति ये भक्त्या कश्चिन्नाज्ञा जितेन्द्रियाः ॥ २ ॥ यश्चैवमुच्यते भद्रे मम रूपं सनातनम् ॥ अहमेव वरारोहे सर्वभूतसनातनम् ॥ ३ ॥ अधश्चोर्द्धं च तिर्यक् च अहमेव व्यवस्थितः ॥ दिशां च विदिशां चैव उपर्युपरि भामिनि ॥ ४ ॥ सर्वथा वन्दनीयास्ते मम भक्तेन सर्वदा ॥ क्रियासमूह युक्तेन यदीच्छेत्परमां गतिम् ॥ ५ ॥ अन्यच्च ते प्रवक्ष्यामि गुह्यं लोके महद्यशः ॥ यथा वै वन्दनीयास्ते मम मार्गानुसारिणः ॥ ६ ॥ कृत्वापि परमं कर्म बुद्धिमादाय तद्विधाम् ॥ ततः पूर्वमुखो भूत्वा पुनर्गृह्य जलाञ्जलिम् ॥ ७ ॥ ओं नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ८ ॥ यजामहे धर्मपरायणोद्भवं नारायणं सर्वलोकप्रधानम् ॥ ईशानमाद्यं पुरुषं पुराणं संसारमोक्षाय कृपाकरं तम् ॥ ९ ॥ ततः पश्चान्मुखो भूत्वा पुनर्गृह्य जलांजलीम् ॥ द्वादशाक्षरमुच्चार्य इमं मन्त्रमुदीरयेत् ॥ १० ॥ मन्त्रा ऊचुः ॥ यथा तु देवः प्रथमादिकर्त्ता पुराण कल्पश्च यथा विभूतिः ॥ तथा स्थितं चादिमनन्तरूपममोघसंकल्पमनन्तमीडे ॥११॥ ततस्तेनैव कालेन पुनर्गृह्य जलांजलिम् ॥ तेनैव चास्य योगेन भूत्वा चोत्तरामुखः ॥ नमो नारायणेत्युक्त्वा इमं मन्त्रमुदाहरेत् ॥ १२ ॥ यजामहे दिव्यं परं पुराणमनादिमध्यान्तमनन्तरूपम् ॥ भवोद्भवं विश्वकरं प्रशान्तं संसारमोक्षावहमाद्वितीयम् ॥१३॥ ततस्तेनैव कालेन भूत्वा वै दक्षिणामुखः ॥ नमः पुरुषोत्तमायेत्युक्त्वा इमं मन्त्रमुदीरयेत्॥१४॥यजामहे यज्ञमहो रूपं तु सत्यं ऋतं च कालादिमरूपमाद्यम्॥ अनन्यरूपं च महानुभावं संसारमोक्षाय कृतावतारम् ॥१५॥ कृत्वैतत्कृत्यस्ततो भूत्वा कृत्वा चेन्द्रियनिग्रहम्॥ अच्युते तु मनः कृत्वा इमं मन्त्रमुदाहरेत् ॥१६॥ यजामहे सोमपं भवन्तं ते सोमार्कनेत्रं शतपत्रनेत्रम्॥

॥९४॥

जगत्प्रधानं ननु लोकनाथं मृत्युत्रिसंसारविमोक्षणं च ॥१७॥ त्रिषु सन्ध्यास्वनेनैव विधिना कुर्यान्मम च कर्म तत्॥ बुद्ध्या युक्तया च मत्या च यदीच्छेत्परमां गतिम् ॥१८॥ गुह्यानां परमं गुह्यं योगानां परमो निधिः ॥ सांख्यानां परमं सांख्यं कर्मणां कर्म चोत्तमम् ॥१९॥ एतन्न देया नास्तिकाय पिशुनाय शठाय च ॥ दीक्षितायैव दातव्यं सुशिष्टाय दृढाय च ॥ २० ॥ एतन्मरणकालेऽपि गुह्यं विष्णुप्रभाषितम् ॥ बुद्ध्या धारयितव्यं न विस्मर्त्तव्यं कदाचन॥२१॥ य एतत्पठते नित्यं कल्पोच्छायी दृढव्रतः ॥ ममापि हृदये नित्यं स तिष्ठति न संशयः॥ २२॥ य एतेन विधानेन त्रिसन्ध्यं कर्म कारयेत् ॥ तिर्यग्योनिविनिर्मुक्तो मम लोकं स गच्छति ॥ २३ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे त्रिसन्ध्यामन्त्रोपस्थानकरणं नाम विंशत्यधिकशततमोऽध्यायः ॥ १२०॥ अथ जन्माभावः ॥ श्रीवराह उवाच ॥ येन गर्भं न गच्छेत तच्छृणुष्व वसुन्धरे ॥ कथयिष्यामि ते ह्येवं सर्वधर्मविनिश्चयम् ॥ १ ॥ कृत्वापि विपुलं कर्म आत्मानं न प्रशंसति ॥ करोति बहुकर्माणि शुद्धेनैवान्तरात्मना ॥ २ ॥ कृत्वा तु मम कर्माणि समर्थोऽनुग्रहे रतः ॥ कार्याकार्ये विजानाति सर्वधर्मेषु निष्ठितः ॥ ३॥ शीतोष्णवातवर्षादिक्षुत्पिपासासहश्च यः ॥ यो दरिद्रो निरालस्यः सत्यवागनसूयकः ॥४॥स्वदारनिरतो नित्यं परदारविवर्जकः ॥ सत्यवादी विशुद्धात्मा नित्यं च भगवत्प्रियः ॥ ५ ॥ संविभाज्य विशेषज्ञो नित्यं ब्राह्मणवत्सलः ॥ प्रियभाषी द्विजानां च मम कर्मपरायणः ॥ ६ ॥ कुयोनिं तु न गच्छेत मम लोक स गच्छति ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥७ ॥ यो त्रियोनिं न गच्छेत मम कर्मपरायणः ॥ जीवहिंसानिवृत्तस्तु सर्वभूतहितः शुचिः ॥ ८ ॥ सर्वत्र समतायुक्तः समलोष्टाश्मकांचनः ॥ बाल्ये स्थितोऽपि वयसि क्षान्तो दान्तः शुभे रतः ॥ ९ ॥ नित्यं नैव विजानाति परेणापकृत क्वचित् ॥ कर्त्तव्यं संस्मरेत्सर्वं मम सत्यं च जल्पति ॥ १० ॥ व्यलीकाद्विनिवृत्तो यस्तथ्येतिकृतनिश्चयः ॥ नित्यं च वृत्तिमान्कश्चित्परोक्षेऽपि न चाक्षिपेत् ॥११॥ ऋतुकालेऽपि गच्छेद्यः अपत्यार्थे स्वकां स्त्रियम् ॥ ईदृशास्तु नरा भद्रे मम कर्मपरायणाः॥१२॥ ते त्रियोनिं न गच्छन्ति मम गच्छन्ति सुन्दरि ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ १३ ॥ पुरुषाणां प्रसन्नानां यश्च धर्मः सनातनः ॥ मनुनाप्यन्यथा दृष्टो ह्यन्यथांगिरसेन च ॥ १४ ॥ शुक्रेण चान्यथा दृष्टो गौतमेनापि चान्यथा ॥ सोमेन चान्यथा दृष्टो रुद्रेणा

प्यन्यथा पुनः॥१५॥ शङ्खेन चान्यथा दृष्टो लिखितेनापि चान्यथा ॥ कश्यपेनान्यथा दृष्टो धर्मेणाप्यन्यथा धरे ॥१६॥ अग्निना वायुना चैव दृष्टो धर्मोऽन्यथा धरे ॥ यमेन चान्यथा दृष्ट इन्द्रेण वरुणेन च ॥ १७ ॥ कुबेरेणान्यथा दृष्टः शाण्डिल्येनापि चान्यथा ॥ पुलस्त्येनान्यथा दृष्ट आदित्येनापि चान्यथा ॥ १८ ॥ पितृभिश्चान्यथा दृष्टो ह्यन्यथापि स्वयम्भुवा ॥ आत्मनात्मनि धर्मेण ये नरा निश्चितव्रताः ॥ १९ ॥ स्वकं पाळयते धर्मं स्वमतेनैव भाषितम् ॥ परवादं न कुर्वीत सर्वधर्मेषु निश्चितम् ॥ २०॥ न निन्देद्धर्मकार्याणि आत्मधर्मपथे स्थितः ॥ एभिर्गुणैः समायुक्तो मम कर्माणि कारयेत् ॥ २१ ॥ वियोनिं स न गच्छेत मम लोकाय गच्छति ॥ पुनरन्यत्तु वक्ष्यामि तच्छृणुष्वेह माधवि ॥ २२ ॥ तरन्ति पुरुषा येन गर्भसंसारसागरम् ॥ जितेन्द्रिया जितक्रोधा लोभमोहविवर्जिताः ॥ २३ ॥ आत्मोपकारका नित्यं देवातिथिगुरुप्रियाः ॥ हिंसादीनि न कुर्वन्ति मधुमांसाविवर्जकाः ॥ २४ ॥ मनसा ब्राह्मणीं चैव यो गच्छेन्न कदाचन ॥ विप्राय कपिलां दद्याद्रुद्रं सान्त्वेन पाळयेत् ॥ २५ ॥ सर्वेषां चैव पुत्राणां न विशेषं करोति यः ॥ संकुद्धं ब्राह्मणं दृष्ट्वा यस्तु तत्र प्रसादयेत् ॥ २६ ॥ यः स्तूयोत्कपिलां भक्त्या कुमारीं न च दूषयेत् ॥ अग्निं न च क्रमेत्पद्भ्यां न च पुत्रेण भाषयेत् ॥ २७ ॥ जले न मेहयेद्यस्तु गुरुभक्तो न जल्पकः ॥ एवं धर्मेण संयुक्तो यो नु मां प्रतिपद्यते ॥२८॥ स च गर्भं न गच्छते मम लोक स गच्छति ॥ २९ ॥ इति श्रीवराहपुराणे जन्माभावो नामैकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥ अथ कोकामुखमाहात्म्यम् ॥ वराह उवाच ॥ गुह्यानां परमं गुह्यं तच्छृणुष्व वसुन्धरे ॥ तिर्यग्योनिगताश्चापि येन मुच्यन्ति किल्बिषात् ॥ १ ॥ अष्टम्यां च चतुर्दश्यां मैथुनं यो न गच्छति ॥ भुक्त्वा परस्य चान्नानि यश्चैव न विकुप्यति ॥ २ ॥ बाल्ये वयस्यपि च यो मम नित्यमनुव्रतः ॥ येन केनापि संतुष्टो यो मातापितृपूजकः ॥ ३ ॥ आयासे जायति न यः प्रविभागी गुणान्वितः ॥ दाता भोक्ता च कार्येषु स्वतन्त्रो नित्यसंयतः ॥ ४ ॥ विकर्म नाभिकुर्वीत कौमारव्रतसंस्थितः ॥ सर्वभूतदयायुक्तः सत्त्वेन च समन्वितः ॥ ५ ॥ मत्या च निःस्पृहोऽत्यन्तं परार्थेष्वस्पृहः सदा ॥ ईदृग्बुद्धिं समादाय मम लोकाय गच्छति ॥ इमं गुह्यं वरारोहे देवैरपि दुरासदम् ॥ ६ ॥ तच्छृणुष्वानवद्याङ्गि कथ्यमानं मयाऽनघे ॥ जरायुजाण्डजोद्भिज्जस्वेदजानि कदाचन ॥ ७ ॥ ये न हिंसन्ति भूतानि शुद्धदात्मानो दयापराः ॥

॥९५॥

यस्तु कोकामुखे देवि भुवं प्राणान्परित्यजेत् ॥८॥ मनसा न च उत्थेन मम वल्लभतां व्रजेत् ॥ ततो विष्णुवचः श्रुत्वा सा मही संशितव्रता ॥९॥
वराहरूपिणं देवं प्रत्युवाच वसुन्धरा ॥ १० ॥ धरण्युवाच ॥ अहं शिष्या च दासी च भक्ता च त्वयि माधव ॥ ११ ॥ एवं
मे परमं गुह्यं त्वद्भक्त्या वक्तुमर्हसि ॥ चक्रं वाराणसीं चैव अट्टहासं च नैमिषम् ॥ १२ ॥ भद्रकर्णह्रदं चैव हित्वा कोकां
प्रशंससि ॥ नगरं च द्विरण्डं च मुकुट मण्डलेश्वरम् ॥ १३ ॥ केदारं च ततो मुक्ता किं कोकां च प्रशंससि ॥ देवदारुवनं मुक्त्वा
तथा जालेश्वरं विभुम् ॥ १४ ॥ दुर्गं महाबलं मुक्त्वा किं वै कोकां प्रशंससि ॥ गोकर्णं च तता मुक्त्वा शुद्धजालेश्वरं तथा ॥ १५ ॥
एकलिङ्गं ततो मुक्त्वा किं वा कोकां प्रशंससि ॥ एवं पृष्टस्तया भक्तया माधवश्च महाप्रभुः ॥ १६ ॥ वराहरूपी भगवान्प्रत्युवाच
वसुन्धराम् ॥ श्रीवराह उवाच ॥ एवमेतन्महाभागे यन्मां त्वं भीरु भाषसे ॥ १७ ॥ कथयिष्यामि ते गुह्यं कोका येन विशिष्यते ॥
एते रुद्राश्रिताः क्षेत्रा ये त्वया परिकीर्तिताः ॥ १८ ॥ एते पाशुपताश्चैव कोका भागवतस्य ह ॥ तत्रान्यते प्रवक्ष्यामि महाख्यानं
वरानने ॥ १९ ॥ कृतं कोकामुखे चैव मम क्षेत्रे हि सुन्दरि ॥ कश्चिदुञ्छोपिषाहारश्चान्वै कोकमण्डले ॥ २० ॥ तत्रालम्बेन नाम्नेह
युक्ते ह्रदे मत्स्यस्तु तिष्ठति ॥ दृष्ट्वा तं लुञ्चकस्तूर्णं बडिशेनाजहार ह ॥ तस्य हस्तात्तु चञ्चात्मत्स्यस्तूर्णं विनिर्गतः ॥ अथ ध्येनस्तु तं
हर्तुं मन्त्रायित्वा नभश्चरः ॥२१॥ निपत्य तं गृहीत्वैव प्रोड्डीनस्तरसायितः ॥ अशक्तस्य ततो नेतुं मत्स्यः कोकामुखेऽपतत् ॥२२॥ तत्क्षे
त्रस्य प्रभावेण राजपुत्रोऽभवत्प्रभुः ॥ रूपवान् गुणवाञ्छूरः कुळेन वयसान्वितः ॥२३॥ अथ कालेन तस्यैव मृगव्याव्रस्य चाङ्गना॥ गृहीत्वा
चैव मांसानि गच्छन्ती याति तत्र वै ॥२४॥ एका चिल्ली मांसकुञ्चा तद्धस्तान्मांसगर्द्धिनी ॥ आगत्यागत्य तरसा हर्तुं सपुपचक्रमे ॥ २५ ॥
मृगव्याधा बलान्मांसं हृतुकामा तु चिल्लिकाम्॥ बाणेनैकेन संहत्य पातिता भुवि तत्क्षणात्॥२६॥ आकाशात्पातिता भद्रे कोकायां मम सन्निधौ॥
जाता चन्द्रपुरे रम्ये राजपुत्री यशस्विनी॥२७॥ सा व्यवर्द्धत कन्या तु वयोरूपगुणान्विता॥ चतुःषष्टिकलायुक्ता पुरुषं सा जुगुप्सति ॥२८॥
रूपवान्गुणवाञ्छूरो युद्धकार्यार्थनिश्चितः ॥ सौम्यश्च पुरुषश्चैव सा च नेति जुगुप्सति ॥ २९ ॥ रूपवान्गुणवाञ्छूरो युद्धकार्यार्थनिश्चितः ॥

सौम्यं च पुरुषं चैव सर्वानभिजुगुप्सति ॥ ३० ॥ अथ केन चित्कालेन शक्र आनन्दपूरके॥सम्बन्धोजायत तयोर्मध्यमे वयसि स्थयोः ॥ ३१ ॥ तथा तु तौ समासाद्य परस्परमथ क्रमात् ॥ यथान्यायं स तिग्मोर्क्तं विधिदृष्टेन कर्मणा ॥३२॥ स वै तया समं नित्यं सा च तेन समं शुभा ॥ अन्योन्यं रममाणौ तौ सुहृत्तैमपि नोज्झतः॥३३॥गच्छत्येवं बहुतरे काले चैताप्यनिंदिता ॥ समप्रेम्णा च संयुक्ता सौहृदेन च नायकम्॥३४॥ भजमाना विनीता च सौहृदाच्च विशेषतः ॥ एवं बहुगतः कालः कामभोगेषु सक्तयोः॥३५॥राजपुत्रस्ततोऽप्यत्र शक्रानां नंदवर्द्धनः॥तस्या जायत मध्याह्ने शिरोरुगतिपीडिनी॥३६॥ ये केचिद्भिषजस्तत्र गदेषु कुशलाः शुभे॥ ते तत्रौषधयोगं च चक्रुस्तेनापि वेदना ॥३७॥ ननाश नैव संयातः कालो बहुतिथस्ततः॥ न सम्बुध्यति चात्मानं विष्णुमायाविमोहितः॥३८॥पूर्णे हि समये तस्य उभयोश्च तदन्तरम्॥तस्य कालः संवृतस्य योऽसौ पूर्वप्रतिस्तवः ॥३९॥ अयने गत एतेषां वृत्तं कौतूहलं भुवि ॥ अन्योऽन्यप्रीतियुक्तौ तु नान्योऽन्यं जहतुः क्वचित् ॥४०॥ ततः सर्वांनवद्याङ्गी भर्तारमिदमब्रवीत् ॥ किमिदं तव भद्रं ते वेदना जायते शिरे ॥ ४१ ॥ एतद्वाक्यं तत्त्वेन यद्यहं च तव प्रिया ॥ बहवो भिषजश्चैव नानाशास्त्रविशारदाः ॥४२॥ कुर्वन्ति तव कर्माणि वेदना च न गच्छति ॥ एवं स प्रियया प्रोक्तस्तां प्रियां पुनरब्रवीत् ॥४३॥ इदं किं विस्मृता भद्रे सर्वव्याधिसमन्वितम् ॥ यद्भवंधं मानुषत्वं च सुखदुःखसमन्वितम् ॥ ४४.॥ संसारसागरारूढं नातिप्रीतुं त्वमर्हसि ॥ तैनेवं भाषिता बाला श्रोतुकामा वरानना॥४५॥ ततः कदाचिच्छयने सुतौ तौ दम्पती किल॥गते बहुतिथे काले पुनः पप्रच्छ सा प्रियम्॥४६॥कथ यस्व तमेवार्थं यन्मया पूर्वपृच्छितम्॥किं मां न भाषसे नाथ साभिप्रायं वचस्तव॥४७॥गोप्यं वा किंचिदस्तीह किं गोपयसि मे पुरः॥ अवश्यं चैव वक्तव्यं यद्यहं तव वल्लभा॥४८॥इति निर्बन्धतः पृष्टः स शक्राधिपतिर्नृपः॥तां प्रियां प्रणयात्प्राह बहुमानपुरःसरम् ॥४९॥ मुच्यतां मानुषं भावं तां जातिं स्मर पौर्विकीम् ॥ अथ कौतूहलं भद्रे श्रवणे पूर्वजन्मनः ॥५०॥ मन्मातापितरौ गत्वा प्रसादय शुचिस्मिते॥मानार्हौ माननित्वा तौ ययाहं जठरे धृतः॥५१॥ तयोराज्ञां पुरस्कृत्य माननित्वा यथार्हतः ॥ अथ कोकामुखे गत्वा कथयिष्याम्यसंशयम् ॥ ५२ ॥ स्वपूर्वजन्म वृत्तं तु देवानामपि दुर्लभम् ॥ तत्र ते कथयिष्यामि सर्ववृत्तमनिंदिते ॥ ५३ ॥ ततः सा ह्यनवद्याङ्गी श्वश्रूश्वशुरयोः पुरः ॥ गत्वा गृहीत्वा

॥९६॥

चरणौ ततस्ताविदमब्रवीत् ॥५४॥ किंचिद्विज्ञप्तुकामास्मि तत्र वामवधीयताम् ॥ भवद्वाक्षां पुरस्कृत्य भवद्धामनुमानितौ ॥ ५५ ॥ पुण्ये कोकामुखे गन्तुमिच्छावस्तत्र वां गुरू ॥ कार्यगौरवभावेन न निवेद्यौ कथञ्चन ॥ ५६ ॥ अद्य यावत्किमपि वां याचितं न मया क्वचित् ॥ पुरस्ताद्भवावयोस्तन्मे याचितं दातुमर्हतः ॥ ५७ ॥ शिरोवेदनया युक्तः सदा तव सुतो ह्ययम् ॥ मध्याह्ने मृतकल्पो वै जायते ह्याचिकित्सकम् ॥५८॥ सुखानि सर्वविषयान्विसृज्य परिपीडितः ॥ कोकामुखं विना कष्टं न निवृत्तं भविष्यति ॥ ५९ ॥ कदाचिन्नोक्तपूर्वं ते रहस्यं परमं महत् ॥ त्वरितं गन्तुमिच्छामि विष्णोस्तत्परमं पदम् ॥ ६० ॥ दम्पतिभ्यां हि मननं रोचतां सर्वथैव हि ॥ ततो वधूवचः श्रुत्वा शक्रानामधिपो नृपः ॥ ६१ ॥ करेण स्वयमादाय वधूं पुत्रमुवाच ह ॥ किमिदं चिन्तितं वत्स कोकामुखगमं प्रति ॥ ६२ ॥ हस्त्यश्वरथयानानि स्त्रियश्चाप्सरसोपमाः ॥ सर्वमेतत्तु सप्ताङ्गं कोशकोष्ठादिसंयुतम् ॥६३॥ शरणं वित्तयो राज्यं त्वयि सर्वं प्रतिष्ठितम् ॥ मित्रं वरासनं चैव गृह्णीष्व सुतसत्तम ॥६४॥ त्वयि प्रतिष्ठिताः प्राणाः सन्तानं च तदुत्तरम् ॥ ततः पितुर्वचः श्रुत्वा राजपुत्रो यशस्विनि ॥ ६५ ॥ पितुः पादौ गृहीत्वा च प्रोवाच विनयान्वितः ॥ अलं राज्येन कोशेन वाहनेन बलेन वा ॥ ६६ ॥ गन्तुमिच्छामि तत्राहं तूर्णं कोकामुखं महत् ॥ शिरोवेदनया युक्तो यदि जीवाम्यहं पितः ॥ ६७ ॥ तदा राज्यं बलं कोशो ममैवैतन्न संशयः ॥ तत्रैव गमनान्मह्यं वेदना नाशमेष्यति ॥६८॥ पुत्रोक्तमवधार्यैवं शक्रानामधिपो नृपः ॥ अनुजज्ञे ततः कोकां गच्छ पुत्र नमोऽस्तु ते ॥ ६९ ॥ वणिजश्चैव पौराश्च वैश्याश्चापि वराङ्गनाः ॥ अनुजग्मू राजपुत्रं कोकामुखपथे स्थितम् ॥ ७० ॥अथ दीर्घेण कालेन प्राप्तः कोकामुखं त्विदम् ॥ तत्र गत्वा वरारोहा भर्त्तारमिदमब्रवीत् ॥७१॥ पूर्वंपृष्टं मया यत्ते वक्ष्यामीति च मां प्रति ॥ कोकामुखे त्वयाप्युक्तं तदेतन्मम कथ्यताम् ॥ ७२ ॥ निशम्येति प्रियाप्रोक्तं राजपुत्रो यशस्विनि ॥ प्रहस्याह प्रियां तां तु समाश्लिङ्ग्य वसुन्धरे ॥ ७३ ॥ रजनी सम्प्रवृत्तेयं सुखं स्वापो विधीयताम् ॥ श्वः सर्वं कथयिष्यामि यत्ते मनसि वर्त्तते॥७४॥प्रभातायां तु शर्वर्यां स्नातो क्षौमविभूषितौ॥प्रणम्य शिरसा विष्णुं हस्ते गृह्य ततः प्रियाम् ॥७५॥ ततः पूर्वोत्तरे पार्श्वे नित्यं यो ह्रदि तिष्ठति ॥ अस्थीनि दर्शयामास अवशिष्टानि यानि तु॥७६॥ एतानि मम चास्थीनि पूर्वदेहेऽद्भवानि च ॥

अहं पुराभवं मत्स्यः कोकेषु विचरन् जले ॥७७॥ व्याधेन निगृहीतोऽस्मि बडिशेन जलेचरः॥तद्वस्तान्निर्गतस्तत्र बडेन पतितो भुवि॥७८॥
इत्येनेनामिषलुब्धेन नखैर्विद्धोऽस्मि सुन्दरि ॥ नीत आकाशमार्गेण तस्माच्च पतितोऽत्र वै ॥ ७९ ॥ तेन तस्य प्रहारेण जाता शिरसि वेदना ॥
अहमेव विजानामि नान्यो जानाति मां विना॥८०॥ एतत्ते कथितं भद्रे पूर्वरूपं च यत्तया ॥ गच्छ सुन्दरि भद्रं ते यत्र ते वर्त्तते मनः ॥८१॥
ततः साप्यवद्याद्गी रक्तपद्मसुभानना ॥ करुणं स्वरमादाय भर्त्तारं पुनरब्रवीत् ॥ ८२ ॥ एतदर्थं मया भद्र गुह्यं नोक्तं तथा स्वकम् ॥
अहं च यादृशी पूर्वमभवं तच्छृणुष्व मे॥८३॥क्षुत्पिपासापरिश्रान्ता चिल्ली गगनगामिनी॥ वृक्षोपरि समासीना भक्षयं चैव विचिन्वती ॥८४॥
अथ कञ्चिन्नृगश्चाधो हत्वा वनचरान्बहून् ॥संगृह्य मांसभारान्वै तेन मार्गेण सङ्गतः॥८५॥स्थापयित्वा मांसभारान् प्रियायाः सन्निधे स्वयम् ॥
काष्ठान्यानयितुं यातः क्षुधितो मांसवाञ्छने ॥८६॥ प्रवृत्तोऽग्निमुपादाय तावदुड्डीय सत्वरम्॥मांसपिण्डो मया विद्धो दर्वेऽत्रवयेनखैः ॥८७॥
न च सक्तास्मि संहर्त्तुं मांसभारप्रपीडिता ॥ अशक्ता दूरगमने सन्निधे हि व्यवस्थिता ॥ ८८ ॥ भक्षयित्वा ततो मांसं व्याधः संलक्ष्यमानसः ॥
अपश्यन्मांसपिण्डं तु मृगयामास पार्श्वतः ॥८९॥तावद्ददर्श मां तत्र खादन्तीं मांसपिण्डकाम्॥ततः स धनुरुद्यम्य सशरं च व्यकर्षत॥९०॥
विद्धा बाणेन मां तत्र भक्षयन्तीमपातयत् ॥ ततोऽहं भ्रममाणा वै निश्चेष्टा गतजीविता ॥९१॥ पतितास्म्यवशा भद्र काऊतन्त्रे दुरासदे ॥ एत
क्षेत्रप्रभावेण त्वत्कामापि नृपात्मजा॥९२॥जातास्मि त्वद्विया चापि स्मरन्ती पूर्वजन्म तत्॥एतानि पश्य चास्थानि शेषाणि बहुकालतः॥९३॥
गलितान्यल्पशेषाणि प्राणनाथ समीपतः ॥ एवं सा दर्शयित्वा तु भर्त्तारं पुनरब्रवीत् ॥९४ ॥ आनीतोऽसि मया भद्र स्थानं कोकामुखं प्रति॥
एतत्क्षेत्रप्रभावेण तिर्यग्योनिगता अपि॥९५॥ उत्तमे तु कुले जाता मानुषीं जातिमाश्रिताः ॥ यं यं प्रपश्यते धर्मं विष्णुप्रोक्तं यशोधन॥९६॥
तं तमेव करिष्यामि विष्णुलोके सुखावहम् ॥ ततस्तस्या वचः श्रुत्वा लब्धपूर्वस्मृतिर्नृपः ॥ ९७ ॥ विस्मयं परमं गत्वा साधु साध्वित्यपूजयत् ॥ तास्मिन् क्षेत्रे च यत्कर्म कर्त्तव्यं धर्मसंहितम्॥९८॥तच्छ्रुत्वा कानिचिद्दत्वा स्वयं चक्रे पतिव्रता॥ अन्येऽपि सर्वे तच्छ्रुत्वा यस्य यद्रो
चते हृदि ॥ ९९ ॥ तत्तत्सर्वेऽपि कुर्वीति विधिदृष्टेन कर्मणा ॥ तत्र तौ दम्पती द्रव्यमन्नं रत्नं द्विजेषु च ॥ १०० ॥ ददतुः परमप्रीत्या

पात्रेभ्यश्च यथार्हतः ॥ येऽन्ये तत्तार्थमासाद्य यातास्तेऽपि वसुन्धरे ॥ १०१ ॥ ब्राह्मणेभ्यो ददुः स्वानि विष्णुभक्त्या यतव्रताः ॥ तत्र स्थित्वा वराराहे मम कर्मव्यवस्थिताः ॥ १०२ ॥ तत्क्षेत्रस्य प्रभावेण श्वेतद्वीपमुपागताः ॥ एवं स राजपुत्रोऽपि मम कर्मव्यवस्थितः ॥ १०३ ॥ मुक्त्वा तु मानुषं भावं श्वेतद्वीपमुपागतः ॥ सर्वे च पुरुषास्तत्र आत्मनात्मानुदर्शनात् ॥१०४ ॥ (शुक्लाम्बरधरा दिव्यभूषणैश्च विभूषिताः ॥ दीप्तिमन्तो महाकायाः सर्वे च शुभदर्शनाः ॥ १०५ ॥ स्त्रियोऽपि दिव्या यत्रत्या दिव्यभूषणभूषिताः ॥ तेजसा दीप्तिमत्यश्च शुद्धसत्त्व विभूषिताः ॥ १०६ ॥ मयि शुद्धं परं भावमारूढाः सत्यवच्चसः ॥ एतत्ते कथितं देवि लोकामुखमनुत्तमम् ॥ १०७॥ यत्र मत्स्यश्च चिल्ली च सकामा ये समागताः ॥ केचिद्वाद्रायणं कुर्युः केचिच्चैव जलाशनम्॥१०८॥ ते च विष्णुमयान्धर्मांद्विजस्तांस्तान्तसमाचरेत्॥ बहुधान्यवरं रम्यं दंपत्योऽथ यशस्विनी ॥ १०९ ॥ तेऽपि कुर्वन्ति कर्माणि मम भक्ता व्यवस्थिताः ॥ तेऽपि दीर्घेण कालेन अटमाना इतस्ततः ॥ ११० ॥ कुर्वन्तो मम कर्माणि भाव्यं पंचत्वमागताः ॥ ततः क्षेत्रप्रभावेण मम कर्मप्रभावतः ॥ १११ ॥ मम चैव प्रसादेन श्वेतद्वीपमुपागतः ॥ एवं स राजपुत्रोऽथ सर्वभूतगुणान्वितः ॥११२ ॥ भुक्त्वा तु मानुषं भावमूर्द्धशाखोनुतिष्ठति ॥ योऽसौ परिजनस्तस्य मम कर्मव्यवस्थितः ॥११३ ॥ मानुषं भावमुत्सृज्य मम लोकमुपागतः ॥ सर्वशो द्युतिमांस्तत्र आत्मनानात्मदर्शनात् ॥ ११४ ॥) याश्च तत्र स्त्रियः काश्चित्सर्वाश्चोत्पल गन्धिनीः ॥ मायया मतिमन्मुक्ताः सर्वाश्चैव प्रियावृताः ॥ ११५ ॥ प्रसादान्मम सुश्रोणि श्वेतद्वीपमुपागताः॥एष धर्मश्च कीर्तिश्च शक्तिश्चैव मह द्यशः ॥ ११६ ॥ कर्मणां परमं कर्म तपसां च महत्तपः ॥ आख्यानानां च परमं कृतीनां परमा कृतिः ॥ ११७ ॥ धर्माणां च परो धर्मस्तवार्थे कीर्तितो मया ॥ क्रोधनाय न तं दद्यान्मूर्खाय पिशुनाय च ॥ ११८ ॥ अभक्ताय न तं दद्याद्श्रद्धाय शठाय च ॥ दीक्षितायैव दातव्यं सुप्रप ज्ञाय नित्यशः ॥ ११९ ॥ पण्डिताय च दातव्यं यश्च शास्त्रविशारदः ॥ एतन्मरणकालेऽपि धारयेद्यः समाहितः ॥ १२० ॥ सोऽपि मुच्येत पूतात्मा गर्भोद्योनिभवाद्भयात् ॥ एतत्ते कथितं भद्रे महात्म्यानं महौजसम् ॥ १२१ ॥ य एतेन विधानेन गत्वा लोकामुखं महत् ॥ तेऽपि यान्ति परां सिद्धिं चिल्लीमत्स्यौ यथापुरा ॥ १२२ ॥ इति श्रीवराहपुराणे लोकामुखमाहात्म्ये द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

अथ सुमनोगन्धादिमाहात्म्यम् ॥ सूत उवाच ॥ श्रुत्वा तु कोकामाहात्म्यं पृथिवी धर्मसंहितम् ॥ विस्मयं परमं याता श्रुत्वा धर्मं महौज
सम् ॥ १ ॥ धरण्युवाच ॥ अहो प्रभावः कोकाया माहात्म्यं क्रोडरूपिणः ॥ तिर्यग्योनिगतो वापि प्राप्तो यत्परमां गतिम् ॥ २ ॥ तव देव
प्रसादेन किंचिदिच्छामि वेदितुम् ॥ यन्मया पूर्वपृष्टोऽसि केन धर्मेण मानवाः ॥ ३ ॥ तपसा कर्मणा वापि पश्यन्ति त्वां हि माधव ॥
प्रसादसुमुखो भूत्वा निखिलं वक्तुमर्हसि ॥ ४ ॥ एवं पृष्टस्तदा देव्या माधव्या स तु माधवः ॥ प्रहस्य पुनरेवेदं वक्तुं समुपचक्रमे ॥ ५ ॥ श्रीव
राह उवाच ॥ एवमेतन्महाभागे यथा त्वं भीरु भाषसे ॥ कथयिष्यामि ते धर्मं गुह्यं संसारमोक्षणम् ॥ ६ ॥ गते मेघागमे काले प्रसन्नशर
दाशये ॥ अम्बरे विमले जाते विमले शशिमण्डले ॥७॥ नातिशीते न चात्युष्णे काले हंसविरावीणि ॥ कुमुदोत्पलकह्लारपद्मसौरभनिर्भरे॥८॥
कुमुदस्य च मासस्य भवेद्या द्वादशी शुभा ॥ तस्यां मामर्चयेद्यस्तु तत्प्रभावं शृणुष्व मे ॥ ९ ॥ यावल्लोकाश्च धार्यन्ते तावत्कालं वसुन्धरे ॥
मद्भक्तो जायते धन्यो नान्यभक्तः कदाचन ॥ १० ॥ कृत्वा ममैव कार्याणि द्वादश्यां तत्र माधवि॥ममैवाराधनार्थाय इमं मन्त्रमुदीरयेत् ॥११॥
मन्त्रः–ब्रह्मणा च रुद्रेण यः स्तूयमाना भवानुषिवन्दितो वन्दनथिश्च प्राप्ता द्वादशीयं ते प्रबुध्यस्व जागृष्व मेघा गताः पूर्णश्चन्द्रः शारदानि पुष्पाणि
लोकनाथ तुभ्यमहं ददानीति धर्महेतोस्तव प्रीतये प्रबुद्धं जाग्रतं लोकनाथ त्वां भजमाना यज्ञेन यजन्ते सत्रेण सत्रिणो वेदैः पठन्ति भगवन्तः
शुद्धाः प्रबुद्धा जाग्रतो लोकनाथ॥१२॥एवं कर्माणि कुर्वन्ति द्वादश्यां वै यशस्विनि॥मम भक्ता व्रतं श्रेष्ठं ते यान्ति परमां गतिम्॥१३॥एवं वै
शारदं कर्म निखिलं कथितं मया ॥ देवि संसारमोक्षार्थं मम भक्तसुखावहम् ॥ १४ ॥ इति प्रबोधिनीकर्म ॥ अन्यच्च ते प्रवक्ष्यामि शैशिरं
कर्म शोभनम् ॥ यानि कर्माणि कुर्वन्ति पुंसो यान्ति परां गतिम् ॥ १५ ॥ शीतवाताभिसन्तप्ता मम भक्त्या व्यवस्थिताः ॥ अनन्यमनसो
भूत्वा योगाय कृतनिश्चयाः ॥ १६ ॥ शिशिरे यानि कर्माणि पुष्पिताश्च वनस्पतीः ॥ तैरेव चार्चनं कृत्वा जानुभ्यां पतितः क्षितौ ॥ १७ ॥
कराभ्यामञ्जलिं कृत्वा इमं मन्त्रमुदीरयेत् ॥१८ ॥ मन्त्रः–शिशिरो भवान् घातरिमं लोकनाथ हिमं दुस्तरं दुष्प्रवेशं कालं संसारान्मां तारयेमं
धर्त्ता त्रिलोकनाथ ॥ १९ ॥ यस्त्वर्थेतेन मन्त्रेण शिशिरे कर्म कारयेत् ॥ स गच्छेत्परमां सिद्धिं मम भक्त्या व्यवस्थितः ॥ २० ॥ अन्यच्च

ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ मासं मार्गशिरं चैव वैशाखं च मम प्रियम् ॥ २१॥ अहं तत्र प्रवक्ष्यामि पुष्पादीनां च यत्फलम् ॥ नववर्ष सहस्राणि नववर्षशतानि च ॥ २२ ॥ तिष्ठते विष्णुलोकेऽस्मिन्यो ददाति स्म निश्चलम् ॥ एकैकं गन्धपत्रं च दानमेतन्महत्फलम् ॥ २३ ॥ मतिमान्धृतिमान्भूत्वा गन्धपुष्पाणि दापयेत् ॥ पुनरन्यत्प्रवक्ष्यामि गन्धपत्रस्य यत्फलम् ॥२४ ॥ द्वादश्यां चैव यो दद्यात्रीन्मासांश्च समाहितः ॥ कौमुद्यस्य तु मासस्य मार्गशीर्षस्य वै तथा ॥ २५ ॥ वैशाखस्य तु मासस्य वनमालां सुपुष्पिताम् ॥ एकचित्तं समाधाय गन्धपुष्पाणि यो न्यसेत् ॥ २६ ॥ वर्षाणि द्वादशैवेह तेन पूजा कृता भवेत् ॥ शालपुष्पेण मिश्रेण कौमुद्यां गन्धकेन च॥२७॥ माति मार्गशिरे भद्रे दद्यादुत्पल मिश्रितम् ॥ एवं महत्फलं भद्रे गन्धपत्रस्य च स्मृतम् ॥ २८ ॥ श्रुत्वेति वचनं तस्य प्रश्रयेण तु माधवि ॥ प्रहस्य प्रणयाद्वाक्यमित्युवाच वसुन्धरा ॥ २९ ॥ प्रभो द्वादश मासाश्च षष्टयुत्तरशतत्रयम् ॥ तत्र द्वावेव किं मह्यं भगवन् किं प्रशंसति ॥ ३० ॥ द्वादशीं चापि देवेश प्रशंसति सदा मम ॥ इति पृष्टस्तदा देव्या धरण्या स तु माधवः ॥ ३१ ॥ प्रहस्य तामुवाचेदं वचनं धर्मसंश्रितम् ॥ शृणु तत्त्वेन मे देवि येनमो मम च प्रियो ॥ ३२ ॥ तिथीनां द्वादशी चापि सर्वयज्ञफलाधिका ॥ त्वया द्विजसहस्रेभ्यो यत्फलं प्राप्युयान्नरः ॥ ३३ ॥ तदेकं संप्रदा येव द्वादश्यामभिविन्दति ॥ कौमुद्यां च प्रबुद्धोऽस्मि वैशाख्यां च समुद्गतः ॥ ३४ ॥ महानाधिहरो योगस्तेनैतत्प्रभवो घरे ॥ अतः कौमु दिकायां तु वैशाख्यां यतमानसः ॥ ३५ ॥ गन्धपत्रं करे गृह्य इमं मन्त्रमुदीरयेत् ॥ मन्त्रः–भगवन्नाज्ञापय । इमं बहुतरं नित्यं वैशाखं चैव कार्तिकम् ॥ ३६ ॥ गृहाण गन्धपत्राणि धर्ममेवं प्रवर्द्धय ॥ नमो नारायणेत्युक्त्वा गन्धपत्रं प्रदापयेत् ॥ ३७ ॥ पुष्पाणां च प्रवक्ष्यामि यो गुणो यच्च वै फलम् ॥ दत्त्वा वै गन्धपत्राणि पुष्पहस्तः शुचिर्नरः ॥ ॐ नमो वासुदेवायेत्युक्त्वा मन्त्रमुदीरयेत् ॥ ३८ ॥ मन्त्रः– भगवन्नाज्ञापय सुमनांसीमानि अर्चयितुं मां सुमनसङ्कुरु गृह्णीष्व सुमनस्कं देव सुगन्धेन ते नमः ॥ ३९ ॥ प्राप्नोति ददमानस्तु मम कर्म परायणः ॥ न जन्ममरणं चैव न ग्लानिं न च वै क्षुधाम् ॥ ४०॥ दिव्यं वर्षसहस्रं वै मम लोकेषु तिष्ठति ॥ एकैकस्य तु पुष्पस्य पुण्यमेतन्महा फलम् ॥ ४१ ॥ सुमनो गन्धसम्भूतं यत्त्वया पूर्वपृच्छितम् ॥ ४२ ॥ इति श्रीवराहपुराणे सुमनोगन्धाभिगाम्यं नाम त्रयोविंशत्याधिक

शततमोऽन्यायः ॥ १२३ ॥ अथ ऋतूपस्करम् ॥ श्रीवराह उवाच ॥ फाल्गुनस्य तु मासस्य शुक्लपक्षस्य द्वादशीम् ॥ गृह्य वासन्तिकान् पुष्पान्सुगन्धा ये क्रमागताः ॥ १ ॥ इत्येतं पाण्डुरकं चैव सुगन्धं शोभनं बहु ॥ विधिना मन्त्रयुक्तेन सुप्रीतेनान्तरात्मना ॥ २ ॥ तत एवं विधिं कृत्वा सर्वं भागवतं शुचिः ॥ यस्तु जानाति कर्माणि सर्वं मन्त्रविनिश्चितः ॥ ३ ॥ तदाऽऽरति कर्माणि विविधेन कर्मणा ॥ विधिना मन्त्रपूतेन कुर्याच्छान्तमनोऽमलः ॥ ४॥ नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ मन्त्रः—ओं नमोस्तु देवदेवेश शङ्खचक्रगदाधर नमोऽस्तु ते लोक नाथ प्रवीराय नमोऽस्तु ते ॥ ५ ॥ संपुष्पितस्त्वेह वसन्तकाले वनस्पतेगन्धिरसप्रयुक्ताः ॥ पश्यंश्च मां पुष्पितपादपेन्द्रं वसन्तकाले समुपागते च ॥ ६ ॥ यश्चैतेन विधानेन कुर्यान्मासे तु फाल्गुने ॥ न स गच्छति संसारं मम लोकाय गच्छति ॥ ७॥ यत्तु पृच्छसि सुश्रोणि मासे वैशाख उत्तमे ॥ शुक्लपक्षे तु द्वादश्यां यत्फलं तच्छृणुष्व मे ॥ ८ ॥ पुष्पितेषु च शालेषु तथान्येषु द्रुमेषु च ॥ गृहीत्वा शालपुष्पाणि मम कर्मणि संस्थिताः ॥ ९ ॥ कृत्वा तु मम कर्माणि शुभानि तरुणानि च ॥ पूज्य भागवतान्सर्वान् स्थापयित्वा ततोऽग्रतः ॥ १० ॥ ऋषयः स्तुवन्ति मन्त्रेण वेदोक्तेन च माधवि ॥ गन्धर्वाप्सरसश्चैव गीतनृत्यैः सवादितैः ॥ ११ ॥ स्तुवन्ति देवलोकाश्च पुराणं पुरुषोत्तमम् ॥ सिद्धविद्याधरा यक्षाः पिशाचोरगराक्षसाः ॥ १२ ॥ स्तुवन्ति देवं भूतानां सर्वलोकस्य चेश्वरम् ॥ आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ॥ १३ ॥ स्तुवन्ति देवदेवेशं युगानां संक्षयेऽक्षयम् ॥ ततो वायुश्च विश्वे च अश्विनौ च समन्विताः ॥ १४ ॥ स्तुवन्ति केशवं देवमादिकालमथं प्रभुम् ॥ ततो ब्रह्मा च सोमश्च शक्रश्चाग्निसमन्वितः ॥ स्तुवन्ति नाथं भूतानां सर्वलोकमहेश्वरम् ॥१५॥ नारदः पर्वतश्चैव असितो देवलस्तथा ॥ पुलहश्च पुलस्त्यश्च भृगुश्चाङ्गिर एव च ॥१६॥ एते चान्ये च बहवो मित्रावसुपरावसू ॥ स्तुवन्ति नाथं भूतानां योगिनां योगमुत्तमम् ॥ १७ ॥ श्रुत्वा तु प्रतिनिर्घोषं देवानां तु महौजसाम् ॥ ततो नारायणो देवः प्रत्युवाच वसुन्धराम् ॥ १८॥ किमयं श्रूयते शब्दो ब्रह्मघोषेण संयुतः ॥ देवानां च महाभागे महाशब्दोऽत्र श्रूयते ॥ १९ ॥ ततः कमलपत्राक्षी सर्वरूपगुणान्विता ॥ वराहरूपिणं देवं प्रत्युवाच वसुन्धरा ॥ २० ॥ देवाः कांक्षन्ति ते देव वाराहीं रूपसंस्थितिम् ॥ त्वन्नियोगनियुक्ताश्च तदर्थं लोकभावन ॥२१॥ ततो नारायणो देवः पृथिवीं प्रत्युवाच ह॥अहं जानामि

तान्देवि मार्गामणानुपस्थितान् ॥२२॥ दिव्यं वर्षसहस्रं वै धारितासि वसुन्धरे ॥ मया लीलायमानेन एकदंष्ट्राग्रकेण वै ॥ २३ ॥ इहागच्छामि भद्रं ते द्रष्टुकामा दिवौकसः ॥ आदित्या वसवो रुद्राः स्कन्देन्द्रो सपितामहाः ॥२४॥ एवं तस्य वचः श्रुत्वा माधवस्य वसुन्धरा॥ शिरस्यञ्जलिं माधाय ततस्तु चरणेऽपतत् ॥२५॥ वाराहं पुरुषं देवं विज्ञापयति सा धरा ॥ उद्धृतास्मि त्वया देव रसातलगता ह्यहम् ॥ २६ ॥ शरणं त्वां प्रपन्नाहं त्वद्भक्ता त्वंगतिः प्रभुः ॥ किं कर्म कर्मणा केन किं वा जन्मपरायणम् ॥२७॥ कथं वा तुष्यते देव पूज्यसे केन कर्मणा ॥ तवाहं कर्तुमिच्छामि यच्च सुख्यं सुखावहम् ॥२८॥ न च मेऽस्ति व्यथा काचित्तव कर्मणि नित्यशः ॥ न ग्लानिर्न जरा काचिन्न जन्ममरणे तथा॥२९॥ सर्वे सुरासुरा लोकाः सरुद्रेन्द्रपितामहाः ॥ केटं निवासं कुर्वन्ति एकैकं च यशोधर ॥३०॥ कानि कर्माणि कुर्वन्ति ये त्वां पश्यन्ति माधव ॥ किमाहाराः किमाचारास्त्वां पश्यन्तीह माधव ॥ ३१ ॥ ब्राह्मणस्य च किं कर्म क्षत्रियस्य च किं भवेत् ॥ वैश्यः किं कुरुते कर्म शूद्रः किं कर्म कारयेत् ॥३२॥ योगो वै प्राप्यते केन तपो वा केन निश्चितम् ॥ किं चात्र फलमाप्नोति तव कर्मपरायणः॥३३॥ किं च दुःखनिवासं वा भोजनं पानकं तथा ॥ किंच कर्म प्रयोक्तव्यं तव भक्तैश्च माधव॥३४॥प्रापणं कीदृशं चापि कासु दिक्षु तथा प्रभो ॥ कथं योनिं न गच्छेत त्रियोनिं न च गच्छति ॥३५॥ तिर्यग्योनिं न गच्छेत कर्मणा केन केशव ॥ तन्ममाचक्ष्व सकलं येन चैव सुखं भवेत् ॥ ३६ ॥ जरा वा केन गच्छेत जन्म वा केन गच्छति ॥ गर्भवासं न गच्छेत कर्मणा केन वाच्युत ॥३७॥ संसारस्थ न गच्छेत केन कर्मप्रभावतः ॥ इत्युक्तो भगवां स्तत्र प्रत्युवाच वसुन्धराम् ॥३८॥ शृण्वन्तु मे भागवता ये च मोक्षे व्यवस्थिताः ॥ तान्मन्त्रान्कर्तिर्यिष्यामि यैस्तोषं याति नित्यशः ॥३९॥ मन्त्रः—मासेषु सर्वेषु च मुख्यभूतस्त्वं माधवो माधवमास एव ॥ पश्येद्देवं तं तु वसन्तकाले उपागतं गन्धरसप्रयुक्तया॥नित्यं च यज्ञेषु तथेज्यते यो नारायणः सकलोकेषु वीरः ॥४०॥ एवं ग्रीष्मे विधिं चैव कुर्यात्सर्वं ममोक्तितः॥इमयुच्चारयेन्मन्त्रं सर्वभागवतप्रियम्॥४१॥ मासेषु सर्वेष्वपि मुख्यभूतो मासो भवान्ग्रीष्म एकः प्रपन्नः ॥ पश्येद्भवन्तं वर्त्तमानं च ग्रीष्मे तेनैव सर्वं दुःखमेतु प्रशान्तिम् ॥४२॥ एवं ग्रीष्मे वरारोहे मम चैवार्चनं कुरु ॥ न जन्ममरणं येन मम लोके गतिर्भवेत् ॥ ४३ ॥ यावन्तः पुष्पिताः शाखाः पृथ्व्यां यावत्सुगंधकाः ॥ अर्चितैः स भवेत्तैर्वैः

कृतो येन ह्ययं विधिः॥४४॥एवं वर्षास्वपि धरे मम कर्म च कारयेत् ॥ निष्फला भवतो बुद्धिः संसारे च न जायते ॥४५॥ अन्यच्च ते प्रवक्ष्यामि कर्म संसारमोक्षणम् ॥ कदम्बमुकुलाश्चैव सरलार्जुनपादपाः ॥ ४६ ॥ एतेषां सुमनोभिश्च पूजनीयो महादरात् ॥ मम संस्थापनं कृत्वा विधिदृष्टेन कर्मणा ॥ नमो नारायणायेति इमं मन्त्रमुदाहरेत् ॥ ४७ ॥ पश्यन्ति ये ध्यानपरा घनाभं त्वामाश्रिताः पूज्यमानं महिम्ना ॥ निद्रां भवान् भजतां लोकनाथ वर्षास्विमं पश्यतु मेघवर्णम्॥४८॥आषाढमासे द्वादश्यां सर्वशान्तिकरं शुभम्॥ य एतेन विधानेन मम कर्म तु कारयेत् ॥४९॥ स मर्त्यो न प्रणश्येत संसारेऽस्मिन् युगेयुगे ॥ एतत्ते कथितं देवि ऋतूनां कर्म चोत्तमम् ॥५०॥ तरंति येन संसारं नराः कर्मपरायणाः ॥ एतद्गुह्यं महाभागे देवाः केऽपि न जानते ॥५१॥मुक्त्वा नारायणं देवं वाराहं रूपमास्थितम् ॥ नादीक्षिताय दातव्यं सूर्यायं पितृनाथ च ॥५२॥ कुशिष्याय न दातव्यं ये च शास्त्रार्थदूषकाः ॥ न पठेद्ब्राह्मणध्ये वै न पठेच्छठमध्यतः ॥ ५३ ॥ धनधर्मक्षयस्तेषां पठनादाशु जायते ॥ पठेद्भागवतानां च ये च धर्मेण दीक्षिताः ॥ ५४ ॥ एतत्ते कथितं भद्रे पूर्वं यत्पृष्टवत्यसि ॥ कात्स्न्यैन कथितं ह्येतत्किमन्यत्परिपृच्छसि ॥५५॥ इति श्रीवराहपुराणे भगवच्छास्त्रे ऋतूपस्करणं नाम चतुर्विंशत्यधिकशततमोऽध्यायः ॥१२४॥अथ मायाचक्रम् ॥ सूत उवाच ॥ श्रुत्वा पद्मतुकर्माणि पृथिवी संशितव्रता ॥ ततो नारायणं भूयः प्रत्युवाच वसुन्धरा ॥ १ ॥ मङ्गल्याश्च पवित्राश्च ये त्वया समुदाहृताः ॥ मम लोकेषु विख्याता मनः प्रह्लादयन्ति ते ॥२॥ श्रुत्वा त्वेतानि कर्माणि त्वन्मुखोक्तानि माधव ॥ जातास्मि निर्मला देव शशाङ्क इव शारदः॥३॥ एतन्मे परमं गुह्यं परं कौतूहलं तथा ॥ मम चैव हितार्थाय त्वं विष्णो वक्तुमर्हसि ॥४॥ यामेनां भाषसे देव मम मायेति नित्यशः ॥ का माया कीदृशी विष्णो किं वा मायेति चोच्यते ॥५॥ ज्ञातुमिच्छामि मायार्थं रहस्यं परमुत्तमम् ॥ ततस्तस्य वचः श्रुत्वा विष्णुर्मायाकरण्डकः॥६॥ प्रत्युवाच तदा वाक्यं प्रहस्य तु वसुन्धराम् ॥ भूमे मा पृच्छ मायां मे यन्मां पृच्छसि सादरम् ॥ ७ ॥ वृथा क्लेशं किमर्थं त्वं प्राप्स्यसे यद्विलोकनात् ॥ अद्यापि मां न जानन्ति रुद्रेन्द्राः सपितामहाः॥८॥मम मायां विशालाक्षि किं पुनस्त्वं वसुन्धरे॥पर्जन्यो वर्षते यत्र तज्जलेन प्रपूर्यते ॥९॥ देशो निर्जलतां याति एषा माया मम प्रिये॥सोमो यत्क्षीयते पक्षे पक्षे वापि च वर्द्धते ॥ १० ॥ अमायां न स दृश्येत मायेयं मम तत्त्वतः॥हेमन्ते

॥१००॥

सलिलं कूपे उष्णं भवति सुन्दरि॥ ११॥ भवेच्च शीतलं ग्रीष्मे मायेयं मम तत्त्वतः॥ पश्चिमां दिशमास्थाय यदस्तं याति भास्करः ॥ १२॥ उदेति पूर्वतः प्रातर्मायेयं मम सुन्दरि॥ शोणितं चैव शुक्रं च उभे च प्राणिसंस्थिते ॥ १३ ॥ गर्भे च जायते जन्तुर्मायेयं मम सुन्दरि॥ जीवः प्रविश्य गर्भं तु सुखदुःखे च विन्दति॥ १४॥ जातश्च विस्मरेत्सर्वमेषा माया ममोत्तमा ॥ आत्मकर्माश्रितो जीवो नष्टसंज्ञो गतस्पृहः॥ १५॥ कर्मणा नयितेऽन्यत्र मायेषा मम चोत्तमा ॥ शुक्रशोणितसंयोगाज्जायते मम जन्तवः॥ १६॥ अङ्गुल्यश्चरणौ चैव भुजौ शीर्षं कटिस्तथा ॥ पृष्ठं तथोदरं चैव दन्तोष्ठपुट नासिकम्॥ १७॥ कर्णौ नेत्रे कपोलौ च ललाटं जिह्वया सह॥ एतया मायया युक्ता जायन्ते यदि जन्तवः ॥ १८ ॥ तस्यैव जीर्यते भुक्तमग्निना पीतमेव च॥ अधश्च स्रवते जन्तुरेषा माया ममोत्तमा॥ १९॥ शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पंचमः॥ अन्नात्प्रवर्त्तते जन्तुरेषा माया मम प्रिया॥ २०॥ सर्वत्रैषु निजाकारः स्थावरं जङ्गमं तथा ॥ तत्त्वं न ज्ञायते तस्य मायेषा मम सुन्दरि ॥ २१ ॥ आपो दिव्यास्तथा भौमा आपो येषु प्रतिष्ठिताः ॥ नद्यो वृद्धिं प्रयान्त्यत्र मायेषा मम सुन्दरि ॥ २२ ॥ वृष्टो बहूदकाः सर्वे पल्वलानि सरांसि च ॥ ग्रीष्मे सर्वाणि शुष्यन्ति एतन्मायाबलं मम ॥ २३ ॥ हिमवच्छिखरान्मुक्ता नाम्ना मन्दाकिनी नदी ॥ गां गता सा भवेद्भद्रा मायेषा मम कीर्त्तिता ॥ २४ ॥ मेघा वहन्ति सलिलमुद्धृत्य लवणार्णवात् ॥ वर्षन्ति मधुरं लोके एतन्मायाबलं मम ॥ २५ ॥ रोगार्त्ता जन्तवः केचिद्भक्षयन्ति महौषधम् ॥ तस्य वीर्यं समाश्रित्य मायां तु विसृजाम्यहम् ॥२६॥ औषधे दीयमानेऽपि जन्तुः पंचत्वमेति यत् ॥ निर्वीर्यमौषधं कृत्वा कालो भूत्वा हराम्यहम् ॥ २७ ॥ प्रथमं जायते गर्भः पश्चात्संजायते पुमान् ॥ जायते मध्यमं रूपं ततोऽपि जरया युतः॥२८॥ तत इन्द्रियनाशश्च एतन्मायाबलं मम ॥ यद्भूमौ निहितं बीजं तस्मात्तज्जायतेऽङ्कुरम् ॥ २९ ॥ पुनश्च पत्रादियुतमेतन्मायाबलं मम ॥ एकबीजात्प्रकीर्णाद्धे जायन्ते तानि भूरिशः ॥ ३० ॥ तत्राभूतं विसृजामि मायायोगेन भूरिशः ॥ लोक एवं विजानाति गरुडो वहतेऽच्युतम् ॥ ३१ ॥ भूत्वा वेगेन गरुडो वहाम्यात्मानमात्मना ॥ या एता देवताः सर्वा यज्ञभागेन तोषिताः ॥ ३२ ॥ मायामेतामहं कृत्वा तोषयामि दिवौकसः ॥ लोकाः सर्वे विजानन्ति देवा नित्यं मखाशिनः ॥ ३३ ॥ मायामेतामहं कृत्वा यक्ष्यामि त्रिदिवौकसः ॥ सर्वोऽपि भजते लोके यष्टारं च बृहस्पतिम् ॥ ३४ ॥ मायामाङ्गिरसीं कृत्वा

याजयामि दिवौकसः ॥ सर्वं लोका विजानन्ति वरुणः पाति सागरम् ॥ ३५ ॥ मायां तु वारुणीं कृत्वा रक्षामि च महार्णवम् ॥ सर्वं लोका विजानन्ति कुबेरोऽयं धनेश्वरः ॥ ३६ ॥ कुबेरमायामादाय अहं रक्षामि तद्धनम् ॥ एवं लोका विजानन्ति वृत्रः शक्रेण सूदितः ॥ ३७ ॥ शार्क्वीं मायां समास्थाय मया वृत्रो निषूदितः ॥ एवं लोका विजानन्ति आदित्यश्च ध्रुवो महान् ॥ ३८ ॥ मेरुं मायामयं कृत्वा वहाम्यादित्य मेव च ॥ एवमाभाषते लोको जलं वा नश्यतेऽखिलम् ॥ ३९ ॥ वडवामुखमास्थाय पिबामि तदहं जलम् ॥ वायुं मायामयं कृत्वा मेघेषु विसृजाम्यहम् ॥ ४० ॥ यदीदं भाषते लोकः कुबेरेतत्तिष्ठते जलम् ॥ देवा अपि न जानन्ति अमृतं कुत्र तिष्ठति ॥ ४१ ॥ मम मायानियोगेन तिष्ठति ह्योषधे वने ॥ लोको ह्येवं विजानाति राजा पालयते प्रजाः ॥ ४२ ॥ राजमायामहं कृत्वा पालयामि वसुन्धराम् ॥ ये तु वै द्वादशादित्या उदेष्यन्ति युगक्षये ॥ ४३ ॥ प्रविश्य तानहं भूमे मायां लोके सृजाम्यहम् ॥ सूर्यश्च चांशुना भूमे सदा लोकेषु पच्यते ॥ ४४ ॥ मायामंशुमयीं कृत्वा पूरयाम्यखिलं जगत् ॥ वर्षन्ते यत्र संवर्त्ता धारैर्मुसलसन्निभैः ॥ ४५ ॥ मायां सांवर्त्तकीं गृह्य पूरयाम्यखिलं जगत् ॥ यत्स्वपामि वरारोहे शेषस्योपरि धारिणि ॥४६॥ अनन्तमायया चाहं धारयामि स्वपामि च ॥ वराहमायामादाय भूमे जानासि किं न वै ॥४७॥ देवा यत्र निलीयन्ते सा माया मम कीर्तिता ॥ त्वं चापि वैष्णवीं मायां कृत्वा जानासि किं न तत् ॥ ४८ ॥ धारितासि च सुश्रोणि वाराह सप्तदशेव तु ॥ माया तु मम देवीयं कृत्वा ह्येकार्णवां महीम् ॥ ४९ ॥ मम मायावलं ह्येतद्येन तिष्ठाम्यहं जले ॥ प्रजापतिं च रुद्रं च सृजामि च वहामि च ॥ ५० ॥ तेऽपि मायां न जानन्ति मम मायाविमोहिताः ॥ अयो पितृगणाश्चापि य एते सूर्यवर्चसः ॥ ५१ ॥ मायां पितृमयीं ह्येतां गूह्यमीति च तत्त्वतः ॥ किन्तु त्वयैव सुश्रोणि अन्यच्च शृणु सुन्दरि ॥ ५२ ॥ ऋषिमीयानुसारेण स्त्रिया योनिं प्रवेशितः ॥ ततो विष्णो र्वचः श्रुत्वा श्रोतुकामा वसुन्धरा ॥ ५३ ॥ कराभ्यामञ्जलिं कृत्वा वाक्यमेतदुवाच ह ॥ किं तेन ऋषिमुख्येन कृतं कर्म सुदुष्करम् ॥ ५४ ॥ स्त्रीत्वं चैव पुनः प्राप्तं स्त्रीयोनिं चैव प्रापितः ॥एतन्मे सर्वमाख्याहि परं कौतूहलं मम ॥५५॥ तस्य ब्राह्मणमुख्यस्य स्त्रीत्वे यत्कर्म पापकम् ॥ततो मह्या वचः श्रुत्वा हृष्टतुष्टमना हरिः॥५६॥मधुरं वाक्यमादाय प्रत्युवाच वसुन्धराम् ॥ शृणु तत्त्वेन मे देवि धर्माख्याने च सुन्दरि॥५७॥माया

मम विज्ञाताऽसि रोहिणी लोमहर्षिणी ॥ मायाया मम योगेन सोमशर्मा च कर्शितः ॥५८॥ गतो गतीरनकाश्च उत्तमाधममध्यमाः ॥ ब्राह्मणत्वं पुनः प्राप्तो मम मायाप्रचोदितः ॥५९॥ यथा ब्राह्मणमुख्येन प्राता स्त्रीयोनिरेव च ॥ न तस्य विकृतं कर्म अपराधो न विद्यते ॥६०॥ ममैवाराधनपरो मम कर्मपरायणः ॥ नित्यं चिन्तयते भूमे मम मूर्तिं मनोरमाम् ॥६१॥ अथ दीर्घेण कालेन तस्य तुष्टोऽस्मि सुन्दरि ॥ तपसा कर्मणा भक्त्या अनन्यमनसा स्तुतः ॥६२॥ ततस्तस्य मया देवि दत्त्वा दर्शनमुत्तमम् ॥ वरेण छन्दितो विप्र तपस्तुष्टोऽस्मि ते द्विज ॥६३॥ वरं वरय भद्रं ते तव यद्धृदि वर्त्तते ॥ रत्नानि कांचनं गावस्तथा राज्यमकण्टकम् ॥६४॥ अथवेच्छसि तं स्वर्गं यत्र सोख्यं वराङ्गनाः ॥ धनरत्नं समृद्धं हि हेमभाण्डविभूषितम् ॥६५॥ यत्र सर्वा दिव्यरूपा भवन्त्यप्सरसः पराः॥ दृश्यन्ति ते वरं विप्र याचते चिंताचिन्तितम्॥६६॥ततो मम वचः श्रुत्वा स च ब्राह्मणपुंगवः ॥शिरसा पतितो भूमौ मामुवाच प्रियं वचः॥६७॥ अथ नो कुरुषे देव वरं समनुयाचते ॥ यत्त्वया भाषितं देव मम देयं यदुच्छया ॥६८॥ न चाहं कांचनं गावो न च स्त्रीराज्यमेव च ॥ स्वर्गं वाप्सरसो वापि ऐश्वर्यं न मनोहरम् ॥६९॥ तथा स्वर्गतडाकाणामेकं वापि न रोचते॥ज्ञातुमिच्छामि ते मायां यया क्रीडसि माधव ॥७०॥ ततस्तस्य वचः श्रुत्वा स मया तत्र भाषितः ॥ किं मायया ते विप्रेन्द्र अकार्यं पृच्छसे द्विज॥७१॥देवा अपि न जानन्ति विष्णुमायाविमोहिताः॥ततो मम वचः श्रुत्वा स च ब्राह्मणपुंगवः॥७२॥ उवाच मधुरं वाक्यं मायया च प्रचोदितः यदि तुष्टोऽसि मे देव कर्मणा तपसाऽथवा ॥ ७३ ॥ तव देव प्रसादेन ममैवं दीयतां वरः ॥ ततस्तु स मया प्रोक्तस्तपस्वी ब्राह्मणस्तथा ॥७४॥ गच्छ कुञ्जात्रके गङ्गास्नातो मायां तु गच्छसि॥ ममैवं वचनं श्रुत्वा कृत्वा चैव प्रदक्षिणम्॥७५॥कुञ्जात्रके देवि विप्रो मम मायाविलासुकः ॥ ततः कुण्डी त्रिदण्डी च मात्राभाण्डं च यत्नतः ॥७६॥स्थापयित्वा यथान्यायं तीर्थमायाविधय्यथा ॥ततो ह्यवतरद्गङ्गां विधिदृष्टेन कर्मणा॥७७॥ अवगाह्य ततो गङ्गां सर्वगात्रे च क्लेदिते ॥ तावन्निषादसदने तत्स्त्रीगर्भे गतोऽभवत् ॥ ७८ ॥ हृदयेऽचिन्तयत्तत्र गर्भक्लेशेन पीडितः ॥ अहो कष्टं मया किंस्वित्कर्मं वा दुष्कृतं कृतम् ॥ ७९ ॥ योऽहं निषादगर्भेऽस्मिन्त्रसामि नरकेषु च ॥ धिक् तपो धिक्च मे कर्म धिक्फलं धिक् च जीवितम् ॥ ८० ॥ योऽहं निषादगर्भेऽस्मिन्पीडास्ति मलसंकुले ॥ अस्थ्नां त्रिंशतसङ्खीर्णे नवद्वाराभिसंवृते ॥ ८१ ॥ पुरीषमूत्र

क्लेशैर्णे मांसशोणितकर्दमे॥ दुर्गन्धे दुःसहे चैव वातिकश्लेष्मपित्तिके॥८२॥ बहुरोगसमाकीर्णे बहुदुःखसमाकुले ॥ अहं किं तेन चोक्तेन दुःखान्यनुभवामि च ॥ ८३ ॥ कुतो विष्णुः कुतो वाहं कुतो गङ्गाजलानि च ॥ गर्भसंसारनिष्क्रान्तः पश्चाज्ञप्स्यामि तां क्रियाम् ॥ ८४ ॥ एवं चिन्तयमानस्तु शीघ्रं गर्भाद्विनिःसृतः ॥ भूम्यां तु पततस्तस्य नष्टं यत्पूर्वचिन्तितम् ॥ ८५ ॥ अजायत ततः कन्या निषादस्य गृहे तदा ॥ धनधान्यसमृद्धस्य ब्राह्मणो वर्त्तते स च॥८६॥न च संज्ञायते किंचिद्विष्णुमायाविमोहिता॥अथ दीर्घेण कालस्य कृतोद्वाहा यशस्विनी ॥८७॥ पुत्रान् दुहितरश्चैव जनयामास मायया ॥ भक्ष्याभक्ष्यं च खादेत पेयापेयं च तत्पिबेत् ॥ ८८ ॥ जीवानि चैव सततं घातितानि तत स्ततः ॥ कार्याकार्यं न जानीते वाच्यावाच्यं तथेति च ॥ ८९ ॥ गम्यागम्यं न जानाति मायाजालेन मोहितः ॥ पंचाशद्वर्षके काले मया ख्यातः स ब्राह्मणः ॥ ९० ॥ घटं गृहीत्वा विद्रुलितस्नस्नालनकारणात् ॥ तीरे निःक्षिप्य वस्त्रं स घटं च विनिधाय हि ॥९१॥ स्नातुं गङ्गाजले स्थित्वा विगाहयति जाह्नवीम् ॥ प्रस्वेदधर्मसन्ततः स शिरःस्नानमीहते ॥ ९२ ॥ जातस्तयोधनस्तत्र दण्डी कुण्डीधरः पुनः ॥ यत्र पश्यति विप्रोऽसौ मात्रां कुण्डीं त्रिदण्डकम् ॥ ९३ ॥ वस्त्रादि दर्शितं चैव यत्र संस्थापितं पुरा ॥ तत्तेन सर्वं सन्दृष्टं जाते ज्ञाने तु पूर्ववत् ॥ ९४ ॥ विप्रेण ज्ञातुकामेन विष्णुमायां यथापुरा ॥ तत उत्तरतस्तत्र गङ्गायां तु तपोधनः ॥ ९५ ॥ वासो गृह्णाति सव्रीडो योगं च परिचिन्तयन् ॥ उपविश्य च गङ्गायाः पुलिने समवालुके ॥ ९६ ॥ ततो विन्दति चात्मानं तपसा यत्तदा कृतम् ॥ मया किं कर्म पापेन कृतं निन्द्यं सुदुष्कृम् ॥ ९७ ॥ एवं निन्दति चात्मानं धिक्कुर्वन् साधुदूषितम् ॥ आचारो वा परिभ्रष्टो येनाहं प्रापितास्त्रिमाम् ॥ ९८ ॥ निषादस्य कुले जातो भक्ष्याभक्ष्याश्च भक्षिताः ॥ जीवाश्च घातिताः सर्वे जलस्थलदिवौकसः ॥ ९९ ॥ पेयापेयं च मे पीतं विक्रीताश्चाप्यविक्रेयाः ॥ अगम्यागमनं चैव वाच्यावाच्यं न रक्षितम् ॥ १०० ॥ वेश्मन्यभोज्यभोज्यं च भुक्तं चैव न संशयः ॥ पुत्रा दुहितरश्चैव निषादाज्जनिता मया ॥१०१॥ ततः किंचापराधं वा केन वा तद्विचिन्तये ॥ येनाहं प्रापितो ह्येनां नैपादीमिदृशीं दशाम् ॥ १०२ ॥ एतस्मिन्नंतरे भूमे निषादः क्रोधमूर्च्छितः ॥ पुत्रैः परिवृतस्तत्र मायातीर्थमुपागतः ॥ १०३ ॥ ततो मृगयते भार्यां भक्तियुक्तां शुभेक्षणाम् ॥ परिपृच्छति चैकैकं तप्यमानं तपो

॥१०२॥

धनम् ॥ १०४ ॥ क्व गतासि प्रियेऽस्माकं त्यक्त्वा पुत्रान् गृहे च माम् ॥ बाला दुहिता रोदिति क्षुधार्त्ता स्तनपायिनी ॥ १०५ ॥ किं नु पश्यथ भार्या मे गङ्गातीरमुपागता ॥ घटमादाय हस्तेन आगता जलकारणात् ॥ १०६ ॥ तत्रैव च नराः सर्वे मायातीर्थमुपागताः ॥ पश्यंतेऽत्र परिव्राजं कुम्भं चैव यथास्थितम् ॥१०७॥ ततो दुःखेन संतप्तः अपश्यंश्च स्वकां प्रियाम् ॥ दृष्ट्वा पटं च कुम्भं च करुणं पर्यवेदयेत्॥१०८॥ इदं वासश्च कुम्भश्च नदीकूले च तिष्ठति ॥ न चापि दृश्यते भार्या मम गङ्गामुपागता ॥ १०९॥ अथ केनापि ग्राहेण स्नायमाना तपस्विनी ॥ गृहीता तोयमध्यं तु जिह्वालोडेन चाबला ॥ ११० ॥ न चाप्रियं मयाऽस्युक्ता कदाचिदपि वाचकम् ॥ स्वप्नेऽपि नोक्तपूर्वांसि कदाचिदपि चाग्रियम् ॥ १११ ॥ अथवापि पिशाचेन भक्षिता भूतरक्षसैः ॥ आकृष्टा किं नु रोगेण गङ्गातीरं समाश्रिता ॥११२ ॥ किं कृतं दुष्कृतं पूर्वं मया कर्म सुसङ्कटम् ॥ येन मत्पुरतो भार्याप्यदृष्टा विगतिं गता ॥ ११३ ॥ एहि मे सुभगे कान्ते मम चित्तानुवर्त्तिनि ॥ पश्येतान्बालकान् भीतान् क्लिश्यमानानितस्ततः ॥ ११४ ॥ मां पश्य त्वं वरारोहे त्रीन्पुत्रानतिबालकान् ॥ चतस्रो दुहितॄः पश्य सर्वांश्च मम मानदे॥ ११५ ॥ मम पुत्रा रुदन्त्येते बालकास्तव लालसाः ॥ नित्यं च दारिका रक्ष मम दुष्कृतकारिणः ॥ ११६॥ कामं मां क्षुधितं चैव ज्ञास्यसे त्वं पिपासितम् ॥ एवमुक्ता च कल्याणि मम मुक्त्या व्यवस्थिता ॥ ११७ ॥ एवं विलपमानस्य निपादस्य त्वितस्ततः ॥ सन्नीडं भाषते विप्रो निषादं गच्छ नास्ति सा ॥ ११८॥ सुखं योगं च ते नीत्वा सा गता ह्यनिवृत्तये ॥ तं रुदन्तं तथा दृष्ट्वा कारुण्येन परिप्लुतः ॥ ११९ ॥ निषादं भाषते तत्र गच्छ किं परिक्लिश्यसे ॥ बालांस्तान्परिरक्षस्व आहारैर्विविधैरपि ॥ १२० ॥ एते न त्यजनीयास्ते कदाचिदपि पुत्रकाः ॥ परिव्राज वचः श्रुत्वा निषादस्तस्य सन्निधौ ॥ १२१ ॥ उवाच मधुरं वाक्यं दुःखशोकपरिप्लुतः ॥ अहो मुनिवरश्रेष्ठ अहो धर्मभृतां वर ॥ १२२ ॥ सान्त्वितोऽस्मि त्वया विप्र वचनैर्मधुराक्षरैः ॥ १२३ ॥ निषदास्य वचः श्रुत्वा स मुनिः सांशितव्रतः ॥ उवाच मधुरं वाक्यं दुःखशोकपरिप्लुतः ॥ १२४ ॥ मारोदीर्वित्थि भद्रं ते तवाहं सा प्रियाऽभवत् ॥ गङ्गातीरं समासाद्य मुनिर्जीतोऽस्म्यहं तथा ॥ १२५ ॥ परिव्राजवचः श्रुत्वा निषादो विगतज्वरः ॥ शुश्रूण वचनमादाय प्रत्युवाच द्विजोत्तमम् ॥ १२६ ॥ किमिदं भाषसे विप्र अव्यक्तं

यत्कदाचन ॥ न भाव वा यद्घटितं स्त्रियः पुंस्त्वं सदैव हि ॥ १२७ ॥ निषादस्य वचः श्रुत्वा ब्राह्मणो दुःखमूर्च्छितः ॥ उवाच मधुरं वाक्यं गङ्गातीरे च धीवरम् ॥ १२८ ॥ क्षिप्रं गच्छ स्वकं देशमेतान् गृह्य स्वबालकान् ॥ रुर्वेषां च यथासंस्थं स्नेहः कर्त्तव्य एव च ॥ १२९ ॥ स तेन चोदितो ह्येवं निषादो नावगच्छति ॥ मधुरं स्वरमादाय प्रत्युवाच द्विजोत्तमम् ॥ १३० ॥ किं त्वया दुष्कृतं कर्म कृतं पूर्वं पुरातनम् ॥ मम यद्भापसे चैव स्त्रीत्वं प्राप्तोऽसि तत्कथम् ॥ १३१ ॥ केन दोषेण प्राप्तस्त्वं स्त्रीत्वं भूत्वा पुमान् पुनः ॥ पुंस्त्वं चैव कथं प्राप्त एतदाचक्ष्व पृच्छतः ॥१३२॥ एवं तस्य वचः श्रुत्वा स ऋषिः संशितव्रतः ॥ उवाच मधुरं वाक्यं मायातीर्थजले चरम् ॥ १३३ ॥ निषाद शृणु तत्त्वेन मत्कथां च प्रजल्पतः ॥ न मया दुष्कृतं किंचित्कृतं कुत्रापि तत्त्वतः ॥ १३४ ॥ एकभक्तं मयाचीरे अभक्ष्यं चैव वर्जितम् ॥ स मयाराधितो देवो लोकनाथो जनार्दनः ॥ कर्मभिर्बहुभिश्चैव मया दर्शनकाङ्क्षिणा ॥ १३५ ॥ अथ दक्षिणे कालेन मया दृष्टो जनार्दनः ॥ वरेण छन्दयामास बहुधा मायया ततः ॥ १३६ ॥ मया नाभीप्सितस्तस्माद्दीयमानो वरस्ततः ॥ मायां मे दर्शय विभो विष्णो प्रणतवत्सल ॥ १३७ ॥ ततो मां भाषते विष्णुर्मायां दृष्ट्वा ह्यलं द्विज ॥ मया पुनः पुनश्चोक्तो मम प्रीत्या प्रदर्शय ॥ १३८ ॥ ततोऽहं तेन चाप्युक्तस्तर्हि द्रक्ष्यत्यलं भवान् ॥ गच्छ कुब्जाम्रके गङ्गां स्नात्वेत्यन्तर्हितोऽभवत् ॥ १३९ ॥ अहं मायाप्रलोभेन गङ्गातीरमुपागतः ॥ दण्डं कुण्डीं च वस्त्रं च तीरे संस्थाप्य यत्नतः ॥ ततः स्नानविधानेन निमग्नस्तज्जलेऽमले ॥ १४० ॥ न तत्र किंचिज्जानामि किमिदं किं प्रवर्त्तते ॥ निषादीगर्भसम्भूतस्तव पत्न्यभवं ततः ॥ १४१ ॥ केनचित्कारणेनात्र प्रविष्टो जाह्नवीजले ॥ स्नात्वाऽपश्यं पूर्ववच्च तावज्जातो ऋषिस्त्वहम् ॥ १४२ ॥ निषाद पश्य कुण्डीं च मात्रां वस्त्रं यथापुरा ॥ पंचाशद्भर्पदेशीयो जातोऽस्मि त्वद्गृहे वसन् ॥ दण्डश्चास्यादि यत्किंचिन्न जर्णि गङ्गया हृतम् ॥ १४३ ॥ एवं तेन ततश्चोक्ता निषादोऽदृश्यतां गतः ॥ ये च ते बालकास्तत्र तेषां काश्चिन्न दृश्यते ॥ १४४ ॥ स ततो ब्राह्मणो देवि तपस्तप्तुमिति निश्चितम् ॥ ऊर्ध्वश्वासोर्ध्वबाहुश्च वायुभक्षपरायणः ॥ १४५ ॥ तस्य प्रतिष्ठमानस्य अपराह्णं तु जायते ॥ ततः प्रभु च्यते तोयं देवि कृत्वा यथोचितम् ॥१४६॥ कमण्यानि च पुष्पाणि आहृत्य श्रद्धयान्वितः ॥ अर्चयित्वा यथान्यायं वरिसनमुपागतः॥१४७॥

वृतस्तु ब्राह्मणैर्मुख्यैर्गङ्गाप्लानेषु वै द्विजः ॥ उच्चुस्ततो द्विजास्तत्र तपस्विनमनिंदितम् ॥ १४८ ॥ पूर्वाह्णे स्थापयित्वात्र मात्रां कुण्डीं त्रिदण्डकम् ॥ इतो गतोऽसि ब्रह्मेन्द्र स्थापयित्वा तु धीवरान् ॥ विस्मृतं किं त्वया स्थानं कथं शीघ्रं न चागतः ॥ १४९ ॥ ततो विप्र वचः श्रुत्वा तूष्णीमासीन्मुनिस्तदा ॥ ब्राह्मणानुगतं स्थानमात्मनात्मानुसंस्थितः ॥ १५० ॥ एतस्मिन्नंतरे देवि स च ब्राह्मणपुंगवः ॥ अद्य पंचाशद्वर्षाणि अमावास्याद्य चैव हि ॥ १५१ ॥ कथमेतावतङ्कालं मामूचुब्राह्मणाश्च किम् ॥ पूर्वाह्णे स्थापयित्वा त्वं स्वां मात्रां चापराह्णिके ॥ कथं कालेऽनुसम्प्राप्तः किमेतादृति भाषते॥१५२॥ एतस्मिन्नंतरे देवि ब्राह्मणाय ततो मया ॥ दर्शयित्वा निजं रूपं तमवोचमिदं धरे॥१५३॥ किमिदं भ्रांतरूपोऽसि किं वा त्वं दृष्टवानसि ॥ पश्यामि त्वां व्यग्रामव सावधानो भव स्वयम् ॥ १५४ ॥ एवमुक्तः स तु मया भूमौ कृत्वा शिरः स्वकम् ॥ उवाच दुःखितो दीनो निःश्वस्य च मुहुर्मुहुः ॥ १५५ ॥ अहो देव द्विजा एते मां वदन्ति जगद्गुरो॥ पूर्वाह्णे स्थापयित्वा त्वं वस्त्रं दण्डकमण्डलू ॥ आगतोऽस्यपराह्णे किं स्थलं विस्मृतवानसि ॥ १५६ ॥ अहं व्याधस्य वै भूत्वा भार्या च व्याधयोर्निजा ॥ पंचाशद्वर्षपर्यंतं तत्र स्थित्वा ततः किल ॥ १५७ ॥ तस्माच्चैव त्रयः पुत्रास्तिस्रश्चापि च कन्यकाः ॥ जातान्येवमपत्यानि दुष्टकर्मकृतस्तथा ॥ १५८ ॥ स्नातु कदाचिद्गङ्गायां गतोऽहं तरिभूमिगः ॥ स्थापायत्वाद्य स्वं वस्त्रं मग्नः स्नास्यन् जलेऽमले॥ उन्मज्य स्वयं पुनश्चैव प्राप्तो रूपं मुनिस्तुतम् ॥ १५९ ॥ किं मया विकृतं कर्म सेवमानेन माधव ॥ तपश्च तप्यमानेन किं मया विकृतं कृतम् ॥१६० ॥ भक्षितं किमकर्मेण्यं सेवमानेन चाच्युत ॥ व्यभिचारश्च मे तत्र को जातस्तु तवार्चने॥१६१॥ एतदाचक्ष्व तत्त्वेन येनाहं नरकं गतः॥ एतच्छ्रुत्वाब्रवीद्विप्रो मामकुलोऽहं निबोध भगवन्मम ॥ १६२ ॥ मायालुब्धेन हि मया पूर्वं विज्ञापितो ह्यसि ॥ नान्यत्तस्मरामि पापं च नरके येन पातितः ॥ १६३ ॥ तत स्तस्य वचः श्रुत्वा कारुण्यपरिदेवितम् ॥ उक्तवानस्मि तं विप्रं दुःखसंतप्तमानसम् ॥ १६४ ॥ मा दुःखं कुरु विप्रेन्द्र आत्मदोषसमुद्भवम् ॥ विकर्म न कृतं किंचिदपि मे विप्र पूजने ॥ येन दुःखमनुप्राप्तं तिर्यग्योनिं च वै गतः ॥ १६५ ॥ उक्तमेव मया पूर्वं शृणु ब्राह्मणपुङ्गव ॥ वरान् वरय भो ब्रह्मन् त्वं मायां वृतवानसि ॥ १६६ ॥ ददामि दिव्यभोगांस्त्वे भौमान्वापि तवेप्सितम् ॥ तांस्तु नेच्छसि मायाया दर्शनं वृतवा

नासि ॥ १६७ ॥ दृष्टा तु वैष्णवी माया या त्वया ब्राह्मणोषिता ॥ न गतो दिवसश्रेष्ठ नापराह्णेऽपि कुत्रचित् ॥ वर्षाणि चैव पंचाशान्नृपादस्य गृहेऽपि न ॥ १६८ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व द्विजोत्तम ॥ या एषा वैष्णवी माया त्वया ब्राह्मण ईक्षिता ॥ १६९ ॥ त्वया न तत्कृतं किंचिच्छुभं वाशुभमेव वा ॥ सर्वं मायामयं तत्र विस्मयात्परितप्यसे ॥ १७० ॥ यत्त्वया दुष्कृतं कर्म व्यभिचारश्च तत्र वै ॥ अर्चनं च न ते भ्रष्टं तपश्चैव न नाशितम् ॥ १७१ ॥ भवान्तरे कृतं यच्च येनेदं प्राप्तवान्महत् ॥ दुःखं तच्च तवाख्यास्ये शृणु ब्राह्मणसत्तम॥ १७२ ॥ मम भक्ता द्विजाः शुद्धा यत्त्वया नाभिवादिताः ॥ तत्पापादीदृशो भोगस्तव जातो हि दुःखदः ॥ १७३ ॥ ये च भागवताः शुद्रास्ते नूनं मम मूर्त्तयः ॥ तान्विप्राग्ये नमस्यन्ति ते मामेव नमस्यते ॥ विदितोऽस्मीह विप्रेन्द्र तैरहं नात्र संशयः ॥ १७४ ॥ मम दर्शनकामा ये ते मे भक्ता द्विजास्तथा ॥ शुद्रा भागवताः पूज्या द्रष्टव्याः सर्वदा नृभिः ॥ १७५ ॥ विशेषेण कलौ ब्रह्मन्द्विजरूपो ह्यवस्थितः ॥ तस्माद्ब्राह्मणभक्ता ये ते मद्भक्ता न संशयः ॥ १७६ ॥ यो मां प्रातर्मिहच्छेत यस्यावाच्यं न विद्यते ॥ अनन्यमानसो भूत्वा मद्भक्तेषु नियोजयेत् ॥ १७७ ॥ गच्छ ब्राह्मण सिद्धोऽसि यदा प्राणान्विमोक्ष्यसि ॥ तदाऽऽगन्ताऽसि मत्स्थानं श्वेतद्वीपं न संशयः ॥ १७८ ॥ एवमुक्त्वा वराराहं तत्रैवान्त हितोऽभवम् ॥ सोऽपि द्विजस्तनुं त्यक्त्वा मायातीर्थे यशस्विनि ॥ कृत्वा सुदुष्करं कर्म श्वेतद्वीपमुपागतः ॥ १७९ ॥ धन्वी तूणी शरी खड्गी मायाबलपराक्रमः ॥ मां च पश्यति वै नित्यं मायाबलसुसंस्थितस्तम् ॥१८०॥ मायया किं तव धरे न मायां ज्ञातुमर्हसि॥मम मायांन जानन्ति देवदानवराक्षसाः ॥१८१ ॥ एतत्ते कथितं भूमे मायाख्यानं महोजसम् ॥मायाचक्रामिति ख्यातं सर्वपुण्यसुखावहम् ॥१८२॥आख्यानानां महाख्यानं तपसां च परन्तपः ॥ पुण्यानां परमं पुण्यं गतीनां च परा गतिः ॥१८३॥ नित्यं पठेद्यो भक्तेषु अभक्तेषु न कीर्त्तयेत् ॥ मा पठेन्नीच मध्येषु मा पठेच्छास्त्रदूषके ॥ १८४ ॥ अग्रतः पृच्छताशूद्रमद्भक्तेषु तथाग्रतः ॥ पठते शोभते विप्रो न तु ये शास्त्रदूषकाः ॥ १८५ ॥ कल्यमुत्थाय यो भूमे पठते च दृढव्रतः ॥ तेन द्वादश वर्षाणि ममाग्रे पठितं भवेत् ॥ १८६ ॥ अथ पूर्णेन कालेन पुमान्पंचत्वमागतः ॥ मद्भक्तो जायते देवि वियोनिं न च गच्छति ॥ १८७ ॥ य एवं शृणुयान्नित्यं महाख्यानं वसुन्धरे ॥ न स जायेत मन्दात्मा वियोनिं नैव

॥१०४॥

गच्छति ॥ १८८ ॥ एतत्ते कथितं भद्रे त्वया यत्पूर्वमीप्सितम् ॥ मुच्यमाना वरारोहे किमन्यत्पारिपृच्छसि ॥ १८९ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे मायाचक्रं नाम पंचविंशत्यधिकशततमोऽध्यायः ॥१२५॥ अथ कुब्जाम्रकमाहात्म्यारम्भः ॥ तत्र रैभ्यानुग्रहः ॥ श्रुत्वा मायाबलं ह्येतद्धरणी संशितव्रता॥ वराहरूपिणं देवं प्रत्युवाच वसुन्धरा ॥ १॥ धरण्युवाच ॥ यत्तत्कुब्जाम्रके देव भाषसे तदनन्तकम् ॥ न तत्राहं विजानामि पूर्वमुक्तं च यत्त्वया ॥ २ ॥ यच्च कुब्जाम्रके पुण्यं पुष्टिस्तस्य सनातनी ॥ एतन्मे परमं गुह्यं भगवन्वक्तुमर्हसि ॥ ३ ॥ वराह उवाच ॥ सर्वं तत्कथयिष्यामि सर्वलोकसुखावहम् ॥ यच्च कुब्जाम्रके पुण्ये तीर्थमानिन्दिते ॥ ४ ॥ तच्च कात्स्न्यनं मे देवि शृणु तत्त्वेन सुन्दरि ॥ यथा कुब्जाम्रको जातस्ततस्तीर्थं यथाक्रमम् ॥ ५ ॥ यच्च कर्म यतो भूमे स्नातो याति मृतोऽपि च ॥ युगे सप्तदशे भूमे कृत्वा चैकां वसुन्धराम् ॥ ६ ॥ मधुकैटभौ तथा हत्वा ब्रह्मणो वचनात्तदा ॥ जलसंहरणं कृत्वा ममाधारमुपागतः ॥ ७ ॥ पश्यामि तं ततं नाम्ना रैभ्यं नाम महामुनिम् ॥ ममैवाराधने युक्तं सर्वकर्मसु निष्ठितम्॥८॥युक्तिमन्तं गुणज्ञं च शुचिं दक्षं जितेंद्रियम् ॥ दशवर्षसहस्राणि ऊर्ध्वबाहुः स तिष्ठति॥९॥ सहस्रं चांबुभक्षेण तथा शैवालभक्षणम् ॥ वर्षाणां च शतं पंच निष्ठते स महामुनिः ॥१० ॥ इतः प्रीतोऽस्म्यहं देवि रैभ्यस्य च महात्मनः ॥ भक्त्या च परया चैव तेन चाराधितो ह्यहम् ॥ ११ ॥ ततो वै तपममानं तं गङ्गाद्वारमुपागतम्॥आम्रवृक्षं समासाद्य दृष्टः स मुनिपुङ्गवः ॥१२॥ दर्शितोऽयं मया चात्मा हेतुमात्रेण केनचित्॥मया यदाश्रितश्चाम्रस्तेन कुब्जत्वमागतः ॥ १३ ॥ एवं कुब्जाम्रकं ख्यातं स्थानमेतन्ममात्मनि ॥ मृतापि तत्र गच्छन्ति मम लोकाय केवलम्॥१४॥अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥दृष्ट्वा स मामृषिश्चैव यानि वाक्यानि भाषते॥१५॥ एवं तत्र मया दृष्टः कुब्जरूपं समास्थितः ॥ जानुभ्यामवनिङ्कृत्वा किंचिदेव प्रभाषते॥१६॥ नमस्कृत्य स्थितं तं तु मुनिं वै संशितव्रतम् ॥ वरेण छन्दयामास अहं प्रीतमना धरे ॥ १७ ॥ ममैव वचनं श्रुत्वा स मुनिस्तपसान्वितः ॥ उवाच मधुरं वाक्यं प्रसादार्थी महायशाः ॥ १८ ॥ यदि प्रसन्नो भगवाँल्लोकनाथो जनार्दनः ॥ तव चात्र निवासं वै देव इच्छामि नित्यशः ॥ १९ ॥ यावल्लोका धारिष्यन्ति तावच्चैव महाप्रभो ॥ स्थानं तव त्वपीकेश इच्छामि मधुसूदन ॥ २० ॥ त्वयि भक्तिः सदा भूयाद्यावत्स्थानं जनार्दन ॥ अन्यभक्तिर्मम विभो रोचते न कदाचन ॥ २१ ॥

एतदेव परं चित्ते मया चैव विधार्यते ॥ उपेन्द्र यदि तुष्टोऽसि ममायं दीयतां वरः ॥ २२ ॥ ततस्तस्य वचः श्रुत्वा रैभ्यस्यर्षेरहं पुनः ॥ वाढ़मित्येव ब्रह्मर्षे एवमेतद्भविष्यति ॥ २३ ॥ ममैवं वचनं श्रुत्वा ब्राह्मणः स वसुंधरे ॥ मुहूर्त्तं ध्यानमास्थाय मामुवाच मुदान्वितः ॥ २४ ॥ एतस्य तीर्थवर्यस्य महिमानं त्वया प्रभो ॥ शृणु वै कथ्यमानं तु वद लोकोपकारक ॥ २५ ॥ अन्यानि यानि तीर्थानि एतत्क्षेत्राश्रितानि तु ॥ तान्यपि श्रोतुमिच्छामि कथ्यमानानि च त्वया ॥ २६ ॥ शृणु तत्त्वेन मे ब्रह्मन्यन्मां त्वं परिपृच्छसि ॥ तीर्थं कुब्जाम्रके पुण्ये मम लोके सुखावहे ॥ २७ ॥ तीर्थं तु कुमुदाकारं तस्मिन् कुब्जाम्रके स्थितम् ॥ स्नानमात्रेण सुश्रोणि स्वर्गं प्राप्नोति मानवः ॥ २८ ॥ कौमुदस्य तु मासस्य तथा मार्गशिरस्य च ॥ वैशाखस्यैव मासस्य कृत्वा कर्म सुदुष्करम् ॥२९॥ यो वै परित्यजेत्प्राणान् स्त्री पुमान्वा नपुंसकम् ॥ निष्कलां लभते सिद्धिं मम लोकं स गच्छति ॥ ३० ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुंधरे ॥ तीर्थं मानसमित्येव विख्यातं मम सुन्दरि ॥ ३१॥ यस्मिन् स्नात्वा विशालाक्षि गच्छते नंदनं वनम् ॥ दिव्यं वर्षसहस्रं वै मोदते चाप्सरैः सह ॥ ३२ ॥ पूर्णे वर्षसहस्रे तु जायते विपुले कुले ॥ द्रव्यवान् गुणवांश्चैव जायते तत्र मानवः ॥३३॥ तत्राथ मुंचते प्राणान् कौमुदस्य तु द्वादशी ॥ पुष्कलां लभते सिद्धिं मम लोकं च गच्छति ॥ ३४ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुंधरे ॥ मायातीर्थमिदं ख्यातं येन मायां विजानते ॥ ३५ ॥ तस्मिन् कृतोदको ब्रह्मन्मायातीर्थे महायशाः ॥ दशवर्षसहस्राणि मद्भक्तो जायते नरः ॥३६॥ लभते परमां पुष्टिं कुबेरभवनं यथा ॥ एकं सहस्रं वर्षाणां स्वच्छंदगमनात्रयम् ॥ ३७ ॥ अथवा म्रियते तत्र मायातीर्थे यशस्विनि ॥ मायायोगी ततो भूत्वा मम लोकाय गच्छति ॥ ३८ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुंधरे ॥ तीर्थं सवार्त्मकं नाम सवैतीर्थगुणान्वितम् ॥३९॥ यस्तत्र स्नाति कश्चिद्वै वैशाखस्य तु द्वादशीम्॥ निष्कलं लभते स्वर्गं सहस्रं दश पंच च ॥४०॥ अथात्र मुंचते प्राणांस्तीर्थे सार्पपके तथा ॥ सवसर्गं परित्यज्य मम लोकं च गच्छति ॥४१॥ पुनरन्यत् प्रवक्ष्यामि शृणुष्व शुभलोचने ॥ तीर्थं पूर्णसुखं नाम तत्र जानाति कश्चन ॥ ४२ ॥ तत्र सर्वा भवेद्गङ्गा शीतलं जायते जलम् ॥ यत्र चाप्यं भवत्यम्भु ज्ञेयं पूर्णसुखं तथा ॥४३॥ स्नातो गच्छति सुश्रोणी सोमलोकं महीयते ॥ तदा सोमं पश्यति तु सहस्रं दश पंच च ॥ ४४ ॥

ततः स्वर्गात्परिभ्रष्टो ब्राह्मणश्चव जायते ॥ मद्भक्तः शुचिमान्दक्षः सर्वकर्मगुणान्वितः ॥४५॥ अथवा म्रियते तत्र मासि मार्गशिरे तथा ॥ शुक्लपक्षे च द्वादश्यां मम लोकं च गच्छति॥४६॥ तत्र पश्यति मां नित्यं दीप्तिमन्तं चतुर्भुजम् ॥ न जन्म विद्यते तस्य मरणं च कदाचन ॥४७॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ अनन्यमानसो भूत्वा भक्तो भागवतो मम ॥४८॥तस्मिंस्तीर्थे तु यः स्नाति कदाचिदपि मानवः॥दशवर्षसहस्राणि मोदते ह्यमरालये॥४९॥ततः स्वर्गात्परिभ्रष्टस्तत्तीर्थस्य प्रभावतः॥द्रव्यवान् गुणवांश्चैव मद्भक्तश्चैव जायते॥५०॥वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी ॥ यदि मुञ्चेत्स्वक देहं कृत्वा कर्म सुदुष्करम् ॥ ५१ ॥ न जन्म मरणं तस्य न ग्लानिर्न च वै भयम् ॥ सर्वसङ्गविनिर्मुक्तो मम लोकाय गच्छति ॥५२॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुंधरे॥ करवीरं नाम तीर्थं सर्वलोकसुखावहम्॥५३॥तस्य चिह्नं प्रवक्ष्यामि येन ज्ञापयते शुभे ॥ पुरुषो ज्ञानवांस्तावन्मम भक्तिविनिश्चितः॥५४॥माघमासे तु सुश्रोणि शुक्लपक्षे तु द्वादशी ॥ पुष्पिते करवीरे वै मध्याह्ने तु न संशयः ॥५५॥ तस्मिन्कृतोदकस्तीर्थे स्वच्छंदगमनालयः॥भ्रमेद्विमानमारूढो सहस्रांतरनर्त्तितः॥५६॥ तत्राथ म्रियते भूमे माघमासस्य द्वादशीम्॥ब्रह्माणं मां च पश्येत पश्यते च वृषध्वजम्॥५७॥पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुंधरे॥तस्य ब्राह्मणमुख्यस्य पूर्वं यत्कथितं मया॥५८॥ तस्मिन् कुब्जाम्रके भद्रे स्थानं तु मम रोचते॥पुण्डरीक इति ख्यातं तीर्थं चैव महत्फलम्॥५९॥तस्य चिह्नं प्रवक्ष्यामि तच्छृणुष्व शुचिस्मिते॥ तस्य तीर्थस्य सुश्रोणि मध्याह्ने द्वादशीदिने॥६०॥रथचक्रप्रमाणो वै चरते तत्र कच्छपः॥अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुंधरे॥६१॥स्नात्वा प्राप्नोति सुश्रोणि फलं तत्र महागुणम्॥पुण्डरीकस्य यज्ञस्य यज्ञमानस्य यत्फलम्॥६२॥प्राप्नोति वसुधे तत्र एवमेव न संशयः॥अथवा म्रियते तत्र लब्धसंज्ञो महायशाः ॥ ६३॥ दशानां पुण्डरीकाणां फलं प्राप्नोति मानवः॥भुक्त्वा यज्ञफलं तत्र जातिशुद्धो महातपाः ॥६४॥ सिद्धस्य लभते नित्यं मम लोकाय गच्छति ॥ अन्यच्च ते प्रवक्ष्यामि प्रिये तद्वै शृणुष्व मे ॥६५॥ आग्नितीर्थामिति ख्यातं सिद्धं कुब्जाम्रके स्थितम् ॥ यद्धे प्रज्ञायते देवि द्वादश्यां पापवर्ज्जितैः ॥ ६६ ॥ कौमुदस्य तु मासस्य मासो मार्गशिरस्य च ॥ आषाढस्य च मासस्य शुक्लपक्षस्य द्वादशीम् ॥ ६७ ॥ यश्चैव माघवे मासि समये यदि वर्त्तते ॥ तस्यां तु शुक्लद्वादश्यां तीर्थे तिष्ठति यत्नतः ॥६८॥ तस्य चिह्नं प्रवक्ष्यामि शृणुष्व

हि वसुन्धरे ॥ येन चिह्नेन विज्ञेयं तीर्थं तच्चैव मामकम् ॥६९॥एकाग्रं तु मनः कृत्वा तच्छृणुष्व वसुन्धरे ॥मुक्त्वा भागवतान्शुद्धान्त्संहितापाठ कान्मम ॥७०॥ न हि कश्चिद्विजानाति शास्त्रं मम न यश्च वै ॥ फलं तस्य प्रवक्ष्यामि मृतोऽपि स्नातकोऽपि वा ॥ ७१ ॥ एकचित्तं समाधाय तच्छृणुष्व वसुन्धरे ॥ अग्नितीर्थेषु स्नातो वै तस्मिन्कुञ्जाग्रकेषु च ॥ ७२ ॥ अग्नितीर्थं महाभागे दीनिमन्तं सवैष्णवम् ॥ सप्त कृत्वाग्निमेधानां यत्फलं भवति प्रिये ॥ ७३॥ प्राप्नोति तन्महाभागे स्नानमात्रान्न संशयः ॥ अथवा म्रियते तत्र एकैकाद्वादशीकृतान् ॥७४॥ स्थित्वा विंशत्य होरात्रान्मम लोकाय गच्छति ॥ तीर्थस्य तस्य वक्ष्यामि चिह्नानि शृणु सुन्दरि ॥७५॥ येन विज्ञायते ब्राह्मैर्मर्म भक्तं सुखावहम् ॥ उष्णं भवति हेमन्ते वसुधे तज्जलं तथा॥७६॥उष्णकाले भवेच्छीतमेवं चिह्नं तु तद्भवेत् ॥ एष वह्निर्महाभागे तीर्थमग्नेर्वसुन्धरे॥७७॥तरन्ति मानवा येन घोरं संसारसागरम् ॥ अन्यच्च ते प्रवक्ष्यामि देवि कुञ्जाग्रके महत् ॥७८॥ वायव्यमिति विख्यातं तीर्थं धर्मद्विनिस्मृतम् ॥तस्मिंस्तीर्थे तु यः स्नातः कृतनित्योदककियः ॥ ७९॥वाजपेयस्य यज्ञस्य फलं प्राप्नोति निष्फलम् ॥ अथवा म्रियते तत्र वायुतीर्थे महाह्रदे ॥ ८० ॥ दिनानि दश पंचैतत्कृतमेव हि मामकम्॥जन्म वा मरणं वापि भूमौ नैव पुनर्भवेत्॥८१॥जायते च चतुर्वेदुर्मम लोके प्रतिष्ठितः॥तस्य चिह्नं प्रवक्ष्यामि वायु तीर्थस्य सुन्दरि ॥ ८२ ॥ येन चिह्नेन विज्ञेयं तीर्थं तच्च महत्तरम् ॥ अश्वत्थवृक्षपत्राणि चलन्ति नित्यशो वने ॥८३ ॥ चतुर्विंशतिद्रोणेषु यां येन विज्ञायते खलु ॥ पुनरन्यत्प्रवक्ष्यामि तीर्थं कुञ्जाग्रके घरे ॥ ८४ ॥ शक्रतीर्थमिति ख्यातं सर्वसंसारमोक्षणम् ॥ तस्मिंस्तीर्थे वरारोहे शक्रतीर्थे वसुन्धरे ॥८५॥ शक्रस्तु वसते लोके वज्रहस्तो न संशयः ॥ अथवा म्रियते तत्र शक्रतीर्थे महातपे ॥८६॥ उपोष्य दशरात्राणि मम लोकाय गच्छति ॥ तस्य चिह्नं प्रवक्ष्यामि येन विज्ञायते ततः ॥ ८७ ॥ एकचित्तं समाधाय शृणु सुन्दरि तत्त्वतः ॥ पञ्च वृक्षास्तु तिष्ठन्ति तदक्षिणादीशि क्षिते ॥ ८८॥ शक्रतीर्थस्य चिह्नं ते वसुधे परिकीर्तितम् ॥ अन्यच्च तीर्थं वक्ष्यामि तस्मिन् कुञ्जाग्रके परम् ॥८९ ॥ वरुणेन तपस्तप्तं सहस्रं पञ्च सप्त च ॥ तत्र स्नातस्य वक्ष्यामि जायते तत्र यत्फलम् ॥ ९० ॥ यत्प्राप्नोति मृतो वापि पुरुषः संशितव्रतः ॥ अष्ट वर्ष सहस्राणि गत्वा वै वरुणालयम् ॥ ॥ ९१ ॥ स्वच्छन्दगमनो भूत्वा एवमेव न संशयः ॥ अथ वै म्रियते तत्र विंशवर्षोषितो नरः ॥ ९२ ॥ सर्व

॥१०६॥

सङ्गं परित्यज्य मम लोकं स गच्छति ॥ तस्य चिह्नं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ ९३ ॥ तत्र धारा पतत्येका एकरूपा सदा भवेत् ॥ न वर्द्धते च वर्षासु घर्मे न ह्रसते पुनः ॥ ९४ ॥ सप्तसामुद्रकं नाम तस्मिन्कुब्जाम्रके परम् ॥ तस्मिन्कृतोदको भूमे नरो धर्मपरायणः ॥ ९५ ॥ त्रयाणामश्वमेधानां फलं प्राप्नोति मानवः ॥ शीघ्रं गच्छति वै स्वर्गं सहस्रं दश पञ्च च ॥ ९६ ॥ ततः स्वर्गात्परिभ्रष्टः कुलवाञ्जायते द्विजः ॥ वेदवेदाङ्गकुशलः सोमपश्चैव जायते ॥ ९७ ॥ अथात्र मुञ्चते प्राणान्मुक्तसङ्गो जितेन्द्रियः ॥ उषित्वा सप्तरात्रं वै मम लोकं स गच्छति ॥९८॥ तस्य चिह्नं प्रवक्ष्यामि तीर्थस्य शृणु सुन्दरि ॥ वैशाखशुक्लद्वादश्यां विभूतिस्तत्र या भवेत् ॥ ९९ ॥ विमला गाङ्गता यत्र गङ्गाजलविमिश्रितम् ॥ तस्मिन् तीर्थे तदैवैतत्क्षीरवर्णं पुनर्भवेत् ॥ १०० ॥ पुनश्च पीतवर्णाभा पुना रक्तः कदा भवेत् ॥ पुनर्मरकताभासं पुनर्मुक्तासमप्रभम् ॥१ ॥ एतैश्चिह्नैस्तु विज्ञेयं तत्तीर्थं विदितात्मभिः ॥ अयञ्च ते प्रवक्ष्यामि तीर्थं कुब्जाम्रके महत् ॥ २ ॥ तीर्थं मानसरो नाम सर्वभागवतप्रियम् ॥ तस्मिन् स्नातो वरारोहे गच्छते मानसं सरः॥३॥ देवान् पश्यति वै सर्वान् रुद्रैश्च समरुद्गणान्॥अथ तत्र मृतो भूमे त्रिंशद्रात्रोषितो नरः ॥ ४ ॥ सर्वसङ्गविनिर्मुक्तो मम लोकं स गच्छति ॥ तस्य चिह्नं प्रवक्ष्यामि येन तज्ज्ञायते नरैः ॥ ५ ॥ पंचाशत्कोशविततं मानुषाणां दुरासदम् ॥ एतत्तु भूमे विज्ञेयं यथैतन्मानसं सरः ॥६॥ शुद्धैर्भागवतैर्ज्ञेयं मम कर्मसु निष्ठितैः ॥ एतत्तीर्थं महाभागे तस्मिन् कुब्जाम्रके स्मृतम्॥७॥ सिद्धिकामस्य विप्रस्य रैभ्यस्य परिकीर्तितम्॥अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुंधरे ॥८॥ तत्र कुब्जाम्रके वृत्ते पुराश्चर्ये महाद्भुतम् ॥ मम निर्माल्यपार्श्वे वै व्याली तिष्ठति निर्भया॥९॥गंधमाल्योपहार्याणि भक्षयंती यदृच्छया॥ कस्यचित्त्वथ कालस्य नकुलस्तत्र चागतः ॥१०॥ पश्यते च ततस्तत्र रममाणं यदृच्छया॥नकुलेन सह व्याल्या तदा युद्धमभूच्च तत् ॥११॥सम्पूर्णे ते तु मध्याह्ने माघमासे तु द्वादशीम् ॥ तया स दष्टो नकुलो नाशाय मम मंदिरे ॥ १२ ॥ तेनापि विषदिग्धेन व्याली शीघ्रं निपातिता ॥ उभौ चान्योन्य युद्धेन तदा पंचत्वमागतौ ॥ १३ ॥ व्याली प्राग्जातिषे जाता राजपुत्री यशस्विनी ॥ नकुलोऽजायत तदा कोसलेषु जनाधिपः ॥ १४ ॥ रूप वान्गुणवान्देवि सर्वशास्त्रकलान्वितः ॥ तौ तु दीर्घेण कालेन सौख्येन परिरञ्जितौ ॥ १५ ॥ अवर्द्धतां यथाकालं शुक्लपक्षे यथा शशी ॥ सा कन्या

नकुलं दृष्ट्वा सद्यो हन्तुं तथेच्छति ॥ १६ ॥ व्यालीं दृष्ट्वा राजपुत्रः सहसा हन्तुमिच्छति ॥ अथ तस्यास्तु कालेन कोसलाधिपतिस्तथा॥१७॥
पार्णि जग्राह विधिवन्मत्प्रसादाद्भसुन्धरे ॥ कोसलाधिपतेश्चापि राज्ञः प्राग्ज्योतिषस्य च ॥ १८ ॥ महोत्सवेन संवृत्तः सम्बन्धो मत्प्रसादतः ॥
दृढप्रीतिस्तयोर्जाता यथा च जतुकाष्ठयोः ॥ १९ ॥ रमतो धूमकेतोश्च वह्नेश्चैव यथा तथा ॥ यथा शची च शक्रश्च रमन्तौ नन्दने वने ॥१२०॥
एवं च दीर्घकालं हि तयोः प्रीतिर्न हीयते ॥ एवं तौ विहरन्तौ तु तस्मिन्वनपत्तने ततः ॥ २१ ॥ वसेते च यथान्यायं वेलामिव महोदधिः ॥ एवं
तयोर्गतः कालो वर्षाणां सप्ततप्ततिः ॥ २२ ॥ न बुध्यतोस्तथात्मानं मम मायाविमोहितौ ॥ एवं तौ विहरन्तौ तु तस्मिन्वनपत्तने ततः ॥ २३ ॥
दृष्ट्वा व्यालीं राजपुत्रस्ततो हन्तुं व्यवस्थितः ॥ स तया वार्यमाणोऽपि व्यालीं हन्तुमहोद्यतः ॥ २४ ॥ गरुडो हन्ति नागान्वै दृष्ट्वैव विनतात्मजः ॥
एवं स वार्यमाणोऽपि व्यालीं हन्ति स्म दारुणम् ॥ २५ ॥ तदा सा रुषिता देवी न किञ्चिदपि भाषते ॥ ततस्तस्यां तु वेलायां राजपुत्र्यप्रतो
विलात् ॥ २६ ॥ नकुलस्तु विनिर्गत्य आहारार्थं समुद्यतः ॥ दृष्ट्वा तु राजपुत्री सा नकुलं सर्पकांक्षिणम् ॥ २७ ॥ हृष्टं चंक्रममाणं सा नकुलं
शुभदर्शनम् ॥ क्रोधात्तं नकुलं चापि विनिहन्तुं प्रचक्रमे ॥ २८ ॥ वारिता राजपुत्रेण सुता प्राग्ज्योतिषस्य वै ॥ नकुलं घातितं दृष्ट्वा
मङ्गल्यं ऋषभदृशनम् ॥ २९ ॥ कुपितो राजपुत्रो वै राजपुत्र्यामभाषत ॥ स्त्रीणां भर्त्ता सदा मान्यस्तं मामुल्लङ्घ्य निर्घृणम् ॥ १३० ॥ दर्शनीयः
प्रियो राज्ञां मङ्गल्यः शुभदर्शनः ॥ घातितो नकुलः करूमान्मया वै वार्यमाणया ॥ ३१ ॥ इति भर्तृवचः श्रुत्वा प्राग्ज्योतिषसुता तदा ॥
प्रत्युवाच ततः क्रोधात्कोसलाधिपतेः सुतम् ॥ ३२ ॥ अतकुद्धार्यमाणोऽपि व्यालीं घातितवान्यतः ॥ तस्मान्मयापि नकुलो घातितः
सर्पघातकः ॥ ३३ ॥ राजपुत्र्या वचः श्रुत्वा राजपुत्रस्ततोऽब्रवात् ॥ वाग्भिः स कटुकाभिश्च तर्जयन्निव तां घरे ॥ ३४ ॥ सर्पस्तीव्रविषो भद्रे
तीक्ष्णदंष्ट्रो दुरासदः ॥ दशते मानुषं दुष्टो येनाऽसौ म्रियते जनैः ॥ ३५ ॥ तस्मान्मया हतो भद्रेऽहितकारी विषोद्धतः ॥ प्रजापाला वयं भद्रे येऽपि
चैवापथे स्थिताः ॥ ३६ ॥ सर्वांस्तान्दण्डयामो हि तीव्रदण्डैर्यथोचितम् ॥ साधून्ये चापि हिंसन्ति ह्यपराधविवर्जितान् ॥ ३७ ॥ स्त्रियं चैवापि
हिंसन्ति कामकाराश्च ये नराः ॥ ते दण्ड्याश्चैव वध्याश्च राजधर्मान्व्यथार्हतः ॥ ३८ ॥ मयापि राजधर्मो वै कर्तव्यो राजकर्मणि ॥ नकुलेनापराद्धं

किं तद्वद त्वं ममापि हि ॥ ३९ ॥ दर्शनीयः सुरूपश्च राज्ञां योग्यो गृहेषु च ॥ मङ्गल्यश्च पवित्रश्च नकुलः किं हतस्त्वया ॥ ॥ १४० ॥
वार्यमाणोऽपि हि मया घातितो नकुलस्ततः ॥ ततो मम न भार्यासि न चाहं ते पतिः स्थितः ॥४१ ॥ किञ्च तेन न हन्मि त्वां स्त्रियोऽवध्याः
सदैव यत् ॥ इत्युक्त्वा राजपुत्रस्तां निवृत्य नगरं प्रति ॥ ४२ ॥ एवं क्रोधं समादाय नष्टसंज्ञौ परस्परम् ॥ एवं गच्छति काले वै कोसलायां
जनाधिपः ॥ ४३ ॥ शृणोति तां कथां सर्वां वधं नकुलवर्षयोः ॥ एवं श्रुत्वा ययात्यायं सक्रोधो तादृभावपि ॥ ४४ ॥ ततः कञ्चुकिनश्चैव
स्वामात्यानप्यतः स्थितान् ॥ पुत्रं मम वधूं चैव समानयत सत्वरम् ॥ ४५ ॥ ततो वै राजभृत्यास्तु राज्ञो वै प्रियकारिणः ॥ राजाज्ञां तां
पुरस्कृत्य वधूं पुत्रं च सादरम् ॥ ४६ ॥ आनीय दर्शयामासुर्यत्र राजा स्वयं स्थितः ॥ वधूपुत्रौ ततो दृष्ट्वा राजा वचनमब्रवीत् ॥ ४७ ॥ पुत्र
कुत्र गतं प्रेम युवयोस्तत्तमाहितम् ॥ स्नेहश्च क्व गतः पूर्वो विरुद्धाचारणौ कथम् ॥ ४८ ॥ आतीद्या युवयोः प्रीतिरन्योऽन्यं जनुकाश्वत् ॥
दर्पणे प्रतिबिम्बं च दृश्यते यद्वदात्मनः ॥ ४९॥ सम्प्रयुक्तेन च सदा तद्वद्दृश्यो याऽभवत्पुरा ॥ दक्षा सुशीला धर्मिष्ठा नैनां त्यकुं त्वमर्हसि ॥१५०॥
अप्रियं नोक्तपूर्वं तु यया परिजनेऽपि च ॥ मिष्टान्नसाधने दक्षा त्वया त्यक्तं न युज्यते ॥ ५१ ॥ धनपूर्णस्तु ते धर्मः स च योपित्कृतः खलु ॥
अहो सत्यं जनानां च स तु स्त्रीभ्यः सुतः कुलम् ॥ ५२ ॥ ततः पितुर्वचः श्रुत्वा राजपुत्रो यशस्विनि ॥ उभौ तत्रारणौ गृह्य पितरं प्रत्यभाषत ॥५३॥
दोषो न विद्यते तात स्नुषायां कोऽपि कुत्रचित् ॥ किं मे तु वार्यमाणापि नकुले मेऽव्रतोऽहनत् ॥ ५४ ॥ ततोऽभवन्मम क्रोधो दृष्ट्वा
पातितमव्रतः ॥ क्रोधावसक्तेन तु मया यथेयं परिभाषिता ॥ ५५ ॥ मम भार्या न भवती न चाहं तव वै पतिः ॥ एतच्च
कारणं नान्यत्किञ्चिद्राजन्न संशयः ॥ ५६॥ ततः पतिवचः श्रुत्वा प्राग्ज्योतिषकुलोद्भवा ॥ शिरसा प्रणतिं कृत्वा इदं वचनमब्रवीत् ॥ ५७ ॥
अपराधविहीनश्च भीतश्च भुजगस्तथा ॥ शतशो वार्यमाणेन शीघ्रमेव निपातितः ॥ ५८ ॥ ततः सर्पेश्वरं दृष्ट्वा क्रोधसन्तप्तमानसा ॥ नाभाषितः
किमपि नो मयैतद्ववेहि वै ॥ ५९ ॥ वधूपुत्रवचः श्रुत्वा कोसलानां जनेश्वरः ॥ उवाच मधुरं वाक्यमुभयोर्जनतंतदि ॥ १६० ॥ अनेन निहतः
सर्पस्त्वया च नकुलो हतः ॥ कथं वा क्रियते क्रोधस्तन्मे वक्तुमिहार्हथ ॥ ६१ ॥ हते तु नकुले पुत्र किं ते क्रोधस्य कारणम् ॥ राजपुत्रि हते

सर्पे किं वा ते मन्युकारणम् ॥ ६२ ॥ ततः पितुर्वचः श्रुत्वा कोसलेश्वरनंदनः ॥ उवाच मधुरं वाक्यं राजपुत्रो महायशाः ॥ ६३ ॥ एतेन किं वा प्रश्नेन नेतत्पृष्टुं त्वमर्हसि ॥ एनां पृच्छ महाराज ज्ञास्यते कायचेष्टितम् ॥ ६४ ॥ पुत्रस्य वचनं श्रुत्वा कोसलानां जनेश्वरः ॥ उवाच मधुरं वाक्यं धर्मसंयोगसाधनम् ॥६५॥ ब्रूहि पुत्र यथान्यायं यते मनसि वर्तते ॥ प्रीतिविच्छेदकारणमुभयोरिह कथ्यताम् ॥ ६६ ॥ जाताः सम्बन्धिनाः पुत्राः सर्वकामेषु निश्चिताः ॥ पितृपृष्टं तु यद्गह्यं गोपयंति सुताधमाः ॥ ६७ ॥ सत्यं वा यदि वाऽसत्यं न ब्रुवंति कदाचन ॥ पतंति नरके घोरे रौरवे तप्तवालुके ॥ ६८ ॥ पित्रा पृष्टं तु ये ब्रूयुः शुभं वाशुभमेव वा ॥ दिव्यां च ते गतिं यांति या गतिः सत्यवादिनाम् ॥ ६९ ॥ अवश्यमेव तद्वाक्यं वक्तव्यं मम सन्निधौ ॥ यस्य दोषेण ते पुत्र नष्टा प्रीतिर्गुणाकरा ॥ १७० ॥ ततः पितुर्वचः श्रुत्वा कोसलानन्दिवर्द्धनः ॥ उवाच श्लक्ष्णया वाचा तत्रैव जनसंसदि ॥ ७१ ॥ गच्छत्वेष जनः सर्वो यथान्यायं गृहाणि वै ॥ प्रातरुत्थां कथयिष्यामि यद्वक्तव्यमवश्यकम् ॥७२॥ प्रभातायां तु शर्वर्यां दुंदुभीनां विनादनैः ॥ निबुद्धः कोसलश्रेष्ठः सूतमागधवन्दिभिः ॥ ७३ ॥ तदा कमलपत्राक्षो राजपुत्रो महायशाः ॥ स्नात्वा च मङ्गलैर्युक्तो राजद्वारमुपागतः ॥ ७४ ॥ ततस्तु कंचुकी गत्वा राज्ञे चैव न्यवेदयत् ॥ द्वारि तिष्ठति पुत्रस्ते तव दर्शनलालसः ॥ ७५ ॥ कंचुकेस्तु वचः श्रुत्वा कोसलानां जनेश्वरः ॥ शीघ्रं प्रवेशय सुतं कंचुके साधुवादिनम् ॥ ७६ ॥ इत्युक्तो राजपुत्रं तु प्रावेशयदनुज्ञया ॥ राजपुत्रः पितुर्वेश्म प्रविश्य नियतः शुचिः ॥ ७७ ॥ ववन्दे चरणौ मूर्ध्ना निषीदेति सुतं ततः ॥ तमत्रवीत्पिता जीव जयेत्युक्त्वा मुदान्वितः ॥ ७८ ॥ पितृपुत्रौ तु विज्ञेयौ जनैस्त्वेकत्र संस्थितौ ॥ हर्षितस्त्वान्तरो बाह्यः कृतकौतुकमङ्गलः ॥ ७९ ॥ ततः पुत्रं प्रहस्याह कुमारं स जनाधिपः ॥ वद पुत्र महाभाग पूर्वं पृष्टं मया हि यत् ॥ १८० ॥ युवयोः प्रीतिविच्छेदे कारणं गोपितं हि यत् ॥ ततो राजकुमारस्तं पितरं प्रत्यभाषत ॥८१॥ अवश्यमेव वक्तव्यं त्वया पृष्टेन निष्फलम् ॥ तद्गह्यं हि महाराज प्रीतिविच्छेदकारकम् ॥ ८२ ॥ यदीच्छसि महाराज श्रोतुं गुह्यमिदं महत् ॥ आगच्छ तात कुञ्जाग्रे मया सह महीपते ॥ ८३ ॥ तत्र ते कथयिष्यामि कोसलाधिपते त्वरन् ॥ यत्त्वया पृच्छितं ह्येतद्गह्यं पूर्वमनिन्दितम् ॥ ८४ ॥ ततस्तस्य वचः श्रुत्वा राजपुत्रस्य वै नृपः ॥ बाढमित्येव तत्राह पुत्रप्रेम्णा समन्वितः ॥ ८५ ॥ राजपुत्रे गते सुधृ

अमात्यानां च सन्निधौ ॥ उवाच मधुरं वाक्य ये वै तत्र समागताः ॥ ८६ ॥ अमात्याः शृणुतेमं मे वचनं कृतनिश्चयम् ॥ कुब्जाम्रकं प्रति वयं गच्छामस्तस्य साधनम् ॥ ८७ ॥ शीघ्रं सम्पाद्यतां चैव युज्यन्तां गजवाजिनः ॥ राज्ञो वचस्तं संश्रुत्य तमूचुः कृतमेव तत् ॥ ८८ ॥ इत्युक्त्वा सत्रराजेन सर्वं सम्पाद्य साधनम् ॥ गजाश्वपशुयानादिकार्पापणकधेनुकम् ॥ ८९ ॥ सुवर्णरत्नवस्त्राणि अन्नं चान्यदपेक्षितम् ॥ राजानं ते समागत्य सिद्धमित्यूचुरीश्वरम् ॥ १९० ॥ ततः स राजशार्दूलः पुत्रमाह वसुन्धरे ॥ राज्यं शून्यं कथं त्यक्त्वा गमिष्यामो वयं सुत ॥ ९१ ॥ ततः पितुर्वचः श्रुत्वा राजपुत्रो महायशाः ॥ उवाच मधुरं वाक्यं गृहीत्वा चरणौ पितुः ॥ ९२ ॥ कनीयानेष मे भ्राता एकोदर समुद्भवः ॥ एतस्य दीयतां राज्यं यथान्यायेन चागतम् ॥९३ ॥ पुत्रस्य वचनं श्रुत्वा कोसलानां कुलोद्वहः ॥ वर्त्तमानेऽपि च ज्येष्ठे कनीयान् कथमर्हति ॥ ९४ ॥ ततः पितुर्वचः श्रुत्वा कोसलायाः कुलोद्भवः ॥ उवाच मधुरं वाक्यं पितरं धर्मकारणात् ॥ ९५ ॥ अनुजानामि ते तात दीयमानां वसुन्धराम् ॥ नास्य धर्मविलोपस्तु भुञ्जमानस्य मेदिनीम् ॥९६ ॥ नाहं कुब्जाम्रकं गत्वा निवर्त्तिष्ये कदाचन ॥ एतत्सत्यं च धर्मश्च तात ते कथितं मया ॥ ९७ ॥ पुत्रेण चाभ्यनुज्ञातः कनीयानभिषेचितः ॥ स मुख्येनाभ्यनुज्ञातो भूमे भूपतिसत्तमः ॥ ९८ ॥ ततो दीर्घेण कालेन स्थानं कुब्जाम्रकं गतः ॥ अन्तःपुरेण सहितः सर्वद्रव्यसमन्वितः ॥ ९९ ॥ ततस्तीर्थावधिं कृत्वा दत्त्वा दानानि भूरिशः ॥ अन्नवस्त्र सुवर्णानि गोहस्त्यश्वभुवस्तथा ॥ २०० ॥ ततो बहुतिथे काले व्यतीते सति धर्मिताम् ॥ ततः कदाचिद्भूपालो राजपुत्रमुपस्थितम् ॥ १ ॥ दम्पत्योः प्रीतिविच्छेदं गुह्यं तत्समपृच्छत ॥ स्थानं पावनकं वत्स विष्णोः पादसमाश्रयम् ॥२॥ दत्तानि धनरत्नानि जातस्तस्य विधिः परः ॥ इदानीं ब्रूहि सत्यं तद्यत्कृते सुन्दरी सुषा ॥ ३ ॥ अदुष्टकारिणी युक्ता कुलशीलगुणान्विता ॥ त्वया मिथ्यैव किं त्यक्ता तद्ब्रूह्यं वद पुत्रक ॥४॥ ततः स पितरं प्राह रात्रिगच्छतु सुप्यताम् ॥ श्वः प्रभाते ततः सर्वं कथयिष्यामि तत्पुनः ॥ ५ ॥ ततो राज्यां व्यतीतायामुदिते च दिवाकरे ॥ कृतोदकस्तु गङ्गायां क्षौमवस्त्रविभूषितः ॥ ६ ॥ अर्चयित्वा यथान्यायं मां चैव गुरुवत्सलः ॥ पितुः प्रदक्षिणं कृत्वा वाक्यमेतदुदाहरत् ॥ ७ ॥ एह्येहि तात गच्छामः यस्त्वं गुह्यानि पृच्छसि ॥ शृणु तत्त्वेन मे राजन्यत्त्वया पूर्वपृच्छितम् ॥८॥ राजपुत्रश्च वै राजा सा च पङ्कजलोचना ॥

गत्वा निर्माल्यकूटं ते यत्तद्दृतं पुरातनम् ॥ ९॥ निर्माल्यं तु समासाद्य राजपुत्रो महातपाः ॥ उभौ तौ चरणौ गृह्य पितरं प्रत्यभापत॥२१०॥
नकुलोऽहं महाराज वसामि कदलीतले ॥ ततोऽहं कालसंयुक्तः प्राप्तो निर्माल्यकूटकम् ॥ ११ ॥ ततस्त्वाशीविषा सर्पी सर्पतेऽत्र जनाधिप ॥
भक्षयन्ति सुगन्धानि पुष्पाणि विविधानि च ॥१२॥दृष्ट्वा तु तां महाव्यालीं क्रोधसंरक्तलोचनः ॥ आचिरेणैव कालेन तस्याङ्गं सहसा गतः॥१३॥
तया सह महाराज घोरं युद्धमवर्त्तत ॥ माघमासस्य द्वादश्यां तत्र काश्चिन्न पश्यति ॥१४ ॥ युध्यमानस्य मे तत्र गात्रं चैव निगृह्यतः ॥ नासांशे
तया दष्टो भुजङ्गया च तदन्तरे ॥१५॥ मयापि विषदिग्धेन निहता च भुजंगमा ॥ उभौ प्राणान्परित्यज्य उभौ पंचत्वमागतौ ॥१६॥ मृतौ स्व
काले राजेन्द्र क्रोधमोहपरिच्युतौ ॥ जातोऽहं तव पुत्रस्तु कोसलाधिपतेः प्रियः ॥ १७ ॥ एवं मे घातितः सर्पस्तत्क्रोधवशानिश्चयात् ॥ एतद्वृत्तं
मया राजन्यत्त्वया पूर्वपृच्छितम् ॥ १८ ॥ राजपुत्रवचः श्रुत्वा वधूर्वचनमब्रवीत् ॥ अहं सर्पी महाराज पुरा निर्माल्यकूटके ॥ १९ ॥ युध्य
माना तु तेनैव नकुलेन निपातिता ॥ प्राग्ज्योतिषकुले जाता जाता तव वधूस्ततः॥२०॥ तेन क्रोधेन नृपते मूर्च्छिता मरणं प्रति ॥ घातितो
नकुलश्चैतद्वृत्तं प्रोक्तं तव प्रभो ॥ २१ ॥ वधूपुत्रवचः श्रुत्वा स राजा सांशितव्रतः ॥ मायातिथिं समासाद्य ततः पंचत्वमागतः ॥ २२ ॥ राजपुत्रो
विशालाक्षी राजपुत्री यशस्विनी ॥ २३ ॥ पौण्डरीकं ततस्तीर्थं तेऽपि पंचत्वमागताः ॥ २४ ॥ गतास्ते परमं स्थानं यत्र देवो जनार्दनः ॥
राजा वा राजपुत्रश्च राजपुत्री यशस्विनी ॥ २५ ॥ मम चैव प्रसादेन तपसश्च बलेन च ॥ कृत्वा सुदुष्करं कर्म श्वेतद्वीपमुपागताः ॥ २६ ॥
योऽसौ परिजनो देवि कृत्वा तु सुकृतं महत् ॥ सोऽपि सिद्धिं परां प्राप्तः श्वेतद्वीपमुपागतः ॥२७॥ एष ते कथिता देवि पुष्टिः कुब्जाग्रकस्य
च ॥ तस्य ब्राह्मणमुख्यस्य रैभ्यस्य कथिता मया ॥ २८ ॥ एतत्पुण्यं परं जप्यं चातुर्वर्ण्येन सर्वदा ॥ सर्वकर्मसु मुख्यं च एतदेव
विशिष्यते ॥२९॥ तेजसां च महत्तेजस्तपसां च महत्तपः ॥ एतन्न मूर्खमध्ये तु पठेच्चापि कदाचन ॥२३०॥ न पठेद्गोघ्नमध्ये तु वेदवेदाङ्गनिन्दके ॥ ॥१०९॥
न पठेद्वृषविद्विष्टे न पठेच्छास्त्रदूषके ॥ ३१ ॥ पठेद्भागवतानां च मध्ये दीक्षावतां तथा ॥ य एतत्पठते भूमे कल्यमुत्थाय मानवः ॥ ३२ ॥
तारयेच्च स्वकुलजान् दशपूर्वान्दशापरान् ॥ एतत्तु पठमानो वै यस्तु प्राणान्विमुंचति ॥ ३३ ॥ चतुर्भुजश्च जायेत मल्लोकेषु प्रतिष्ठितः ॥ एतत्ते

कथितं भूमे स्थानं कुब्जाम्रके तथा ॥ मम भक्तसुखार्थाय किमन्यत्परिपृच्छसि ॥ २३४ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे कुब्जाम्रक माहात्म्ये रेभ्यानुग्रहणं नाम षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६॥ अथ ब्राह्मणदीक्षासूत्रवर्णनम् ॥ सूत उवाच ॥ एवं धर्मांस्ततः श्रुत्वा बहुमोक्षार्थकारणात् ॥ प्रत्युवाच ततो भूमिर्लोकनाथं जनादनम् ॥ १ ॥ अहो प्रभावः क्षेत्रस्य कथ्यमानोऽतिपुष्कलम् ॥ अहं भारभराक्रान्ता लघुर्जाताऽस्मि धावती ॥ २ ॥ विमोहा च विशुद्धा च शृण्वानाहं त्विमां प्रभो ॥ अहं लोकेषु विख्याता सुखात्तव विनिस्सृता ॥ ३ ॥ पुनः पृच्छामि ते देव संशयं धर्मसंहितम् ॥ येन धर्मविधानेन दीक्षा प्राप्येत पुष्कला ॥४॥ एतन्मे परमं गुह्य परं कौतूहलं च मे ॥ धर्मसंग्रहणार्थाय तद्भवान्वक्तुमर्हसि ॥ ५ ॥ ततो महीवचः श्रुत्वा मेघदुन्दुभिनिःस्वनः ॥ वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥ ६ ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि मम धर्मं सनातनम् ॥ देवा एतन्न जानन्ति ये च योगव्रते स्थिताः ॥ ७ ॥ एतं धर्मं वरारोहे मद्भक्त्यं सुखनिःसृतम् ॥ अहमेको विजानामि मद्भक्ता ये जना भुवि ॥ ८॥ यच्च पृच्छसि मे भद्रे दीक्षां भागवतीं कथाम् ॥ तच्छृणुष्व वरारोहे कर्मसंसारमोक्षणम् ॥९॥ मयोक्तां लभते काश्चिद्दीक्षां चैव सुखावहाम् ॥ चातुर्वर्ण्यविधानेन तां दाक्षा शृणु सुन्दरि ॥ १० ॥ हरन्ति मनुजा येन गर्भसंसारसागरात् ॥ मथि शान्तं मनः कृत्वा तदुत्कृष्टं च सुन्दरि ॥ ११ ॥ अभिगच्छद्गुरुं देवि ज्ञाधि शिष्योऽस्मि मां गुरो ॥ तदाज्ञां तु पुरस्कृत्य दीक्षाद्रव्यान थाहरेत् ॥ १२ ॥ लाजा मधु कुशाश्चैव घृतं चामृतसन्निभम् ॥ गन्धं सुमनसो धूपं दाप प्रापणकादिकम् ॥ १३ ॥ कृष्णाजिनं च पालाशं दण्डं चैव कमण्डलुम् ॥ घटं वासः पादुकं च शुक्लयज्ञोपवीतकम् ॥ १४ ॥ यन्त्रिकामर्घपात्र च चरुस्थाली सदर्विकाम् ॥ तिलव्रीहियवां श्चैव विविधं च फलोदकम् ॥ १५ ॥ भक्ष्यभोज्यान्नपान च कमण्यांश्चैव संचयान् ॥ दीक्षिता यदि भुञ्जन्ति मम कर्मपरायणाः ॥ १६ ॥ यानि कानि च बीजानि रत्नानि विविधानि च ॥ काचकादीनि सुश्रोणि तानि शीघ्रमुपाहरेत् ॥ १७ ॥ एतान्येवोपहार्याणि गुरुमूले ततः परम् ॥ स्नात्वा मङ्गलसंयुक्तो दीक्षाकामश्च ब्राह्मणः ॥ १८ ॥ गुरोस्तु चरणौ गृह्य ब्रूहि किं करवाणि ते ॥ ततस्तु गुरुनुज्ञातो वेदिं कुर्याच्च पुष्कलाम् ॥ १९ ॥ ब्राह्मणो दीक्षमाणस्तु चतुरस्रां तु षोडशहस्तां कृत्वा तत्र च कलशोपरि युञ्जेत ॥ २० ॥ प्रतिष्ठाप्य विधानन धान्योपरि

दृढं नवम् ॥ जलेन पूरितं मन्त्रैः पुष्पपल्लवशोभितम् ॥ २१ ॥ तस्योपरि तिलैः पूर्णपात्रं स्थाप्य विधानतः ॥ पूजयेन्मां गुरुं द्रव्यैः शिष्ये णैवोपकल्पितैः ॥ २२ ॥ तत्रार्चनाविधिं कृत्वा गुरुधर्मविनिश्चयः ॥ पूर्वोक्तानि च द्रव्याणि वेदिमध्यमुपाहरेत् ॥ २३ ॥ चतुरः कलशान्दद्याच्चतुष्पार्श्वेषु सुन्दरि ॥ वारिपूर्णाद्विजाञ्छुद्धान्सहकारविभूषितान् ॥ २४ ॥ सवेतः शुक्लसूत्रेण वेष्टयेत तथानघे ॥ पूर्ण पात्राणि चत्वारि चतुष्पार्श्वेषु स्थापयेत् ॥ २५ ॥ एवं मन्त्रं ततः कृत्वा दद्यादीक्षाप्रयोजकः ॥ स च मन्त्रो यथान्यायं येन वा तुष्यते गुरुः ॥ २६ ॥ यथान्यायं च संगृह्य गुरुकर्मविनिश्चितः ॥ प्रपद्यावसथं विष्णोर्दीक्षाणां परिकाङ्क्षिणः ॥ २७ ॥ उपस्पृश्य यथान्यायं भृत्वा पूर्वमुखस्ततः ॥ सर्वांस्तु श्रावयेच्छिष्यान्दीक्षणार्थं न संशयः ॥ २८ ॥ यस्तु भागवतान्दृष्ट्वा स्वयं भागवतः शुचिः ॥ अभ्युत्थानं न कुर्वीत तेनाहं तु विहिंसितः ॥ २९ ॥ कन्यां दत्त्वा पुनस्तांस्तु कर्मणा नोपपादयेत् ॥ अष्टौ पितृगणास्तेन हिंसिता नात्र संश यः ॥ ३० ॥ भार्यां प्रियसखीं यस्तु साध्वीं हिंसति निर्घृणः ॥ न तेन तां प्राप्नुवन्ति हिंसका दुष्टयोनिजाः ॥ ३१ ॥ ब्रह्मघ्नश्च कृतघ्नश्च गोघ्नश्च कृतपातकाः ॥ एताञ्छिष्यान् विवर्जेत उक्ता ये चान्यपातकाः ॥ ३२ ॥ बिल्ववृक्षोदुम्बरौ च तथा चान्ये कदाचन ॥ कर्मण्याश्चैव ये वृक्षा न च्छेत्तव्याः कदाचन ॥ ३३ ॥ यदिच्छेत्परमां सिद्धिं मोक्षधर्मं सनातनम् ॥ भक्ष्याभक्ष्यं च तं शिष्यं वेदितव्यं तदन्तरे ॥ ३४ ॥ करीरस्य वधः शस्तः फल्गुन्यौदुम्बरस्य च ॥ सद्योभक्षी भवेत्तेन अभक्ष्या पूतिवासिका ॥ ३५ ॥ न भक्षणीयं वाराहं मांसं मत्स्याश्च सर्वशः ॥ अभक्ष्या ब्राह्मणैरेते दीक्षितैश्च न संशयः ॥३६॥ परीवादं न कुर्वीत न हिंसां वा कदाचन ॥ पैशुन्यं न च कर्त्तव्यं स्तैन्यं वापि कदाचन ॥ ३७ ॥ आतिथिं चागतं दृष्ट्वा दूराच्चानं गत कैंचित् ॥ संविभागस्तु कर्त्तव्यो येन केनापि पुत्रक ॥३८॥ गुरुपत्नी राजपत्नी ब्राह्मणस्त्री कदाचन ॥ मनसापि न गन्तव्या एवं विष्णुः प्रभाषते ॥ ३९ ॥ कनकादीनि रत्नानि यौवनस्था च कामिनी ॥ तत्र चित्तं न कर्त्तव्यमेवं विष्णुः प्रभाषते ॥ ४० ॥ दृष्ट्वा परस्य भाग्यानि आत्मनो व्यसनं तथा ॥ तत्र मन्युर्न कर्त्तव्यं एवं धर्मः सना तनः ॥ ४१ ॥ एवं ततः श्रावयीत दीक्षाकामं वसुन्धरे ॥ छत्रं चोपानहं चैव मनसा चोपकल्पयेत् ॥४२॥ द्वे द्वे औदुम्बरस्य पत्रे वेदिमध्ये तु

स्थापयेत् ॥ क्षुरं चैव वरारोहे जलपूर्णं च भाजनम् ॥ ४३ ॥ ममावाहनपूर्वं तु मन्त्रेण विधिनार्चयेत् ॥ मन्त्रः–ॐ सप्त सागराश्च सप्तद्वीपानि सप्त पर्वताश्च दश स्वर्गसहस्राश्च समस्ताश्च नमोऽस्तु सर्वास्ते हृदये वसन्ति॥ यश्चेतद्वर्षति पुनरुन्नमति॥४४॥ ॐ भगवन्वासुदेव ममेतत्कार्य युक्तं वराहरूपसृष्टेन पृथिव्यां तु मन्त्रानुस्मरणं च य आज्ञापयानुभावनास्माकमाज्ञप्तमनुचिन्तयित्वा भगवन्नागच्छ दीक्षाकामविप्रस्त्वत्प्रसादात्तु दीक्षति ॥ ४५ ॥ एतन्मन्त्रमुदाहृत्य शिरसा जानुभ्यामवनिं गतेन भवितव्यम् ॥ ४६ ॥ ॐ स्वागतं स्वागतवानिति ॥ ४७ ॥ तत एतेन मन्त्रेण आनयित्वा वसुन्धरे ॥ अर्घ्यं पाद्यं च दातव्यं मन्त्रेण विधिनिश्चयात् ॥४८॥ मन्त्रः–अकृतघ्ने देवानसुराकृतघ्नरुद्रेण ब्राह्मणाय च लब्धं सर्वमिमां भगवतेऽस्तु दत्तं प्रतिगृह्णीष्व च लोकनाथ ॥ ४९ ॥ एवं भूमे ततो दत्त्वा अर्घ्यं पाद्यं च कर्मणा॥ क्षुरं गृहीत्वा यथान्यायमिमं मन्त्रमुदीरयेत् ॥५०॥ मन्त्रः–एवं वरुणः पातु शिष्य ते वपतः शिरः ॥ जलेन विष्णुयुक्तेन दीक्षा संसारमोक्षणम्॥५१॥एकस्य कलशं दद्यात्कर्मकारस्य सुन्दरि ॥निष्कलं तु शिरः कृत्वा शोणीतेन विवार्जितम् ॥५२॥पुनः स्नानं ततः कृत्वा शीघ्रमेव न संशयः॥एतस्य विधिवत्कृत्वा दीक्षा कामस्य सुन्दरि॥५३॥दत्त्वा संसारमोक्षाय सर्वकामविनिश्चितः॥जानुभ्यामवनिं गत्वा इमं मन्त्रमुदीरयेत्॥५४॥मन्त्रः–ॐ वेदाम्यहं भागवतांश्च सर्वान् सुदीक्षिता ये गुरवश्च सर्वे ॥ विष्णुप्रसादेन च लब्धदीक्षा मम प्रसीदन्तु नमामि सर्वान् ॥५५॥नत्वा तु भगवद्भक्तान् प्रज्वाल्य च हुता शनम् ॥ घृतेन मधुमिश्रेण लाजाकृष्णातिलैस्तथा ॥५६॥ सप्तवारांस्ततो दत्त्वा विंशतिं च तिलोदनम् ॥ जानुभ्यामवनिं गत्वा इमं मन्त्रमुदाहरेत्॥५७॥ मन्त्रः–अग्निर्नो दिशः सोमसूर्यौ साक्षिमात्रं वयं प्रसन्नाः शृण्वन्तु मे सत्यवाक्यं वदामि ॥५८॥ सत्येन धार्यते भूमिर्भूमिः सत्येन तिष्ठति ॥ सत्येन गच्छते सूर्यो वायुः सत्येन वाति च॥५९ ॥ एवं सत्यं ततः कृत्वा ब्राह्मणा दक्षिणं पुनः॥गुरुं प्रसादयेत्तत्र मन्त्रेण विधिनार्चयन् ॥ ६० ॥ तिस्रः प्रदक्षिणाः कृत्वा देवं भागवतं गुरुम् ॥ गुरुपादौ तु संगृह्य इमं मन्त्रमुदीरयेत् ॥ ६१ ॥ मन्त्रः–गुरुदेवप्रसादेन लब्धा दीक्षा यदृच्छया ॥ यच्चेवापकृतं किंचिद्गुरुर्मर्षयतां मम ॥ ६२ ॥ एवं प्रसादयित्वा तु शिष्यो मन्त्रेण सुन्दरि ॥ वेदिमध्ये स्थापयित्वा भूत्वा पूर्वमुखस्ततः ॥ ६३ ॥ शिष्यमेव यतो दृष्ट्वा गृहीत्वा च कमण्डलुम् ॥ शुक्लयज्ञोपवीतं च इमं मन्त्रमुदाहरेत् ॥ ६४ ॥ मन्त्रः–विष्णु

प्रसादेन गतोऽसि सिद्धिं प्राप्ता च दीक्षा सकमण्डलुश्च ॥ गृहीत्वा तु कराभ्यां युक्तोऽसि कर्मणा क्रियायां चैव ॥ ६५ ॥ ततो मुखपदं कृत्वा दीक्षितो गुरुणा तथा ॥ सर्वप्रदक्षिणं कृत्वा इमं मन्त्रमुदाहरेत् ॥ ६६ ॥ अधोऽधो भूत्वा यद्यहं भ्राम्यडँल्भ्यो गुरुर्विष्णुर्दीक्षा च लब्धा ॥ तव प्रसादाच्च गुरो यथा च ॥ ६७ ॥ एतेन मन्त्रेण मुखं पदं कारयेत् ॥ शौचसंके वै कुर्यादेवान्तत्रुवाससम् ॥ ६८ ॥ एवं वै वास आदत्ते गृह्य वत्स कमण्डलुम् ॥ इमं लोकेषु विख्यातं शोधनं सर्वकर्मसु ॥ ६९ ॥ मन्त्रः–गृह्णीष्व गन्धपात्राणि सर्वगन्धं सुखोचि तम् ॥ सर्ववैष्णवकं शुद्धं सर्वसंसारमोक्षणम् ॥ ७० ॥ मधुपर्कं गृहीत्वा च त्विमं मन्त्रमुदीरयेत् ॥ मन्त्रः–गृहाण मधुपर्कं च प्रार्थकाय विशोधनम् ॥ ७१ ॥ ततो गृहीत्वा चरणौ गुरोर्यत्नात्सुतोषयेत् ॥ शिरसा चाञ्जलिं कृत्वा मनश्चैव सुसंयतम् ॥ गुरूपदिष्टं सन्धार्यं इमं मन्त्रमुदीरयेत् ॥ ७२ ॥ मन्त्रः–शृण्वन्तु मे भागवतास्तु सर्वे गुरुश्च मे सर्वकामक्षयं चकार ॥ अहं शिष्यो दासभूतस्तथैव देवसमो गुरुश्च मे तथोपपन्नम् ॥ ७३ ॥ एषागमे ब्राह्मणस्य दीक्षा भूमे ह्युदाहृता ॥ त्रयाणामथ वर्णानां मम दीक्षाविधींश्शृणु ॥ ७४ ॥ एतेनैव विधा नेन दीक्षयेत वसुन्धरे ॥ उभौ च प्राप्तुतां सिद्धिमाचार्यः शिष्य एव च ॥ ७५ ॥ इति श्रीवराहपुराणे ब्राह्मणदीक्षासूत्रं नाम सप्तविंशत्य धिकशततमोऽध्यायः ॥ १२७ ॥ अथ कङ्कृताञ्जनदर्पणम् ॥ श्रीवराह उवाच ॥ क्षत्रियस्य प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ त्यक्त्वा प्रहर णान्सर्वान्यत्किंचित्पूर्वशिक्षितम् ॥ १ ॥ पूर्वमन्त्रेण मे भूमे तस्य दीक्षां च कारयेत् ॥ मया च पूर्वमुक्तानि यानि संसारकाणि च ॥ २ ॥ तानि सर्वाणि चानीय एकं वर्ज्य यशस्विनि ॥ न दद्यात्कृष्णसारस्य चर्म तत्र कदाचन ॥ ३॥ पालाशं दण्डकाष्ठं च दीक्षायां न तु कारयेत् ॥ छागस्य चैव कृष्णस्य चर्म तत्र प्रदापयेत् ॥ ४ ॥ आश्वत्थं दण्डकाष्ठं तु दीक्षायां तदनन्तरम् ॥ कृत्वा द्वादशहस्तां तु वेदिं तत्रोपलेप येत् ॥ ५ ॥ सर्वं ममोक्तं कर्त्तव्यं यच्च मे पूर्वभाषितम् ॥ एवं क्षत्रियदीक्षायां सर्वं सम्पाद्य यत्नतः ॥ ६ ॥ चरणौ मम संगृह्य इमं मन्त्र मुदाहरेत् ॥ ७ ॥ मन्त्रः–त्यक्तानि विष्णो शस्त्राणि त्यक्तं सर्वं क्षत्रियकर्म सर्वम् ॥ त्यक्त्वा देवं विष्णुं प्रपन्नोऽथ संसाराद्धे जन्मनां तार यस्व ॥ ८ ॥ एवं ततो वचश्चोक्त्वा क्षत्रियो मम पार्श्वतः ॥ उभौ च चरणौ गृह्य इमं मन्त्रमुदीरयेत् ॥ ९ ॥ मन्त्रः–नाहं शस्त्रं देवदेव स्पृशामि

परापवादं न च देव ब्रवीमि ॥ कर्म करोमि संसारमोक्षणं त्वया चोक्तमेव वराहसंस्थान् ॥ १० ॥ तत एवं वचो ब्रूते सर्वं चैवात्र पूजयेत् ॥
विविधैर्गन्धपद्मैश्च धूपैश्चैव यथोदितम् ॥ ११ ॥ यथोक्तेनैव तान्भूमे भोजयेत्तदनन्तरम् ॥ शुद्धान्भागवतांश्चैव एवमेतन्न संशयः ॥ १२ ॥ एषा वै क्षत्रिये दीक्षा देवि संसारमोक्षणम् ॥ मत्प्रसादेन कर्त्तव्यं यदीच्छेत्सिद्धिमुत्तमाम् ॥ १३ ॥ वैश्यस्य चैव वक्ष्यामि शृणु तत्त्वेन सुन्दरि ॥ दीक्षा च यादृशी तस्य यथा भवति सुन्दरि ॥ १४ ॥ त्यक्त्वा तु वैश्यकर्माणि मम कर्मपरायणः ॥ यथा च लभते सिद्धिं तृतीया वर्णसंस्थितिः ॥ १५ ॥ सर्वं तत्र समानीय यन्मया पूर्वभाषितम् ॥ दशहस्तां ततः कृत्वा वेदिं वेदविचेंतितः ॥ १६ ॥
लेपयेद्गोमयेनादौ पूर्वन्यायेन तत्र वै ॥ चर्मणापि तु छागस्य स्वगात्रं परिवेष्टयेत् ॥ १७ ॥ उदुम्बरं दन्तकाष्ठं गृहीत्वा दक्षिणे करे ॥ शुद्धभागवतानां च कृत्वा त्रिः परिवर्त्तनम् ॥ १८ ॥ जानुभ्यामवनिङ्कृत्वा इमं मन्त्रमुदीरयेत् ॥ १९ ॥ मन्त्रः—अहं हि वैश्यो भवन्तमुपागतः प्रमुच्य कर्माणि च वैश्ययोगम् ॥ दीक्षा च लब्धा भगवत्प्रसादात्प्रसीदतां मे भवबन्धमोक्षणम् ॥ २० ॥ मामेवं सोपि चोक्त्वा वै मम कर्मप्रसादवान् ॥ गुरोश्च चरणौ गृह्य इमं मन्त्रमुदाहरेत् ॥ २१ ॥ त्यक्त्वा वै कृषिगोरक्षावाणिज्यक्रयविक्रयम् ॥ लब्धा च त्वत्प्रसादेन विष्णुदीक्षा मयाऽधुना ॥ २२ ॥
देवाभिवादनं कृत्वा पुरो भागवतेषु च ॥ पश्चात्तु भोजनं दद्यादपराधबहिष्कृतम् ॥ २३ ॥ एवं दीक्षा तु वैश्यानां मम मार्गानुसारिणाम् ॥ येन मुच्यन्ति सुश्रोणि घोरसंसारसागरात् ॥ २४ ॥ शूद्रस्यापि प्रवक्ष्यामि मद्भक्तस्य वराङ्गने ॥ यस्तु दीक्षां समासाद्य मुच्यते सर्वकिल्बिषैः ॥ २५ ॥
सर्वसंस्कारदग्ध्याणि मया पूर्वोदितानि च ॥ दीक्षाकामस्य शूद्रस्य शीघ्रं तानि प्रकल्पयेत् ॥ २६ ॥ अष्टहस्तां ततो देवि सँछिद्य नीयतां ततः ॥
चर्म नीलस्य छागस्य कल्पयेच्छूद्रयोनये ॥ २७ ॥ दण्डं च वैष्णवं दद्यान्नीलं वस्त्रं च तस्य वै ॥ एवं गृहीत्वा शूद्रोऽपि दीक्षायाः कारणं परम् ॥ २८ ॥ ममैव शरणं गत्वा इमं मन्त्रमुदाहरेत् ॥ मन्त्रः—शूद्रोऽहं शूद्रकर्माणि मुक्त्वाऽभक्ष्यं च सर्वशः ॥ २९ ॥ भक्ष्याभक्ष्यं ततस्त्यक्त्वा त्यक्त्वा वै शूद्रकर्म च ॥ एवं वदेत्ततो देवं शूद्रो दीक्षाभिकांक्षिणम् ॥ ३० ॥ विमुक्तः सर्वपापेभ्यो लब्धसंज्ञो गतस्पृहः ॥ उभौ तौ चरणौ गृह्य गुरुर्वै तदनन्तरम् ॥ ३१ ॥ गुरोः प्रसादनार्थाय इमं मन्त्रमुदाहरेत् ॥ ३२ ॥ मन्त्रः—विष्णुप्रसादे गुह्यं प्रसन्नात्पूर्ववच्च लब्धा

चैव संसारमोक्षणाय करोमि कर्म प्रसीद ॥ ३३ ॥ एतन्मत्रं समुच्चार्य कुर्यात्तत्र प्रदक्षिणम् ॥ चतुरश्च यथान्यायं पुनश्चैवाभिवादयेत् ॥ ॥ ३४ ॥
अनन्तरं ततः कुर्याद्गन्धमाल्येन चार्चनम् ॥ भोजयेच्च यथान्यायमपराधविवर्जितः ॥ ३५ ॥ दीक्षा एषा च शूद्राणामुपचारश्च ईदृशः ॥ चतुर्णा
मपि वर्णानां दुःखसंसारमोक्षणम् ॥ ३६ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ चतुर्णामपि वर्णानां यथा छत्रं प्रदीयते ॥ ३७ ॥
ब्राह्मणे पाण्डुरं छत्रं क्षत्रिये रक्तमेव च ॥ वैश्याय पीतं वै दद्यान्नीलं शूद्राय दापयेत् ॥ ३८ ॥ सूत उवाच ॥ चातुर्वर्ण्यस्य श्रुत्वा वै सा
मही संशितव्रता ॥ वराहं पुनरप्याह नत्वा सा धरणी तदा ॥ ३९ ॥ धरोवाच ॥ श्रुता दीक्षा यथान्यायं चातुर्वर्ण्यस्य केशव ॥ दीक्षितैः किं नु
कर्त्तव्यं तव कर्मपरायणैः ॥ ४० ॥ ततो मह्यीवचः श्रुत्वा मेघदुन्दुभिनिःस्वनः ॥ वराहरूपी भगवानुवाच स महाद्युतिः ॥ ४१ ॥ श्रीवराह
उवाच ॥ शृणु तत्त्वेन कल्याणि यन्मां त्वं परिपृच्छसि ॥ सर्वत्र चिन्तनीयोऽहं गुह्यमेव गणान्तिकम् ॥ ४२ ॥ नारायणवचः श्रुत्वा धरणी
शंसितव्रता ॥ हृष्टतुष्टमनास्तत्र श्रुत्वा तच्च महौजसम् ॥ ४३ ॥ शुचिभागवतश्रेष्ठा तव कर्मणि नित्यशः ॥ ततः कमलपत्राक्षी भक्ता भक्तेषु
वत्सला ॥ ४४ ॥ कराभ्यामञ्जलिं कृत्वा नारायणमथाब्रवीत् ॥ ४५ ॥ धरण्युवाच ॥ त्वद्भक्तेन महाभाग विधिना दीक्षितेन च ॥ तव
चिन्तापरेणात्र किं कर्त्तव्यं च माधव ॥ ४६॥ केन चिन्तयितव्यस्त्वमचिन्त्यो मानुषैः परः ॥ किंच भागवतैः कार्यं यथावित्तं न शक्यते ॥४७॥
ततो भूम्या वचः श्रुत्वा आदिव्यक्तसम्भवः ॥ मधुरं स्वरमादाय प्रत्युवाच वसुन्धराम् ॥ ४८ ॥ श्रीवराह उवाच ॥ देवि तत्त्वेन वक्ष्यामि
यन्मां त्वं परिपृच्छसि ॥ येन चिन्तयसे चिन्तां मम कर्मपरायणा ॥ ४९ ॥ एषा गणान्तिका नाम दीक्षाऽङ्गबीजनिः सृता ॥ एतद्गह्यां महाभागे
मम चिन्तां विचिन्तयेत् ॥ ५० ॥ दीक्षितेन तु शुद्धेन मम निश्चितकर्मणा ॥ गृहीतव्यं विशालाक्षि मन्त्रेण विधिनाव वै ॥ ५१ ॥ यस्तु
भागवतो भूत्वा तद्गह्याति गणान्तिकाम् ॥ जनस्य दर्शनस्पर्शसंयुक्तां वामसंयुताम् ॥ ५२ ॥ तस्य धर्मो न विद्येत दीक्षा तस्य महाफला ॥
यस्तु गृह्णाति सुश्रोणि मन्त्रपूतां गणान्तिकाम् ॥ ५३ ॥ आसुरी नाम सा दीक्षा यया धर्मः प्रवर्त्तते ॥ यस्माद्गणान्तिकां गुह्यां
चिन्तयेच्छुद्धमानसः ॥ ५४ ॥ गुह्यां गणान्तिकां यो मां चिन्तयेत्स बुधोत्तमः ॥ जन्मान्तरसहस्राणि चिन्तिता तेन तेन सः ॥ ५५ ॥ ग्रहणस्य

॥११२॥

प्रवक्ष्यामि यथा शिष्याय दीयते ॥ मन्त्रं लोकसुखार्थाय तच्छृणुष्व वसुन्धरे ॥ ५६ ॥ कौमुदस्य तु मासस्य मार्गशीर्षस्य वाप्यथ ॥
वैशाखस्यापि मासस्य शुक्लपक्षे तु द्वादशी ॥ ५७ ॥ कुर्याद्विरामिषं तत्र दिनानि त्रीणि निश्चितः ॥ तस्मिन्गणान्तिकं ग्राह्यं मम
धर्मविनिश्चयात् ॥ ५८ ॥ ममाग्रतो वरारोहे प्रज्वाल्य च हुताशनम् ॥ कुशैरास्तरणं कृत्वा स्थापयित्वा गणान्तिकम् ॥ ५९ ॥ ततः शिष्यो
गुरुश्चैव दीक्षितः शुचिरुत्तमः ॥ नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ६० ॥ मन्त्रः–या धारिता पूर्वपितामहेन ब्रह्मण्यदेवेन भवोद्भवेन ॥
नारायणादक्षिणगात्रजातां हे शिष्य गृह्णीष्व स वै त्वमेव ॥ ६१ ॥ तत एतेन मन्त्रेण गुरुर्गृह्य गणान्तिकम् ॥ शिष्याय दत्त्वा स्निग्धाय इमं
मन्त्रमुदीरयेत् ॥ ६२ ॥ मन्त्रः–नारायणस्य दक्षिणगात्रजातां स्वशिष्य गृह्णीष्व समयेन देवीम् ॥ एतद्विचिन्त्यापर एव भूत्वा
भवे पुनर्भावनमेति नैव ॥ ६३ ॥ धरण्युवाच ॥ स्नानोपकल्पनान्तेषु किं कर्त्तव्यं तु माधव ॥ प्रसाधनविधिं चैव केन मन्त्रेण
कल्पयेत् ॥ ६४ ॥ अकर्मण्येन सुन्यस्त तव कर्मपरायणः ॥ ततो भूम्या वचः श्रुत्वा लोकनाथो जनार्दनः ॥ ६५ ॥ धर्मसंयुक्तवाक्येन
प्रत्युवाच वसुन्धराम् ॥ ६६ ॥ श्रीवराह उवाच ॥ देवि तत्त्वेन वक्ष्यामि यन्मां त्वं परिपृच्छसि ॥ स्नानस्यैवोपचाराणि
यानि कुर्वन्ति कर्म्मिणः ॥ ६७ ॥ वृत्तेष्वेवोपचारेषु जलप्राधानिकेषु च ॥ कङ्कतीं चाञ्जनं चैव दर्पणं चैव सुन्दरि ॥ ६८ ॥
यथा मन्त्रेण दातव्यं तच्छृणुष्व वसुन्धरे ॥ स्पृष्ट्वा तु मम गात्राणि क्षौमवस्त्रेण संवृतः ॥ ६९ ॥ अञ्जनं कङ्कतीं चैव शीघ्रमेव प्रसादयेत् ॥ ततो
जानुस्थितो भूत्वा मम कर्मपरायणः ॥ ७० ॥ अञ्जलौ कङ्कतीं गृह्य इमं मन्त्रमुदाहरेत् ॥७१॥ मन्त्रः–एतां कङ्कतीमञ्जलिस्थां प्रगृह्य प्रसीद
नारायण शिरः प्रसाधिहि ॥ ७२ ॥ महानुभाव विश्वनेत्रे स्वनेत्रे याभ्यां पश्यसे त्वं त्रिलोकीम् ॥ लोकप्रभो सर्वलोकप्रधान एषो जनमञ्जनं
लोकनाथ ॥ ७३ ॥ ततः संस्नापयेदेवं मन्त्रेणानेन सुव्रतम् ॥ ७४ ॥ मन्त्रः–देवदेव स्नानीयमिदं मम कल्पितं सुवर्णकलशं गृहाण प्रसीद
एषोऽञ्जलिर्मया परिकल्पितः स्नाहि स्नाहीति ॥ ७५ ॥ नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ७६॥ मन्त्रः–एषा मया माधव त्वत्प्रसादा
दुरुप्रसादाच्च हि मन्त्रपूजा ॥ प्राप्ता ममेषा वै गणान्तिका च भवेदधर्मो न च मे कदाचित ॥ ७७ ॥ य एतेन विधानेन मम कर्माणि दीक्षितः ॥

गुरोर्गृहीत्वा महतो मम लोकाय गच्छति ॥ कुशिष्याय न दातव्या पिशुनाय शठाय च ॥ ७८ ॥ एषा चैव वरारोहे गृहीत्वा गणनान्तिका ॥ सुशिष्याय च दातव्या हस्ते चैव गणान्तिका ॥७९॥ उत्तमाष्टाधिकशतं पंचाशत्तुर्यमध्यमा ॥ तदर्द्धं स्यात्कनिष्ठापि परिमाणेन सुन्दरि ॥८०॥ रुद्राक्षैरुत्तमा सा तु मध्यमा पुत्रजीविकैः ॥ ज्ञेया कनिष्ठा पद्माक्षैर्देवि ते कथिता मया ॥ ८१ ॥ एतत्कश्चिन्न जानाति जन्मान्तरशतैरपि ॥ सर्वलोकहितां शुद्धां मोक्षकामां गणान्तिकाम् ॥ ८२ ॥ नोच्छिष्टः संस्पृशेत्तां तु स्त्रीणां हस्ते न कारयेत् ॥ आकाशे स्थापनं कुर्यान्न वामेन संस्पृशेत् ॥ ८३ ॥ न दर्शयेच्च कस्यापि चिन्तयित्वा तु पूजयेत् ॥ एतत्ते परमं गुह्यमाख्यातं मोक्षदायकम् ॥ ८४ ॥ एवं हि विधिपूर्वेण पाल्यैत गणान्तिकाम् ॥ विशुद्धो मम भक्तश्च मम लोकं स गच्छति ॥ ८५ ॥ एवं विष्णोर्वचः श्रुत्वा धरणी संशितव्रता ॥ प्रत्युवाच परं श्रेष्ठं लोकनाथं महौजसम् ॥ ८६ ॥ दर्पणं ते कथं देयं तन्ममाख्याहि माधव ॥ येन तुष्टो निजं रूपं पश्यसे चिन्तितः प्रभो ॥ ८७ ॥ धरण्या स्तद्वचः श्रुत्वा वराहः पुनरब्रवीत् ॥ शृणु मे दर्पणविधिं यथावदेवि सुव्रते ॥८८॥ नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ ८९ ॥ मन्त्रः—श्रुतिर्भागवती श्रेष्ठा श्रुती अग्निर्द्विजश्च तव मुखं नासेऽश्विनौ नयने चन्द्रसूर्यौ मुखं च चन्द्र इव गात्राणि जगत्प्रधानानीमं च दर्पणं पश्य पश्य रूपम् ॥ ९० ॥य एतेन विधानेन मम कर्मपरायणः ॥ करोति मम कर्माणि तारितं कुलसप्तकम् ॥ ९१ ॥ एतेन मन्त्रेण वै भूमे उपचारस्तु ईदृशः॥हृष्टतुष्टेन कर्त्तव्यो यदीच्छेत्परमां गतिम् ॥९२॥ इति श्रीवराहपुराणे कङ्कतालक्षनदर्पणं नाम अष्टाविंशत्यधिकशततमोऽध्यायः ॥१२८॥

अथ चतुर्वर्णदीक्षा ॥ श्रीवराह उवाच ॥ भूपितालंकृतं कृत्वा मम कर्मपरायणः ॥ शुक्लं यज्ञोपवीतं च देयं नवगुणं तथा॥१॥ (शिरसा चाञ्जलिं कृत्वा वसुधा पुनरब्रवीत् ॥ धरण्युवाच ॥ एतन्मां परमं गुह्यं तद्भक्तां वक्तुमर्हसि ॥ सन्ध्यां वै केन मन्त्रेण तव कर्मपरायणाम् ॥ वद भागवतीं शुद्धां तव कर्मविनिश्चिताम् ॥ ततो भूमिवचः श्रुत्वा भूतानां प्रभवोऽव्ययः ॥ वराहरूपो भगवान्प्रत्युवाच वसुन्धराम् ॥श्रीवराह उवाच॥शृणु माधवि तत्त्वेन यन्मां त्वं परिपृच्छसि ॥ कथयिष्यामि ते भद्रे प्रवरं गुह्यमुत्तमम् ॥ यथावद्विदितं भूपैः पुण्या भागवताः शुभाः ॥ कृत्वा तु मम कर्माणि शुचिसंसारमोक्षणीम् ॥ कुर्वीतैव परां सन्ध्यां यथावदिति निश्चितम् ॥ जलाञ्जलिं ततो गृह्य मम भक्त्या व्यवस्थितः ॥ मुहूर्तं ध्यान

मास्थाय इमं मन्त्रमुदाहरेत् ॥ मन्त्रः–भवोद्भवमादिव्यक्तरूपमावं सर्वे देवा ब्रह्मा रुद्रस्त्वाष्टक्षसममासीद्ध्यानयोगस्थिता ते सन्ध्यासंस्था वासुदेवं नमामि वयं देवमादिव्यक्तरूपमात्मसतदिवसं तथापि संसारार्थं कर्म तत्करणमेव सन्ध्यासंस्था वासुदेव नमोऽस्तु ते॥ मन्त्राणां परमो मन्त्रस्तपसां परमं तपः ॥ आचारं कुरुते ह्येवं मम लोकं स गच्छति ॥ गुह्यानां परमं गुह्यं रहस्यं परमुत्तम् ॥य एवं पठते नित्यं न स पापेन लिप्यते॥नादीक्षिताय दातव्यं नोपवीते कथंचन ॥ दीक्षितायैव दातव्यमुपपन्ने तथैव च ॥ पुनरन्यत्प्रवक्ष्यामि देवि तत्त्वेन मे शृणु ॥ न दीपमपि गृह्णाति दत्तं भागवतैः शुभैः॥कृत्वा तु मम कर्माणि गृह्य दीपकमुत्तमम् ॥ जानुसंस्थां ततः कृत्वा इमं मन्त्रमुदीरयेत्॥मन्त्रः–ॐ नमो भगवतेऽनुग्रह तेजसे विष्णो सर्वदेवास्त्वाग्निसंस्थाः प्रविष्टा एवं चाग्निस्तव तेजसा भविष्यति स्वतेजसा मामाशु मन्त्रस्य तेजसा संसारार्थं देव गृह्यं दीपकं मन्त्रं मूर्तिमन्त्रं श्वोभूत्वा इमं कर्म निष्फलम् ॥ तत्करोति यथान्याय्यं दीपकं ददते नरः ॥ तारिताः पितरस्तेन निष्कलाश्च पितामहाः ॥) गन्धेन तिलकं दद्याल्ललाटे मम सुन्दरि ॥ अन्यच्च ते प्रवक्ष्यामि कम लोकसुखावहम् ॥ २॥ येन मन्त्रेण दातव्यं ललाटे तिलकं मम ॥ ३ ॥ मन्त्रः–सुखमण्डनं चिन्तया वासुदेव त्वया प्रयुक्तं च मयोपनीतम् ॥ एतेन चित्रं कुरु वासुदेव मम चैवं कुरु संसारमोक्षम् ॥ ४ ॥ एतेन मन्त्रेण चित्रकं मे दद्याल्ललाटे तिलकं धारित्रि ॥ ततः सुमनसो गृह्य इमं मन्त्रमुदाहरेत् ॥ ५ ॥ मन्त्रः–इमाः सुमनसः सोमनस्याय भगवन् सर्वं सुमनसं कुरु त्वयैते सौमनस्याय निर्मिता गृहीताः स्वाहा ॥ ६ ॥ एवं सुमनसो दत्त्वा धूपं चैव निवेदयेत् ॥ ततो गृहीत्वा धूपं तु सुगन्धं सुमनोहरम् ॥ ७ ॥ नमो नारायणेत्युक्त्वा इमं मन्त्रमुदीरयेत् ॥ मन्त्रः–सुगन्धानि तवाङ्गानि स्वभावेनैव केशव ॥ ८ ॥ अधुना चैव धूपेन धूपितानि तवाऽनघ ॥ तवाङ्गानां सुगन्धेन सर्वं सौगन्धिकं कुरु ॥ ९ ॥ गृहाणेमं च मे धूपं सर्वसंसारमोक्षणम् ॥ पुनरन्यत्प्रवक्ष्यामि यथा दीपं निवेदयेत् ॥ १० ॥ यथावृत्तं तु गृह्णामि मम भक्तेः सुखावहम् ॥ कृत्वा तु मम कर्माणि गृह्य दीपमनुत्तमम् ॥ ११ ॥ जानुसंस्थं ततः कत्वा इमं मन्त्रमुदीरयेत् ॥ १२ ॥ मन्त्रः–नमो भगवते तेजते विष्णो सर्वे देवास्त्वग्निसंस्थाः प्रतिष्ठाः ॥ एवं चाग्निस्तव तेजसा प्रतिष्ठितो तेजश्चात्मा स्वयमेव ॥ १३ ॥ मन्त्रश्च–तेजः संसारान्मोचयितुं देव गृह्णीष्व दीपं द्युमिमन्तञ्च ॥ मूर्त्रिश्च भूत्वा

इदं कर्म निष्फलम् ॥ १४ ॥ मां करोति यथान्यायं दीपकं ददते नरः ॥ तारिताः पितरस्तेन निष्फलाश्च पितामहाः ॥ १५ ॥
नारायणवचः श्रुत्वा विस्मिता च वसुन्धरा ॥ वराहरूपिणं देवं प्रत्युवाच वसुन्धरा ॥ १६ ॥ श्रुता मया भागवतास्तव कर्मपरायणाः ॥ शेष
संश्रवणार्थाय मनो धावति सत्पथे ॥ १७ ॥ तव प्रापणकं कृत्यं केषु पात्रेषु कारयेत् ॥ एतदाचक्ष्व तत्त्वेन येन तुष्यसि माधव ॥ १८ ॥
ततो भूमेर्वचः श्रुत्वा लोकनाथोऽब्रवीदिदम् ॥ शृणु तत्त्वेन मे देवि यानि पात्राणि रोचते ॥ १९ ॥ तानि ते कथयिष्यामि त्वया मे पूर्वपृच्छि
तम् ॥ सौवर्णं राजतं कांस्यं येषु दद्यात्प्रपाणकम् ॥ २० ॥ सर्वाणि तानि त्यक्त्वेह ताम्रं च मम रोचते ॥ एतन्नारायणाच्छ्रुत्वा धर्मकामा वसु
न्धरा ॥ २१ ॥ उवाच मधुरं वाक्यं लोकनाथं जनार्दनम् ॥ एतन्मे परमं गुह्यं ताम्रं ते रोचते कथम् ॥ २२ ॥ ततो भूमेर्वचः श्रुत्वा अनादि
रपराजितः ॥ लोकानां प्रवरः श्रेष्ठः प्रत्युवाच वसुन्धराम् ॥ २३ ॥ शृणु तत्त्वेन मे भूमे कथ्यमानं मयाऽनघे ॥ एकाग्रं चित्तमाधाय येन
ताम्रं मम प्रियम् ॥ २४ ॥ सप्तयुगसहस्राणि आदिकालेऽथ माधवि ॥ यथा ताम्रं समुत्पन्नं यथैव प्रियदर्शनम् ॥ २५ ॥ पूर्वं कमलपत्राक्षि
गुडाकेशो महासुरः ॥ ताम्ररूपं समादाय ममैवाराधने रतः ॥ २६ ॥ तत आराधितस्तेन वर्षाणां तु चतुर्दश ॥ सहस्राणि विशालाक्षि धर्म
कामेन निश्चलम् ॥ २७ ॥ अहं तु तपसा तुष्टस्तीव्रेण कृतनिश्चयात् ॥ ततस्ताम्रमये रम्ये यत्र ताम्रसमुद्भवः ॥२८॥ दृष्ट्वाश्रमं महादेवि किञ्चि
देव सुभाषितम् ॥ ततो जानुस्थितो भूत्वा मम एष विचिन्तयत् ॥ २९ ॥ चतुर्बाहुं च मां दृष्ट्वा मम कर्मपरायणः ॥ प्रणतः प्राञ्जलिः प्राह
शिरो भूमौ निधाप्य सः ॥ तं च दृष्ट्वा मया प्रोक्तं प्रसन्नेनान्तरात्मना ॥ ३० ॥ गुडाकेश महाभाग ब्रूहि किं करवाणि ते ॥ तोषितोऽस्म्यनया
भक्त्या दुराराध्योऽपि सुव्रत ॥ ३१ ॥ यत्त्वया चिन्तितं सौम्य कर्मणा मनसा गिरा ॥ वरं ब्रूहि महाभाग तुभ्यं यद्रोचतेऽनघ ॥ ३२ ॥ एवं
मम वचः श्रुत्वा गुडाकेशोऽब्रवीदिदम् ॥ कराभ्यामञ्जलिं कृत्वा विशुद्धेनान्तरात्मना ॥ ३३ ॥ यदि तुष्टोऽसि मे देव समस्तेनान्तरात्मना ॥
जन्मनां तु सहस्राणि त्वयि भक्तिर्दृढाऽस्तु मे ॥ ३४ ॥ चक्रेण वधमिच्छामि त्वया मुक्तेन केशव ॥ ३५ ॥ चक्रेण पातितस्यैतद्वसामांसानि किं
चन ॥ ताम्रं नाम भवेदेवं पवित्रीकरणं शुभम् ॥ ३६ ॥ तेन पात्रं ततः कृत्वा शुभधर्मविनिश्चितः ॥ तस्मिन्प्रापणकं कृत्वा शुद्धे वै

ताम्रभाजने ॥ ३७ ॥ निवेदिते परा प्रीतिर्भवत्वेतन्मनोगतम् ॥ प्रसन्नो यदि मे देव ह्येष मे दीयतां वरः ॥ ३८ ॥ यच्चिन्तितोऽसि देवेश उग्रे तपसि तिष्ठता ॥ बाढमित्येव सोऽप्युक्तो यावल्लोकस्थितिर्मया ॥ ३९ ॥ तावत्ताम्रास्थितो भूत्वा मम संस्थो भविष्यसि ॥ ततः प्रभृति ताम्रात्मा गुडाकेशो व्यवस्थितः ॥ ४० ॥ तत्ताम्रभाजने मह्यं दीयते यत्सुपुष्कलम् ॥ अतुला तेन मे प्रीतिर्भूमे जानीहि सुव्रते ॥ ॥ ४१ ॥ मङ्गल्यं च पवित्रं च ताम्रं तेन प्रियं मम ॥ त्वं च द्रक्ष्यसि तच्चक्रं मध्यसंस्थे दिवाकरे ॥ ४२ ॥ वैशाखस्य तु मासस्य शुक्लपक्षे तु द्वादशी ॥ मम तेजोमयं चक्रं त्वां वधिष्यत्यसंशयम् ॥ ४३ ॥ एष्यसे मम लोकाय एवमेतन्न संशयः ॥ एवमुक्त्वा गुडाकेशो तत्रैवान्तर्हितोऽभवम् ॥ ४४ ॥ चक्राद्वधमभीप्सन्वै सोऽपि मत्कर्मणि स्थितः ॥ दिने दिने विशिष्टं तु शुभं कुर्वंस्तपस्यति ॥ ४५ ॥ विष्णुसंस्थो भविष्यामि कदाहमिति चिन्तयन्॥ एवं स्थितस्य तस्याथ वैशाखस्य तु द्वादशी ॥ ४६ ॥ शुक्ल पक्षस्य सम्प्राप्ता तस्यां धर्मविनिश्चितः ॥ विष्णुपूजां ततः कृत्वा प्रार्थयामास मां प्रति ॥ ४७ ॥ मुञ्च मुञ्च प्रभो चक्रमपि वह्निसमप्रभम् ॥ आत्मा मे नीयतां शीघ्रं निकृत्याङ्गानि सर्वशः ॥ ४८ ॥ तदेव चक्रेण विपाटितोऽसौ प्राप्तोऽपि मां भागवतप्रधानः ॥ ताम्रं तु तन्मांसमसृक् सुवर्णमस्थानि रूप्यं वसुधातवश्च ॥ रङ्गं च सीसं त्रपुधातुसंस्थं कांस्यं च रीतिश्च मलस्तु तेषाम् ॥४९ ॥ ताम्रपात्रेण वै भूमे प्रापणं यत्प्रदीयते ॥ सिक्थे सिक्थे फलं तस्य शृणुष्व गदतो मम ॥ ५० ॥ एतद्भागवतैः कार्यं मम प्रियकरैः सदा ॥ एवं ताम्रं समुत्पन्नमिति मे रोचते हि तत् ॥ ५१ ॥ दीक्षितैर्वै भागवतैः पाद्यार्घ्यादौ च दीयते ॥ एवं दीक्षाविधिः प्रोक्त एवं ताम्रसमुद्भवः ॥ ५२ ॥ देवि तत्त्वेन कथितः किमन्यत् परिपृच्छसि ॥ भूमिरुवाच ॥ देवदेव कथं सन्ध्यां दीक्षितः कुरुते वद ॥ ५३ ॥ केन मन्त्रेण वा भक्तस्तव कर्मपरायणः ॥ श्रीवराह उवाच ॥ शृणु माधवि तत्त्वेन सन्ध्यामन्त्रमनुत्तमम् ॥ ५४ ॥ यथा वदन्ति वै सूर्यं सन्ध्यां पूर्वां परां तथा ॥ जलाञ्जलिं गृहीत्वा तु मम भक्त्या व्यवस्थितः ॥ ५५ ॥ मुहूर्त्तं ध्यानमास्थाय इमं मन्त्रमुदीरयेत् ॥ सिक्थानि तत्र यावन्ति ताम्रपापणके धरे ॥ ५६ ॥ तावद्वर्षसहस्राणि मम लोके स मोदते ॥ ५७॥ मन्त्रः—भवोद्भवमादित्यकरूपमादित्यं सर्वे देवा ब्रह्मरुद्रेन्द्रास्त्वां च ॥ कृष्णे यथासीद्धचानयोगस्थितास्ते सन्ध्यासंस्था वासु

देवं नमन्ति ॥ ५८ ॥ वयं देवमादिमव्यक्तरूपं कृत्वा चात्मनि देव संस्थास्तथापि ॥ संसारार्थं कर्म तत्करणमेव सन्न्यासंस्था वासुदेव नमो
नमः ॥ ५९ ॥ अनेनैव हि मन्त्रेण सन्न्यां कुर्यान्तु दीक्षितः ॥ ६० ॥ इति श्रीवराहपुराणे चतुर्वर्णदीक्षाताम्रवर्णनं नामोनत्रिंशदधिकशततमोऽ
ध्यायः ॥ १२९ ॥ अथ राजान्नभोगे प्रायश्चित्तम् ॥ सूत उवाच ॥ एवं दीक्षां ततः श्रुत्वा नारायणमुखान्महीं ॥ विशुद्धमानसा देवी नारायण
मथाब्रवीत् ॥ १ ॥ धरण्युवाच ॥ अहो ते दीक्षामाहात्म्यं यस्य वै व्युष्टिरुत्तमा ॥ श्रुत्वाहं तु महाभाग जातास्मि विमला विभो ॥ २ ॥
अहो देवस्य माहात्म्यं लोकनाथस्य तत्त्वतः ॥ येन सा कारिता दीक्षा चातुर्वर्ण्यसुखावहा ॥ ३ ॥ एकं मे परमं गुह्यं यदीशं हृदि वर्त्तते ॥ भव
भक्तसुखार्थाय तत्त्वं मे वक्तुमर्हसि ॥ ४ ॥ देव पूर्वापराधास्ते द्वात्रिंशदपि कीर्त्तिताः ॥ एवं कृत्वापराधानि मनुजा ह्यल्पचेतसः ॥ ५ ॥ कर्मणा
केन शुद्धयन्ति अपराधस्य कारिणः ॥ तन्ममाचक्ष्व तत्त्वेन मम प्रीत्या च माधव ॥ ६ ॥ तद्वै भूम्या वचः श्रुत्वा ह्रषीकेशो महामनाः ॥
दिव्यं ध्यानं समादाय प्रत्युवाच वसुन्धराम् ॥ ७ ॥ श्रीवराह उवाच ॥ शुद्धा भागवता भूत्वा मम कर्मपरायणाः ॥ ये तु भुञ्जन्ति राजान्नं
लोभेन च भयेन वा ॥ ८ ॥ आपद्गता हि भुञ्जन्ति राजान्न तु वसुन्धरे ॥ दशवर्षसहस्राणि पच्यन्ते नरके नराः ॥ ९ ॥ भगवद्वचनं श्रुत्वा
कम्पिता च वसुन्धरा ॥ दिनानि सप्त दश च भयं तीव्रमजायत ॥ १० ॥ ततो दीनमना भूत्वा सा मही संशितव्रता ॥ उवाच मधुरं वाक्यं
सर्वलोकसुखावहम् ॥११॥ धरण्युवाच ॥ शृणु तत्त्वेन मे देव हृदये हि व्यवस्थितम् ॥ को नु दोषोऽस्ति राज्ञां हि तन्मे त्वं वक्तुमर्हसि ॥१२॥
ततो भूम्या वचः श्रुत्वा सर्वधर्मविदां वरः ॥ प्राह नारायणो वाक्यं धर्मकामां वसुन्धराम् ॥ १३ ॥ श्रीवराह उवाच ॥ शृणु सुन्दरि तत्त्वेन
गुह्यमेतदनिन्दिते ॥ राजान्नं तु न भोक्तव्यं शुभैर्भागवतैः सदा ॥ १४ ॥ यद्यप्येष समत्वेन राजा लोके प्रवर्त्तते ॥ राजसं तामसं वापि कुर्वन्कर्म
सुदारुणम् ॥ १५ ॥ अपि वा गर्हितं तेन राजान्नं तु वसुन्धरे ॥ धर्मसन्धारणार्थाय न तु मे रोचते भुवि ॥ १६ ॥ ततो यद्यत्प्रवक्ष्यामि तच्छृ
णुष्व वसुन्धरे ॥ यथा राज्ञां तु भोज्यं वै शुद्धैर्भागवतैर्नरैः ॥ १७ ॥ स्थापयित्वा तु मां देवि विधिदृष्टेन कर्मणा ॥ धनधान्यसमृद्धानि दत्त्वा
भागवतेरपि ॥ १८ ॥ सिद्धं भागवतैश्चान्नं मम प्रापणशेषकम् ॥ भुञ्जानस्तु वरारोहे न स पापेन लिप्यते ॥ १९ ॥ एवं विष्णुवचः श्रुत्वा

॥११९॥

धरणी संशितव्रता ॥ वराहरूपिणं देवं प्रत्युवाच वरानना ॥ २० ॥ धरण्युवाच ॥ राजान्नं तु नरो भुक्त्वा शुद्धो भागवतः शुचिः ॥ कर्मणा केन शुद्धचेत तन्मे ब्रूहि जनार्दन ॥ २१ ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि यन्मां त्वं भिरु भाषसे ॥ तरन्ति पुरुषा येन राजान्नस्योप भुञ्जकाः ॥ २२ ॥ एकं चान्द्रायणं कृत्वा तप्तकृच्छ्रं च पुष्कलम् ॥ कुर्यात्सान्तपनं चैकं शीघ्रं मुच्यन्ति किल्बिषात् ॥ २३ ॥ न तस्य चाप राधोऽस्ति वसुधे वै वचो मम ॥ एवमेव न भोक्तव्यं राजान्नं वै कदाचन ॥ ममाग्र पूजाकामेन यदीच्छेत्परमां गतिम् ॥ २४ ॥ इति श्रीवराह पुराणे भगवच्छास्त्रे राजान्नप्रायश्चित्तं नाम त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥ अथ दन्तकाष्ठाचर्वणप्रायश्चित्तम् ॥ श्रीवराह उवाच ॥ दन्तकाष्ठमचर्वित्वा यो हि मासुपसर्पति ॥ पूर्वकालकृतं कर्म तेन चैकेन नश्यति ॥ १ ॥ नारायणवचः श्रुत्वा पृथिवी धर्मसंश्रिता ॥ विष्णु भक्तसुखार्थाय हृषीकेशमुवाच ह ॥ २ ॥ धरण्युवाच ॥ सर्वकालकृतं कर्म क्लेशेन महताऽनघ ॥ कथमेकापराधेन सर्वमेव प्रणश्यति ॥ ३ ॥ श्रीवराह उवाच ॥ शृणु सुन्दरि तत्त्वेन कथ्यमानं मयाऽनघे ॥ येन चैकापराधेन पूर्वकर्म प्रणश्यति ॥ ४ ॥ मनुष्यः किल्बिषी भद्रे कफ पित्तसमन्वितः ॥ पूयशोणितसम्पूर्ण दुर्गन्धि मुखमस्य तत् ॥ ५ ॥ तत्सर्वबीजं नश्येत दन्तकाष्ठस्य भक्षणात् ॥ शुद्धिर्भागवती चैव आचारेण विवर्जिता ॥ ६ ॥ धरण्युवाच ॥ दन्तकाष्ठमखादित्वा यः कर्माणि करोति ते ॥ प्रायश्चित्तं च मे ब्रूहि येन धर्मो न नश्यति ॥ ७ ॥ श्रीवराह उवाच ॥ एवमेतन्महाभागे यन्मां त्वं परिपृच्छसि ॥ कथयिष्यामि हीदं ते यथा शुद्धचन्ति मानवाः ॥ ८ ॥ आकाशशयनं कृत्वा दिनानि द्वे च पंच च ॥ अभुक्तदन्तकाष्ठाश्च एवं शुध्यन्ति मानवाः ॥ ९ ॥ एवं ते कथितं भद्रे दन्तकाष्ठस्य भक्षणम् ॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ १० ॥ कुतस्तस्यापराधोऽस्ति एवमेव न संशयः ॥ ११ ॥ इति श्रीवराहपुराणे दन्तकाष्ठाचर्वणप्रायश्चित्तं नामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ अथ मृतकस्पर्शप्रायश्चित्तम् ॥ श्रीवराह उवाच ॥ गत्वा तु मैथुनं भद्रे अस्नातो यः शवं स्पृशेत् ॥ रेतः पिबति दुर्बुद्धिः सहस्रं नव पंच च ॥ १ ॥ वर्षं नारायणाच्छ्रुत्वा सा मही संशितव्रता ॥ ततो दीनमना भूत्वा प्रोवाच मधुसूदनम् ॥ २ ॥ धरण्युवाच ॥ किमिदं भाषसे देव धर्मं भीषणसङ्कटम् ॥ कथमेवं पुमान्वै स रेतःपानपरो भवेत् ॥ ३ ॥ एतन्मे परमं दुःखं तद्भवान्वक्तुमर्हति ॥ श्रीवराह

उवाच ॥ शृणु तत्त्वेन मे देवि इदं गुह्यमनुत्तमम् ॥४॥चिह्नमेतद्वरारोहे आधिचारविनिश्चयः॥पुरुषः स्त्रीषु कर्माणि यो विकुर्वीत निर्घृणः ॥५॥ दृष्टं तस्यापरधस्य फलं प्राप्नोति मानवः ॥ एवमेतद्वरारोहे यन्मां त्वं परिपृच्छसि ॥ ६ ॥ अपराधस्य दोषेण विशुद्धिश्च न जायते ॥ प्रायश्चित्तं प्रवक्ष्यामि रागदोषेण दोषितम् ॥ ७ ॥ गृहस्थाः पुरुषा भद्रे मम कर्मपरायणाः ॥ यावकेन त्रयं क्षिप्त्वा पिण्याकेन दिनत्रयम् ॥ ८ ॥ वायुभक्षं दिनं त्वेकं ततो मुच्येत किल्बिषात् ॥ य एवं कुरुते भूमे विधिदृष्टेन कर्मणा ॥ ९ ॥ ज्ञात्वा कर्मापराधं तु न स पापेन लिप्यते ॥ एतत्ते कथितं भद्रे मिथुनं योऽभिगच्छति ॥१०॥ प्रायश्चित्तं महाभागे मम लोकसुखावहम् ॥ स्पृष्ट्वा तु मृतकं भद्रे नरं पंचत्वमागतम् ॥११॥ मम शास्त्रं बहिष्कृत्य यः श्मशानं प्रपद्यते ॥ पितरस्तस्य सुश्रोणि आत्मनश्च पितामहाः ॥ १२ ॥ श्मशाने जम्बुका भूत्वा भक्षयन्ति शवान् तथा ॥ ततो हरेर्वचः श्रुत्वा धर्मकामा वसुन्धरा ॥ १३ ॥ उवाच मधुरं वाक्यं सर्वलोकहिताय वै ॥ धरण्युवाच ॥ तव नाथ प्रपन्नानां क्व पापं विद्यते प्रभो ॥१४॥ प्रायश्चित्तं च मे ब्रूहि येन मुच्यन्ति किल्बिषात् ॥ श्रीवराह उवाच ॥ शृणु सुन्दरि तत्त्वेन यन्मां त्वं परिपृच्छसि ॥१५॥ कथयिष्यामि ते ह्यिदं शोभनं पापनाशनम् ॥ एकाहारो दिनान्तस्तु त्रिरात्रं चाप्युपोषितः ॥ १६ ॥ पंचगव्यं ततः पीत्वा ततो मुच्येत किल्बिषात् ॥ शवे स्पृष्टेऽपरधस्य एष ते कथितो विधिः ॥ १७ ॥ सर्वथा वर्जनीयं वै सर्वभागवतेन तु ॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥१८॥ विमुक्तः सर्वपापेभ्यो नापराधोऽस्ति तस्य वै ॥ नारीं रजस्वलां स्पृष्ट्वा यो मां स्पृशति निर्भयः ॥१९॥ रागमोहेन संयुक्तः कामेन च वशीकृतः॥वर्षाणां तु सहस्रैकं रजः पिबति निर्घृणः ॥२०॥ अन्धश्च जायते देवि दरिद्रो ज्ञानमूर्खवान्॥न च विन्दति चात्मानं पतितो नरके यथा ॥२१॥ अपराधमिमं कृत्वा तत्रैवं नास्ति संशयः ॥ धरण्युवाच ॥ तव देव प्रपन्नानां मोक्षं संसारसागरात् ॥ २२ ॥ अपराधसमायुक्तस्तव कर्मपरायणः ॥ कर्मणा येन शुध्येत तन्मे ब्रूहि जनार्दन ॥ २३ ॥ श्रीवराह उवाच ॥ स्पृष्ट्वा रजस्वलां नारीं नरो मद्भक्तितत्परः ॥ तपः कृत्वा त्रिरात्रं तु आकाशशयने वसेत् ॥ २४ ॥ शुद्धो भागवतो भूत्वा मम कर्मपरायणः ॥ एवं कृत्वा महाभागे प्रायश्चित्तं मम प्रियम् ॥ २५ ॥ मुच्यते किल्बिषादेवि आचारेण बहिष्कृतः ॥ एतत्ते कथितं भद्रे यत्स्पृष्ट्वा तु रजस्वलाम् ॥ २६ ॥ स्पृष्ट्वा तु मृतकं देवि यो मत्क्षेत्रेषु

तिष्ठति ॥ शतं वर्षसहस्राणि गर्भेषु परिवर्त्तते ॥ २७ ॥ दशवर्षसहस्राणि चण्डालश्चैव जायते ॥ अन्धः सप्तसहस्राणि मण्डूकश्च शतं समाः ॥२८॥
माक्षिका त्रीणि वर्षाणि टिट्टिभैकादशं समाः ॥ दंशो वै सप्त चान्यानि कृकलासो भवेत्समाः ॥ २९ ॥ हस्ती वर्षशतं चैव खरो द्वात्रिंशकं
भवेत् ॥ मार्जारो नव वर्षाणि वानरो दश पञ्च च ॥ ३० ॥ एवं स चात्मदोषेण मम कर्मपरायणः ॥ प्राप्नोति सुमहद्दुःखं देवि चैवं न संशयः ॥३१॥
ततो हरेर्वचः श्रुत्वा दुःखेन परिपृच्छति ॥ सर्वसंसारमोक्षाय प्रत्युवाच वसुन्धरा ॥ ३२ ॥ धरण्युवाच ॥ किमिदं भाषसे देव मानुषाणां
दुरासदम् ॥ वाक्यं भीषणमत्यन्तं मम मर्मप्रभेदकम् ॥ ३३ ॥ आचाराच्च परिभ्रष्टस्तव कर्मपरायणः ॥ यथा तरति दुर्गाणि प्रायश्चित्तं तथा
वद ॥ ३४ ॥ श्रुत्वा पृथ्व्यास्तथा वाक्यं लोकनाथो जनार्दनः ॥ धर्मसंरक्षणार्थाय प्रत्युवाच वसुन्धराम् ॥ ३५ ॥ श्रीवराह उवाच ॥ स्पृष्ट्वा
तु मृतकं भूमे मम कर्मपरायणः ॥ एकाहारं ततास्तिष्ठेदिनानि दश पञ्च च ॥ ३६ ॥ तत एवं विधिं कृत्वा पञ्चगव्यं तु प्राशयेत् ॥ शुद्धभावं
विशुद्धात्मा कर्मणा च न लिप्यते ॥ ३७ ॥ एतत्ते कथितं देवि स्पृष्ट्वा मृतकमेव च ॥ दोषं चैवं विशुद्धयर्थं यत्त्वया पूर्वपृच्छितम् ॥ ३८ ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ अपराधविमुक्तो वै मम लोकं स गच्छति ॥ ३९ ॥ इति श्रीवराहपुराणे मृतकस्पर्शनप्रायश्चितं नाम
द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥ अथ पूजासामथिकशुद्रश्वपुरीषोत्सर्जनयोः प्रायाश्चित्तम् ॥ श्रीवराह उवाच ॥ स्पृशमानेन मां भूमे
वातकर्म प्रसुच्यते ॥ एवञ्च पुरुषो युक्तो वायुपीडितमानसः ॥ १ ॥ माक्षिका पञ्च वर्षाणि त्रीणि वर्षाणि मूषकः ॥ श्वा चैव त्रीणि वर्षाणि
कूर्मो वै जायते नव ॥ २ ॥ एष वै तापनं देवि मोहनं मम सांप्रतम् ॥ यो वै शास्त्रं विजानाति मम कर्मपरायणः ॥ ३ ॥ श्रुत्वा वाक्यं रूपीकेशं
प्रत्युवाच वसुन्धरा ॥ धरण्युवाच ॥ अतुलं लभते पापं तव कर्मपरायणः ॥ ४ ॥ तस्य वै सुखार्थाय विशुद्धिं वक्तुमर्हसि ॥ श्रीवराह उवाच ॥
शृणु कान्तस्त्वं मे देवि कथ्यमानं मयाऽनघे ॥ ५ ॥ अपराधमिमं कृत्वा सन्तरेद्येन कर्मणा ॥ पावकेन दिनं त्रीणि नक्तानि च पुनस्त्रयः ॥ ६ ॥
कर्म चैवं ततः कृत्वा स च मे नापराध्यति ॥ सर्वसङ्गं परित्यज्य मम लोकं स गच्छति ॥ ७ ॥ एतत्ते कथितं भद्रे महाकर्मापराधिनः ॥
दोषं चैव गुणं चैव यत्त्वया परिपृच्छितम् ॥ ८ ॥ शृणु तत्त्वेन मे भूमे कथ्यमानं मयाऽनघे ॥ पुरीषं मुच्यते यस्तु मम कर्म समाचरन् ॥ ९ ॥

वदेत्ततः ॥ कोशौ संमृज्यतां तत्र यदीच्छेत्तु मम प्रियम् ॥ १७ ॥ त्रीणि कोशान्विशेत्तत्र सर्वपापविशोधनम् ॥ मुखं कराभ्यां मार्जेत सर्वमिन्द्रियनिग्रहम् ॥ १८ ॥ प्राणायामं ततः कृत्वा मम चिन्तापरायणः ॥ कर्मणा विधिदृष्टेन कुर्यात्संसारमोक्षणम् ॥१९॥ त्रीणि वाराण्स्पृशेत्तत्र शिरो ब्रह्माणि संस्थितः ॥ त्रीणि वारान्पुनस्तत्र उभे ते कर्णनासिके ॥ २० ॥ स्पृशेत्तु निष्कलस्तत्र यो हि यत्र प्रतिष्ठितः ॥ विक्षिपेत्तीणि वाराणि सलिलं प्रवरं त्रयम् ॥ २१ ॥ एवमुक्तस्य कर्त्तव्यं ममाभिगमनेषु च ॥ उपस्पृश्य तनुं वामे यदीक्षेत प्रियं मम ॥ २२ ॥ एवं च कुर्वतस्तस्य मम कर्मव्यवस्थितः ॥ अपराधं न विन्देत एवं देवि न संशयः ॥ २३ ॥ ततो नारायणवचः श्रुत्वा देवी वसुन्धरा ॥ उवाच मधुरं वाक्यं सर्वभागवतप्रियम् ॥२४॥धरण्युवाच॥ उपस्पृश्य विधानेन यस्तु कर्माणि चाचरेत् ॥तापनं शोधनं चैव तद्भवान्वक्तुमर्हति॥२५॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे भूमे इमं गुह्यमनिन्दिते ॥ यां गतिं च प्रपद्यन्ते मम कर्मबहिष्कृताः ॥ २६ ॥ व्यभिचारं च मे कृत्वा यश्च मामुपसर्पति ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ २७ ॥ कृमिर्भूत्वा यथान्याय्यं तिष्ठते नात्र संशयः ॥ प्रायश्चित्तं प्रवक्ष्यामि तस्य सूकरस्य माधवि ॥ २८ ॥ यच्च कृत्वा महाभागे कृतकृत्यः पुनर्भवेत् ॥ महासान्तपनं कृत्वा तत्कृच्छ्रं च निष्कलम् ॥ २९ ॥ ब्राह्मणः क्षत्रियो वैश्यो मम ये च मते स्थिताः ॥ अनेन विधिना कृत्वा प्रायश्चित्तं यशस्विनि ॥ ३० ॥ किल्बिषात्तु प्रमुक्तास्ते गच्छन्ति परमां गतिम् ॥ यस्तु क्रोधसमाविष्टो मम भक्तिपरायणः ॥ ३१ ॥ स्पृशेत मम गात्राणि चित्तं कृत्वा चलाचलम् ॥ न चाहं रागमिच्छामि क्रुद्धमेव यशस्विनि ॥ ३२ ॥ इच्छामि च सदा दान्तं शुभं भागवतं शुचिम् ॥ पंचेन्द्रियसमायुक्तं लाभालाभविवर्जितम् ॥ ३३ ॥ अहङ्कारविनिर्मुक्तं कर्मण्याभिरतं मम ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वरानने ॥ ३४ ॥ मां यदा लभते क्रुद्धः शुद्धो भागवतः शुचिः ॥ चिह्नी जातो वर्षशतं श्वेतो वर्षशतं पुनः ॥ ३५ ॥ भेकस्त्रिंशतवर्षाणि यातुधानः पुनर्दंश ॥ अपुमान्षट् च वर्षाणि श्वेताभक्षस्तु जायते ॥ ३६ ॥ अन्धो जायेत सुश्रोणि पंच सप्त तथा नव ॥ ह्रस्वो द्वात्रिंशवर्षाणि चक्रवाको दशैव तु ॥ ३७ ॥ शैवालभक्षिता चैव ह्याकाशगमनं तथा ॥ ब्राह्मणो जायते भूमे क्रोधस्य च पथे स्थितः ॥ ३८ ॥ आत्मकर्मापराधेन प्राप्तः संसारसागरे ॥ धरण्युवाच ॥ अहो वै परमं गुह्यं यत्त्वया पूर्वभाषितम् ॥ ३९ ॥ ज्ञातं मे

वदेत्ततः ॥ कोशौ संमृज्यतां तत्र यदीच्छेत्तु मम प्रियम् ॥ १७ ॥ त्रीणि कोशान्विशेत्तत्र सर्वपापविशोधनम् ॥ मुखं कराभ्यां मार्जेत सर्वमिन्द्रियनिग्रहम् ॥ १८ ॥ प्राणायामं ततः कृत्वा मम चिन्तापरायणः ॥ कर्मणा विधिदृष्टेन कुर्यात्संसारमोक्षणम् ॥१९॥ त्रीणि वाराण्स्पृशेत्तत्र शिरो ब्रह्माणि संस्थितः ॥ त्रीणि वारान्पुनस्तत्र उभे ते कर्णनासिके ॥ २० ॥ स्पृशेत्तु निष्कलस्तत्र यो हि यत्र प्रतिष्ठितः ॥ विक्षिपेत्तीणि वाराणि सलिलं प्रवरं त्रयम् ॥ २१ ॥ एवमुक्तस्य कर्त्तव्यं ममाभिगमनेषु च ॥ उपस्पृश्य तनुं वामे यदीक्षेत प्रियं मम ॥ २२ ॥ एवं च कुर्वतस्तस्य मम कर्मव्यवस्थितः ॥ अपराधं न विन्देत एवं देवि न संशयः ॥ २३ ॥ ततो नारायणवचः श्रुत्वा देवी वसुन्धरा ॥ उवाच मधुरं वाक्यं सर्वभागवतप्रियम् ॥२४॥धरण्युवाच॥ उपस्पृश्य विधानेन यस्तु कर्माणि चाचरेत् ॥तापनं शोधनं चैव तद्भवान्वक्तुमर्हति॥२५॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे भूमे इमं गुह्यमनिन्दिते ॥ यां गतिं च प्रपद्यन्ते मम कर्मबहिष्कृताः ॥ २६ ॥ व्यभिचारं च मे कृत्वा यश्च मामुपसर्पति ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ २७ ॥ कृमिर्भूत्वा यथान्याय्यं तिष्ठते नात्र संशयः ॥ प्रायश्चित्तं प्रवक्ष्यामि तस्य सूकरस्य माधवि ॥ २८ ॥ यच्च कृत्वा महाभागे कृतकृत्यः पुनर्भवेत् ॥ महासान्तपनं कृत्वा तत्कृच्छ्रं च निष्कलम् ॥ २९ ॥ ब्राह्मणः क्षत्रियो वैश्यो मम ये च मते स्थिताः ॥ अनेन विधिना कृत्वा प्रायश्चित्तं यशस्विनि ॥ ३० ॥ किल्बिषात्तु प्रमुक्तास्ते गच्छन्ति परमां गतिम् ॥ यस्तु क्रोधसमाविष्टो मम भक्तिपरायणः ॥ ३१ ॥ स्पृशेत मम गात्राणि चित्तं कृत्वा चलाचलम् ॥ न चाहं रागमिच्छामि क्रुद्धमेव यशस्विनि ॥ ३२ ॥ इच्छामि च सदा दान्तं शुभं भागवतं शुचिम् ॥ पंचेन्द्रियसमायुक्तं लाभालाभविवर्जितम् ॥ ३३ ॥ अहङ्कारविनिर्मुक्तं कर्मण्याभिरतं मम ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वरानने ॥ ३४ ॥ मां यदा लभते क्रुद्धः शुद्धो भागवतः शुचिः ॥ चिह्नी जातो वर्षशतं श्वेतो वर्षशतं पुनः ॥ ३५ ॥ भेकस्त्रिंशतवर्षाणि यातुधानः पुनर्दंश ॥ अपुमान्षट् च वर्षाणि श्वेताभक्षस्तु जायते ॥ ३६ ॥ अन्धो जायेत सुश्रोणि पंच सप्त तथा नव ॥ ह्रस्वो द्वात्रिंशवर्षाणि चक्रवाको दशैव तु ॥ ३७ ॥ शैवालभक्षिता चैव ह्याकाशगमनं तथा ॥ ब्राह्मणो जायते भूमे क्रोधस्य च पथे स्थितः ॥ ३८ ॥ आत्मकर्मापराधेन प्राप्तः संसारसागरे ॥ धरण्युवाच ॥ अहो वै परमं गुह्यं यत्त्वया पूर्वभाषितम् ॥ ३९ ॥ ज्ञातं मे

विह्वलं चित्तं न स्थिरं जायते क्वचित् ॥ यत्त्वया भाषितं ह्रीदं भक्तानां च दुरासदम् ॥ ४० ॥ श्रुत्वा सुदुस्तरं सारं भीतास्मि परिदेविता ॥
नाहमाज्ञापयामि त्वां देवदेव जगत्पते ॥ ४१ ॥ मम चैव प्रियार्थाय सर्वलोकसुखावहम् ॥ येन मुच्यन्ति संशुद्धा बुधाः कर्म परा
यणाः ॥ ४२ ॥ अल्पसत्त्वा गतभया लोभमोहसमन्विताः ॥ तरन्ति येन दुर्गाणि प्रायश्चित्तं च मे वद ॥ ४३ ॥ ततः कमलपत्राक्षो
वराहः सम्मुखे स्थितः ॥ सनत्कुमारो मे भक्तो पुनर्नारायणोऽब्रवीत् ॥ ४४ ॥ ततो भूम्या वचः श्रुत्वा ब्रह्मणश्च सुतो मुनिः ॥ सनत्कु
मारो योगज्ञः प्रत्युवाच वसुन्धराम् ॥ ४५ ॥ धन्या चैव सुभाग्या च यत्त्वया परिपृच्छितम् ॥ वराहरूपी भगवान्सर्वमायाकरण्डकः ॥ ४६ ॥
किं त्वया भाषितो देवि सर्वयोगाङ्गयोगवित् ॥ देवो नारायणस्तत्र सर्वधर्मविदां वरः ॥ ४७ ॥ कुमारवचनं श्रुत्वा तं मही प्रत्यभाषत ॥ शृणु
तत्त्वेन मे ब्रह्मन्यन्मया परिपृच्छितम् ॥ ४८ ॥ कार्यं क्रियां च योगं च आध्यात्म्यं पार्थिवस्थितम् ॥ एतन्मे पृच्छते ब्रह्मन्देवो
नारायणः प्रभुः ॥ ४९ ॥ ततो मां भाषते ब्रह्मन्विष्णुर्मायाकरण्डकः ॥ क्रुद्धा भागवता ब्रह्मन्येन शुद्ध्यन्ति किल्बिषात् ॥ ५० ॥ कृत्वा तेन
व्रतं चैव मम कर्मपरायणः ॥ षष्ठे काले तु भुञ्जीत गृहभिक्षामनिन्दिताम् ॥ ५१ ॥ अष्टौ भिक्षा यथान्यायं शुद्धभागवतां गृहे ॥ य एतेन
विधानेन ब्रह्मकर्माणि कारयेत् ॥ ५२ ॥ मुच्यते किल्बिषात्तस्मादेवमाह जनार्दनः ॥ यदीच्छसि परां सिद्धिं विष्णुलोकं जनार्दनात् ॥ ५३ ॥
शीघ्रमाराधयेद्विष्णुं द्विजमुख्यो न संशयः ॥ ततो भूमेर्वचः श्रुत्वा ब्रह्मणश्च सुतो मुनिः ॥ ५४ ॥ प्रत्युवाच विशालाक्षीं धर्मकामो
वसुन्धराम् ॥ अहो गुह्यं रहस्यं च यत्त्वया देवि भाषितम् ॥ ५५ ॥ तस्य ये मुखनिष्क्रान्ता धर्मास्तान्वक्तुमर्हसि ॥ धरण्युवाच ॥ ततः स
पुण्डरीकाक्षः शङ्खचक्रगदाधरः ॥ ५६ ॥ वराहरूपी भगवाँल्लोकनाथो जनार्दनः ॥ उवाच मधुरं वाक्यं मेघदुन्दुभिनिःस्वनः ॥ ५७ ॥
भक्तकर्मसुखार्थाय गुणवित्तसमन्वितान् ॥ अनेनैव विधानेन आचारेण समन्वितः ॥ ५८ ॥ देवि कार्यते कर्म मम लोकं स गच्छति ॥ क्रुद्धेन
न च कर्त्तव्यं लोभेन त्वरया न च ॥ ५९ ॥ मत्पूजनं विधानेन यदीच्छेत्परमां गतिम् ॥ ये मां देवि यजिष्यन्ति क्रोधं त्यक्त्वा
जितेन्द्रियाः ॥ ६० ॥ संसारं ते न गच्छन्ति अपगर्भविवर्जिताः ॥ श्रीवराह उवाच ॥ अकर्मण्येन पुण्येण यो मामर्चयते भुवि ॥ ६१ ॥

पातनं तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ नाहं तत्प्रतिगृह्णामि न च ते वै मम प्रियाः ॥ ६२॥ मूर्खा भागवता देवि मम विप्रियकारिणः ॥
पतन्ति नरके घोरे रौरवे तदनन्तरम् ॥ ६३॥ अज्ञानस्य च दोषेण दुःखान्यनुभवन्ति च ॥ वानरो दश वर्षाणि मार्जारश्च त्रयोदश ॥ ६४ ॥
सूकरः पञ्च च वर्षाणि बलीवर्दश्च द्वादश ॥ छागश्चैवाष्टवर्षाणि मासं वै ग्रामकुक्कुटः ॥ ६५ ॥ त्रीणि वर्षाणि महिषो भवत्येव न संशयः ॥ एतत्ते
कथितं भद्रे पुष्पं यन्मे न रोचते ॥ ६६ ॥ अकर्मण्यं विशालाक्षि पुष्पं ये च ददन्ति वै ॥ धरण्युवाच ॥ भगवन्यदि तुष्टोऽसि विशुद्धेना
न्तरात्मना ॥ ६७ ॥ येन शुध्यन्ति ते भक्तास्तव कर्मपरायणाः ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि यन्मां त्वं परिपृच्छसि ॥ ६८ ॥
प्रायश्चित्तं महाभागे येन शुध्यन्ति मानवाः ॥ एकाहारं ततः कृत्वा मासमेकं वरानने ॥ ६९ ॥ वीरासनविधीश्चैव कारयेत्सप्त सप्त च ॥ चतुर्थ
भक्ष्यमेकेन मासेन घृतपायसम् ॥ ॥ ७० ॥ यावत्कात्रे त्रीण्यहानि वायुभक्षो दिनत्रयम् ॥ य एतेन विधानेन देवि कर्माणि कारयेत् ॥७१ ॥
सर्वपापप्रमुक्तश्च मम लोकं स गच्छति ॥ ७२ ॥ इति श्रीवराहपुराणे पूजादिसामयिकापराधप्रायश्चित्तं नाम चतुस्त्रिंशदधिकशततमोऽ
ध्यायः ॥ १३४ ॥ अथ जालपादभक्षणापराधप्रायश्चित्तम् ॥ श्रीवराह उवाच ॥ रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति ॥ तस्यापि
शृणु सुश्रोणि कर्म संसारमोक्षणम् ॥ १ ॥ रजस्वलासु नारीषु रजो यत्तत्प्रवर्त्तते ॥ तेनासौ रजसा पुष्टो कर्मदोषेण जानतः ॥ २ ॥
वर्षाणि दश पञ्चैव वसते तत्र निश्चयात् ॥ रजो भूत्वा महाभागे रक्तवस्त्रपरायणः ॥ ३ ॥ प्रायश्चित्तं प्रवक्ष्यामि तस्य कायविशो
धनम् ॥ येन शुध्यन्ति ते भूमे पुरुषाः शास्त्रनिश्चिताः ॥ ४ ॥ एकाहारं ततः कृत्वा दिनानि दश सप्त च ॥ वायुभक्षस्त्रीण्यहानि दिनमेकं जला
शनः ॥ ५ ॥ एवं स मुच्यते भूमे मम विप्रियकारकः ॥ प्रायश्चित्तं ततः कृत्वा मासौ रोचते सह ॥ ६ ॥ एतत्ते कथितं भूमे रक्तवस्त्रविभू
षिते ॥ प्रायश्चित्तं महाभागे सर्वसंसारमोक्षणम् ॥ ७ ॥ यस्तु मामन्धकारेषु विना दीपेन सुन्दरि ॥ स्पृशते च विना शास्त्रं त्वरमाणो विमो
हितः ॥ ८ ॥ पतनं तस्य वक्ष्यामि शृणुष्व त्वं वसुन्धरे ॥ तेन क्लेशं समासाद्य क्लिश्यते च नराधमः ॥ ९ ॥ अन्धो भूत्वा महाभागे एकं जन्म
तमोमयः ॥ सर्वाशी सर्वभक्षश्च मानवः सोऽभिजायते ॥ १० ॥ अनन्यमानसो भूत्वा भूमे ह्येतत्प्रसाधयेत् ॥ प्रायश्चित्तं प्रवक्ष्यामि अन्धकारे

तु यः पुरा ॥ ११ ॥ संस्पृशेत्सोऽपि धर्मात्मा येन लोकं मम व्रजेत् ॥ अश्णोराच्छादनं कृत्वा दिनानि दश पञ्च च ॥ १२ ॥ एकाहारं ततः कृत्वा दिनविंशं समाहितः ॥ यस्य कस्यापि मासस्य एकामेव च द्वादशीम् ॥१३ ॥ एकाहारस्ततो भूत्वा निषीदेच्च जलाशनः ॥ ततो यवान्नं भुञ्जीत गोमूत्रेण तु पाचितम् ॥ १४ ॥ प्रायश्चित्तेन चैतेन मुच्यते पातकात्ततः ॥ यः पुनः कृष्णवस्त्रेण मम कर्मपरायणः ॥ १५ ॥ देवि कर्माणि कुर्वीत तस्य वै पातनं शृणु ॥ चुणो वै पञ्चवर्षाणि लाजवास्तुसमाश्रयः ॥ १६ ॥ पञ्च वर्षाणि नकुलो दश वर्षाणि कच्छपः ॥ एवं भ्रमति संसारे मम कर्मपरायणः ॥ १७ ॥ पारावतेषु जायेत नव वर्षाणि पञ्च च ॥ जातो ममापराधेन स्थितः पारावतो भुवि ॥ १८ ॥ मम निष्ठति पार्श्वेषु यत्रैवाहं प्रतिष्ठितः ॥ प्रायश्चित्तं प्रवक्ष्यामि तस्य संसारमोक्षणे ॥ १९ ॥ येनासौ लभते सिद्धिं कृष्णवस्त्रापराधतः ॥ सप्ताहं यावकं भुक्त्वा त्रिरात्रं सक्तुपिण्डिकाम् ॥ २० ॥ त्रीणि पिण्डांस्त्रिरात्रं तु एवं मुच्येत किल्बिषात् ॥ य एतेन विधानेन देवि कर्माणि कारयेत् ॥ २१ ॥ शुचिर्भागवतो भूत्वा मम मार्गानुसारतः ॥ न स गच्छति संसारं मम लोकं स गच्छति ॥ २२ ॥ वाससा चाप्यधोतेन यो मे कर्माणि कारयेत् ॥ शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ॥ २३ ॥ तस्य दोषं प्रवक्ष्यामि अपराधं वसुन्धरे ॥ पतन्ति येन संसारं वास सोच्छिष्टकारिणः ॥ २४ ॥ देवि भूत्वा गजो मत्तस्तिष्ठत्येकं नरो भुवि ॥ उष्ट्रश्चैकं भवेज्जन्म जन्म चैकं वृकस्तथा ॥ २५ ॥ गोमायुरेकं जन्मापि जन्म चैकं हयस्तथा ॥ सारङ्गस्त्वेकजन्मा वै मृगो भवति वै ततः ॥ २६ ॥ सप्तजन्मान्तरं पश्चात्ततो भवति मानुषः ॥ मद्भक्तश्च गुणज्ञश्च मम कर्मपरायणः ॥ २७ ॥ दक्षो निरपराधश्च अहङ्कारविवर्जितः ॥ धरण्युवाच ॥ श्रुतमेतन्मया देव यत्त्वया समुदाहृतम् ॥ २८ ॥ संसारं वाससोच्छिष्टा येन गच्छन्ति मानुषाः॥ प्रायश्चित्तं च मे ब्रूहि सर्वकर्मसुखावहम् ॥ २९ ॥ किल्बिषाद्येन मुच्यन्ते तव कर्मपरायणाः ॥ ॥११९॥

श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि कथ्यमानं मयाऽनघे ॥ ३० ॥ प्रायश्चित्तं प्रवक्ष्यामि मम कर्मपरायणः ॥ यावकेन त्रीण्यहानि पिण्या केन दिनत्रयम् ॥ ३१ ॥ पर्णभक्षस्त्रीण्यहानि पयोभक्षो दिनत्रयम् ॥ पायसेन त्रिरात्रं तु वायुभक्षो दिनत्रयम् ॥ ३२ ॥ एवं कृत्वा महाभागे वाससोच्छिष्टकारिणः ॥ अपराधं न विन्देरन्संसारं न प्रयान्ति च ॥ ३३ ॥ इत्यानोच्छिष्टं तु यो दद्यान्मम कर्मपरायणः ॥ पापं तस्य प्रवक्ष्यामि

संसारे च महद्भयम् ॥ ३४ ॥ श्वानो वै सप्त जन्मानि गोमायुः सप्त वै तथा ॥ उलूकः सप्त वर्षाणि पश्चाज्जायेत मानुषः ॥ ३५ ॥ विशुद्धात्मा श्रुतिज्ञश्च मद्भक्तश्चैव जायते ॥ गृहे भागवतोत्कृष्टे अपराधविवर्जितः ॥ ३६ ॥ शृणु तत्त्वेन वसुधे प्रायश्चित्तं महौजसम् ॥ तरन्ति मानुषा येन त्यक्त्वा संसारसागरम् ॥ ३७ ॥ मूलभक्षो दिनत्रय्यां फलाहारो दिनत्रयम् ॥ शाकभक्षो दिनत्रय्यां पयोभक्षो दिनत्रयम् ॥ ३८ ॥ दध्याहारो दिनत्रय्यां पायसेन दिनत्रयम् ॥ वाय्वाहारो दिनत्रय्यां स्नानं कृत्वा दृढव्रतः ॥ ३९ ॥ एवं दिनान्येकविंशत्कृत्वा वै शुभलक्षणम् ॥ अपराधं न विन्देत मम लोकं सगच्छसि ॥ ४० ॥ भुक्त्वा वराहमांसं तु यश्च मामिह सर्पति ॥ पातनं तस्य वक्ष्यामि यथा भवति सुन्दरि ॥ ४१ ॥ वराहो दश वर्षाणि कृत्वानुचरते वने ॥ व्याधो भूत्वा महाभागे समाः पञ्च च सप्त च ॥ ४२ ॥ ततश्च मूषको भूत्वा वर्षाणि च चतुर्दश ॥ ऊनविंशतिवर्षाणि यातुधानश्च जायते ॥ ४३ ॥ सल्लकी चाष्टवर्षाणि जायते भवने बहु ॥ व्याघ्रस्त्रिंशच्च वर्षाणि जायते पिशिताशनः ॥ ४४ ॥ एवं संसारितां गत्वा वराहामिषभक्षकः ॥ जायते विपुले सिद्धे कुले भागवते तथा ॥ ४५ ॥ ह्रदीकेशवचः श्रुत्वा सर्वं सम्पूर्णलक्षणम् ॥ शिरसा चाञ्जलिं कृत्वा वाक्यं चेदमुवाच ह ॥ ४६ ॥ एतन्मे परमं गुह्यं तव भक्तसुखावहम् ॥ वराहमांसभक्षस्तु येन मुच्येत किल्बिषात् ॥ ४७ ॥ तरन्ति मानुषा येन तिर्यक्संसारसागरात् ॥ गोमयेन दिनं पञ्च कणाहारेण सप्त वै ॥ ४८ ॥ पानीयं तु ततो भुक्त्वा तिष्ठत्सप्तदिनं ततः ॥ अक्षारलवणं सप्त सकुशिश्च तथा त्रयः ॥४९॥ तिलभक्षो दिनान्सप्त पापाणस्य च भक्षकः ॥ पयो भुक्त्वा दिनं सप्त कार्ये द्वादिक्षमान्मनः॥५०॥क्षान्तं दान्तं तथा कृत्वा अहङ्कारविवर्जितः॥दिनान्येकोनपञ्चाशच्चरेत्कृतानिश्चयः॥५१॥विमुक्तःसर्वपापेभ्यः ससंज्ञो विगतज्वरः ॥ कृत्वा मम च कर्माणि मम लोकं सगच्छति॥५२॥ जालपादं भक्षयित्वा यस्तु मामुपसर्पति ॥जालपादस्ततो भूत्वा वर्षाणि दश पञ्च च ॥ ५३ ॥ कुम्भीरो दश वर्षाणि पञ्च वर्षाणि सूकरः ॥ तावद्भ्रमति संसारे मम चैवापराधतः ॥ ५४ ॥ कृत्वा तु दुष्करं कर्म जायते विपुले कुले ॥ शुद्धो भागवतश्रेष्ठो ह्यपराधविवर्जितः ॥ ५५॥ सर्वकर्माण्यतिक्रम्य मम लोकं स गच्छति ॥ प्रायश्चित्तं प्रवक्ष्यामि जालपादस्य भक्षणे ॥ ५६ ॥ तरन्ति मनुजा येन घोरसंसारसागरात् ॥ यावत्कात्रं दिनत्रय्यां वायुभक्षो दिनत्रयम् ॥ ५७ ॥ फलभक्षो दिनत्रय्यां तिलभक्षो

दिनत्रयम् ॥ अक्षारलवणाशी पुनस्तत्र दिनत्रयम् ॥ ५८ ॥ दशैपञ्च दिनान्येवं प्रायश्चित्तं समाचरेत् ॥ जालपादापराधस्य एवं कुर्वीत शोधनम्॥विनीतात्मा शुचिर्भूत्वा य इच्छेत्सुशुभां गतिम् ॥५९॥ इति श्रीवराहपुराणे जालपादभक्षणापराधप्रायश्चित्तं नाम पञ्चत्रिंशदधिकशततमोऽध्यायः॥१३५॥अथ प्रायश्चित्तकर्मसूत्रम्॥श्रीवराह उवाच ॥ दीपं स्पृष्ट्वा तु यो देवि मम कर्माणि कारयेत् ॥ तस्यापराधाद्धे भूमे पापं प्राप्नोति मानवः॥१॥ तच्छृणुष्व महाभागे कथ्यमानं मयाऽनघे॥जायते पक्षिवर्षाणि कुष्ठी गात्रपरिप्लुतः॥२॥ चाण्डालस्य गृहे तत्र एवमेतन्न संशयः ॥ एवं भुक्त्वा तु तत्कर्म मम क्षेत्रे मृतो यदि ॥ ३ ॥ मद्भक्तश्चैव जायेत शुद्धे भागवते गृहे ॥ प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्धरि ॥४॥ तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु ॥ यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी ॥ ५ ॥ चतुर्थेभक्तमाहारमाकाशशयने स्वपेत् ॥ दीपं दत्त्वापराधाद्धे तरन्ति मनुजा भुवि ॥ ६ ॥ शुचिर्भूत्वा यथान्यायं मम कर्मपथे स्थितः ॥ एतत्ते कथितं भद्रे स्पर्शने दीपकस्य तु ॥ ७ ॥ संसारशोधनं चैव यत्कृत्वा लभते शुभम् ॥ श्मशानं यो नरो गत्वा अज्ञात्वैव तु मां स्पृशेत् ॥ ८ ॥ मम दोषापराधस्य शृणु तत्त्वेन यत्फलम् ॥ जम्बुको जायते भूमौ वर्षाणां नव पंच च ॥ ९ ॥ गृध्रस्तु सप्त वर्षाणि जायते खचरेश्वरः ॥ चरन्तौ मानुषं मांसमुभौ तौ गृध्रजम्बुकौ ॥ १० ॥ पिशाचो जायते तत्र वर्षाणि नव पंच च ॥ ततस्तु कुणपोच्छिष्टं त्रिंशद्वर्षाणि खादति ॥ ११ ॥ ततो नारायणाच्छुत्वा धरणी वाक्यमब्रवीत् ॥ एतन्मे परमं गुह्यं लोकनाथ जनार्दन ॥ १२ ॥ परं कौतूहलं देव निखिलं वक्तुमर्हसि ॥ श्मशानं पुण्डरीकाक्ष ईश्वरेण प्रशंसितम्॥१३॥क्रिन्त्वत्र त्रिगुणं देव पवित्रे शिवभाविते ॥ स तत्र रमते नित्यं भगवांस्तु महामतिः॥१४॥ कपालं गृह्य देवोऽत्र दीप्तिमन्तं महौजसम् ॥ प्रशंसितं च रुद्रेण भवता किं विनिन्दितम् ॥१५॥ श्मशानं पद्मपत्राक्ष रुद्रस्य च निशि प्रियम् ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि इदमाख्यानमुत्तमम् ॥१६॥ अद्यापि ते न जानन्ति ह्यनघे संशितव्रताः ॥ कृत्वा सुदुष्करं कर्म सर्वभूतपतिं हरिम् ॥ १७ ॥ हत्वा च बालान्वृद्धांश्च त्रिपुरे रूपिणीः स्त्रियः ॥ तेन पापेन सम्बद्धो न शक्नोति विचेष्टितुम् ॥१८॥ प्रणष्टमानसैश्वर्यो नष्टा माया च योगिनः ॥ विवर्णवदनो भूत्वा तिष्ठते स महेश्वरः ॥१९॥ तत्र स्थाने शिवो भूमे गणैः सर्वैः समावृतः ॥ नष्टमायं ततो देवि चिन्तयामि वसुन्धरे ॥ २० ॥

॥१२०॥

ततो ध्यातो मया देवि शङ्करः पुनरेष्यति ॥ यावत्पश्यामि तं देवं देवि दिव्येन चक्षुषा ॥ २१ ॥ नष्टं मायाबलं रुद्रं सर्वभूतमहेश्वरम् ॥
ततोऽहं तत्र गत्वा तु यष्टुकामं त्रियम्बकम् ॥ २२ ॥ नष्टसंज्ञो हतज्ञानो नष्टयोगबलोऽबलः ॥ तत ईशो मया चोक्तो वाक्यमेवं सुखावहम् ॥ २३ ॥ किमिदं तिष्ठसे रुद्र कश्मलेन समावृतः ॥ त्वं कर्त्ता च विकर्त्ता च विकाराकार एव च ॥ २४ ॥ त्वं वैशाख्यं वियोगं च त्वं योनिस्त्वं परायणम् ॥ त्वमुग्रदेवदेवादिस्त्वं साम त्वं तथा दिशः ॥ २५ ॥ किं न बुध्यति चात्मानं गणैः परिवृतो भवान् ॥ किमिदं देवदेवेश विवर्णः पृथुलोचनः ॥ २६ ॥ तन्ममाचक्ष्व तत्त्वेन यत्पृष्टोसि मया भवान् ॥ स्मर योगं च मायां च पश्य विष्णोर्महात्मनः ॥ २७ ॥ तव चैव प्रियार्थाय येनाहमिह चागतः ॥ ततो मम वचः श्रुत्वा लब्धसंज्ञो महेश्वरः ॥२८॥ उवाच मधुरं वाक्यं पापसन्तप्तलोचनः ॥ शृणु तत्त्वेन मे देव कोऽन्योऽप्येवं करिष्यति ॥२९॥ देवं नारायणं चैकं सर्वलोकमहेश्वरम् ॥ हे विष्णो त्वत्प्रसादेन देवत्वं चैव माधव॥३०॥ लब्धो योगश्च साङ्ख्यं च जातोऽस्मि विगतज्वरः ॥ त्वत्प्रसादेन जातोऽस्मि पूर्णाम्बुरिव सागरः ॥ ३१ ॥ अहं त्वां तु विजानामि मां त्वं जानासि माधव ॥ आवयो रन्तरं कोऽपि न पश्यति जनार्दन ॥ ३२ ॥ ब्रह्माणं तु विजानाति नावयोरन्तरेण हि ॥ साधु विष्णो महाभाग सर्वमायाकरण्डक ॥ ३३ ॥ एवं मह्यं हरो वाक्यमुक्त्वा भूतमहेश्वरः ॥ मुहूर्त्तं ध्यानमास्थाय पुनः प्रोवाच माधवि ॥ ३४ ॥ तव विष्णो प्रसादेन मया त्रिपुरं हतम् ॥ निहता दानवास्तत्र गर्भिण्यश्च निपातिताः ॥ ३५ ॥ बालवृद्धा हतास्तत्र विस्फुरन्तो दिशो दश ॥ तस्य पापस्य दोषेण न शक्नोमि विचेष्टितुम् ॥ ३६ ॥ प्रणष्टयोगमायश्च नष्टैश्वर्यश्च माधव ॥ किं कर्त्तव्यं मया विष्णो पापावस्थेन सम्प्रति ॥३७॥ विष्णो तत्त्वेन मे ब्रूहि शोधनं पाप नाशनम् ॥ येन वै कृतमात्रेण शुद्धो मुच्येत किल्बिषात् ॥ ३८ ॥ एवं चिन्तात्मनस्तस्य मया रुद्रस्य भाषितम् ॥ कपालमालां गृहीत्वा समलं गच्छ शङ्कर ॥ ३९ ॥ ममैव वचनं श्रुत्वा भगवान्परमेश्वरः ॥ उवाच मां पुनर्व्यक्तं मां बोधय जगत्पते ॥ ४० ॥ कीदृशः समलो विष्णो यत्र गच्छामहे वयम् ॥ ततस्तस्य वचः श्रुत्वा शङ्करस्य महेश्वरि ॥ ४१ ॥ तात्पापशोधनार्थाय मया वाक्यं प्रभाषितम् ॥ इमशानं समलं रुद्र पूतिको व्रणगन्धिकः ॥ ४२ ॥ स्वयं तिष्ठन्ति वै तत्र मनुजा विगतस्पृहाः ॥ तत्र गृह्य कपालानि रम तत्रैव शङ्कर ॥ ४३ ॥ तत्र

वर्षसहस्राणि दिव्यान्येव दृढव्रतः ॥ ततो भक्षय मांसानि पापक्षयाचिकीर्षुकः ॥ ४४ ॥ हतानां चैव मांसानि ये च भोज्यास्तव प्रियाः ॥ एवं सर्वैर्गणैः साद्धं वस तत्र सुनिश्चितः ॥ ४५ ॥ पूर्णे वर्षसहस्रे तु स्थित्वा त्वं समले पुनः ॥ गच्छाश्रमपदं पश्चाद्गौतमस्य महामुनेः ॥ ४६ ॥ तत्र ज्ञास्यसि चात्मानं गौतमाश्रमसंस्थितः ॥ प्रसादाद्गौतममुनेर्भवता गतकिल्बिषः ॥ ४७ ॥ सततं पापसम्पन्ने कपाले शिरसि स्थितम् ॥ ऋषिः पातयितुं शक्तस्त्वत्प्रसादान्न संशयः ॥ ४८ ॥ एवं रुद्रं वरं दत्त्वा तत्रैवान्तर्हितोऽभवम् ॥ रुद्रोऽपि भ्रमते तत्र श्मशाने पापसंवृते ॥४९॥ अतो न रोचते भूमे श्मशानं मे कदाचन ॥ यत्र रुद्रकृतं पापं स्थितं किल भयावहम् ॥ ५० ॥ एतत्ते कथितं भद्रे श्मशानं मे जुगुप्सितम् ॥ विना तु कृतसंस्कारो मम कर्मपरायणः ॥ ५१ ॥ प्रायश्चित्तं प्रवक्ष्यामि येन शुध्यति किल्बिषात् ॥ कृत्वा चतुर्थभक्षं तु दिनानि दश पंच च ॥ ५२ ॥ आकाशशयनं कुर्यादेकवस्त्रः कुशासने ॥ प्रभात पंचगव्यं च पातव्यं कर्मशोधनम् ॥ ५३ ॥ विमुक्तः सर्वपापेभ्यो मम लोकं सगच्छति ॥ पिण्याकं भक्षयित्वा तु यो देवमुपसर्पति ॥ ५४ ॥ तस्य वै शृणु सुश्रोणि प्रायश्चित्तं सुशोभनम् ॥ उलूको दश वर्षाणि कच्छपस्तु समास्त्रयः ॥ ५५ ॥ जायते मानवस्तत्र मम कर्मपरायणः ॥ यांस्तु दोषान्प्रपश्यन्ते संसारेऽस्मिन्वसुन्धरे ॥ ५६ ॥ तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम् ॥ किल्बिषाद्येन मुच्येत संसारान्तं च गच्छति ॥ ५७ ॥ यावत्केन दर्नेकं तु गोमूत्रेण च कारयेत्॥ रात्रौ वीरासनं कुर्यादाकाशशयने वसेत् ॥ ५८ ॥ न स गच्छति संसारं मम लोकं सगच्छति ॥ वराहमांसेन तु यो मम कुर्वीत प्रापणम् ॥ ५९ ॥ मूर्खः स पापकर्मा च मम कर्मपरायणः ॥ यांस्तु दोषान्प्रपश्येत संसारं च वसुन्धरे ॥ ६० ॥ यावद्रोम वराहस्य मम गात्रेषु संस्थितम् ॥ तावद्वर्ष सहस्राणि नरके पच्यते भुवि ॥ ६१ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ वाराहेण तु मांसेन यस्तु कुर्वीत प्रापणम् ॥ ६२ ॥ यावत्तत्तनुसंस्थं तु भजते तु प्रतिष्ठितम् ॥ तावत्स पतते देवि सौकरीं योनिमास्थितः ॥६३॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ यां गतिं सम्प्रपद्येत मम कर्मपरायणः ॥६४॥ अन्धो भूत्वा ततो देवि जन्म चैवं प्रतिष्ठितम् ॥ एवं गत्वा तु संसारं वराहमांसप्रापणात् ॥६५॥ जायते विपुले सिद्धे कुले भागवते शुचिः ॥ विनीतः कृतसंस्कारो मम कर्मपरायणः ॥६६॥ द्रव्यवान्गुणवांश्चैव रूपवाञ्छीलवाञ्शुचिः ॥ प्रायश्चित्तं प्रवक्ष्यामि

तस्य कायविशोधनम् ॥ ६७ ॥ किल्बिषाद्येन मुच्येत मम कर्मपरायणः ॥ फलाहारो दिनान्सप्त सप्त भू[illegible]शनस्तथा ॥ ६८ ॥ दिनानि सप्त तिष्ठेत सप्त वै पायसेन च ॥ तक्रेण सप्त दिवसान्सप्त पावकभोजनः ॥ ६९ ॥ प्रायश्चित्तान्महाभागे मम लोकं सगच्छति ॥ मद्यं पीत्वा वरारोहे यस्तु मामुपसर्पति ॥ ७० ॥ तत्र दोषं प्रवक्ष्यामि शृणु सुन्दर तत्त्वतः ॥ दशवर्षसहस्राणि दरिद्रो जायते पुनः ॥७१॥ ततो भवेत्सुपूतात्मा मद्भक्तः स न संशयः ॥ यस्तु भागवतो भूत्वा कामरागेण मोहितः ॥ ७२ ॥ दीक्षितः पिबते मद्यं प्रायश्चित्तं न विद्यते ॥ अन्यच्च त प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ ७३ ॥ आग्नेवर्णां सुरां पीत्वा तेन मुच्येत किल्बिषात् ॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ७४ ॥ न स लिप्यति पापेन संसारं च न गच्छति ॥ कौसुम्भं चैव यः शाकं भक्षयेन्मम पूजकः ॥७५॥ नरकं पच्यते घोरे दश पंच च सूकरः ॥ ततो गच्छेच्छ्वयोनौ च त्रीणि वर्षाण जम्बुकः ॥७६॥ वर्षमेकं ततः शुध्येन्मत्कर्माणि रतः शुचिः ॥ मम लोकमवाप्नोति शुद्धो भूत्वा वसुन्धरे ॥७७॥ ततो भूमिर्वचः श्रुत्वा प्रत्युवाच पुनर्हरिम् ॥ कुसुम्भशाकनैवेद्यप्रापणेन च किल्बिषात् ॥७८॥ कथं मुच्येत देवेश प्रायश्चित्तं वद प्रभो ॥ श्रीवराह उवाच ॥ यो मे कुसुम्भशाकेन प्रापणं कुरुते नरः ॥ ७९ ॥ दशवर्षसहस्राण नरके परिपच्यते ॥ प्रायश्चित्तं प्रवक्ष्यामि तच्च मे वदतः शृणु ॥ ८० ॥ भक्षणे तु कृते कुर्याच्चान्द्रायणमतन्द्रितः ॥ प्रापणे तु कृते कुर्याद्दशाहं पयोव्रतम् ॥ ८१ ॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ न स लिप्येत पापेन मम लोकं च गच्छति ॥ ८२ ॥ यः पारक्येण वस्त्रेण न धूतेन च माधवि ॥ प्रायश्चित्ती भवेन्मूर्खो मम कर्म परायणः ॥ ८३ ॥ करोति मम कर्माणि स्पृशते मां तदा स्थितः ॥ मृगो वै जायते देवि वर्षाणि त्रीणि सप्त च ॥८४॥ हीनपादेन जायेत चैकं जन्म वसुन्धरे ॥ मूर्खश्च क्रोधनश्चैव मद्भक्तश्चैव जायते ॥ ८५ ॥ तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम् ॥ येन गच्छति संसारं मम भक्तो व्यवस्थितः ॥ ८६ ॥ अष्टभक्तं ततः कृत्वा मम भक्तिपरायणः ॥ माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशीम् ॥ ८७ ॥ तिष्ठेज्जलाशये गत्वा शान्तो दान्तो यतव्रतः ॥ अनन्यमानसो भूत्वा मम चिन्तापरायणः ॥ ८८ ॥ प्रभातायां तु शर्वर्यामुदिते तु दिवाकरे ॥ पंचगव्यं ततः पीत्वा मम कर्माणि कारयेत् ॥८९॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ सर्वपापविनिर्मुक्तो मम लोकं सगच्छति ॥९०॥ (अकृत्वा यो

नवान्नानि मम कर्मपरायणः ॥) ततो भागवतो भूत्वा नवान्नं यो न कारयेत् ॥ ९१ ॥ पितरस्तस्य नाश्नन्ति वर्षाणि दश पंच च ॥ अदत्त्वा यस्तु भुञ्जीत नवान्नानि कदाचन ॥ ९२ ॥ न तस्य धर्मो विद्येत एवमेतन्न संशयः ॥ अन्यच्च ते प्रवक्ष्यामि येन तस्मात्प्रमुच्यते ॥ ९३ ॥ प्रायश्चित्तं महाभागे मम भक्तसुखावहम् ॥ उपवासं त्रिरात्रं तु तत एकेन वा पुनः ॥ ९४ ॥ आकाशशयनं कृत्वा चतुर्थेऽहनि शुध्यति ॥ एवं तत्र विधिं कृत्वा उदिते च दिवाकरे ॥ ९५ ॥ पंचगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्बिषात् ॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ ९६ ॥ सर्वसङ्गं परित्यज्य मम लोकं सगच्छति ॥ अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ॥ ९७ ॥ कुणपो जायते भूमे यातुधानो न संशयः ॥ वर्षाणि चैकविंशानि अयस्कारनिवासकः ॥ ९८ ॥ तिष्ठत्यत्र महाभागो एवमेतन्न संशयः ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ ९९ ॥ प्रायश्चित्तं प्रवक्ष्यामि येन मुच्येत किल्बिषात् ॥ यस्य कस्यचिन्मासस्य शुक्लपक्षस्य द्वादशीम् ॥ १०० ॥ उपोष्य चाष्टभक्तं तु दशैकादशमेव च ॥ प्रभातायां तु शर्वर्यामुदिते रविमण्डले ॥ १०१ ॥ पंचगव्यं ततः पीत्वा शीघ्रं मुच्यति किल्बिषात् ॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ १०२ ॥ तानि तानि तरन्त्येवं सर्वं एव पिता महाः ॥ वह्नुपानद्वौ पद्भ्यां यस्तु मामुपचक्रमेत् ॥ १०३ ॥ चर्मकारस्तु जायेत वर्षाणां तु त्रयोदश ॥ तज्जन्मनः परिभ्रष्टः सूकरो जायते पुनः ॥ १०४॥ सूकरत्वात्परिभ्रष्टः श्वा भवेच्च जुगुप्सितः ॥ ततः श्वत्त्वात्परिभ्रष्टो मानुषेषूपजायते ॥ १०५ ॥ मद्भक्तश्च विनीतश्च अपराध विवर्जितः ॥ मुक्तस्तु सर्वसंसारान्मम लोकं सगच्छति ॥ १०६ ॥ य एतेन विधानेन वसुधे कर्म कारयेत् ॥ न स लिप्येत पापेन एवमेतन्न संशयः ॥ १०७ ॥ भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् ॥ बधिरो जायते भूमे एकं जन्म न संशयः ॥ १०८ ॥ तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं मम प्रियम् ॥ किल्बिषाद्येन मुच्येत भेरीताडनमोहितः ॥ १०९ ॥ यस्य कस्यचिन्मासस्य शुक्लपक्षे तु द्वादशी ॥ आकाशशयनं कृत्वा शीघ्रं मुच्येत किल्बिषात् ॥ ११० ॥ य एतेन विधानेन वसुधे कर्म कारयेत् ॥ अपराधं न गच्छेत्तु मम लोकं सगच्छति ॥ १११ ॥ अन्नं भुक्त्वा बहुतरमजीर्णेन परिप्लुतः ॥ उद्गारेण समायुक्तः अस्नात उपसर्पति ॥ ११२ ॥ एकजन्मनि

श्वा चैव वानरश्चैव जायते ॥ एकास्मिञ्जन्मनि च्छागः सृगालश्चैकजन्मनि ॥ ११३ ॥ एकजन्म भवेद्गन्धो मूषको जायत पुनः ॥ तारितो ह्येष संसाराज्जायते विपुले कुले ॥११४॥ शुद्धो भागवतः श्रेष्ठस्त्वपराधविवर्जितः॥प्रायश्चित्तं प्रवक्ष्यामि मम भक्तसुखावहम्॥११५॥ किल्विषाद्येन मुच्येत मम भक्तिपरायणः ॥ त्रिदिनं पावकाहारो मूलाहारो दिनत्रयम् ॥ ११६ ॥ पायसेन दिनत्रय्यां त्रिदिनं सकुना तथा ॥ त्रिदिनं वायुभक्षोऽपि आकाशशयनस्त्रिकम् ॥११७॥ उत्थायापररात्रे तु कृत्वा वै दन्तधावनम्॥पंचगव्यं पिबेच्चैव शरीरपरिशोधनम् ॥११८॥ य एतेन विधानेन प्रायश्चित्तं समाचरेत् ॥ न स लिप्येत पापेन मम लोकं सगच्छति ॥ ११९ ॥ आख्यानानां महाख्यानं तपसां च परं तपः ॥ अत्राहं कीर्त्तयिष्यामि ब्राह्मणेभ्यो महेश्वरि ॥ १२० ॥ एष धर्मश्च कीर्त्तिश्च आचाराणां महौजसाम् ॥ गुणानां च परं श्रेष्ठं ऋतीनां च महा ऋतिः ॥ १२१ ॥ य एतत्पठते नित्यं कल्यमुत्थाय मानवः ॥ स पितॄंस्तारयेज्जन्तुर्दश पूर्वान्दशापरान् ॥ १२२ ॥ आरोग्याणां महारोग्यं मङ्गल्यानां तु मङ्गल्यम् ॥ रत्नानां परमं रत्नं सर्वपापप्रणाशनम् ॥ १२३ ॥ यस्तु भागवतो नित्यं पठते च दृढव्रतः ॥ कृत्वा सर्वापराधानि न स पापेन लिप्यते ॥ १२४ ॥ एष जप्यः प्रमाणं च सन्ध्योपासनमेव च ॥ कल्यमुत्थाय पठते मम लोकं सगच्छति ॥ १२५ ॥ न पठेन्मूर्खमध्ये तु कुशिष्याणां तथैव च ॥ दद्याद्भागवते श्रेष्ठे मम कर्मपरायणे ॥ १२६ ॥ एतत्ते कथितो देवि आचारस्य विनिश्चयः ॥ पूर्वं त्वया यत्पृष्टं तु किमन्यच्छ्रोतुमिच्छसि ॥ १२७ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे प्रायश्चित्तकर्ममूत्रं नाम षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

अथ गृध्रजम्बुकाल्यानम् । तत्रादित्यवरप्रदानम् ॥ सूत उवाच ॥ श्रुत्वा तु विपुलं ह्येतदपराधविशोधनम् ॥ कर्म भागवतं श्रेष्ठं सर्वभागवत प्रियम् ॥ १ ॥ अहो कर्म महाश्रेष्ठं भगवंस्तव भाषितम् ॥ मम चैव प्रियार्थाय तव भक्तसुखावहम् ॥ २ ॥ श्रुतं ह्येव महाबाहो सर्वधर्मार्थ साधकम्॥ तव भक्तसुखार्थाय तद्भवान्वक्तुमर्हति॥३॥किमुच्यते व्रतं चैव शुभं कुञ्जाग्रके महत् ॥कतरच्चापि तच्छ्रेष्ठं क्षेत्रं भक्तसुखावहम् ॥४॥ श्रीवराह उवाच ॥ शृणु मे परमं गुह्यं यत्त्वया पृच्छितं मम ॥ मम क्षेत्रं परं चैव शुद्धं भागवताश्रयम् ॥५॥ परं कोकामुखं स्थानं तथा कुञ्जाग्रकं परम् ॥ परं सौकरवं स्थानं सर्वसंसारमोक्षणम् ॥ ६ ॥ यत्र संस्था च मे देवि ह्युद्गतासि रसातलात् ॥ यत्र भागीरथी गङ्गा मम सौकरवे

स्थिता ॥ ७ ॥ धरोवाच ॥ केषु लोकेषु यान्तीश सौकरे ये मृताः प्रभो ॥ किं वा पुण्यं भवेत्तत्र स्नातस्य पिवतस्तथा ॥ ८ ॥ कतितीर्थानि पद्माक्ष क्षेत्रे सौकरवे तव ॥ धर्मसंस्थापनार्थाय ताद्रिप्णो वक्तुमर्हसि ॥ ९ ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि यत्त्वं मां परिपृच्छसि ॥ यां गतिं ते प्रपद्यन्ते नराः सौकरवे मृताः॥१०॥यत्र स्नातस्य यत्पुण्यं गतस्य च मृतस्य च॥यत्र यानि च तीर्थानि मम संस्थानसंस्थिताः॥११॥ शृणु पुण्य महाभागे मम क्षेत्रेषु सुन्दरि ॥ प्राप्नुवन्ति महाभागे गत्वा सौकरवं प्रति ॥ १२ ॥ दश पूर्वापराश्चापि अपरे सप्त पंच च ॥ स्वर्गं गच्छन्ति पुरुषास्तेषां ये तत्र वै मृताः ॥ १३ ॥ गमनादेव सुश्रोणि मुखस्य मम दर्शनात् ॥ सप्तजन्मान्तरे भद्रे जायते विपुले कुले ॥ १४ ॥ धनधान्यसमृद्धेषु रूपवान्गुणवान् शुचिः ॥ मद्भक्तश्चैव जायेत मम कर्मपरायणः ॥ १५ ॥ एवं वै मानुषो भूत्वा अपराधविवर्जितः ॥ गमनं तस्य क्षेत्रस्य मरणं तत्र कारणम् ॥१६॥ ये मृतास्तस्य क्षेत्रस्य सौकरस्य प्रभावतः ॥ शङ्खचक्रगदापद्मधनुर्हस्ताश्चतुर्भुजाः ॥१७॥ त्यक्त्वा कलेवरं तूर्णं श्वेतद्वीपं प्रयान्ति ते ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ १८ ॥ तीर्थेषु तेषु स्नातश्च यां प्राप्नोति परां गतिम् ॥ चक्रतीर्थं महाभागे यत्र चक्रं प्रतिष्ठितम् ॥ १९ ॥ शृणु पुण्यं तत्र भद्रे प्राप्नोति परमं नरः ॥ चक्रतीर्थे नरो गत्वा नियतो नियताशनः ॥ २० ॥ वैशाख द्वादशीं प्राप्य स्नायाद्यो विधिपूर्वकम् ॥ दशवर्षसहस्राणि दश वर्षशतानि च ॥ २१ ॥ धनधान्यसमृद्धो हि जायते विपुले कुले ॥ मद्भक्तश्चापि जायेत मम कर्मपरायणः ॥ २२ ॥ अपराधं वर्जयति दीक्षितश्चैव जायते ॥ भूत्वा वै मानुषस्तत्र तीर्थे संसारसागरम् ॥ २३ ॥ तीर्त्वा चक्र गदाशंखपद्मपाणिश्चतुर्भुजः ॥ मम रूपधरः श्रीमान्मम लोके महीयते ॥ २४ ॥ चक्रतीर्थे विशालाक्षि मरणे कृतकृत्यतः ॥ एतच्छ्रुत्वा वच स्तस्य श्रोतुकामा वसुन्धरा ॥ २५ ॥ शिरस्यञ्जलिमाधाय शुक्ष्णमेतदुवाच ह ॥ तत्र सौकरवे तिथि चन्द्रमास्त्वामतोषयत् ॥ २६ ॥ एतद्वा चक्ष्व तत्त्वेन परं कौतूहलं हि मे ॥ वसुधाया वचः श्रुत्वा विष्णुर्मायाकरण्डकः ॥ २७ ॥ उवाच वाक्यं मेदिन्याः मेघदुन्दुभिनिःस्वनः ॥ शृणु भूमे प्रयत्नेन कथ्यमानं मयानघे ॥ २८ ॥ तस्य वै कारणं येन तेन चाराधितोस्म्यहम् ॥ तस्य प्रीतोऽस्म्यहं देवि विशुद्धेनान्तरात्मना ॥२९॥ दर्शितश्च मया ह्यात्मा यो हि देवैषु दुर्लभः ॥ रूपं सोमेन तद्दृष्ट्वा विसंज्ञस्तदनन्तरम् ॥३०॥ मां स द्रष्टुं न शक्नोति मम तेजःप्रमोहितः ॥ ततो

निमीलिताक्षेण कृत्वा शिरसि चाञ्जलिम् ॥ ३१ ॥ न शक्नोति तथा वक्तुं भीरुः सन्त्रस्तलोचनः ॥ एवमेतद्विचेष्टन्तं ब्राह्मणानामपीश्वरम्॥३२॥ वाणीं सूक्ष्मां समादाय स सोमो चोदितो मया ॥ किं वा फलं समुद्दिश्य तप्यसे सुमहत्तपः ॥३३॥ ब्रूहि तत्त्वेन मे सोम यत्ते मनसि वर्त्तते ॥ सर्वं सम्पादयिष्यामि त्वत्प्रसादान्न संशयः ॥३४॥ मम वाक्यं ततः श्रुत्वा ग्रहाणां प्रवरेश्वरः॥ उवाच मधुरं वाक्यं सोमतीर्थमवस्थितः ॥३५॥भगवन् यदि तुष्टोऽसि मम चात्र गतः प्रभो॥योगनाथो जगच्छ्रेष्ठः सर्वयोगीश्वरेश्वरः॥३६॥ यावल्लोका धरिष्यन्ति तावत्त्वयि जनार्दन ॥ अतुला त्वयि मे भक्तिर्भवेन्नित्यं सुनिश्चला॥३७॥यद्यपि मम तद्रूपं त्वया संस्थापितं प्रभो ॥ सत्तद्वीपेषु दृश्येत तत्र तत्रैव संस्थितम् ॥३८॥ सोम इत्येव यज्ञेषु पिबन्तु मम ब्राह्मणाः॥गतिः पारमिका तेषां दिव्या विष्णो भवेत्त्वया॥३९॥क्षीणस्तत्र त्वमावर्त्स्यां तत्र पिण्डपितॄंश्चीया:॥प्रवर्त्तन्ते यथान्यायं भवेयं सोम्यदर्शनः॥४०॥अधर्मे च न मे बुद्धिर्भवेद्विष्णो कदाचन॥ पतित्वं चाथ गच्छेयमोषधीनां तथा कुरु ॥४१॥ यदि तुष्टो महादेव आदिमध्यान्त वर्जितः ॥ मम चैव प्रियार्थाय एतन्मे दीयतां वरः ॥ ४२ ॥ततः सोमवचः श्रुत्वा तत्रैवान्तर्हितोऽभवम् ॥ एवं तत्र महाभागे तपः सोमेन निश्चयात् ॥४३॥ प्राता च परमा सिद्धिः सोमतीर्थेऽन्यदुर्लभा ॥ स्नायाद्यः सोमतीर्थे तु मम कर्मपरायणः ॥४४॥ अश्वमेन तु भक्तेन मम कर्मविधौ स्थितः ॥ फलं तस्य प्रवक्ष्यामि सोमतीर्थे नरस्य यत्॥४५॥यत्र तप्तं तपस्तेन सोमेन सुमहात्मना॥पञ्चवर्षसहस्राणि एकपादेन तिष्ठता ॥४६॥ पञ्चवर्षसहस्राणि तथैवोर्द्धमुखः स्थितः ॥ एवमुग्रं तपः कृत्वा क्रान्तिमानभवच्च सः ॥४७॥ममापराधान्मुक्तश्च ब्राह्मणानां पतिस्तथा ॥ एवमेव महाभागे सोमतीर्थे कृतोदकः ॥४८॥ त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ॥ जायते ब्राह्मणः सुधु वेदवेदाङ्गपारगः ॥४९ ॥ द्रव्यवान्गुणवांश्चैव संविभागी यशस्विनि ॥ मद्भक्तश्चैव जायेत अपराधविवर्जितः ॥५० ॥ स एष ब्राह्मणो भूत्वा संसाराद्विप्रमुच्यते ॥ तस्य चिह्नं प्रवक्ष्यामि सोम तीर्थस्य सुन्दरि ॥ ५१ ॥ तत्तीर्थे येन विज्ञेयं मम मार्गानुसारिणा ॥ वैशाखस्य तु मासस्य शुक्लपक्षस्य द्वादशी ॥ ५२ ॥ प्रवृत्ते चान्धकारे तु यत्र काश्चिन्न दृश्यते॥ सोमेन च विना भूमिर्दृश्यते चन्द्रसप्रभा ॥ ५३॥ आलोकश्चैव दृश्येत सोमस्तत्र न दृश्यते ॥ एवं त्वां वच्मि हे भद्रे एष वै विस्मयः परः ॥ ५४ ॥ एतच्चिह्नं महाभागे पुण्ये सौकरवे मम ॥ सोमतीर्थं विशालाक्षि येन मुच्यन्ति जन्तवः ॥ ५५ ॥ अन्यच्च ते

प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ प्रभावमस्य क्षेत्रस्य विस्मयं परमं महत् ॥ ५६ ॥ अकामा तु मृता तीर्थे आत्मनः कर्मनिश्चयात् ॥ मम क्षेत्रप्रभावेण मृगाली मानुषी भवेत् ॥ ५७ ॥राजपुत्री विशालाक्षी श्यामा सर्वाङ्गसुन्दरी ॥ गुणवद्रूपसम्पन्ना चतुःषष्टिकलान्विता ॥५८॥ तस्य पूर्वेण पार्श्वेन तीर्थं गृध्रवटं स्मृतम् ॥ यत्राकामो मृतो गृध्रो मानुषत्वमुपागतः ॥ ५९ ॥ वाक्यं नारायणाच्छ्रुत्वा धरणी शुभलक्षणा ॥ उवाच मधुरं वाक्यं विष्णुभक्तसुखावहम् ॥ ६० ॥ अहो तीर्थप्रभावो वै त्वया प्रोक्तो महान्मम ॥ यस्य देव प्रभावेण तिर्यग्योनित्वमागतौ ॥ गृध्रश्चैव सृगाली च प्राप्तौ वै मानुषीं तनुम् ॥६१॥ स्नानेन तत्र तीर्थे च मरणाद्वा जनार्दन ॥ कां गतिं वै प्रपद्यन्ते तन्ममाचक्ष्व केशव ॥६२॥ चिह्नं च कीदृशं तेषां जायन्ते येन ते तथा ॥ अकामावपि तौ क्षेत्रे प्राप्तौ तु परमां गतिम् ॥ ६३ ॥ ततो महीधरः श्रुत्वा विष्णुर्धर्मविदां वरः ॥ उवाच मधुरं वाक्यं धर्मकामो वसुन्धराम् ॥६४॥शृणु तत्त्वेन मे भूमे यन्मां त्वं परिपृच्छसि ॥ उभौ तौ कारणव्यस्मात्प्राप्तौ वै मानुषीं गतिम्॥६५॥ तस्मिन्काले ह्यतिक्रान्ते मम कर्मविनिश्चयात् ॥ त्रेतायुगे व्युपक्रान्ते ज्ञाते च युगसंस्थितौ ॥ ६६॥ तत्र राजा महाभागः स्वधर्मकृतनिश्चयः ॥ ब्रह्मदत्तेति विख्यातः पुरं काम्पिल्यमास्थितः ॥ ६७ ॥ तस्य पुत्रो महाभागः सर्वधर्मेषु निष्ठितः ॥ सोमदत्तेति विख्यातः कुमारः शुभलक्षणः ॥ ६८ ॥ पित्रर्थे मृगयां यातो मृगलिप्सुर्वने तदा ॥ अरण्ये स तदा गत्वा व्याघ्रसिंहनिषेविते ॥६९ ॥ न तत्र लभते किञ्चित्पितृकार्ये नराधिपः ॥ एवं हि भ्रमतस्तस्य मृगाली दक्षिणे तथा ॥ ७० ॥ अङ्गमध्ये तु विद्धा सा स्फुरन्ती सर्वमङ्गला ॥ तथा सा बाणसन्तप्ता व्यथया च परिप्लुता ॥७१॥ पीत्वा सा सलिलं तत्र वृक्षं शाकोटकङ्गता ॥ आतपेन परिक्लान्ता बाणविद्धातुरा भृशम् ॥७२॥ अकामा मुञ्चती प्राणान् तीर्थे सोमात्मकं प्रति ॥ एतस्मिन्नन्तरे भद्रे राजपुत्रः क्षुधार्दितः ॥ ७३ ॥ प्रातो गृध्रवटं तीर्थं विश्रामं तत्र चाकरोत् ॥ अथ पश्यति गृध्रं स वटशाखां समाश्रितम् ॥ ७४ ॥ एकेन स तु बाणेन तथा गृध्रो निपातितः ॥ स तत्र पतितो गृध्रो वटमूले यशस्विनि ॥ ७५ ॥ गतासुर्नैव संज्ञां वै बाणभिन्नस्तथा ह्यदि ॥ तं दृष्ट्वा पतितं गृध्रं राजपुत्रस्तुतोष ह ॥ ७६ ॥ तस्य च्छित्त्वा ततः पक्षौ गृहीत्वा राजनन्दनः ॥ बाणपक्षान्विधातुं च सोमदत्तो गृहं ययौ ॥७७॥ सोऽपि दीर्घेण कालेन अकामोऽपि मृतः खगः ॥ जातः कलिङ्गराजस्य सुतो गुणविभूषितः ॥७८॥

रूपवान् पण्डितश्चैव प्रजानंदकरः सदा ॥ तस्मिन्राजनि नायासं कोऽपि कुत्रापि विंदति ॥७९॥ या सा मृगाली सञ्ज्ञे कांचीराजस्य वै सुता॥ रूपयुक्ता गुणवती दक्षा सर्वांगसुंदरी ॥ ८० ॥ चतुःषष्टिकलायुक्ता कोकिलेव सुवस्वरा ॥८१॥ एवं प्रवर्त्तिते तत्र कांचीराज्ये कलिङ्गके ॥ हार्दिक्यात्सौहृदात्प्रीतिरन्योऽन्यकुलनिश्चयात् ॥ ८२ ॥ भूमे मम प्रसादेन सम्बंधोऽजायत स्वतः ॥ अथ दीर्घेण कालेन कांचीराजसुता तथा ॥ ८३ ॥ कलिङ्गराजपुत्रेण विधिना तु विवाहिता ॥ कांचीराजस्तयोः प्रीत्या नानारत्नानि चाददत् ॥८४॥ भूषणानि च दिव्यानि गजाश्वमहिषीः स्त्रियः ॥ ततः कलिङ्गराजोऽपि सबंधूकं निजं सुतम् ॥ ८५ ॥ आदाय स्वगृहं यातस्तेन राज्ञातिमानितः ॥ एवं गच्छति काले वै दम्पत्योस्तुष्यमाणयोः ॥८६॥ अन्युच्छिन्नाऽभवत्प्रीती रोहिणीचंद्रयोरिव ॥ रेमतुस्तौ विहारेषु देवतायतनेषु च ॥.८७॥ वने चोपवने चैव ये केचिन्नन्दनोपमाः ॥ भर्त्तारं सा न पश्येच्चेत्कदाचिदपि पार्श्वतः ॥ ८८॥ नष्टं मन्येत चात्मानं राजपुत्री यशस्विनि ॥ न चेत्पश्यति भार्यां स्वां सोऽपि राजन्यनन्दनः॥८९॥ आत्मानं मन्यते प्रीत्या नष्टप्रायं वसुन्धरे ॥ दिने दिने तयोरेवं वर्द्धते प्रीतिरुत्तमा॥९०॥नान्तरं पश्येत कश्चित् पुरुषः पुण्यकर्मणोः ॥ सोऽपि बुद्धया सुशीलेन कृतेन च वसुन्धरे ॥९१॥ कलिंगस्तोषयामास पौरान् जानपदांस्तथा ॥ अन्तः पुरे तु या नार्यः कलिंगेषु घरे तयोः ॥९२ ॥ ताभ्यां सन्तोषिताः सर्वाः शीलेन स्वगुणैस्तथा॥ एवं प्रवर्द्धिता ताभ्यां प्रीतिः पूर्वं यशस्विनि ॥९३॥ रमते तत्र चान्योन्यं शचीवासवयोरिव ॥ अथ प्रणयपूर्वं सा कांतं सर्वांगसुन्दरी॥९४॥व्यज्ञिज्ञपद्राजसुतं सौहृदेन यशस्विनी ॥किंचिदिच्छामि ते वक्तुं राज पुत्र यशोधन ॥ ९५ ॥ मम स्नेहात्प्रियं चैव तद्भवान्वक्तुमर्हति ॥ ततो भार्यावचः श्रुत्वा कलिंगस्य सुतः प्रभुः ॥ ९६ ॥ उवाच मधुरं वाक्यं पद्मपत्रनिभेक्षणः ॥ यद्भद्रिष्यसि भद्रे त्वं यच्च तेऽस्ति मनीषितम् ॥९७॥ सर्वं ते कथयिष्यामि शपे सत्येन सुन्दरि ॥ सत्यं मूलं ब्राह्मणानां विष्णुः सत्ये प्रतिष्ठितः ॥९८॥ तस्य मूलं तपो राज्ञि राज्यं सत्ये प्रतिष्ठितम् ॥ नाहं मिथ्या प्रवक्ष्यामि कदाचिदपि सुन्दरि ॥९९॥ न मिथ्या पूर्वं मुक्तं मे ब्रूहि किं करवाणि ते ॥ हस्त्यश्वरथरत्नानि यानानि च धनानि च ॥१००॥ अथवा परमश्वं तु पट्टबन्धं करोमि ते ॥ सा भर्तृवचनं श्रुत्वा कांचीराजस्य चात्मजा ॥१०१ ॥ संगृह्य चोभौ चरणौ भर्त्तारमिदमब्रवीत् ॥ न चैव रत्नानीच्छामि हस्त्यश्वरथमेव च ॥ २ ॥ पट्टबन्धेन कार्यं च

यावद्भ्रियति मे गुरुः ॥ एका स्वपितुमिच्छामि मध्याह्ने तु तथाविधे ॥ ३ ॥ न चिरं बालकालं तु यथा कश्चिन्न पश्यति ॥ श्वशुरो यदि वा श्वश्र्यर्थेवान्यो नराधिप ॥ ४ ॥ सुता नैव च द्रष्टव्या व्रतमेतन्मुहुर्मुहुः ॥ आत्मनो वै गृहजना ये केचित्स्वजने जनाः ॥ ५ ॥ ते मां प्रसुतां पश्येयुः कदाचिदपि संस्थिताम् ॥ ततो भार्यावचः श्रुत्वा कलिङ्गेश्वर्यवर्द्धनः ॥ ६ ॥ बाढमित्येव तां वाक्यं प्रत्युवाच वसुन्धरे ॥ विस्रब्धा भव सुश्रोणि कल्याणेन यशस्विनि ॥ ७ ॥ न त्वां वै द्रक्ष्यते कश्चिच्छपनीय महाव्रताम् ॥ एवं गच्छति काले तु तयोस्तु तदन्तरे ॥ ८ ॥ कलिङ्गो जग्या युक्तो पुत्रं राज्येऽभ्यषेचयत् ॥ राज्यं दत्त्वा वरारोहे यथान्यायं कुलोद्भवम् ॥ ९ ॥ कृत्वा निष्कण्टकं राज्यं दत्त्वा पैचत्वमागतः ॥ एवं प्रभुस्ततो राज्यं पितुर्दत्तं यथोचितम् ॥ ११० ॥ एकाकी स्वपते तत्र यत्र कश्चिन्न पश्यति ॥ स तु दीर्घेण कालेन कलिङ्गकुलवर्द्धनः ॥ ११ ॥ सुतानजनयत्पंच आदित्यसमतेजसः ॥ एवं तु मानुषं लोकं मम मायाप्रमोहितम् ॥ १२ ॥ आत्मकर्मसु संयुक्तं चक्रवत्परिवर्त्तते ॥ जातो जन्तुर्भवेद्बालो बालस्तु तरुणो भवेत् ॥१३॥ तरुणो मध्यमं याति पश्चाद्याति जरां ततः ॥ बालो वै यानि कर्माणि करोत्यज्ञानतः स्वयम् ॥ १४ ॥ न स लिप्यति पापेन एवमेतन्न संशयः ॥ ततः करिष्यतो राज्यं निष्कण्टकमनामयम् ॥ १५॥ सप्तसप्ततिवर्षाणि ह्यतीतानि यशस्विनि ॥ अष्टसप्ततिके वर्षे एकान्ते तु नराधिपः ॥ १६ ॥ तमेव चिन्तयन्नर्थं मध्यसंस्थे दिवाकरे ॥ माधवस्य तु मासस्य शुक्लपक्षे तु द्वादशी ॥ १७ ॥ बुद्धिः सम्पद्यते तस्य प्रियादर्शनलालसा ॥ कौटुम्ब्यैस्तत्किं व्रतं चास्या एषा स्वापिति निर्जने ॥१८॥ न सुताया व्रतं किंचिद्दृश्यते धर्मसंचयः ॥ न च विष्णुकृतं कर्म न चैवेश्वरचोदितम् ॥१९॥ मनुना वै कृतो धर्म एष नैव न दृश्यते ॥ न काप्यपकृतो धर्मो महानपि न योगिनाम् ॥ १२० ॥ न तत्र एष विद्येत यश्चरेद्व्रतमीदृशम् ॥ बार्हस्पत्येषु धर्मेषु याम्येषु च न विद्यते ॥ २१ ॥ न एष विद्यते तत्र सुता चरति यद्व्रतम् ॥ भुक्त्वा तु कामभोगानि भुक्त्वा तु पिशितोदनम् ॥२२॥ ताम्बूलं रक्तवस्त्रं तु सुसूक्ष्मे पट्टवाससी ॥ सुगन्धैर्भूषिता गात्रे सर्वरत्नसमायुता ॥ २३ ॥ मम कान्ता विशालाक्षी किमत्र चरते व्रतम् ॥ कुप्येतापि तु सन्दृष्टा प्रिया मे कमलेक्षणा ॥ २४ ॥ अवश्यमेव द्रष्टव्या कीदृशं चरति व्रतम् ॥ किन्नरैः सुप्रलब्धेन वशीकरणमुत्तमम् ॥ २५ ॥ अथ योगीश्वरी भूत्वा यत्र गच्छति रोचते ॥ अथवा

चान्यसंसृष्टा कामरोगेण चावृता ॥ २६ ॥ एवं चिन्तयतस्तस्य अस्तं प्राप्तो दिवाकरः ॥ संवृत्ता रजनी सद्यः सर्वसार्थसुखावहा ॥ २७ ॥ ततो रात्र्यां व्यतीतायां प्रभातसमये शुभे ॥ पठन्ति मागधा वन्दिसूता वैतालिकास्तथा ॥ २८ ॥ शङ्खदुन्दुभिनादैश्च बोधितो वसुधाधिपः ॥ सर्वलोकहितार्थाय उदिते च दिवाकरे ॥२९॥ यत्तदा चिन्तितं पूर्वं द्रष्टुकामेन तां प्रियाम् ॥ सर्वचिन्तां परित्यज्य सा चिन्ता हृदि वर्त्तते ॥ १३०॥ स्नातस्तु विधिना सोऽथ क्षौमाभ्यामुपसंवृतः ॥ भुक्त्वा चोत्सारयामास आज्ञां दत्त्वा यथोचितम् ॥ ३१ ॥ व्रतस्थं यः स्पृशेन्मां तु नारी पुरुष एवं च ॥ धर्मपुत्रेण दण्डेन मम वध्यो भवेत्तु सः ॥ ३२ ॥ एवमाज्ञापयित्वा तु कालिङ्गो नृपतिः किल ॥ गतश्च त्वरया धीमान्प्रविष्टस्तत्र सुव्रते ॥ ३३ ॥ पर्यङ्कस्य तले तत्र राजा दर्शनलालसः ॥ विलोक्य तां वरारोहां ततश्चिन्तापरायणाम् ॥३४॥ ततः कमलपत्राक्षी वेदनायास पीडिता ॥ रुजार्त्ता रुरुदे तत्र शिरोवेदनताडिता ॥ ३५ ॥ किं मया तु कृतं कर्म पूर्वमेव सुदुष्करम् ॥ येनाहमीदृशीं प्राप्ता दशां पुण्यपरिक्षयात् ॥ ३६ ॥ भर्त्ता च मां न जानाति क्लिश्यमानामनाथवत् ॥ अथ मां किं कथं भर्त्ता मन्यते स्वजनोऽपि वा ॥३७॥ कथये किं शयाना तु सखीनां शपने स्थिता॥ एवमत्र न युज्येत यस्मया परिचिन्तितम् ॥ ३८ ॥ किंच वात्मनि दुःखस्य सर्वमेतच्च युज्यते ॥ किंच मां वक्ष्यते भर्त्ता किं च मामितरे जनाः ॥ ३९ ॥ अन्यायेन व्रतं चीर्णं सर्वतो विकृतं भवेत् ॥ कदाचिदपि काले तु गच्छेत्सौकरवं प्रति ॥ १४० ॥ ततो ब्रूयामिदं वाक्यं यस्मे हृदयवर्तिष्टते ॥ ततः प्रियावचः श्रुत्वा समुत्थाय ततो नृपः ॥ ४१ ॥ दोर्भ्यामालिङ्ग्य वै भार्यां वाक्यमेतदुवाच ह ॥ किमिदं भाषसे भद्रे आत्मानं न प्रशंससि ॥४२ ॥ अशोच्या शोचिता या तु यच्च निन्दसि चात्मनि ॥ भिषजः किं न विद्यन्ते अष्टकर्मसमाहिताः ॥४३॥ ये तु संस्थापयेयुस्ते शिरसो वेदनां पराम् ॥ त्वया पूर्वं व्रतविघाद्भेदना यदि गोपिता ॥४४॥ येन वै क्लिश्यसे भद्रे शिरस्य सुखपीडिता ॥ वायुना कफपित्तेन शोणितेन कफेन वा ॥ ४५ ॥ सान्निपातस्य दोषेण येनेदं पीड्यते शिरः ॥ काले विकाले कृत्वा वै वित्तोद्रेकं यशस्विनि ॥ ४६ ॥ अश्नासि पिशितं चात्र तेनेदं दूष्यते शिरः ॥ क्रियतेऽत्र शिरावेधो रुधिरस्राव एव च ॥ ४७ ॥ दीयते चेच्छिरोऽभ्यङ्गः कथं तिष्ठति वेदना ॥ किमेतद्दोषितं भद्रे मयि तत्र निवेदितम् ॥ ४८ ॥ त्वया व्रतमिषेणायमात्मा संक्लिश्यते

वृथा ॥ या त्वं वै भाषसे वाक्यं सौकरे गमनं प्रति ॥ ४९ ॥ तत्र गोप्यं किमस्तीति येन ते परिवेदना ॥ ततः कमलपत्राक्षी सव्रीडा दुःखपीडिता ॥ १५० ॥ भर्तुर्गृह्यं हृदीत्वा चरणौ सा पतिं प्रत्यभाषत ॥ प्रसीद मे महाराज नेदं प्रष्टुं त्वमर्हसि ॥ ५१ ॥ मम पूर्वकथां वीर वीर दुष्कर्मानुसारिणीम् ॥ ततो भार्यावचः श्रुत्वा कलिङ्गानां जनाधिपः ॥ ५२ ॥ उवाच मधुरं वाक्यं सुहितेनान्तरात्मना ॥ किमिदं गोप्यते देवि ममाग्रे वरवर्णिनि ॥ ५३ ॥ तथ्यमेव महाभागे पृच्छ्यमाना यशस्विनि ॥ ततो भर्तृवचः श्रुत्वा विस्मयोत्फुल्ललोचना ॥ ५४ ॥ उवाच मधुरं वाक्यं कलिङ्गानां महाधिपम् ॥ भर्त्ता धर्मो यशो भर्त्ता भर्त्तैव प्रियमात्मनः ॥ ५५ ॥ अवश्यमेव तद्वाच्यं यन्मां त्वं परिपृच्छसि ॥ तथापि नोत्सहे वक्तुं हृदि यत्परिवर्त्तते ॥ ५६ ॥ तव पीडाकरमिति तन्मां न प्रष्टुमर्हसि ॥ एतद्दुःखं महाभाग हृदि मे परिवर्त्तते ॥५७॥ सुखे हि वर्त्तसे नित्यं महाराजोऽसि सुन्दरः ॥ बह्व्यो मत्सदृशा भार्यास्तिष्ठन्त्यन्तःपुरे तव ॥५८॥ प्राश्नासि पिशितान्नं च पाषाराम्भूषणानि च ॥ आच्छादयसि यानैश्च हस्त्यश्वरथपृष्ठगः ॥ ५९ ॥ गच्छस्यनारतं राजन् किं स्थितं च मया विना ॥ आज्ञा च तेऽप्रतिहता गन्धान्भोगांश्च सर्वशः ॥ १६० ॥ विभर्षि स्वेच्छया राजन्न मां संप्रष्टुमर्हसि ॥ त्वं मे देवो गुरुः साक्षाद्भर्त्ता यज्ञः सनातनः ॥ ६१ ॥ धर्मश्चार्थश्च कामश्च यशः स्वर्गश्च मानद ॥ पृष्ट्वा मे सदा वाच्यं सर्वं सत्यं प्रियं तव ॥ ६२ ॥ पतिव्रतानां सर्वासामेष धर्मः सनातनः ॥ न संशये नियोक्तव्यः सुखस्थो हि पतिः स्त्रिया ॥६३॥ एतन्निश्चित्य मे पीडां न प्रष्टुं त्वमिहार्हसि ॥ ततो भार्यावचः श्रुत्वा कलिङ्गानां जनाधिपः ॥ ६४ ॥ उवाच मधुरं वाक्यं भार्यापीडाभिपीडितः ॥ शृणु तत्त्वेन मे भद्रे शुभं वा यदि वाशुभम् ॥६५॥ अवश्यमेव वक्तव्यं पृष्ट्वा पतिना ध्रुवम् ॥ यानि गुह्यान्यगुह्यानि स्त्रियो धर्मपथे स्थिताः ॥ ६६ ॥ भर्त्तारं च समासाद्य रहस्तां गोपयन्ति न ॥ कृत्वा सुदुष्करं कर्म रागलोभप्रमोहिता ॥ ६७ ॥ या सुगोपायते गुह्यं सती सा नोच्यते बुधैः ॥ एवं चिन्त्य महाभागे ब्रूहि सत्यं यशस्विनि ॥६८॥ अधर्मस्ते न भविता गुह्यार्थकथने मम ॥ ततो भर्तृवचः श्रुत्वा सा देवी परमप्रिया ॥ ६९ ॥ प्रत्युवाच प्रियं वाक्यं राजानं धर्मवादिनम् ॥ देवो राजा गुरू राजा सोमो राजेति पठ्यते ॥१७०॥ अवश्यमेव वक्तव्यमेष धर्मः सनातनः ॥ यदि गुह्यं न मे कार्यं श्रूयतां राजसत्तम ॥७१॥

अभिषिंचस्व राज्ये स्वे ज्येष्ठं पुत्रं कुलोचितम्॥एहि नाथ मया सार्द्धं क्षेत्रं सौकरवं प्रति॥७२॥ ततो भार्यावचः श्रुत्वा कलिंगानां जनाधिपः ॥
बाढमित्येव वाक्येन छन्दयामास तां प्रियाम्॥७३॥दास्यामि राज्यं पुत्राय वचनात्तव सुन्दरि॥यथा पूर्वं मया लब्धं स्वपितुर्यद्यथाक्रमम् ॥७४॥
इत्युक्त्वा तौ महाभागौ युक्तं चैव परस्परम् ॥ राजा च राजपुत्री च निष्क्रान्तौ तद्गृहात्ततः ॥ ७५ ॥ ततः कंञ्जकिनं दृष्ट्वा प्रोवाचोच्चस्वरेण च ॥
अपसार्य सर्वं वै जनमावृत्य तिष्ठति॥७६॥ ज्ञानकोतूहलो योऽत्र शीघ्रं गच्छत्वितो बहिः॥ततो हलहलाशब्दः प्रवृत्तोऽन्तःपुरे महान्॥७७ ॥
किमिदं कारणं वृत्तं येन चोत्सारिता वयम् ॥ नाज्ञास्ति चिन्तालोलानामागतानां स्वकार्यतः ॥ ७८ ॥ अश्रोतव्यं भवेद्वृत्तं येन चोत्सारिता
वयम् ॥ ततो भोज्यान्नपानानि भुक्त्वा रुच्या नृपः प्रियान् ॥७९॥ समं महिष्या चाचम्य क्षणं विश्रम्य पार्थिवः ॥ अमात्यानानयामास ह्यभि
षेकुं निजं सुतम् ॥ १८० ॥ सम्प्राप्तान्सचिवांस्तत्र राजा वचनमब्रवीत् ॥ राजधानी संस्क्रियतां मङ्गलाचारपूर्वकम् ॥ ८१ ॥ वृद्धामात्यसुपा
स्याथ कलिङ्गो धर्मसंहितम् ॥ नीतिशास्त्रार्थतत्त्वज्ञसुवाचाविक्लवं वचः ॥ ८२ ॥ काल्यमिच्छाम्यहं तात पुत्रं राज्येऽभिषेचितुम् ॥ शीघ्रं सज्जं
प्रकुर्वन्तु आभिषेचनिकं विधिम् ॥८३॥ भूतमित्येव तं प्राहुः सचिवास्तं नराधिपम् ॥ अस्माकमपि तत्रैव रोचते यत्प्रभाषसे ॥८४॥ पुत्रस्ते
राजशार्दूल सर्वलोकहिते रतः ॥ प्रजानुरागज्ञाज्ञूरो नीतिज्ञस्तु विचारकः ॥८५॥ मनीषितं तव विभो सम्यङ् नो मनतः प्रियम् ॥ एवमुक्त्वा
गतामात्याः सूर्यश्चास्तमुपागतः ॥८६॥ सुखेन सा गता रात्रिर्गीतगान्धर्ववादितैः ॥ बोधितः स च राजा तु सूतमागधवन्दिभिः ॥८७॥ वैतालि
कैश्च सुश्लोणि सर्वमंगलपाठकैः ॥ प्रभातायां तु शर्वर्यामुदिते च दिवाकरे ॥ ८८ ॥ मुहूर्ते शुभमासाद्य ह्यभिषिक्तः सुतः शुचिः ॥ एवं दत्त्वा
तदा राज्यं सूर्धि चाघ्राय धर्मवित् ॥ ८९ ॥ उवाच मधुरं वाक्यं पुत्रं पुत्रवतां वरः ॥ राज्यस्थेनापि ते पुत्र कर्त्तव्यं शृणु तन्मम ॥ १९० ॥
यदीच्छेः परमं धर्मं पितॄणां तारणं तथा ॥ दातव्यं न च हंतव्यं हंतव्याः पारदारिकाः ॥ ९१ ॥ बालवाताश्च हंतव्या हंतव्याः स्त्रीविघातकाः॥
न लोभः परभार्यासु ब्राह्मणीषु विशेषतः ॥९२॥ सुरूपां परनारीं तु दृष्ट्वा चक्षुर्निमीलयेः ॥ परद्रव्येषु मा लोभः अन्यायोपार्जितेषु च ॥९३॥
न चिरं तिष्ठति क्वापि कथंचन न पश्यसि ॥ क्षणीयश्च ते देशः कुशलन्यायसंजितः ॥ ९४ ॥ नित्यायुक्तेन स्थातव्यममात्यवचनं कुरु ॥

अमात्यो यद्वचो ब्रूयात्तस्य कार्यं विमर्शयेत् ॥ ९६ ॥ अवश्यमेव कर्त्तव्यं शरीरपरिरक्षणम् ॥ प्रजा येन प्रमोदंति येन तुष्यंति ब्राह्मणाः ॥ ९६ ॥ एवं ते पुत्र कर्त्तव्यं मम प्रियहितैषिणा ॥ सप्तव्यसनवर्गोऽत्र दोषो राज्ञां महान्भवेत् ॥ ९७ ॥ अर्थदूषणकं चैव न कर्त्तव्यं कदाचन ॥ अमात्यं नाधियं बूया यामिच्छे राजकर्मणि ॥ ९८ ॥ नाहं निवारणीयस्ते गमनाय पथे स्थितः ॥ एतन्मे क्रियतां शीघ्रं यदीच्छसि मम प्रियम् ॥ ९९ ॥ ततः पितुर्वचः श्रुत्वा राजपुत्रो यशस्विनि ॥ पितुः पादौ तु संगृह्य करुणं प्रत्युवाच तम् ॥ २०० ॥ मम किं तात राज्येन क्रोशेन च बलेन च ॥ यस्त्वया रहितस्तात न शक्नोमि विचेष्टितुम् ॥ १ ॥ अभिषेकं राजशब्दं मम संज्ञापितं त्वया ॥ एतन्न बहुमन्येऽहं विना तात त्वया ह्यहम् ॥ २ ॥ क्रीडामेवाऽत्र जानामि येन क्रीडन्ति बालकाः ॥ राज्यचिन्तां न जानामि राजानो यां तु कुर्वते ॥३॥ ततः पुत्रवचः श्रुत्वा कलिङ्गानां महीपतिः ॥ उवाच मधुरं वाक्यं सामपूर्वं यशस्विनि ॥ ४ ॥ यच्चेदं भाषसे पुत्र नाहं जानामि तद्वचः ॥ पुत्र शिक्षापरिप्यन्ति पौरजानपदास्तव ॥ ५ ॥ एवं संदिश्य तं तत्र स राजा धर्मशास्त्रतः ॥ गमनाय मतिं चक्रे क्षेत्रं सोकरवं प्रति ॥ ६ ॥ तं प्रयान्तं ततो दृष्ट्वा पौरजानपदास्तव ॥ सकलत्रसुताः सर्वेऽप्यनुयान्ति नराधिपम् ॥ ७ ॥ हस्त्यश्वरथयानानि स्त्रियश्चान्तःपुरस्थिताः ॥ संदृष्ट मनसः सर्वे अनुयान्ति नराधिपम् ॥८॥ अथ दीर्घेण कालेन प्राप्य सौकरवं तदा ॥ धनधान्यसमृद्धत्वादि प्रददौ तत्र माधवि ॥९॥ एवं गच्छति काले तु तयोस्तत्र वसुन्धरे ॥ प्रवर्त्तमानयोर्नित्यं धर्मे कर्मणि शुद्धयोः ॥ २१० ॥ ततः स पद्मपत्राक्षः कलिङ्गानां जनाधिपः ॥ उवाच मधुरं वाक्यं कांचीराजसुतां तदा ॥११ ॥ पूर्णं वर्षसहस्रं वै जीवितं मम सुन्दरि ॥ ब्रूहि तत्परमं गुह्यं यन्मया पूर्वपृच्छितम् ॥ १२ ॥ ततो भर्तुर्वचः श्रुत्वा प्रहस्य रुचिरेक्षणा ॥ उभौ तौ चरणौ गृह्य राजानं वाक्यमब्रवीत् ॥ १३ ॥ एवमेतन्महाभाग यन्मां त्वं परिपृच्छसि ॥ उपोष्य तु त्रिरात्रं त्वं पश्चाच्छ्रोष्यसि मानद॥१४॥ वाढमित्येव तां राजा प्रत्युवाच यशस्विनि ॥ पद्मपत्रविशालाक्षि पूर्णचन्द्रनिभानने॥१५॥ यथा वदसि सुश्रोणि तथैव मम रोचते ॥ दन्तकाष्ठं समादाय द्वादशांगुलमायतम् ॥ १६ ॥ स्नात्वा सङ्कल्पयामास त्रिरात्रं नियमान्वितौ ॥ उपोष्य तौ त्रिरात्रं तु विधिना नियमान्वितौ ॥१७॥ततः स्नातौ शुचौ क्षौमे परिधाय तु वाससी ॥ प्रणम्य भूपितौ विष्णुं दम्पती तदनन्तरम् ॥१८॥ततः सा सुन्दरी

॥१२७॥

भूषां समुत्तार्य शुभेक्षणा ॥ मह्यं निवेदयामास प्रोवाच च जनेश्वरम् ॥१९ ॥ एह्येहि नाथ गच्छावः पश्य गोप्यं मयीपितम् ॥ ततो हस्ते पतिं गृह्य उद्वाह इव सुन्दरी ॥२०॥उवाच मधुरं वाक्य कालगाधिपतिं तथा ॥ सृगाली पूर्वमेवाहं तिर्यग्योनिव्यवस्थिता ॥ २१ ॥ विद्धास्मि सोम दत्तेन बाणेन मृगलिप्सुना ॥ एतं शिरसि मे राजन्पश्य बाणं सुसस्कृतम् ॥२२॥ यस्य दोषेण मेऽप्येष रुजा शिरसि संस्थित॥कांचीराजकुले जन्म पित्रा दत्ता तव प्रिया ॥२३॥ क्षेत्रप्रभावान्मे सेपा जाता सिद्धिर्नमोऽस्तु ते ॥ स ततः पद्मपत्राक्षः कलिङ्गानां जनाधिपः ॥ २४ ॥ श्रुत्वा राजा प्रियां वाक्यं प्रत्युवाच स्मृतिङ्गतः ॥ अहं गृध्रो महाभागे तेनैव वनचारिणा ॥२५॥ सोमदत्तेन बाणेन एकेनैव निपातितः ॥ ततो जातोऽस्म्यहं भद्रे कालिंगानां जनाधिपः ॥२६ ॥ जातोऽस्मि परमा व्युष्टिः प्राप्तं राज्यं मया महत् ॥ सिद्धिर्लब्धा वरारोहे मया सर्वांगसुन्दरि ॥२७॥ अकामपतितेनापि पश्य क्षेत्रस्य वै फलम् ॥ ये च भागवतश्रेष्ठा ये च नारायणप्रियाः ॥२८॥ पौरजानपदाः सर्वे श्रुत्वा तु तदनन्तरम् ॥ लाभा लाभौ परित्यज्य सर्वकर्मण्यकारयन् ॥ २९॥ तत्रैव मरणं प्रापुः सर्वसंगविवर्जिताः ॥ श्वेतद्वीपं ततः प्राप्ताः सर्वे एव चतुर्भुजाः ॥ २३०॥ सर्वे शङ्खपराश्चैव सर्वे चायुधसंयुताः ॥ ताः स्त्रियश्च वरारोहे स्तुतिमान्या महौजसः ॥३१॥ श्वेतद्वीपे प्रमोदन्ते सर्वभोगसमन्विताः ॥ एवं ते कथितं भूमे व्युष्टिः सौकरवे महत् ॥ ३२ ॥ अकामपतिताश्चैव श्वेतद्वीपमुपागताः ॥ य एतेन विधानेन वासं तीर्थे तु कारयेत् ॥ ३३ ॥ मरणं च विशालाक्षि श्वेतद्वीपं स गच्छति ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ ३४ ॥ स्नानादाखोटके तीर्थे यत्फलं समुपाश्नुते ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥ ३५ ॥ नन्दनं समवाश्रित्य मोदन्ते चैव सर्वदा ॥ ततः स्वर्गात्परिभ्रष्टो जायते विपुले कुले ॥ ३६ ॥ मद्रकश्चैव जायेत ऐश्वमेतन्न संशयः ॥ पुनरन्यत्प्रवक्ष्यामि स्नातो गृध्रवटे नरः ॥ ३७ ॥ यत्फलं समवाप्नोति स्नानमात्रकृतोदकः ॥ नववर्षसहस्राणि नववर्ष शतानि च ॥३८॥ इन्द्रलोकं समासाद्य मोदते निर्जरैः सह ॥ इन्द्रलोकात्परिभ्रष्टो मम तीर्थप्रभावतः ॥ ३९ ॥ सवसङ्गं परित्यज्य मद्रकश्चैव जायते ॥ एतत्ते कथितं भद्रे स्नानमात्रस्य यत्फलम् ॥ २४०॥ यत्त्वया पृच्छितं पूर्वं सर्वसंसारमोक्षणम् ॥ ततो नारायणच्छुत्वा पृथिवी संशि तव्रता ॥४१॥ उवाच मधुरं वाक्यं लोकनाथं जनार्दनम् ॥ केन कर्मविपाकेन तीर्थे पुनरवाप्यते ॥४२॥ स्नानं वा मरणं देव यथावद्रुकुमर्हसि॥

श्रीवराह उवाच ॥ शृणु देवि महाभागे पूर्वधर्मकृतो नराः ॥४३॥ केनचित्कर्मदोषेण तिर्यग्योनिमवाप्य हि ॥ जन्मान्तरार्जितैः पुण्यैस्तीर्थस्नान जपादिभिः ॥४४॥ महादानैश्च लभ्येत तीर्थे पञ्चत्वमर्चकैः ॥ जन्मान्तरकृतं कर्म यत्स्वल्पमपि वा बहु ॥ ४५ ॥ तत्कदाचित्फलत्येव न तस्य परिक्षयः ॥ कदाचिद्वासहायो वै पुण्यतीर्थादिदर्शनात् ॥ ४६ ॥ दुर्बलं प्रबलम्भूत्वा प्रबलं दुर्बलम्भवेत् ॥ पापान्तरं समासाद्य गहना कर्मणो गतिः ॥ ४७ ॥ यदल्पमिव दृश्येत तन्महत्त्वाय कल्पते ॥ अत एव मनुष्यत्वं प्राप्ते राजत्वमेव च ॥ ४८ ॥ मृगाली चैव गृध्रश्च तीर्थस्येव प्रभावतः ॥ मरणादेव सम्प्राप्य क्षीणपापौ स्मृतिं पुनः ॥ ४९ ॥ इयतेद्वीपं ततः प्राप्तौ जानीहि त्वं वसुन्धरे ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥२५०॥ तीर्थं वैवस्वतं नाम यत्रार्कस्तप्तवांस्तपः ॥ कदाचित्पुत्रकामेन मात्तण्डेन महत्तपः ॥५१ ॥ कृतं चान्द्रायणं तत्र दशवर्षसहस्रकम् ॥ ततः सप्तसहस्राणि वायुभक्षस्तु संस्थितः ॥ ५२ ॥ ततस्तुष्टोऽस्म्यहं भद्रे सूर्यस्य सुमहौजसः ॥ वरेण छन्दयामास आदित्यं तदनन्तरम् ॥ ५३ ॥ विवस्वन्तं महाभागं मम कर्मपरायणम् ॥ वरं वरय भद्रं ते यस्ते मनसि वर्त्तते ॥५४ ॥ ततो मम वचःश्रुत्वा कश्यपस्य सुतो बली ॥ मधुरं स्वरमादाय प्रत्युवाच महद्वचः ॥५५॥ यदि देव प्रसन्नोऽसि अयं मे दीयतां वरः ॥ पुत्रमिच्छाम्यहं देव प्रसादात्ते सुरेश्वर ॥५६॥ विवस्वद्वचनं श्रुत्वा तुष्टोऽहं तस्य सुन्दरि ॥ तस्य शुद्धेन मनसा प्रोक्तवानस्मि सुन्दरि ॥ ५७ ॥ यमश्च यमुना चैव मिथुनं जनयिष्यतः ॥ एवं तस्य वरं दत्त्वा आदित्यस्य वसुन्धरे ॥ ५८ ॥ आत्मयोगप्रभावेण तत्रैवान्तर्हितोऽभवम् ॥ आदित्योऽपि गतो भद्रे वेश्म स्वं च महाधनम् ॥५९॥ पुण्यं सौकरवे कृत्वा सुदुष्करतरं महत् ॥ अष्टमेन तु भक्तेन यस्तु स्नाति वसुन्धरे ॥२६० ॥ दशवर्षसहस्राणि सूर्यलोके महीयते ॥ अथवा तत्र सुश्रोणि म्रियते पुण्यवान्नरः ॥६१॥ यमलोकं न गच्छेत्तु तथिस्यास्य प्रभावतः ॥ एतत्ते कथितं भद्रे स्नानस्य मरणस्य च ॥६२॥ फलं चैव यथावृत्तं तीर्थे सौकरवे मम ॥ आख्यानानां महाख्यानं क्रियाणां च महाक्रिया ॥ ६३ ॥ एष जप्यः प्रमाणं च सन्ध्योपासनमेव च ॥ एष तेजश्च मन्त्रश्च सर्वभागवतप्रियम् ॥६४॥ शिशुनाय न दातव्यं मूर्खे भागवते न तु ॥ न च वैश्याय शूद्राय ये न जानन्ति मां परम् ॥६५॥ पण्डितानां सभामध्ये ये च भागवता भुवि ॥ मठे ब्राह्मणमध्ये तु ये च वेदविदां वराः ॥ ६६ ॥ दीक्षिताय च दातव्यं ये च शास्त्राणि जानते ॥

एतत्ते कथितं भद्रे पुण्यं सौकरवे महत् ॥६७॥ य एतत्पठते सुधु कल्य उत्थाय मानवः ॥ तेन द्वादशवर्षाणि चिन्तितोऽहं न संशयः ॥६८॥ न स जायेत गर्भेषु मुक्तिमाप्नोति शाश्वतीम् ॥ यः पठेदेकमध्यायं तारयेत्स कुलान्दश ॥ ६९ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे तीर्थमाहात्म्ये सौकरवे गृध्रजम्बूकाख्याने आदित्यवरप्रदानादिकं नाम सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७॥ इति गृध्रजम्बूकोपाख्यानं समाप्तम् ॥ अथ खंजरीटोपाख्यानम् ॥ सूत उवाच ॥ एतत्पुण्यतमं श्रुत्वा रम्ये सौकरवे तदा ॥ गुणस्तवं च माहात्म्यं जात्यानां परिवर्त्तनम् ॥ १ ॥ ततः कमलपत्राक्षी सर्वधर्मविदां वरा ॥ विस्मयं परमं गत्वा निर्वृतेनान्तरात्मना ॥ २ ॥ पुनः पप्रच्छ तं देवं विस्मयाविष्टमानसा ॥ अहो तीर्थस्य माहात्म्यं क्षेत्रे सौकरवे तव ॥ ३ ॥ अकामाश्रियमाणस्य मानुषत्वमजायत ॥ किं वान्यद्वृत्तमाख्याहि क्षेत्रे सौकरवेऽमले ॥ ४ ॥ शृण्वन्त्या मे महज्जातं चित्ते कौतूहलं परम् ॥ गायमानस्य किं पुण्यं वाद्यमानस्य किं फलम् ॥ ५॥ नृत्यतः किं भवेत्पुण्यं जाग्रतो वा फलं तु किम् ॥ गोदातुरन्नदातुर्वा जलदातुस्तु किं फलम् ॥ ६ ॥ संमार्जने लेपने वा गन्धपुष्पादिदानतः ॥ धूपदीपादिनैवेद्यैः किं फलं समुदीरितम् ॥ ७ ॥ अन्येन कर्मणा चैव जपयज्ञादिनाऽथवा ॥ कां गतिं प्रतिपद्यन्ते ये शुद्धमनसो जनाः ॥८ ॥ तव भक्तसुखार्थाय तद्भवान्वक्तुमर्हति ॥ ततो मह्या वचः श्रुत्वा सर्वदेवमयो हरिः ॥ ९ ॥ उवाच मधुरं वाक्यं धर्मकामां वसुन्धराम् ॥ श्रीवराह उवाच ॥ शृणु सुन्दरि तत्त्वेन यन्मां त्वं परिपृच्छसि ॥ १० ॥ सर्वं ते कथयिष्यामि पुण्यकर्म सुखावहम् ॥ तास्मिन्सौकरवे पक्षी खञ्जरीटस्तु कीटकान् ॥ ११॥ बहून् भुक्त्वा हि वसुधे अजीर्णेभृशपीडितः ॥ मरणं समनुप्राप्तः पतितः स्वेन कर्मणा ॥ १२ ॥ सम्प्राप्तास्तत्र वै बालाः क्रीडन्तस्तं मृतं खगम् ॥ ग्रहीष्याम इति प्रोच्य धावन्तस्तत्र तत्र ह ॥ १३ ॥ ममायं वै ममायं वै जिघृक्षन्तः परस्परम् ॥ सङ्घर्षात्कलहं चक्रुर्भृशं क्रीडनकोत्सुकाः ॥ १४ ॥ तत एको गृहीत्वेनं गङ्गाम्भासि समाक्षिपत् ॥ युष्माकमेव भवतु नानेनास्मत्प्रयोजनम् ॥ १५ ॥ एवं स खञ्जरीटो हि गङ्गातोयात्ततस्तदा ॥ आदित्यतीर्थसंक्लिन्नशरीरः स वसुन्धरे ॥ १६ ॥ वैश्यस्य तु गृहे जातो ह्यनेककृतुयाजिनः ॥ धनरत्नसमृद्धे तु रूपवान् गुणवान् शुचिः ॥ १७ ॥ विबुद्धश्च पवित्रश्च मद्भक्तश्च वसुन्धरे ॥ जातस्य तस्य वर्षाणि जग्मुर्द्वादश सुव्रते ॥ १८ ॥ कदाचिदुपविष्टौ तौ दृष्ट्वा बालो गुणान्वितः ॥ मातः

पितरं चोभौ हर्षेण महतान्वितौ ॥ १९ ॥ प्रणम्य शिरसा भूमौ बद्धाञ्जलिरयाचत ॥ मत्प्रियं यदि कर्त्तव्यमेको मे दीयतां वरः ॥ २० ॥ न चाहं वारणीयो वै पित्रा मात्रा कथंचन ॥ सत्यं शपामि गुरुणा यथा नतु कृतं भवेत् ॥ २१ ॥ पुत्रस्य वचनं श्रुत्वा दम्पती तौ मुदान्वितौ ॥ ऊचतुस्तं प्रियं वाक्यं बालं कमललोचनम् ॥ २२ ॥ यद्यत्त्वं वक्ष्यसे वत्स यद्यत्ते हृदि वर्त्तते ॥ सर्वं तत्तत्करिष्यावो विस्रब्धं वद साम्प्रतम् ॥ २३ ॥ त्रिंशत्सहस्रं गावो हि सवांश्च शुभदोहनाः ॥ यद्यत्र रोचते पुत्र देहि त्वमविचारितम् ॥ २४ ॥ पुनरन्यत्प्रवक्ष्यामि आवयोः पुत्र कारणात् ॥ वाणिज्यं नः स्मृतं कर्म तत्ते पुत्रे यदीप्सितम् ॥ २५ ॥ तत्कुरुष्व यथान्यायं मित्रेभ्यो दीयतां धनम् ॥ धनधान्यानि रत्नानि देहि पुत्र अवारितः ॥ २६ ॥ कन्या वै रमणीयाश्च सजातीयाः कुलोद्भवाः ॥ आनयिष्याव भद्रं ते उद्वहेन क्रमेण ते ॥ २७ ॥ यदीच्छसि पुनश्चान्यद्वस्तैर्यद्वं सुपुत्रक ॥ विधिना पूर्वदृष्टेन वैश्या येन यजन्ति च ॥. २८ ॥ अष्टौ सम्पूर्णधुर्याणां हलानां तावतां शतम् ॥ वैश्यकर्म समादाय किं पुनः प्राप्तुमिच्छसि ॥ २९ ॥ यावद्भोजननृप्तान्वा द्विजानिच्छसि तर्पितुम् ॥ सर्वं निजेच्छया पुत्र कर्त्तुमर्हसि साम्प्रतम् ॥ ३० ॥ पितृमातृवचः श्रुत्वा स बालो धर्मसंयुतः ॥ चरणावुपसंगृह्य पितरौ पुनरब्रवीत् ॥ ३१ ॥ गोप्रदाने न मे कार्यं मित्रे वापि न चिन्तितम् ॥ कन्यालाभे न चेच्छास्ति न च यज्ञफले तथा ॥ ३२ ॥ नाहं वाणिज्यमिच्छामि कृषिगोरक्षमेव च ॥ न च सर्वातिथित्वं वा मम चित्ते प्रसज्जति ॥ ३३ ॥ एकं मे परमं चिन्त्यं यन्ममेच्छा तपोधृतौ ॥ चिन्ता नारायणक्षेत्रं गाढं सौकरवं प्रति॥३४॥ ततः पुत्रवचः श्रुत्वा मम कर्मपरायणौ ॥ करुणं परिदेवन्तौ रुदन्तौ तावुभौ तथा ॥ ३५ ॥ अद्य द्वादश वर्षाणि तव जातस्य पुत्रक ॥ किमिदं चिन्तितं वत्स त्वया नारायणाश्रयम् ॥ ३६ ॥ चिन्तयिष्यसि भद्रं ते यदा तत्प्राप्तुया वयः ॥ अद्यापि भोजनं गृह्य धावमानास्मि पृष्ठतः ॥ ३७ ॥ किमिदं चिन्तितं वत्स गमने सौकरं प्रति ॥ अद्यापि मत्स्तनो धन्यो प्रस्रुतो हि दिवानिशम् ॥ ३८ ॥ पुत्र त्वत्स्पर्शनाशायाः किमेतच्चिन्तितं त्वया ॥रात्रौ सुप्तोऽसि वत्स त्वं शय्यासु परिवर्त्तितः ॥ ३९ ॥ अम्बेति भाषसेऽद्यापि कथमेतद्विचिन्तितम् ॥ स्पृशंति तव नार्योऽपि क्रीडमानस्य पुत्रक ॥ ४० ॥ अपराधो न विद्यत पुत्र क्षेत्रगृहेष्वपि ॥ न वा स्वजनभृत्याद्यैः परुषं ते प्रभाषितम् ॥ ४१ ॥ रुष्टेन वापि भीषायै गृह्यते चैव यष्टिका॥ पुत्र

हतुं न पश्येहं तव निर्वेदकारणम् ॥ ४२ ॥ इति मानुर्वचः श्रुत्वा स वैश्यकुलनन्दनः ॥ उवाच मधुरं वाक्यं जननीं संशितव्रतः ॥ ४३ ॥
उषितोऽस्मि त्वदंगेषु गर्भस्थः कुक्षिसंभवः ॥ क्रीडितोस्मि यथान्यायं तवोत्संगे यशस्विनि ॥ ४४ ॥ स्तनौ द्वौतौ मया पीतौ ललितेन विजृम्भितौ ॥ अङ्गं तव समारुह्य पांसुभिर्गुण्ठिता तनुः ॥ ४५ ॥ अम्ब त्वं मयि कारुण्यं कुरुष्व खलु चोचिताम् ॥ मुंच पुत्रकृतं शोकं त्यज मातरनिन्दिते ॥ ४६ ॥ आयान्ति च पुनर्यान्ति गता गच्छन्ति चापरे॥दृश्यते च पुनर्नष्टो न दृश्येत पुनः क्वचित्॥४७॥कुतो जातः क संबद्धः कस्य माता पितायवा ॥ इमां योनिमनुप्राप्तो घोरे संसारसागरे ॥ ४८ ॥ मातापितृसहस्राणि पुत्रदारशतानि च॥ जन्मजन्मनि वर्त्तन्ते कस्य ते कस्य वा वयम् ॥ ४९ ॥ एवं चिन्तां समासाद्य मा शुचो जननि क्वचित् ॥ एवं तौ पितरौ श्रुत्वा विस्मयात्पुनरूचतुः ॥ ५० ॥ अहो बत महद्वह्यं किमेतत्तात कथ्यताम् ॥ एतद्वचनमाकर्ण्य स वैश्यकुलबालकः ॥ ५१ ॥ उवाच मधुरं वाक्यं जननीं पितरं तथा ॥ यदि श्रुतेन वः कार्यं गुह्यस्य परिनिश्चयात् ॥ ५२ ॥ तत्पृच्छ्यतां भवद्भ्यां हि गुह्यं सौकरवं प्रति ॥ तत्राहं कथयिष्यामि स्वस्य गुह्यं महोजसम् ॥५३॥ सूर्यतीर्थं समासाद्य यत्तात परिपृच्छसि ॥ वाढमित्येव पुत्रं तौ दम्पती प्रोचतुश्च तम् ॥ ५४ ॥ गमने कृतसंकल्पौ ततः सौकरवं प्रति ॥ सर्वं द्रव्यसमायुक्तौ गतौ सौकरवं प्रति ॥ ५५ ॥ गतः स पद्मपत्राक्ष आभीराणां जनेश्वरः ॥ गावो विंशतिसहस्राणि प्रेषयत्यग्रतो द्रुतम् ॥ ५६ ॥ अग्रे सर्वास्ताः प्रययुर्द्रव्येण च समायुताः ॥ यत्र किंचिद्वहे वास्ति कृतं नारायणं प्रति ॥ ५७ ॥ ततः पूर्वाह्णेयामेन माघमासे त्रयोदशी ॥ सर्वं स्वजनमामन्त्र्य सम्बद्धं च यथाविधि ॥ ५८ ॥ मुहूर्त्तेन च तेनैव गमनं कुरुते ततः ॥ स्नात्वा च कृतशौचास्ते नारायणमुदावहाः ॥ ५९ ॥ अथ दीर्घेण कालेन नारायणमुदावहाः ॥ वैशाखस्य तु द्वादश्यां मम क्षेत्रमुपागताः ॥ ६० ॥ स्नातः सन्तर्प्य च पितॄन्मम वस्त्रविभूषिताः ॥ गावो विंशतिसाहस्रा याः पूर्वमुपकल्पिताः ॥ ६१ ॥ तत्र भद्रुरसो नाम मम कर्मपरायणः ॥ तेनैव ता गृहीता वै विधिदृष्टेन कर्मणा ॥ ६२ ॥ ततः स प्रददौ तस्य विंशा गावो महाधनाः ॥ मङ्गल्याश्च पवित्राश्च सर्वाश्च वरदोहनाः ॥ ६३ ॥ प्रददौ धनरत्नानि नित्यमेव दिने दिने ॥ मोदते सह पुत्रेण भार्यया स्वजनेन च ॥ ६४ ॥ एवं तु वसतस्तस्य वर्षाकाल उपागतः ॥ शावदुपस्थिता तत्र सर्वसस्यप्रव

द्धिनी ॥ ६५ ॥ पुष्पितानि कदम्बानि कुटजार्जुनकानि च ॥ एवं दुःखमनुप्राता स्त्रियो या रहिताः प्रियैः ॥६६ ॥ गर्जतां गुञ्जतां चैव धारा पातनिपातिताः ॥ मेघाः सविद्युतश्चैव बलाकाङ्कदभूषिताः ॥ ६७ ॥ नदीनां चैव निर्घोषो मयूराणां च निःस्वनः ॥ कुटजार्जुनगन्धाश्च कदम्बार्जुनपादपाः ॥ ६८॥ वाताः प्रवान्ति ते तत्र शिखीनां च सुखावहाः ॥ शोकेन कामिनीनां च भर्त्रा च रहिताश्च याः ॥६९॥ गच्छत्येवं स कालो हि मेघदुन्दुभिनादितः॥ततः शरदनुप्राता अगस्तिरुदितो महान् ॥७०॥ तडागानि प्रसन्नानि कुमुदोत्पलवन्ति च ॥ पद्मपण्डैः सुरम्याणि पुष्पितानि समन्ततः ॥ ७१ ॥ प्रवान्ति सुसुखा वाताः सुगन्धाश्च सुशीतलाः ॥ सप्तपर्णसुगन्धाश्च शीतलाः कामिवल्लभाः ॥ ७२ ॥ एवं शरदि निर्वृत्ते कौमुद्यां समुपागते ॥ सा तस्मिन्मासि सुश्रोणि शुक्लपक्षान्तरे तदा ॥ ७३ ॥ एकादश्यां ततः सुभ्रु स्नातो क्षौमविभूषितो ॥ उभौ तौ दम्पती तत्र पुत्रमूचतुरात्मनः ॥७४॥ उषितास्त्वत्र पञ्चमासान्सुखं च द्वादशी भवेत् ॥ किन्नो न वक्ष्यसे गुह्यं येन वै वारिता वयम् ॥७५॥ पित्रोस्तु वचनं श्रुत्वा स पुत्रो धर्मनिष्ठितः ॥ उवाच मधुरं वाक्यं तयोस्तु कृतनिश्चयः ॥७६॥ एवमेतन्महाभाग यत्त्वया परिभाषितम् ॥ कल्यं ते कथयिष्यामि इदं गुह्यं महौजसम् ॥७७॥ एषा वै द्वादशी तात प्रभुनारायणप्रिया ॥ मंगला च विचित्रा च विष्णुभक्तसुखावहा ॥७८॥ददतेऽस्यां प्रहृष्टा च द्वादश्यां कौमुदे सिते ॥ दीक्षितास्ते योगिकुले विष्णुभक्तिपरायणाः ॥ ७९ ॥ तेन दानप्रभावेण विष्णुतोषकरेण च ॥ तरन्ति दुस्तरं तात घोरं संसारसागरम् ॥ ८० ॥ एवं कथयतां तेषां प्रभाता रजनी शुभा ॥ ततः सन्ध्यामुपास्याथ उदिते सूर्यमण्डले ॥ ८१ ॥ शुचिर्भूत्वा यथान्यायं क्षौमवस्त्रविभूषितः ॥ प्रणम्य शिरसा देवं शंखचक्रगदाधरम् ॥ ८२ ॥ उभौ तच्चरणौ गृह्य पितरौ समभाषत ॥ शृणु तात महाभाग यदर्थं समुपागतः ॥ ८३ ॥ यद्भवान्पृच्छते तात गुह्यं सौकरवं प्रति ॥ खञ्जरीटो ह्यहं तात पक्षियोनिसमुद्भवः ॥ ८४ ॥ भक्षिताश्च पतंगा मे अजीर्णेनातिपीडितः ॥ अहं तेनैव दोषेण न शक्नोमि विचेष्टितुम् ॥ ८५ ॥ दृष्ट्वा मां विह्वलं बाला गृहीत्वा क्रीडितुं गताः ॥ हस्ताद्धस्तेन क्रीडन्तश्चान्योन्यपरिहासया ॥ ८६ ॥ त्वया दृष्टो मया दृष्टो ह्यथ चेति कलिः कृतः ॥ तत एकेन बालेन भ्रामयित्वाऽक्षयेऽम्भसि ॥ ८७ ॥ न ममेति तवेत्युक्त्वा ह्यादित्यं तीर्थमुत्तमम् ॥ क्रोधेनादाय तीव्रेण क्षिप्तो गङ्गाम्भसि त्वरा ॥ ८८ ॥ तत्र मुक्ता मया प्राणाः

॥१३०॥

सूर्यतीर्थे महीजासि ॥ अकामेन विशालाक्षि तत्प्रभावादहं ततः ॥ ८९ ॥ जातस्तव सुतो मातस्तदेतद्दिनमुत्तमम् ॥ अकामाश्रियमाणस्य वर्षाण्यद्य त्रयोदश ॥ ९० ॥ व्यतीतानि च गुह्यं ते कथनं मम चैव यत् ॥ एतत्ते कथितं तात गुह्यमागमनं प्रति ॥ ९१ ॥ अहं कर्म करिष्यामि गच्छ तात नमोऽस्तु ते ॥ ततो माता पिता चैव पुत्रं पुनरुवाच ह ॥ ९२ ॥ विष्णुप्रोक्तानि कर्माणि यं यं कारयिता भवान् ॥ तान्वयं च करिष्यामो विधिदृष्टेन कर्मणा ॥ ९३ ॥ घटमाला यथान्यायं कर्मसंसारमोक्षणम् ॥ तेऽपि दीर्घेण कालेन मम कर्मपरायणाः ॥ ९४ ॥ कृत्वा तु विपुलं कर्म ततः पंचत्वमागताः ॥ मम क्षेत्रप्रभावेण चात्मनः कर्मनिश्चयात् ॥ ९५ ॥ विमुक्ताः सर्वसंसाराच्छ्वेतद्वीपमुपागताः ॥ योऽसौ परिजनः कश्चिद्दृष्टश्च समागतः ॥ ९६ ॥ सर्वः श्रिया युतस्तत्र रोगव्याधिविवर्जितः ॥ सर्वे च योगिनस्तत्र सर्वे चोत्पलगंधयः ॥ ९७ ॥ मोदन्ते तु यथान्यायं प्रसादात्क्षेत्रजान्मम ॥ एतत्ते कथितं देवि महास्यानं महोत्तमम् ॥ ९८ ॥ पुनरन्यत्प्रवक्ष्यामि यद्वृत्तं सौकरे मम ॥ एषा व्युष्टिर्महाभागे क्षेत्रे यत्किंयते महत ॥ ९९ ॥ तिर्यग्योनिविनिर्मुक्ताः श्वेतद्वीपमुपागताः ॥ य एतत्पठते नित्यं कल्य मुत्थाय मानवः ॥ १०० ॥ स कुलं तारयेत्तूर्णं दश पूर्वान्दशावरान् ॥ न पठेन्मूर्खमध्ये तु पापिष्ठे शास्त्रदूषके ॥ १०१ ॥ न पठेत्पिशुनानां च एकाकी तु पठेद्वृद्धे ॥ पठेद्ब्राह्मणमध्ये च ये च वेदविदां वराः ॥ १०२ ॥ वैष्णवानां च पुरतो ये च शास्त्रगुणान्विताः ॥ विशुद्धानां विनीतानां सर्वसंसारमोक्षणम् ॥ १०३ ॥ इति श्रीवराहपुराणे खञ्जरीटोपाख्यानं नामाष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥ इति खञ्जरीटोपाख्यानं समाप्तम् ॥ अथ सौकरमाहात्म्यम् ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि लिप्यमानस्य यत्फलम् ॥ सर्वं ते कथयिष्यामि यथा प्राप्नोति मानवः ॥ १ ॥ गृहीत्वा गोमयं भूमे मम वेश्मोपलेपयेत् ॥ न्यस्तानि तत्र यावन्ति पदानि च विलिम्पतः ॥ २ ॥ तावद्वर्षसहस्राणि दिव्यानि दिवि मोदते ॥ यदि द्वादश वर्षाणि लिप्यते मम कर्मसु ॥३॥ जायते विपुले शुद्धे धनधान्यसमाकुले ॥ दिव्येनैमस्कृतो देवि कुशद्वीपं च गच्छति ॥ ४ ॥ कुशद्वीपमनुप्राप्य सहस्राणि च जीवति ॥ दश चैव तु वर्षाणां मम भक्तो महाश्रुचिः ॥ ५ ॥ कुशद्वीपात्परिभ्रष्टो मम कर्मपरायणः॥राजा वै जायते सुभु सर्वधर्मेषु निष्ठितः ॥ ६ ॥ तेन तस्य प्रभावेण मम कर्मपरायणः ॥ भक्तो व्यवस्थित

श्रापि सर्वशास्त्राणि पृच्छति ॥७॥ देवि कास्यते सर्वं मम चायतनानि च॥कारयित्वा यथान्यायं मम लोकं सगच्छति॥८॥गोमयस्य तु वक्ष्यामि तच्छृणुष्व वसुन्धरे॥गोमयन्तु समासाद्य यावल्लोकोऽनुगच्छति ॥९॥ समीपे यदि वा दूरे गत्वा नयति गोमयम्॥यावान्ति तत्पदान्यस्य तावद्वर्ष सहस्रकम्॥१०॥गोमयानां च नेता वै स्वर्गलोके महीयते॥ततः स शाल्मले द्वीपे रमते च सुदा युतः॥११॥एकादशसहस्राणि एकादशशतानि च ॥ शाल्मलात्तु परिभ्रष्टो राजा भवति धार्मिकः॥१२॥मद्रकश्चैव जायेत सर्वधर्मविदां वरः ॥ अथ द्वादशवर्षाणि मच्छित्तः सुदृढव्रतः॥१३॥ वहते गोमयं सुभ्रु मम लोकं सगच्छति ॥ स्नानोपलेपने भूमे साळिं यो ददाति च ॥ १४ ॥ तस्य पुण्यं महाभागे शृणु तत्त्वेन निष्कलम् ॥ यावन्तो बिन्दवस्तत्र पानीयस्य वसुन्धरे ॥ १५ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ स्वर्गलोकात्परिभ्रष्टः क्रौंचद्वीपे च गच्छति ॥ १६ ॥ क्रौंचद्वीपात्परिभ्रष्टो राजा भवति धार्मिकः ॥ तेनैव गुणयोगेन श्वेतद्वीपे च गच्छति ॥ १७ ॥ संमार्जनं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ यां गतिं पुरुषा यान्ति स्त्रियो वा कर्मसु स्थिताः ॥ १८ ॥ शुचिर्भोगवतः शुद्धो अपराधविवर्जितः ॥ यावन्तः पांसवो भूमेरुद्धियन्ते तु चालिताः ॥ १९ ॥ तावद्वर्षशतान्याशु स्वर्गलोके महीयते ॥ स्वर्गलोकात्परिभ्रष्टः शाकद्वीपे सगच्छति ॥ २० ॥ तत्र स्थित्वा चिरङ्कालं राजा भवति धार्मिकः ॥ ततो भुक्त्वा सर्वभोगान्स्थित्वा संसारसागरे ॥ २१ ॥ श्वेतद्वीपं ततो गच्छेन्मत्कर्मनिरतः शुचिः ॥ अन्यच्च ते प्रवक्ष्यामि शृणुष्व गदतो मम ॥ २२ ॥ गायनं ये प्रकुर्वन्ति मम कर्मपरायणाः ॥ तेषां यद्यत्फलं भूमे शृणुष्व गदतो मम ॥ २३ ॥ गीयमानस्य गीतस्य यावदक्षरपङ्क्तयः ॥ तावद्वर्षसहस्राणि इन्द्रलोके महीयते ॥ २४ ॥ रूपवान्गुणशास् सिद्धः सर्ववेदविदां वरः ॥ नित्यं पश्यति तत्रस्थो देवराजं न संशयः ॥ २५ ॥ मद्रकश्चैव जायेत इन्द्रलोकपथे स्थितः ॥ सर्वकर्मगुणश्रेष्ठस्तत्रापि मम पूजकः ॥ २६ ॥ इन्द्रलोकात्परिभ्रष्टो मम गीतपरायणः ॥ नन्दनोपवने रम्ये रमन्देवगणैः सह ॥ २७॥ ततः स भूमौ जायेत वैष्णैः सह संस्थितः ॥ गायन्मम यशो नित्यं भक्त्या परमया युतः ॥ २८ ॥ मत्प्रसादात्स शुद्धात्मा मम लोकं हि गच्छति ॥ २९ ॥ सूत उवाच ॥ तस्य तद्वचनं श्रुत्वा माधवस्य यशस्विनी ॥ कृताञ्जलिपुटा भूयः प्रत्युवाच वसुन्धरा ॥ ३० ॥ धरण्युवाच ॥ अहो गीतप्रभावो वै यस्त्वया कीर्तितो महान् ॥

॥१३१॥

के च गीतप्रभावेण सिद्धिं प्राता महौजसः ॥ ३१ ॥ श्वविराह उवाच ॥ तत्रैव चाश्रमे भद्रे चाण्डालः कृतनिश्चयः ॥ दूराज्जागरणं याति मम भक्तो व्यवस्थितः ॥ ३२ ॥ गायमानश्च गीतानि संवत्सरगणान्बहून् ॥ श्वपाकः स गुणज्ञश्च मद्भक्तश्चैव सुन्दरि ॥ ३३ ॥ कौमुद्यस्य तु मासस्य शुक्लपक्षे तु द्वादशी ॥ सुप्ते गते जने जाते वीणामादाय चक्रमत् ॥३४॥ जार्यस्तत्र स चाण्डालो गृहीतो ब्रह्मरक्षसा ॥ अल्पप्राणः श्वपाको वै बलवान्ब्रह्मराक्षसः ॥ ३५ ॥ दुःखशोकेन सन्तप्तो न शक्नोति विचेष्टितुम् ॥ तेन प्रोक्तः श्वपाकेन बलवान्ब्रह्मराक्षसः ॥३६॥ किं त्वया चेष्टितं मह्यं यस्त्वैवं परिधावसि ॥ श्वपाकवचनं श्रुत्वा तेन वै ब्रह्मरक्षसा ॥३७ ॥ ततः प्रोवाच तं भ्राद्दं मानुषाहारलोलुपः ॥ अद्येहं दृश्यगात्रे मे निराहारस्य तिष्ठतः ॥३८॥ विधात्रा विहितस्त्वं च आहारः पारणाविधौ ॥ अद्य त्वां भक्षयिष्यामि सवसामांसशोणितैः ॥३९॥ तृप्तिं यास्यामि परमां विधात्रा विहितां मम ॥ ब्रह्मरक्षोवचः श्रुत्वा श्वपाको गीतलालसः ॥ ४० ॥ राक्षसं छन्दयामास मम भक्त्या व्यवस्थितः ॥ एवमेतन्महाभाग भक्ष्योऽहं समुपागतः ॥ ४१ ॥ अवश्यमेतत्कर्तव्यं धात्रा दत्तं यथा तव ॥ किं त्वहं देवदेवस्य भक्त्या गातुं च जागरे ॥४२॥ उद्यस्तत्र गत्वा समुपास्य विधिना हरिम् ॥ पश्चात्त्वादस्व मां रक्षो जागराद्विनिवर्तितम् ॥ ४३ ॥ विष्णोः सन्तोषणार्थाय यतो मे व्रतमास्थितम् ॥ जागरे विनिवृत्ते मां भक्षयस्व यदीच्छसि ॥ ४४ ॥ श्वपाकस्य वचः श्रुत्वा ब्रह्मरक्षः क्षुधार्दितः ॥ उवाच पुरुषं वाक्यं श्वपाकं तदनन्तरम् ॥ ४५ ॥ मिथ्या किं भाषसे मूढ पुनरेष्यामि तेऽन्तिकम् ॥ मृत्योर्मुखमनुप्राप्य पुनर्जीवति मानवः ॥ ४६ ॥ रक्षसो मुखविभ्रष्टः पुनरागन्तुमिच्छसि ॥ राक्षसस्य वचः श्रुत्वा चाण्डालस्तमथाब्रवीत् ॥ ४७ ॥ यद्यप्यहं हि चाण्डालः पूर्वकर्मविदूषितः ॥ सम्प्राप्तो मानुषं भावं विहितेनात्मनात्मना ॥४८॥ शृणु सत्यमयं रक्षो येनाहं पुनरागमम् ॥ दूराज्जागरणं कृत्वा लोकस्य द्विजरक्षत ॥४९॥सत्येन पुनरेष्यामि मन्यसे यदि मुञ्च माम् ॥ सत्यमूलं जगत्सर्वं लोकाः सत्ये प्रतिष्ठिताः॥५०॥ सत्येन सिद्धिं प्राता हि ऋषयो ब्रह्मवादिनः ॥ सत्येन दीयते कन्या सत्यं जल्पन्ति ब्राह्मणाः ॥ ५१ ॥ सत्यं जयन्ति राजानस्त्रीण्येतान्यद्भुतव्रतम् ॥ सत्येन गम्यते स्वर्गो मोक्षः सत्येन चाप्यते ॥ ५२ ॥ सत्येन तपते सूर्यः सोमः सत्येन रज्यते ॥ पञ्चचष्टमीसमावास्यासुभे पक्षे चतुर्दशी ॥ ५३ ॥ अज्ञातानां गतिं यास्ये यद्यहं नागमे पुनः ॥

गुरुपत्नीं राजपत्नीं योऽभिगच्छति मोहितः ॥ ५४ ॥ तां गतिं सम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ याजकानां च ये लोका ये च मिथ्याभिभाषिणाम् ॥५५॥ तां गतिं सम्प्रपद्येऽहं यद्यहं नागमे पुनः ॥ ब्रह्मघ्ने च सुरापे वा स्तेने भग्नव्रते तथा॥५६॥ तेषां गतिं प्रपद्येऽहं यद्यहं नागमे पुनः॥ श्वपाकवचनं श्रुत्वा तुष्टो ब्राह्मणराक्षसः ॥ ५७ ॥ उवाच मधुरं वाक्यं गच्छ शीघ्रं नमोऽस्तु ते ॥ ब्रह्मराक्षसमुक्त्वा तु श्वपाकः कृतनिश्चयः ॥ ५८ ॥ पुनर्गायति मह्यं वै मम भक्तौ व्यवस्थितः ॥ अथ प्रभाते विमले गीते नृत्ये च जागरे ॥ ५९ ॥ नमो नारायणायेति श्वपाकः परिवर्त्तते ॥ ततस्त्वरितमागत्य पुर्मास्तस्याग्रतः स्थितः ॥६०॥ उवाच मधुरं वाक्यं चाण्डालं कृतनिश्चयम् ॥ क्व याति त्वरितः साधो न च त्वं गन्तुमर्हसि ॥ ६१ ॥ जानन्कौणपपं तं च न त्वं मर्त्तुमिहार्हसि ॥ पुरुषस्य वचः श्रुत्वा चाण्डालः पुनरब्रवीत् ॥६२॥ समयो मे कृतः पूर्वं राक्षसेन हि भक्षता ॥ तेन तत्र गमिष्यामि सत्यं च परिपालयन् ॥ ६३॥ ततः स पञ्चपात्राक्षः श्वपाकं प्रत्युवाच ह ॥ मधुरं गिरमादाय विहितेनान्तरात्मना ॥ ६४ ॥ मा गच्छ तत्र चाण्डाल यत्रासौ पापराक्षसः ॥ जीवितार्थाय सत्यस्य न दोषः परिहापनात् ॥ ६५ ॥ ततस्तस्य वचः श्रुत्वा श्वपाकः संशितव्रतः ॥ उवाच मधुरं वाक्यं मरणे कृतनिश्चयः ॥ ६६ ॥ नाहमेवं करिष्यामि यन्मां त्वं परिभाषसे ॥ न चाहं नाशये सत्यमेतन्मे निश्चितं व्रतम् ॥ ६७ ॥ सत्यमूलं जगत्सर्वं कुलं सत्ये प्रतिष्ठितम् ॥ सत्यमेव परो धर्म आत्मा सत्ये प्रतिष्ठितः ॥ ६८ ॥ न चैवाहं तदुत्सृज्य अतत्यः स्यां कदाचन ॥ नाहं मिथ्या चरिष्यामि गच्छ तात नमोऽस्तु ते ॥ ६९ ॥ एवमुक्त्वा श्वपाकोपि नित्यं सत्यव्रते स्थितः ॥ राक्षसं समनुप्राप्तस्तमुवाचाथ पूजयन् ॥ ७०॥ आगतोऽस्मि महाभाग मा विलम्बयभक्षय ॥ त्वत्प्रतादादहं गन्ता वैष्णवं स्थानमुत्तमम् ॥ ७१ ॥ एतानि मम गात्राणि भक्षयस्व यथेप्सितः ॥ पिबोष्णं रुधिरं मह्यं पीडितोऽसि क्षुधा भृशम् ॥ ७२ ॥ तर्पयस्व स्वमात्मानं कुरुष्व मम वै हितम् ॥ श्वपाकस्य वचः श्रुत्वा ततः स ब्रह्मराक्षसः ॥ ७३ ॥ उवाच मधुरं वाक्यं श्वपाकं तदनन्तरम् ॥ साधु तुष्टोऽस्म्यहं वत्स सत्यं धर्मं च पालितम् ॥ ७४ ॥ चण्डालस्याविधिज्ञस्य यस्य ते मतिरीदृशी ॥ ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः सत्यसङ्गरः ॥७५॥ उवाच मधुरं वाक्यं ब्रह्मराक्षसमेव तु ॥ यद्यप्यहं वै चाण्डालः सर्वकर्मविवर्जितः॥७६॥तथापि सत्यं वक्तव्यं ब्रह्मराक्षस नित्यशः ॥ श्वपाकवचनं श्रुत्वा

ब्रह्मरक्षो भयानकम् ॥ ७७ ॥ उवाच मधुरं वाक्यं श्वपाकं संशितव्रतम् ॥ यत्त्वया गीयते रात्रौ विष्णोर्जागरणं प्रति ॥ ७८ ॥ फलं गीतस्य मे देहि यदीच्छेर्जीवितं स्वकम् ॥ ततो मोक्ष्यामि कल्याण भक्ष्यामि न च भीषणः ॥७९॥ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः प्रत्युवाच ह॥ मनोऽज्ञात मिदं वाक्यं ब्रह्मरक्षो निभाषसे ॥ ८० ॥ भक्षयामीति चोक्त्वा मां गीतपुण्यं किमिच्छसि ॥ श्वपाकवचनं श्रुत्वा ब्रह्मरक्षोऽब्रवीत्पुनः ॥ ८१ ॥ देहि मे त्वेकयामीयं पुण्यं गीतस्य वै परम् ॥ ततो मोक्ष्यसि भक्ष्येण संगतः पुत्रदारकैः ॥ ८२ ॥ श्रुत्वा राक्षसवाक्यानि चाण्डालो गीत लोभितः ॥ उवाच मधुरं वाक्यं राक्षसं कृतनिश्चयः ॥ ८३ ॥ न गायनफलं दृष्टं ब्रह्मरक्षस्त्वयोदितम् ॥ भक्षयस्व यथान्यायं रुधिरं पिब चेप्सितम् ॥ ८४ ॥ श्वपाकवचनं श्रुत्वा राक्षसः पुनरब्रीत् ॥ एकगतिस्त्व मे देहि यत्त्वया विष्णुसंसदि ॥ ८५ ॥ एतेन तारितोऽस्मीति तव गीतफलेन वै ॥ श्रुत्वा वाक्यानि चाण्डालो राक्षसस्य निवासयन् ॥ ८६ ॥ उवाच मधुरं वाक्यं चाण्डालो विस्मयान्वितः ॥ किं त्वया विकृतं कर्म तद्ब्रूहि मम राक्षस ॥ ८७ ॥ कर्मणो यस्य दोषेण राक्षसत्वं समागतः ॥ श्वपाकवचनं श्रुत्वा ब्रह्मरक्षो महायशाः ॥ ८८ ॥ उवाच मधुरं वाक्यं दुःखसन्ततमानसः ॥ नाज्ञा वै सोमशर्माहं चरको ब्रह्मयोनिजः ॥ ८९ ॥ सूत्रमन्त्रपरिभ्रष्टो यज्ञकर्मसु निधिष्ठितः ॥ ततोऽहं याजयाम्यज्ञान् लोभमोहप्रपीडितः ॥ ९० ॥ प्रवर्त्तमाने यज्ञे तु कदाचिद्वैवयोगतः ॥ उदरे जातशूलोऽहं तेन पंचत्व मागतः ॥ ९१ ॥ अथ पञ्चमहारात्रे ह्यसमाप्ते क्रतौ तथा ॥ अस्य यज्ञस्य दोषेण मातंग शृणु मे वचः ॥९२॥ राक्षसत्वमनुप्राप्तस्तेन दुष्टेन कर्मणा ॥ मंत्रहीनं मया तत्र स्वरहीनं च तत्कृतम् ॥ ९३ ॥ सूत्रहीनं तथा तत्र प्राग्वंशादि कृतं मया ॥ परिमाणं च रूपं च मया तत्रोपरक्षितम् ॥९४॥ कृतस्य तस्य दोषेण योनिं प्राप्तोऽस्मि राक्षसीम् ॥ स्वगतिफलदानेन निस्तारयितुमर्हति ॥९५॥ मोचयस्वाघमं पापाद्विष्णुगतिन सत्त्वरम् ॥ ब्रह्मरक्षोवचः श्रुत्वा श्वपाकः संशितव्रतः ॥९६॥ बाढमित्येव तद्वाक्यं राक्षसं प्राब्रवीत्तदा ॥ एतस्य मम गीतस्य सुस्वरस्य फलं तु यत् ॥९७॥ ददामि राक्षस त्वं चेन्मुच्यसे शुद्धमानसः ॥ यस्तु गायति संयुक्तं गीतकं विष्णुसन्निधौ ॥९८॥ स तारयति दुर्गाणीत्युक्त्वा तद् त्तवान् फलम् ॥ एवं तस्मात्फलं प्राप्य श्वपाकाद्राक्षसस्तदा॥९९॥ जातः सुविमलो भद्रे शरदीव यथा शशी॥ श्वपाकश्चापि सुश्रोणि मम चैवो

पगायकः ॥१००॥ कृत्वा सुविपुलं कर्म स ब्रह्मत्वमुपागतः ॥ एतद्गीतफलं देवि प्राप्नोति मनुजो भुवि ॥१०१॥ मह्यं जागरतो भद्रे गीयमानं मनस्विनि ॥ यस्तु गायति सुश्रोणि कौमुदीं द्वादशीं प्रति॥१०२॥ सर्वसंगं पारत्यज्य मम लोकं स गच्छति ॥ यस्तु गायति गीतानि मम जागरणे सदा॥१०३॥सर्वसंगात्समुक्तो वै मम लोकं स गच्छति॥एतत्ते कथितं देवि गायनस्य फलं महत्॥१०४॥यस्य गतिस्य शब्देन तेरत्संसारसागरम्॥ वादित्रस्य प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ १०५ ॥ प्राप्तवान्मानुषो येन देवेभ्यः सवलां स्वयम् ॥ शम्पातालप्रयोगेण सन्निपातेन वा पुनः॥१०६॥नववर्षसहस्राणि नववर्षशतानि च॥कुबेरभवनं गत्वा मोदते वै यदृच्छया॥१०७॥ कुबेरभवनाद्भ्रष्टः स्वच्छन्दगमनालयः ॥ शम्पादि तालसम्पातेमम लोकं स गच्छति॥१०८॥नृत्यमानस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ मानवो येन गच्छेत्तु च्छित्त्वा संसारबन्धनम्॥१०९॥ त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ॥ पुष्करद्वीपमासाद्य स्वच्छन्दगमनालयः ॥११०॥ फलं प्राप्नोति सुश्रोणि मम कर्मपरायणः ॥ रूपवान् गुणवाञ्छूरः शीलवान्सत्पथे स्थितः ॥ १११॥ मद्भक्तश्चैव जायेत संसारपरिमोचितः॥यस्तु जागरितो नित्यं गीतवाद्येन नर्त्तकः॥११२॥जम्बु द्वीपं समासाद्य राजराजस्तु जायते॥सर्वकर्मसमायुक्तो रक्षिता वै महीपतिः ॥११३॥ मद्भक्तश्चैव जायेत मम कर्मपरायणः॥उपहार्याणि पुष्पाणि मम कर्मपरायणः॥११४॥यो मामुपनयेद्भक्त्या मम कर्मपथे स्थितः॥पुष्पाणि तत्र यावन्ति मम मूर्द्धनि धारयेत्॥११५॥स कृत्वा पुष्कलं कर्म मम लोकं स गच्छति॥एतत्ते कथितं देवि भक्तानां तु महोत्सवम्॥११६॥ मम भक्तसुखार्थाय सर्वसंसारमोक्षणम् ॥ य एतत्पठते भूमे कल्यमुत्थाय मानवः॥११७॥स तु तारयते जन्तुर्दश पूर्वान्दशापरान्॥न पठेन्मूर्खमध्ये तु पिशुनानां पुरो न च॥११८॥पठेद्भागवतानां च मध्ये मुक्तिरतात्म नाम् ॥ अश्रद्दधाने क्रूरे वा न पठेद्वले तथा ॥ ११९ ॥ यदीच्छेत्सिद्धिकल्याणं मंगलं च मम प्रियम् ॥ धर्माणां परमो धर्मः क्रियाणां परमा क्रिया ॥१२०॥ मा पठेच्छास्त्रदूषाय अध्यायं वा कदाचन ॥ यदीच्छेत्परमां सिद्धिं मम लोके महीयते॥१२१॥इतिश्रीवराहपुराणे भगवच्छास्त्रे सोकरे चाण्डालब्रह्मराक्षससंवादे सोकरमाहात्म्यं नामैकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९॥ अथ कोकामुख (बदरी) माहात्म्यम्॥ धरण्युवाच ॥ श्रुतानि देवस्थानानि त्वया प्रोक्तानि यान्युत ॥ कस्मिंस्तिष्ठसि नित्यं त्वं तद्भवान्वक्तुमर्हति ॥ १ ॥ किंच ते परमं स्थानं

यत्र मूर्त्यांकृतिर्भवान् ॥ कस्मिन्स्थाने कृतं कर्म येन यात्युत्तमां गतिम् ॥ २ ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि भक्तानां भक्त वत्सले ॥ येषु स्थानेषु तिष्ठामि कथ्यमानानिमाञ्छृणु ॥ ३ ॥ तव कोकामुखं नाम यन्मया पूर्वभाषितम् ॥ बदरीति च विख्यातं गिरिराज शिलातलम् ॥ ४ ॥ स्थानं लोहार्गलं नाम म्लेच्छराजसमाश्रितम् ॥ क्षण चापि न मुंचामि एवमेतन्न संशयः ॥ ५ ॥ सचैत्यं पश्य मे स्थानं जगदेतच्चराचरम् ॥ सर्वत्राहं वरारोहे न मन्ष्यूनं हि जानते ॥ ६ ॥ ये तु जानन्ति मां देवि गुह्यां कामगतिं मम ॥ शीघ्रं कोकामुखं यान्तु मम कर्मपरायणाः ॥ ७ ॥ ततो देववचः श्रुत्वा पृथिवी वाक्यमब्रवीत् ॥ शिरस्यञ्जलिमाधाय निर्वृतेनान्तरात्मना ॥ ८ ॥ धरण्युवाच ॥ सर्वतो लोकनाथेश परं कौतूहलं हि मे ॥ कथं कोकामुखं श्रेष्ठं तद्भवान्वक्तुमर्हसि ॥ ९ ॥ श्रीवराह उवाच ॥ नास्ति कोकामुखात्क्षेत्रं श्रेष्ठं कोकामुखाच्छुचि ॥ नास्ति कोकामुखात्स्थानं नास्ति कोकामुखात्प्रियम् ॥ १० ॥ यस्तु कोकामुखं गत्वा न भूया विनि वर्त्तते ॥ कर्माणि तत्र कुर्वीत चेष्टं भवति चात्मनि ॥ ११ ॥ यानि यानि च क्षेत्राणि त्वया पृष्टानि वै धरे ॥ कोकामुखसमं स्थानं न भूतं न भविष्यति ॥ १२ ॥ मम सा परमा मूर्त्तिर्यां न जानन्ति गोपिताम् ॥ स्थितं कोकामुखं नाम एतत्ते कथितं मया ॥ १३॥ धरण्युवाच ॥ देव देव महादेव भक्तानामभयप्रद ॥ यानि गुह्यानि सन्त्यत्र कोकायां वक्तुमर्हसि ॥ १४ ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि यन्मां त्वं परि पृच्छसि ॥ तास्मिन् कोकामुखं रम्यं कथ्यमानं मयाऽनघे ॥ १५ ॥ जलबिन्दुरिति ख्यातात्पर्वतात्पतनाद्भुवि ॥ तत्तु गुह्यतमं देवि कृत्वा कर्म महौजसम् ॥ १६ ॥ सर्वसङ्गान्परित्यज्य मम लोकं स गच्छति ॥ विष्णुधारेति विख्याता कोकायां मम मण्डले ॥ १७ ॥ पर्वतात्पतिता भूमौ धारा मुसलसन्निभा ॥ अहोरात्रोषितो भूत्वा स्नायात्तत्र प्रयत्नतः ॥ १८ ॥ अग्निष्टोमसहस्राणां फलं प्राप्नोति मानवः ॥ न मुह्यति स कर्तव्ये फलं प्राप्नोति चोत्तमम् ॥१९॥ जायते विपुले शुद्धे मम मार्गानुसारिणि ॥ तत्राथ मुंचति प्राणान्विष्णुधारां समाश्रितः ॥ २० ॥ पश्यते परमां मूर्त्तिमेतां मम न संशयः ॥ तत्र विष्णुपदं नाम स्थानं कोकामुखाश्रितम्॥२१॥एतत्काश्चिन्न जानाति धरे वाराहसंश्रितम् ॥ तास्मिन्कृतोदकोदेवि नरो रात्रावुपोषितः ॥२२॥ कौंचद्वीपे प्रजायेत मम भक्तिपरायणः ॥ तत्राथ मुंचति प्राणान्गुह्यस्थाने परे मम ॥ २३॥ सर्वसङ्गान्परित्यज्य

मम लोकं स गच्छति॥अस्ति विष्णुसरो नाम क्रीडितं यत्त्वया सह॥२४॥यत्र दंष्ट्राप्रहारेण चाहृतासि वसुन्धरे॥ तत्र स्नानं तु कुर्वीत प्रातःकाले वसुन्धरे॥२५॥सर्वपापविशुद्धात्मा मम लोकं स गच्छति॥ सोमतीर्थमिति ख्यातं कोकायां मम मण्डले॥२६॥ यत्र पञ्चशिलाभूमिर्विष्णुनाम्ना तथाङ्किता ॥ यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः ॥ २७ ॥ गोमेदे जायते द्वीपे मम मार्गानुसारकः ॥ तत्राथ मुञ्चते प्राणान्गुह्यक्षेत्रे परे मम ॥ २८ ॥ सर्वपापविनिर्मुक्तः शुद्धात्मा मां स पश्यति ॥ तुंगकूटेतिविख्यातं कोकायां मम मण्डले ॥ २९ ॥ चतुर्धाराः पतन्त्यत्र पर्वता दुच्छ्रयं श्रिताः ॥ यस्तत्र कुरुते स्नानं पञ्चरात्रोषितो नरः॥३०॥ कुशद्वीपिं समासाद्य मम लोकेषु तिष्ठति ॥ आनित्यमाश्रमं नाम क्षेत्रकर्मसुखावहम् ॥३१॥ देवाश्च यं न जानन्ति किम्पुनर्मनुजादयः ॥ तत्र स्नात्वा वरारोहे अहोरात्रोषितो नरः ॥ ३२ ॥ जायते पुष्करद्वीपे मम कर्मपरायणः ॥ अथ तत्र मृतो भूमे पुण्यक्षेत्रे महाशुचिः ॥ ३३ ॥ सर्वपापविनिर्मुक्तो मम लोकं स गच्छति ॥ अस्त्यत्राग्निसरो नाम परं गुह्यं मम स्थितम् ॥३४॥ पंच धाराः पतन्त्यत्र गिरिकुञ्जसमाश्रिताः ॥ तत्र चापि कृतस्नानः पञ्चरात्रोषितो नरः ॥ ३५ ॥ कुशद्वीपे च जायेत मम कर्म परायणः ॥ तत्राऽथ मुञ्चते प्राणान् कृत्वा कर्म महोज्ज्वलम्॥३६॥ कुशद्वीपात्पक्षिश्रेष्ठो ब्रह्मलोकं च गच्छति॥अस्ति ब्रह्मसरो नाम गुह्यं क्षेत्रं परं मम ॥३७॥ यत्र धारा पतत्येका पुण्या भूमिशिलातले॥तत्र स्नानं प्रकुर्वीत पञ्चरात्रोषितो नरः॥३८॥ वसते सूर्यलोकेषु मम मार्गानुसारकः ॥ अथाऽत्र मुंचते प्राणान्सूर्यधारां समाश्रितः ॥ ३९ ॥ सूर्यलोकमतिक्रम्य मम लोकं तु गच्छति ॥ अस्ति धेनुवटं नाम गुह्यं क्षेत्रं परं मम॥४०॥ एका धारा पतत्यत्र देवि पूर्णा शिलोच्चयात् ॥ तत्र स्नानं प्रकुर्वीत एकमेकं दिनं तथा ॥ ४१ ॥ सप्तरात्रोषितो भूत्वा मम कर्म समाश्रितः ॥ स्नात्वा सप्तसमुद्रेषु लब्धसंज्ञः समाहितः ॥ ४२ ॥ सप्तद्वीपेषु विहरेन्मम कर्मपरायणः ॥ तत्राथ मुंचते प्राणान्मम भक्तिसमन्वितः ॥४३॥ सप्त द्वीपमतिक्रम्य मम लोकं तु गच्छति ॥ अस्ति धर्मोद्भवं नाम तस्मिन्क्षेत्रे परे मम ॥ ४४ ॥ गिरिकुञ्जात्पतत्येका धारा भूमितले शुभा ॥ तत्र स्नानं प्रकुर्वीत एकरात्रोषितो नरः ॥ ४५॥ स वैश्यो जायते शूद्रो मम कर्मपरायणः ॥ तत्राऽथ मुंचते प्राणान्गुह्ये देवि शिलोच्चये ॥ ४६ ॥ सांगयज्ञं सदक्षिण्यं भुक्त्वा मां प्रतिपद्यते ॥ अस्ति कोटिवटं नाम क्षेत्रं गुह्यं परं मम ॥ ४७ ॥ एका धारा पतत्यत्र वटमूलमुपाश्रिता ॥ तत्र

स्नानं तु कुरुते नरो रात्रावुपोषितः ॥ ४८ ॥ यावन्ति वटपत्राणि तस्मिन्क्षेत्रे परे मम ॥ तावद्वर्षसहस्राणि रूपसंपत्समन्वितः ॥ ४९॥ तिष्ठते
तु वरारोहे मम मार्गानुसारिणि॥ तत्राऽथ मुंचते प्राणान्कृत्वा कर्म सुदुष्करम्॥५०॥ अग्निवर्णस्ततो भूत्वा मम लोकं स गच्छति॥पापप्रमोचनं
नाम गुह्यमस्मिन्परं मम॥५१॥पतत्येकतमा धारा स्थूला कुंभसमा ततः॥यस्तत्र कुरुते स्नानमहोरात्रोषितो नरः॥५२॥जायते च चतुर्वेदी मम
कर्मपरायणः ॥ तत्राऽथ मुञ्चते प्राणान्कौशिकीमाश्रितो नदीम् ॥ ५३ ॥ यस्तत्र कुरुते स्नानं पंचरात्रोषितो नरः ॥ मोदते वासवे लोके मम
मार्गानुसारिणि ॥ ५४ ॥ तत्राथ मुंचते प्राणान्मम कर्मपरायणः ॥ वासवं लोकमुत्सृज्य मम लोकं च गच्छति ॥ ५५ ॥ यमव्यसनकं नाम
गुह्यमस्ति परं मम ॥ स्रोतो वहति तत्रैकं कौशिकीमाश्रितं नदीम् ॥ ५६ ॥ यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ॥ न स गच्छति दुर्गाणि
यमस्य व्यसनं महत् ॥ ५७ ॥ अथ तत्र त्यजेत्प्राणान्मम कर्मपरायणः ॥ विशुद्धो मुक्तपापोऽसौ मम लोकं स गच्छति ॥ ५८ ॥ मातंगं नाम
विख्यातं तस्मिन्क्षेत्रे परं मम ॥ स्रोतो वहति तत्रैव आश्रितं कौशिकीं नदीम् ॥५९॥ स्नानं कुर्वीति ये तत्र एकरात्रोषिता नराः ॥ भेदं किम्पु
रुषं प्राप्य जायते नात्र संशयः ॥ ६० ॥ विद्राच्छुचिश्च जायेत मम कर्मानुसारकः ॥ तत्राऽथ मुंचते प्राणान्गुह्ये देवि परे मम ॥ ६१ ॥ मुक्त्वा
किम्पुरुषं भेदं मम लोकं च गच्छति॥अस्ति वज्रभवं नाम गुह्यं तस्मिन्परं मम ॥६२॥ स्रोतो वहति तत्रैकमाश्रितं कौशिकीं नदीम् ॥ स्नानं
करोति यस्तत्र एकरात्रोषितो नरः ॥ ६३ ॥ जायते शक्रलोके तु मम कर्मानुसारकः ॥ शरीरचक्रसङ्घाते वज्रहस्तस्वरूपकः ॥ ६४ ॥ तत्र
स्नानप्रभावेण जायते नात्र संशयः ॥अथाऽत्र मुच्यते प्राणान्मम चिन्तनतत्परः ॥६५॥ शक्रलोकमतिक्रम्य मम लोकं प्रपद्यते ॥ तत्र त्रिक्रोश
मात्रेण गुह्यं क्षेत्रं परं मम ॥ ६६ ॥ शक्ररूपेति विख्यातं तस्मिन्कोकाशिलातले ॥ स्नानं करोति यस्तत्र त्रिरात्रोपोषितो नरः ॥ ६७ ॥ जम्बू
द्वीपे प्रजायेत जम्बूर्यत्र प्रतिष्ठिता ॥ जंबूद्वीपं परित्यज्य जायते मम पार्श्वगः ॥ ६८ ॥ अस्ति चान्यन्महद्भद्रे क्षेत्रे गुह्ये विशेषितम् ॥ मनुजा
यन गच्छन्ति मुक्त्वा संसारसागरम् ॥ ६९ ॥ दंष्ट्राकुरोति विख्यातं यत्र कोका विनिःसृता ॥ एतद्गुह्यं न जानन्ति यतो मुंचंति जन्तवः॥७०॥
कृतोदकस्तत्र भद्रे अहोरात्रोषितो नरः ॥ जायते शाल्मलिद्वीपे मम कर्मानुसारिणि ॥ ७१ ॥ तत्राऽथ मुंचते प्राणान्मम कर्मसु निष्ठितः ॥

शाल्मलिद्वीपमुत्सृज्य मम पार्श्वे स तिष्ठति ॥ ७२ ॥ तस्मिन्क्षेत्रे महागुह्ये परमास्ति फलोदयम् ॥ विष्णुतीर्थमिति ख्यातं मम भक्तसुखावहम् ॥ ७३ ॥ ततः पर्वतमध्यात्तु कोकायां पतते जलम् ॥ त्रिस्रोतसं महाभागे सर्वसंसारमोक्षणम् ॥ ७४ ॥ तस्मिन् कृतोदको भूमे छित्त्वा संसारबन्धनम् ॥ वायोः स भवनं प्राप्य वायुभूतस्तु तिष्ठति ॥ ७५ ॥ तत्राऽथ मुंचते प्राणान्मम कर्मसु निष्ठितिः ॥ वायुलोकमतिक्रम्य मम लोकं स गच्छति ॥ ७६ ॥ अस्ति तत्र वरं स्थानं सङ्गम्यं कौशिकोकयोः ॥ सर्वकामिकेति विख्याता शिला तिष्ठति चोत्तरे ॥ ७७॥ तत्र यः कुरुते स्नानमहोरात्रोषितो नरः ॥ विस्तीर्णे जायते वंशे जातिं स्मरति चात्मनः ॥ ७८ ॥ स्वर्गे वा यदि वा भूमौ यं यं कामयते नरः ॥ तं तं प्राप्नोति वै कामं स्नातमात्रः शिलातले ॥७९ ॥ तत्राऽथ मुंचते प्राणान्मम कमण्यवस्थितः ॥ सर्वसंगं परित्यज्य मम लोकं स गच्छति ॥८०॥ अस्ति मत्स्यशिला नाम गुह्यं कोकामुखे वरम् ॥ धाराः पतन्ति तिस्रो वै कौशिकीमाश्रिता नदीम् ॥ ८१ ॥ तत्र च स्नायमानस्तु यदि मत्स्यं प्रपश्यति ॥ ततो जानाम्यहं देवि प्राप्तो नारायणः स्वयम् ॥ ८२ ॥ तत्र मत्स्यं पुनर्दृष्ट्वा यजमानस्तु सुन्दरि ॥ दद्याद्दर्भ्यं ततो भद्रे मधुलाज समन्वितम् ॥ ८३ ॥ यस्तत्र कुरुते स्नानं देवि गुह्ये ततः परे ॥ तिष्ठते पद्मपत्रे तु सोत्तरे मेरुसंश्रिते ॥ ८४ ॥ अथ संप्राप्य मुच्येत मत्स्यं गुह्यं परं मम ॥ मेरुशृंगं समुल्लङ्घ्य मम लोकं च गच्छति ॥ ८५॥ पंचयोजनविस्तारं क्षेत्रं कोकामुखं मम ॥ यस्त्वेतत्तु विजानाति न स पापेन लिप्यते ॥ ८६ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ तस्मिन्कोकामुखे रम्ये तिष्ठामि दक्षिणामुखः ॥८७॥ शिलाचन्दनसंकाशं देवानामपि दुर्लभम् ॥ वराहरूपमादाय तिष्ठामि पुरुषाकृतिः ॥ ८८ ॥ वामोन्नतमुखं कृत्वा वामदंष्ट्रासमुन्नतम् ॥ पश्यामि च जगत्सर्वं ये च भक्ता मम प्रियाः ॥८९॥ ये मां स्मरन्ति वै भूमे पुरुषा मुक्तकिल्बिषाः ॥ तत्र कुर्वन्ति कर्माणि शुद्धाः संसारमोक्षणे ॥९०॥ यदि कोकामुखं गच्छेत् कदाचित्कालपर्ययेः ॥ मा ततो विनिवर्त्तेते यदीच्छेन्मम तुल्यताम् ॥ ९१ ॥ गुह्यानां परमं गुह्यमेतत्स्थानं परं महत् ॥ सिद्धानां परमा सिद्धिर्गुह्यं कोकामुखं परम् ॥ ९२ ॥ न च सांख्येन योगेन सिद्धिं यान्ति महापराम् ॥ याति कोकामुखं गत्वा रहस्यं कथितं मया ॥९३॥ एवं श्रेष्ठं महाभागे यत्त्वया परिपृच्छितम् ॥ परमं कथितं सर्वं किमन्यच्छ्रोतुमिच्छसि ॥९४॥ य एतत्कथितं भूमे कोकामुखमनुत्तमम् ॥ तारिताः पितर

स्तेन दश पूर्वास्तथा पराः ॥ ९५ ॥ मृतो वा तत्र जायेत शुद्धे भागवते कुले ॥ अनन्यमानसो भूत्वा मम मार्गप्रदर्शकः ॥९६॥ यश्चैदं शृणुया
न्नित्यं कृत्य उत्थाय मानवः ॥ त्यक्त्वा पंचशतं जन्म मम भक्तश्च जायते ॥ ९७ ॥ य एतत्पठते नित्यं कोकाख्यानं तथोपासि ॥ गच्छते
परमं स्थानमेवमेतन्न संशयः ॥९८॥ इति श्रीवराहपुराणे भगवच्छास्त्रे कोकामुखमाहात्म्यवर्णनं नाम चत्वारिंशदधिकशततमोऽध्यायः॥१४०॥
अथ बदरिकाश्रममाहात्म्यम् ॥ श्रीवराह उवाच ॥ तस्मिन्हिमवतः पृष्ठे परं गुह्यमतः शृणु ॥ बदरीति च विख्याता देवानामपि दुर्लभा ॥१॥
न तत्प्राप्नोति मनुजः कृत्वा कर्म सुदुष्करम् ॥ प्राप्नुवन्ति च भक्ता ये बदरीं विंशतारिणीम् ॥ २ ॥ दुर्लभं तन्मम क्षेत्रं हिमकूटशिलातले ॥
यस्तत्प्राप्नोति हि क्षेत्रं कृतकृत्यो भवेन्नरः ॥ ३ ॥ ब्रह्मकुण्डमिति ख्यातमास्ते तत्र शिलोच्चये ॥ हिमसंस्थं तथात्मानं कृत्वा तिष्ठामि
माधवि ॥ ४ ॥ स्नानं करोति यस्तत्र त्रिरात्रोपोषितो नरः ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ५ ॥ मुञ्चेत्प्राणांस्तत्र यदि व्रत
निष्ठो जितेन्द्रियः ॥ सत्यलोकमतिक्रम्य मम लोकं च गच्छति ॥ ६ ॥ अग्निसत्यपदं नाम तस्मिन्क्षेत्रे परं मम ॥ शृङ्गत्रयात्पतन्त्यत्र धारा
मुसलसन्निभाः ॥ ७ ॥ यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ॥ सत्यवादी भवेद्दक्षो मम कर्मपरायणः ॥ ८ ॥ यस्तत्र मुञ्चते प्राणान्यदि
कृत्वा जलाशयम् ॥ सत्यलोकमतिक्रम्य मम लोके स मोदते ॥ ९ ॥ इन्द्रलोकामिति ख्यातो बदर्या च ममाश्रमः ॥ तत्राहं देवि शक्रेण निष्कलं
परितोषितः ॥१०॥ तत्र चैव तु शृङ्गेभ्यः स्थूलधारा पतेत्पुनः ॥ स्थूले शिलातले तत्र मम धर्मो व्यवस्थितः ॥११॥ स्नानं करोति यस्तत्र एक
रात्रोपितो नरः॥ सत्यवादी शुचिर्भूत्वा सत्यलोके महीयते॥१२॥अथात्र मुञ्चते प्राणान्कृत्वा चानाशकं व्रतम्॥सत्यलोकमतिक्रम्य मम लोकेषु
तिष्ठति ॥१३॥ अस्ति पञ्चशिखं नाम बदर्याश्रमतीर्थिकम् ॥ यत्र धाराः पतन्त्यत्र पंच शृङ्गसमाश्रिताः ॥१४॥ यस्तत्र कुरुते स्नानं पंचस्रोतासि
मानवः ॥ अश्वमेधफलं प्राप्य देवैश्च सह मोदते ॥ १५ ॥ यत्रत्र मुञ्चते प्राणान् कृत्वा कर्म सुदुष्करम् ॥ स्वर्गलोकमतिक्रम्य मम लोके
महीयते ॥१६॥ चतुःस्रोत इति ख्यातं तस्मिन्क्षेत्रे परे मम ॥ चतुर्धाराः पतन्त्यत्र चतस्रो दिश आश्रिताः ॥१७॥ यस्तत्र कुरुते स्नानमेकरात्रोपितो
नरः ॥ मोदते नाकपृष्ठे तु मम भक्तश्च जायते॥१८॥अथ प्राणान् परित्यज्य कृत्वा कर्म सदुष्करम्॥ नाकपृष्ठमतिक्रम्य मम लोकं प्रपद्यते॥१९॥

वेदधारामिति ख्यातं तस्मिन्क्षेत्रे परे मम ॥ यत्र ब्रह्ममुखाद्भ्रष्टा वेदाश्चत्वार एव च ॥ २० ॥ तत्रैव हिमवत्पृष्ठे चतुःशृङ्गाद्दृढत्तराः ॥ चतुर्धाराः पतन्त्यत्र विपमाश्च शिलोच्चये ॥२१॥ यस्तत्र कुरुते स्नानं चतूरात्रोपितो नरः ॥ चतुर्णामपि वेदानां ग्रहणे कारणं भवेत्॥२२॥ अथात्र मुञ्चते प्राणान्मम कर्मपथे स्थितः॥देवलोकमतिक्रम्य मम लोकं प्रतिष्ठते ॥ २३ ॥ द्वादशादित्यकुण्डेति तस्मिन्क्षेत्रे परे मम ॥ यत्र ते द्वादशादित्या देवि संस्थापिता मया ॥२४॥ तत्र पर्वतशृंगे तु स्थूलमूले शिलातले ॥ द्वादश पतन्ति धारा मम कर्मसुखावहाः ॥ २५॥ यस्तत्र कुरुते स्नानं यां काञ्चिद्वादशीं यदि॥यत्र ते द्वादशादित्यास्तत्र गच्छेन्न संशयः॥२६॥ अथात्र मुञ्चते प्राणान्मम कर्माणि संस्थितः ॥ समतिक्रम्य चादित्यान् मम लोकं महीयते॥२७॥ लोकपालमिति ख्यातं तस्मिन् क्षेत्रे परे मम॥ तत्र ते लोकपालास्तु मया संस्थापिताः पुरा॥२८॥तत्र पर्वतमध्ये तु स्थलकुण्डं बृहन्मम ॥ भित्वा पर्वतमुद्गीर्णं यत्र सोमसमुद्भवः ॥ २९ ॥ तत्र स्नानं तु कुर्वीत ज्येष्ठमासस्य द्वादशीम् ॥ मोदते लोकपालेषु मम भक्तश्च जायते॥३०॥ अथात्र मुञ्चते प्राणान्मम कर्मसु तत्परः ॥ लोकपालानतिक्रम्य मम लोकं प्रपद्यते॥३१॥ अस्ति मेरोर्वरं नाम तस्मिन् गुह्यं परं मम ॥ तत्र स्थितेन वै भूमे मेरुः संस्थापितः स्वयम् ॥ ३२ ॥ धारास्तिस्रः पतन्त्यत्र सुवर्णसदृशप्रभाः ॥ पतेत्तु तज्जलं भूमौ व्यक्तिं नैवोपलभ्यते ॥३३॥ यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः ॥ मोदते मेरुशृंगेषु मम भक्तश्च जायते ॥३४॥ अथ तत्र मृतो देवि तस्मिन् गुह्ये परे मम ॥ मेरुपृष्ठमतिक्रम्य मम लोकं तु गच्छति ॥ ३५ ॥ मानसोद्भेदमिति च तत्रान्यत्तीर्थमुत्तमम् ॥ पृथ्वीमुद्विद्य मध्ये तु जलं गच्छति सत्वरम् ॥३६॥ देवा अपि न जानन्ति तं देशं तत्र संस्थितम् ॥ मानुषा हि विजानन्ति भूम्यां पतति तज्जलम् ॥३७॥ यस्तत्र कुरुते स्नानमहोरात्रोपितो नरः ॥ मोदते मानसे दिव्ये मम भक्तश्च जायते ॥३८॥ अस्ति पञ्चशिरं नाम तस्मिन्गुह्यं परं मम ॥ ब्रह्मणा च्छिद्यते यत्र शिरश्चैव महाद्युति ॥ ३९॥ तत्र वै पंच कुण्डानि स्थूलशीर्षशिलोच्चये ॥ पञ्चात्र शिरसः स्थाने बहुधारासमाचिताः ॥ ४० ॥ यत्र तन्मध्यमं कुण्डं छिन्नमेव स्वयम्भुवा ॥ तत्र रक्तजला भूमिर्दृश्यते धारसंकुला ॥४१॥ यस्तत्र कुरुते स्नानं पंचरात्रोपितो नरः ॥ मोदते ब्रह्मलोकस्थो मम भक्तश्च जायते ॥४२॥ तथात्र मुञ्चते प्राणन् गुह्ये पञ्चशिरे मम ॥ जलचांद्रायणं कृत्वा मम कर्मसु निष्ठितः ॥४३॥बुद्धिमान्मतिमांश्चैव रागमोह

विवार्जितः ॥ ब्रह्मलोकमतिक्रम्य मम लोकं स गच्छति॥४४॥अस्ति सोमाभिषेकेति तीर्थमन्यत्परं मम॥ राजत्वे ब्राह्मणाना तु मया सोमाऽभिषेचितः ॥४५ ॥ तत्राहं तोपितस्तेन अत्रिपुत्रेण माधवि ॥ नवपञ्चककोट्यस्तु कृत्वा कर्म सुदुष्करम् ॥४६॥ प्राप्तश्च परमां सिद्धिं मत्प्रसादाद्व सुन्धरे ॥ तदायत्तं जगत्सर्वं ब्रीहयः परमोषधीः ॥४७॥ जायंतेऽस्मिन् प्रलीयंते स्कन्देन्द्राः समरुद्गणाः ॥ भूमे सोममयं सर्वं मन संस्थं भविष्यति ॥४८॥ तत्र सोमगिरिर्नाम यत्र धारा पतेद्भुवि ॥ कुण्डेऽरण्ये विशाले तु एतत्ते कथितं मया ॥ ४९ ॥ यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितेनरः ॥ मोदते सोमलोकेषु एवमेतन्न संशयः ॥५०॥ अथात्र म्रियते देवि कृत्वा कर्म सुदुष्करम् ॥ सोमलोकमतिक्रम्य मम लोकं प्रपद्यते ॥५१॥ अस्ति चोर्वशिकुण्डेति गुह्यं क्षेत्रे परं मम ॥ यत्र चैवोर्वशी भित्त्वा दक्षिणोरुमजायत ॥५२॥ तत्र तप्याम्यहं देवि देवानामपि कारणात् ॥ न मां कश्चिद्विजानाति स्वात्मानो हि विजानते ॥५३॥ ततो मे तप्यमानस्य बहुवर्षव्यतिक्रमात् ॥ देवा अपि न जानन्ति वत्रिब्रह्ममहेश्वराः ॥५४॥ एकैकेन फलेनाऽत्र बदर्या तु सुनिश्चितम् ॥ बहुवर्षसहस्रं तु तपश्चीर्णं मया भुवि ॥५५॥ तत्राहं दश कोट्यस्तु दशवर्षं दशार्बुदम् ॥ दश भूमे तथान्यानि पद्मानि तपसि स्थितः ॥५६॥ततस्ते मां न पश्यन्ति देवा गुह्यपथे स्थितम् ॥ विस्मयं परमं जग्मुर्दैवा दुःखपरायणाः ॥ ५७॥ अहं पश्यामि सर्वं वै तपःसंस्थो वसुन्धरे ॥ न मां सर्वे प्रपश्यन्ति योगमायासमावृताः ॥ ५८ ॥ ततस्ता देवताः सर्वाः प्रत्यूचुश्च पितामहम् ॥ विष्णुना च विना लोके शान्तिं नैव लभामहे ॥ ५९ ॥ देवानां तु वचः श्रुत्वा ब्रह्मा लोकपितामहः ॥ योगमायापटच्छन्नं कथयामास मां तदा ॥ ६० ॥ ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ॥ तत्र जग्मुर्महाभागे तुष्यन्तः परमं मुदा ॥ ६१ ॥ विभावयन्ति मां तत्र देवा इन्द्रपुरोगमाः ॥ त्वया नाथ परित्यक्ता दुःखिताः श्रमवर्जिताः ॥ ६२ ॥ त्रायस्व नो हृषीकेश परमानुग्रहेण वै ॥ एतत्कृत्वा विशालाक्षि देवान् प्रणतिपूर्वकम् ॥ ६३ ॥ मया विलोकिताः सर्वे परां निर्वृतिमागताः ॥ एतस्मिन्नुर्वशीकुण्डे एकरात्रोषितो नरः ॥ ६४ ॥ यः स्नाति सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ उर्वशीलोकमासाद्य क्रीडते कालमक्षयम् ॥ ६५ ॥ यस्तत्रोत्सृजते प्राणान्मम कर्मपरायणः ॥ पुण्यपापविनिर्मुक्तो याति मल्लीनतां प्रिये ॥ ६६ ॥ श्रीवदर्याश्रमं पुण्यं यत्र यत्र स्थितः स्मरेत् ॥ स याति वैष्णवं

स्थानं पुनरावृत्तिवर्जितः ॥ ६७ ॥ य इदं शृणुयान्नित्यं मद्भक्तः सततं पठेत् ॥ ब्रह्मचारी जितक्रोधः सत्यवादी जितेन्द्रियः ॥ ६८ ॥ ध्यान योगरतो नित्यं स मुक्तिफलभाग्भवेत् ॥ यस्यैतद्विदितं सर्वं ध्यानयोगं वसुन्धरे ॥ ६९ ॥ योऽवगच्छति चात्मानं स गच्छेत्परमां गतिम् ॥७०॥ इति श्रीवराहपुराणे भगवच्छास्त्रे बदरिकाश्रममाहात्म्यवर्णनं नामैकचत्वारिंशदधिकशततमोऽध्यायः ॥१४१॥ अथ गुह्यकर्ममाहात्म्यम् ॥सूत उवाच ॥ ततो देववचः श्रुत्वा धर्मकामा वसुन्धरा ॥ कृताञ्जलिपुटा भूत्वा प्रसादयति माधवम् ॥ १ ॥ धरण्युवाच ॥ दास्यां मे प्रणयं कृत्वा विज्ञाप्यं शृणु माधव ॥ मृदुना च स्वभावेन वक्ष्यामि त्वां जनार्दन ॥ २ ॥ अल्पप्राणबला नार्यो यत्त्वया परिभाषितम् ॥ अशक्ताः सहितुं ह्येताः क्षुधात्वनशनेऽबलाः ॥ ३ ॥ भुञ्जमाना नरा ह्यत्र रजसा यांति शं परम् ॥ अत्रं ह्यनुग्रहं देव येन ते कर्म संश्रिताः ॥ ४ ॥ तस्या स्तद्वचनं श्रुत्वा माधव्याः स तु माधवः ॥ प्रहस्य भावशुद्धात्मा तत एवमभाषत ॥ ५ ॥ श्रीवराह उवाच ॥ साधु देवि वरारोहे मम कर्मव्यवस्थिते ॥ पृष्टोऽहं परमं गुह्यं मम भक्तसुखावहम् ॥ ६ ॥ स्पृष्टा या रजसा देवि मम कर्मपरायणा ॥ मां संस्पृशन्तु तत्रस्थं यत्र तिष्ठामि सुन्दरि ॥ ७ ॥ यदि भावस्तदा कश्चिद्भोजने कायसाधने ॥ चित्तं न्यस्य मयि क्षोणि भोक्तव्यं च न संशयः ॥ ८ ॥ न सा लिप्यति दोषेण भुञ्जमाना रजस्वला॥अञ्जलिं शिरसा कृत्वा मयोक्तं मन्त्रमुत्तमम् ॥९ ॥ (अनादिमध्यान्तमजं पुराणं रजस्वला देववरं नमामि ॥) तत एतेन मन्त्रेण भुक्त्वा देवि रजस्वला ॥ करोति यानि कर्माणि न तैर्दुष्येत कर्हिचित् ॥ १० ॥ स्नात्वा सा तु महाभागे पंचमात्तु दिनात्पुनः ॥११॥ यथार्हं कुरुते कर्म मच्चित्ता मत्परायणा ॥ प्राप्नुयात्पुरुषत्वं च न्यस्तसंसारचिन्तनात् ॥ १२ ॥ धरण्युवाच ॥ पुरुषा वा स्त्रियो वापि न पुमांसो न वा स्त्रियः ॥ कथं दोषेण मुच्यन्ते जन्मसंसारबन्धनात् ॥१३॥ श्रीवराह उवाच ॥ इन्द्रियाणि निगृह्याथ चित्तमप्यनुवेश्य च ॥ मयि संन्यास योगेन मम कर्मपरायणः ॥ १४ ॥ मम योगेषु संन्यासमेकचित्तो दृढव्रतः ॥ एवं कुर्वन्महाभागे स्त्रियो वा पुन्नपुंसकम् ॥ १५ ॥ ज्ञानसंन्यास योगं वा यदीच्छेत्परमां गतिम् ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ १६ ॥ मनो बुद्धिश्च चित्तं च ते ह्यनीशाः शरीरिणाम् ॥ एकचित्तं मनः कृत्वा ज्ञानेन पृथुलोचने ॥ १७ ॥ समचित्तं प्रपद्यन्ते न ते लिप्यन्ति मानवाः ॥ सर्वभक्ष्याणि भक्षन्तः पेयापेयांस्तथैव च ॥ १८॥

समं चित्तं मयि यदि तदा तस्य न च क्रिया ॥ चित्तं मनश्च बुद्धिश्च मत्संस्थं च समं यदि ॥१९॥ यत्किंचित्कुर्वतः कर्म पद्मपत्रमिवाम्भसि ॥ संयोगान्न च लिप्येत समत्वादेव नान्यथा ॥२०॥ रात्रिन्दिवं मुहूर्तं वा क्षणं वा यदि वा कला॥ निमेषं वा त्रुटिं वाथ देवि चित्तं समं कुरु॥२१॥ सदा दिवानिशोश्चैव कुर्वन्तः कर्मसङ्करम् ॥ तेऽपि यान्ति परां सिद्धिं यदि चित्तं व्यवस्थितम्॥२२॥जाग्रतः स्वपतो वापि शृण्वतः पश्यतोऽपि वा ॥ यो मां चित्ते चिंतयति मच्चित्तस्य च किं भयम् ॥२३॥ दुर्वृत्तमपि चाण्डालं ब्राह्मणं चाऽपथि स्थितम् ॥तं तु देवि प्रशंसामि नान्यचित्तं कदाचन ॥ २४ ॥ यजन्तः सर्वधर्मज्ञा ज्ञानसंस्कारसंस्कृताः ॥ मयि चित्तं समाधाय मम कर्मपरायणाः ॥२५॥ ये मत्कर्माणि कुर्वन्ति मया हृदि समाश्रिताः ॥ सुखं निद्रां समाधाय स्वपन्तः कर्मसंस्थिताः ॥ २६ ॥ येषां प्रशांतं चित्तं वै तेऽपि देवि मम प्रियाः ॥ सर्वमात्मनि कर्म स्वं शुभं वा यदि वाऽशुभम् ॥२७॥ प्राप्नुवन्ति च दुःखानि भ्रमचित्ता नराधमाः ॥ चित्तं नाशो हि लोकस्य चित्तं मोक्षस्य कारणम् ॥२८॥ तस्माच्चित्तं समादाय मांप्रपद्यस्व मेदिनि ॥ न्यस्य ज्ञानं च योगं च एकचित्ता भजस्व माम् ॥ २९ ॥ मच्चित्तः सततं यो मां भजेत नियत व्रतः ॥ मत्पाश्वं प्राप्य परमं मद्भावायोपपद्यते ॥ ३० ॥ मया चैव पुरा सृष्टं प्रजार्थेन वसुन्धरे ॥ मासे मासे तु गन्तव्यमृतुकाले व्यवस्थितम् ॥ ३१ ॥ एकचित्तं समादाय यदीच्छेत्तु मम प्रियम् ॥ न गच्छेद्यदि मासे तु ऋतुकालव्यवस्थितम् ॥ ३२ ॥ पितरस्तस्य हन्यन्ते दश पूर्वा दशापराः ॥ न तत्र कामलोभेन मोहेन च वसुन्धरे ॥ ३३ ॥ त्यक्त्वात्मानं च मोहं च पित्र्यार्थ स्त्रियं व्रजेत् ॥ द्वितीयां न स्पृशेन्नारीं लोभ मोहात्कथंचन ॥ ३४ ॥ न संस्पृशेत्तृतीयां तु चतुर्थीं न कदाचन ॥ कृते संभोगधर्मे तु कृतकौतुकसंस्थितः ॥ ३५ ॥ शयने न स्त्रियं पश्येद्दृष्टीश्चेच्छुद्धिमुत्तमाम् ॥ कौतुके कृतकृत्ये तु मम कर्मपरायणः ॥ ३६ ॥ जलस्नानं ततः कुर्यादन्यवस्त्रपरिग्रहम् ॥ अपूर्णे ऋतुकाले तु योऽभिगच्छेद्नरस्त्वलाम् ॥३७॥ रेतःपाः पितरस्तस्य एवमेतन्न संशयः ॥ एकां तु पुरुषो याति द्वितीयां काममोहितः ॥३८॥ तृतीयां वा चतुर्थीं वा तदा स पुरुषोऽधमः ॥ सर्वस्यैव तु लोकस्य समर्थोऽयं हि मत्कृतः ॥ ३९॥ ऋतुकाले तु सर्वासां पित्र्यैः भोग इष्यते ॥ ऋतुकालाभिगामी यो ब्रह्मचार्येव संमतः ॥ ४० ॥ न गच्छति च यः क्रोधान्मोहाद्वा पुरुषाधमः ॥ ऋतौ ऋतौ भ्रूणहत्यां प्राप्नोति पुरुषश्चरन् ॥ ४१ ॥ अन्यच्च

ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे॥ ज्ञानं तु चित्तयोगस्य कर्मयोगस्य यत्क्रिया॥४२॥कर्मगा यान्ति मत्स्थानं यान्ति मद्ज्ञाननिष्ठिताः ॥ यान्ति योगविदः स्थानं नास्ति चान्या परा गतिः ॥ ४३ ॥ ज्ञानं योगं च सांख्यं च नास्ति चित्तव्यपाश्रितम् ॥ लभन्ते पुष्कलां सिद्धिं मम मार्गानुसारिणः ॥ ४४ ॥ यस्तु भागवतो भूत्वा ऋतुकाले व्यवस्थितः ॥ वायुभक्षस्तताश्चिष्टेद्धूमे त्रीणि दिनानि च ॥४५ ॥ अथ तत्र चतुर्थे तु दिने प्राप्ते वसुन्धरे ॥ कृत्वा वै सिद्धिकर्माणि न गच्छत्यपराणि च ॥ ४६ ॥ ततः स्नानेन कुर्वीत शिरसो मलशोधनम् ॥ शुक्लांबरधरो भूत्वा चित्तं कृत्वा समाहितम् ॥ ४७ ॥ ततो बुद्धिं मनश्चैव समं कृत्वा वसुन्धरे ॥ पश्चात्कुर्वन्ति कर्माणि सदा ते मे हृदि स्थिताः ॥ ४८ ॥ मम प्रापणकं कृत्वा ततः कुर्वन्ति भोजनम् ॥ अञ्जलिं शिरसा कृत्वा मयोक्तं कर्म सास्मतम् ॥ ४९ ॥ तत्र मन्त्रः—आदि र्भवाग्युतमनन्तमध्यो रजस्वला देव वयं नमामः ॥ उपोषितास्त्रीणि दिनानि चैवं मुक्तो रतं वासुदेवं नमामः ॥ ५० ॥ तत एतेन मन्त्रेण शुद्धा भूमे रजस्वलाः ॥ ये तु कुर्वन्ति कर्माणि स्नातास्नातानि भागशः ॥ ५१ ॥ एवं दुष्यति नो देवि नारी वा पुरुषोऽपि वा ॥ कुर्वन्ति मम कर्माणि ते यथावन्मम प्रियाः ॥ ५२ ॥ सर्वाण्यनुदिनं भद्रे मम चित्तानुसारिणः ॥ प्राप्नुयात्पुरुषः स्त्री वा रजसा दूषिता अपि ॥ ५३ ॥ एकचित्तस्ततो भूत्वा भूमे चेन्द्रियनिग्रहात् ॥ मम योगेप्रसंन्यासं यदीच्छेत्परमां गतिम् ॥५४ ॥ एवं कुर्वन्ति ये नित्यं स्त्रियः पुंसो नपुंसकम् ॥ ज्ञाने सत्यप्ययोगानां मम कर्मसु कर्मणाम् ॥ ५५ ॥ अद्यापि मां न जानन्ति नराः संसारसंश्रिताः ॥ ते वै भूमे विजानन्ति ये तद्भक्त्या व्यवस्थिताः ॥ ५६ ॥ मातापितृसहस्राणि पुत्रदारशतानि च ॥ चक्रवत्परिवर्त्तन्ते यन्मोहान्मां न जानते ॥ ५७ ॥ अज्ञानेनावृतो लोको मोहेन च वशीकृतः ॥ सङ्गैश्च बहुभिर्बद्धस्तेन चित्तं न संन्यसेत् ॥ ५८ ॥ गच्छत्यन्यत्र माता वै पिता चान्यत्र गच्छति ॥ पुत्राश्चान्यत्र गच्छन्ति दासश्चान्यत्र गच्छति ॥ ५९ ॥ जायन्ते चात्मनः स्थाने स्वस्वकर्मसमुद्भवे ॥ ज्ञानमूढा वरारोहे नराः संसार मोहिताः ॥ ६० ॥ अल्पकालं परं चैव माससंवत्सरेति च ॥ भविष्यन्ति पुनः कृत्वा न मे मूत्यों सहासते ॥ ६१ ॥ यस्त्येतद्विदितं सर्वं न्यास योगं वसुन्धरे ॥ योगे न्यस्य सदात्मानं मुच्यते न च संशयः ॥ ६२ ॥ य एतच्छृणुयान्नित्यं कल्यमुत्थाय मानवः ॥ पुष्कलां लभते सिद्धिं मम

॥१३८॥

लोकं च गच्छति ॥ ६३ ॥ एतत्ते कथितं भद्रे रहस्यं परमं महत् ॥ त्वया पृष्टं च यद्देवि मम भक्तसुखावहम् ॥ ६४ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे गुह्यकर्ममाहात्म्यवर्णनं नाम द्वाचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ अथ मन्दारमहिमनिरूपणम् ॥ श्रीवराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि एकान्तं शृणु सुन्दरि ॥ स्थानं मे परमं गुह्यं मद्भक्तानां सुखावहम् ॥ १ ॥ जाह्नव्या दक्षिणे कूले विन्ध्यपृष्ठसमाश्रितम् ॥ मन्दारेति च विख्यातं सर्वभागवतप्रियम् ॥ २ ॥ तत्र त्रेतायुगे भूमे रामो नाम महाद्युतिः ॥ भविष्यति न सन्देहः स च मां स्थापयिष्यति ॥३॥ नारायणसुखाच्छ्रुत्वा धर्मकामा वसुन्धरा ॥ उवाच मधुरं वाक्यं लोकनाथं जनार्दनम् ॥ ४॥ धरण्युवाच ॥ देवदेव महादेव हरे नारायण प्रभो ॥ मन्दारेति त्वया प्रोक्तं देव धर्मार्थसंयुतम् ॥ ५॥ मन्दारे कानि कर्माणि कुर्वन्ति च ततो नराः ॥ कांश्च लोकान्प्रपद्यन्ते तत्र कर्मकृतो नराः ॥६॥ मन्दारे कानि गुह्यानि रहस्यं किंच तत्र वै ॥ वक्तुमर्हस्यशेषेण परं कौतूहलं मम ॥७॥ श्रीवराह उवाच ॥ शृणु सुन्दरि यत्नेन यन्मां त्वं परिपृच्छसि ॥ कथयिष्यामि ते गुह्यां मन्दारस्य महाक्रियाम् ॥ ८ ॥ क्रीडमानोऽस्म्यहं तत्र मन्दारे पुष्पिते तदा ॥ मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै हृदि ॥ ९ ॥ ततो ममाभवच्चिन्ता मन्दारे पर्वतस्थिते ॥ तत्रैकादशकुण्डानि निस्सृतानि गिरौ धरे ॥ १० ॥ विन्ध्ये च मत्प्रभावेण मन्दारश्च महाद्रुमः ॥ स्थितोऽहं तत्र सुभगे भक्तानुग्रहकामया ॥ ११ ॥ दर्शनीयतमं स्थानं मनोज्ञं च शिलातलम् ॥ यत्र तिष्ठाम्यहं देवि मन्दारद्रुम माश्रितः ॥ १२ ॥ विस्मयं शृणु सुश्रोणि मन्दारेऽस्मिन्महाद्रुमे ॥ द्वादश्यां च चतुर्दश्यां स पुष्पति महाद्रुमः ॥ १३ ॥ तत्र मध्याह्नवेलायां वीक्ष्यमाणो जनैस्ततः ॥ ततोऽन्यदिनमासाद्य दृश्यते न कदाचन ॥१४॥ तस्मिन्मंदाकुण्डे तु एकभक्तोषितो नरः ॥ स्नानं करोति शुद्धात्मा स गच्छेत्परमां गतिम् ॥ १५ ॥ अथ प्राणान्प्रमुच्येत कुण्डे मन्दारसंस्थिते ॥ तपः कृत्वा वरारोहे मम लोकं स गच्छति ॥ १६ ॥ तस्य चोत्तर पार्श्वे च प्रापणं नाम वै गिरिः ॥ तिस्रो धाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः ॥ १७ ॥ स्नानकुण्डमिति ख्यातं तस्मिन्क्षेत्रे परं मम ॥ दक्षिणे पतते धारा स्रवते चोत्तरामुखम् ॥ १८ ॥ तत्र स्नातो वरारोहे एकरात्रोषितो नरः ॥ मोदनं दक्षिणे शृंगे तस्मिन्मेरौ शिलोच्चये ॥ १९ ॥ तत्राथ मुंचते प्राणान्मम कर्मपरायणः ॥ सर्वसंगं परित्यज्य मम लोकं स गच्छति ॥ २० ॥ तस्य पूर्वोत्तरे पार्श्वे गुह्यं वैकुण्ठकारणम् ॥

यत्र धारा पतत्येका हरिद्रावर्णसन्निभा ॥ २१ ॥ यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ॥ नाकपृष्ठं समासाद्य मोदते सह देवैतैः ॥ २२ ॥
तथाऽत्र मुंचते प्राणान्कृतकृत्यः सुनिश्चितः ॥ तारयित्वा कुलं सर्वं मम लोकं प्रपद्यते ॥ २३ ॥ तस्य दक्षिणपूर्वेण समस्रोतो वरांगणे ॥ पतते
विन्ध्यशृंगेषु अगाधश्च महाह्रदः ॥ २४ ॥ तत्र स्नानं तु कुर्वीत एकभक्तोषितो नरः ॥ मोदते पूर्वपार्श्वे तु तस्मिन्मेरौ शिलोच्चये ॥ २५ ॥
अथात्र मुंचते प्राणान्मम चित्तव्यवस्थितः ॥ छित्वा वै सर्वसंसारं मम लोकं स गच्छति ॥ २६ ॥ मन्दारस्य तु पूर्वेण गुह्यं कोटरसंस्थितम् ॥
यत्र धारा पतत्येका मुसलाकृतिका शुभा ॥२७॥ तत्र स्नानं प्रकुर्वीत पंचभक्तोषितो नरः ॥ मोदते पूर्वपार्श्वे च मेरौ तस्मिच्छिलोच्चये ॥ २८ ॥
अथात्र मुंचते प्राणान् कृत्वा कर्म सुदुष्करम् ॥ मेरुशृङ्गं समुत्सृज्य मम लोकं च गच्छति॥२९॥ तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्य विनिःसृतम् ॥
पंच धाराः पतन्त्यत्र मुसलाकृतिकाः शुभाः ॥ ३० ॥ तत्र स्नानं प्रकुर्वीत अहोरात्रोषितो नरः ॥ मोदते दक्षिणे शृङ्गे महामेरौ शिलो
च्चये ॥ ३१ ॥ अथात्र मुंचते प्राणान्कृत्वा कर्म सुदुष्करम् ॥ मेरुशृङ्गं परित्यज्य मम लोकं प्रपद्यते ॥ ३२ ॥ दक्षिणे पश्चिमे भागे मन्दा
रस्य यशस्विनि ॥ अत्र धारा पतत्येका आदित्यसमतेजसा ॥ ३३ ॥ तत्र स्नानं प्रकुर्वीत अहोरात्रोषितो नरः ॥ मोदते पश्चिमे भागे ध्रुवो यत्र
प्रवर्त्तते ॥ ३४ ॥ अथात्र मुंचते प्राणान्मम कर्मव्यवस्थितः ॥ सर्वपापविनिर्मुक्तो मम लोके च मोदते ॥ ३५ ॥ तस्य पश्चिमपार्श्वे तु
गुह्यं देवसमन्वितम् ॥ चक्रावर्त्तीमिति ख्यातमगाधश्च महाह्रदः ॥ ३६ ॥ स्नानं करोति यस्तत्र पंचभक्तोषितो नरः ॥ मोदते मेरुशृङ्गेषु
स्वच्छन्दगमनालयः ॥ ३७ ॥ अथ वै मुंचते प्राणांश्चक्रवर्ती महायशाः ॥ शृंगात्सर्वान्परित्यज्य मोदते मम सन्निधौ ॥ ३८ ॥ दिशं वायव्य
माश्रित्य तस्मिन्विन्ध्यशिलोच्चये ॥ तिस्रो धाराः पतन्त्यत्र मुसलाकृतयः शुभाः ॥ ३९ ॥ तत्र स्नानं प्रकुर्वीत मम चित्तव्यवस्थितः ॥ मोदते
सर्वशृंगेषु चैकचित्तं समाश्रितः ॥ ४० ॥ अथात्र मुञ्चते प्राणान् तस्मिन्गुह्ये यशस्विनि ॥ सर्वसंगं परित्यज्य मम लोकं स गच्छति ॥४१॥
तस्य विष्कोशमात्रेण दक्षिणां दिशमाश्रितः ॥ गुह्यो गभीरको नाम अगाधश्च महाह्रदः ॥ ४२ ॥ तत्र स्नानं प्रकुर्वीत अष्टरात्रोषितो नरः ॥
मोदते सर्वद्वीपेषु स्वच्छन्दगमनालयः ॥ ४३ ॥ अथ वै मुञ्चते प्राणान्मम कर्मव्यवस्थितः ॥ सर्वद्वीपान् परित्यज्य मम लोकं प्रपद्यते ॥४४॥

तस्य पश्चिमपार्श्वे तु गुह्यं वै परमं महत् ॥ सत धाराः पतन्त्यत्र अगाधश्च महाह्रदः ॥ ४५ ॥ तत्र स्नानं प्रकुर्वीत अहोरात्रोषितो नरः ॥ मोदते शक्रलोके तु स्वच्छन्दगमनालयः ॥ ४६ ॥ अथ वै मुञ्चते प्राणान्स्वकर्मपरिनिष्ठितः ॥ सर्वसंगं परित्यज्य मम लोकं प्रपद्यते ॥ ४७ ॥ क्षेत्रस्य मण्डलं तस्य कथ्यमानं मया शृणु ॥ स्यमन्तपञ्चकं चैव मन्दारस्य गिरो मम ॥४८॥ तत्र तिष्ठामि सुश्रोणि विन्ध्यस्य गिरिमूर्द्धनि ॥ मन्दारे परमं गुह्यं तस्मिन्गुह्यशिलोच्चये ॥ ४९ ॥ दक्षिणे संस्थितं चक्रं वामे स्थाने च वै गदा ॥ य एतच्छृणुयान्नित्यं गुह्यं मन्दारसंस्थितम् ॥ ५० ॥ लांगले मुसलं चैव शंखास्तिष्ठति चाग्रतः ॥ तव चैव प्रियार्थाय मम भक्तसुखावहम् ॥ ५१ ॥ एतन्न जानते केचिन्मम माया विमोहिताः ॥ मुच्य भागवताच्छुद्धान्ये च वाराहमाश्रिताः ॥ ५२ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे मन्दारमहिमानिरूपणं नाम त्रयश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥ अथ सोमेश्वरादिलिङ्गमुक्तिक्षेत्रनिर्विण्णादिमाहात्म्यम् ॥ सूत उवाच ॥ श्रुत्वा मन्दारमाहात्म्यं धर्मकामा वसुन्धरा ॥ विस्मयं परमं गत्वा पुनः पप्रच्छ माधवम् ॥ १॥ धरण्युवाच ॥ मया देवप्रसादेन श्रुतं मन्दारवर्णनम् ॥ मन्दारात्परमं स्थानं विष्णो तद्वक्तुमर्हसि ॥ २ ॥ श्रीवराह उवाच ॥ शृणु तत्त्वेन मे देवि यन्मां त्वं परिपृच्छसि ॥ कथयिष्यामि मे गुह्यं शालग्राममिति स्फुटम् ॥ ३ ॥ द्वापरे तु युगे भूमे यदूनां कुलसंकुले ॥ तत्र शूर इति ख्यातो यदूनां वंशवर्द्धनः ॥४॥ तस्य पुत्रो महाभागो सर्वकर्मपरायणः ॥ वसुदेवो गृहे जातो यादवानां कुलोद्वहः ॥ ५ ॥ तस्य भार्या च वसुधे सर्वावयवसुन्दरी ॥ देवकी नाम नाम्ना च मनोज्ञा शुभदर्शना ॥ ६ ॥ तस्या गर्भे महाभागे अविष्यामि न संशयः ॥ वासुदेव इति ख्यातो देवानामरिमर्दनः ॥ ७ ॥ ततोऽपि संस्थिते तत्र यादवानां कुलोद्वहे ॥ तत्र ब्रह्मर्षिपरमः सालङ्कायन एव च ॥ ८ ॥ ममैवाराधनार्थाय भ्रमते स दिशो दश ॥ पुत्रार्थं स तपस्तेपे मेरुशृङ्गे समाहितः ॥ ९ ॥ ततः पिण्डारके गत्वा मम क्षेत्रे वसुन्धरे ॥ लोहार्गले ततो गत्वा सहस्रं चैव तिष्ठति ॥ १० ॥ ईश्वरेण समं पूर्वं सर्वयोगेश्वरं स्थितम् ॥ न च पश्यति मां देवि मार्गमाण इतस्ततः ॥ ११ ॥ ईश्वरेण समं पूर्वमहमासं वसुन्धरे ॥ तस्यैव तप्यमानस्य सालंकायनकस्य ह ॥ १२ ॥ तस्मिन्क्षेत्रे हरो देवो मत्स्यरूपेण संयुतः ॥ शालग्रामे गिरौ तस्मिच्छिलारूपेण तिष्ठति ॥ १३ ॥ अहं तिष्ठामि तत्रैव गिरिरूपेण नित्यशः ॥ तस्मिच्छिलाः समग्रास्तु

मत्स्वरूपा न संशयः ॥ १४ ॥ पूजनीयाः प्रयत्नेन किं पुनश्चकलाञ्चिताः ॥ लिङ्गरूपेण च हरस्तत्र देवालये गिरौ ॥ १५ ॥ शिवनाभाः शिलास्तत्र चक्रनाभास्तथा शिलाः ॥ सोमेश्वराधिष्ठितस्तु शिवरूपो गिरिः स्मृतः ॥ १६ ॥ सोमेन तत्र संस्थाप्य स्वनाम्ना लिंगमुत्तमम् ॥ वर्षाणां तु सहस्रं वै स्वशापस्य निवृत्तये ॥ १७ ॥ ततः शापाद्विनिर्मुक्तः तेजसा च परिप्लुतः ॥ स्वकं तेजो बलं प्राप्य तुष्टाव गिरिजा पतिम् ॥ १८ ॥ सोमेश्वराच्च वरदमाविर्भूतं त्रियम्बकम् ॥ १९ ॥ सोम उवाच ॥ शिवं सोम्यमुमाकान्तं भक्तानुग्रहकातरम् ॥ नतोऽस्मि पंचवदनं नीलकण्ठं त्रिलोचनम् ॥ २० ॥ शशांकशेखरं दिव्यं सर्वदेवनमस्कृतम् ॥ पिनाकपाणिं देवेशं भक्तानामभयप्रदम् ॥ २१ ॥ त्रिशूलिनं डमरुणा लसद्धस्तं वृषध्वजम् ॥ नानामुखैर्गणैर्जुष्टं नानारूपैर्भयानकैः ॥ २२ ॥ त्रिपुरघ्नं महाकालमन्धकाद्दिनिषूदनम् ॥ गजाजिनावृतं स्थाणुं व्याघ्रचर्मविभूषितम् ॥ २३ ॥ नागभोगोपवीतं च रुद्रमालधरं प्रभुम् ॥ अरूपमपि सर्वेशं भक्तेच्छोपात्तविग्रहम् ॥२४॥ वह्निसोमार्कनयनं मनोवाचामगोचरम् ॥ जटाजूटप्रकटितं गंगासम्माज्जितांहसम् ॥ २५ ॥ कैलासनिलयं शम्भुं हिमाचलकृताश्रमम् ॥ एवं स्तुतस्तदा शम्भुरिन्दुं वचनमब्रवीत् ॥ २६ ॥ वरं वरय भद्रं ते यत्ते मनसि वर्त्तते ॥ दुर्लभं दर्शनं यस्मात्प्राप्तवानसि गोपते ॥ २७ ॥ सोम उवाच ॥ वरं ददासि चेद्देव मम लिंगे सदा वस ॥ एतल्लिंगस्य भक्तानां पूरयस्व मनोरथम् ॥ २८ ॥ देवदेव उवाच ॥ विष्णुसान्निध्यमप्यत्र सदैव निव साम्यहम् ॥ विशेषतस्त्वदीयेऽस्मिन्नद्यप्रभृति गोपते ॥ २९ ॥ ममैवान्या परा मूर्त्तिस्त्वं शशाङ्क न संशयः ॥ एतल्लिंगार्चकानां च भक्तानां मम सर्वदा ॥ ३० ॥ वरान्दास्यामि भद्रं ते देवानामपि दुर्लभान् ॥ सालङ्कायनकाख्यस्य मुनेस्तु तपसा बलात् ॥ ३१ ॥ विष्णुना सह संमन्त्र्य स्थितावावां कलानिधे ॥ शालग्रामगिरिर्विष्णुरहं सोमेश्वराभिधः ॥ ३२ ॥ तयोः पर्वतयोर्यां वै शिला विष्णुशिवाभिधा ॥ रेवया च कृतं पूर्वं तपः शिवसुतुष्टिदम् ॥३३ ॥ मम त्वत्सदृशः पुत्रो भूयादिति मनीषया॥अहं कस्यापि न सुतः किं करोमीति चिन्तयन् ॥३४॥ रेवा यास्तु वरो देयस्त्ववश्यं मृगलाञ्छन ॥ निश्चित्यैवं तदा प्रोक्तः प्रसन्नेनान्तरात्मना ॥ ३५ ॥ लिंगरूपेण ते देवि गजाननपुरस्कृतः ॥ गर्भे तव वसिष्यामि पुत्रो भूत्वा शिवप्रिये॥३६॥मम त्वमपरा मूर्त्तिः ख्याता जलमयी शिवा॥शिवशक्तिविभेदेन आवामेकत्र संस्थितौ॥३७॥एवं दत्तवरा

खेवा मत्सान्निध्यमिहागता ॥ खेखण्डमिति ख्याते ततः प्रभृति गोपते ॥३८॥ गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विभो ॥ शीर्णपर्णाशनं कृत्वा वायुभक्षाऽप्यनन्तरम् ॥३९॥ दिव्यवर्षशतं तेपे विष्णुं चिन्तयती तदा ॥ ततः साक्षाज्जगन्नाथो हरिर्भक्तजनाश्रियः ॥ ४०॥ उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः ॥ गण्डकि त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे ॥४१॥ अनाविच्छिन्नया भक्त्या वरं वरय सुव्रते ॥ किं देयं तद्ददस्वाशु प्रीतोऽस्मि वरवर्णिनि ॥४२॥ गण्डक्यपि पुरा दृष्ट्वा शंखचक्रगदाधरम् ॥ दण्डवत्प्रणता भूत्वा ततः स्तोतुं प्रचक्रमे ॥ ४३ ॥ अहो देव मया दृष्टो दुर्दशो योगिनामपि ॥ त्वया सर्वमिदं सृष्टं जगत्स्थावरजङ्गमम् ॥ ४४ ॥ तदतु त्वं प्रविष्टोऽसि पुरुषरूपेण चोच्यसे ॥ त्वच्छीलोन्मीलिते विश्वे कः स्वतन्त्रोऽस्ति वै पुमान् ॥४५॥ अनाद्यन्तमपर्यंतं यद्ब्रह्म श्रुतिबोधितम् ॥ तदेव त्वं महाविष्णो यस्त्वां वेद स वेदवित् ॥ ४६॥ तवैवाद्या जगन्माता या शक्तिः परमा स्मृता ॥ तां योगमायां प्रकृतिं प्रधानमिति चक्षते ॥ ४७ ॥ निर्गुणः पुरुषोऽव्यक्तश्चित्स्वरूपो निरञ्जनः ॥ आनन्दरूपः शुद्धात्मा ह्यकर्त्ता निर्विकारकः ॥ ४८ ॥ स्वां योगमायामाविश्य कर्तृत्वं प्राप्तवानसि ॥ प्रकृत्या सृज्यमानेऽस्मिन्द्रष्टा साक्षी निगद्यसे ॥ ४९ ॥ प्रकृतैस्त्रिगुणैरस्मिन्सृज्यमानेऽपि नान्यथा ॥ सान्निध्यमात्रतो देव त्वयि स्फुरति कारणे ॥५०॥ स्फटिके हि यथा स्वच्छे जपाकुसुमरागतः ॥ प्रकाश्यते त्वप्रकाशाज्ज्योतीरूपं नताऽस्मि तत् ॥ ५१ ॥ ब्रह्मादयोऽपि कवयो न विदन्ति यथार्थतः ॥ तत्कथं वेद्म्यहं मूढा तव रूपं निरञ्जनम् ॥ ५२ ॥ मूढस्य जगतो मध्ये स्थिता किंचिदजानती ॥ त्वया धृता कृता चास्मि योग्ययोग्यमविन्दती ॥ ५३ ॥ तेन लोके महत्त्वं च त्वत्प्रसादेन चैपिता ॥ यथाचेऽज्ञतयोदार तन्मे दातुं त्वमर्हसि ॥५४॥ दयालुरसि दीनेषु नेति मां न वद प्रभो ॥ ततः प्रोवाच भगवान्देवि यद्यत्तमिच्छसि ॥ ५५ ॥ तद्याचय वरारोहे अदेयमपि सर्वथा ॥ यहुलैर्भ मनुष्याणां शीघ्रं याचय मां प्रति ॥ ५६ ॥ मद्दर्शनमवाप्य को वाऽपूर्णो मनोरथः ॥ ततो हिमांशो सा देवी गण्डकी लोकतारिणी ॥ ५७ ॥ प्रांजलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत् ॥ यदि देव प्रसन्नोऽसि देयो मे वाञ्छितो वरः ॥ ५८ ॥ मम गर्भगतो भूत्वा विष्णो मत्पुत्रतां व्रज ॥ ततः प्रसन्नो भगवांश्चिन्तयामास गोपते ॥ ५९॥ किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया ॥ दास्यामि याचितं येन लोकानां भवमोक्षणम् ॥ ६०॥ इत्येवं कृपया देवो निश्चित्य मनसा स्वयम्॥

दृग्गोचरत्वमायाति जातं चेत्तपसः फलम् ॥ ८५ ॥ यावत्तं न समीक्षिष्ये तावन्न विरतं तपः ॥ अहमत्रैव वत्स्यामि यावद्च्युतदर्शनम् ॥८६॥
पुत्र त्वमपि योगेन मथुरां व्रज सत्वरम् ॥ मदाश्रमे तत्र पुण्ये धनं गोव्रजसंकुलम् ॥ ८७ ॥ आमुष्यायणमादाय शीघ्रमत्र समानय ॥ ८८ ॥
ततस्त्वाज्ञां समादाय नन्दी सत्वरमाव्रजत् ॥ गत्वा च मथुरां तस्य ऋषेराश्रममीक्ष्य च॥ ८९ ॥ दृष्ट्वामुष्यायणं तत्र पृच्छा नाम तमप्युत ॥
गृहे वित्ते च कुशलमपृच्छद्गोधनेषु च ॥ ९० ॥ सालंकायनशिष्योऽपि आमुष्यायणसंज्ञितः ॥ सर्वत्र कुशलं साधो प्रभावात्तु गुरोर्मम ॥९१॥
गुरोश्च कुशलं ब्रूहि कुत्रास्ते स तपोधनः ॥ भवान् कुतः समायातः किमत्रागमकारणम् ॥९२ ॥ तन्मे विस्तरतो ब्रूहि अर्घ्यश्चैवोपगृह्यताम् ॥
इत्युक्तः सोऽर्घ्यमादाय विश्रम्य च ततो गुरोः ॥ ९३ ॥ वृत्तान्तं कथयामास स्वागमस्य च कारणम् ॥ ततस्तेनैव सहितो गोधनं
तत्प्रगृह्य च ॥ ९४ ॥ दिनैः कतिपयैश्चैव गण्डकीतीरमाश्रितः ॥ शनैरुत्तीर्य च ततस्त्रिवेणीं प्राप्य हर्षितः ॥ ९५ ॥ देविका नाम देवानां
प्रभावाच्च तपस्यताम् ॥ नियमार्थं समुद्भूता गंडक्या मिलिता शुभा ॥ ९६ ॥ आश्रमादपरा चासीत्पुलस्त्यपुलहाश्रमात् ॥ गण्डक्या
मिलिता सापि त्रिवेणी गण्डकीत्यभूत् ॥ ९७॥ कामिकं तन्महातीर्थं पितॄणामतिवल्लभम् ॥ तत्र स्थितं महालिङ्गं त्रिजलेश्वरसंज्ञितम् ॥९८॥
मुक्तिमुक्तिप्रदं देवि दर्शनादवनाज्ञनम् ॥ ९९ ॥ धरण्युवाच ॥ प्रयागे या त्रिवेणीति यत्र देवो महेश्वरः ॥ शूलटङ्क इति ख्यातः सोमेश इति
चापरः ॥ १०० ॥ वेणीमाधवनाम्नाऽपि यत्र विष्णुः स्वयं स्थितः ॥ गङ्गा च यमुना चैव सरस्वत्यपरा नदी ॥ १०१ ॥ सर्वेषां चैव देवाना
मृषीणां सरसामपि॥ सर्वेषां चैव तीर्थानां समाजस्तत्र मे श्रुतः ॥१०२॥ यत्राप्लुता दिवं यान्ति मृता मुक्तिं प्रयान्ति च ॥ तीर्थराज इति ख्यातं
तत्तीर्थं केशवप्रियम् ॥ १०३॥ सैव त्रिवेणी विख्याता किमपूर्वा प्रशंससि ॥ एतद्ब्रूह्यतमं प्रोक्तं त्वया विष्णो न संशयः ॥१०४ ॥ तत्कथ्यतां
महाभाग लोकानां हितकाम्यया ॥ मय्यनुक्रोशुबुद्ध्या च कुपां कुरु दयानिधे ॥ १०५ ॥ श्रीवराह उवाच ॥ शृणुष्व देवि भद्रं ते यद्ब्रूह्यं प्ररि
पृच्छसि ॥ अत्र ते कीर्त्तयिष्यामि सेतिहासां कथां शुभाम् ॥ १०६ ॥ पुरा विष्णुस्तपस्तेपे लोकानां हितकाम्यया ॥ हिमालये गिरौ रम्ये
देवतागणसेविते ॥ १०७ ॥ ततो बहुतिथे काले याते सति तपस्यतः ॥ तीव्रं तेजः प्रादुरासीद्येन लोकाश्चराचराः ॥१०८ ॥ तस्योष्मणा समु

दृग्गोचरत्वमायाति जातं चेत्तपसः फलम् ॥ ८५ ॥ यावत्तं न समीक्षिष्ये तावन्न विरतं तपः ॥ अहमत्रैव वत्स्यामि यावद्च्युतदर्शनम् ॥८६॥
पुत्र त्वमपि योगेन मथुरां व्रज सत्वरम् ॥ मदाश्रमे तत्र पुण्ये धनं गोव्रजसंकुलम् ॥ ८७ ॥ आमुष्यायणमादाय शीघ्रमत्र समानय ॥ ८८ ॥
ततस्त्वाज्ञां समादाय नन्दी सत्वरमाव्रजत् ॥ गत्वा च मथुरां तस्य ऋषेराश्रममीक्ष्य च॥ ८९ ॥ दृष्ट्वामुष्यायणं तत्र पृच्छा नाम तमप्युत ॥
गृहे वित्ते च कुशलमपृच्छद्गोधनेषु च ॥ ९० ॥ सालंकायनशिष्योऽपि आमुष्यायणसंज्ञितः ॥ सर्वत्र कुशलं साधो प्रभावात्तु गुरोर्मम ॥९१॥
गुरोश्च कुशलं ब्रूहि कुत्रास्ते स तपोधनः ॥ भवान् कुतः समायातः किमत्रागमकारणम् ॥९२ ॥ तन्मे विस्तरतो ब्रूहि अर्घ्यश्चैवोपगृह्यताम् ॥
इत्युक्तः सोऽर्घ्यमादाय विश्रम्य च ततो गुरोः ॥ ९३ ॥ वृत्तान्तं कथयामास स्वागमस्य च कारणम् ॥ ततस्तेनैव सहितो गोधनं
तत्प्रगृह्य च ॥ ९४ ॥ दिनैः कतिपयैश्चैव गण्डकीतीरमाश्रितः ॥ शनैरुत्तीर्य च ततस्त्रिवेणीं प्राप्य हर्षितः ॥ ९५ ॥ देविका नाम देवानां
प्रभावाच्च तपस्यताम् ॥ नियमार्थं समुद्भूता गंडक्या मिलिता शुभा ॥ ९६ ॥ आश्रमादपरा चासीत्पुलस्त्यपुलहाश्रमात् ॥ गण्डक्या
मिलिता सापि त्रिवेणी गण्डकीत्यभूत् ॥ ९७॥ कामिकं तन्महातीर्थं पितॄणामतिवल्लभम् ॥ तत्र स्थितं महालिङ्गं त्रिजलेश्वरसंज्ञितम् ॥९८॥
मुक्तिमुक्तिप्रदं देवि दर्शनादवनाज्ञनम् ॥ ९९ ॥ धरण्युवाच ॥ प्रयागे या त्रिवेणीति यत्र देवो महेश्वरः ॥ शूलटङ्क इति ख्यातः सोमेश इति
चापरः ॥ १०० ॥ वेणीमाधवनाम्नाऽपि यत्र विष्णुः स्वयं स्थितः ॥ गङ्गा च यमुना चैव सरस्वत्यपरा नदी ॥ १०१ ॥ सर्वेषां चैव देवाना
मृषीणां सरसामपि॥ सर्वेषां चैव तीर्थानां समाजस्तत्र मे श्रुतः ॥१०२॥ यत्राप्लुता दिवं यान्ति मृता मुक्तिं प्रयान्ति च ॥ तीर्थराज इति ख्यातं
तत्तीर्थं केशवप्रियम् ॥ १०३॥ सैव त्रिवेणी विख्याता किमपूर्वा प्रशंससि ॥ एतद्ब्रूह्यतमं प्रोक्तं त्वया विष्णो न संशयः ॥१०४ ॥ तत्कथ्यतां
महाभाग लोकानां हितकाम्यया ॥ मय्यनुक्रोशुबुद्ध्या च कुपां कुरु दयानिधे ॥ १०५ ॥ श्रीवराह उवाच ॥ शृणुष्व देवि भद्रं ते यद्ब्रूह्यं प्ररि
पृच्छसि ॥ अत्र ते कीर्त्तयिष्यामि सेतिहासां कथां शुभाम् ॥ १०६ ॥ पुरा विष्णुस्तपस्तेपे लोकानां हितकाम्यया ॥ हिमालये गिरौ रम्ये
देवतागणसेविते ॥ १०७ ॥ ततो बहुतिथे काले याते सति तपस्यतः ॥ तीव्रं तेजः प्रादुरासीद्येन लोकाश्चराचराः ॥१०८ ॥ तस्योष्मणा समु

द्भुतः स्वेदपूरस्तु गण्डयोः ॥ तेन जाता धुनी दिव्या लोकानामघहारिणी ॥ १०९ ॥ महर्लोकादयः सर्वे विस्मिताः सर्वतो दिशम् ॥ तस्य प्रभवमिच्छन्तो ज्ञातुं नेशुः कथंचन॥११०॥ देवाः सर्वे ततो जग्मुर्ब्रह्माणं प्रति चोत्सुकाः॥पप्रच्छुः प्रभवं तस्य प्रणम्य च पुनः पुनः॥१११॥ ब्रह्मापि हि न जानाति मोहितस्तस्य मायया ॥ ततो देवैः समं ब्रह्मा शङ्करं प्रत्युपस्थितः ॥ ११२ ॥ तं दृष्ट्वा सहसा देवैः समेतं प्रत्युपस्थितम्॥पप्रच्छ तं महादेवस्तदागमनकारणम्॥११३॥ब्रह्मा तं च महादेवं पप्रच्छ प्रणतःस्थितः ॥ अत्यद्भुतं महत्तेजश्चाद्भुतं किं महेश्वर ॥११४॥ येन प्रत्याहता क्ष्माऽसौ जगद्ग्रासातिकरावहा ॥ किन्तु स्यात्कथमेतत्स्यात्कश्चास्य प्रभवो विभो ॥ ११५ ॥ शिवः क्षणं ततो ध्यात्वा ब्रह्माद्यान् प्रत्युवाच ह ॥ महसोऽस्य समुत्पत्तिं महतो दर्शयामि वः ॥ ११६ ॥ जगाम देवसहितः सोमः सहगणः प्रभुः ॥ यत्रास्ते भगवान्विष्णुर्महता तपसान्वितः ॥ ११७ ॥ उवाच परमप्रीतस्तदा शम्भुः स्मयन्निव ॥ तपस्यसि किमिच्छन्तस्त्वं कर्त्ता जगतां प्रभुः ॥ ११८ ॥ सर्वाधारोऽखिलाव्यक्षस्तत्किं यत्तव दुर्लभम् ॥ एवमुक्तः प्रत्युवाच प्रणम्य जगतां प्रभुः ॥ ११९ ॥ अहं लोकहितार्थाय तपस्तप्तुं समुद्यतः ॥ त्वत्तो वरानभीप्सन्वै त्वद्दर्शनसमुत्सुकः ॥ १२० ॥ त्वद्दर्शनमनुप्राप्य कृतार्थोऽस्मि जगत्पते ॥ १२१ ॥ शिव उवाच ॥ मुक्तिक्षेत्रमिदं देव दर्शनादेव मुक्तिदम् ॥ गण्डस्वेदोद्भवा यत्र गण्डकी सरितां वरा ॥ १२२ ॥ भविष्यति न सन्देहो यस्या गर्भे भविष्यति ॥ त्वयि स्थिते जगन्नाथे तव सान्निध्यकारणात् ॥ १२३ ॥ अहं ब्रह्मा च देवाश्च ऋषिभिः सह केशव ॥ सर्वे वेदाश्च यज्ञाश्च सर्वतीर्थानि चाप्युत ॥ १२४ ॥ वसिष्यामः सदैवात्र गण्डक्यां जगतां पते ॥ कार्त्तिकं सकलं मासं यः स्नास्यति नरः प्रभो ॥ १२५ ॥ सर्वपापविनिर्मुक्तो मुक्तिभागी न संशयः ॥ तीर्थानां परमं तीर्थं मङ्गलानां च मङ्गलम् ॥१२६॥ यत्र स्नानेन लभ्येत गंगास्नानफलं नरैः ॥ स्मरणादर्शनात्स्पर्शान्निष्पापो जायते नरः ॥ १२७ ॥ यस्यास्तत्समतां कान्या लभेद्गुणां विना नदीम् ॥ यत्र सा परमा पुण्या गण्डकी मुक्तिमुक्तिदा ॥ १२८ ॥ अपरा देविका नाम्ना गण्डक्या सह संगता ॥ पुलस्त्यपुलहौ पूर्वं तेपाते परमं तपः ॥ १२९ ॥ यत्र सृष्टिविधानार्थं कृत्वाश्रमपदं पृथक् ॥ सृष्टेर्विधानसामर्थ्यं यत्र लब्धं ततः परम् ॥ १३० ॥ ततोऽभूद्ब्रह्मतनया पुण्या सा सरितां वरा ॥ गण्डक्या यत्र मिलिता ब्रह्मपुत्री यशस्विनी ॥ १३१ ॥ त्रिवेणी ॥१४२॥

सा महापुण्या देवानामपि दुर्लभा ॥ धरे जानीहि तत्क्षेत्रं योजनं परमाञ्चितम् ॥१३२॥पुरा वेदनिधेः पुत्रौ जयो विजय एव च ॥ यजनाय गतौ राज्ञा वृतौ तौ कर्दमात्मजौ ॥१३३॥ तृणबिन्दोः सुतौ पापौ जातौ दृष्ट्वैव सुव्रतौ ॥ यज्ञविघ्नासुनिपुणौ वेदवेदांगपारगौ ॥१३४॥ पूजयन्तौ हरिं भक्त्या तन्निष्टेन्द्रियमानसौ ॥ ययोः पूजयतोर्नित्यं सान्निध्यं किल केशवः ॥ १३५ ॥ ददाति पूजावसरे भक्त्या किल वशीकृतः ॥ मरुत्तेन कदाचित्तावाहूतौ कुशलौ द्विजौ ॥ १३६ ॥ राज्ञा समाप्तयज्ञेन पूजयित्वा पुरस्कृतौ ॥ दक्षिणाभिस्तोषयित्वा विसृष्टौ गृह मागतौ ॥ १३७ ॥ विभागं कर्तुमारब्धौ परस्पर्द्धांते परस्परम् ॥ समो विभागः कर्त्तव्य इति ज्येष्ठोऽभ्यभाषत ॥१३८ ॥ विजयश्चाब्रवीच्चैनं येन लब्धं हि तस्य तत् ॥ जयोऽब्रवीदसामर्थ्यं मन्वानो मां त्रवीषि किम् ॥ १३९ ॥ न ददासि गृहीत्वा यत्तस्माद्राहस्त्वमाप्तुहि ॥ विजयोऽप्यब्रवीन्नूनमन्धीभूतोऽसि किं धनैः ॥ १४० ॥ गजो भव मदान्धस्त्वं यो मामेवं प्रभाषसे ॥ एवं तौ ग्राहमातंगावभूतां शापतः पृथक् ॥ १४१ ॥ गण्डक्यामेव सञ्जातो ग्राहः पूर्वस्मृतिर्द्विजः ॥ त्रिवेणीक्षेत्रमध्ये तु जयोऽभूद्धे महान्गजः॥१४२॥ करिशावैर्गजीभिश्च क्रीड मानो वने वसन् ॥ बहून्यब्दसहस्राणि व्यतीतानि तयोस्तदा॥१४३॥ वने विहरतोर्धूर्मे शापमोहितयोः सतोः ॥ कदाचित्स गजः स्नातुं करेणु गणसंवृतः ॥ १४४ ॥ त्रिवेणीमभितो यातोऽवगाहनपरायणः ॥ सिंचन्करेणूस्ताभिश्च सिच्यमानो जलं पिबन् ॥ १४५ ॥ स्वयं च पाययं स्ताश्च चिक्रीड प्रीतमानसः ॥ एवं संक्रीडतस्तत्र दैवयोगेन तस्य हि ॥ १४६ ॥ ग्राहः सम्प्रेरितः पूर्वं वैरयोगमनुस्मरन् ॥ जग्राह सुदृढं पादं गजोऽपि च विषाणतः ॥ १४७ ॥ ग्राहं विव्याध सोऽप्येनमाकर्षयत तज्जले ॥ तयोर्युद्धं समभवद्दनेकाब्दं विकर्षणैः ॥ १४८ ॥ आकर्षणैश्च बहुभिर्दन्तभेदैः परस्परम्॥प्रयुध्यतोस्तयोरेवं मत्सरग्रस्तयोः सतोः ॥१४९॥ सत्त्वानि पीडितान्यासन्ननेकानि क्षयं ययुः ॥ ततो जलेश्वरो राजा भगवन्तं व्यजिज्ञपत् ॥१५०॥ तेन विज्ञापितो देवो भगवान्भक्तवत्सलः ॥ सुदर्शनेन चक्रेण ग्राहास्यं समपाटयत् ॥ १५१ ॥ क्षिप्तं पुनः पुनस्तत्तु शिलाः सङ्घट्टयद्धरे ॥ सङ्घट्टनात्तु चक्रस्य शिलाश्चक्रेण लाञ्छिताः ॥ १५२ ॥ बाहुल्येन बभूवुर्हि तस्मिन्क्षेत्रे परे मम ॥ वज्रकीटेश्च ज्ञातानि सन्तताानि विलोकय ॥ १५३ ॥ न सन्देहस्त्वया कार्यस्त्रिवेणीं प्रति सुन्दरि ॥ त्रिवेणीक्षेत्रमहिमा एवं ते

परिकीर्त्तितः ॥ १५४ ॥ यदा च भरतो राजा पुलस्त्यस्याश्रमान्तिके ॥ स्थित्वा पर्यचरद्विष्णुं त्रिजलेशमपूजयत् ॥ १५५ ॥ ततःप्रभृति तस्यासीद्भरतेनारनिः स्फुटम् ॥ पुनश्च मृगदेहान्ते जडः स भरतोऽभवत् ॥ १५६ ॥ तेनैव पूजितो यस्माज्जलेश्वर इति स्मृतः ॥ यस्य संपूजनाद्भक्त्या योगसिद्धिः प्रजायते ॥ १५७ ॥ शालग्रामे परे क्षेत्रे यदाहं सुभगे स्थितः ॥ तत्र ज्ञात्वा जलेशेन स्तुतोऽहं वसुधे महि ॥ १५८ ॥ ततो भक्तकृपावेशात्क्षित्रवांस्तत्सुदर्शनम् ॥ प्रथमं पतितं यत्र तत्र तीर्थं ततोऽभवत् ॥ १५९ ॥ तत्र स्नानेन तेजस्वी सूर्यलोके महीयते ॥ यदि प्राणैर्वियुज्येत मम लोके महीयते ॥१६०॥ भक्तसंरक्षणार्थाय मयाज्ञप्तं सुदर्शनम् ॥ यत्र यत्र भ्रमति तत्तत्र तत्रांकिताः शिलाः ॥१६१॥ एवं तद्वै भ्रमाश्रितं सर्वं चक्रमयं त्वभूत् ॥ ततः स पंचराज्ञाणि स्थित्वा वै विधिपूर्वकम् ॥ १६२ ॥ गोधनान्यग्रतः कृत्वा हरिक्षेत्रं जगाम ह ॥ हरिणाधिष्ठितं क्षेत्रं पूजनीयं ततः स्मृतम् ॥ १६३ ॥ यदा नन्दी शूलपाणिर्गोधनेन पुरस्कृतः ॥ स्थितवांस्तद्दिनादेतत्ख्यातं हरिहरप्रभम्॥१६४॥ देवानामटनाच्चैव देवाट इति संज्ञितम् ॥ तस्य देवस्य महिमा केन वक्तुं हि शक्यते ॥१६५॥ स शूलपाणिर्देवेशो भक्ताभयविधायकः ॥ मुनिभिर्देवगन्धर्वैः सेव्यतेऽचिन्त्यशक्तिमान् ॥ १६६ ॥ तस्मिन्स्थाने महादेवः सालङ्कायनकस्य हि ॥ पुत्रत्वं नन्दिरूपेण प्राप्तः साक्षाच्छिवः प्रभुः ॥ १६७ ॥ स्वयं चैव महायोगी योगसिद्धिविधायकः ॥ आस्थितः परमं पीठं तीर्थे चैव त्रिधारके ॥ १६८ ॥ त्रिजटाभ्योऽभवद्धारा स्तिस्रो वै परमाद्भुताः ॥ गंगा च यमुना चैव पुण्या चैव सरस्वती ॥ १६९ ॥ एतत्त्रैधारिकं तीर्थं त्रिजटाभ्यः समुत्थितम् ॥ यत्र शम्भुः स्थितः साक्षान्महायोगी महेश्वरः ॥ १७० ॥ शालग्रामाभिधे क्षेत्रे हरिशीलनतत्परः ॥ दिशञ्ज्ञानं स्वभक्तानां संसाराद्येन मुच्यते ॥ १७१ ॥ तीर्थे त्रिधारे यः स्नात्वा सन्तर्प्य पितृदेवताः ॥ महायोगिनमभ्यर्च्य न भूयो जन्मभाग्भवेत् ॥ १७२ ॥ तस्यैव पूर्वदिग्भागे ईसतीर्थमिति स्मृतम् ॥ तत्रेकं कौतुकं वृत्तं तच्छृणुष्व महत्तरम् ॥ १७३ ॥ कदाचिच्छिवरात्र्यां तु भक्तैः पूजामहोत्सवे ॥ नैवेद्यैर्विविधैः सृष्टैः पूजयित्वा तु योगिनम् ॥ १७४ ॥ तत्र काकाः समुत्पेतुस्तत्र तस्मिन्बुभुक्षिताः ॥ गृहीत्वान्नं तु तत्काकस्तेन चोड्डीय निर्गतः ॥१७५॥ तद्गृहीतुं परः काक स्तेनायुध्यत चांबरे ॥ तावुभौ युध्यमानौ तु कुण्डे तस्मिन्निपेततुः ॥१७६॥ तत्र हंसौ ततो भूत्वा निर्गतौ चन्द्रवर्चसौ ॥ तद्दृष्ट्वा महदाश्चर्यं तत्र

ये मिलिता जनाः ॥ १७७ ॥ हंसतीर्थमिति प्रोचुस्ततःप्रभृति सत्तमे ॥ ततः प्रभृति तत्तीर्थं हंसतीर्थमिति स्मृतम् ॥ १७८ ॥ पूर्वं यक्षकृतं तत्तु यक्षतीर्थमिति स्मृतम् ॥ तत्र स्नातो नरः शुद्धो यक्षलोके महीयते ॥ १७९ ॥ तत्राऽथ मुंचते प्राणाञ्छिवभक्तिपरायणः ॥ यक्षलोकमनिरुम्य मम लोकं प्रपद्यते ॥ १८० ॥ एवंप्रभावं तत्तीर्थं महायोगिप्रभावतः ॥ अहं शिवश्च लोकानामनुग्रहपरायणौ ॥ १८१ ॥ एतत्ते सर्वमाख्यातं क्षेत्रं गुह्यं वसुन्धरे ॥ आरभ्य मुक्तिक्षेत्रं तत्क्षेत्रं द्वादशयोजनम् ॥ १८२॥ शालग्रामस्वरूपेण मया यत्र स्थितं स्वयम् ॥ स्वभक्तानां विशेषेण परमानन्ददायकम् ॥ १८३ ॥ गुह्यानां परमं गुह्यं किमन्यच्छ्रोतुमिच्छसि ॥१८४ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे सोमेश्वरादिलिंगहरिहरमुक्तिक्षेत्रनिर्वेष्णादिमहिमानिरूपणं नाम चतुश्चत्वारिंशदधिकशततमोध्यायः ॥ १४४ ॥ अथ सालग्रामक्षेत्रमाहात्म्यम् ॥ धरण्युवाच ॥ भगवन्देवदेवेश सालंकायनको मुनिः ॥ किं चकार तपःकुर्वंस्तत्र क्षेत्रे विमुक्तिदे ॥ १ ॥ श्रीवराह उवाच॥अथ दीर्घेण कालेन स ऋषिः संशितव्रतः ॥ तप्यमानो यथान्यायं पश्यत्वै सालमुत्तमम् ॥ २ ॥ अभिन्नमतुलच्छायं विशालं पुष्पितं तथा ॥ मनोज्ञं च सुगन्धं च देवानामपि दुर्लभम् ॥ ३ ॥ ऋषिर्ज्ञानपरिश्रान्तः सालंकायनकोऽद्भुतम् ॥ ददर्श च पुनः सालं शुभानां शुभदर्शनम् ॥ ४ ॥ ततो दृष्ट्वा महासालं परिश्रान्तो महामुनिः ॥ विश्रामं कुरुते तत्र द्रष्टुकामोऽथ मां मुनिः ॥ ५ ॥ सालस्य तस्य पूर्वेण स्थितः पश्चान्मुखो मुनिः ॥ मायया मम मूढात्मा शक्तो द्रष्टुं न मामभूत् ॥ ६ ॥ ततः पूर्वेण पार्श्वेन तस्य सालस्य सुन्दरि ॥ वैशाखमासद्वादश्यां मद्दर्शनमुपागतः ॥ ७ ॥ दृष्ट्वा मां तत्र स मुनिस्तपस्वी संशितव्रतः ॥ तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनःपुनः ॥ ८ ॥ मत्तेजसा ताडिताक्षः शनैरुन्मील्य लोचने ॥ यावत्पश्यति मां तत्र स्तुवन्स तपसान्वितः ॥ ९ ॥ वृक्षस्य दक्षिणे पार्श्वे गतस्तावद्दधे धरे ॥ पूर्वस्थानं परित्यज्य स ऋषिः संशितव्रतः ॥ १० ॥ स्थित्वा मत्प्रमुखे चैव स्तुवन्नेवं मम प्रियम् ॥ ततोऽहं स्तूयमानो वै ऋग्वेदस्यैव ऋग्गतैः ॥ ११ ॥ स्तोत्रैः सम्पूज्यमानो हि गतोऽहं पश्चिमां दिशम् ॥ ततः पश्चिमपार्श्वे तु स्थितस्तत्रैव माधवि ॥ १२ ॥ यजुर्वेदोक्तमन्त्रेण संस्तुतः पश्चिमां गतः ॥ स्तुवतीत्थं मुनौ देवि गतोऽहं चोत्तरां दिशम् ॥ १३॥ तत्रापि सामवेदोक्तैर्मन्त्रैस्तुष्टाव मां मुनिः ॥ ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि ॥१४॥ प्रातश्च परमां प्रीतिं तमवोच

मृषिं तदा ॥ साधु ब्रह्मन्महाभाग सालंकायन सत्तम ॥ १५ ॥ तपसानेन सन्तुष्टः स्तुत्या चैवानया तव ॥ वरं वरय भद्रं ते संसिद्धस्तपसा भवान् ॥ १६ ॥ एवमुक्तः स तु मया सालंकायनको मुनिः ॥ सालवृक्षं समाश्रित्य निभृतेनान्तरात्मना ॥ १७ ॥ ततो मां भाषते देवि स ऋषिः संशितव्रतः ॥ तवैवाराधनार्थाय तपस्तप्तं मया हरे ॥ १८ ॥ पर्यटामि महीं सर्वां सशैलवनकाननाम् ॥ इदानीं खलु दृष्टोऽसि चक्रपाणे महाप्रभो ॥ १९ ॥ यदि तुष्टोऽसि मे देव सर्वशान्तिकरः परः ॥ यदि देयो वरो मह्यं तपसाराधितेन च ॥ २० ॥ तदा देहि जगन्नाथ ममेश्वर समं सुतम् ॥ एष एव वरो मह्यं दीयतां मधुसूदन ॥ २१ ॥ एवं वरं याचितोऽस्मि मुनिना भीमकर्मणा ॥ पुत्रकामेन विप्रेण दीर्घं कालं तपस्यता ॥ २२ ॥ एवं तस्य वचः श्रुत्वा ब्राह्मणस्य तपस्विनः ॥ मधुरां गिरमादाय प्रत्यवोचमृषिं प्रति ॥ २३ ॥ चिरकालं व्रत स्थेन यत्त्वया चिन्तितं मुने ॥ स कामस्तव सञ्जातः सिद्धोऽसि तपसा भवान् ॥ २४ ॥ ईश्वरस्य परा मूर्तिर्नाम्ना वै नन्दिकेश्वरः ॥ त्वद्दक्षिणांगादुद्भूतः पुत्रस्तव मुनीश्वर ॥ २५ ॥ संहरस्व तपो ब्रह्मञ्शान्तिं गच्छ महामुने ॥ अथ चैतस्य जातस्य कल्पा वै सप्त सप्त च ॥ २६ ॥ त्वं न जानासि विप्रर्षे स जातो नन्दिकेश्वरः ॥ मायायोगबलोपेतो गोव्रजं स मया स्थितः ॥२७॥ मधुरायाः समानीय आमुष्यायणसंज्ञितम् ॥ तव शिष्यं पुरष्कृत्य शूलपाणिरवस्थितः ॥२८॥ तत्राश्रमे महाभाग स्थित्वा त्वं तपसां निधे ॥ पुत्रेण परमप्रीतो मत्क्षेत्रेऽस्मत्समो भव॥२९॥ अन्यच्च गुह्यं वक्ष्यामि सालङ्कायन तच्छृणु ॥ तव प्रीत्या प्रवक्ष्यामि येनैतत्क्षेत्रमुत्तमम् ॥ ३० ॥ शालग्राममिति ख्यातं तन्निबोध मुने शुभम् ॥ योऽयं वृक्षस्त्वया दृष्टः सोऽहमेव न संशयः ॥ ३१ ॥ एतत्कोऽपि न जानाति विना देवं महेश्वरम् ॥ मायया ऽहं निगूढोऽस्मि त्वत्प्रसादात्प्रकाशितः ॥ ३२ ॥ एवं तस्मै वरं दत्त्वा सालंकायनकाय वै ॥ ३३ ॥ पश्यतस्तस्य वसुधे तत्रैवान्तर्हितोऽभवम् ॥ वृक्षं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः ॥ ३४ ॥ मम तद्रोचते स्थानं गिरिकूटशिलोच्चये ॥ शालग्राम इति ख्यातं भक्तसंसारमोक्षणम् ॥ ३५ ॥ तत्र गुह्यानि मे भूमे वक्ष्यमाणानि मे शृणु ॥ तरन्ति मनुजा येभ्यो घोरं संसारसागरम् ॥ ३६ ॥ गुह्यानि तत्र वसुधे तीर्थानि दश पंच च ॥ नाद्यापि किंचिज्जानन्ति मुच्यन्ते यैरिह स्थिताः ॥ ३७ ॥ तत्र बिल्वप्रभं नाम गुह्यं क्षेत्रं मम प्रियम् ॥ कुञ्जानि तत्र चत्वारि क्रोशमात्रे यशा

॥१४४॥

स्विनि ॥ ३८ ॥ ह्यं तत्परमं गुह्यं भक्तकर्मसुखावहम् ॥ तत्र स्नानं तु कुर्वीत अहोरात्रोषितो नरः ॥ ३९ ॥ चतुर्णामश्वमेधानां फलं प्राप्नोति मानवः ॥ अथात्र मुंचते प्राणान्मम कर्मसु निष्ठितः ॥ ४० ॥ अश्वमेधफलं भुक्त्वा मम लोके स मोदते ॥ चक्रस्वामीति विख्यातं तस्मिन्क्षेत्रे परं मम ॥ ४१ ॥ चक्राङ्कितशिलास्तत्र दृश्यन्ते च इतस्ततः ॥ चक्राङ्किताशिला यत्र वरवर्णिनि तिष्ठति ॥ ४२ ॥ तदेतद्विद्धि वसुधे समन्ता द्योजनत्रयम् ॥ तत्र स्नानं तु कुर्वीत त्रिरात्रोपोषितो नरः ॥४३॥ त्रयाणामपि यज्ञानां फलं प्राप्नोति निश्चितम् ॥ अथात्र मुंचते प्राणान्मम कर्म परायणः ॥ ४४ ॥ वाजपेयफलं भुक्त्वा मम लोकं च गच्छति॥ तत्र विष्णुपदं नाम क्षेत्रं गुह्यं परं मम ॥४५॥ तिस्रो धाराः पतन्त्यत्र हिमकूटं समाश्रिताः ॥ तत्र स्नानं तु कुर्वीत त्रिरात्रोपोषितो नरः॥४६॥त्रयाणामपि रात्रीणां फलं प्राप्नोति निष्फलम् ॥ तथैव मुंचते प्राणान्सुकर्मगो गत क्रमः ॥ ४७ ॥ अतिरात्रफलं भुक्त्वा मम लोके महीयते ॥ तत्र कालीह्रदं नाम गुह्यं क्षेत्रं परं मम ॥ ४८ ॥ अत्र चैव ह्रदस्रोतो बदरीवृक्षनिःसृतः ॥ तत्र स्नानं तु कुर्वीत षष्टिकालोषितो नरः ॥ ४९ ॥ नरमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ अथात्र मुंचते प्राणान्सुकरागो गत क्रमः ॥ ५० ॥ नरमेधफलं भुक्त्वा मम लोके च मोदते ॥ अन्यच्च ते प्रवक्ष्यामि महाश्चर्यं वसुन्धरे ॥ ५१ ॥ तत्र शङ्खप्रभं नाम गुह्यं क्षेत्रं परं मम॥ श्रूयते शंखशब्दश्च द्वादश्यामर्द्धरात्रके ॥ ५२ ॥ गदाकुण्डमिति ख्यातं तस्मिन्क्षेत्रे परं मम ॥ यत्र वै कम्पते स्रोतो दक्षिणां दिशमाश्रि तम् ॥ ५३ ॥ तत्र स्नानं तु कुर्वीत त्रिरात्रोपोषितो नरः ॥ वेदान्तगानां विप्राणां फलं प्राप्नोति मानवः ॥ ५४ ॥ अथ वै मुंचते प्राणान्कृतकृत्यो गुणान्वितः ॥ गदापाणिर्महाकायो मम लोकं प्रपद्यते ॥ ५५ ॥ पुनश्चाग्निप्रभं नाम गुह्यं क्षेत्रं परं मम ॥ धारा पतति तत्रैका पूर्वोत्तरसमाश्रिता ॥५६॥ यस्तत्र कुरुते स्नानं चतूरात्रोषितो नरः ॥ अग्निष्टोमात्पंचगुणं फलं प्राप्नोति मानवः ॥५७॥ अथात्र मुंचते प्राणान् मम कर्मसु निष्ठितः ॥ अग्निष्टोमफलं भुक्त्वा मम लोकं प्रपद्यते ॥५८॥ तत्राश्चर्यं महाभागे कथ्यमानं मया शृणु ॥ हेमन्ते चोष्णकं तीर्थं ग्रीष्मे भवति शीतलम् ॥ ५९ ॥ गुह्यं सर्वायुधं नाम तत्र क्षेत्रे परं मम ॥ पतन्ति सप्त स्रोतांसि हिमवान्निःसृतानि वै ॥ ६० ॥ तत्र स्नानं प्रकुर्वीत समरात्रोषितो नरः ॥ राजा भवति सुश्रोणि सर्वायुधकलान्वितः ॥ ६१ ॥ अथ वै मुंचते प्राणान्मम कर्मावीनिश्रितः ॥ स भुक्त्वा राज्य

भोज्यानि मम लोकं च गच्छति ॥ ६२ ॥ तत्र देवप्रभं नाम गुह्यं क्षेत्रं परं मम ॥ धाराः पंचसुखास्तत्र पतन्ति गिरिसंश्रिताः ॥ ६३ ॥ तत्र स्नानं तु कुर्वीत त्वष्टकालोपितो नरः ॥ चतुर्णामपि वेदानां याति पारं न संशयः ॥ ६४ ॥ अथात्र मुंचते प्राणाँल्लोभमोहविवर्जितः ॥ वेदकर्मसमुत्सृज्य मम लोकेमहीयते ॥ ६५ ॥ गुह्यं विद्याधरं नाम तत्र क्षेत्रं परं मम ॥ पंच धाराः पतन्त्यत्र हिमकूटविनिःसृताः ॥ ६६ ॥ यस्तत्र कुरुते स्नान मेकरात्रोपितो नरः ॥ याति वैद्याधरं लोकं कृतकृत्यो न संशयः ॥६७॥ अथात्र मुंचते प्राणान्वीतरागो गतक्लमः ॥ भुक्त्वा वैद्याधरान्भोगान्मम लोकं स गच्छति ॥६८॥ तत्र पुण्यनदी नाम गुह्यक्षेत्रे परे मम ॥ शिलाकुञ्जलताकीर्णा गन्धर्वाप्सरसेविता ॥६९॥ तत्र स्नानं तु कुर्वीत अष्ट रात्रोपितो नरः ॥ सप्तद्वीपेषु भ्रमति स्वच्छंदगमनालयः ॥ ७० ॥ अथात्र मुञ्चते प्राणान्मम कर्मानुसारकः ॥ सप्तद्वीपान् समुत्सृज्य मम लोकं स गच्छति ॥७१॥ गन्धवैति च विख्यातं तस्मिन् क्षेत्रे परं मम ॥ एकधारा पतत्यत्र पश्चिमां दिशमाश्रिता ॥७२॥ तत्र स्नानं तु कुर्वीत चतूरात्रो पितो नरः ॥ मोदते लोकपालेषु स्वच्छंदगमनालयः ॥ ७३ ॥ अथात्र मुञ्चते प्राणान्मम कर्मपरायणः ॥ लोकपालान्परित्यज्य मम लोकं स गच्छति ॥७४॥ तत्र देवह्रदं नाम मम क्षेत्रे वसुन्धरे ॥यत्र कांताासि मे भूमे बलेर्यज्ञाविनाशनात्॥७५॥ स ह्रदो वरदः श्रेष्ठो मनोज्ञः सुखशीतलः ॥ अगाधः सौम्यदर्शश्चापि देवानामपि दुर्लभः ॥७६॥ तस्मिन् ह्रदे महाभागे मम वै नियमोदके ॥ मत्स्याश्चक्रांकिताश्चैव पर्यटन्ते इतस्ततः ॥७७॥ अन्यच्च ते प्रवक्ष्यामि तन्मृणुष्व वसुन्धरे ॥ महाश्चर्यं विशालाक्षि यत्र तत्परिवर्त्तते ॥७८॥पश्यंति श्रद्दधानस्तु न पश्यन्त्यापपूरुषाः॥तस्मिन्देव ह्रदे पुण्यं चतुर्विंशतिर्द्वादश ॥७९॥ सौवर्णानि च पद्मानि दृश्यन्ते भास्करोदये ॥ तावत्पश्यन्ति भूतानि यावन्मध्यन्दिनं भवेत् ॥ ८० ॥ यत्र स्नाता दिवं यांति शुद्धा वाङ्मायजैर्मलैः ॥ तत्र स्नानं प्रकुर्वीत दशरात्रोपितो नरः ॥८१॥ दशानामश्वमेधानां प्राप्नोत्यधिकलं फलम् ॥ अथात्र मुञ्चते प्राणान्मम चिंताव्यवस्थितः ॥८२॥ अश्वमेधफलं भुक्त्वा भूमे मत्समतां व्रजेत ॥ अन्यच्च ते प्रवक्ष्यामि क्षेत्रं गुह्यं परं मम॥८३॥ संभेदो देवनद्योस्तु समस्तसुखवल्लभः ॥ दिवोऽवतीर्य तिष्ठन्ति देवा यत्र सहप्रियाः ॥८४॥ गन्धर्वाप्सरसश्चैव नागकन्याः सहोरगैः ॥ देवर्षयश्च मुनयः समस्तसुरनायकाः ॥ ८५ ॥ सिद्धाश्च किन्नराश्चैव स्वर्गादवतरन्ति हि ॥ नेपाले यच्छिवस्थानं समस्तसुखवल्लभम् ॥ ८६ ॥ तेभ्यस्तेभ्यश्च

स्थानेभ्यस्तीर्थेभ्यश्च विशेषतः ॥ महादेवजटाजूटान्नीलकण्ठाच्छिवालयः ॥ ८७ ॥ श्वेतगंगेति या प्रोक्ता तया संभूय सादरम् ॥ नानानद्यः समायाता दृश्याश्चदृश्यतया स्थिताः ॥ ८८॥ गण्डक्या कृष्णया चैव या कृष्णस्य तनूद्भवा ॥ तया संभेदमापन्ना या सा शिवतनूद्भवा ॥८९॥ त्रिशूलगंगेत्याख्याता सापि तत्र महानदा ॥ एवं नदीसमुद्भेदः सर्वतीर्थकदंबकम् ॥ ९० ॥ मम क्षेत्रे समाख्यातं पुण्यं परमपावनम् ॥ वसुधे त्वं विजानीहि देवानामपि दुर्लभम् ॥ ९१ ॥ यत्र सिद्धाश्रम इति विख्यातः पुण्यवर्द्धनः ॥ शंभोस्तपोवनं तत्र सर्वाश्रमवरं प्रति ॥ ९२ ॥ नानापुष्पफलोपेतं कदलीषण्डमण्डितम् ॥ निचुलैश्चैव पुन्नागैः केसरैश्च विराजितम् ॥ ९३ ॥ खर्ज्जूराशोकवकुलैश्चूतैश्चैव प्रियालकैः ॥ नारिकेलैश्च पूगैश्च चंपकैर्जंबुभिर्धवैः ॥ ९४ ॥ नारंगैर्बदरीभिश्च जंबीरैर्मातुलुंगकैः ॥ केतकीमल्लिकाजातीयूथिकाराजिराजितम् ॥ ९५ ॥ कुन्दैः कुरवकैर्नागैः कुटजैर्दाडिमैरपि ॥ आगत्य यत्र क्रीडन्ति देवानां मिथुनानि च ॥ ९६ ॥ तस्मिन्हृदे महापुण्ये पुण्यनद्योस्तु संगमे ॥ स्नानाच्छताश्वमेधानां फलं प्राप्नोति मानवः ॥ ९७ ॥ स्नात्वा तत्र तु वैशाखे गोसहस्रफलं भवेत् ॥ माघमासे पुनः स्नात्वा प्रयागस्नानजं फलम् ॥९८॥ कार्त्तिके मासि यः स्नाति तुलासंस्थे दिवाकरे ॥ विधिना नियतः सोऽपि मुक्तिभागी न संशयः ॥ ९९ ॥ यस्त्रिरात्रमुषित्वा तु नियते नियताशनः ॥ राजसूयफलं प्राप्य मोदते देववद्दिवि ॥ १०० ॥ यज्ञस्तपोऽथवा दानं श्राद्धमिष्टस्य पूजनम् ॥ यत्किंचित्क्रियते कर्म तदनन्तफलं भवेत् ॥ १०१ ॥ भूमे तस्यापराधांश्च सर्वानेव क्षमाम्यहम् ॥ गंगायमुनयोर्यद्वत्संगमो मर्त्यदुर्लभः ॥ १०२ ॥ तथैवायं देवनद्योः संगमः समुदाहृतः ॥ एतद्गुह्यं परं देवि मम क्षेत्रे वसुन्धरे ॥ १०३ ॥ अहमस्मिन्महाक्षेत्रे धरे पूर्वसुखः स्थितः ॥ शालग्रामे महाक्षेत्रे भूमे भागवतप्रियः ॥ १०४ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ अन्तर्गुह्यं परं श्रेष्ठं यन्न जानन्ति मोहिताः ॥ १०५ ॥ शिवो मे दक्षिणस्थाने तिष्ठन्वै विगतज्वरः ॥ लोकानां प्रवरः श्रेष्ठः सर्वलोकवरो हरः ॥१०६॥ तं ये विन्दन्ति ते देवि नूनं मामेव विन्दति ॥ ये मां विदन्ति देवेशि ते विदन्ति शिवं परम् ॥१०७॥ अहं यत्र शिवस्तत्र शिवो यत्र वसुन्धरे ॥ तत्राहमपि तिष्ठामि आवयोर्नान्तरं क्वचित् ॥१०८॥ शिवं यो वन्दते भूमे स हि मामेव वन्दते ॥ लभते पुष्कलां सिद्धिमेवं यो वेत्ति तत्त्वतः ॥ १०९ ॥ एवमेतन्महाभागे क्षेत्रं हरिहरात्मकम् ॥ मृता येऽत्र गतिं

यान्ति मम कर्मानुसारिणः ॥ ११० ॥ मुक्तिक्षेत्रं प्रथमतो रुरुखण्डं ततः परम् ॥ संभेदो देवनद्योश्च त्रिवेणी च ततः परम् ॥ १११ ॥ क्षेत्रं प्रयागं विज्ञेयं गण्डकी सङ्गतं परम् ॥ एवं सा गण्डकी देवि नदीनामुत्तमा नदा ॥ ११२ ॥ गङ्गया मिलिता यत्र भागीरथ्या महाफला ॥ अपरं तन्महत्क्षेत्रं हरिक्षेत्रमिति स्मृतम् ॥ ११३ ॥ आदौ सा गण्डकी पुण्या भागीरथ्या च सङ्गता ॥ तस्य तीर्थस्य महिमा ज्ञायते न सुरैरपि ॥ ११४ ॥ एतत्ते कथितं भद्रे शालग्रामस्य सुन्दरि ॥ गण्डक्याश्चैव माहात्म्यं सर्वकल्मषनाशनम् ॥ ११५ ॥ पूर्वपृष्टं त्वया यच्च पुण्यं भागवतप्रियम् ॥ आख्यानानां महाख्यानं द्युतीनां परमा द्युतिः ॥ ११६ ॥ पुण्यानां परमं पुण्यं तपसां च महत्तपः ॥ गुह्यानां परमं गुह्यं गतीनां परमा गतिः ॥ ११७ ॥ महालाभस्तु लाभानां नास्त्यस्मादपरं महत् ॥ पिशुनाय न दातव्यं न शठाय गुरुद्रुहे ॥ ११८ ॥ ये च पापाः कृतघ्नाश्च द्विजदेवापराधिनः ॥ कुशिष्याय न दातव्यं न दद्याच्छास्त्रदूषके ॥ ११९ ॥ नीचाय न च दातव्यं ये न जानन्ति सेवितुम् ॥ सुशिष्याय च दातव्यं धीराय शुभबुद्धये ॥ १२० ॥ लोभमोहमदाद्वेषैर्य वर्जिताः पुण्यबुद्धयः ॥ य एतत्पठते नित्यं कल्यमुत्थाय मानवः ॥ १२१ ॥ कुलानि तारितान्येवं सप्त सप्त च सप्त च ॥ एवं मरणकाले तु न कदाचिद्विमुह्यते ॥ १२२ ॥ यदीच्छेत्परमां सिद्धिं मम लोकं स गच्छति ॥ क्षेत्रस्य शालग्रामस्य माहात्म्यं परमं मया ॥ १२३ ॥ कथितं ते महादेवि किमन्यच्छ्रोतुमिच्छसि ॥ १२४ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे शालग्रामक्षेत्रमाहात्म्यं नाम पंचचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥ अथ रुरुक्षेत्रस्थहरीकेशमाहात्म्यम् ॥ सूत उवाच ॥ शालग्रामस्य माहात्म्यं श्रुत्वा गुह्यं महोजसम् ॥ विस्मयं परमं गत्वा ह्रष्टा वचनमब्रवीत् ॥ १ ॥ धरण्युवाच ॥ अहो क्षेत्रस्य माहात्म्यं यत्त्वया भाषितं हरे ॥ एतच्छ्रुत्वा महाभाग जातास्मि विगतज्वरा ॥ २ ॥ रुरुषण्डामिति प्रोक्तं यत्त्वया परमार्चितम् ॥ रुरुनाम कथं को वा आसीत्पूर्वं जनार्दन ॥ ३ ॥ यन्नाम्ना परमं क्षेत्रं हरेः केशं त्वयाश्रितम् ॥ कथयस्व जगन्नाथ यद्यनुग्राह्यता मयि ॥ ४ ॥ श्रीवराह उवाच ॥ आसीत्पुरा महाभागो देवदत्त इति द्विजः ॥ भृगुवंशे समुत्पन्नो वेदवेदाङ्गपारगः ॥ ५ ॥ यज्ञविद्यासु कुशलो व्रतनिष्ठोऽतिथिप्रियः ॥ तत्राश्रमपदं पुण्यं पुण्यद्रुमलतान्वितम् ॥ ६ ॥ शान्तैर्मृगगणैः कीर्णं कन्दमूलफलान्वितम् ॥ तत्र तीव्रं तपोऽतप्यद्देवदत्तो मुनीश्वरः ॥ ७ ॥ वर्षाणामयुतं साग्रं तत इन्द्रो व्यचिन्तयत् ॥ कामं वसन्तसहितं गन्धर्वान्

स सखीन्पुनः ॥ ८ ॥ उवाच मधुरं वाक्यं श्रुत्वेन्द्रियमनाः प्रभुः ॥ अहो सखायः किंचिन्मे महत्कार्यमुपस्थितम् ॥ ९ ॥ तस्य मे चिन्तयानस्य यूयमेव परा गतिः ॥ भवत्प्रसादात्त्वस्थोऽहं निर्भयस्तद्विचिन्त्यताम् ॥ १० ॥ तद्दिन्द्रस्य वचः श्रुत्वा ते कामगलधानिलाः ॥ प्रत्यूचुर्देवराजानमाज्ञापय निजं प्रियम् ॥ ११ ॥ जितेन्द्रियस्यापि मनः कस्य संक्षोभयामहे ॥ कं वा सुतीव्रात्तपसो भ्रंशयामः सुपेशलम् ॥ १२ ॥ आज्ञाप्रसादं ते लब्ध्वा वद शीघ्रं सुखी भव ॥ इत्युक्तः शतमन्युर्वै प्रत्युवाचाऽथ मानवन् ॥ १३ ॥ तदैव मे गता चिन्ता भवतां दर्शनं यदा ॥ जातमेवाऽखिलं कार्यं मम तन्मृणुताखिलाः ॥ १४ ॥ हिमशैले महारम्ये ऋषीकेशाश्रितो मुनिः ॥ देवदत्त इति ख्यातस्तप्यति महत्तपः ॥१५॥ जिघृक्षुर्मे पदं नूनं तत्तपो विनिवर्त्यताम् ॥ इत्युक्तास्ते तदाज्ञां वै गृहीत्वा शिरसा द्रुतम् ॥ १६ ॥ प्रस्थानाय मतिं चक्रुः कामदेवपुरःसराः ॥ प्रस्थाप्याग्रे वसन्तं च मलयानिलमेव च ॥ १७ ॥ ततः सुरपतिः शक्रः प्रम्लोचां नाम नामतः ॥ प्रशस्य प्रणयात्पूर्वं मानयन्निदमब्रवीत् ॥ १८॥ गच्छ स्वास्तिमती देवि विजयाय मुनेर्भुवि ॥ यत्राश्रमपदं तस्य देवदत्तस्य वै मुनेः ॥ १९ ॥ ललितैः स्त्रैर्विलासैस्तं मोहयित्वा वशं कुरु ॥ यथा मत्प्रीतिरतुला त्वं मे कार्यकरी सदा ॥२०॥ तथा कुरुष्व भद्रं ते ऋषीकेशसमीपतः ॥ इन्द्रस्याज्ञां समादाय ययौ तस्याश्रमं प्रति ॥ २१ ॥ समीपोपवने रम्ये नानाद्रुमलताकुले ॥ मधुरालापबहुले कोकिलानां कलाकुले ॥ २२ ॥ रसालमञ्जरीव्याप्तरसामोदालिसंकुले ॥ गुंजन्मत्तालिसन्नादश्रुतिश्रुतिधरान्विते ॥ २३ ॥ गन्धर्वगीतसंमिश्रे मलयानिलशीतले ॥ सम्फुल्लपङ्कजवने सुनिर्मलजलाशये ॥ २४ ॥ मुनिप्रभावसन्त्यक्तक्रौर्यैस्थलजलाशये ॥ मधुरामोदमधुरे चित्तक्षोभविधायिनि ॥२५॥ प्रविश्य सा वरारोहा गीतं सुमधुरं जगौ ॥ यदा ध्यानादुपरतः समाधेर्विरताश्चिरात् ॥२६॥ गान्धर्वं प्रारभस्ते तु गन्धर्वाः सुरसम्मताः ॥ तस्मिन्नेव क्षणे लब्ध्वाऽवसरं पंच सायकः ॥ २७ ॥ विचकर्ष धनुः पौष्पं सायकान् समयूयुजत् ॥ संलक्ष्य तं मुनिं शान्तं भाविदैवबलात्कृतम् ॥२८॥ श्रुत्वा तन्मधुरं गीतं पञ्च मालापसुन्दरम् ॥ क्षुब्धचित्तः समभवत्स मुनिः सांशितव्रतः ॥२९॥ चकर्ष च धनुः कामः पुनःपुनरतन्द्रितः ॥ देवव्रतोऽपि स मुनिः क्षुब्धात्मा नियतोऽपि सन् ॥ ३० ॥ विचचाराश्रमपदं पश्यन्तुष्टमानसः ॥ दूराददर्श तन्वङ्गीं क्रीडन्तीं कन्दुकेन ताम् ॥ ३१ ॥ दृष्ट्वैव तां तु चार्वंगीं

विद्धः कामेन पत्रिणा ॥ तस्याः समीपमगमत्स्मयमानो महामुनिः ॥३२॥ सापि दृष्ट्वा देवदत्तं सज्जन्ती हरिणेक्षणा ॥ कटाक्षयन्ती सहसा लज्जमाना विगूहति ॥ ३३ ॥ करेण कन्दुकं भ्रन्ती चञ्चलाक्षी सुपेशला ॥ स्रंसता केशपाशेन गलत्पुष्पेण राजता ॥ ३४ ॥ मनो हरन्ती तस्यर्षेर्ललितैर्विभ्रमोद्भवैः ॥ एतस्मिन्नन्तरे तस्या दक्षिणः पवनोऽहरत्॥३५॥वासः सूक्ष्मंगलन्नीवि कांचीदामगुणान्वितम् ॥ पुष्पबाणोऽप्यविध्यत्तं दृष्ट्वा ऽवसरमन्तिकं ॥३६॥ सम्मोहितः स तु मुनिर्गत्वान्तिकमथाब्रवीत् ॥ का त्वं कस्यासि सुभगे वनेऽस्मिन्किञ्चिकीर्षसि ॥ ३७ ॥ माद्दशान्किं मृगयसे बाहुपाशेन वा मृगान् ॥ ब्रूहा गृहीत्वा वामोरु किं वाऽस्मान्कर्तुमिच्छसि ॥३८॥ सवथाऽस्मांस्तवाधीनान् यद्यद्वा कारयिष्यसि ॥ तत्तत्कुर्मो वयं नित्यं त्वदधीनाः स्म सर्वथा ॥३९॥ अथ तां हसमानां च गृहीत्वा दक्षिणे करे ॥ समालिङ्ग्य विपञ्चंतीं रमयामास मोहितः ॥४०॥ रममाणस्तया सार्द्धं भुञ्जन्भोगान् मनोरमान् ॥ तपःप्रभावोपनतान् दिवारात्रमतंद्रितः ॥४१॥ बहूनहर्गणानेवं रममाणो यदृच्छया ॥ सुतोत्थित इवात्मद्विवेकेन समन्वितः ॥४२॥ निर्वेदं प्राप्तवान्सद्यस्तदोद्वाच भृशातुरः ॥ अहो भागवती माया ययाहं भृशमोहितः ॥ ४३ ॥ जानन्नपि तपोश्रेष्ठं प्राप्तो देवबलात्कृतः ॥ अग्निकुण्डसमा नारी घृतकुम्भसमः पुमान् ॥४४॥ इति प्रवादो मूर्खाणां विचारान्महदन्तरम् ॥ घृतकुम्भोऽग्नियोगेन द्रवते न तु दर्शनात् ॥४५॥ पुमांस्त्रीदर्शनादेव द्रवते यद्विमोहितः ॥ नापराधस्तवतो नार्याः स्वयं यदजितेन्द्रियः ॥४६॥ इत्युक्त्वाऽसौ निवृत्तात्मा विससर्ज्ज सुराङ्गनाम् ॥ प्रग्लोचां देववशगो मनस्यंतदाचिन्तयत् ॥ ४७ ॥ उपसर्गो महानत्र तपसो भ्रंशकारकः ॥ त्यक्त्वाश्रममिमं चान्यत्स्थानं गत्वा समाहितः ॥ ४८ ॥ तपस्तप्त्रिं समाश्रित्य शोषयिष्ये कलेवरम् ॥ इति निश्चित्य मनसा गत्वा भृग्वाश्रमं प्रति ॥४९॥ गण्डकीसंगमे स्नात्वा सन्तर्प्य पितृदेवताः ॥ विष्णुं शिवं च सम्पूज्य तपःस्थानं वीक्षितयन् ॥५०॥ पश्यन्भृग्वाश्रमं रम्यमुत्तरं गतवान् शनैः ॥ गण्डक्याः पूर्वभागे तु विविक्तं विजनं शुभम् ॥ ५१ ॥ दृष्ट्वा तस्मिंशुभे विश्रांतस्तपोभूमिमचिंतयत् ॥ भृगुतुंगं समासाद्य शङ्कराराधने रतः ॥५२॥ अतप्यत तपो घोरं शिवदर्शनलालसः ॥ अथ दीर्घेण कालेन सन्तुष्टः स महेश्वरः ॥ ५३ ॥ लिंगरूपधरः साक्षादुपर्यपि तथा ह्यधः ॥ तिर्यक्तु च जलधाराभिर्युक्तस्तत्तापशांतिकृत् ॥ ५४ ॥ उवाच च प्रसन्नात्मा मुने पश्य च मां शिवम् ॥ मामेवावेहि विष्णुं त्वं मा पश्यस्त्वांतरं

मम ॥ ५५ ॥ पूर्वमन्तरभावेन दृष्टवानसि यन्मम ॥ तेन विघ्नोऽभवद्यत्ने गलितं त्वत्तपो महत् ॥ ५६ ॥ आवामेकेन भावेन पश्यंस्त्वं सिद्धिमाप्स्यसि ॥ तपःप्रभावाल्लिंगानि प्रादुर्भूतानि यत्र वै ॥५७॥ समंगामीति विख्यातमेतत्स्थानं भविष्यति ॥ स्नात्वाऽत्र गण्डकीतीर्थे मम लिंगानि योऽर्चयेत् ॥५८॥ तस्य योगफलं सम्यग्भविष्यति न संशयः ॥ इति दत्त्वा वरं शम्भुस्तत्रैवान्तरधीयत ॥५९॥ देवदत्तोऽपि स मुनिः सम्प्राप्य ज्ञानमुत्तमम् ॥ शिवोपदिष्टमार्गेण सायुज्यं परमं गतः ॥ ६० ॥ प्रस्तोचापि मुनेर्गर्भे सम्प्राप्याश्रममन्तिकात् ॥ प्रसूता कन्यकां त्यक्त्वा स्वर्गमेव जगाम ह ॥ ६१ ॥ पुनर्जातमिवात्मानं मन्यमाना शुचिस्मिता ॥ सापि कन्या मृगैस्तत्र रुरुभिर्वर्द्धिता सती ॥ ६२ ॥ रुरुरित्येव विख्याता पितुरेवाश्रमे स्थिता ॥ युवभिः प्रार्थ्यमानापि चित्ते कञ्चन नाध्यगात् ॥६३॥ ततः सुनिश्चयं कृत्वा तपसे धृतमानसा ॥ चिन्तयन्ती जगन्नाथं भगवन्तं रमापतिम् ॥६४॥ मासे सा प्रथमे बाला फलाहारपरायणा ॥ एकांतरं दिनं प्राप्य द्वितीये त्रिदिनान्तरे ॥ ६५॥ तृतीये पंचमदिने चतुर्थे सप्तमांतरे ॥ पञ्चमे नवरात्रेण षष्ठे पञ्चदशाहके ॥ ६६ ॥ मासेन सप्तमे चैव शीर्णपर्णाशनाष्टमे ॥ त्यक्त्वा तान्यपि सा बाला वाय्वाहारा बभूव ह ॥ ६७ ॥ सैवं वर्षशतं स्थित्वा हरावेकाग्रमानसा ॥ समाधिना समा भूत्वा स्थाणुवन्निश्चलाऽभवत् ॥ ६८ ॥ द्वन्द्वानि नाविदच्चापि आत्मभूतान्तरं विना ॥ परां काष्ठां समापन्ना प्रकाशमयकांतिधृक् ॥ ६९ ॥ ततेजसा वृतं सर्वं तदा दृष्ट्वा वसुन्धरे ॥ अहं विस्मयमापन्नस्तस्याः प्रत्यक्षतां गतः ॥ ७० ॥ सन्निरुद्धेन्द्रियग्रामा नाचक्षत बहिःस्थितम् ॥ तदा रूपीकाण्यावेश्य संस्तभ्य स्वं हृदो बहिः ॥ ७१ ॥ स्थितोऽहं वसुधे देवि अक्ष्णोः प्रत्यक्षतां गतः ॥ रूपीकाणि नियम्याहं यतः प्रत्यक्षतां गतः ॥ ७२ ॥ रूपीकेश इति ख्यातो नाम्ना तत्रैव संस्थितः ॥ सा मां यदैव नापश्यदुन्मील्य नयने ततः ॥ ७३ ॥ बहिः स्थितं च मां दृष्ट्वा प्रणनाम कृताञ्जलिः ॥ गद्गदस्वरसंयुक्ता अश्रुक्लिन्नविलोचना ॥ ७४ ॥ रोमांचिततनुश्चासीत्कदम्बमुकुलाकृतिः ॥ तथा भूतां तु तां दृष्ट्वा प्रावोचमहमङ्गनाम् ॥ ७५ ॥ अयि बाले विशालाक्षि तुष्टोऽहं तपसस्तव ॥ वरं याचय मत्तस्त्वं यत्ते मनसि वर्त्तते ॥ ७६ ॥ अदेयमपि ते दद्मि यदन्येषां सुदुर्लभम् ॥ इति श्रुत्वा प्रभोर्वाक्यं प्रणम्य च पुनः पुनः ॥ ७७ ॥ स्तुत्वा तं देवदेवेशं प्रबद्धकरसंपुटा ॥ ददासि

चेद्वरं मह्यं देवदेव जगत्पते ॥ ७८ ॥ अनेनैव स्वरूपेण भगवन्स्थातुमर्हसि ॥ स्थितोऽस्म्येवेह भद्रं ते अपरं वरयाशु मे ॥ ७९ ॥ दुर्लभं ते वरं दृष्ट्वा तपसाऽहं प्रतोषितः ॥ इत्युक्त्वा मां प्रणम्याह रुरुः सा संशितव्रता ॥ ८० ॥ यदि प्रसन्नो देवेश तदा मां कुरु पावनीम् ॥ मन्नाम्ना क्षेत्रमेतच्च ख्यातं भवतु नान्यथा ॥ ८१ ॥ तामहं देवि सुभगे प्रावोचं पुनरेव हि॥ तीर्थानां परमं तीर्थं तव देहो भवत्ययम् ॥ ८२ ॥ तव नाम्ना च विख्यातमेतत्क्षेत्रं भविष्यति ॥ तव तीर्थं कृतस्नानस्त्रिरात्रोपोषितो नरः॥८३॥ विलोक्य मां भवेत्पूतो मम वाक्यान्न संशयः ॥ ब्रह्महत्यादि पापानि ज्ञात्वाऽज्ञात्वा कृतान्यपि ॥ ८४ ॥ यास्यन्ति विलयं क्षिप्रमेवमेतन्न संशयः ॥ इति दत्त्वा वरांस्तस्यै तत्रैवान्तर्हितः स्थितः ॥ ८५ ॥ सापि कालेन सञ्जाता तीर्थभूता तथाऽभवत् ॥ एतत्ते कथितं देवि रुरुमाहात्म्यमुत्तमम् ॥ ८६ ॥ रुरुक्षेत्रस्य प्रभवमेतद्ब्रह्मं परं मम ॥८७॥ इति श्रीवराहपुराणे भगवच्छास्त्रे रुरुक्षेत्रहृषीकेशयोर्माहात्म्यं नाम षट्चत्वारिंशदधिकशततमोऽध्यायः॥१४६॥अथ गोनिष्क्रमणमाहात्म्यम्॥ धरण्युवाच ॥ अत्याश्चर्यं श्रुतं ह्येतद्रुरुक्षेत्रसमुद्भवम् ॥ हृषीकेशस्य महिमा त्वया य उपवर्णितः ॥ १ ॥ अन्यच्च यत्परं गुह्यं क्षेत्रे परमपावनम् ॥ वक्तुमर्हसि देवेश परं कौतूहलं मम ॥ २ ॥ श्रीवराह उवाच ॥ शृणु भूमे प्रयत्नेन कारणं परमं मम ॥ गुह्यमस्त्यपरं चैव हिमशृङ्गशिलोच्चये ॥ ३ ॥ गोनिष्क्रमणकं नाम गावो यत्र प्रतास्थिताः ॥ यथा निष्क्रमणं प्राप्य सुरभीणां वसुन्धरे ॥४॥ सततिर्यत्र कल्याणि और्वो यत्र प्रजापतिः ॥ तपश्चचार परमं मम मायाबलान्वितः ॥ ५ ॥ तस्यैवं वर्त्तमानस्य याते काले महत्तरे ॥ एवं हि तप्यमानस्य सर्वलोकस्य संशयः ॥ ६ ॥ न वरं प्रार्थयत्येष लाभालाभसमन्वितः ॥ सूचकोऽपि न विद्येत बलिकर्मसु संयतः ॥ ७ ॥ अथ दीर्घस्य कालस्य कश्चिद्ब्रह्म यतिस्तदा ॥ तपस्तप्स्यति सुनौ तस्मिन्शैलोच्चये धरे ॥८॥ ईश्वरोऽपि महाभागे तत्राथै समुपागतः ॥ गोनिष्क्रमेति विख्याते तस्मिंस्तीर्थे महौजसि ॥ ९ ॥ तत्र त्वौर्वो महाभागे तप्यते समदर्शनः ॥ पद्मानां कारणाद्गौवो गंगाद्वारमुपागताः ॥ १० ॥ तन्निर्गतं ततो ज्ञात्वा और्वं सर्वं तपस्विनः ॥ महेश्वरो महातेजाः सम्भ्रमात्समुपागतः ॥ ११ ॥ फलपुष्पसमाकीर्णा लक्ष्मीश्चैवोपजायते ॥ आश्रमं रूपसम्पन्नं फलपुष्पोपशोभितम् ॥ १२ ॥ तच्च वै भस्मसाद्भूतं महारुद्रस्य तेजसा ॥ दृष्ट्वा तं चाश्रमं पुण्यमौर्वस्य सुमहत्प्रियम् ॥ १३ ॥ ईश्वरोऽपि ततः प्रातः

॥१४८॥

शीघ्रमेव हिमालयम् ॥ एतस्मिन्नन्तरे देवि गृह्य पुष्पकरण्डकम् ॥१४॥ आश्रमं समनुप्राप्त और्वोऽपि मुनिपुंगवः ॥ शान्तो दान्तः क्षमाशीलः
सत्यव्रतपरायणः ॥ १५ ॥ दृष्ट्वा स्वमाश्रमं दग्धं बहुपुष्पफलोदकम् ॥ मन्युना परमाविष्टो दुःखेनैवपरिप्लुतः ॥ १६ ॥ उवाच क्रोध
रक्ताक्षो वचनं निर्दहन्निव ॥ येनैष चाश्रमो दग्धो बहुपुष्पफलोदकः ॥ १७ ॥ सोऽपि दुःखेन सन्तप्तः सर्वलोकान्भ्रमिष्यति ॥ एवमौर्वेण दत्ते तु
शापे तस्मिन्महौजसि ॥ १८ ॥ महाभयात्तु लोकानां न कश्चित्पर्यवारयत् ॥ तत्क्षणादेव देवेशि ईशोऽपि जगतो विभुः ॥ १९ ॥ महदाहेन
सन्तप्तः शम्भुर्देवीमुवाच ह ॥ और्वस्य तु तपो दृष्ट्वा भीतैर्देवैरुदाहृतम् ॥ २० ॥ दह्यते स्म जगत्सर्वं स तु किञ्चिन्न चेच्छति ॥ को वा प्रति
विधिस्तत्र यथा सर्वस्य सम्भवेत् ॥ २१ ॥ एवमुक्ते मया कोपादीक्षितस्तस्य चाश्रमः ॥ दग्धोऽभवत्क्षणेनैव वयं तस्माद्विनिर्गताः ॥ २२ ॥
एतद्दुःखेन सन्तप्तो मन्युना च परिप्लुतः ॥ और्वः शशाप रोषेण तेन तप्ता वयं शिवे ॥२३॥ ततोऽभ्रमद्विरूपाक्षः शं न प्राप्नोति कर्हिचित् ॥
अहं च परितोऽस्मि आत्मत्वादीश्वरस्य च ॥ २४ ॥ तेन दाहेन सन्तप्तो न शक्नोमि विचेष्टितुम् ॥ पार्वत्या च ततः प्रोक्तः आवां नारायणं
प्रति ॥ २५ ॥ गच्छावस्तस्य वाक्येन सुखं यत्र भविष्यति ॥ ततो नारायणं गत्वा सह तेन तमौर्वकम् ॥ २६ ॥ विज्ञापयामो रुद्रस्य
शापोऽयं विनिवर्त्तताम् ॥ सन्तप्ताः स्म वयं सर्वे तस्माच्छापं निवर्त्तय ॥ २७ ॥ और्वोऽप्युवाच नोक्तं मे अनृतं तु कदाचन ॥ सुरभीगण
मानीय गत्वैतं स्नापयन्तु वै ॥ २८ ॥ रुद्रशापो निवृत्तः स्यात्तेनैव किल नान्यथा ॥ एतस्मिन्नन्तरे देवि मया गावोऽवतारिताः ॥ २९ ॥
सप्तसप्ततिः कल्याणि सौरभेया महौजसः ॥ तेनाप्लावितदेहाश्च परां निर्वृतिमागताः ॥ ३० ॥ तत्र गोनिष्क्रमं नाम तीर्थं परमपावनम् ॥ तत्र
स्नानं तु कुर्वीत एकरात्रोषितो नरः ॥३१॥ गोलोकं च समासाद्य मोदते नात्र संशयः ॥ अथात्र मुञ्चते प्राणान्कृत्वा कर्म सुदुष्करम् ॥३२॥
शंखचक्रगदायुक्तो मम लोके महीयते ॥ पंच धाराः पतन्त्यत्र मूले मूलवटस्य हि ॥ ३३ ॥ तत्र स्नानं प्रकुर्वीत पंचरात्रोषितो नरः ॥
पंचानामपि यज्ञानां फलमाप्नोति मानवः ॥ ३४ ॥ अथात्र मुञ्चते प्राणान्कृत्वा कर्म सुदुष्करम् ॥ पंचयज्ञफलं भुक्त्वा मम लोकं
प्रपद्यते ॥ ३५ ॥ अस्ति पंचपदं नाम तस्मिन्क्षेत्रे परं मम ॥ मम पूर्वेण पार्श्वेन दृष्टाः पंच महाशिलाः ॥ ३६ ॥ मत्पूर्वां दिशमाश्रित्य

तत्र ब्रह्मपदद्वयम् ॥ मध्ये तु तस्य कुण्डस्य शिला विस्तीर्णसंश्रिता ॥ ३७ ॥ ऊर्द्ध नालपरीणाहं तत्र विष्णुपदं मम ॥ तत्र स्नानं तु कुर्वीत पंचरात्रोपितो नरः ॥ ३८ ॥ यांति शुद्धास्तु लोकास्ते ये च भागवतश्रियाः ॥ अथात्र मुञ्चते प्राणान्युक्तः पञ्चपदे नरः ॥ ३९ ॥ विमुक्तः सर्वसंसारान्मम लोकं च गच्छति ॥ ततो ब्रह्मपदं नाम क्षेत्रं गुह्यं परं मम ॥ ४० ॥ यत्र धारा पतत्येका पश्चिमां दिशमाश्रिता ॥ तत्र स्नानं तु कुर्वीत एकरात्रोषितो नरः ॥ ४१ ॥ ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते ॥ कौमुदस्य तु मासस्य शुक्लपक्षस्य द्वादशी ॥ ४२ ॥ यज्ञानां वाजपेयानां फलं प्राप्नोति मानवः ॥ अथात्र मुंचते प्राणान्मम कर्मसु निष्ठितः ॥ ४३ ॥ वाजपेयफलं भुक्त्वा मम लोकं प्रपद्यते ॥ अस्ति कोटिवटं नाम तस्मिन् क्षेत्रे परं मम ॥ ४४ ॥ पंचक्रोशं ततो गत्वा वायव्यां दिशि संस्थितः ॥ तत्र स्नानं तु कुर्वीत षष्टकालोपितो नरः ॥ ४५ ॥ बहुयज्ञस्य कोटीनां फलं प्राप्नोति निष्कलम् ॥ अथात्र मुंचते प्राणान्धूमे कोटिवटे शुभे ॥४६॥ यज्ञकोटिफलं भुक्त्वा मम कोटिं प्रपद्यते ॥ अस्ति विष्णुतरो नाम तस्मिन् क्षेत्रे परं मम ॥ ४७ ॥ पूर्वोत्तरेण पार्श्वेन पंचक्रोशं न संशयः ॥ मत्सरः पद्मपत्राक्षि आगार्धं परिसंस्थितम् ॥ ४८ ॥ पंचक्रोशश्च विस्तारः पर्वतः परिमण्डलः ॥ तत्र भ्रमति यो भद्रे कुर्याच्चैव प्रदक्षिणम् ॥ ४९ ॥ उपवासं त्रिरात्रं तु कृत्वा कर्म सुदुष्करम् ॥ यावन्ति भ्रममाणस्य पदानि ननु सुन्दरि ॥ ५० ॥ तावद्वर्षसहस्राणि ब्रह्मलोके महीयते ॥ अथाऽत्र मुंचते प्राणान्स्वकर्मपरिनिष्ठितः ॥ ५१ ॥ ब्रह्मलोकं समुत्सृज्य मम लोके महीयते ॥ तस्मिन् क्षेत्रे महाभागे आश्चर्यं शृणु सुन्दरि ॥ ५२ ॥ गवां वै श्रूयते शब्दो मम कर्मसुखावहः ॥ अथात्र ज्येष्ठमासस्य शुक्लपक्षस्य द्वादशी ॥ ५३ ॥ श्रूयते सुमहाञ्छब्दः स्वयमेतन्न संशयः ॥ एवं गोस्थलके पुण्ये महाभागवतः शुचिः ॥५४॥ करोति शुभकर्माणि शीघ्रं मुच्येत किल्बिषात् ॥ एवं तेन महाभागे ईश्वरेण यशस्विनि ॥५५॥ शापदाहो विनिर्मुक्तः सर्वैः सह मरुद्गणैः॥एतद्गोस्थलकं नाम सर्वशान्तिकरं परम् ॥५६॥ कथितं देवि कात्स्न्येन तवानुग्रहकाम्यया॥एषोऽध्यायो महाभागे सर्वमङ्गलकारकः ॥ ५७ ॥ मम मार्गानुसाराणां मम च प्रीतिवर्द्धनः ॥ श्रेष्ठानां परमं श्रेष्ठं मङ्गलानां च मङ्गलम् ॥ ५८ ॥ लाभानां परमो लाभो धर्माणां धर्म उत्तमः ॥ लभन्ते पठमाना वै मम मार्गानुसारिणः ॥ ५९॥ तेजः श्रियं च लक्ष्मीं च सर्वकामान्यशस्विनि ॥ यावन्ति

चाक्षराणि स्युरत्राध्याये मनस्विनि ॥ ६० ॥ तावद्वर्षसहस्राणि मम लोके महीयते ॥ पतनं च न विद्येत पठमानो दिने दिने ॥ ६१ ॥ तारितानि कुलान्येभिः सप्त सप्त च सप्त च ॥ पिशुनाय न दातव्यं न मूर्खाय शठाय च ॥ ६२ ॥ देयं पुत्राय शिष्याय यश्च जानाति सेवितुम् ॥ एतन्म रणकाले तु न कदाचिच्च विस्मरेत् ॥ ६३ ॥ श्लोकं वा यदि वा पादं यदीच्छेत्परमां गतिम् ॥ तत्क्षेत्रं तु महाभागे पंचयोजनमण्डलम् ॥६४ ॥ तिष्ठामि परया प्रीत्या दिशं पूर्वामुपाश्रितः ॥ पश्चिमेन वहेद्गङ्गां निष्कामेन वसुन्धरे ॥ ६५ ॥ एवं रहस्यं गुह्यं च सर्वकर्मसुखावहम् ॥ एतत्ते परमं भद्रे गुह्यं धर्मसमन्वितम् ॥ ६६ ॥ मम क्षेत्रं महाभागे यत्त्वया परिपृच्छितम् ॥ ६७ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे गोनिष्कमण माहात्म्यं नाम सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥ अथ स्तुतस्वामिमाहात्म्यम् ॥ सूत उवाच ॥ गोनिष्कमणमाहात्म्यं श्रुत्वा गुह्यमनुत्तमम् ॥ विस्मयं परमं गत्वा सर्वरत्नविभूषिता ॥१॥ धरण्युवाच ॥ अहो गवां हि माहात्म्यं तव चैवं श्रुतं मया ॥ यच्छ्रुत्वाऽहं जगन्नाथ जातास्मि परिनिर्वृता ॥ २ ॥ एवमेव परं गुह्यं ब्रूहि नारायण प्रभो ॥ अस्मात्क्षेत्रात्परं देव यदि क्षेत्रं विशिष्यते ॥ ३ ॥ श्रीवराह उवाच ॥ अहं नारायणो देवः सर्वधर्मव्यपाश्रयः ॥ मात्सर्यं चैव मे नास्ति तेनाहं परमः प्रभुः ॥४॥ एतच्छास्त्रं महाभागे प्रयुक्तं लीलया मया ॥ वराहरूप मादाय सर्वभागवतप्रियम् ॥ ५ ॥ धरण्युवाच ॥ यथा यथा भाषसि धर्मकारणमिदं वचो धर्मविनिश्चयं महत् ॥ तथा तथा देव वराऽप्रमेयं हृद्यं मनो भावयसे जनार्दन ॥ ६ ॥ ततो महीवचः श्रुत्वा धर्मश्रेष्ठो महामनाः ॥ वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥ ७ ॥ श्रीवराह उवाच ॥ साधु भूमे महाभागे मम कर्मव्यवस्थिते ॥ कथयिष्याम्यहं ह्येवं गुह्यं लोकसुखावहम् ॥ ८ ॥ स्तुतस्वामीति विख्यातं गुह्यं क्षेत्रं परं मम ॥ द्वापरं युगमासाद्य तत्र स्थास्यामि सुन्दरि ॥९॥ पुत्रोऽहं वसुदेवस्य देवक्या गर्भसम्भवः॥वासुदेव इति ख्यातः सर्वज्ञानबलूदनः ॥१०॥ पञ्च तस्य सुशिष्याश्च भविष्यन्ति विचक्षणाः ॥ ऋषयो धर्मसंयुक्ता मत्प्रसादाद्बलाश्रिताः ॥ ११ ॥ ते मां संस्थापयिष्यन्ति धर्ममूर्त्तिं महीं गतम् ॥ शाण्डिल्यो जाजलिश्चैव कपिलश्चोपसायकः ॥ १२ ॥ भृगुश्चैव महाभागे मम मार्गानुसारिणः ॥ ते च प्रसन्नमनस आत्म दृष्टान्तदर्शिनः ॥ १३ ॥ स्वयं ज्ञानप्रभावेण भासयिष्यन्ति मां सदा ॥ सङ्कर्षणो वासुदेवो प्रद्युम्नो ह्यनिरुद्धकः ॥ १४ ॥ गच्छता बहुकालेन

मम कर्मपरायणः ॥ ततो दीर्घेण कालेन इज्यापूर्वस्थितेन च ॥ १५ ॥ वरं तेषां प्रदास्यामि यो यस्य हृदि संस्थितः ॥ ते प्रवक्ष्यन्ति मां देवि आत्मशास्त्रव्यवस्थिताः ॥ १६ ॥ आत्मशास्त्रं प्रतिष्ठेत यत्र धर्मः सुनिष्ठितः ॥ भवत्वेताश्चिश्चयेन न तु मिथ्या कदाचन ॥ १७ ॥ तव देव प्रसादेन इह लोकः प्रवर्त्तताम् ॥ तांस्त्वेवं वदिष्यामि शिष्याय भवतां प्रियम् ॥ १८ ॥ भविष्यति न सन्देहो यतो यूयं मम प्रियाः ॥ सुशिष्या वाडमित्येवं भविष्यन्ति न संशयः ॥ १९ ॥ तदेते प्रवदिष्यन्ति सर्वभागवतप्रियम् ॥ यथा च मथ्यमानाद्वै दध्नश्चोद्भियते घृतम् ॥ २० ॥ एवं सर्वेषु शास्त्रेषु वाराहं घृतसम्मितम् ॥ वाराहं ज्ञानमुत्सृज्य महाभागं महौजसम् ॥ २१ ॥ एवं सर्वं मया चैव ह्यात्मना परिभाषितम् ॥ ते प्रणामं करिष्यन्ति सिद्धिं प्राप्स्यन्ति वै पराम् ॥ २२ ॥ महाज्ञानमिदं सूक्ष्मं भूमे भक्तेषु दृश्यते ॥ शास्त्राणां परमं शास्त्रं सर्वसंसारमोक्षगम् ॥ २३ ॥ किञ्चिदन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ शास्त्रमेतन्महाभागे स्थूलकर्म महौजसम् ॥ २४ ॥ केचित्तरन्ति ज्ञानेन केचित्कर्मणि निष्ठिताः ॥ केचिद्यथेष्टं सुश्रोणि केचिद्दानेन कर्मणा ॥ २५ ॥ केचिद्योगबलं भुक्ता पश्यन्ति मम संस्थितम् ॥ विधिपूर्वं तु मे किञ्चिन्नराः पश्यन्ति निष्ठिताः ॥ २६ ॥ सर्वधर्मकराः केचित्सर्वाशाः सर्वविक्रियाः ॥ ते मां पश्यन्ति वै भूमे एकचित्त व्यवस्थिताः ॥ २७ ॥ एवमेतन्महाशास्त्रं देवि संसारमोक्षणम् ॥ मम भक्तव्यवस्थायै प्रयुक्तं परमं प्रियम् ॥ २८ ॥ ते तथा च प्रवक्ष्यन्ति यच्च यस्याभिरोचते ॥ अन्यथान्यस्य दृष्टानामृषिभिर्यत्प्रयोजितम् ॥ २९ ॥ तद्युगस्य प्रभावेण भूमे कुर्वन्ति मानवाः ॥ तैः स्वशिष्यैः समं देवि ये शास्त्रविनियोजिताः ॥३०॥ मत्प्रसादेन ते सर्वे सिद्धिं यास्यन्ति मत्पराम् ॥ मम शिष्येषु येषां च मात्सर्योपहतात्मनाम् ॥३१॥ मच्छास्त्रे च भवेद्दोषस्तेषामत्र पुनर्भवः ॥ मात्सर्यं ये च कुर्वन्ति मद्धर्मपरमे जने ॥३२॥ तेषां नाथ परो लोको मात्सर्योपहतात्मनाम् ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ ३३ ॥ मम मार्गानुसारेण परं गुह्यं मम प्रिये ॥ शास्त्रवन्तो विनीताश्च बहुदोषविवर्जिताः ॥ ३४ ॥ ते तु मात्सर्यदोषेण नष्टाचाराः पतन्त्यधः ॥ मात्सर्यं सर्वनाशाय मात्सर्यं धर्मनाशकम् ॥ ३५ ॥ यस्तु मात्सर्यसंयुक्तो न स पश्यति मां क्वचित् ॥ बहुकर्मसमायुक्ता दानाध्ययननिष्ठिताः ॥३६॥ तपसा ज्ञानयुक्ता वा नित्यं कर्मसु चोद्यताः ॥ अनेन हि स्वभावेन मात्सर्यं चैव कुर्वते ॥३७॥

न ते पश्यन्ति मां भूमे मायया परिदूषिताः ॥ न कर्त्तव्यं ततः सर्वैर्मात्सर्यं धर्मघातकम् ॥ मम शास्त्रपरेणेह यदीच्छेत्परमां गतिम् ॥ ३८ ॥
एतद्गुह्यं महाभागे न जानन्ति मनीषिणः ॥ मात्सर्यस्य तु दोषेण बह्वो निधनं गताः ॥ ३९ ॥ एतच्छास्त्रं महाभागे प्रयुक्तं विधिना मया ॥
वराहरूपमादाय सर्वभागवतप्रियम् ॥४०॥ तत्राश्चर्यं महाभागे शृणु भूतागिरौ मम ॥ आयसी प्रतिमा तत्र ह्यभेद्या चैव दृश्यते ॥४१॥ ब्रुवन्ति
केचित्कांस्येति आयसत्वियपरेऽब्रुवन् ॥ पाषाणीत्यपरे केचिदन्ये वज्रमयीति च ॥ ४२ ॥ ऊर्द्धं वा यदि वाऽधो वा ये कुर्वन्ति ममार्चनम् ॥
तथापि मां संस्पृशन्ति शिरोमध्ये तु सुन्दरि ॥ ४३ ॥ ये तु पश्यन्ति मां भूमे मणिपूरगिरौ स्थितम् ॥ स्तुवन्त्याचार्यवन्तश्च मत्प्रसादात्सु
संयताः ॥४४॥ आचार्याणां गुणान्भुक्त्वा मम कर्मपथे स्थिताः ॥ सर्वकिल्बिषमुक्ताश्च यान्ति ते परमां गतिम् ॥ ४५ ॥ तास्मिन्क्षेत्रे महाभागे
अस्ति गुह्यं परं मम ॥ पंचारुमेति विख्यातमुत्तरां दिशमाश्रितम् ॥४६॥ तत्र स्नानं प्रकुर्वीत पंचकालोपितो नरः ॥ मोदते नन्दने दिव्ये ह्यप्स
रोभिः समाकुले ॥ ४७ ॥ अथात्र मुंचते प्राणान्कृतकृत्यो भवेन्नरः ॥ नन्दनं वनमुत्सृत्य मम लोकं च गच्छति ॥४८॥ भृगुकुण्डेति विख्यात
मत्र गुह्यं परं मम ॥ मम दक्षिणपार्श्वे तु अदूरादर्धयोजनात् ॥ ४९ ॥ तत्र स्नानं तु कुर्वीत मम मार्गानुसारकः ॥ भूयष्टे न तु जायेत कालेन
त्रिजितेन्द्रियः ॥ ५० ॥ ध्रुवो यत्र तु तिष्ठेत मेरुशृंगे शिलोच्चये ॥ तत्र मोदति सुश्रोणि अप्सरोभिर्यथासुखम् ॥५१॥ अथात्र मुंचते प्राणान्
मम कर्मपथे स्थितः ॥ ध्रुवलोकं परित्यज्य मम लोकं महीयते ॥ ५२ ॥ मणिकुण्डेति विख्यातं तत्र गुह्यं परं मम ॥ मणयो यत्र दृश्यन्ते
अनेकालयसंस्थिताः ॥ ५३ ॥ अगाधं तं ह्रदं भद्रे देवानामपि दुर्लभम् ॥ विस्मयं किं पुनस्तत्र मलयश्चंचलः स्थितः ॥ ५४ ॥ तत्र स्नानं
प्रकुर्वीत पंचकालोपितो नरः ॥ रत्नभागी भवेद्धीरो राजलक्षणसंयुतः ॥ ५५ ॥ अथात्र मुंचते प्राणान्मम कर्मपथे स्थितः ॥ छित्त्वा वै सर्व
संसारं मम लोकं प्रपद्यते ॥ ५६ ॥ सुगुह्यं पूर्वपार्श्वेन मम क्षेत्रस्य सुन्दरि ॥ अदूरतस्त्रिकोशेन परिमाणं विधीयते ॥५७॥ तत्र स्नानं तु कुर्वीत
मम लोकं स गच्छति ॥ धूतपापेति विख्यातं तत्र गुह्यं परं मम ॥ ५८ ॥ पंचक्रोशादूरार्द्धे मम क्षेत्रस्य पश्चिमे ॥ तत्र कुण्डं महाभागे मम
तद्रोचते जलम् ॥ ५९ ॥ सुवर्णाभं मारकतमगाधं निर्मितं मया ॥ तत्र स्नानं प्रकुर्वीत पंचभक्तोपितो नरः ॥६०॥ धुन्वानो दुष्करं कर्म पंच

भूतात्मनिष्ठितम् ॥ कृतोदकस्तत्र भद्रे धूतपापो यशस्विनि ॥६१॥ गत्वेन्द्रलोकं सुश्रोणि देवैः सह स मोदते ॥ अथात्र मुंचते प्राणान्मम कर्म परायणः ॥ ६२ ॥ इन्द्रलोकं परित्यज्य मम लोकं प्रपद्यते ॥ तत्राश्चर्यं महाभागे धूतपापे शृणुष्व मे ॥ ६३ ॥ वर्त्तते च विशालाक्षि मणिपूरे गिरौ मम ॥ तावन्न पतते धारा यावत्पापं न धूयते ॥ ६४ ॥ धूते पापे च सुश्रोणि धारा च पतति क्षितौ ॥ एवं तत्र विशालाक्षि वृक्षमश्वत्थ मिश्रितम् ॥ ६५ ॥ धूतपापं न प्रविशेत्प्रविशत्यमले नरे ॥ तस्मिन्क्षेत्रे वरारोहे समन्तात्पंचयोजने ॥ ६६॥ यत्र तिष्ठाम्यहं देवि पश्चिमां दिशमाश्रितः ॥ तत्र चामलकं भद्रे अदूरादर्द्धयोजनात् ॥ ६७ ॥ मम चैव प्रभावेण सर्वकालफलोदयम् ॥ तत्र कश्चिन्न जानाति पापकर्मा नराधमः ॥ ६८॥ भक्तं भागवतं शुद्धं मम कर्मव्यवस्थितम् ॥ उपोष्य च त्रिरात्राणि श्रद्दधानो जितेन्द्रियः ॥६९॥ तत्र गत्वा वरारोहे उदिते च दिवाकरे ॥ अथ मध्याह्नवेलायां यदि वाऽस्तगतेऽपि वा ॥ ७० ॥ एकाचित्तेन गन्तव्यं धृतिं कृत्वा सुपुष्कलाम् ॥ यत्तत्र लभते भद्रे फलमामलकं शुभम् ॥ ७१ ॥ पंचरात्रेण लभते तस्मिन्भूतगिरौ मम ॥ ततो हरिश्चंद्रः श्रुत्वा सा मही संशितव्रता ॥ ७२ ॥ पुनर्नारायणं तत्र प्रोवाच विनयान्विता ॥ स्तुतस्त्वामी श्रुतोऽसि त्वं तत्र स्थानानि यानि च ॥ ७३ ॥ एतन्नामानिरुक्तिं त्वं वक्तुमर्हसि साम्प्रतम् ॥ ७४ ॥ श्रीवराह उवाच ॥ भूमे हित्वा तु संसारान्ये चान्ये देवकण्टकाः ॥ द्वापरे युगमासाद्य यत्र स्थास्यामि सुन्दरि ॥ ७५ ॥ ततोऽमरैश्च ब्रह्माद्यैर्बहुभिर्मन्त्रवादिभिः ॥ स्तुत कर्तुं समारब्धं माणिपूराश्रितस्य मे ॥७६ ॥ ततो मां नारदो देवि आसितो देवलस्तथा ॥ पर्वतश्च महाभागे मम भक्त्या व्यवस्थितः ॥ ७७ ॥ नाम कुर्वन्ति मे तत्र माणिपूरागिरौ ततः ॥ स्तुतस्त्वामीति विख्यातं मम कर्मव्यपाश्रितम् ॥ ७८ ॥ एतत्ते कथितं भद्रे निरुक्तिकरणं मया ॥ त्वया पृष्टं हि यद्भद्रे सर्वभागवतप्रियम् ॥ ७९ ॥ एतत्स्तुतगिरेर्देवि माहात्म्यं कथितं मया ॥ द्वापरं युग मासाद्य यत्र स्थास्यामि सुन्दरि ॥८०॥ एतानि भूमे गुह्यानि तत्र भूतगिरौ मम ॥ श्रद्धानेन मर्त्येन श्रोतव्यं नात्र संशयः ॥८१॥ एतत्ते कथितं भद्रे सर्वधर्मव्यपाश्रयम् ॥ श्रीस्तुतस्वामिमाहात्म्यं किमन्यत्पारिपृच्छसि॥८२॥ इति श्रीवराहपुराणे भगवच्छास्त्रे स्तुतस्वामिमाहात्म्यं नामाष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ अथ द्वारकामाहात्म्यम् ॥ सूत उवाच ॥ श्रीस्तुतस्वामिमाहात्म्यं श्रुत्वा धर्मपरायणा ॥

॥१९३॥

परितुष्टमना देवी वाक्यमेतदुवाच ह॥ १॥धरण्युवाच॥एतच्छ्रुत्वा तु माहात्म्यं देव देववर प्रभो ॥ मम चित्तस्य परमा जाता शान्तिरनुत्तमा ॥२॥ नाराचधारावरणासिधारी सुररिपुवधकारी धरणीधरः ॥धृतशङ्खगदाब्जचक्रपाणिः स्वयमिह शाश्वसुदावहत्प्रधानम्॥३॥एवं हि गुणमाहात्म्यं स्तुत स्वामिनि मच्छुतम् ॥ अस्माच्चेदं परं श्रेष्ठं तन्मे वद कृपानिध ॥४ ॥ श्रावराह उवाच ॥ एव भूमे वरं श्रेष्ठे फुल्लपंकजमालिनि ॥ कथयिष्यामि चान्यत्ते गुह्यं पापभयापहम् ॥५ ॥ द्वापरं युगमासाद्य यादवानां कुलोद्वहः ॥ शौरीति तत्र विख्यातो भविष्यति पिता मम ॥ ६ ॥ द्वारकेति च विख्याता पुरी तत्र स्थिताऽभवत् ॥ या च देवपुरी रम्या विश्वकर्माविनिर्मिता ॥ ७ ॥ पंचयोजनविस्तारा दशयोजनमायता ॥ वसाम्यत्र वरारोहे शतपञ्चसमास्तथा ॥ ८ ॥ भारावतरणं कृत्वा देवानां सुमहत्प्रियम् ॥ पुनरप्यागमिष्यामि स्वर्लोकं प्रति सुन्दरि ॥ ९ ॥ भविष्यति वरारोहे ईश्वरः सदृशो मम॥ दुर्वासा इति विख्यातः शापिष्यति कुलं मम ॥ १० ॥ तस्य शापाभिसन्तापाद्वारकावासिनो धरे ॥ वृष्ण्यन्धकाश्च भोजाश्च गमिष्यन्ति यमक्षयम् ॥ ११॥ चन्द्रपाण्डुरसंकाशो वनमाली हलायुधः ॥ हलेनाकृष्य नगरं समुद्रं गमयिष्यति ॥ १२॥ नारायणवचः श्रुत्वा धर्मकामा वसुन्धरा ॥ उभौ तौ चरणौ गृह्य पुनः पप्रच्छ माधवी ॥१३॥ धरण्युवाच ॥ लोकनाथोऽसि सर्वेषां देव मायाकरण्डक ॥ शपिष्यति कथं तत्र दुर्वासास्तद्वदस्व मे ॥ १४ ॥ श्रीवराह उवाच ॥ तत्र जाम्बवती नाम मम पत्नी भविष्यति ॥ रूपयौवनसम्पन्ना मम भोगसमन्विता ॥ १५॥ तस्याः पुत्रो महाभागो रूपयौवनदर्पितः ॥ सांब इत्यभिविख्यातो ममैव सततं प्रियः ॥ १६ ॥ तेनैव क्रीडमानेन कृत्वा गर्भं मतथ्यतः ॥ स पृष्टः परमश्रेष्ठ ऋषिरेषा प्रशोष्यति ॥ १७॥ पुत्रकामा त्वियं बाला मुने तत्प्रब्रवीहि मे ॥ साम्बोऽयमिति च ज्ञात्वा स मुनिः कोपमूर्च्छितः ॥ १८ ॥ उवाच तर्हि ते गर्भान्मुसलं कुलनाशनम् ॥ येन वृष्ण्यन्धकाः सर्वे गमिष्यन्ति यमक्षयम् ॥ १९ ॥ श्रुत्वा दुर्वाससः शापं ते च सर्वे कुमारकाः ॥ शापेन सन्तप्तधियो मामूचुर्भयसंयुताः ॥२०॥ ततस्तानागतान्दृष्ट्वा कुमारान् पृष्टवानहम् ॥ ते च मामब्रवन्सर्वं यथावृत्तं समुत्सुकाः ॥ २१ ॥ तच्च तेषां वचः श्रुत्वा प्रोक्तवानस्मि तच्छृणु ॥ भविष्यति न सन्देहो दुर्वासा यदुवाच ह ॥२२॥ एवं ते कथितं भूमे वृष्ण्यादेः शापकारणम् ॥ तत्र स्थानानि मे भूमे कथ्यमानानि मे शृणु ॥ २३ ॥ द्वारकायां महाभागे वैष्णवानां सुखावहे ॥ अस्ति

पंचसरो नाम गुह्यं क्षेत्रं परं मम ॥ २४ ॥ समुद्रतीरमुत्सृज्य मम कर्मसुखावहम् ॥ तत्र स्नानं तु कुर्वीत षष्ठकालोपितो नरः ॥ २५ ॥ मोदते नाकपृष्ठे तु अप्सरोगणसंकुले ॥ अथात्र मुंचते प्राणान्क्षेत्रे पंचसरे मम ॥२६॥ देवलोकं समुत्सृज्य मम लोकं महीयते ॥ पुश्चो वै तत्र सुश्रोणि शतशाखो महाद्रुमः ॥ २७ ॥ सुकलैः शोभनैः कुम्भाकृतिभिर्बृहद्भिः फलैः ॥ बहवस्तत्र गच्छन्ति लाभलौल्येन मानवाः॥२८॥फलं न लभते कश्चिन्मुक्त्वा भागवतं नरम् ॥ लभन्ते ये फलं तत्र मुक्ताः पापेन कर्मणा ॥ २९ ॥ ते लभन्ते परां सिद्धिं मम कर्मणि संस्थिताः ॥ प्रभास मिति विख्यातं तस्मिंस्तीर्थे परे मम ॥ ३० ॥ मनुजा यं न पश्यन्ति रागलोभसमन्विताः ॥ तत्र स्नानं प्रकुर्वीत पंचभक्तोपितो नरः ॥ ३१ ॥ मोदते सप्तद्वीपेषु गुह्यानि च स गच्छति ॥ अथ चेन्मुंचते प्राणान्प्रभासे गतकिल्बिषः ॥३२ ॥ सर्वसंगं परित्यज्य मम लोकं स गच्छति ॥ तत्रा श्चर्यं महाभागे कथ्यमानं मया शृणु ॥३३॥ प्रभासे यत्र शृण्वन्ति सागरे न म (ग) रं प्रति ॥ मकरास्तत्र दृश्यंते भ्रममाणा इतस्ततः ॥३४॥ न किंचिदपराध्यन्ति स्नायमाना जले ततः ॥ अथात्र प्रक्षिपंत्यिण्डान्प्रसन्ने साल्लिे नरः ॥ ३५ ॥ असम्प्राते च गृह्णन्ति एवमेतन्न संशयः ॥ पाप कर्मरतस्यापि न गृह्णन्ति जलं प्रति ॥३६॥ धर्मात्मनां च गृह्णन्ति पिण्डमेव न संशयः ॥ पञ्चपिण्डमिति ख्यातं तस्मिन्गुह्यं परं मम ॥३७॥ अगाधस्याप्यपारस्य क्रोशविस्तार एव च ॥ तत्राभिषेकं कुर्वीत पञ्चकालोपितो नरः ॥ ३८ ॥ मोदते शक्रलोके स एवमेतन्न संशयः ॥ अथात्र सुश्रते प्राणान्पञ्चकुण्डे यशस्विनि ॥३९॥ शक्रलोकं परित्यज्य मम लोकं स गच्छति ॥ तत्राश्चर्यं महाभागे कथ्यमानं मया शृणु ॥४०॥ न पश्येत्पापकर्मा वै शुभकर्मैव पश्यति ॥ चतुर्विंशतिद्वादृश्यां मध्याह्ने च दिवाकरे ॥४१ ॥ रौप्यं सुवर्णकं पद्मं दृश्यते नात्र संशयः ॥ क्षेत्रं संग मनं नाम तस्मिंस्तीर्थं परं मम ॥४२॥ चतुर्धाराः पतन्त्यत्र मणिपूरगिरिं श्रिताः ॥ तत्राभिषेकं कुर्वीत चतुर्भक्तोपितो नरः ॥४३॥ वैखानसेषु लोकेषु मोदते नाऽत्र संशयः ॥ अथात्र मुंचते प्राणान्मम भक्तिपरायणः ॥ ४४ ॥ त्यक्त्वा वैखानसाँल्लोकान्मम लोकं स गच्छति ॥ तत्रापि पर माश्चर्यं कथ्यमानं शृणुष्व मे ॥ ४५॥ दृश्यन्ते यानि कुण्डेषु मणिपूरगिरौ तथा ॥ प्रक्षीयमाणे पापे तु नयते तज्जलं शुचि ॥४६॥ स्नायमानेषु पापेषु न पतेत्तद्व्यथा पुरा ॥ हंसकुण्डेति विख्यातं तस्मिन्क्षेत्रे परे मम ॥४७॥ धारा चैका पतत्यत्र मणिपूरगिरौ श्रिता ॥ तत्राभिषेकं कुर्वीत

पष्ठकालोपितो नरः ॥ ४८ ॥ मुक्तसंगो महाभागे मोदते वरुणालये ॥ अथाऽत्र मुंचते प्राणान् हंसकुण्डे वरानने ॥४९॥ वारुणं लोकमुत्सृज्य मम लोके महीयते ॥ तत्राश्चर्यं प्रवक्ष्यामि हंसकुण्डे यशस्विनि ॥ ५० ॥ शुद्धाः पश्यन्ति मनुजाः पापकर्मा न पश्यति ॥ चतुर्विंशतिद्वादश्यां मध्याह्ने च दिवाकरे ॥५१॥ हंसाश्चैवात्र दृश्यन्ते चन्द्रकुन्दसमप्रभाः ॥ हंसान् पश्यति यस्तत्र भ्रममाणानितस्ततः ॥५२॥ लभन्ते ते परां सिद्धिं धरे नास्त्यत्र संशयः ॥ कदम्बमिति विख्यातं तस्मिन्क्षेत्रे परं मम ॥५३॥ वृष्णयो यत्र वै शुद्धाः संप्राप्ताश्च ममालयम् ॥ तत्राभिषेकं कुर्वीत चतुःकालोपितो नरः ॥ ५४ ॥ मोदते ऋषिलोकेषु पुण्यात्मा वै न संशयः ॥ अथात्र मुञ्चते प्राणान्कृत्वा कर्म सुदुष्करम् ॥ ५५ ॥ ऋषिलोकं परित्यज्य मम लोकं प्रपद्यते ॥ तत्राश्चर्यं महाभागे कथ्यमानं शृणुष्व मे ॥ ५६ ॥ कदम्बात्पतते धारा तत्र पूर्वं विनिःसृता ॥ स कदम्बो महाभागे माघमासस्य द्वादशी ॥ ५७ ॥ पुष्पाणि वै प्रकटयत्युदयस्थे दिवाकरे ॥ ये वा लभन्ते तत्पुष्पं मम मार्गानुसारिणः ॥ ५८ ॥ ते लभन्ते परां सिद्धिमेवमेतन्न संशयः ॥ चक्रतीर्थमिति ख्यातं तस्मिन्क्षेत्रे परं मम ॥ ५९ ॥ पंच धाराः पतन्त्यत्र माणिपूरसमाश्रिताः ॥ तत्राभिषेकं कुर्वित पंचकालोपितो नरः ॥ ६० ॥ दशवर्षसहस्राणि स्वर्गलोके स मोदते ॥ अथात्र मुंचते प्राणाँल्लोभमोहविवर्जितः ॥ ६१ ॥ सर्वान् स्वर्गोत्सुमुत्सृज्य मम लोकं स गच्छति॥तत्राश्चर्यं प्रवक्ष्यामि कथ्यमानं शृणुष्व मे ॥ ६२ ॥ अन्यथैतन्न पश्यन्ति मम कर्मपरायणाः ॥ चतुर्विंशातिद्वादश्यामर्द्धरात्रे यशस्विनि ॥ ६३ ॥ श्रूयते तत्र निर्घोषो मनःकर्णसुखावहः ॥ सुगन्धो वहते वायुर्बहुमाल्यसमान्वितः ॥ ६४ ॥ दुर्लभः पापिनां चैव सुलभः पुण्यकर्मिणाम्॥तस्य चोत्तरपार्श्वेन अशोकश्च महाद्रुमः ॥ ६५॥ पुष्प्यते सोऽथ तत्रापि सूर्ये चाभ्युदिते सति ॥ ये तत्र लभते पुष्पं मम मार्गानुसारिणः ॥६६॥ते लभन्ते परां सिद्धिं एवं भूमे न संशयः ॥ अस्ति रैवतकं नाम तस्मिन् क्षेत्रे परं मम ॥६७॥ सर्वलोकेषु विख्यातं यत्र क्रीडितं मया ॥ बहुगुल्मलताकीर्णं बहुपुष्पैश्च शोभितम् ॥६८॥ बहुवर्णशिलापङ्क्तिर्गुहाश्चापि दिशो दश ॥ वाप्यश्च कन्दराश्चैव देवानामपि दुर्लभाः ॥ ६९ ॥ तत्राभिषेकं कुर्वीत षष्ठकालोपितो नरः ॥ गच्छेत्तु सोमलोकं तु कृतकृत्यो न संशयः ॥७०॥ अथात्र मुंचते प्राणान्मम कर्मसु निष्ठितः ॥ सोमलोकं समुत्सृज्य मम लोकं प्रपद्यते ॥ ७१ ॥ तत्राश्चर्यं महाभागे कथ्यमानं मया शृणु ॥ पश्यन्ति

मनुजाः सर्वे धर्मकामा न संशयः ॥ ७२ ॥ पतन्ति सर्ववृक्षाणां पत्राणि सुबहून्यपि ॥ एकं चापि न दृश्यत प्रसन्नं याति तज्जलम् ॥७३ ॥
स च पूर्वेण पार्श्वेन शोभते वै महाद्रुमः ॥ अपरो मम पार्श्वेन देवानामपि दुर्लभः ॥ ७४ ॥ पंचक्रोशसुविस्तारः शोभते वै महाद्रुमः ॥
पद्मैश्चैवोत्पलैश्छन्नं सुगन्धिकुसुमैः सह ॥७५॥ बहुमत्स्यजलाकीर्णं सर्वतस्तु फलान्वितम्॥ शिलातलागुहाच्छन्नं सुगन्धिकुसुमैः सहा॥ ७६ ॥
तत्राभिषेकं कुर्वीत अष्टभक्तोपितो नरः ।' मोदते नन्दने दिव्ये अप्सरोभिः समन्विते ॥ ७७ ॥ अत्राश्चर्यं महाभागं कथ्यमानं मया शृणु ॥
पश्यन्ति मनुजाः सर्वे धर्मकामा न संशयः ॥ ७८॥ मध्याह्ने च पुनः पूर्णश्चार्द्धरात्रे समो वहेत्॥वर्द्धते क्षीयते चैव यथैव च महोदधिः ॥७९ ॥
तस्य पश्चिमपार्श्वे तु बिल्वश्चैव महाद्रुमः ॥ चतुर्विंशतिद्वादश्यां स पुष्यति च निष्फलम् ॥ ८० ॥ पश्येत्तु शुभकर्मा च पापकर्मा न
पश्यति ॥ दृश्यते च महाभागे अस्तमेते दिवाकरे ॥ ८१ ॥ यस्तत्र लभते पुष्पं मम मार्गानुसारकः ॥ स लभेत परां सिद्धिमेवं भूमे न
संशयः ॥ ८२ ॥ विष्णुसंक्रमणं नाम तास्मिन्क्षेत्रे परे मम ॥ विद्धोऽस्मि यत्र व्याधेन स्वमात्त चास्थितः पुनः ॥ ८३ ॥ तत्र
कुंडं महाभागे मणिपूरगिरौ श्रुतम् ॥ धारा चैका पतत्यत्र लाभालाभविवर्जितः ॥ ८४ ॥ सूर्यलोकं समुत्सृज्य मम लोके
महीयते ॥ तत्राश्चर्यं प्रवक्ष्यामि विष्णुं शुश्रुणेश्वरम् ॥ ८५ ॥ पापिनां यस्तु दुर्दर्शः सुदृश्यः पुण्यचारिणाम् ॥ तस्य दक्षिणपार्श्वेन
अश्वत्थो वै महाद्रुमः ॥ ८६ ॥ चतुर्विंशतिद्वादश्यां मध्याह्ने तु दिवाकरे ॥ फलते स यथान्यायं सर्वभागवतप्रियम् ॥ ८७ ॥
उच्चश्चैव विशालश्च मनोज्ञश्चैव शीतलः ॥ ये लभंते फलं तत्र मम मार्गानुसारिणः ॥ ८८ ॥ ते लभन्ते परां सिद्धिमेवमेतन्न संशयः ॥ तस्मिन्
क्षेत्रे महाभागे तिष्ठामि चोत्तरामुखः ॥ ८९ ॥ सर्वभागवतप्रीतिं समुद्रतटमाश्रितः ॥ अहं रामेण सहितः सा चाप्येकादशी शुभा ॥ ९० ॥
त्रयस्त्रैव तिष्ठामो द्वारकायां यशस्विनि ॥ तास्मिन् क्षेत्रे महाभागे त्रयो मोदामहे वयम् ॥ ९१ ॥ त्रिंशद्योजनविस्तारः सर्वतस्तु दिशो दश ॥
तत्र गत्वा वरारोहे ये मां द्रक्ष्यन्ति भक्तितः ॥ ९२ ॥ अदीर्घेणैव कालेन प्राप्नुवन्ति परां गतिम् ॥ आख्यानानां महाख्यानं शान्तीनां
शान्तिरुत्तमा ॥ ९३ ॥ धर्माणां परमो धर्मो द्युतीनां परमा द्युतिः ॥ लाभानां परमो लाभः क्रियाणां परमा क्रिया ॥ ९४ ॥ श्रुतीनां परमं

श्रेष्ठं तपस्या च परं तपः ॥ एतन्मरणकालेऽपि मा कदाचित्तु विस्मरेत ॥ ९५ ॥ यदिच्छेत्परमां सिद्धिं मम लोकं स गच्छति ॥ य एतत्पठते भद्रे कल्यमुत्थाय मानवः ॥ ९६ ॥ सकुल्यास्तारितास्तेन सप्त सप्त च सप्त च॥एतत्ते कथितं भद्रे द्वारकायाः सुनिश्चयम् ॥ ९७ ॥ उचिते नोपचारेण किमन्यत्परिपृच्छसि ॥ ९८ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे द्वारकामाहात्म्यं नामैकोनपंचाशदधिकशततमोऽध्यायः ॥१४९॥ अथ सानन्दूरमाहात्म्यम् ॥ सूत उवाच ॥ द्वारकायास्तु माहात्म्यं श्रुत्वा ह्येतत्सुभाषितम् ॥ हृष्टात्मोचत्तदा देवं धर्मकामा वसुन्धरा ॥ १ ॥ धरण्युवाच ॥ अहो देव प्रसादश्च यत्त्वया परिकीर्त्तितम् ॥ श्रुत्वैतत्परमं पुण्यं प्राप्तास्मि परमां श्रियम् ॥ २ ॥ एतस्मादपि चेद्गुह्यं लोकनाथ जनार्दन ॥ यद्यस्ति प्रोच्यतां मह्यं कृपा चेत्परमा मयि ॥ ३ ॥ ततो महीवचः श्रुत्वा विष्णुः कमललोचनः ॥ वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥४॥ श्रीवराह उवाच ॥ सानन्दूरेति विख्यातं भूमे गुह्यं परं मम॥उत्तरे तु समुद्रस्य मलयस्य तु दक्षिणे ॥५॥ तत्र तिष्ठामि वसुधे उदीचीं दिशमाश्रितः ॥ प्रतिमा वै मदीयास्ति नात्युच्चा, नातिनीचका ॥ ६ ॥ आयसीं तां वदन्त्येके अन्ये ताम्रमयीं तथा ॥ कांस्यां रीतिमयीमन्ये केचित्सीसकनिर्मिताम् ॥ ७ ॥ शिलामयीमित्यपरे महदाश्चर्यरूपिणीम् ॥ तत्र स्थानानि वै भूमे कथ्यमानानि वै शृणु ॥ ८ ॥ मनुजा यत्र मुच्यन्ते गताः संसारसागरम् ॥ तत्राश्चर्यं प्रवक्ष्यामि सानन्दूरे यशस्विनि ॥ ९ ॥ सौवर्णं दृश्यते पद्मं मध्याह्ने तु दिवाकरे ॥ यत्र रामगृहं नाम मम गुह्यं यशस्विनि ॥ १० ॥ तत्रापि शृणु चाश्चर्यं यश्चापि परिवर्त्तते ॥ एका तत्र लता वृक्षे उच्चैः स्थूलो महाद्रुमः ॥ ११ ॥ समुद्रमध्ये तिष्ठन्तं कोऽपि तत्र न पश्यति ॥ अन्यत्र ते प्रवक्ष्यामि महाश्चर्यं वसुन्धरे ॥ १२ ॥ मम भक्ता हि पश्यंति विद्यमाना स्वकर्मणा॥ चतुर्मत्स्यसहस्राणि कोट्यो ह्यर्बुदमेव च ॥ १३ ॥ क्षिप्तः पिण्डश्च तन्मध्ये येन केन विकर्मिणा ॥ एकस्तत्र स्थूलमत्स्यो भूमे चक्रेण चाङ्कितः ॥ १४ ॥ तावत्कश्चिन्न गृह्णाति यावत्तेन न भक्षितः ॥ तत्र रामसरो नाम गुह्यं क्षेत्रं परं मम ॥ १५ ॥ अगाधं चाप्यपारं च रक्तपद्मविभूषितम् ॥ तत्र स्नानं तु कुर्वीत एकरात्रोषितो नरः ॥ १६ ॥ बुधस्य भवनं गत्वा मोदते नात्र संशयः ॥ अथ प्राणान्प्रमुच्येत तस्मिन्सरसि सुन्दरि ॥१७॥ बुधस्य भवनं त्यक्त्वा मम लोकं प्रपद्यते ॥ तस्मिन्नामरस्युच्चैराश्चर्यं शृणु सुन्दरि ॥१८॥

मनुजास्तत्र पश्यन्ति मम कर्मरता न ये ॥ तत्सरः क्रोशविस्तारं बहुगुल्मलतावृतम् ॥ १९ ॥ मनोज्ञं रमणीयं च जलजैश्चापि संवृतम् ॥ तत्र रूढानि पद्मानि द्योतयन्ति दिशो दश ॥२०॥ एकं तु दृश्यते श्वेतमन्ज रुक्ममयं तथा ॥ तत्र ब्रह्मसरस्युच्चैरुत्तरं पार्श्वमाश्रिता ॥२१॥ धारा चैका प्रपतति स्थूला सुतलवन्निभा ॥ तत्र स्नानं प्रकुर्वीत षष्ठकालोपितो नरः ॥ २२ ॥ ब्रह्मलोकं समासाद्य मोदते नात्र संशयः ॥ अथात्र मुंचते प्राणैर्भूमे ब्रह्मसरस्यपि ॥ २३ ॥ ब्रह्मणा समनुज्ञातो मम लोकं च गच्छति ॥ तत्राश्चर्यं महाभागे रम्ये ब्रह्मसरे शृणु ॥ २४ ॥ मद्भक्ता यच्च पश्यन्ति घोरसंसारमोक्षणम् ॥ चतुर्विंशतिद्वादश्यां सा धारा पृथुलेक्षणे ॥ २५ ॥ भूमे पतति मध्याह्ने यावत्सूर्यस्तु तिष्ठति ॥ पश्चिते तु मध्याह्ने सा धारा न पतेद्भुवि ॥ २६ ॥ एवं तत्र महाश्चर्यं पुण्यत्र ह्मसरोवरे ॥ अस्ति सङ्गमनं नाम गुह्यं क्षेत्रं परं मम ॥ २७ ॥ समुद्रश्चैव रामश्च समेष्येते वराङ्गने ॥ तत्र कुण्डं महाभागे प्रसन्नविमलोदकम् ॥ २८ ॥ बहुगुल्मलताकीर्णं शोभितं च विहङ्गमैः ॥ समुद्रस्य तु पार्श्वेन ह्यदूरात्तत्र योजनात् ॥ २९ ॥ मण्डितं कुमुदैः पद्मैः सुगन्धैश्चोत्तमैस्तथा ॥ तत्र स्नानं तु कुर्वीत षष्ठकालोपितो नरः ॥ ३० ॥ समुद्रभवनं गत्वा मम लोकं प्रपद्यते ॥ तत्राश्चर्यं प्रवक्ष्यामि कुण्डं रामस्य सङ्गमे ॥ ३१ ॥ यद्वङ्गा मनुजास्तत्र भ्रमन्ति विगतज्वराः ॥ यानि कानि च पर्णानि पतन्ति जलसंस्थिते॥३२॥एकमप्यत्र पश्यन्ति न केपि वसुधे नराः ॥ अच्छिद्राणि च पत्राणि तस्मिन् रामस्य सङ्गमे॥३३॥ प्रपन्नेनापि मार्गे तच्छिद्रं तत्र न पश्यति॥अस्ति शक्रसरो नाम गुह्यं क्षेत्रं परं मम॥३४॥तत्र पूर्वेण पार्श्वेण ह्यदूराद्द्वंयोजनात् ॥ तस्य कुण्डस्य सुश्रोणि चतस्रो विपमाश्रिताः ॥ ३५ ॥ धाराः पतन्ति कल्याणि प्रसन्नसलिलास्तथा ॥ तत्र स्नानं प्रकुर्वीत चतुष्कालोपितो नरः ॥ ३६ ॥ चतुर्णी लोकपालानां लोकानाप्नोति चोत्तमान् ॥ अस्मिंश्च शक्रसरसि यदि प्राणान्प्रमुंचति ॥ ३७ ॥ लोकपालान्समुत्सृज्य मम लोकेषु मोदते ॥ तत्राश्चर्यं महाभागे दृश्यते तच्छृणुष्व मे ॥ ३८ ॥ शुद्धैर्भागवतैर्भूमे सर्वसंसार मोक्षणम् ॥ चतुर्धारास्ततो भद्रे पतन्ति चतुरो दिशः ॥ ३९ ॥ न च तद्भर्दते चाम्भो न चैव परिहीयते ॥ मासे भाद्रपदे चैव शुक्लपक्षे तु द्वादशी ॥ ४० ॥ श्रूयते गीतनिर्घोषः श्रुतिकर्ममनोहरः ॥ अस्ति सूर्पारकं नाम गुह्यं क्षेत्रं परं मम ॥ ४१ ॥ जामदग्न्यस्य रामस्य

॥१५४॥

स्वाश्रमाऽथ भविष्यति ॥ तत्र तिष्ठाम्यहं देवि समुद्रतटमाश्रितः ॥ ४२ ॥ शाल्मलीं चाग्रतः कृत्वाधिष्ठितश्चोत्तरामुखः ॥ तत्र स्नानं प्रकुर्वीत पंचकालोषितो नरः ॥ ४३ ॥ ऋषिलोकं ततो गत्वा पश्येत्तत्राप्यरुन्धतीम् ॥ अथ प्राणान्विमुंचेत कृत्वा कर्म सुदुष्करम् ॥ ४४ ॥ ऋषिलोकं परित्यज्य मम लोकं प्रपद्यते ॥ तत्राश्चर्यं महाभागे नमस्कारं च कुर्वते ॥ ४५॥ वर्षाणि द्वादशैतेन नमस्कारः कृतो भवेत् ॥ तस्मिन्क्षेत्रे महाभागे पश्यंति परिनिष्ठिताः ॥ ४६ ॥ पापात्मानो न पश्यन्ति मम मायाविमोहिताः ॥ चतुर्विंशतिद्वादश्यां समुपायान्ति शाल्मलीम् ॥४७॥ तत्र पश्यन्ति सुश्रोणि शुद्धा भागवता नराः ॥ तास्मिन्क्षेत्रे महाभागे अस्ति गुह्यं परं मम ॥ ४८ ॥ जटाकुण्डमिति ख्यातं वायव्यां दिशि संस्थितम् ॥ तत्कुण्डस्य महाभागे समन्तादशयोजनम् ॥ ४९ ॥ मलयस्य दक्षिणेन समुद्रस्योत्तरे तथा ॥ तत्र स्नानं तु कुर्वीत पंचकालोषितो नरः ॥ ५० ॥ अगस्तिभवनं गत्वा मोदते नात्र संशयः ॥ अथ प्राणान्प्रमुंचेत मम चिन्तापरायणः ॥ ५१ ॥ अगस्तिभवनं त्यक्त्वा मम लोकं तु गच्छति ॥ तस्य कुण्डस्य सुश्रोणि नव धारा न किंचन ॥ ५२ ॥ विस्तारश्च महाभागे अगाधश्च महार्णवः ॥ आश्चर्यं सुमहत्तत्र कथ्यमानं मया शृणु ॥ ५३ ॥ यच्च पश्यति सुश्रोणि समन्तादितरो जनः ॥ चतुर्विंशतिद्वादश्यां स्वावभ्युदिते सति ॥ ५४ ॥ न वर्द्धते ततश्चाम्भो यावत्तिष्ठति तत्पुनः ॥ एतत्ते कथितं भद्रे सानन्दूरेति तन्मया ॥ ५५ ॥ आश्चर्यं च प्रमाणं च भक्तिकीर्त्तिविवर्द्धनम् ॥ गुह्यानां परमं गुह्यं स्थानानां परमं महत् ॥ ५६ ॥ यस्तु गच्छति सुश्रोणि अष्टभक्तपथे स्थितः ॥ प्राप्नोति परमां सिद्धिं ममैव वचनं यथा ॥५७॥ य एतत्पठते नित्यं यश्चैवं शृणुयान्मुदा ॥ कुलानि तेन तीर्णानि षट् च षट् पुनश्च षट् च ॥ ५८ ॥ एतन्मरणकाले न विस्मर्त्तव्यं कदाचन ॥ यदीच्छेद्विष्णुलोके हि निष्कलं गमनं नरः ॥ ५९ ॥ एतत्ते कथितं भद्रे त्वया पृष्टं च मां प्रति ॥ उक्तं भागवतार्थाय किमन्यत्परिपृच्छसि ॥६० ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे सानंदूरमाहात्म्यं नाम पंचाशदधिकशततमोऽध्यायः ॥१५०॥

अथ लोहार्गलमाहात्म्यम् ॥ सूत उवाच ॥ सानन्दूरस्य माहात्म्यमेतच्छ्रुत्वा वसुन्धरा ॥ कृताञ्जलिपुटा भूत्वा वराहं पुनरब्रवीत् ॥ १ ॥ धरण्युवाच ॥ श्रुतमेतज्जगन्नाथ विष्णो गुह्यमनुत्तमम् ॥ यच्छ्रुत्वा सुमहाभाग जाताऽस्मि विगतज्वरा ॥ २ ॥ अपरं वाऽस्ति चेत्किंचिद्गुह्यं

क्षेत्रं शुभावहम् ॥ सानन्दूरात्परं गुह्यं क्षेत्रमस्ति न वा परम् ॥ ३ ॥ सुरकरण नृसिंह लोकनाथ युतससुरसुरधीर देववीर ॥ कमलदलसहस्रनेत्र रूपो जयति कृतान्तसमानकालरूपः ॥ ४ ॥ गद्गदं वचनं श्रुत्वा पृथिव्याः स जनार्दनः ॥ उवाच मधुरं वाक्यं सर्वलोकार्त्तिहा हरिः ॥ ५ ॥ श्रीवराह उवाच ॥ शृणु देवि च तत्त्वेन यन्मां त्वं परिपृच्छसि ॥ गुह्यमन्यत्प्रवक्ष्यामि मद्व्रतः कर्मणो जनिः ॥ ६ ॥ ततः सिद्धवटे गत्वा त्रिंशद्योजनदूरतः ॥ स्थेच्छमध्ये वराहोहं हिमवन्तं समाश्रितम् ॥ ७ ॥ तत्र लोहार्गले क्षेत्रे निवासो विहितः शुभः ॥ गुह्यं पंचदशायामं समन्तात्पञ्चयोजनम् ॥ ८ ॥ दुर्गमं दुःसहं चैव पापैः सर्वत्र वेष्टितम् ॥ सुलभं पुण्ययुक्तानां मम चिन्तानुसारिणाम् ॥ ९ ॥ तत्र तिष्ठा म्यहं भद्रे उदीचीं दिशमाश्रितः ॥ हिरण्यप्रतिमां कृत्वा जातरूपां न संशयः ॥ १० ॥ ततो मे दानवाः सर्वे क्रमन्तो लोकमुत्तमम् ॥ मया चैवान्तरं कृत्वा कृत्वा मायां च वैष्णवीम् ॥ ११ ॥ तत्र ब्रह्मा च रुद्राश्च स्कन्देन्द्रौ समुरुद्गणाः ॥ आदित्या वसवो वायुरश्विनौ च महौजसौ ॥ १२ ॥ सोमो बृहस्पतिश्चैव ये चान्ये वै दिवौकसः ॥ तेषां चैवार्गलं दत्त्वा चक्रं गृह्य महौजसम् ॥ १३॥ शतकोटिसहस्राणि शीघ्र मेव निपातितम् ॥ ततश्च देवताः सर्वास्तुष्यमाणा इतस्ततः ॥ १४ ॥ एवं लोहार्गलं नाम क्षेत्रं चैव मया कृतम् ॥ ततो देवासुरे युद्धे हत्वा त्रिदशकण्टकान् ॥ १५ ॥ तेषां संस्थापनं तत्र कृतं चैव महौजसाम् ॥ यो मां पश्यति तत्रस्थं प्रयत्नेन कदाचन ॥ १६ ॥ सोपि भागवतो भूमे भवत्येव सुनिष्ठितः ॥ तस्मिन्कुण्डे तु सुश्रोणि यः स्नाति नियतो नरः ॥ १७ ॥ उपोष्य च त्रिरात्रं तु विधिदृष्टेन कर्मणा ॥ ततः स्वर्गे सहस्रेषु मोदते नात्र संशयः ॥ १८ ॥ अथात्र मुंचते प्राणान्स्वकर्मपरिनिष्ठितः ॥ सर्वान्स्वर्गान्परित्यज्य मम लोकं प्रपद्यते ॥ १९ ॥ अन्यच्च ते प्रवक्ष्यामि यत्र तत्परमाद्भुतम् ॥ लोकविस्मापनार्थाय मया तत्र च यत्कृतम् ॥ २० ॥ चतुर्विंशतिद्विादश्यां मासेन विधिना मम ॥ बलिः प्रदीयते तत्र सर्वकामविशोधनः ॥ २१ ॥ अश्वो मे कल्पितस्तत्र सर्वरत्नविभूषितः ॥ श्वेतः कुमुदवर्णाभः शङ्खकुन्दसमप्रभः॥ २२ ॥ मार्गणा मे धनुस्तत्र अक्षसूत्रं कमण्डलुः ॥ आसनं विततं दिव्यं दीयतेऽश्वोपरि स्थिरम् ॥ २३ ॥ श्वेतपर्वतमारुह्य पतमानः कुरून्वहून् ॥ पतित स्तत्र दृश्येत क्षतं तत्र न दृश्यते ॥२४॥ अनेकान्येव रूपाणि पातयित्वा नभस्तलात् ॥ शान्तो दान्तः परिक्लिष्टः स चाश्वो दिवि वर्त्तते॥२५॥

सूत उवाच ॥ ततो भूम्या वचः श्रुत्वा ब्रह्मपुत्रो महामुनिः ॥ विस्मयं परमं प्राप्तो विष्णुमायोपबृंहितः ॥ २६ ॥ ततः स विस्मयाविष्टो ब्रह्म
पुत्रो महामतिः ॥ सनत्कुमारो भगवान्पुनरेवमभाषत ॥२७॥ सनत्कुमार उवाच ॥ धन्यासि देवि सुश्रोणि सुपुण्यासि वरानने ॥ देवि यल्लोक
नाथस्य साक्षाद्दर्शनमागता ॥ २८ ॥ पद्मपत्रविशालाक्षो यत्त्वया परिभाषितः ॥ तेनोक्तं शृंस सकलं सर्वेषां सुखवर्द्धनम् ॥ २९ ॥ यथा यथा
वदसि च धर्मसंहितं गुह्यं परं देववरप्रणीतम् ॥ गुणोत्तमं कारणसम्प्रयुक्तं तथा तथा भाव्यसे मनो मम॥३०॥ ततः स पुण्डरीकाक्षः किमाचष्ट
ततः परम् ॥ कर्मणा विधिदृष्टेन सर्वभागवतप्रियः ॥३१ ॥ (सूत उवाच) ॥ तस्य तद्वचनं श्रुत्वा कुमारस्य महौजसः ॥ उवाच मधुरं वाक्य
माभाष्य ब्रह्मणः सुतम् ॥ ३२ ॥ शृणु वत्स जगन्नाथो यथा मामाह चोदितः ॥ श्रीवराह उवाच ॥ एवं तत्रैव कर्माणि क्रियन्ते विधिपूर्व
कम् ॥ ३३॥ शोधकानि च पापानां मृदूनि च शुभानि च ॥ अश्वानां तत्कुलीनानामावहन्ति सुमध्यमे ॥३४ ॥ नान्यं वहन्ति ते चाश्वा मम
वाहा दुरत्ययाः॥कुण्डं पंचसरो नाम गुह्यं क्षेत्रं परं मम ॥३५॥ चतुर्धारः पतन्त्यत्र शङ्खवर्णा मनोजवाः ॥ तत्र स्नानं तु कुर्वीत चतुर्भक्तोपितो
नरः ॥ ३६ ॥ लोकं चैत्राङ्गदं गत्वा गन्धर्वैः सह मोदते ॥ अथ चेन्मुञ्चते प्राणांस्तस्मिन्क्षेत्रे परे मम ॥३७॥ गन्धर्वलोकमुत्सृज्य मम लोकं स
गच्छति ॥ ततो नारदकुण्डं तु मम क्षेत्रे परे महत् ॥ ३८ ॥ पंच धाराः पतन्त्यत्र तालवृक्षसमोपमाः ॥ तत्र स्नानं तु कुर्वीत एकभक्तोपितो
नरः ॥ ३९ ॥ देवर्षिं नारदं पश्यन्मोदते तेन वै समम् ॥ अथात्र मुंचते प्राणान्मम गुह्यविनिश्चितः ॥४० ॥ प्रमुच्य नारदं दिव्यं मम लोकं च
गच्छति ॥ ततो वसिष्ठकुण्डं तु तस्मिन्क्षेत्रे परं मम ॥ ४१ ॥ धाराः पतन्ति तिस्रस्तु न स्थूला नाति वै कृशाः ॥ तत्राभिषेकं कुर्वीत पंच
कालोपितो नरः ॥ ४२ ॥ वासिष्ठं लोकमासाद्य मोदते नात्र संशयः ॥ अथात्र मुंचते प्राणान्मम कर्मसु निष्ठितः॥४३॥ वासिष्ठं लोकमुत्सृज्य
मम लोकं प्रपद्यते ॥ पंचकुण्डेति विख्यातं तस्मिन्क्षेत्रे परं मम ॥ ४४ ॥ पंच धाराः पतन्त्यत्र हिमकूटविनिःसृताः ॥ तत्राभिषेकं कुर्वीत
पंचकालोपितो नरः ॥ ४५ ॥ स तत्र गच्छेद्वै भूमे यत्र पंचशिलो मुनिः ॥ अथात्र मुंचते प्राणान्मम भक्तो जितेन्द्रियः ॥ ४६ ॥ पंचचूडं
समुत्सृज्य स याति परमां गतिम् ॥ सप्तर्षिकुण्डं विख्यातमस्मिन्क्षेत्रे परं मम ॥ ४७ ॥ सप्त धाराः पतन्त्यत्र हिमवत्पर्वतस्थिताः ॥ तत्राभि

पेकं कुर्वीत सप्तभक्तोपितो नरः ॥ ४८ ॥ मोदते ऋषिलोकेषु ऋषिकन्याभिसंवृतः ॥ अथात्र मुंचते प्राणात्रागलोभविवर्जितः ॥ ४९ ॥ सप्त पौन्स समुत्सृज्य मोदते मम संस्थितः ॥ शरभङ्गस्य कुण्डं वै क्षेत्रे गुह्यं परे मम ॥ ५० ॥ तत्र धारा पतत्येका शरभङ्गाश्रिता नदी ॥ स्नानं यस्तत्र कुर्वीत षष्टभक्तोपितो नरः ॥ ५१ ॥ मोदते तस्य लोकेषु ऋषिकन्याप्रमोदितः ॥ अथात्र मुंचते प्राणान्सर्वसङ्गविवर्जितः ॥ ५२ ॥ शरभङ्गं समुत्सृज्य मम लोकं महीयते ॥ कुण्डमग्निसरो नाम सर्वमायाभिसंवृतम् ॥ ५३ ॥ भूमिं नीत्वा जलं तत्र तिष्ठत्येव वरानने ॥ तत्र स्नानं प्रकुर्वीत चाष्टकालोपितो नरः ॥ ५४ ॥ गच्छत्यङ्गिरसो लोकं सुखभागी न संशयः ॥ अथात्र मुंचते प्राणान्मम कर्मपरायणः ॥ ५५ ॥ अग्निलोकं समुत्सृज्य मम लोकं स गच्छति ॥ कुण्डं बृहस्पतेर्धूमे सर्ववेदोदकाश्रितम् ॥ ५६ ॥ धारा चैका पतत्यत्र हिमकूटसमाश्रिता ॥ तत्र स्नानं प्रकुर्वीत षष्टकालोपितो नरः ॥५७॥ गत्वा बृहस्पतेर्लोकं मुनिकन्याभिमोदितः ॥ अथात्र मुंचते प्राणान्मम लोकं समाश्रितः ॥५८॥ सोऽपि याति परां सिद्धिं समुत्सृज्य बृहस्पतिम् ॥ वैश्वानरस्य कुण्डं तु गुह्यं क्षेत्रं परं मम ॥५९॥ धारा चैका पतत्यत्र दृश्यते हिमसंश्रयात् ॥ तत्राभिषेकं कुर्वीत षष्टभक्तोपितो नरः ॥६०॥ गत्वा बृहस्पतेर्लोकं मुनिकन्याभिमोदितः ॥ वैश्वानरेषु लोकेषु मोदते नाऽत्र संशयः ॥६१॥ अथात्र मुंचते प्राणान्मम कर्मपरायणः ॥ वैश्वानरं समुत्सृज्य मम लोकं स गच्छति ॥ ६२ ॥ कार्त्तिकेयस्य कुण्डं तु गुह्यं क्षेत्रं परं मम ॥ यत्र पंचदशा धाराः पतन्ति हिमपर्वतात् ॥ ६३॥ तत्र स्नानं प्रकुर्वीत षष्टकालोपितो नरः ॥ कुमारं पश्यति व्यक्तं षण्मुखं शुभदर्शनम् ॥ ६४ ॥ अथात्र मुंचते प्राणान्कृत्वा चान्द्रायणं शुचिः ॥ कार्त्तिकेयं समुत्सृज्य मोदते मम मण्डले ॥ ६५ ॥ उमाकुण्डमितिख्यातं तस्मिन्क्षेत्रे परं मम ॥ सा गौरी यत्र चोत्पन्ना महादेववराङ्गना ॥ ६६ ॥ तत्र स्नानं तु कुर्वीत दशरात्रोपितो नरः ॥ गौरीं देवीं स पश्येत्तु तस्या लोके च मोदते ॥ ६७ ॥ अथ प्राणान्प्रमुंचेत दशरात्रोपितो नरः ॥ उमालोकं समुत्सृज्य मम लोकं प्रपद्यते ॥ ६८ ॥ महेश्वरस्य वै कुण्डं यत्र चोद्भाविता उमा ॥ कादम्बैश्चक्रवाकैश्च हंससारससेवितम् ॥ ६९ ॥ तिस्रो धाराः पतन्त्यत्र हिमवत्पर्वताश्रिताः ॥ स्थूलाश्च रमणीयाश्च न ह्रस्वाश्चातिनिर्मलाः ॥ ७० ॥ तत्र स्नानं तु कुर्वीत द्वादशाहोपितो नरः ॥ मोदते रुद्रलोकेषु रुद्रकन्याभिरावृतः ॥ ७१ ॥ अथात्र मुञ्चते

प्राणान्कृत्वा कर्म सुदुष्करम् ॥ रुद्रलोकं समुत्सृज्य मम लोकं च गच्छति ॥ ७२ ॥ प्रख्यातं ब्रह्मकुण्डं तु वेदा यत्र समुत्थिताः ॥ चतस्रो वेद धारास्तु पतन्ति च हिमालयात् ॥ ७३ ॥ ततः पूर्वेण पार्श्वेन समा धारा पतेच्छुभा ॥ उच्चा च रमणीया च पाण्डरोदकशोभिता ॥ ७४॥ पुनरन्योत्तरे पार्श्वे सुवर्णसदृशोपमा ॥ ऋग्वेदः पतते धारा प्रसन्ना विमलोदका ॥ ७५॥ अथ पश्चिमपार्श्वेन यजुर्वेदेन संयुता ॥ अथ दक्षिणपार्श्वेन चाथर्वणसमन्विता ॥ ७६ ॥ एका धारा पतत्यत्र इन्द्रगोपकसन्निभा ॥ यस्तत्र कुरुते स्नानं सप्तरात्रोषितो नरः ॥ ७७ ॥ ब्रह्मलोकं समासाद्य ब्रह्मणा सह मोदते ॥ अथात्र मुच्यते प्राणानहङ्कारविवर्जितः ॥७८॥ ब्रह्मलोकं परित्यज्य मम लोकं प्रपद्यते ॥ गुह्याख्याने महाभागे क्षेत्रे लोहार्गले मम ॥ ७९ ॥ सिद्धिकामेन मर्त्येन गन्तव्यं नात्र संशयः ॥ समन्तात्पञ्चविंशति योजनानि वरानने ॥ ८० ॥ न तस्य कर्म विद्येत स एवमपि संस्थितः ॥ आख्यानानां महाख्यानं धर्माणां धर्म उत्तमः ॥८१॥ पवित्राणां पवित्रं तु न देयं यस्य कस्यचित् ॥ ये पठंति महाभागे स्थिताः शृण्वन्ति मत्पथे ॥८२॥ तारितानि कुलानि स्युरुभयत्र दशापि च ॥ एतन्मरणकाले तु न कदाचित्तु विस्मरेत् ॥८३॥ यदीच्छेत्परमां सिद्धिं सर्वसंसारमोक्षणीम् ॥ एतत्ते कथितं भद्रे लोहार्गलमनुत्तमम् ॥८४ ॥ माहात्म्यं पद्मपत्राक्षि गुह्यं यच्च महौजसम् ॥ मङ्गल्यं च पवित्रं च मम भक्त सुखावहम् ॥ ८५ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे लोहार्गलमाहात्म्यं नामैकपंचाशदधिकशततमोऽध्यायः ॥ १५१ ॥ अथ मथुरातीर्थ प्रशंसा ॥ सूत उवाच ॥ श्रुत्वा देवस्य माहात्म्यं लोहार्गलनिवासिनः ॥ त्रैलोक्यनाथाधिपतेर्विस्मयं परमं गता ॥ १ ॥ धरण्युवाच ॥ पद्मपत्र विशालाक्ष लोकनाथ जगत्पते ॥ त्वत्प्रसादाच्च देवेश श्रुतं शास्त्रं महौजसम् ॥ २ ॥ तव शिष्या च दासी च त्वामहं शरणङ्गता ॥ जगद्धाता जगज्ज्योतिर्जगत्प्रभुरतन्द्रितः ॥ ३ ॥ तव सम्भावनाद्देव जातास्मि कनकोज्वला ॥ अलंकृता च शस्ता च सर्वशास्त्रेण मानद ॥४ ॥ जगद्धातु र्जगच्छास्त्रकृते न हि परिश्रमः ॥ त्वय्यायत्तं जगत्सर्वं यच्च किंचित्प्रवर्त्तते ॥ ५ ॥ इति कृत्वा च मे देव त्वाह्लादो हृदि वर्त्तते ॥ लोहार्गलात् परं श्रेष्ठं गुह्यं परमदुर्लभम् ॥ ६ ॥ तीर्थं तद्वद कल्याणं तीर्थानामुत्तमम् ॥ यदस्ति दुर्लभं तीर्थं तत्त्वं कथय मे प्रभो ॥ ७ ॥ श्रीवराह उवाच ॥ न विद्यते च पाताले नान्तरिक्षे न मानुषे ॥ समानं मथुराया हि प्रियं मम वसुन्धरे ॥ ८ ॥ सूत उवाच ॥ तच्छ्रुत्वा वचनं तस्य

प्रियं च वसुधा तद्दा ॥ प्रणम्य शिरसा देवीं वराहं पुनरब्रवीत् ॥९ ॥ पृथिव्युवाच॥पुष्करं नैमिषं चैव पुरीं वाराणसीं तथा ॥ एतान् हित्वा महा
भाग मथुरां किं प्रशंससि ॥ १० ॥ श्रीवराह उवाच ॥ शृणु कात्स्न्येन वसुधे कथ्यमानं मयानघे ॥ मथुरेति च विख्यातं तस्माच्चास्ति परं
मम ॥ ११ ॥ सा रम्या च सुशस्ता च जन्मभूमिस्तथा मम ॥ शृणु देवि यथा स्तौमि मथुरां पापहारिणीम् ॥ १२ ॥ तत्र वासी
नरो याति मोक्षं नास्त्यत्र संशयः ॥ महामाघ्यां प्रयागे तु यत्फलं लभते नरः ॥ १३ ॥ तत्फलं लभते देवि मथुरायां दिने दिने ॥ पूर्णं वर्ष
सहस्रं तु वाराणस्यां तु यत्फलम् ॥ १४ ॥ तत्फलं लभते देवि मथुरायां क्षणे न हि ॥ कार्त्तिक्यां चैव यत्पुण्यं पुष्करे तु वसुन्धरे ॥ १५ ॥
तत्फलं लभते देवि मथुरायां जितेन्द्रियः ॥ मथुरां तु परित्यज्य योऽन्यत्र कुरुते रतिम् ॥ १६ ॥ मूढो भ्रमति संसारे मोहितो मम मायया ॥
यः शृणोति वरारोहे माथुरं मम मण्डलम् ॥ १७ ॥ अन्येनोच्चारितं श्रुत्वासोऽपि पापैः प्रमुच्यते ॥ पृथिव्यां यानि तीर्थानि आसमुद्रं सरांसि
च ॥ १८ ॥ मथुरायां प्रयान्त्यत्र सुते चैव जनार्दने ॥ मथुरामण्डलं प्राप्य श्राद्धं कृत्वा यथाविधि ॥ १९ ॥ तृप्तिं प्रयान्ति पितरो यावत्स्थि
त्यग्रजन्मनः ॥ ये वसन्ति महाभागे मथुरामितरे जनाः ॥ २० ॥ तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशयः ॥ कुब्जाम्रके सोकरवे मथु
रायां विशेषतः ॥ २१ ॥ विना सांख्येन योगेन मत्प्रसादान्न संशयः ॥ मथुरायां महापुर्यां ये वसन्ति शुचिव्रताः ॥२२ ॥ बलिभिक्षाप्रदातारो
देवास्ते नरविग्रहाः ॥ भविष्यामि वरारोहे द्वापरे युगसंस्थिते ॥ २३ ॥ ययाभिभूपवंशाच्च क्षत्रियैः कुलवर्द्धनैः ॥ भविष्यामि वरारोहे मथु
रायां न संशयः ॥ २४ ॥ मूर्तिं चतुर्विधां कृत्वा स्थास्यामि ऋषिभिः स्तुतः ॥ वत्सराणां शतं तत्र युद्धेषु कृतनिश्चयः ॥ २५ ॥ एका
चन्दनसङ्काशा द्वितीया कनकप्रभा ॥ अशोकसदृशा चान्या अन्या चोत्पलसन्निभा ॥ २६ ॥ तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ॥
पुण्यानि च पवित्राणि संसारच्छेदनानि च ॥ २७ ॥ यत्राहं घातयिष्यामि द्वात्रिंशत्तु वसुन्धरे ॥ दैत्यान्घोरान्महाभागे कंसादीन्धर्मदूष
कान् ॥ २८ ॥ यमुना यत्र सुतद्दा नित्यं सन्निहिता ध्रुवम् ॥ वैवस्वतसुता रम्या यमुना यत्र विश्रुता ॥ २९॥ गङ्गां प्राप्य प्रयागे या वर्णीति
प्रथिता भुवि ॥ गङ्गाशतगुणा पुण्या माथुरे मम मण्डले ॥ ३० ॥ यमुना विश्रुता देवि नात्र कार्या विचारणा ॥ तत्र तीर्थानि गुह्यानि भवि

प्यन्ति ममानघे ॥ ३१ ॥ येषु स्नाने नरो देवि मम लोके महीयते ॥ अथात्र मुञ्चते प्राणान्मम कर्मपरायणः ॥ ३२ ॥ न जायते स मर्त्येषु
जायते च चतुर्भुजः ॥ अविमुक्ते नरः स्नातो मुक्तिं प्राप्नोत्यसंशयम् ॥ ३३ ॥ तथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ विश्रान्ति
संज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ ३४ ॥ यस्मिन्स्नातो नरो देवि मम लोकं प्रपद्यते ॥ सर्वतीर्थेषु यत्स्नानं सर्वतीर्थेषु यत्फलम् ॥ ३५ ॥
तत्फलं लभते देवि दृष्ट्वा देवं गतश्रमः ॥ न च यज्ञैर्न तपसा न ध्यानेन च संयमैः ॥ ३६ ॥ तत्फलं लभते स्नातो यथा
विश्रान्तिसंज्ञके ॥ कालत्रयं तु वसुधे यः पश्यति गतश्रमः ॥ ३७ ॥ कृत्वा प्रदक्षिणे द्वे तु विष्णुलोकं स गच्छति ॥
अस्ति चान्यत्परं गुह्यं सर्वसंसारमोक्षणम् ॥३८॥ यस्मिन्स्नातो नरो देवि मम लोके प्रपद्यते ॥ प्रयागं नाम तीर्थं तु देवानामपि दुर्लभम् ॥३९॥
यस्मिन् स्नातो नरो देवि अग्निष्टोमफलं लभेत् ॥ इन्द्रलोकं समासाद्य नरोऽसौ देवि मोदते ॥४०॥ अथात्र मुंचते प्राणान्मम लोकं स गच्छति ॥
तथा कनखलं नाम तीर्थं गुह्यं परं मम ॥ ४१ ॥ स्नानमात्रेण तत्रापि नाकपृष्ठे स मोदते ॥ अस्ति क्षेत्रं परं गुह्यं तिंदुकं नाम नामतः ॥४२॥
तस्मिन् स्नातो नरो देवि मम लोके महीयते ॥ अस्मिंस्तीर्थे पुरा वृत्तं तच्छृणुष्व वसुन्धरे ॥४३॥ पांचालविषये देवि काम्पिल्यं च पुरोत्तमम् ॥
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ॥ ४४ ॥ तस्मिंस्तु वसते देवि तिंदुको नाम नापितः ॥ तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ॥४५॥
कालेन महता तस्य कुटुम्बं च क्षयं गतम् ॥ क्षीणे कुटुम्बे तु तदा सुभृशं दुःखपीडितः ॥ ४६ ॥ सर्वसंगं परित्यज्य सोऽगच्छन्मथुरां तदा ॥
ब्राह्मणावसथे सोऽपि वसमानो वसुन्धरे ॥४७॥ तस्य कर्मशतं कृत्वा स्नात्वैव यमुनां नदीम् ॥ नित्यं स यमुनां स्नाति चिरकाल दृढव्रतः ॥४८॥
ततः कालेन महता पंचत्वं समुपागतः ॥ स च तीर्थप्रभावेण जातोऽसौ ब्राह्मणोत्तमः ॥४९॥ तस्मिन् वरगृहे देवि ब्राह्मणो योगिनां वरः ॥ जाति
स्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे ॥ ५० ॥ तत्तीर्थस्य प्रभावेण जाता मुक्तिः सुदुर्लभा ॥ ततः परं सूर्यतीर्थं सर्वपापप्रमोचनम् ॥ ५१ ॥
वैरोचनेन बलिना सूर्यस्त्वाराधितः पुरा ॥ भ्रष्टराज्येन हि तथा धनकामेन सुन्दरि ॥ ५२ ॥ ऊर्ध्वबाहुर्निराहारस्तताप परमं तपः ॥ साग्रं संव
त्सरं देवि ततः काममवाप्तवान् ॥५३॥ तस्य प्रसन्नो भगवान् द्युमणिः प्रत्यभाषत ॥ किं कारणं बले ब्रूहि तपस्यसि महत्तपः ॥५४॥ बलिरुवाच ॥

अष्टराज्योऽस्मि देवेश पातालेनिवसाम्यहम् ॥ वित्तेनापि विहीनस्य कुटुम्बभरणं कृतः ॥५५॥ मुकुटात्तस्य वै सूर्यो ददौ चिन्तामणिं ततः ॥ चिन्तामणिं समासाद्य पातालमगमद्बलिः ॥ ५६ ॥ तस्मिंस्तीर्थे नरः स्नातः सर्वपापैः प्रमुच्यते ॥ तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ५७ ॥ आदित्यग्रहणे संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ॥ तस्मिन् स्नातो नरो देवि राजसूयफलं लभेत् ॥५८ ॥ ध्रुवेण यत्र सन्तप्तं स्वेच्छया परमं तपः ॥ तत्र वै स्नानमात्रेण ध्रुवलोके महीयते ॥ ५९ ॥ तत्राथ मुञ्चते प्राणान्मम लोके महीयते ॥ ध्रुवतीर्थे तु वसुधे यः श्राद्धं कुरुते नरः ॥६० ॥ पितॄंस्तारयते सर्वं पितृपक्षे विशेषतः ॥ दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्तितम् ॥ ६१ ॥ तस्मिन् स्नाते नरो देवि मम लोकं प्रपद्यते ॥ तद्दक्षिणे महादेवि ऋषितीर्थं परं मम ॥ ६२ ॥ तत्र स्नातो नरो देवि ऋषिलोकं प्रपद्यते ॥ अथात्र मुञ्चते प्राणान्मम लोके महीयते ॥६३॥ दक्षिणे ऋषितीर्थस्य मोक्षतीर्थं परं मम ॥ तत्र वै स्नानमात्रेण मोक्षमेव प्रपद्यते ॥६४ ॥ तत्र वै कोटितीर्थे हि देवानामपि दुर्लभम्॥ तत्र स्नानेन दानेन मम लोके महीयते ॥६५ ॥ कोटितीर्थे नरः स्नात्वा सन्तर्प्य पितृदेवताः ॥ तारिताः पितरस्तेन तथैव प्रपितामहाः ॥६६॥ कोटितीर्थे नरः स्नात्वा ब्रह्मलोके महीयते ॥ तत्रैव वायुतीर्थे तु पितृणामपि दुर्लभम् ॥ ६७ ॥ पिण्डदानात्तु तत्रैव पितृलोकं स गच्छति ॥गया पिण्डप्रदानेन यत्फलं लभते नरः ॥ तत्फलं लभते देवि ज्येष्ठे दानान्न संशयः ॥ ६८ ॥ द्वादशैतानि तीर्थानि देवानां दुर्लभानि च ॥स्नानं दानं जपं होमं सहस्रगुणितं भवेत् ॥६९॥ येषां स्मरणमात्रेण सर्वपापैः प्रमुच्यते॥ तीर्थानां चैव माहात्म्यं श्रुत्वा कामानवाप्नुयात् ॥७०॥इति श्रीवराहपुराणे मथुरामाहात्म्ये मथुरातीर्थप्रशंसा नाम द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२॥ अथ मथुरातीर्थमाहात्म्यम् ॥ श्रीवराह उवाच ॥ उत्तरे शिवकुण्डाच्च तीर्थानां नवकं स्मृतम् ॥ नवतीर्थात्परं तीर्थं न भूतं न भविष्यति॥ १॥तत्रैव स्नानमात्रेण सौभाग्यं जायते परम् ॥रूपवन्तः प्रजायंते स्वर्गलोके न संशयः ॥ २ ॥ तस्मिन् स्नातो नरो देवि मम लोकं प्रपद्यते ॥ तत्र संयमनं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ ३ ॥ तत्र स्नातो मृतो वापि मम लोकं स गच्छति॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥४॥ तस्मिन् संयमने तीर्थे यद्वृत्तं पुरातनम् ॥ कश्चित्पाप समाचारो निषादो दुष्टमानसः ॥ ५॥ वसते नैमिषारण्ये सुप्रतीतेऽतिपापकृत्॥केनचित्त्वथ कालेन सोऽगच्छन्मथुरां प्रति ॥६ ॥ तत्र प्राप्य च

कालिन्दीं कृष्णपक्षे चतुर्दशीम् ॥ स निषादस्तर्तुकामस्तस्यां चैव तिथौ ततः॥७॥ ततार यमुनां सोऽथ प्राप्य संयमनं शुभे ॥ ममज्जासौ ततः पापस्तस्मिंस्तीर्थे वरे शुभे॥८॥मग्नमात्रस्ततः पापः सद्यः प्राणैर्व्ययुज्यत ॥ तत्तीर्थस्य प्रभावेण जातोऽसौ पृथवीपतिः॥९॥ सौराष्ट्रविषये देवि क्षत्रियोऽभूद्धनुर्द्धरः ॥ नाम्ना यज्ञमघवनुर्नाम सोऽभवत्प्रियदर्शनः ॥१०॥पालयामास वसुधां क्षत्रधर्मं समाश्रितः ॥ तेनोढा काशिराजस्य पीवरी नामतः शुभा॥११॥पत्नीशतानां मुख्यानां प्रवरा सा वसुन्धरे॥तां चैव रमयामास उद्यानेषु वनेषु च॥१२॥प्रासादेषु च रम्येषु नदीनां पुलिनेषु च॥ प्रजाः पालयतस्तस्य दानानि ददतस्तथा ॥१३॥कालो गच्छति राजा तु भोगासक्तं च विन्दति॥भोगासक्तस्य वसुधे वर्षाणि सप्तसप्ततिः॥१४॥ पुत्राः सप्त तथा जाताः कन्याः पंच सुशोभनाः ॥ राज्ञां पचसुता दत्ताः कन्याः कमललोचनाः ॥१५॥ पुत्रान् संस्थापयामास स्थानेषु वसुधाधिपान् ॥ पीवर्या सह सुतः स राज्ञो च वसुधाधिपः ॥ १६ ॥ तत्र प्रबुद्धो नृपतिर्हाहेति वदते मुहुः ॥ स्मृत्त्वा तु मथुरां देवि स्मृत्वा संयमनं परम् ॥१७॥ततः सा पीवरी प्राह किमेवं भाषसे नृप ॥ प्रियाया वचनं श्रुत्वा राजा वचनमब्रवीत् ॥१८॥मत्तः सुतः प्रमत्तश्च असम्बद्धं प्रभाषते ॥ निद्रावशस्य वचनं न सम्प्रष्टुं त्वमर्हसि ॥ १९ ॥ पावयुवाच ॥ कथयस्व ममाद्य त्वं यद्यहं वल्लभा तव ॥ प्राणास्तवाय्यहं देव गोपयिष्यामि मे यदि ॥ २० ॥ प्रियाया वचनं श्रुत्वा प्रत्युवाच नराधिपः ॥ अवश्यं यदि वक्तव्यं गच्छावो मथुरां पुरीम् ॥ २१ ॥ तत्र गत्वा यथातत्त्वं वदिष्यामि शुभानने ॥ ददस्व विपुलं दानं ब्राह्मणभ्यः सुलोचने ॥ २२॥ पुत्रान्संस्थाप्य दौहित्रान्स्वे स्वे स्थाने शुभाप्रिये ॥ ग्रामांश्च कोशं रत्नानि पुत्रान्वीक्ष्य पुनः पुनः ॥ २३ ॥ ततः सम्मानयामास जनं पुरनिवासिनम् ॥ पितृपैतामहं राज्यं पालनीयं यथा क्रमम् ॥ २४ ॥ राज्ये पुत्राभिषेक्ष्यामि यदि वो रोचतेऽनघाः ॥ राज्यपुत्रकलत्राणि बन्धुवर्गं तथैव च ॥ २५ ॥ नित्यमिच्छन्ति वै लोको यमस्येच्छन्ति नान्यथा ॥ एवं ज्ञात्वा प्रसन्नेन कर्त्तव्यं चात्मनो हितम् ॥२६॥ तस्मात्सर्वप्रयत्नेन गच्छावो मथुरां पुरीम् ॥ अहो कष्टं यदस्माभिः पुरा राज्यमनुष्ठितम् ॥२७॥ इदानीं तु मया ज्ञातं त्यागान्नास्ति परं सुखम् ॥ नास्ति विद्यासमं चक्षुर्नास्ति चक्षुस्समं बलम् ॥ २८ ॥ नास्ति रागसमं दुःखं नास्ति त्यागात्परं सुखम् ॥ यः कामान्कुरुते सर्वान्यश्चैतान्केवलांस्त्यजेत् ॥२९॥ प्रायेण सर्वकामानां परित्यागो विशिष्यते ॥

अभिषिच्य सुतं ज्येष्ठमनुयोज्य पराञ्चहून् ॥ ३० ॥ ततः पौरजनं दृष्ट्वा चतुरङ्गबलान्वितः ॥ ततः कालेन महता सम्प्राप्तो मथुरां पुरीम् ॥ ३१ ॥ तेन दृष्टा पुरी रम्या वासवस्य पुरी यथा ॥ तिथिर्द्वादशाभिर्युक्ता पुण्या पापहरा शुभा ॥३२॥ रम्यं मधुवनं नाम विष्णुस्थानं मनुत्तमम् ॥ तं दृष्ट्वा मनुजो देवि कृतकृत्यो हि जायते ॥ ३३ ॥ एकादशी शुक्लपक्षे मासि भाद्रपदे तथा ॥ तस्यां स्नातो नरो देवि कृतकृत्यो हि जायते ॥ ३४ ॥ वनं कुन्दवनं नाम तृतीयं चैवमुत्तमम् ॥ तत्र गत्वा नरो देवि कृतकृत्यो हि जायते ॥ ३५ ॥ एकादशी कृष्णपक्षे मासि भाद्रपदे हि या ॥ तत्र स्नातो नरो देवि रुद्रलोके महीयते ॥३६॥ चतुर्थं काम्यकवनं वनानां वनमुत्तमम्॥तत्र गत्वा नरो देवि मम लोके महीयते ॥ ३७ ॥ विमलस्य च कण्डे तु सर्वपापैः प्रमुच्यते ॥ यस्तत्र मुंचते प्राणान्मम लोकं स गच्छति ॥३८ ॥ पंचमं बकुलं नाम वनानामुत्तमं वनम् ॥ तत्र गत्वा नरो देवि अग्निस्थानं स गच्छति ॥ ३९ ॥ यमुनायाः परे पारे देवानामपि दुर्लभम् ॥ अस्ति भद्रवनं नाम षष्ठं वनमनुत्तमम् ॥ ४० ॥ तत्र गत्वा तु वसुधे मद्भक्तो मत्परायणः ॥ तद्वनस्य प्रभावेण नागलोकं स गच्छति ॥ ४१ ॥ सप्तमं तु वनं भूमे खादिरं लोकविश्रुतम् ॥ तत्र गत्वा नरो भद्रे मम लोकं स गच्छति ॥ ४२ ॥ महावनं चाष्टमं तु सदैव तु मम प्रियम् ॥ यत्र गत्वा तु मनुज इन्द्रलोके महीयते ॥ ४३ ॥ लोहजङ्घवनं नाम लोहजङ्घेन रक्षितम् ॥ नवमं तु वनं नाम सर्वपातकनाशनम् ॥ ४४ ॥ वनं बिल्ववनं नाम दशमं देवपूजितम् ॥ तत्र गत्वा तु मनुजो ब्रह्मलोके महीयते ॥ ४५ ॥ एकादशं तु भाण्डीरं योगिनः प्रियमुत्तमम् ॥ तस्य दर्शनमात्रेण नरो गर्भं न गच्छति ॥४६॥ भाण्डीरं समनुप्राप्य वनानां वनमुत्तमम् ॥ वासुदेवं ततो दृष्ट्वा पुनर्जन्म न विद्यते ॥ ४७ ॥ वृन्दावनं द्वादशकं वृन्दया परिरक्षितम् ॥ मम चैव प्रियं भूमे महापातकनाशनम् ॥ ४८॥ वृन्दावनं च गोविन्दं ये पश्यन्ति वसुन्धरे ॥ न ते यमपुरं यान्ति यान्ति पुण्यकृतां गतिम् ॥ ४९ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे मथुरामाहात्म्ये मथुरातीर्थमाहात्म्यं नाम त्रिपंचाशदधिकशततमोऽध्यायः ॥ १५३ ॥

॥१५९॥

अथ यमुनातीर्थप्रभावः ॥ वराह उवाच ॥ एवंविधां च मथुरां दृष्ट्वा तौ मुदमापतुः ॥ एवं तु वसतस्तस्य राज्ञस्तत्र वसुन्धरे ॥ १ ॥ पप्रच्छ च तदा भार्या यद्वृत्तं पूर्वभाषितम् ॥ पुरस्थेन तदा राज्ञा वक्ष्यामि मथुरां प्रति ॥ २ ॥ तन्मे वद महाराज यद्गोप्यं पूर्वभाषितम् ॥ राजाप्युवाच

तां राज्ञीं त्वयाप्युक्तं पुरा मम ॥ ३ ॥ तद्वदस्व स्वकं गुह्यं पश्चाद्रक्ष्याम्यहं तव ॥ इत्युक्त्वा पीवरी ज्ञात्वा प्रहस्य तु गुणालया ॥ ४ ॥ प्रोवाच चैव राजानं मनसः प्रीतिकारणम् ॥ अहं तु पीवरी नाम गंगातीरनिवासिनी ॥ ५ ॥ आगतेमां पुरीं द्रष्टुं कुबुदस्य तु द्वादशीम् ॥ नावमारुह्य यान्तीह पतिता यमुनाजले ॥ ६ ॥ सद्यः प्राणैर्वियुक्ता च तत्तीर्थस्य प्रभावतः ॥ काशीराजपतेः कन्या यातास्मि वसुधाधिप ॥ ७ ॥ त्वया विवाहिता राजन्न च मां विजहात्स्मृतिः ॥ एततीर्थप्रभावेण धर्मयुक्ता तथाऽनघ॥८॥ धारापतनके तीर्थे त्यक्त्वा जीवितमात्मनः॥ एतच्छ्रुत्वा ततो राजा कथां प्राग्जन्मसम्भवाम् ॥ ९ ॥ स्त्रां चाप्यकथयत्तस्यै यथा संयमने मृतः ॥ एवं तौ मथुरां प्राप्य स्नात्वा यामुनतीर्थके ॥ १० ॥ मां पश्यन्तौ नियमतस्तत्रैव निधनं गतौ ॥ मतौ सर्वपरित्यक्तौ गतौ मम सलोकताम् ॥ ११ ॥ एतत्ते कथितं देवि आश्चर्यं यदभून्महत् ॥ त्यक्त्वा चात्मतनुं तीर्थे धारापतनसंज्ञके ॥ १२ ॥ नाकलोकमवाप्नोति त्यक्तपापो न संशयः ॥ यमुनेश्वरमासाद्य त्यक्त्वा जीवित मात्मनः ॥१३॥ विष्णुलोकमवाप्नोति दिव्यमूर्तिश्चतुर्भुजः ॥ धारापतनके स्नात्वा नाकलोके स मोदते ॥१४॥ अथात्र मुंचते प्राणान्मम लोकं स गच्छति ॥ अतः परं नागतीर्थं तीर्थानामुत्तमोत्तमम्॥१५॥यत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ घण्टाभरणकं तीर्थं सर्वपापप्रमोचनम् ॥ १६॥ यस्मिन्स्नातो नरो याति सूर्यलोकं न संशयः ॥ अथाऽत्र मुंचते प्राणान्मम लोकं स गच्छति ॥ १७ ॥ पुनरन्यत् प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ तीर्थानामुत्तमं तीर्थं ब्रह्मलोकेषु विश्रुतम् ॥ १८ ॥ तत्र स्नात्वा च पीत्वा च नियतो नियताशनः ॥ ब्रह्मणा समनुज्ञातो मम लोकं स गच्छति ॥ १९ ॥ सोमतीर्थं तु वसुधे पवित्रे यमुनाम्भसि ॥ यत्र पश्यति मां सोमो द्वापरे युगसंस्थिते ॥ २० ॥ तत्राभिषेकं कुर्वीत स्वकर्मपरिनिष्ठितः ॥ मोदते सोमलोके तु एवमेव न संशयः ॥ २१ ॥ अथात्र मुंचते प्राणान्मम लोकं स गच्छति ॥ सरस्वत्याश्च पतनं सर्वपापहरं शुभम् ॥ २२ ॥ तत्र स्नातो नरो देवि अवर्णोऽपि यतिर्भवेत् ॥ पुनरन्यत्प्रवक्ष्यामि माथुरे मम मण्डले ॥ २३ ॥ यस्तत्र कुरुते स्नानं त्रिरात्रोपोषितो नरः॥स्नानमात्रेण मनुजो मुच्यते ब्रह्महत्यया ॥ २४ ॥ अथात्र मुंचते प्राणान्मम लोकं स गच्छति ॥ दशाश्वमेध मृषिभिः पूजितं सर्वदा मुदा ॥ २५ ॥ तत्र ये स्नान्ति नियतास्तेषां स्वर्गो न दुर्लभः ॥ मथुरापश्चिमे पार्श्वे सततं त्वृषिपूजितम् ॥ २६ ॥

ब्रह्मणा सृष्टिकाले तु मनसा निर्मितं पुरा ॥ मानसं नाम तीर्थं तु ऋषिभिः पूजितं पुरा ॥ २७ ॥ तत्र स्नात्वा दिवं यान्ति ये मृतास्तेऽ
पुनर्भवाः ॥ तीर्थं तु विप्रराजस्य पुण्यं पापहरं शुभम् ॥ २८ ॥ यत्र स्नाताम्नमुष्यांश्च विप्रराजो न पीडयेत् ॥ अष्टम्यां च चतुर्दश्यां
चतुर्थ्यां तु विशेषतः ॥ २९ ॥ तस्मिंस्तीर्थवरे स्नातं न पीडयति विप्रराट् ॥ विद्यास्थेषु सर्वेषु यज्ञदानक्रियासु च ॥ ३० ॥ अविघ्नं कुरुते
तस्य सततं पार्वतीसुतः ॥ तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३१ ॥ ततः परे कोटितीर्थं पवित्रं परमं स्मृतम् ॥ तत्र वै स्नान
मात्रेण गवां कोटिफलं लभेत् ॥ ३२ ॥ तथात्र मुञ्चते प्राणाँल्लोभमोहविवर्जितः ॥ सोमलोकमतिक्रम्य मम लोकं च गच्छति ॥ ३३ ॥ अतः
परं शिवक्षेत्रमर्द्धक्रोशं तु दुष्करम् ॥ तत्र स्थितो हरो देवो मथुरां रक्षते सदा ॥३४॥ तत्र स्नात्वा च पीत्वा च माथुरं लभते फलम् ॥ अथाऽत्र
मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३५ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये यमुनातीर्थप्रभावो नाम चतुष्पञ्चाशदधिकश
ततमोऽध्यायः ॥ १५४ ॥ अथाऽक्रूरतीर्थप्रभावः ॥ श्रीवराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि मर्त्यलोके सुदुर्लभम् ॥ अनन्तं विदितं तीर्थमचलं
ध्रुवमव्ययम् ॥ १ ॥ तत्र नित्यं स्थितो देवि लोकानां हितकाम्यया ॥ मां दृष्ट्वा मनुजा देवि मुक्तिभाजो भवन्ति ते ॥ २ ॥ अयने
विषुवे चैव तथा विष्णुपदीषु च ॥ अनन्तं तं समासाद्य मुच्यते सर्वपातकैः ॥ ३ ॥ अक्रूरेति च विख्यातं मम क्षेत्रं वसुन्धरे ॥ तत्र स्नात्वा
महाभागे राहुग्रस्ते दिवाकरे ॥ ४ ॥ राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ॥ तीर्थराजं हि चाक्रूरं गुह्यानां गुह्यमुत्तमम् ॥ ५ ॥ तत्स्ना
नात्फलमाप्नोति प्रयागस्नानजं फलम् ॥ अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे ॥ ६ ॥ नाम्ना तु सुधनो नाम मम भक्तः सदैव हि ॥ धन
धान्यसमायुक्तः सुतयुक्तः सदैव हि ॥ ७ ॥ बन्धुपुत्रकलत्रैश्च गृहे प्रीतिरनुत्तमा ॥ पुत्रदारसमेतस्य मयि भक्तिर्वसुन्धरे ॥ ८ ॥ गच्छन्ति दिवसा
स्तस्य मासाः संवत्सरास्तथा ॥ करोति गृहकृत्यानि धनोपायेन नित्यशः ॥ ९ ॥ मानकूटं तुलाकूटं न करोति स कर्हिचित् ॥ एवं च वसत
स्तस्य बहवो वत्सरा गताः ॥ १० ॥ नित्यं कालं च कुरुते हरिपूजनमुत्तमम् ॥ पुष्पदीपप्रदानेन चन्दनेन सुगन्धिना ॥ ११ ॥ उपहारेण
दिव्येन धूपेन च सुगन्धिना ॥ एकादश्यां तु कुरुते पक्षयोरुभयोरपि ॥ १२ ॥ उपवासं तु कुरुते रात्रौ जागरणं तथा ॥ स गच्छति यथाकाल

मक्रूरं तीर्थमुत्तमम् ॥ १३ ॥ तत्रागत्य ममाग्रेऽसौ नृत्यते शुभदर्शनः ॥ सुधनस्तु वणिक्श्रेष्ठः कदाचिद्रात्रिजागरे ॥ १४ ॥ चलमानो गृहीतस्तु चरणे ब्रह्मरक्षसा ॥ कृष्णवर्णो महाकाय ऊर्ध्वकेशो भयंकरः ॥ १५ ॥ पादे गृहीत्वा वसुधे इदं वचनमब्रवीत् ॥ १६ ॥ राक्षसोऽहं वणिक्श्रेष्ठ वसामि वनमाश्रितः ॥ त्वामद्य भक्षयिष्यामि तृप्तिं यास्यामि शाश्वतीम् ॥ १७ ॥ सुधन उवाच ॥ प्रतीक्षस्व क्षणं मेऽद्य दास्यामि तव पुष्कलम् ॥ भक्षयिष्यसि मे गात्रं मिष्टान्नपरिपोषितम् ॥ १८ ॥ जागरं देवदेवस्य कर्तुमिच्छामि राक्षस ॥ मम व्रतं सार्वकालं यज्ञागर्मि हरेः पुरः ॥ १९ ॥ तत्र जागरणं कृत्वा प्रभाते तव सन्निधौ ॥ आगमिष्याम्यहं शीघ्रमादित्योदयनं प्रति ॥२० ॥ ततः खादिष्यसे गात्रं विनिवृत्तस्य जागरात् ॥ विष्णुतुष्टयै व्रतमिदमारब्धं सर्वकामदम् ॥ २१ ॥ मा कुरु व्रतभङ्गं मे रक्षो नारायणस्य हि ॥ जागरे विनिवृत्ते तु मां भक्षय यथेप्सितम् ॥ २२ ॥ सुधनस्य वचः श्रुत्वा ब्रह्मरक्षः क्षुधार्दितः ॥ उवाच मधुरं वाक्यं वणिजं प्रति सादरम् ॥ २३ ॥ मिथ्या प्रभाषसे साधो त्वं पुनः कथमेष्यसि ॥को हि रक्षोमुखाद्भ्रष्टो मानुषो यो निवर्त्तते॥२४॥राक्षसस्य वचः श्रुत्वा स वणिग्वाक्यमब्रवीत्॥सत्यमूलं जगत्सर्वं सर्वं सत्ये प्रतिष्ठितम् ॥२५॥ सिद्धिं लभन्ते सत्येन ऋषयो वेदपारगाः ॥ यद्यहं च वणिक् पूर्वं कर्मणा न हि दूषितः ॥२६॥ प्रातश्च मानुषो भावो विद्यतेनान्तरात्मना ॥ शृणु मत्समयं रक्षो येनाहं पुनरागमम्॥२७॥कृत्वा जागरणं तत्र नृत्यं कृत्वा यथासुखम् ॥पुनरेष्याम्यहं रक्षो नासत्यं विद्यते मयि ॥२८॥ सत्येन दीयते कन्या सत्यं जल्पन्ति ब्राह्मणाः ॥ सत्योत्तीर्णा हि राजानः सत्येन वसुधा धृता ॥ २९॥ स्वर्गमिच्छन्ति सत्येन मोक्षः सत्येन लभ्यते॥सत्येन सूर्यस्तपति सोमः सत्येन राजते ॥३०॥ यमः सत्येन हरति सत्यादिन्द्रो विराजते॥तत्सत्यं मम नश्येत यद्यहं नागमे पुनः ॥ ३१ ॥ परदारांस्तु यो गच्छेत्काममोहप्रपीडितः ॥ ३२ ॥ तस्य पापेन लिप्येऽहं यदि नायामि ते पुरः ॥ ३३ ॥ दत्त्वा च भूमिदानं यो ह्यपकारं करोति च ॥ तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥ ३४ ॥ पूर्वं भुक्त्वा स्त्रियं यस्तु सुखमाप्य विहत्य च ॥ द्वेषात्तां यदि चेज्जह्यात्तस्यावं मे भवत्वलम् ॥ ३५ ॥ पङ्क्तिभेदं तु यः कुर्यादेकपंक्त्याशिनां ध्रुवम् ॥ तस्य पापेन लिप्येऽहं नागन्ता यदि ते पुरः ॥ ३६ ॥ अमावस्यां महारक्षः श्राद्धं कृत्वा स्त्रियं व्रजेत् ॥ तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥ ३७ ॥ अष्टाष्टमी त्वमावास्या

उभे पक्षे चतुर्दशी ॥ अस्नातानां गतिं यास्याम्यहं वै नागमे पुनः ॥ ३८ ॥ गुरोश्चोतुः सुतस्यापि सख्युर्वै मातुलस्य च ॥ व्यवस्यति च यन्नारीं यो मोहेन विमोहितः ॥ ३९ ॥ अभिगच्छति मन्दात्मा तत्पापं मे भवेत्तदा ॥ राजपत्नीं ब्रह्मपत्नीं विधवां योऽभिगच्छति ॥ ४० ॥ तस्य पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥ यस्तु कन्यां सकृद्दत्त्वा अन्यस्मै चेत्पुनर्दद्यात् ॥ ४१ ॥ तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥ राजयाजकयाज्याश्च ये च वै ग्रामयाजकाः ॥४२ ॥ तेषां पापेन लिप्येऽहं यद्यहं नागमे पुनः ॥ ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे ॥४३॥ या गतिस्तां प्रपद्येऽहं यद्यहं नागमे पुनः ॥ श्रीवराह उवाच॥सुधनस्य वचः श्रुत्वा सन्तुष्टो ब्रह्मराक्षसः ॥४४॥ उवाच मधुरं वाक्यं गच्छ शीघ्रं नमोऽस्तु ते॥ब्रह्मराक्षससुक्तोऽसौ वणिक् तु दृढनिश्चयः॥४५॥पुनर्नृत्यति चैवाग्रे मम भक्तो व्यवस्थितः ॥ अथ प्रभातसमये नृत्यचित्तोऽति कोविदः॥४६॥पुनः पुनर्वै उच्चार्य नमो नारायणाय च॥निवृत्ते जागरे सोऽथ कालिन्दीसलिलाप्लुतः ॥४७॥ दृष्ट्वा मां दिव्यरूपं तु गतोऽसौ मथुरां पुरीम्॥दृष्ट्वाग्रे त्वहं तेन पुरुषो दिव्यरूपवान् ॥४८॥ स च पृष्टो मया देवि क्व भवान्प्रस्थितो द्रुतम् ॥ पुरुषस्य वचः श्रुत्वा सुधनो वाक्यमब्रवीत् ॥४९॥ अहं गच्छामि त्वरितो ब्रह्मराक्षससन्निधौ ॥ निवारयामास तदा न गंतव्यं त्वयानघ॥५०॥ जीवितो धर्ममाहात्म्यं मृते धर्मः कुतो यशः ॥ पुरुषस्य वचः श्रुत्वा स वणिग्वाक्यमब्रवीत् ॥ ५१ ॥ तत्र सत्यं वदिष्यामि यास्ये राक्षससन्निधौ ॥ आगतोऽहं महाभाग नर्त्तयित्वा यथासुखम् ॥ ५२ ॥ विष्णवे लोकनाथाय चागतो हरिजागरात् ॥ इदं शरीरं मे रक्षो भक्षयस्व यथेप्सितम् ॥ ५३ ॥ यथान्यायं विधानेन यथा वा तव रोचते ॥ नोक्तपूर्वं मयाऽसत्यं कदाचिदपि राक्षस ॥ ५४ ॥ तेन सत्येन मां भुङ्क्ष्व ब्रह्मराक्षस दारुण ॥ वणिजस्तु वचः श्रुत्वा ततोऽसौ ब्रह्मराक्षसः ॥ ५५ ॥ उवाच मधुरं वाक्यं सुधनं तदनन्तरम् ॥ साधु तुष्टोऽस्मि भद्रं ते सत्यं धर्मश्च पालितः ॥५६॥ वणिक् त्वं चातिविज्ञस्तु यस्य ते गतिरीदृशी ॥ जागरस्य समस्तस्य मम पुण्यं प्रयच्छ वै ॥ ५७ ॥ सत्यपुण्यप्रभावेण यथाहं मुक्तिमाप्नुयाम् ॥ सुधन उवाच ॥ नाहं दास्यामि ते पुण्यं नृत्यस्य नरभोजन ॥ ५८ ॥ अर्द्धं वाथ समस्तं वा प्रहरं चार्द्धमेव वा ॥ सुधनस्य वचः श्रुत्वा अब्रवीद्ब्रह्म राक्षसः ॥ ५९ ॥ एकनृत्यस्य मे पुण्यं दद त्वं वणिगुत्तम ॥ सुधन उवाच ॥ नाऽहं दास्यामि ते पुण्यं यथोक्तं च समाचर ॥ ६० ॥ केन त्वं

कर्मदोषेण राक्षसत्वमुपागतः ॥ यत्ते गुह्यं महाभाग सर्वं तत्कथयस्व मे ॥ ६१ ॥ सुधनस्य वचः श्रुत्वा विहसित्वाह राक्षसः ॥ किं त्वं मां च विजानासि प्रतिवासि ह्यहं तव ॥ ६२ ॥ अग्निदत्तस्तु वै नाम छान्दसो ब्राह्मणोत्तमः ॥ इष्टकांस्तु हरन्नित्यं परकीर्यांश्च सर्वदा ॥ ६३ ॥ मृत स्मुगृहकामेन राक्षसत्वमुपागतः ॥ मया त्वं हि यथाप्राप्त उपकारं कुरुष्व मे ॥ ६४ ॥ एकविंशमपुण्यं मे देहि त्वं वणिगुत्तम ॥ कृपया तु समायुक्तो वणिग्वचनमब्रवीत् ॥ ६५ ॥ साधु राक्षस दत्तं ते एकनृत्यं मया तव ॥ एकनृत्यप्रभावेण राक्षसो मुक्तिमागतः ॥ ६६ ॥ श्रीवराह उवाच ॥ सुधनस्तु ततो देवि विश्वरूपं जनार्दनम् ॥ अग्रतस्तु स्थितं देवं दृष्ट्वाऽसौ धरणीं गतः ॥६७॥ उवाच मधुरं वाक्यं देवदेवो जनार्दनः॥ चतुर्भुजो दिव्यतनुः शंखचक्रगदाधरः ॥ ६८ ॥ विमानवरमारुह्य मम लोकं व्रजस्व च ॥ इत्युक्त्वा माधवो देवस्तत्रैवान्तरधीयत ॥ ६९ ॥ सुधनः सशरीरोऽपि सकुटुंबो दिवं ययौ ॥ विमानवरमारुह्य विष्णोर्लोकं जगाम ह ॥ ७० ॥ एष तीर्थप्रभावो वै कथितस्ते वसुन्धरे ॥ अक्रू राच्च परं तीर्थं न भूतं न भविष्यति ॥ ७१ ॥ तस्य तीर्थप्रभावेण सुधनो मुक्तिमागतवान् ॥ द्वादशी शुक्लपक्षे तु कुमुदस्य च या भवेत्॥७२॥ तस्मिन्स्नातस्य वसुधे राजसूयफलं भवेत् ॥ कार्त्तिकीं समनुप्राप्य तत्तीर्थं तु वसुन्धरे ॥७३॥ वृषोत्सर्गं नरः कुर्वेस्तारयेत्स्वकुलोद्भवान् ॥ श्राद्धं यः कुरुते सुधु कार्तिक्यां प्रयतो नरः ॥ ७४ ॥ पितरस्तारितास्तेन सदैव प्रपितामहाः ॥ ७५ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये अक्रूर तीर्थप्रभावो नाम पंचपंचाशदधिकशततमोऽध्यायः ॥ १५५ ॥ अथ मथुराप्रादुर्भावः ॥ श्रीवराह उवाच ॥ वत्सक्रीडनकं नाम तीर्थं वक्ष्ये परं मम ॥ तत्र रक्तशिलाबद्धं रक्तचन्दनभूषितम् ॥ १ ॥ स्नानमात्रेण तत्रैव वायुलोकं व्रजेन्नरः ॥ तत्राऽथ मुञ्चते प्राणान्मम लोके महीयते ॥ २ ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ अस्ति भाण्डीरकं नाम यत्तीर्थं परमुत्तमम् ॥ ३ ॥ सालैस्तालैश्च तरुभिस्तमालैरर्जुनैस्तथा ॥ इङ्गुदैः पीलुकैश्चैव करीरैरक्तपुष्पकैः ॥ ४ ॥ तस्मिन्भाण्डीरके स्नातो नियतो नियताशनः ॥ सर्वपापविनिर्मुक्तश्चेन्द्रलोकं स गच्छति ॥ ५ ॥ तत्राऽथ मुञ्चते प्राणान्मम लोकं च गच्छति ॥ पुनरन्यत्प्रवक्ष्यामि क्षेत्रं वृन्दावनं मम ॥ ६ ॥ तत्राहं क्रीडयिष्यामि गोभि गोपालकैः सह ॥ रम्यं च सुप्रतीतं च देवदानवदुर्लभम् ॥७॥ तत्र कुण्डे महाभागे बहुगुल्मलतावृते ॥ तत्र स्नानं प्रकुर्वीत चैकरात्रोषितो नरः॥८॥

गन्धर्वैरप्सरोभिश्च क्रीडमानः स मोदते ॥ तत्राथ सुखते प्राणान्मम लोकं च गच्छति ॥ ९ ॥ पुनरन्यत्प्रवक्ष्यामि महापातकनाशनम् ॥ तत्र वृन्दावने तीर्थे यत्र केशी निपातितः ॥ १० ॥ तीर्थं शतगुणं पुण्यं यत्र केशी निपातितः ॥ केश्यः शतगुणं पुण्यं यत्र विश्रमते हरिः ॥ ११ ॥ तस्माच्छतगुणं पुण्यं नात्र कार्या विचारणा ॥ तत्रापि च विशेषोऽस्ति केशीतीर्थे वसुन्धरे ॥१२॥ तस्मिन्पिण्डप्रदानेन गयातुल्यफलं भवेत्॥ स्नाने दाने तथा होमे अग्निष्टोमफलं भवेत् ॥ १३ ॥ सूर्यतीर्थेषु वसुधे द्वादशादित्यसंज्ञके ॥ कालिंद्यां रमते तत्र कालिंद्याः सलिले शुभे॥१४॥ कालिंद्यो दमितस्तत्र आदित्याः स्थापिता मया ॥ वरं वृणुध्वं भद्रं वो यद्वो मनसि वर्त्तते॥१५॥ आदित्या ऊचुः ॥ वरं ददासि नो देव वराहार्ह यदि वा वयम् ॥ अस्मिंस्तीर्थवरे स्नानमस्माकं संप्रदीयताम् ॥ १६ ॥ आदित्यानां वचः श्रुत्वा क्रीडां कृत्वा वसुन्धरे ॥ स्नानमात्रेण तत्रैव मुच्यते सर्वकिल्बिषैः ॥ १७ ॥ अथात्र मुंचते प्राणान्मम लोकं स गच्छति ॥ उत्तरे हरिदेवस्य दक्षिणे कालियस्य तु ॥ १८ ॥ अनयो र्देवयोर्मध्ये ये मृतास्तेऽपुनर्भवाः ॥१९॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये मथुरायाद्भवो नाम षट्पंचाशदधिकशततमोऽध्यायः॥१५६॥

अथ मलयार्जुनतीर्थादिस्नानादिप्रशंसा ॥ श्रीवराह उवाच ॥ यमुनापारमुल्लङ्घ्य तत्रैव च महामुने ॥ मलयार्जुनकं तीर्थं कुण्डं तत्र च विद्यते ॥ १ ॥ पर्यंतं तत्र शकटं भिन्नभाण्डकुटीवटम् ॥ तत्र स्नानोपवासाभ्यामनन्तं फलमश्नुते ॥ २ ॥ द्वादश्यां शुक्लपक्षस्य ज्येष्ठमासे वसुन्धरे ॥ तत्र स्नानेन दानेन महापातकनाशनम् ॥ ३ ॥ ज्येष्ठस्य शुक्लद्वादश्यां स्नात्वा सुनियतेन्द्रियः ॥ मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥ ४ ॥ यमुनासलिले स्नातः शुचिर्भूत्वा जितेन्द्रियः ॥ समभ्यर्च्याच्युतं सम्यक्प्राप्नोति परमां गतिम् ॥ ५ ॥ अपि चास्मत्कुले जातः कालिन्दीसलिले प्लुतः ॥ अर्चयिष्यति गोविन्दं मथुरायामुपोषितः ॥ ६ ॥ इति गायन्ति पितरः परलोकगताः सदा ॥ द्वादश्यां ज्यष्ठमास तु समभ्यर्च्य जनार्दनम् ॥ ७ ॥ धन्योऽसौ पिण्डनिर्वापं यमुनायां करिष्यति ॥ तत्रैव तु महातीर्थे वने बहुलसंज्ञके ॥ ८ ॥ तत्र स्नातो नरो देवि रुद्रलोके महीयते ॥ द्वादश्यां चैत्रमासे तु शुक्लपक्षे वसुन्धरे ॥ ९ ॥ तत्र स्नातो नरो याति मम लोकं न संशयः ॥ अस्ति भाण्डहृदं नाम परमेषु दुर्लभम् ॥ १० ॥ दृश्यन्तेऽरहस्तत्र आदित्याः शुभकारिणः ॥ तत्र

चार्कस्थले कुण्डे स्नानं यः कुरुते नरः ॥ ११ ॥ सर्वपापविनिर्मुक्तः सूर्यलोकं व्रजेन्नरः ॥ तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥ १२ ॥
अर्कस्थलसमीपे तु कूपं तु विमलोदकम् ॥ सप्तसामुद्रिकं नाम देवानामपि दुर्लभम् ॥ १३ ॥ तत्र स्नानेन वसुधे स्वच्छन्दगमनालयः ॥ अथात्र
मुंचते प्राणान्मम लोकं स गच्छति ॥ १४ ॥ तत्र वीरस्थलं नाम क्षेत्रं गुह्यं परं मम ॥ आसन्नसलिलं चैव पद्मोत्पलविभूषितम् ॥ १५ ॥
यस्तत्र कुरुते स्नानमेकरात्रोषितो नरः ॥ स मत्प्रसादात्सुश्रोणि वीरलोके महीयते ॥ १६ ॥ अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥
कुशस्थलं च तत्रैव पुण्यं पापहरं शुभम् ॥ १७ ॥ तत्र स्नातो नरो देवि ब्रह्मलोके महीयते॥अथात्र मुंचते प्राणान्मम लोकं स गच्छति ॥१८॥
तत्र पुष्पस्थलं नाम शिवक्षेत्रमनुत्तमम् ॥ तत्र स्नानेन मनुजः शिवलोके महीयते ॥ १९ ॥ ख्याता एते पञ्च देशा महापापविनाशनाः ॥ तेषु
स्नानेषु वसुधे ब्रह्मणा सह मोदते ॥२०॥ तत्र गोपीश्वरो नाम महापातकनाशनः ॥ कृष्णस्य रमणार्थं हि सहस्राणि च षोडश ॥ २१ ॥ गोप्यो
रूपाणि चक्रे च तत्र क्रीडनके हरिः ॥ यदा बालेन कृष्णेन भग्नार्जुनयुगं तथा ॥२२॥ शकटं च तदा भिन्नं घटभाण्डकुटीरकम् ॥ ताभिस्तत्रैव
गोविन्दं क्रीडन्तं च यदृच्छया ॥ २३ ॥ परिष्वज्य हि धर्मेण व्याजेन च सुगोपितम् ॥ मातलिस्तत्र चागत्य देवैरुक्तं यथोदितम् ॥ २४ ॥
गोपवेषधरं देवमभिषेकं चकार ह ॥ आनीय सप्त कलशान्नत्वौपविपरिप्लुतान् ॥ २५ ॥ गोपीमण्डलपातेन स्रापितो हेमकुण्डलः ॥ गोप्यो
गायन्ति नृत्यन्ति कृष्ण कृष्ण इति ब्रुवन् ॥ २६ ॥ तत्र गोपीश्वरं देवं मातालिः स्थाप्य पूजितम् ॥ कूपं च स्थापयामास मांगल्यैः कलशैः
शुभैः ॥ २७ ॥ सप्तसामुद्रिकं नाम कूपं तु विमलोदकम् ॥ देवस्याग्रे तु वसुधे गोपा यस्य महात्मनः ॥ २८ ॥ पितरश्चापि नन्दन्ति पानीयं
पिण्डमेव च ॥ सप्तसामुद्रिके कूपे यः श्राद्धं संप्रदास्यति ॥२९॥ पितरस्तारितास्तेन कुलानां सप्तसप्ततिः ॥ सोमवारे त्वमायां वै पिण्डदानं करोति
यः ॥ ३० ॥ पितरस्तस्य तृप्यन्ति कोटिवर्षशतान्यलम् ॥ गोविन्दस्य च देवस्य तथा गोपीश्वरस्य च ॥ ३१ ॥ मध्ये तु मरणं
यस्य शक्रस्यैति सलोकताम् ॥ तथा बहुलरुद्रस्य गोविन्दस्यैव मध्यतः ॥३२॥ तद्भद्रब्राह्मणमाशास्य गोपीशस्यैव मध्यतः ॥ एतेषु स्नानदानेन
पिण्डपातेन भामिनि ॥ ३३ ॥ नरस्तारयते पुंसां दश पूर्वान्दशापरान् ॥ एषु स्नातो नरो देवि देवैश्च सह मोदते ॥ ३४ ॥ तत्राथ मुञ्चते

प्राणान्मम लोकं स गच्छति ॥ वसुपत्रं महातीर्थं पुण्यं परममुत्तमम् ॥ ३५ ॥ मथुरादक्षिणे पार्श्वे क्षेत्रं फाल्गुनकं तथा ॥ तत्र स्नात्वा च पीत्वा च परलोके महीयते ॥ ३६ ॥ तत्र फाल्गुनके चैव तीर्थे परमदुर्लभे ॥ वृषभाञ्जनकं नाम क्षेत्रं मे दुर्लभं महत् ॥ ३७ ॥ तत्राभिषेकं यः कुर्यात्स देवैः सह मोदते ॥ तत्र यो मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३८ ॥ अस्ति तालवनं नाम धेनुकासुररक्षितम् ॥ मथुरापश्चिमे भागे अदूरादर्द्धयोजनम् ॥ ३९ ॥ तत्र कुण्डं स्वच्छजलं नीलोत्पलविभूषितम् ॥ तत्र स्नानेन दानेन वाञ्छितं फलमाप्नुयात् ॥ ४० ॥ अस्ति संपीठकं नाम अस्मिन् क्षेत्रे परं मम ॥ तत्र कुण्डं विशालाक्षि प्रसन्नसलिलं शुभम् ॥४१॥ तत्र स्नानं च ये कुर्युरेकरात्रोपिता नराः॥अग्निष्टोम फलं चैव लभन्ते नात्र संशयः ॥ ४२ ॥ अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ देवकीगर्भसंभूतो वसुदेवगृहे शुभे ॥ ४३ ॥ तत्र पुण्येन हि मया रविरागाधितः शुभः ॥ लब्धः प्राज्ञो मया पुत्रो रूपवांश्च गुणान्वितः ॥४४॥ तत्रैवं तु ततो दृष्टः पद्महस्तो दिवाकरः ॥ माघि भाद्रपदे देवी तिग्मतेजा विभावसुः ॥४५॥ सप्तम्यां कृष्णपक्षस्य रविस्तिष्ठति सर्वदा ॥ तस्मिन्नहनि यः स्नानं कुर्यात्कुण्डे समाहितः ॥४६॥ न तस्य दुर्लभं लोके सर्वदातां दिवाकरः ॥ आदित्येऽहनि सम्प्राप्ते सप्तम्यां तु वसुन्धरे ॥ ४७ ॥ नरो वाप्यथवा नारी प्राप्नोत्यविकलं फलम् ॥ तत्रैव तु तपस्तप्तं राज्ञा शन्तनुना पुरा ॥ ४८ ॥ आदित्यं तु पुरः स्थाप्य प्राप्तो भीष्मो महाबलः ॥ शन्तनुः प्राप्य तं पुत्रं गतोऽसौ हस्तिनापुरम् ॥४९॥ तत्र स्नानेन दानेन वाञ्छितं फलमाप्नुयात् ॥ ५० ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये मलयार्जुनतीर्थादिस्नानादि प्रशंसा नाम सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥ अथ मथुरातीर्थप्रादुर्भावः ॥ श्रीवराह उवाच ॥ विंशतियोजनानां तु माथुरं मम मण्डलम् ॥ यत्र तत्र नरः स्नातो मुच्यते सर्वकिल्बिषैः ॥१॥ वर्षाकाले तु स्थातव्यं यत्र स्थानं तु दुर्लभम् ॥ पुण्यात्पुण्यतरं चैव माथुरे मम मण्डले ॥२॥ सप्त द्वीपेषु तीर्थानि पुण्यान्यायतनानि च ॥ मथुरायां गमिष्यन्ति प्रसुप्ते तु सदा मयि ॥ ३ ॥ सुप्तोत्थितं तु दृष्ट्वा मां मथुरायां वसुन्धरे ॥ ते नरा मां प्रपश्यन्ति सर्वकालं न संशयः ॥ ४ ॥ सुप्तोत्थितं तु वसुधे दृष्ट्वा मे मुखपङ्कजम् ॥ सप्तजन्मकृतं पापं तत्क्षणादेव मुञ्चति ॥५॥ मथुरावासिनो लोकाः सर्वे ते मुक्तिभाजनाः ॥ मथुरां समनुप्राप्य दृष्ट्वा देव तु केशवम् ॥ ६ ॥ स्नात्वा पुनस्तु कालिन्द्यां

मम लोके महीयते ॥ स तत्फलमवाप्नोति राजसूयाश्वमेधयोः ॥ ७ ॥ प्रदक्षिणीकृतो येन मथुरायां तु केशवः ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥८॥ घृतपूर्णेन पात्रेण समग्रेण च वाससा ॥ केशवस्याग्रतो दत्त्वा दीपकं तु वसुन्धरे ॥ ९ ॥ पंचयोजनविस्तारमायामं पंच विस्तरम् ॥ दीपमालासमाकीर्णं विमानं लभते नरः ॥ १० ॥ सर्वकामसमृद्धं तदप्सरोगणसेवितम् ॥ रम्यमालासमाकीर्णं भोगाढ्यं सर्वकामिकम् ॥११॥ समारोहति वै नित्यं प्रभामण्डलमण्डितम् ॥ ये देवा ये च गन्धर्वाः सिद्धाश्चारणपन्नगाः ॥ १२ ॥ तं स्पृहन्ति सदा देवि पुण्यमस्ति कृतं भुवि ॥ यदि कालान्तरे पुण्यं हीयतेऽस्य पुरा कृतम् ॥ १३ ॥ सतां पुण्यगृहे देवि जायते मानवो हि सः ॥ धरण्युवाच ॥ क्षेत्रं हि रक्षते देव कस्त्विदं पापनाशनम् ॥१४॥ पशुभूतपिशाचैश्च रक्षोभूतविनायकैः ॥ एवमादिभिराकुष्टं तत्क्षेत्रं फलदं भवेत् ॥ १५ ॥ श्रीवराह उवाच ॥ मत्क्षेत्रं ते न पश्यन्ति मत्प्रभावात्कदाचन ॥ न विकुर्वन्ति ते दृष्ट्वा मत्पराणां हि देहिनाम् ॥ १६ ॥ रक्षार्थं हि मया दत्ता दिक्पालास्तु वरानने ॥ लोकपालास्तु चत्वारस्तीर्थं रक्षन्ति ये सदा ॥ १७ ॥ पूर्वां रक्षति इन्द्रस्तु यमो रक्षति दक्षिणाम् ॥ पश्चिमां रक्षते नित्यं वरुणः पाशभृत्स्वयम् ॥१८॥ उत्तरां वै कुबेरस्तु महाबलपराक्रमः ॥ मध्यं तु रक्षते नित्यं शिवो देव उमापतिः ॥१९ ॥ मथुरायां गृहं यस्तु प्रासादं कुरुते नरः ॥ चतुर्भुजस्तु विज्ञेयो जीवन्मुक्तो न संशयः ॥२०॥ मथुराया महाभागे कुण्डे च विमलोदके ॥ गर्म्भीरे, सर्वदा देवि तिष्ठते च चतुर्भुजः ॥२१॥ तत्र मुञ्चेत यः प्राणान् स्नानं कृत्वा वसुन्धरे ॥ वैष्णवं लोकमासाद्य क्रीडते स सुखादिव ॥२२॥ तत्रैव तु सदाश्चर्यं कथ्यमानं मया शृणु ॥ यदुच्यते वै सुश्रोणि कुण्डे तु विमलोदके ॥ २३ ॥ हेमन्ते तु भवेच्चोष्णं शीतलं ग्रीष्मके भवेत् ॥ तेजसा मम सुश्रोणि तुषारसदृशोपमम् ॥ २४ ॥ न वर्द्धते च वर्षासु ग्रीष्मे चापि न हीयते ॥ एतच्च महदाश्चर्यं तस्मिन्कुण्डे परं मम ॥२५॥ पदे पदे तीर्थफलं मथुरायां वसुंधरे॥ तत्र तत्र नरः स्नातो मुच्यते सर्वपातकैः ॥ २६ ॥ वर्षासु स्थूलतीर्थेषु स्नातव्यं तु प्रयत्नतः ॥ कूपे ह्रदे देवखाते गर्तेषु च नदीषु च ॥२७॥ प्रवाहेषु च दिव्येषु नदीनां सङ्गमेषु च ॥ वर्षासु सर्वतः स्नायाद्यदीच्छेत्परमां गतिम् ॥ २८॥ अस्ति क्षेत्रं परं दिव्यं मुचुकुन्दं तु नामतः ॥ मुचुकुंदः स्वपित्यत्र दानवासुरपातनः ॥ २९ ॥ तत्र कुण्डे नरः स्नात्वा प्राप्नोत्यभिमतं जलम् ॥ अथात्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ ३० ॥

इहजन्मकृतं पापमन्यजन्मकृतं च यत् ॥ शीघ्रं नश्यति तत्सर्वं कीर्त्तनात्केशवस्य तु ॥३१॥ किं तस्य बहुभिर्मंत्रैर्भक्तिर्यस्य जनार्दने॥नरके पच्यमानस्य गतिर्देवि जनार्दनः ॥ ३२ ॥ कृत्वा प्रदक्षिणं देवि विश्रामं कुरुते तु यः ॥ नारायणसमीपे तु सोऽनन्तफलमश्नुते ॥३३॥ सुतोत्थितं हरिं दृष्ट्वा मथुरायां वसुन्धरे ॥ न तस्य पुनरावृत्तिर्जायते स चतुर्भुजः ॥ ३४॥ कुसुदस्य तु मासस्य नवम्यां तु वसुन्धरे ॥ प्रदक्षिणीकृत्य भुवं सर्वपापैः प्रमुच्यते ॥ ३५ ॥ ब्रह्मघश्च सुरापश्च गोघ्नो भग्नव्रतस्तथा ॥ मथुरां तु परिक्रम्य पूतो भवति मानवः ॥ ३६ ॥ अष्टम्यां प्राप्य मथुरां दन्तधावनपूर्वकम् ॥ ब्रह्मचर्येण तां रात्रिं कृतसंकल्पमानसः ॥ ३७ ॥ धौतवस्त्रस्तु सुस्नातो मौनव्रतपरायणः ॥ प्रदक्षिणं तु कुर्वीत सर्वपातकनाशनम् ॥३८॥प्रदक्षिणां प्रकुर्वाणमन्यो यः स्पृशते नरः ॥ सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥३९॥ मथुरायां नरो गत्वा दृष्ट्वा देवं स्वयम्भुवम् ॥ प्रदक्षिणायां यत्पुण्यं तत्पुण्यं लभते नरः ॥ ४० ॥ देवस्याग्रे तु वसुधे कूपं तु विमलोदकम्॥ पितरश्चाभिनन्दन्ति पानयिं पिण्डमेव च ॥४१॥ चतुःसामुद्रिकं नाम विद्धि लोकेषु विश्रुतम् ॥ तत्र स्नातो नरो भद्रे देवैश्च सह मोदते ॥ ४२ ॥ तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥४३ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये मथुरातीर्थप्रभावो नामाष्टपंचाशदधिकशततमोऽध्यायः ॥ १५८ ॥ अथ मथुराप्रदक्षिणाविध्यादिकम् ॥ धरण्युवाच ॥ श्रुतं सुबहुशो देव तीर्थानां गुणविस्तरम् ॥ प्रोच्यमानं तु पुण्याख्यं त्वत्प्रसादाज्जनार्दन ॥ १ ॥ न दानैर्न तपोभिश्च न यज्ञैस्तादृशं फलम् ॥ भूमेः प्रदक्षिणायाश्च यादृशं तीर्थसेवया ॥ २ ॥ भुवश्च चतुरन्तायास्तीर्थप्रक्रमणं हरे ॥ सर्वतीर्थाभिगमनमस्ति दुर्गतरं नृणाम् ॥ ३॥ अस्ति कश्चिदुपायोऽत्र येन सम्यगवाप्यते ॥ प्रसादसुमुखो भूत्वा तत्सर्वं कथयस्व मे ॥ ४ ॥ श्रीवराह उवाच ॥ भद्रे शृणु महत्पुण्यं पृथिव्यां सर्वतोदिशम् ॥ परिक्रम्य यथाज्ञानं प्रमाणगणितं शुभम् ॥५॥ भूम्याः परिक्रमे सम्यक् योजनानां प्रमाणकम् ॥ षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ ६ ॥ तीर्थान्येतानि देवाश्च तारकाश्च नभस्थले ॥ गणितानि समस्तानि वायुना जगदायुषा ॥ ७ ॥ ब्रह्मणा लोमशेनैव नारदेन ध्रुवेण च ॥ जाम्बवत्याश्च पुत्रेण रावणेन हनूमता ॥८॥ एतैरनेकधा देवैः ससागरवना मही ॥ क्रमिता बलिना चैव बाह्यमण्डलरेखया ॥ ९ ॥ अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना ॥ तथा च पूर्वं देवेन्द्रैः पंचभिः पाण्डुनन्दनैः ॥१०॥ योगसिद्धेस्तथा कैश्चि

न्मार्कण्डेयमुखेरपि ॥ क्रमिता न क्रमिष्यन्ति न पूर्वे नापरे जनाः ॥११॥ अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः ॥ मनसापि न शक्यंते गमनस्य च का कथा ॥ १२ ॥ सप्तद्वीपे च तीर्थानां भ्रमणाद्यत्फलं भवेत् ॥ प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे ॥ १३ ॥ मथुरां समनुप्राप्य यस्तु कुर्यात्प्रदक्षिणम् ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥१४॥ तस्मात्सर्वप्रयत्नेन सर्वकामानभिप्सुभिः॥ कर्त्तव्या मथुरां प्राप्य नरैः सम्यक्प्रदक्षिणा ॥१५॥ धरण्युवाच ॥ यथाविधानक्रमणं मथुरायामवाप्यते ॥ प्रदक्षिणाफलं सम्यगनुक्रमविधिं वद॥१६॥ श्रीवराह उवाच ॥ पुरा सर्तार्षिभिः पृष्टो ब्रह्मा लोकपितामहः ॥ इदमेव पुरा प्रोक्तं यथा पृष्टा त्वया ह्यहम् ॥१७॥ श्रुत्वा सर्वपुराणोक्तं तीर्थानुक्रमणं परम् ॥ पृथिव्या श्रुतुरुत्तायास्तथा तद्वक्तुमुद्यतः ॥१८॥ सर्वदेवेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ॥ सर्वदानेषु यत्प्रोक्तमिष्टापूर्तेषु चैव हि ॥ १९ ॥ यत्फलं लभ्यते विप्रास्तस्माच्छतगुणोत्तरम् ॥ प्रक्रमान्मथुरायास्तु सत्यमेतद्ब्रवामि वः ॥ २० ॥ इत्युक्त्वा ऋषयो जग्मुरभिवाद्य स्वयम्भुवम् ॥ आगत्य मथुरां देवीमाश्रमांश्चक्रिरे द्विजाः ॥ २१ ॥ ध्रुवेण सहिताश्चासन्कामयानास्तु तान्हिनम् ॥ कुमुदस्य तु मासस्य नवम्यां शुक्लपक्षके ॥ २२ ॥ मथुरोपक्रमं कृत्वा सर्वपापैः प्रमुच्यते ॥ २३ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये मथुराप्रदक्षिणादिकं नामैकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥ अथ मथुरापरिक्रमप्रादुर्भावः ॥ श्रावराह उवाच ॥ अहन्यां मथुरां प्राप्य कार्त्तिकस्यासिते नरः ॥ स्नात्वा विश्रांतितीर्थे तु पितृदेवार्चने रतः ॥ १ ॥ विश्रांतिदर्शनं कृत्वा दीर्घविष्णुं च केशवम् ॥ प्रदक्षिणायाः सम्यक्वै फलमाप्नोति मानवः ॥ २ ॥ उपवासरतः सम्यगल्पमेव्याशनोऽथवा ॥ दन्तकाष्ठं च सायाह्ने कृत्वा शुद्धचर्थमात्मनः ॥ ३ ॥ ब्रह्मचर्येण तां रात्रिं कृत्वा सङ्कल्प्य मानसे ॥ धौतवस्त्रेण सुस्नातो मौनव्रतपरायणः ॥ ४ ॥ तिलाक्षतकुशान् गृह्य पितृदेवार्थमुद्यतः ॥ दीपहस्तो वनं गत्वा श्रान्तो विश्रान्तिजागरे ॥ ५ ॥ यथानुक्रमणं तैश्च धुवाद्यैर्ऋषिभिः कृतम् ॥ एवं परंपरायातं क्रमणीयं नरोत्तमैः ॥ ६ ॥ प्रदक्षिणावर्त्तमाना भक्तिश्रद्धासमन्वितः ॥ सर्वान्कामानवाप्नोति ह्यमेधफलं लभेत् ॥ ७ ॥ एवं जागरणं कृत्वा नवम्यां नियतः शुचिः ॥ ब्राह्मे मुहूर्त्ते संप्राप्ते ततो यात्रामुपक्रमेत ॥ ८ ॥ तथा प्रारभयेद्यात्रां यावन्नोदयते रविः ॥ प्रातः स्नानं तथा कुर्यात्तीर्थे दक्षिणकोटिके ॥ ९ ॥ प्रक्षाल्य पादावाचम्य

हनुमन्तं प्रसादयेत् ॥ सर्वमङ्गल्यमाङ्गल्यं कुमारं ब्रह्मचारिणम् ॥ १० ॥ विज्ञाप्य सिद्धिकर्त्तारं यात्रासिद्धिप्रदायकम् ॥ यस्य संस्मरणादेव सर्वे
नश्यन्त्युपद्रवाः ॥ ११ ॥ यथा रामस्य यात्रायां सिद्धिस्ते सुप्रतिष्ठिता ॥ तथा परिभ्रमन्मेऽद्य भवान्सिद्धिप्रदो भव ॥ १२ ॥ इति विज्ञाप्य
विधिवद्भनूमन्तं गणेश्वरम् ॥ दीपपुष्पोपहारैस्तु पूजयित्वा विसर्जयेत् ॥ १३ ॥ तथैव पद्मनाभं तु दीर्घविष्णुं भयापहम् ॥ विज्ञाप्य सिद्धि
कर्त्तारं देव्यश्च तदनन्तरम् ॥ १४ ॥ दृष्ट्वा वसुमतीं देवीं तथैव ह्यपराजिताम् ॥ आयुधागारसंस्थां च नृणां सर्वभयापहाम् ॥ १५ ॥ कंसवास
निकां तद्वदोग्रसेनां च चर्चिकाम् ॥ वधूटीं च तथा देवि दानवक्षयकारिणीम् ॥ १६ ॥ जयदां देवतानां च मातरो देवपूजिताः ॥ गृहदेव्यो
वास्तुदेव्यो दृष्ट्वानुज्ञाप्य निर्गमेत् ॥ १७ ॥ मौनव्रतधरो गच्छेद्यावद्दक्षिणकोटिके ॥ प्राप्य स्नात्वा पितॄंस्तर्प्य दृष्ट्वा देवं प्रणम्य च ॥ १८ ॥
नत्वा गच्छेद्दिक्षुवासां देवि कृष्णसुपूजिताम् ॥ बालक्रीडनरूपाणि कृतानि सह गोपकैः ॥यानि तीर्थानि तान्येव स्थापितानि महर्षिभिः ॥१९॥
ख्यातिं गतानि सर्वाणि सर्वपापहराणि च ॥ वत्सपुत्रं ततो गच्छेत्सर्वपापहरं परम् ॥ अर्कस्थलं वीरस्थलं कुशस्थलमनन्तरम् ॥ २० ॥ पुण्य
स्थलं महास्थलं महापापविनाशनम् ॥ पंचस्थलानि तत्रैव सर्वपापहराणि च ॥ २१ ॥ येषां तु दर्शनादेव ब्रह्मणा सह मोदते ॥ शिवं सिद्धमुखं
दृष्ट्वा स्थलानां फलमाप्नुयात् ॥ २२ ॥ हयमुक्तिं ततो गच्छेत्सिंदूरं ससहायकम् ॥ श्रूयते चात्र ऋषिभिर्गाथा गीता पुरातनी ॥ २३ ॥ अश्वा
रूढेन तेनैव यत्रेयं समनुष्ठिता ॥ अश्वो मुक्तिं गतस्तत्र सहायसहितः सुखम् ॥२४॥ राजपुत्रः स्थितस्तत्र यानयात्रा न मुक्तिदा ॥ तस्माद्यानैश्च
यात्रा तु न कर्त्तव्या फलेच्छया॥२५॥ तस्मिंस्तीर्थे तु तं दृष्ट्वा स्पृष्ट्वा पापैः प्रमुच्यते ॥ कुण्डं शिवस्य विख्यातं तत्र स्नानफलं महत् ॥२६॥
मल्लिकादर्शनं कृत्वा कृष्णस्य जयदं शुभम् ॥ ततः कदंबखण्डस्य गमनात्सिद्धिमाप्नुयात् ॥ २७ ॥ चर्चिका योगिनी तत्र योगिनीपरि
वारिता ॥ कृष्णस्य रक्षणार्थं हि स्थिता सा दक्षिणां दिशम् ॥ २८ ॥ अस्पृश्या चास्पृशा चैव मातरो लोकपूजिताः ॥ बालानां दर्शनं ताभ्यां ॥१६९॥
महारक्षां करिष्यति ॥ २९ ॥ वर्षत्रातं ततो गत्वा कुण्डं पापहरं परम् ॥ गत्वा स्नात्वा पितॄंस्तर्प्य सर्वपापैः प्रमुच्यते ॥ ३० ॥ क्षेत्रपालं ततो
गत्वा शिवं भूतेश्वरं हरम् ॥ मथुराक्रमणं तस्य जायते सफलं तथा ॥ ३१ ॥ कृष्णक्रीडासेतुबन्धं महापातकनाशनम् ॥ बालानां क्रीडनार्थं च

कृत्वा देवो गदाधरः ॥ ३२ ॥ गोपकैः सहितस्तत्र क्षणमेकं दिने दिने ॥ तत्रैव रमणार्थं हि नित्यकालं स गच्छति ॥ ३३ ॥ बलिहृदं च तत्रैव जलक्रीडाकृतं शुभम् ॥ यस्य सन्दर्शनादेव सर्वपापैः प्रमुच्यते ॥ ३४ ॥ ततः परं च कृष्णेन कुब्जैः क्रीडनं कृतम् ॥ यस्य दर्शनमात्रेण चण्डोऽपि गतिमाप्नुयात् ॥ ३५ ॥ स्तम्भोद्भवं सुशिखरं सौरभैः समुगन्धिभिः ॥ भूषितं पूजितं तत्र कृष्णेनाङ्किष्टकर्मणा ॥ ३६ ॥ तस्य प्रदक्षिणं कृत्वा परिपूज्य प्रयत्नतः ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं व्रजेत्तु सः ॥३७॥ वसुदेवेन देवक्या गर्भस्य रक्षणाय च ॥ कृतमेकान्तशयनं महापातकनाशनम् ॥ ३८ ॥ ततो नारायणस्थानं प्रविशेन्मुक्तिहेतवे ॥ परिक्रम्य ततो देवान्नारायणपुरोगमान् ॥ ३९ ॥ दृष्ट्वा ततः सुविज्ञाप्य गणं विधिविनायकम् ॥ कुञ्जिकां वामनां चैव ब्राह्मण्यौ कृष्णपालिते ॥ ४० ॥ अनुज्ञाय ततः स्थानं द्रष्टुं गर्त्तेश्वरं शिवम् ॥ दृष्टमात्रेण तत्रैव यात्राफलमवाप्यते ॥ ४१ ॥ महाविद्येश्वरी देवी आरक्षं पापकं हरेत् ॥ क्षेत्रस्य रक्षणार्थं हि यात्रायाः सिद्धिदां नृणाम् ॥ ४२ ॥ प्रभामर्ळी च तत्रैव दृष्ट्वा कामानवाप्नुयात् ॥ महाविद्येश्वरी देवी कृष्णरक्षार्थमुद्यता ॥ ४३ ॥ नित्यं सन्निहिता तत्र सिद्धिदा पापनाशिनी ॥ कृष्णेन बलभद्रेण गोपैः कंसं जिघांसुभिः ॥ ४४ ॥ सङ्केतकं कृतं तत्र मन्त्रनिश्चयकारकम् ॥ तदा संकेतकैः सा च सिद्धा देवी प्रतिष्ठिता ॥ ४५ ॥ सिद्धिप्रदा भोगदा च तेन सिद्धेश्वरी स्मृता ॥ संकेतकेश्वरीं चैव दृष्ट्वा सिद्धिमवाप्नुयात् ॥ ४६ ॥ तत्र कुण्डं स्वच्छजलं महापातकनाशनम् ॥ ततो दृष्ट्वा महादेवं गोकर्णेश्वरनामतः ॥ ४७ ॥ यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ सरस्वतीं नदीं दृष्ट्वा ततो भद्राणि पश्यति ॥ ४८ ॥ विघ्नराजं ततो गच्छेद्गणेशं विघ्ननायकम् ॥ सर्वसिद्धिप्रदं रम्यं दर्शनाच्च फलं लभेत् ॥ ४९ ॥ गंगा साक्षी च तत्रैव महापातकनाशिनी ॥ दृष्ट्वा स्पृष्ट्वा तथा ध्यात्वा सर्वकामान्समश्नुते ॥५०॥ महादेवमुखाकारं नाम्ना रुद्रमहालयम् ॥ क्षेत्रपं तं परं दृष्ट्वा क्षेत्रवासफलं लभेत् ॥ ५१॥ तस्मादुत्तरकोटिं च दृष्ट्वा देवं गणेश्वरम् ॥ धूतक्रीडा भगवता कृता गोपजनैः सह ॥ ५२ ॥ नानापद्मासरूपेण जिता गोप्यो धनानि च ॥ गोपेरानीय ताश्चैव कृष्णाय च निवेदिताः ॥५३ ॥ गोपालकृष्णगमनं महापातकनाशनम् ॥ समस्तं बालचरितं भ्रमणं च यथासुखम् ॥५४॥ कृतं तत्र यथारूपं यद्रूपं च यथा तथा ॥ ऋषिभिः सेवितं ध्यातं विष्णोर्माहात्म्यमुत्तमम् ॥५५॥ ततो गच्छेन्महातीर्थं विमलं यमुनाम्भसि ॥

स्नात्वा पीत्वा पितॄंस्तर्प्य नाम्ना रुद्रमहालयम् ॥ ५६ ॥ गाम्येतीर्थे महापुण्ये नरस्तत्र तथा क्रमेत् ॥ भद्रेश्वरे महातीर्थे सोमतीर्थे तथैव च ॥ ५७ ॥ स्नात्वा सोमेश्वरं देवं दृष्ट्वा यात्राफलं लभेत् ॥ सरस्वत्याः सङ्गमे च देवर्षिपितृमानवान् ॥ ५८ ॥ सन्तर्प्य विधिवद्दत्त्वा विष्णुसायुज्यमाप्नुयात् ॥ घण्टाभरणके तद्वत्तथा गरुडकेशवे ॥ ५९ ॥ धारालोपनके तद्वद्वैकुण्ठे खण्डवेलके ॥ मन्दाकिन्याः संयमने असिकुण्डे तथैव च ॥ ६० ॥ गोपानां तर्पिके चैव तथा वै मुक्तिकेश्वरे ॥ वैलक्षगरुडे चैव महापातकनाशने ॥ ६१ ॥ तीर्थान्येतानि पुण्यानि यथा विश्रान्तिसंज्ञकम् ॥ एषु तीर्थेषु क्रमितो भक्तिमांश्च जितेन्द्रियः ॥ ६२ ॥ देवान्पितॄन् समभ्यर्च्य ततो देवं प्रसादयेत् ॥ अविमुक्तेश्वर देवेश सर्वतीर्थाभिरभिष्टुत ॥ ६३ ॥ मथुराक्रमणीयं मे सफलं स्यात्तवाज्ञया ॥ इत्येवं देवदेवेशं विज्ञाप्य क्षेत्रपं शिवम् ॥ ६४ ॥ विश्रान्तिसंज्ञके स्नानं कृत्वा च पितृतर्पणम् ॥ गतश्रमं परिक्रम्य स्तुत्वा दृष्ट्वा प्रणम्य च ॥ ६५ ॥ सुमङ्गलां ततो गच्छेद्यात्रासिद्धिं प्रसादयेत् ॥ सर्वमङ्गलमांगल्ये शिवे सर्वार्थसाधिके ॥ ६६ ॥ यात्रेयं त्वत्प्रसादेन सफला मे भवत्विति ॥ पिप्पलादेश्वरं देवं पिप्पलादेन पूजितम् ॥ ६७ ॥ विश्रान्तस्तु परिक्रम्य त्रातस्तत्र महातपाः ॥ उपलिप्य ततस्तस्य शीर्षोपरि महच्छिवम् ॥ ६८ ॥ स्वनाम्ना चिह्नितं स्थाप्य तदा यात्राफलं लभेत् ॥ कर्कोटकं तथा नागं महादुष्टनिवारणम् ॥ ६९ ॥ दृष्ट्वा गच्छेत्ततो देवीं या कृष्णेन विनिर्मिता ॥ कंसभेदं प्रथमतः श्रुतं यत्र कुमान्वितम् ॥ ७० ॥ सुखवासं च वरदं कृष्णस्याङ्किष्टकर्मणः ॥ सुखासीनं च तत्रैव स्थापितं शकुनाय वै ॥ ७१ ॥ स्वानुकूलः स्वरो यत्र प्रवेशे दक्षिणः स्वनः ॥ ध्याता स्वभावे कृष्णेन स्वसा सातिसुखप्रदा ॥ ७२ ॥ भयार्तेन च कृष्णेन ध्याता देवी च चण्डिका ॥ स्थापिता सिद्धिदा तत्र नाम्ना चात्तिहरा ततः ॥७३॥ दृष्ट्वा सर्वार्तिहरणं यस्या देव्याः सुखी नरः ॥ अग्रोत्तरं शुभवरं शकुनार्थं च याचतः ॥ ७४ ॥ कृष्णस्य कंसघातार्थं संभूता सा तथोत्तरे ॥ तां दृष्ट्वा मनुजः कामान्सर्वानिष्टानवाप्नुयात् ॥ ७५ ॥ वज्राननं ततो ध्यात्वा कृष्णो मल्लजिघांसया॥निहत्य मल्लान्पश्चाद्धि वज्राननमकल्पयत् ॥ ७६ ॥ याच्छितार्थफलं चक्रे कृष्णेनास्य मनोरथान्॥यस्यै यस्यै देवतायै तस्यै तस्यै ददौ मखम् ॥७७॥ उपयाचितं तु माङ्गल्यं सर्वपापहरं शुभम्॥कृष्णस्य

॥१६६॥

बालचरितं महापातकनाशनम् ॥ ७८ ॥ सूर्यं तं वरदं देवं माथुराणां कुलेश्वरम् ॥ दृष्ट्वा तत्रैव दानं च दत्त्वा यात्रां समापयेत् ॥ ७९ ॥ एवं प्रदक्षिणं कृत्वा नवम्यां शुक्लकौशुद्दे ॥ सर्वं कुलं समादाय विष्णुलोके महीयते ॥ ८० ॥ क्रमतः पदविन्यासाद्यावन्तः सर्वतो दिशः ॥ तावन्तः कुलसंपूताः सूर्यं तिष्ठन्ति शाश्वते ॥ ८१ ॥ ब्रह्मघ्नश्च सुरापश्च चौरो भग्नव्रताश्च ये ॥ अगम्यागमने शीलाः क्षेत्रदारापहारकाः ॥ ८२ ॥ मथुराक्रमणं कृत्वा विपाप्मानो भवन्ति ते ॥ अन्यदेशागतो दूरात्परिश्रमति यो नरः ॥ ८३ ॥ तस्य सन्दर्शनादन्ये पूताः स्युर्विगतापमयाः ॥ श्रुतं यैश्च विदूरस्थैः कृतयात्रं नरं नरैः ॥८४॥ सर्वपापविनिर्मुक्तास्ते यान्ति परमं पदम् ॥८५॥ इति श्रीवराहपुराणे मथुरा परिक्रमप्रादुर्भावो नाम षट्त्रयधिकशततमोऽध्यायः ॥ १६० ॥ अथ देववनप्रभावः ॥ धरण्युवाच ॥ ये धर्मविमुखा मूढाः सर्वज्ञानविवर्जिताः ॥ का गतिः कृष्ण तेषां हि विहिता नरके सुरैः ॥१॥ अभुक्त्वा नारकं दुःखं सुकृतैः पुण्यदैर्नृणाम् ॥ प्रयान्ति कर्मणा येन तमुपायं ब्रवीहि मे ॥ २ ॥ श्रीवराह उवाच ॥ सर्वधर्मविहीनानां पुरुषाणां दुरात्मनाम् ॥ नरकार्त्तिहरा देवी मथुरा पापघातिनी ॥ ३ ॥ मथुरावासिनो ये च तीर्थानां चोपसेवकाः ॥ वनानां दर्शको वाथ मथुराक्रमकोऽपि वा ॥ ४ ॥ एषां मध्ये कृतं यैश्च एकं च शतमोजसा ॥ न ते नरकभोक्तारः स्वर्गभाजो भवन्ति ते ॥५॥ आद्यो मधुवनं नाम द्वितीयं तालमेव च ॥ वनं कुन्दवनं चैव तृतीयं वनमुत्तमम् ॥६॥ चतुर्थं काम्यकवनं वनानां वनमुत्तमम् ॥ पंचमं वै बहुवनं षष्ठं भद्रवनं स्मृतम् ॥ ७ ॥ सप्तमं तु वनं भूमे खादिरं लोकविश्रुतम् ॥ महावनं चाष्टमं तु सदैव च मम प्रियम् ॥ ८ ॥ लोहार्गलवनं नाम नवमं पातकापहम् ॥ वनं बिल्ववनं नाम दशमं देवपूजितम् ॥ ९ ॥ एकादशं तु भाण्डीरं द्वादशं वृन्दकावनम् ॥ एतानि ये प्रपश्यन्ति न ते नरकभोगिनः ॥१०॥ यथाक्रमेण ये यात्रां वनानां च जितेन्द्रियाः ॥ करिष्यन्ति वरारोहे इन्द्रलोकं व्रजन्ति ते ॥ ११ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये देववनप्रभावो नामैकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥ अथ चक्रतीर्थप्रभावः ॥ श्रीवराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ चक्रतीर्थं पुरावृत्तं मथुरायास्तथोत्तरे ॥१॥ महागृहोदयं नाम जम्बूद्वीपस्य भूषणम् ॥ तस्मिन् पुरवरे दिव्ये ब्राह्मणो वसते शुभे ॥२॥ स कन्यां पुत्रमादाय ब्राह्मणो वेदपारगः ॥ शालिग्रामं महापुण्यमगच्छद्ब्राह्मणोत्तमः ॥ ३ ॥

तत्रासौ वासमकरोत्पुण्यसेवी जितेन्द्रियः ॥ तीर्थसेवी तथा स्नायी देवतादर्शने रतः ॥ ४ ॥ तत्र सिद्धेन संवासो ब्राह्मणस्याभवत्तदा॥ स सिद्धो वसते नित्यं कल्पग्रामे च सर्वदा ॥५॥ गच्छत्स सर्वकालं तु शालिग्रामे वसुन्धरे ॥ स तेन सह सङ्गत्य कान्यकुब्जनिवासिना ॥६॥ कल्पग्राम विभूतिं च नित्यकालमवर्णयत् ॥ कल्पग्रामविभूतिं च श्रुत्वा स मुनिसत्तमः ॥ ७ ॥ गमने बुद्धिरुत्पन्ना ततः सिद्धमयाचत ॥ मित्रत्वं वर्त्ततेसिद्ध नयस्वात्मनिवेशने ॥ ८ ॥ ब्राह्मणस्य वचः श्रुत्वा सिद्धो वचनमब्रवीत् ॥ तत्र सिद्धा हि गच्छन्ति ते न तत्र गतिर्भवेत् ॥ ९ ॥ प्रार्थना दुःखलाभं तु शृणु वै ब्राह्मणोत्तम ॥ आत्मयोगबलेनैव चलिष्यामि सपुत्रकः ॥ १० ॥ दक्षिणे तु करे गृह्य ब्राह्मणं वेदपारगम् ॥ वामे चैव करे गृह्य तस्य पुत्रं महामतिम् ॥ ११ ॥ उत्पपात तदा सिद्धो गृहीत्वा ब्राह्मणोत्तमौ ॥ कल्पग्रामे तु तौ मुक्तो पितापुत्रौ वसुन्धरे ॥ १२ ॥ तत्र तौ वसतो नित्यं कल्पग्रामे द्विजोत्तमौ ॥ तत्र कालेन महता रुग्देहे चाभवत्तदा ॥ १३ ॥ रुजा तु पीड्यमानः स दशमीं च दशां गतः ॥ मर्त्तुकामो द्विजवरो निरीक्ष्य सुतमुत्तमम् ॥ १४ ॥ उवाच पुत्रं धर्मात्मा मरणे समुपस्थिते ॥ गंगातीरे च मां पुत्र नय त्वं मा विलम्बय ॥ १५ ॥ तेन पुत्रेण नीतोऽसौ गंगातीरे महामुनिः ॥ रुरोद पुत्रस्तु तदा पितृस्नेहसमन्वितः ॥ १६ ॥ वेदाध्ययनशीलः स पितृभक्त्या नियन्त्रितः ॥ वसतस्तस्य वै तत्र कालो जातो महामतेः ॥१७॥ कल्पग्रामे तदा सिद्धस्तस्य कन्या सुमध्यमा ॥ वरमन्वेषयन्ती सा न प्राप्तस्तु तया मतः ॥ १८ ॥ कदाचिद्दैवयोगेन कान्यकुब्जनिवासिनः ॥ गृहे प्रविष्टो विप्रः स भोजनार्थं महामतिः ॥ १९ ॥ पृष्टोऽसौ ब्राह्मणो भद्रे क्व भवांस्त्वमिहागतः॥ स सर्वं कथयामास यथावृत्तं दृढव्रतः॥२०॥दिव्यज्ञानेन तं ज्ञात्वा पूजयामास तं द्विजः॥ पूजयित्वा यथान्यायं कन्यां तस्मै ददौ तदा॥२१॥श्वशुरस्य गृहे नित्यं भोजनं कुरुते द्विजः ॥ वसते पितृसान्निध्ये प्रतिचारी स पुत्रकः ॥२२॥ काले भगवतस्तस्य अतिक्षीणः पिता तदा ॥ तं दृष्ट्वा क्षीणतां प्राप्तं श्वशुरं पर्यपृच्छत ॥२३॥ स्वामिन्पितुर्मे मरणं भविष्यति वदस्व माम् ॥जामातृवचनं श्रुत्वा प्रहस्य श्वशुरोऽब्रवीत् ॥२४॥ शूद्रान्नं भक्षितं तेन नित्यकालं द्विजोत्तम ॥ तस्य चाहारदोषेण मृत्युर्दूरं गतः पितुः ॥२५ ॥ पादयोर्विद्यते तच्च शूद्रान्नं च पितुस्तव ॥ जान्वोरूर्द्धं न विद्येत शूद्रान्नं च द्विजोत्तम ॥२६॥ शूद्रान्नेन विहीनस्य तस्य मृत्युर्भविष्यति ॥ श्वशुरस्य वचस्तस्य पितुरग्रे न्यवे

॥१६७॥

दयत् ॥ २७ ॥ तस्य पुत्रस्य वचनं श्रुत्वात्मानं विगर्हयत् ॥ ततः प्रभाते विमले उदिते च दिवाकरे ॥२८॥ पितुः समीपात्स गतः श्वशुरस्य निवेशनम् ॥ गते पुत्रे पिता तस्य रुजा त्वत्यन्तपीडितः ॥ २९ ॥ दुःखेन पीडितः क्षीणो मर्तुकामो द्विजोत्तमः ॥ गंगातीरात्समुत्तिष्ठन्दिशः सर्वा विलोकयन् ॥ ३०॥ सन्निधावुपलं दृष्ट्वा गृहीतं तेन तत्पदा ॥ चूर्णयामास तौ पादौ पीडया मोहितो द्विजः ॥३१॥ ततः प्राणान्परित्यज्य गतोऽसौ कालवर्त्तनम् ॥ स्नात्वा भुक्त्वा ततो गत्वा प्रेक्ष्य तं पितरं मृतम् ॥३२॥ गतसंज्ञं च पितरं दृष्ट्वा स रुरुदे भृशम् ॥ रुदित्वा सुचिरं कालं शास्त्रं दृष्ट्वा व्यचिन्तयत् ॥ ३३ ॥ संस्कारयोग्यता नास्ति इत्येवं पुनरब्रवीत् ॥ सर्पैर्भृङ्गिहतानां च दंष्ट्राविप्रहतस्य च ॥३४॥ आत्मनस्त्यागिनश्चैव आपस्तम्बोऽब्रवीदिदम् ॥ आत्मघाती नरः पापो नरकं पच्यते चिरम् ॥ ३५ ॥ प्रायश्चितं विधीयीत न दद्याच्चोदकक्रियाम् ॥ अहो दैवं सुबलवत्पौरुषं तु निरर्थकम् ॥ ३६ ॥ तस्य पुत्रो महाभागे गतः श्वशुरमन्दिरम् ॥ तं दृष्ट्वा श्वशुरो दीनमिदं वचनमब्रवीत् ॥३७॥ ब्रह्महत्या तु ते जाता गच्छ त्वं च यथेप्सितम् ॥ श्वशुरस्य वचः श्रुत्वा जामाता वाक्यमब्रवीत् ॥ ३८ ॥ न मया ब्राह्मणवधः कदाचिदपि कारितः ॥ केन दोषेण मे सिद्धं ब्रह्महत्याफलं महत् ॥ ३९ ॥ जामातुर्वचनं श्रुत्वा श्वशुरो वाक्यमब्रवीत् ॥ पितुस्त्वया वधोपायो विनिर्दिष्टश्च पुत्रक ॥ ४० ॥ तेन दोषेण विप्रर्षे ब्रह्महत्याफलं तव ॥ आतत्रशयनाद्वैनं भोजनात्कथनादिषु ॥ ४१ ॥ संवत्सरेण पतति पतितेन सहा चरन् ॥ तस्मान्मम गृहे नास्ति वासस्ते हि द्विजोत्तम ॥ ४२ ॥ श्वशुरस्य वचः श्रुत्वा जामाता वाक्यमब्रवीत् ॥ किं मया वद कर्तव्यं त्वया त्यक्तेन सुव्रत ॥ ४३ ॥ तस्य तद्वचनं श्रुत्वा ब्राह्मणः संशितव्रतः ॥ कल्पग्रामं परित्यज्य मथुरां याहि सुव्रत ॥ ४४ ॥ नान्यत्र तव संशुद्धिः कदाचित्पितृघातिनः ॥ कल्पग्रामं परित्यज्य तत्क्षणादेव निःसृतः ॥४५॥ ततः कालेन महता सम्प्राप्तो मथुरां पुरीम् ॥ ब्राह्मणेभ्यो बहिःस्थाने नित्यं तु वसते द्विजः ॥ ४६ ॥ कन्यापुरनिवासी तु कुशिकोऽथ जनार्दनः ॥ तस्य सत्रं नित्यकालं मथुरायां प्रवर्त्तते ॥ ४७ ॥ द्वे सहस्रे तु विप्राणां तस्य सत्रे च भुञ्जते ॥ ब्राह्मणानां सदोच्छिष्टं ततश्चोद्धरते तु सः ॥ ४८ ॥ चक्रतीर्थं समासाद्य स्नानं स कुरुते सदा ॥ न भिक्षां कुरुते तत्र भोजनार्थं न गच्छति ॥ ४९ ॥ ततः कालेन महता चिन्ताभूच्छ्वशुरस्य च ॥ दिव्यज्ञानेन तत्सर्वं ज्ञात्वा जामातृवेष्टितम् ॥ ५० ॥

स्वां सुतां चोदयामास गच्छ तां मथुरां पुरीम् ॥ भोजनं गृह्य तत्रैव गच्छ त्वं भर्तृसन्निधौ ॥५१॥ दिव्यज्ञानेन च तदा नित्यं सा भर्तृसन्निधौ ॥ दिनेदिने गच्छति सा भर्तृ भोजनकारणात् ॥ ५२ ॥ दिवसस्यावसाने तु भोजनं गृह्य गच्छति ॥ भोजनं कुरुते नित्यं प्रियादत्तं वसुन्धरे ॥ ५३ ॥ पात्रं निःक्षिप्य कुण्डे तु सत्रे वसति सर्वदा ॥ एवं निवसतस्तस्य वर्षाद्धं तु गतं तदा ॥ ५४ ॥ ततः कालेन महता तैः पृष्टः स द्विजोत्तमः ॥ कुत्र सन्तिष्ठते नित्यं भोजनं कुरुते कुतः ॥५५॥ कथयामास वृत्तान्तं तं सर्वं चात्मनो हि सः ॥ ते श्रुत्वा ब्राह्मणाः सर्वे एकीभूता वसुन्धरे ॥ ५६ ॥ इदमूचुस्ततो विप्राः शुद्धोऽसीति द्विजं प्रति ॥ चक्रतीर्थप्रभावेण पापान्मुक्तः सनातनः ॥ ५७ ॥ अस्माकं वदनाच्चैव पुनः सिद्धोऽसि वै द्विज ॥ ब्राह्मणानां वचः श्रुत्वा स द्विजो हृष्टमानसः ॥ ५८ ॥ स्नानार्थं तु ततः स्थानाच्चक्रतीर्थं समागतः ॥ गते तस्मिंस्तस्य भार्या भिक्षामादाय चागता ॥५९॥ सा तु दृष्ट्वेन मनसा भर्तारं वाक्यमब्रवीत् ॥ भोजनं कुरु मे दत्तं हत्यां लक्ष्यामि ते गताम् ॥६०॥ प्रियावचनमाकर्ण्य भर्त्ता वचनमब्रवीत् ॥ पुनरावर्तितं ब्रूहि यदिदं भाषितं त्वया ॥६१॥ भर्तुर्वचनमाकर्ण्य पत्नी वचनमब्रवीत् ॥ न त्वं सम्भाषितः पूर्वं ब्रह्महत्यासमन्वितः ॥६२॥ चक्रतीर्थप्रभावेण मुक्तोऽसि द्विजसत्तम॥ उत्तिष्ठ कान्त गच्छाव कल्पग्रामं सुशोभितम् ॥६३॥ तथा सार्द्धं जगामाथ कल्पग्रामं द्विजोत्तमः ॥ भद्रेश्वरनिमित्तं हि द्रव्यं च कथितं शुभम् ॥ ६४ ॥ नित्यं च भुञ्जते यत्र पात्रं द्रव्यसमर्पितम् ॥ दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थं फलं लभेत् ॥६५॥ कल्पग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे ॥ अङ्गेरुत्रोपवासेन मुच्यते ब्रह्महत्यया ॥६६॥ कल्पग्रामेण किं तस्य वाराणस्यां च वा शुभे ॥ मथुरां तु समासाद्य यः कश्चिन्म्रियते भुवि ॥ ६७ ॥ अपि कीटः पतङ्गो वा जायते स चतुर्भुजः ॥६८॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये चक्रतीर्थप्रभावो नाम द्विषष्टयधिकशततमोऽध्यायः ॥ १६२ ॥ अथ कपिलवराहमाहात्म्यम् ॥ श्रीवराह उवाच॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ वैकुण्ठतीर्थमासाद्य यद्वृत्तं हि पुरातनम् ॥१॥ मिथिलायां पुरी रम्या जनकेन च पालिता ॥ मिथिलावासिनो लोकास्तीर्थयात्रां समागताः ॥ २ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चापि वसुन्धरे ॥ स्नात्वा सौकरवे तीर्थे आयाता मथुरां पुरीम् ॥ ३ ॥ तेषां च भक्तिरुत्पन्ना मथुरां प्रति सुन्दरि ॥ वैकुण्ठतीर्थमासाद्य सर्वे ते मनुजाः स्थिताः ॥ ४ ॥ तेषां तु ब्राह्मणः कश्चिद्ब्रह्म

॥१६८॥

हत्यासु चिह्नितः ॥ रुधिरस्य हि धारा च स्रवन्ती तस्य हस्ततः ॥ ५ ॥ प्रत्यक्षा दृश्यते सर्वैर्ब्रह्महत्यास्वरूपिणी ॥ सर्वतीर्थ प्लुतस्यापि ब्राह्मणस्य हि सा तदा ॥ ६ ॥ न गता पूर्वमेवासीद्विकुण्ठे स्नानमाचरत् ॥ न सा वै दृश्यते धारा ततस्ते विस्मयङ्गताः॥ ७ ॥ किमेतान्किमिति प्राहुर्धारां प्रति वसुन्धरे ॥ देवो ब्राह्मणरूपेण लोकान्सर्वान् हि पृच्छति ॥ ८ ॥ केन कारणदोषेण धारा त्यक्त्वा गता द्विजम् ॥ तत्सर्वं कथयामासुर्ब्राह्मस्य विचेष्टितम् ॥ ९ ॥ वैकुण्ठे तु निमग्नोऽयं ब्रह्महत्या गता ततः ॥ विस्मयो नात्र कर्त्तव्यस्तीर्थस्येदं महत्फलम् ॥ १० ॥ इत्युक्तस्तैर्ददेवस्तत्रैवान्तरधीयत ॥ एष प्रभावस्तीर्थस्य वैकुण्ठस्य वसुन्धरे ॥ ११ ॥ वैकुण्ठतीर्थे यः स्नाति मुच्यते सर्वपातकैः ॥ सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ १२ ॥ सूत उवाच ॥ पुनरन्यत् प्रवक्ष्यामि असिकुण्डेऽतिपुण्यदे ॥ नाम्ना गन्धर्वकुण्डं तु तीर्थानां तीर्थमुत्तमम् ॥ १३ ॥ तत्र स्नातो नरो देवि गन्धर्वैः सह मोदते ॥ तत्र यो सुंचते प्राणान्मम लोकं स गच्छति ॥ १४ ॥ विंशतियोजनानां तु माथुरं मम मण्डलम् ॥ इदं पद्मं महाभागे सर्वेषां मुक्तिदायि च ॥ १५ ॥ कर्णिकायां स्थितो देवि केशवः केशनाशनः ॥ कर्णिकायां मृता ये तु तेऽमरा मुक्तिभागिनः॥१७॥ तत्र मध्ये मृता ये तु तेषां मुक्तिर्वसुन्धरे ॥ पश्चिमेन हरिं देवं गोवर्द्धननिवासिनम् ॥ १७ ॥ दृष्ट्वा तं देवदेवेशं किं मनः परितप्यते ॥ उत्तरेण तु गोविन्दं दृष्ट्वा देवं परं शुभम् ॥ १८ ॥ नासौ पतति संसारे यावदाभूतसंप्लवम् ॥ विश्रान्तिसंज्ञके देवे पूर्वपत्रे व्यवस्थितम् ॥ १९ ॥ यं दृष्ट्वा तु नरो याति मुक्तिं नास्त्यत्र संशयः ॥ दक्षिणेन तु मां विद्धि प्रतिमां दिव्यरूपिणीम् ॥ २० ॥ महाकायां सुरूपां च केशवाकारसन्निभाम् ॥ तां दृष्ट्वा मनुजो देवि ब्रह्मणा सह मोदते ॥ २१ ॥ कृते युगे तु राजासीन्मान्धाता नाम नामतः ॥ तेनाहं तोषितो देवि भक्तियुक्तेन चेतसा ॥२२॥ तस्य तुष्टेन हि मया प्रतिमेयं समर्पिता ॥ तेनेयं पूजिता नित्यमात्ममुक्तिमभीप्सता ॥ २३ ॥ यदा तु मथुरां प्राप्य लवणोऽयं निपातितः ॥ तदैव प्रतिमा दिव्या मथुरायां व्यवस्थिता ॥ २४ ॥ पुण्येयं प्रतिमा दिव्या तेजसी दिव्यरूपिणी ॥ कपिलो नाम विप्रर्षिर्मम भक्तिपरायणः ॥ २५ ॥ मनसा निर्मिता तेन वाराही प्रतिमा शुभा ॥ कपिलो ध्यायते नित्यमर्चति स्म दिने दिने ॥२६॥ इन्द्रेणाराधितो देवि कपिलो मुनिसत्तमः ॥ तस्य प्रीतो ददौ देवं

वराहं दिव्यरूपिणम् ॥ २७ ॥ देवे लब्धे वराहेण शक्रो हर्षसमन्वितः ॥ ध्यायति स्म सदा देवं पूजां कृत्वा हि भक्तितः ॥ २८ ॥ इन्द्रेण तु तदा प्राप्तं दिव्यं ज्ञानमनुत्तमम् ॥ ततः कालेन महता रावणो नाम राक्षसः ॥ २९ ॥ इन्द्रलोकं गतः सोऽथ स्वर्गं जेतुं महाबलः ॥ शक्रेण सह सङ्गम्य ततो युद्धं प्रवर्तितम् ॥ ३० ॥ रावणेन जिता देवाः शक्रश्चैव महाबलः ॥ बद्धा चेन्द्रं महाबाहुं शक्रस्य भवनं गतः ॥ ३१ ॥ प्रविश्य रावणस्तत्र गृहे रत्नविभूषिते ॥ दृष्ट्वा कपिलवाराहं शिरसा धरणीं गतः ॥ ३२ ॥ तेन संमोहितो देवि रावणो नाम राक्षसः ॥ त्रातुमर्हसि मे देव धरणीधर माधव ॥ ३३ ॥ दामोदर हृषीकेश हिरण्याक्षविदारण ॥ वेदगर्भ नमस्तेऽस्तु वासुदेव नमोऽस्तु ते ॥ ३४ ॥ कूर्मरूप नमस्तेऽस्तु नारायण नमोस्तु ते ॥ मत्स्यरूपधर देवं मधुकैटभनाशिनम् ॥ ३५ ॥ निरीक्षितुं न शक्नोमि प्रभुं चैव गुणव्रत ॥ देवदेव नमस्तुभ्यं भक्तानामभयप्रद ॥३६॥ मम त्वं भक्तिनम्रस्य प्रसादं कुरु सर्वदा ॥ इति स्तुतो रावणेन देवदेवो जगत्पतिः ॥३७॥ सौम्यरूपोऽभवद्देवो लोकनाथो जानार्दनः ॥ सन्निधानमनुप्राप्य पुष्पकारोहणोत्सुकः ॥ ३८ ॥ तदुद्धर्तुं न शक्नोति रावणो विस्मयङ्गतः ॥ शङ्करेण पुरा सार्द्धं कैलासस्तु मयोद्धृतः ॥ ३९ ॥ देव त्वं स्वल्पकायोऽसि नाहमुद्धरणक्षमः ॥ प्रसीद देवदेवेश सुरनाथ नमोऽस्तु ते ॥ ४० ॥ अहं त्वां नेतुमिच्छामि पुरीं लङ्कामनुत्तमाम् ॥ ४१ ॥ श्रीवराह उवाच ॥ अवैष्णवोऽसि रक्षस्त्वं कुतो भक्तिस्तवेदृशी ॥ कपिलस्य वचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ ४२ ॥ त्वद्दर्शनात्समुत्पन्ना भक्तिरव्यभिचारिणी ॥ महात्मँस्त्वां नविष्यामि देवदेव नमोऽस्तु ते ॥ ४३ ॥ भक्तिमुद्वहतस्तस्य लघु वेषोऽभवत्तदा ॥ पुष्पके तु समारोप्य देवं त्रैलोक्यविश्रुतम् ॥ ४४ ॥ आनयामास लङ्कायां स्थापयित्वा स्वके गृहे ॥ तदा स्थितोऽहं लङ्कायां रावणेन प्रपूजितः ॥ ४५ ॥ अयोध्याधिपती रामो हन्तुं राक्षसपुङ्गवम् ॥ गतोऽसौ विक्रमेणैव हत्त्वा राक्षसपुङ्गवम् ॥ ४६ ॥ विभीषणश्च लङ्काया आधिपत्येऽभिषेचितः ॥ विभीषणेन रामस्य सर्वस्वं च निवेदितम् ॥४७॥ श्रीराम उवाच ॥ अनेन नास्ति मे कार्यं तव रक्षा विभीषण ॥ देवो मे दीयतां रक्षः शक्रलोकाद्य आगतः ॥ ४८ ॥ अङ्ग्यङ्गनि पूजानि देवं वाराहरूपिणम् ॥ अयोध्यां चैव नेष्यामि त्वया दत्तं हि राक्षस ॥ ४९ ॥ ततः समर्पयामास कपिलं दिव्यरूपिणम् ॥ पुष्पके तु समारोप्य नीतवान्नगरीं प्रति ॥ ५० ॥ अयोध्यायां स्थापयित्वा

पूजयामास तं तदा ॥ गतं वर्षसहस्रं तु दशोत्तरमतः परम् ॥ ५१ ॥ लवणस्य वधार्थं हि शत्रुघ्नं प्रेषयत्तदा ॥ कृतप्रणामः शत्रुघ्नो राघवाय महात्मने ॥ ५२ ॥ चतुरङ्गबलोपेतो जगाम मथुरां प्रति ॥ गत्वा तु राक्षसश्रेष्ठं लवणं रौद्ररूपिणम् ॥ ५३ ॥ घातयित्वा तु शत्रुघ्नः प्रविश्य मधुरां पुरीम् ॥ ब्रह्मणान्स्थापयित्वा तु मया तुल्यान्महौजसः ॥ ५४ ॥ षड्विंशतिसहस्राणि वेदवेदाङ्गपारगान् ॥ अनृचो माथुरो यत्र चतुर्वेदस्तथापरः ॥ ५५ ॥ एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजितः ॥ लवणस्य यथावृत्तं कथितं ते वसुन्धरे ॥ ५६ ॥ लवणस्य वधं श्रुत्वा राघवो वाक्यमब्रवीत् ॥ वरं वरय शत्रुघ्न यते मनसि रोचते ॥ ५७ ॥ राघवस्य वचः श्रुत्वा शत्रुघ्नो वाक्यमब्रवीत् ॥ यदि तुष्टोऽसि मे देव वराहों यदि वाप्यहम् ॥ ५८ ॥ दीयतां मम देवोऽयं यदि मे वरदो भवान् ॥ शत्रुघ्नस्य वचः श्रुत्वा राघवो वाक्यमब्रवीत् ॥ ५९ ॥ नय शत्रुघ्न देवं त्वं दिव्यं वाराहरूपिणम् ॥ धन्याऽसौ मण्डली लोके धन्या सा मथुरा पुरी ॥ ६० ॥ धन्यास्ते माथुरा लोकाः पश्यन्ति कपिलं सदा ॥ दृष्टः स्पृष्टः सदा ध्यातः स्नापितश्च दिने दिने ॥ ६१ ॥ अनुलिप्तश्च शत्रुघ्न सर्वपापं व्यपोहति ॥ पूजितः स्नापितो देवो दृष्टो यैस्तु दिने दिने ॥ ६२ ॥ सर्वं हरति वै पापं मोक्षं चैव प्रयच्छति ॥ इत्युक्त्वा राघवस्तत्रैव देवं प्रादाद्वसुन्धरे ॥ ६३ ॥ देवमादाय शत्रुघ्नो जगाम मथुरां पुरीम् ॥ ब्राह्मणं स्थापयित्वा तु आगच्छन्मम सन्निधौ ॥ ६४ ॥ तत्र मध्ये तु संस्थाप्य पूजयामास राघवः ॥ अनेन क्रमयोगेण मथुरायां स्थितः प्रभुः ॥६५॥ गयायां पिण्डदानेन यत्फलं ज्येष्ठपुष्करे ॥ तत्फलं समवाप्नोति श्वेतं दृष्ट्वा सदा नरः ॥६६॥ विश्रान्तिसंज्ञके तद्वद्गोविन्दे च तथा हरौ ॥ केशवे दीर्घविष्णौ च तदेव फलमश्नुते ॥६७॥ उदये मामकं तेजः सदा विश्रांतिसंज्ञके ॥ मध्याह्ने मामकं तेजो दीर्घविष्णौ व्यवस्थितम् ॥ केशवे मामकं तेजो दिनभागे चतुर्थके ॥ ६८ ॥ एषा विद्या पुरा देवि नित्यकालं सुगोपिता ॥ भक्ता त्वं मम शिष्या च कथिता ते वसुन्धरे ॥ ६९ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये कपिलवराहमाहात्म्यं नाम त्रिषष्ट्यधिकशततमोऽध्यायः ॥१६३॥ अथाऽन्नकूटपरिक्रमप्रभावः ॥ श्रीवराह उवाच ॥ अस्ति गोवर्द्धनं नाम क्षेत्रं परमदुर्लभम् ॥ मथुरापश्चिमे भागे अदूरा द्योजनद्वयम् ॥१॥ ह्रदं तत्र महाभागे द्रुमगुल्मलतायुतम् ॥ चत्वारि तत्र तीर्थानि पुण्यानि च शुभानि च ॥२॥ ऐन्द्रं पूर्वेण पार्श्वेन यमतीर्थं

तु दक्षिणे ॥ पश्चिमे वारुणं तीर्थं कौबेरं चोत्तरेण तु ॥३॥ तेषां मध्ये स्थितो भद्रे क्रीडयिष्ये यदृच्छया ॥ तत्र वै शक्रतीर्थं तु स्नानं कुर्याद्दृढ व्रतः॥४॥मोदते शक्रलोके तु सर्वद्वन्द्व विवर्जितः॥दक्षिणे यमतीर्थं तु स्नानं कुर्याद्यथाविधि॥५॥यमस्य भवनं गत्वा मोदते कृतनिश्चयः॥ तत्राथ मुञ्चते प्राणान् लोभमोहविवर्जितः॥६॥ यमलोकं परित्यज्य मम लोकं स गच्छति ॥ तत्रैव वारुणं तीर्थमासाद्य स्नानमाचरेत्॥७॥वारुणं भवनं गत्वा मुच्यते सर्वकिल्बिषात् ॥ तथात्र मुञ्चते प्राणान्कामक्रोधविवर्जितः ॥ ८ ॥ वारुणं लोकमुत्सृज्य मम लोकं स गच्छति ॥ तत्र मध्ये च यः स्नाति क्रीडते स मया सह ॥९॥ अथाऽत्र मुञ्चते प्राणान्मम लोकं स गच्छति ॥ अन्नकूटं ततः प्राप्य तस्य कुर्यात्प्रदक्षिणम् ॥१०॥ न तस्य पुनरावृत्तिर्देवि सत्यं ब्रवीमि ते ॥ स्नात्वा मानसगङ्गायां दृष्ट्वा गोवर्द्धने हरिम् ॥ ११ ॥ अन्नकूटं परिक्रम्य किं पुनः परिशोचति ॥ सोमवारे त्वमायां वै प्राप्य गोवर्द्धने गिरिम् ॥१२॥ दत्त्वा पिण्डं पितृभ्यश्च राजसूयफलं भवेत् ॥ गयायां पिण्डदानेन यत्फलं प्राप्यते नरैः ॥१३॥ तत्फलं प्राप्यते तत्र नात्र कार्या विचारणा ॥ गोवर्द्धनं परिक्रम्य दृष्ट्वा देवं परं हरिम् ॥ १४ ॥ राजसूयाश्वमेधानां फलं प्राप्नोत्यसंशयम् ॥ १५ ॥ पृथिव्युवाच ॥ परिक्रमोऽन्नकूटस्य विधिना क्रियते कथम् ॥ प्रभावगुणमाहात्म्यं तद्भवान्वक्तुमर्हति ॥ १६ ॥ श्रीवराह उवाच ॥ मासि भाद्रपदे या तु शुक्ला चैकादशी शुभा ॥ गोवर्द्धने सोपवासः कुर्यात्तत्र प्रदक्षिणाम् ॥१७॥ स्नात्वा मानसगङ्गायां प्रभाते उदिते रवौ ॥ गोवर्द्धनं प्रसाद्यैवं हरिं चाचलमूर्द्धनि ॥ १८ ॥ पुण्डरीकं ततो गच्छेत्कुण्डे स्नात्वा विधानतः ॥ देवान्पितॄन्समभ्यर्च्य पुण्डरीकमथार्च्य च ॥ १९ ॥ सर्वपाप विनिर्मुक्तः प्रयाति भवनं हरेः ॥ कुण्डं चाप्सरसं नाम प्रसन्नसलिलाशयम् ॥ २० ॥ तत्र स्नानं तर्पणं च कृत्वा फलमवाप्नुयात् ॥ राजसूयाश्व मेधानां धूतपाप्मा न संशयः ॥२१॥ तीर्थं संकर्षणं नाम्ना बलभद्रेण रक्षितम् ॥ गोहत्या पूर्वसंलग्ना उत्तीर्णा तत्र दूरतः ॥२२॥ स्नानाद्गच्छति सा क्षिप्रं नाऽत्र कार्या विचारणा ॥ अन्नकूटस्य सान्निध्ये तीर्थं शक्रविनिर्मितम् ॥ २३ ॥ तत्र कृष्णेन पूजार्थमिन्द्रस्य विहतो मखः ॥ महदिन्द्रस्य चोत्थानं भक्ष्यभोज्यसमन्वितम् ॥२४॥ कृत्वा तुष्टिकरान्साक्षादिन्द्रेण सह संकथा ॥ इन्द्रस्य वर्षतोऽत्यन्तं तासां पीडाकरं जलम् ॥२५॥ तासां गवां रक्षणाय धृतो गिरिवरस्तदा ॥ सोऽन्नकूट इति ख्यातः सर्वतः शक्रपूजितः ॥ २६ ॥ देवा देव्यस्तथा गावो ऋषिभिश्च समन्विताः ॥

पूजितास्तर्पिताः श्रेष्ठाः श्रमतो विष्णुना पुरा ॥ २७ ॥ तस्मिन्स्थाने तर्पणेन शतक्रतुफलं लभेत् ॥ ततः कदम्बखण्डाख्यं कुण्डं तु विमलोदकम् ॥२८॥ स्नात्वा पितॄन्समभ्यर्च्य ब्रह्मलोकमवाप्नुयात् ॥ ततो गच्छेद्देवगिरिं शतवाहुसमुच्छ्रितम् ॥२९॥ यत्र स्नानादृशनाच्च वाजपेयफलं लभेत् ॥ महादेवं ततो दृष्ट्वा गत्वा ध्यात्वा फलं लभेत् ॥३०॥ कुण्डे स्नात्वा पितॄंस्तर्प्य कृतकृत्यो दिवं व्रजेत् ॥ गङ्गायाश्चोत्तरं यावद्देवदेवस्य चक्रिणः ॥ ३१ ॥ अरिष्टेन समं यत्र महद्युद्धं प्रवर्त्तितम् ॥ घातयित्वा ततश्चेममरिष्टं वृषरूपिणम् ॥ ३२ ॥ कोपेन पार्ष्णिघातेन मह्यां तीर्थं प्रवर्तितम् ॥ वृषभस्य वधाज्ज्ञेयं तीर्थं सुमहदद्भुतम् ॥३३॥ स्नातस्तत्र तदा कृष्णो वृषं हत्वा महासुरम् ॥ वृषहत्यासमायुक्तः कृष्णश्चिन्ताग्नितोऽभवत् ॥३४॥ वृषो हतो मया चायमरिष्टः पापपूरुषः ॥ तत्र राधा समाश्लिष्य कृष्णमक्लिष्टकारिणम् ॥३५॥ स्वनाम्ना विदितं कुण्डं कृतं तीर्थमदूरतः ॥ राधाकुण्डमिति ख्यातं सर्वपापहरं शुभम् ॥ ३६ ॥ अरिष्टराधाकुण्डाभ्यां स्नानात्फलमवाप्नुयात् ॥ राजसूयाश्वमेधानां नात्र कार्या विचारणा ॥३७॥ गोनरब्रह्महत्यायाः पापं क्षिप्रं विनश्यति ॥ तीर्थं हि मोक्षराजाख्यं नृणां मुक्तिप्रदायकम् ॥ ३८ ॥ यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ इन्द्रध्वजोच्छ्रयं यत्र पूर्वस्यां दिशि वै कृतम् ॥ ३९ ॥ इन्द्रध्वजमिति ख्यातं तीर्थं चैवातिमुक्तिदम् ॥ तत्र स्नाता दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥ ४० ॥ ततो हरौ निवेद्याशु यात्राफलमनुत्तमम् ॥ चक्रतीर्थे नरः स्नात्वा पञ्चतीर्थाख्यकुण्डके ॥ ४१ ॥ समाप्य तीर्थयात्रां च रात्रौ जागरणं तथा ॥ गोवर्द्धने च कर्त्तव्यं महापातकनाशनम् ॥ ४२ ॥ एकादश्यां तदा रात्रौ कृत्वा जागरणं शुभम् ॥ द्वादश्यामुपासि स्नात्वा पिण्डं निर्वाप्य शक्तितः ॥४३॥ पितॄणां मुक्तिदं तेषां य एवं कुरुते नरः ॥ सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति॥४४॥ एतत्ते कथितं भद्रे अन्नकूटपरिक्रमम् ॥ यथानुक्रमयोगेन तथापाडेऽपि चोच्यते ॥ ४५ ॥ य एतच्छृणुयाद्भक्त्या तीर्थानुक्रमणं हरेः ॥ गोवर्द्धनस्य माहात्म्यं गङ्गास्नानफलं भवेत् ॥ ४६ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्यान्तर्गते गोवर्द्धनमाहात्म्येऽन्नकूटपरिक्रमप्रभावो नाम चतुःपञ्चशततमोऽध्यायः ॥ १६४ ॥ श्रीवराह उवाच ॥ अतः परं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ यथावृत्तं प्रतिष्ठाने दक्षिणापथमण्डले ॥ १ ॥ सुशीलो नाम वैश्यस्तु तस्मिन्वसति पत्तने ॥ धनधान्यसमृद्धस्तु बहुपुत्रः कुटुम्बवान् ॥ २ ॥ कुटुम्ब

भरणासक्तो नित्यकालं हि तिष्ठति ॥ स्नानं दानं जपं होमं देवार्चां न करोति सः ॥३॥ क्रयविक्रयसक्तस्य कालो दीर्घो गतस्तदा ॥ कदाचिदपि पापोऽसौ न साधु गमनं गतः ॥ ४ ॥ न तेन धर्मश्रवणं कदाचिदपि संश्रुतम् ॥ देवानां ब्राह्मणानां च भक्तिस्तस्य न विद्यते ॥ ५ ॥ आत्मो दरनिमित्तं हि पापं च कुरुते सदा ॥ गच्छन्तं बहुकालं च न तं बुध्यति पापकृत् ॥ ६ ॥ न तस्य जायते बुद्धिर्दानं दातुं कदाचन ॥ तस्यैवं वसतस्तत्र प्रतिष्ठाने पुरोत्तमे ॥ ७ ॥ धनयुक्तोऽपि पापोऽसौ न ददाति कदाचन ॥ नैवान्यमतिदातारं शक्नोति च निरीक्षितुम् ॥ ८ ॥ स तु कालेन महता कुटुम्बासक्तमानसः ॥ कदाचिद्देवयोगेन साध्वीं भार्यां प्रियान्सुतान् ॥ ९ ॥ त्यक्त्वा जगाम निधनं प्रेतत्वं समुपागतः ॥ निरुदकेषु देशेषु विच्छायेषु वनेषु च ॥ १० ॥ परिभ्रमन्क्षुधाविष्टो मरुदेशं गतोऽपि सः ॥ तत्रैव च कृतावासो बहुकालं स वै वणिक् ॥ ११ ॥ कदाचिद्देवयोगेन तत्र सार्थ उपागतः ॥ तस्य मध्ये तु वणिजो मथुरायां विनिःसृताः ॥ १२ ॥ गते सार्थे तु स वणिक् तं वृक्षं समुपाश्रितः ॥ तत्रैव वसति प्रेतो रौद्ररूपो भयानकः ॥ १३ ॥ दीर्घदंष्ट्रः सुविकटो ह्रस्वबाहुर्विभीषणः ॥ महाहनुर्वैशालाक्षो बिडालसदृशाननः ॥ १४ ॥ अथ कालेन बहुना दैवयोगेन भामिनि ॥ तत्राजगाम कश्चित्तु क्रयविक्रयकारकः ॥ १५ ॥ तं दृष्ट्वा दूरतः प्रेतश्चातिहर्षेण संयुतः ॥ तत्राजगाम नृत्यन् स इदं वचनमब्रवीत् ॥१६॥ भक्ष्यभूतो ममाद्य त्वं क्व भवान्यातुमिच्छति॥प्रेतस्य वचनं श्रुत्वा सोऽतिभीतो द्रुतङ्गतः॥१७॥ गच्छन्तं तं गृहीत्वा स प्रेतो वचनमब्रवीत् ॥मम त्वं विहितो भक्ष्यः स्वयं प्राप्तोऽसि मानव ॥१८॥मांसं ते भक्षयिष्यामि पिबामि तव शोणितम् ॥ इत्या कर्ण्य वचस्तस्य स वणिग्वाक्यमब्रवीत् ॥ १९ ॥ कुटुम्बभरणार्थाय सम्प्राप्तो दुर्गमाटवीम् ॥ वृद्धः पिता मम गृहे माता पत्नी पतिव्रता ॥२०॥ मयि सम्भक्षिते रक्षः कुटुम्बं हि मरिष्यति ॥ ततो वचनमाकर्ण्य प्रेतो वचनमब्रवीत् ॥ २१ ॥ कस्मात्स्थानात्समायातः सत्यं ब्रूहि महामते ॥ २२ ॥ विभुरुवाच ॥ गोवर्द्धनो गिरिवरो यमुना च महानदी ॥ तयोर्मध्ये पुरी रम्या मथुरा लोकविश्रुता ॥ २३ ॥ तस्यां वसाम्यहं प्रेत पितृपैतामहे गृहे ॥ तत्र मे वसतो नित्यं यद्द्रव्यं पूर्वसञ्चितम् ॥ २४ ॥ तत्सर्वं तस्करैर्नीतं क्षीणवित्तोऽभवं तदा ॥ स्वल्पं वित्तं गृहीत्वा ऽहं समायातो मरुस्थलम् ॥ २५ ॥ तव दृष्टिपथं यातो यत्कार्यं तत्कुरुष्व मे ॥ २६ ॥ प्रेत उवाच ॥ न त्वां खादितुमिच्छामि कृपा मे

जायते त्वयि ॥ समयेन हि मोक्ष्यामि कुरुष्व वचनं मम ॥ २७ ॥ निर्वृत्य गच्छ मथुरां मम कार्यार्थसाधकः ॥ तत्र गत्वा त्वया कार्यं यत्कर्त्तव्यं वदामि तत् ॥२८॥ स्नानं कृत्वा तु विधिवत्कूपे चातुःसामुद्रिके ॥ पिण्डदानं कुरुष्व त्वं मम नाम्ना प्रयत्नतः ॥२९॥ स्नानस्य च फलं देहि ततो गच्छ यथासुखम् ॥ प्रेतवाक्यं ततः श्रुत्वा विभुर्वचनमब्रवीत्॥३०॥नाहं यास्यामि मथुरां द्रव्याभावे कथंचन ॥ भक्षयस्व शरीरं मे ततस्तृप्तिमवाप्स्यति ॥३१॥ प्रेत उवाच ॥ गृहे बहुधनं तेऽस्ति त्वं गच्छ मम सत्कुरु ॥ आस्ते धनमपर्याप्तं गच्छ त्वं मा विलम्बय ॥३२॥ विभुरुवाच ॥ गृहे मम धनं नास्ति यत्त्वया समुदीरितम् ॥ गृहेशेपं मम धन न चान्यत्तत्र विद्यते ॥ ३३ ॥ पित्रोपैतामही कीर्त्तिरविकेया हि सा मया ॥ प्रेतः प्रहस्य सानन्दमिदं वचनमब्रवीत् ॥ ३४ ॥ अस्ति चैव धनं प्रोक्तं यन्मया त्वद्गृहे विभो ॥ सुवर्णभारो गर्त्तस्थो गृहे तिष्ठति साम्रितः ॥ ३५ ॥ निवर्त्तं गच्छ संतुष्टः सुहृदां प्रीतिवर्द्धनः ॥ एवं द्रक्ष्यामि ते मार्गं मथुरा येन गम्यते ॥ ३६ ॥ सूत उवाच ॥ वणिग्वृद्धमना भूत्वा पुनर्वचनमब्रवीत् ॥ इमामवस्थां सम्प्राप्य कथं ज्ञानसमुद्भवः ॥ ३७ ॥ ततः स कथयामास यद्वृत्तं हि पुरातनम् ॥ प्रतिष्ठाने पुरवरे विष्णोरायतनं महत् ॥ ३८ ॥ प्रभातसमये तत्र विष्णोरायतने शुभे ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्तत्र समागताः ॥ ३९ ॥ वाचकस्तत्र पठति कथां पौराणिकीं शुभाम् ॥ मम मित्रं च तत्रैव नित्यकालं च गच्छति॥४०॥तस्मिन्काले तु मित्रेण नीतोऽहं विष्णुमन्दिरम्॥ अत्यादरेण महता सन्तोष्य च पुनः पुनः ॥४१॥ मित्रेण सह तत्रैव तस्य पार्श्वे व्यवस्थितः ॥ श्रुतो मया ततः कूपः पुण्योऽयं पापनाशनः ॥४२॥ समुद्राः किल तिष्ठन्ति चत्वारोऽत्र समागताः ॥ तस्य कूपस्य माहात्म्यं श्रुतं तत्र महत्फलम् ॥ ४३ ॥ वाचकाय ततो दानं दत्तं सर्वमहाजनैः ॥ मित्रेण प्रेरितो दाने मया मौनं समाश्रितम् ॥ ४४॥ मित्रेण च पुनः प्रोक्तं यथाशक्त्या प्रदीयताम् ॥ तदा मित्रमसङ्केन दत्तो वै स्वर्णमाषकः ॥४५॥ ततः कालेन महता गतो वैवस्वतक्षयम् ॥ वैवस्वतनियोगेन ततोऽहं पूर्वकर्मभिः ॥ ४६ ॥ प्रेतत्वं समनुप्राप्तो दुस्तरं दुर्गमं महत् ॥ न दत्तं न हुतं चापि तीर्थं नैवावगाहितम् ॥४७॥ न तर्पितास्तु पितरः प्राप्तोऽहं प्रेततां ततः ॥ इत्येत्कथितं सर्वं यन्मां त्वं परिपृच्छसि ॥ ४८ ॥ गच्छ त्वं सम्मुखस्तत्र यत्र सा मथुरा पुरी ॥ प्रेतस्य वचनं श्रुत्वा विभुर्वचनमब्रवीत् ॥ ४९ ॥ कथं धारयसे प्राणान्वृक्षमूलं समा

श्रितः ॥ ५० ॥ प्रेत उवाच ॥ कथितं हि मया पूर्वं यद्दत्तं हि पुरातनम् ॥ वाचकाय तु यद्दत्तं सुवर्णस्य च मापकम् ॥ ५१ ॥ तद्दानस्य प्रभावेण नित्यं तृप्तोऽस्मि वै विभो ॥ अकामन मया दत्तं तस्यैदं कर्मणः फलम् ॥ ५२ ॥ प्रेतभावं गतस्यापि न मे ज्ञानस्य विभ्रमः ॥ ततश्च स वणिक्श्रेष्ठ आगत्य मथुरां पुरीम् ॥ ५३ ॥ कृतं तेन च तत्सर्वं यथा प्रेतेन भाषितम् ॥ प्रेतोऽसौ तेन कृत्येन मुक्तिं प्राप्य दिवं गतः ॥५४॥ एतत्ते कथितं भूमे माहात्म्यं मथुराभवम् ॥ चतुःसामुद्रिके कूपे पिण्डदाने परां गतिम् ॥५५॥ तीर्थे चैव गृहे वापि देवस्थानेऽपि चत्वरे ॥ यत्र तत्र मृता देवि मुक्तिं यान्ति न चान्यथा ॥ ५६ ॥ अन्यत्र हि कृतं पापं तीर्थवासाद्य गच्छति ॥ तीर्थे तु यत्कृतं पापं वज्रलेपो भविष्यति ॥ ५७ ॥ मथुरायां कृतं पापं तत्रैव च विनश्यति ॥ एषा पुरी महापुण्या यस्यां पापं न विद्यते ॥ ५८ ॥ कृतघ्नश्च सुरापश्च चौरो भग्नव्रतस्तथा ॥ मथुरां प्राप्य मनुजो मुच्यते सर्वकिल्बिषैः ॥ ५९ ॥ तिष्ठयुगसहस्रं तु पादेनैकेन यः पुमान् ॥ तस्याधिकं भवेत्पुण्यं मथुरायां निवासिनः ॥ ६० ॥ परदारस्ता ये च ये नरा अजितेंद्रियाः ॥ मथुरावासिनः सर्वे ते देवा नरविग्रहाः ॥ ६१ ॥ बलिभिक्षाप्रदातारस्ते मृताः क्रोधवर्जिताः ॥ तीर्थस्नानरता ये च देवास्ते नरमूर्त्तयः ॥ ६२ ॥ यदन्येषां सहस्रेण ब्राह्मणानां महात्मनाम् ॥ एकेन पूजितेन स्यान्माथुरेणाखिलं हि तत् ॥६३॥ अनृग्वै माथुरो यत्र चतुर्वेदस्तथापरः ॥ नच वेदैश्चतुर्भिःस्यान्माथुरेण समः क्वचित् ॥६४॥ भवन्ति सर्वतीर्थानि पुण्यान्यायतनानि च ॥ मङ्गलानि च सर्वाणि यत्र तिष्ठन्ति माथुराः ॥ ६५ ॥ चतुर्वेदं परित्यज्य माथुरं पूजयेत्सदा ॥ सिद्धा भूतगणाः सर्वे ये च देवगणा भुवि ॥ ६६ ॥ मथुरावासिनो लोकान्पश्यन्ति च चतुर्भुजान् ॥ मथुरायां ये वसन्ति विष्णुरूपा हि ते नराः ॥ ६७ ॥ ज्ञानिनस्तान्हि पश्यन्ति अज्ञाः पश्यन्ति नान्न च ॥ ६८ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये कूपप्रभावे ब्राह्मणामाहात्म्यं नाम पंचषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥ धरण्युवाच ॥ श्रुतानि तु महादेव तीर्थानि विविधानि तु ॥ असिकुण्डेति संज्ञेयं तन्मे त्वं कथय प्रभो ॥ १ ॥ श्रीवराह उवाच ॥ सुमतिर्नाम राजासीद्धार्मिको लोकविश्रुतः ॥ तीर्थयात्रानिमित्तेन स्वर्गलोकं गतः पुरा ॥ २ ॥ गते स्वर्गं तु नृपतौ पुत्रो राज्यं चकार ह ॥ विमतिर्नाम नाम्ना च राज्ये पैतामहे स्थितः ॥ ३ ॥ राज्यं च कुर्वतस्तस्य आगतो नारदस्तदा ॥ विष्टरं

॥ १७२ ॥

पाद्यमर्घ्यं च तस्मै दत्तं यथोचितम् ॥ ४ ॥ प्रतिगृह्य च तत्सर्वं तमुवाच स नारदः ॥ पितुर्ह्येनृणतां गत्वा स पुत्रो धर्मभाग्भवेत् ॥ ५ ॥
इत्युक्त्वा नारदस्तत्र तत्रैवान्तरधीयत ॥ नारदे तु गते राजा पप्रच्छ स्वात्ममन्त्रिणः ॥६॥ तदा किमुक्तमृषिणा नारदेन पितुः कृते ॥ आनृण्य
मिति यद्वाक्यं मया बुद्धं न किंचन ॥ ७ ॥ मन्त्रिणश्च ततो ज्ञात्वा पितुर्मरणमेव च ॥ तीर्थयात्रानिमित्तं च तस्मै राज्ञे न्यवेदयन् ॥ ८ ॥
अत एवोक्तमानृण्यं नारदेन पितुस्तव ॥ श्रुत्वा वाक्यं तदा राजा तीर्थयात्रां चकार ह ॥ ९ ॥ विमतेर्बुद्धिरुत्पन्ना गच्छामो मथुरां पुरीम् ॥
चतुरो वार्षिकान्मासान्मथुरायां वसामहे ॥१०॥ सर्वाणि तत्र तीर्थानि तिष्ठन्ति विविधानि च ॥ आगते तु नृपे तत्र तीर्थान्यूचुः परस्परम् ॥११॥
युद्धं विमतिना सार्द्धं स्वयं कर्तुं न शक्नुमः ॥ कल्पयामं तु गच्छामो वराहो यत्र तिष्ठति ॥ १२ ॥ गतानि तत्र तीर्थानि कल्पयामं वसु
न्धरे ॥ तत्र वाराहरूपेण स्थितोऽहं च यदृच्छया ॥ १३ ॥ यावन्निरीक्षयाम्यग्रं तावत्तिष्ठन्ति सन्निधौ ॥ तथान्यूचुः ॥ जय विष्णो जयाच्चिन्त्य
जय देव जयाच्युत ॥१४॥ जय विश्वेश कर्त्तेश जय देव नमोऽस्तु ते ॥ श्रीवराह उवाच ॥ तीर्थैः स्तुतोऽहं वसुधे वचनं चेदमब्रुवम् ॥१५॥
वरं वृणुत भद्रं वो यद्वो मनसि वर्त्तते ॥ तीर्थान्यूचुः ॥ वराह यदि देवेश अभयं दातुमर्हसि ॥ १६ ॥ सुपापिना विमतिना कृतत्रासः सुदा
रुणः ॥ तं नियच्छस्व पापिष्ठं यदि पश्यसि नः सुखम् ॥ १७ ॥ श्रीवराह उवाच ॥ हिताय सर्वतीर्थानां हनिष्यामि महारिपुम् ॥ तत्र
तीर्थनियोगेन आगतो मथुरां पुरीम् ॥१८॥ तत्रागते तु वसुधे युद्धं कृत्वा तु तेन वै ॥ तदासिना तु दिव्येन स राजा बलदर्पितः ॥ सूदितो हि
मया देवि अस्यग्रं निहितं भुवि ॥ १९ ॥ असेरग्रेण तूद्धृत्य मृत्तिकां वरवर्णिनि ॥ तत्र कुण्डं महद्दिव्यं देवर्षिविधिनिर्मितम् ॥ असिकुण्डेति
संज्ञा च प्राप्ता तेन वसुन्धरे ॥२०॥ तत्राश्चर्यं प्रवक्ष्यामि मनःकर्णसुखावहम् ॥ पश्यन्ति मनुजाः सिद्धाः सर्वपापविवर्जिताः ॥ २१ ॥ द्वादश्या
च चतुर्दश्यां श्रद्दधाना जितेन्द्रियाः ॥ फलानि तस्य पश्यन्ति लभन्ते न सुनिश्चिताः ॥ २२ ॥ तस्मिन्काले ह्यहं देवि मथुरायां समागतः ॥
तत्र तिष्ठाम्यहं भद्रे पश्चिमां दिशमाश्रितः ॥ २३ ॥ तत्र कृत्वा च हेरण्या मूर्त्तयश्च चतुर्विधाः ॥ तीर्थं वराहसंज्ञे तु मथुरायां व्यव
स्थिताः ॥ २४ ॥ सुदृढाः सुदृशः सुभ्रुयः पश्यति स मुच्यते ॥ एका वराहसंज्ञा च तथा नारायणस्य च ॥ २५ ॥ वामनस्य तृतीया वै

चतुर्थी राघवस्य च ॥ एताश्चतस्रो यः पश्येत्स्नात्वा कुण्डेऽसिसंज्ञिते ॥२६ ॥ चतुःसागरपर्यन्ता क्रान्ता तेन धरा ध्रुवम् ॥ तीर्थानां माथुराणां च सर्वेषां फलमश्नुते ॥ २७ ॥ तत्र सर्वेषु तीर्थेषु असिकुण्डं महत्तरम् ॥ या संख्या कथिता पूर्वं तीर्थानां दक्षिणोत्तरे ॥ २८ ॥ असिकुण्डं समारभ्य तीर्थानुक्रमणिका वरा ॥ सुतोत्थितोऽपि द्राङ्दृश्यामसिकुण्डाप्लुतो नरः ॥ २९ ॥ मूर्त्तीः पश्यति यस्तास्तु ब्रह्मभूयाय कल्पते ॥ नास्तीह पुनरावृत्तिर्भवेत्कालविपर्यये ॥ ३० ॥ इति श्रीवराहपुराणे असिकुण्डप्रभावो नाम षट्पष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥ श्रीवराह उवाच ॥ शृणु देवि यथा संज्ञा विश्रान्तेः कीर्तिता पुरा ॥ राक्षसेन पुरा प्रोक्ता ब्राह्मणाय महात्मने ॥ १ ॥ पृथिव्युवाच ॥ किमर्थं राक्षसेनोक्ता संज्ञा विश्रान्तिसंज्ञिता ॥ किमर्थं पृष्टवान्विप्रः सर्वं कथय मे प्रभो ॥ २ ॥ श्रीवराह उवाच ॥ उज्जयिन्यामभूद्विप्रः सदाचारविवर्जितः ॥ न स पूजयते देवान्न स साधून्नमस्यति ॥ ३ ॥ पुण्यतीर्थे समासाद्य न च स्नानं करोति सः ॥ वेदवेदाङ्गरहितः परदारस्तदा ॥ ४ ॥ सन्ध्ये द्वे शयने चैव नित्यं मूढः स तिष्ठति ॥ न स देवमनुष्यांश्च पितॄन्पूजयते सदा ॥ ५ ॥ पापाचारस्ततो नित्यं पापसङ्गः सुदुर्मतिः ॥ गार्हस्थ्यधर्ममाश्रित्य मोहितो वर्त्तते सदा ॥ ६ ॥ गार्हस्थ्यं सर्वधर्माणां श्रेष्ठमुक्तं स्वयंभुवा ॥ यावन्ति जन्तवः सर्वे यथा गोः सर्वतः स्थिताः ॥ ७ ॥ यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ॥ एवं गार्हस्थ्यमाश्रित्य सर्वे जीवन्ति जन्तवः ॥ ८ ॥ ततः स चौर्यं कुर्वाणः पापैः सह नराधमः ॥ स च रात्रौ द्रवँल्लोकाँल्लङ्घ्योऽसौ राजरक्षिभिः ॥ ९ ॥ पलायमानः स परमन्धकूपेऽपतत्तदा ॥ मृतोऽसौ पतितस्तत्र राक्षसत्वमुपागतः ॥ १० ॥ अन्धकूपे स पतितो घोररूपोऽवसत्तदा ॥ कदाचिदथ कार्येषु महान्सार्थ उपागतः ॥ ११ ॥ तेषां मध्ये द्विजः कश्चिद्दर्शां कृत्वा वसुन्धरे ॥ रक्षोघ्नेन च मन्त्रेण सर्वं सार्थं च रक्षति ॥ १२ ॥ तत्रागत्य च रक्षस्तु ब्राह्मणं वाक्यमब्रवीत् ॥ राक्षस उवाच ॥ अहं दास्यामि ते विप्र यत्ते मनसि वर्त्तते ॥ १३ ॥ बहुकालेन संप्राप्तं भोजनं च यथेप्सितम् ॥ उत्तिष्ठ विप्र गच्छ त्वमन्यत्र शयनं कुरु ॥ १४ ॥ येनाहं भक्षये सार्थं यावत्तृप्तिर्भवेन्मम ॥ राक्षसस्य वचः श्रुत्वा विप्रो वचनमब्रवीत् ॥ १५ ॥ एकः सार्थं प्रयातोऽहं नोत्सृजामि कथंचन ॥ तस्माद्राक्षस गच्छ त्वं सार्थं मम परिग्रहम् ॥ १६ ॥ निरीक्षितुं न शक्नोऽसि मम मन्त्रबलेन हि ॥

राक्षस उवाच ॥ मम भक्ष्ये हते विप्र दोषस्तव भविष्यति ॥ १७ ॥ दयां कुरु त्वं विप्रर्षे भोजनं मम दीयताम् ॥ ततोऽपृच्छद्द्विजो विप्रो राक्षसं दारुणं प्रति ॥ १८ ॥ केन त्वं कर्मदोषेण राक्षसत्वमुपागतः ॥ ततश्च कथयामास कथावृत्तं पुरातनम् ॥ १९ ॥ अनाचारादि हेतोश्च राक्षसत्वमुपागतः ॥ आत्मानं कथयामास विप्राग्रेस यथायथम् ॥२०॥ तस्य दुःखेन संयुक्तो विप्रोऽसौ वाक्यमब्रवीत् ॥ विप्र उवाच ॥ मित्रत्वे वर्त्तते रक्षस्तव दास्यामि किं वद ॥ २१ ॥ आत्मना चोपकारेण प्रियं किं करवाणि ते ॥ राक्षस उवाच ॥ ददासि यदि तद्विप्र यन्मे मनसि वर्त्तते ॥ २२ ॥ मथुरायां च यत्स्नातं कृतं विश्रान्तितंज्ञके ॥ तच्च स्नानफलं देहि येन मुक्तिं व्रजाम्यहम् ॥ २३ ॥ तेन दुःखेन संयुक्तो विप्रो वाक्यमथाब्रवीत् ॥ विप्र उवाच ॥ कथं जानासि रक्षस्त्वं तीर्थं विश्रान्तिसंज्ञकम् ॥ २४ ॥ कथं च संज्ञा तस्याभूत्कथयत्वं हि राक्षस ॥ राक्षस उवाच ॥ पुरी उज्जयिनी नाम्ना तस्यां वासो हि मे सदा ॥ २५ ॥ कस्मिंश्चित्थ कालेन गतोऽहं विष्णुमन्दिरम् ॥ तस्याग्रे तिष्ठते विप्रो वाचको वेदपारगः ॥ २६ ॥ विश्रान्तितीर्थमाहात्म्यं श्रावयत्स दिने दिने ॥ तस्य श्रवणमात्रेण मम भक्तिर्हृदि स्थिता ॥२७॥ सा संज्ञा च श्रुता तत्र विश्रान्तेश्च मयाऽनघ ॥ वासुदेवो महाबाहुर्जगत्स्वामी जनार्दनः ॥ २८ ॥ विश्रामं कुरुते तत्र तेन विश्रान्तिसंज्ञिता ॥ राक्षसस्य वचः श्रुत्वा विप्रो वचनमब्रवीत् ॥ २९ ॥ एकस्नानस्य हि फलं तव दत्तं च राक्षस ॥ विप्रे चेत्युक्तमात्रे च मोक्षावासमवाप सः ॥ ३० ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये विश्रान्तिमाहात्म्यं नाम सप्तषष्टयधिकशततमोऽध्यायः ॥१६७॥ धरण्युवाच ॥ मथुरां रक्षते कोऽसौ क्षेत्रपालो व्यवस्थितः ॥ तेन दृष्टेन यत्पुण्यं कथयस्वाखिलं प्रभो ॥ १ ॥ श्रीवराह उवाच ॥ दृष्ट्वा भूतपतिं देवं वरदं पापनाशनम् ॥ तस्य दर्शनमात्रेण मथुरायां फलं भवेत् ॥ २ ॥ पुरा वर्षसहस्रं तु तपस्तप्तं सुदारुणम् ॥ पूर्णे वर्षसहस्रे तु मया सन्तोषितो हरः ॥ ३ ॥ वरं वरय भद्रं ते यस्ते मनसि वर्त्तते ॥ ईश्वर उवाच ॥ सर्वगस्त्वं हि देवेश मया ज्ञातं सुनिश्चितम् ॥ ४ ॥ मथुरायां च मे स्थानं सदा देव प्रदीयताम् ॥ देवदेव वचः श्रुत्वा हरिर्वचनमब्रवीत् ॥ ५ ॥ मथुरायां च देव त्वं क्षेत्रपालो भविष्यसि ॥ त्वयि दृष्टे महादेव मम क्षेत्रफलं भवेत् ॥६॥ अन्यथा नाप्नुयात् सिद्धिमेवमेतन्न संशयः ॥ येन यद्यादृशं पुण्यं कृतं तीर्थे प्रयत्नतः ॥७॥ भजते मनुजः सिद्धिमात्मभावेन तादृशीम् ॥ मम क्षेत्रप्रवेशे च भूमिः

संसारनाशिनी ॥ ८ ॥ इन्द्रस्येव पुरी रम्या यथा नाकेऽमरावती ॥ जम्बूद्वीपे तथोत्कृष्टा मथुरा मम वल्लभा ॥ ९ ॥ विंशतियोजनानां हि माथुरं मम मण्डलम् ॥ पदे पदेऽश्वमेधानां फले नात्र विचारणा ॥ १० ॥ न मया कथितं देवि ब्रह्मणश्च महात्मनः ॥ रुद्रस्य न मया पूर्वं कथितं च वसुन्धरे ॥ ११ ॥ मया सुगोपितं पूर्वं गुह्याद्गुह्यतरं परम् ॥ अत्र क्षेत्रे पुरी रम्या सर्वरत्नविभूषिता ॥१२॥ तस्यां तिष्ठन्ति तीर्थानि तानि वक्ष्यामि तच्छृणु ॥ पष्टिकोटिसहस्राणि पष्टिकोटिश्चतानि च ॥ १३ ॥ तीर्थसंख्या च वसुधे मथुरायां मयोदिता ॥ गोवर्द्धनं तथाक्रूरं द्वे कोटी दक्षिणोत्तरे ॥ १४ ॥ प्रस्कन्दनं च भाण्डीरं कुरुक्षेत्रसमानि षट् ॥ पुण्यात्पुण्यतरं श्रेष्ठमेतद्विश्रान्तिसंज्ञकम् ॥ १५ ॥ असिकुण्डं सर्वैकुण्डं कोटितीर्थोत्तमं स्मृतम् ॥ अविमुक्तं सोमतीर्थं यमनं तिन्दुकं ततः ॥१६॥ चक्रतीर्थं तथाक्रूरं द्वादशादित्यसंज्ञितम् ॥ एतत्पुण्यं पवित्रं च महापातकनाशनम् ॥१७॥ कुरुक्षेत्राच्छतगुणं मथुरायां न संशयः ॥ ये पठन्ति महाभागाः शृण्वन्ति च समाहिताः ॥ १८ ॥ मथुरायास्तु माहात्म्यं ते यान्तिपरमं पदम्॥कुलानि ते तारयन्ति द्वे शते विंशयोर्द्वयोः ॥१९॥ एतन्मरणकाले तु यः स्मरेत्प्रयतो नरः॥स गच्छेत्परमां सिद्धिमिह संसारनाशिनीम् ॥२०॥ एतत्ते कथितं देवि सर्वपातकनाशनम् ॥ तीर्थानां चैव माहात्म्यं किमन्यच्छ्रोतुमिच्छसि ॥२१॥ इति श्रीवराहपुराणे भगवच्छास्त्रे मथुरामाहात्म्ये अष्टषष्टयधिकशततमोऽध्यायः ॥ १६८ ॥ श्रीवराह उवाच ॥ मथुरायाः परं क्षेत्रं त्रैलोक्ये न च विद्यते ॥ तस्यां वसाम्यहं देवि मथुरायां च सर्वदा ॥ १ ॥ सर्वेषामेव तीर्थानां मथुरा च परं महत् ॥ कृष्णेन क्रीडितं तत्र तच्छुद्धं हि पदे पदे ॥ २ ॥ चक्रस्थितं हि तत्सर्वं कृष्णस्यैव पदेन तु ॥ तत्र मध्यं तु तत्स्थानमर्द्धचन्द्रे प्रतिष्ठितम् ॥ ३ ॥ तत्रैव वासिनो लोका मुक्तिं यान्ति न संशयः ॥ कृष्णस्य दक्षिणा कोटिरुत्तरा कोटिमध्यतः ॥४॥ तयोर्मध्ये स्थितो देव आकारात्सोमचक्रतः ॥ तौ देवौ क्षेत्रफलदौ स्नानदानादिकर्मणि ॥ ५ ॥ तस्माद्धि मरणं चात्र द्वे कोटी सर्वकर्मसु ॥ अर्द्धचन्द्रे तु यः स्नानं करोति नियताशनः ॥ ६ ॥ तेन वै चाक्षया लोकाः प्राताश्चैव न संशयः ॥ दक्षिणस्यां समारभ्य उत्तरस्यां समापयेत् ॥ यज्ञोपवीतमात्रेण त्रायन्ते च कुलं बहु ॥ ७ ॥ पृथिव्युवाच ॥ यज्ञोपवीतमात्राया विधानं कीदृशं प्रभो ॥ ८ ॥ यथामानं हि कर्तव्यं तत्सर्वं वक्तुमर्हसि ॥ श्रीवराह उवाच ॥ यज्ञोपवीतस्य विधिं

शृणुष्व वरवर्णिनि ॥ ९ ॥ दक्षिणस्यां समारभ्य उत्तरस्यां समापयेत् ॥ यज्ञोपवीतस्य विधिरेष एव प्रकीर्तितः ॥ १० ॥ मनुजा येन विधिना मुक्तिं यान्ति न संशयः ॥ अनेन विधिना चैव उत्तरस्यां समापयेत् ॥ गृहान्निःसृत्य मौनेन यावत्स्नानं समाचरेत् ॥ ११ ॥ पूजां कृष्णस्य कृत्वा वै ततो ब्रूयाद्वसुन्धरे ॥ स्नाने समाप्ते विधिवद्देवदेवस्य चैव हि ॥ १२ ॥ कृष्णस्य कृत्वा तु मखं स्नानादीनि यथाक्रमम् ॥ गां वै पयस्विनीं दत्त्वा हिरण्यं वसु चैव हि ॥१३॥ ब्राह्मणान्भोजयेत्पश्चाद्विधिरेष उदाहृतः ॥ तथा शयनमुद्दिश्य एवमेवं तु कारयेत् ॥ १४ ॥ न तस्य पुनरावृत्तिर्मम लोके महीयते ॥ अर्द्धचन्द्रे मृता देवि मम लोकं व्रजन्ति ते ॥१५॥ अन्यत्र तु मृता ये च अर्धचन्द्रकृताक्रियाः ॥ तेऽपि स्वर्गं गमिष्यन्ति दाहादिकरणैर्युताः ॥१६॥ यावदस्थीन्यर्द्धचन्द्रे यस्य तिष्ठन्ति देहिनः ॥ तावत्सुपुण्यकर्त्ता च स्वर्गलोके महीयते ॥१७॥ अर्द्धचन्द्रे विशेषोऽस्ति तीर्थं विश्रान्तिसंज्ञके ॥ दाहादिकरणे तत्र गर्दभोऽपि चतुर्भुजः ॥१८॥ गर्त्तेश्वरोऽथ भूतेशो द्वे कोटी तु वसुन्धरे ॥ मध्ये सदैव तिष्ठामि न त्यजामि कदाचन ॥१९॥ माथुराणां च यद्रूपं तद्रूपं मे वसुन्धरे ॥ माथुरेण तु तृप्तेन तृप्तोऽहं नात्र संशयः ॥२०॥ शृणु देवि यथावृत्तं गरुडस्य महात्मनः ॥ मथुरामागतो योऽसौ कृष्णदर्शनकांक्षया ॥ मथुरायां स्थितं देवं भिन्नरूपं न पश्यति ॥२१ ॥ तदा गतोऽसौ वसुधे देवस्थाग्रे विहंगमः ॥ कृष्णस्य दर्शनार्थाय दिव्यं स्तोत्रमुदीरयन् ॥ २२ ॥ गरुड उवाच ॥ विश्वरूप जयादित्य जय विष्णो जयाच्युत ॥ जय केशव ईशान जय कृष्ण नमोऽस्तु ते॥२३॥ जय मूर्त जयाचिन्त्य जय लोकविभूषण ॥ इत्येवं संस्तुतो देवो गरुडेन महात्मना ॥२४॥ गरुडस्य पुरस्तत्र स्थितो देवः शरीरवान् ॥ सान्त्वयामास गरुडं प्रीतिपूर्वमुवाच ह ॥२५॥ किं कुर्यात्स्तोत्र मेतन्मे किं वा तव चिकीर्षितम् ॥ मथुरागमकृत्ये ते सर्वं ब्रूहि ममाग्रतः ॥ २६ ॥ गरुड उवाच ॥ मथुरामागतश्चाहं तव दर्शनकांक्षया ॥ आगते तु मया देव न दृष्टं तव रूपकम् ॥२७॥ माथुरेरेव लोकेस्तु समं दृष्टं हि रूपकम् ॥ एकीभूतमहं सर्वं दृष्ट्वा मां मोह आविशत् ॥२८॥ तस्मात्स्तुतिस्तु देवेश कृतानुग्रहकाम्यया ॥ गरुडस्य वचः श्रुत्वा प्रहस्य मधुसूदनः ॥ २९ ॥ उवाच श्लक्ष्णया वाचा गरुडं प्रति भाविनि ॥ श्रीकृष्ण उवाच ॥ माथुराणां च यद्रूपं तद्रूपं मे विहंगम ॥३०॥ये पापास्ते न पश्यन्ति मद्रूपा माथुरा द्विजाः ॥ एवमुक्त्वा ततः कृष्णस्तत्रैवा

न्तरधीयत ॥ ३१ ॥ गरुडोऽपि ततः स्थानाद्गतो देवि यथासुखम् ॥ एतत्ते कथितं देवि माथुराणां तु रूपकम् ॥ ३२ ॥ येषां पूजितमात्रेण तुष्टोऽहं चैव सर्वदा ॥ मथुरायां मृता ये च मुक्तिं यान्ति न चान्यथा ॥ ३३ ॥ अपि कीटः पतंगो वा तिर्यग्योनिं गतोऽपि वा ॥ चतुर्भुजास्तु ते सर्वे भवन्तीति निश्चितम् ॥ ३४ ॥ यः पश्येत्पद्मनाभं तु द्वादश्यामाश्विनस्य तु ॥ एकदेहधरो देवो शिवकेशवरूपिणौ ॥ ३५ ॥ एकादश्यां चोपवासी कृतशौचः समाहितः ॥ कालिन्द्यां तु नरः स्नातो मुंचते योनिसंकटात् ॥ ३६ ॥ चैत्रस्य शुक्लद्वादश्यामुपोष्य स्नानमाचरेत् ॥ चिन्ताविष्णुं समभ्यर्च्य कृत्वा वै जागरं निशि ॥ ३७ ॥ यः करोति स मुच्येत नात्र कार्या विचारणा ॥ एकानंशां ततो देवीं यशोदां देवकीं तथा ॥ ३८ ॥ महाविद्येश्वरीं देवि मुच्यते ब्रह्महत्ययाः ॥ या धारा धर्मराजस्य मथुरायाश्च पश्चिमे ॥ ३९ ॥ स्नानं करोति तस्यां तु ब्रह्मदोषैर्न लिप्यते ॥ यं यं देवमभिप्रायेद्भक्तियुक्तेन चेतसा ॥ ४० ॥ विश्रान्तिसंज्ञकं दृष्ट्वा दीर्घविष्णुं च केशवम् ॥ सर्वेषां दर्शनं पुण्यं पूजनात्तु फलं भवेत् ॥ ४१ ॥ इति जपविधिहोमध्यानकाले स सम्यक्सततमभिसमीक्ष्य ब्रह्मणा यत्प्रयुक्तम् ॥ सकलगुणगणानामास्पदं ब्रह्मसंज्ञं जननमरणहीनं विष्णुमेवाभियाति ॥ ४२ ॥ इति श्रीवराहपुराणे प्रागितिहासे मथुरामाहात्म्ये नामैकोनसप्ततत्यधिकशततमोऽध्यायः ॥ १६९ ॥ श्रीवराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ मथुरायां पुरा वृत्तं गोकर्णस्य महात्मनः ॥ वसुकर्णः पिता तस्य वैश्यो धनसमृद्धिमान् ॥ १ ॥ तस्य भार्या सुशीला तु नाम्ना गुणसमन्विता ॥ भर्तुः प्रियकरी साध्वी न प्रसूता वयोऽधिका ॥ २ ॥ विललाप च सुश्रोणी चैकान्ते दीनमानसा ॥ सरस्वती संगमेऽथ स्त्रियो दृष्ट्वा प्रजावतीः ॥ ३ ॥ वृक्षमूले तु तत्रैव मुनिरेकः समास्थितः ॥ तस्या विलपितं श्रुत्वा शनैः सकरुणं हृदि ॥ ४ ॥ जातहार्दः प्रियं चेष्टं शनैः स्त्रियमथाब्रवीत् ॥ का त्वं कस्यासि सुभगे किमर्थं रोदिषि स्वयम् ॥ ५ ॥ इति तस्य वचः श्रुत्वा सा स्त्री ऋषिमथाब्रवीत् ॥ सापत्यास्तु स्त्रियो दृष्ट्वा क्रीडन्त्यो बालकैः सह ॥ ६ ॥ मम तन्नास्ति हि मुने दुर्भगायाः प्रजा सुखम् ॥ उवाच मुनिशार्दूलस्तां स्त्रियं पुत्रगर्द्धिनीम् ॥ ७ ॥ देवतायाः प्रसादेन तव पुत्रो भविष्यति ॥ शिवस्यायतनं पुण्यं गोकर्णेति च विश्रुतम् ॥ ८ ॥ तमाराधय देवेशं पत्या सह यशस्विनि ॥ स्नानदीपोपहारेण स्तोत्रैर्नानाविधैर्जपैः ॥ ९ ॥ इत्युक्ता सा च सुश्रोणी प्रणिपत्य प्रसाद्य तम् ॥ भर्त्रे सा कथयामास यदुक्तं मुनिना

॥१७९॥

प्रियम् ॥ १० ॥ स तद्वचनमाकर्ण्य प्रीतियुक्तं सुसंयुतम् ॥ जगादोच्चैः प्रियां देवि भद्रं जातो मनोरथः ॥ ११ ॥ ममाप्येतन्मतं देवि यदुक्तं मुनिणा ततः ॥ इति प्रियां समाभाष्य प्रियया च तथाऽकरोत् ॥ १२ ॥ सरस्वत्याः संगमे तौ स्नात्वा गोकर्णमर्चतुः ॥ पुष्पदीपोपहारं तु चक्राते तौ दिनेदिने ॥ १३ ॥ एवं तयोर्दशाब्दानि गतानि सुतहेतवे ॥ ततः प्रसन्नो भगवानुमापतिरुवाच ह ॥ १४ ॥ भविष्यति युवां पुत्रो रूपवान् गुणसंयुतः ॥ सस्यसन्ततिवद्दृश्यः सन्तानो यस्य वै बहु ॥ १५ ॥ देवतानां प्रसादेन खलु तस्य भविष्यति ॥ इत्युक्तौ तौ तु देवेन स्नानं कृत्वा सरस्वतीम् ॥ १६ ॥ प्रभाते देवदेवाय ददौ द्रव्यमनन्तकम् ॥ ब्राह्मणेभ्यो ददौ भोज्यं वस्त्राद्यं बहुदक्षिणम् ॥ १७ ॥ ततस्तस्यां सुशीलायां गर्भोधानमविन्दत ॥ ततः प्रववृधे गर्भः शुक्लपक्षे यथा शशी ॥ सुषुवे दशमे मासि पुत्रं बालं शशिप्रभम् ॥ १८ ॥ गोसहस्रं तदा दत्त्वा ससुवर्णं सवस्त्रकम् ॥ बहुशः सर्ववर्णेभ्यः पुत्रजन्ममहोत्सवे ॥ १९ ॥ जातकर्म तथा चैव नामकर्म चकार च ॥ गोकर्ण नाम तस्यैव पिता चक्रे निरूप्य च ॥ २० ॥ एवमन्नप्राशनं च चूडोपनयनं तथा ॥ अतःपरं च गोदानं वैवाहिकमनुत्तमम् ॥ २१ ॥ दानं तु ददतस्तस्य देवतां पूजयिष्यतः ॥ कृतानि बहुमुख्यानि मंगलानि यथाविधि ॥ २२ ॥ ततः प्रविष्टे तारुण्ये त्वप्रजं वीक्ष्य पुत्रकम् ॥ पुनर्विवाहयामास भार्यांणां च चतुष्टयम् ॥२३॥ वयोरूपगुणोपेतास्तस्य भार्याः सुलोचनाः ॥ अप्रजा एव ताः सर्वा नाभवत्पुत्रिणी क्वचित् ॥ २४ ॥ तेनैव धर्म आरब्धः प्रजार्थो देवसेवनम् ॥ वापीकूपतडागानि देवतायतनानि च ॥ २५ ॥ प्रपामालाश्च नित्यान्नं भोजनं वर्त्तनानि च ॥ अनित्यतां ततो मत्वा चंचलाऽस्थिरजीवितम् ॥ २६ ॥ नियोगः कृतस्तेन सर्वदा सर्वकर्मसु ॥ गोकर्णस्य समीपे तु पश्चिमे चक्रपाणिनः ॥२७॥ प्रासादं कारयामास पंचायतनकं हरेः ॥ आरामस्तत्र विस्तीर्णः पुष्पजात्यस्तथैव च ॥२८॥ आम्रजम्बीरनाङ्गं बीजपूरः सदाडिमः ॥ प्राकारं कारयामास परिखामण्डलीयकम् ॥ २९ ॥ प्रावर्त्तनं च कूपेषु येन सिंचेत्प्रवाटिकाम् ॥ पुष्पाणि च विचिन्वंति सर्वास्ता वरयोषितः ॥ ३० ॥ स्नानं पूजादिकं तद्वन्मार्जनं दीपकर्म च ॥ कुर्वन्ति देवतागारे ताः सर्वाः शुभलोचनाः ॥ ३१ ॥ पतिव्रता महाभागाश्चतुरो भगिनीर्यथा ॥ नित्यकालं पतेर्वाक्ये स्थिताः कुर्वन्त्यहर्निशम् ॥ ३२ ॥ मालाकारस्तथा नित्यं वटिपांश्च प्रसिंचति ॥ पालयामास विधिवद्विधिदृष्टेन

कर्मणा ॥ ३३ ॥ जाताः सुपुष्पवन्तश्च द्रुमाः फलसन्विताः ॥ नित्यकालं त्वर्षयन्तः फलानां सुमहोत्सवम् ॥ ३४ ॥ दीयते भुज्यते सर्वैर्यथा शक्तस्तथा सदा ॥ एवं तु वसतस्तस्य मथुरायां स्थितस्य च ॥ ३५ ॥ धनस्य संक्षयो जातः प्रत्यहं ददतः सतः ॥ शेषमात्रे धने तस्य चिन्ताभून्महती तदा ॥ ३६ ॥ मातापित्रोः कुटुम्बस्य भरणीयस्य भोजनम् ॥ कथं ब्रूहि करिष्यामि महाकष्टं तु सोऽब्रवीत् ॥ ३७ ॥ इति निश्चित्य मनसा वणिग्भावं हृदि स्थिरम् ॥ कृत्वा सार्थमुपामन्त्र्य निर्गतः पूर्वमण्डलम् ॥ ३८ ॥ तत्र क्रीत्वा सुपण्यानि उत्तरापथगानि च ॥ यातायातं ततः कृत्वा लाभालाभविचक्षणः ॥३९॥ क्रीत्वा क्रेयानि वस्तूनि लाभालाभं विचार्य च ॥ उत्तरापथदेशात्तु सार्थं सबहुविस्तरम् ॥ ४० ॥ मणिरत्नं ह्यश्वरत्नं पट्टरत्नं समर्थकम् ॥ गृहीत्वा तु समागच्छन्मथुरायां गृहं प्रति ॥ ४१ ॥ एकदा सार्थसम्भारो विश्रान्तुमुपचक्रमे ॥ सानौ पर्वतसामीप्ये प्रभूतयवसोदके ॥ ४२ ॥ नद्यास्तीरे सुप्रदेशे अवासांश्च प्रचक्रिरे ॥ निवेश्य भाण्डं तत्रैव अश्वानां यवसादिकम् ॥ ४३ ॥ समादिश्येतिकृत्यं च भृत्यैः कतिपयैर्वृतः ॥ समारुरोह तं शैलं बहुकन्दरशोभितम् ॥ ४४ ॥ क्रीडार्थं विहरंस्तत्र सोऽपश्यत् स्थानमुत्तमम् ॥ प्रसन्नसलिलोपेतं नारङ्गैस्तु विभूषितम् ॥ ४५ ॥ फलवन्तश्च वृक्षाश्च पुष्पाणि सुरभीणि च ॥ पाषाणसन्धौ तत्रस्थेमौलाकारे स्तु रोपितम् ॥ ४६ ॥ तत्रारुह्य दरीद्वारं यावद्दृष्टिर्निपात्यते ॥ तावदभ्यागतादीनि स्वगतादि शृणोति च ॥ ४७ ॥ श्रुत्वापि शब्दप्रभवं किमेतदिति निश्चयम् ॥ करिष्यंस्तत्र चैकान्ते दृष्टः पञ्जरगः शुकः ॥ ४८ ॥ तेनोक्तं भो इहागच्छ आतिथ्यं करवाणि ते ॥ पाद्यं गृहाण भोः पान्थ आसनं ते इदं शुभम् ॥ ४९ ॥ फलानीमानि स्वादूनि मधुमांसोदकानि च ॥ यथेष्टं यावतीच्छा च तावद्भक्ष्यस्वेमे नराः ॥ ५० ॥ आगत्य पितरो मह्यं विशेषं तो करिष्यतः ॥ अतिथेरागतस्येह पूजाया विमुखो भवेत् ॥ ५१ ॥ गृहस्थस्तस्य पितरो वसन्ति नरके ध्रुवम् ॥ पूजिते पूजिताः स्वर्गे मोदन्ते कालमक्षयम् ॥ ५२ ॥ अतिथेर्यस्य भग्नाशो गृहात्प्रव्रजते यदि ॥ आत्मनो दुष्कृतं तस्मै दत्त्वा तत्सुकृतं हरेत् ॥ ५३ ॥ तस्मात्सर्वप्रयत्नेन पूज्यो वै गृहमेधिना ॥ काले प्राप्तस्त्वकाले वा यथा विष्णुस्तथैव सः ॥ ५४ ॥ एवंविधाः शुभा वाचो वेश्यां धर्मोपदेशकात् ॥ श्रुत्वा शुकात्स सर्वस्मै गोकर्णो मुदितोऽब्रवीत् ॥ ५५ ॥ ऋषिः कस्त्वं पुराणज्ञः किं वा देवोऽथ गुह्यकः ॥ तव

प्रसन्नरूपस्य यस्येयं वागमानुषी ॥ ५६ ॥ कस्त्वं कथय मे सत्यमुत्साहश्चातिथिप्रियः ॥ धन्यः स मानुषो यस्य नित्यं सन्निहितो भवान् ॥ ५७ ॥ इत्युक्तः स शुकः सर्वं शशंसात्मपुराकृतम् ॥ शृणु रौद्रं यथा पूर्वं मया कृतमबुद्धिना ॥ ५८ ॥ शुकस्य विप्रियं यादृङ् महर्षेस्तु तपस्यतः ॥ सुमेरोरुत्तरे पार्श्वे महर्षिगणसेविते ॥ ५९ ॥ तपश्चचार विपुलं शुको व्याससुतो महान् ॥ श्रोतुकामाः पुराणानि सेतिहासानि नैगमाः ॥ ६० ॥ ऋषयस्तत्र चाजग्मुरसितो देवलस्तदा ॥ मार्कण्डेयो भरद्वाजो यवक्रीतस्ततो भृगुः ॥ ६१ ॥ अङ्गिरास्ते त्रिरी रैभ्यः काण्वो मेधातिथिः कृतः ॥ तन्तुः सुतन्तुरादित्यो वसुमानेकतो द्वितः ॥ ६२ ॥ वामदेवश्चाश्शिरास्त्रिशीर्षो गौतमोदरः ॥ अन्ये च सिद्धा देवाश्च पन्नगा गुह्यकास्तथा ॥ ६३ ॥ शुकं सम्मुखयामासुः पप्रच्छुर्द्धर्मसंहिताम् ॥ अहं तु वामदेवस्य शिष्यो नाम्ना शुको दरः ॥ ६४ ॥ भ्रष्टः श्रद्धान्वितो बाल्यात्सुनित्यामप्रतश्चरन् ॥ ऊहापोहकरं प्रश्नं वारंवारं च पृष्टवान् ॥ ६५ ॥ अन्यायवादिनं मां च गुरुर्नित्यं निषेधति ॥ गुरूणामप्रतो वाक्यं कथायां वदतां सह ॥ ६६ ॥ पूर्वपक्षाश्च सिद्धान्ताः परस्परजिगीषवः ॥ अन्तरे चान्तराक्षेपं पुनर्नैवमवोचथाः ॥६७ ॥ एवं निषेधितश्चाहं गुरुणा मुनिसत्तमैः ॥ न कृतं यन्मया वाक्यं तेनाहं शप्तिस्तदा ॥६८॥ शुकेन कोपाच्छापो मे दत्तोऽयं जल्पको वटुः ॥ यथानामा त्वयं पक्षी शुको भवति नान्यथा ॥६९॥ इत्युक्तमात्रे वचने तत्रैवाहं शुकोदरः ॥ शुकत्वं तत्क्षणात्प्राप्तः क्षमस्वेत्यचुरोजसा ॥७०॥ मुनयस्तं महात्मानं शुकं तत्त्वार्थवित्तमम् ॥ नान्यथा नान्यथा चोक्तं कदाचित्संभविष्यति ॥ ७१ ॥ आगामिकाले दास्यामि वरमस्मै शुकाय भो॥ युष्माकमुपरोधेन यथारूपो विहङ्गमः ॥७२॥ अयं भविष्यति सदा सद्भावहितभावनः॥ पुराणतत्त्ववेत्ता च सर्व शास्त्रार्थपारगः॥७३॥मथुरायां मृतः पश्चाद्ब्रह्मलोकं गमिष्यति ॥ एवं शापं वरं गृह्य तस्मादीनो ह्यहं द्रुतम् ॥७४॥ मथुरामधुरोच्चारं कुर्वन्नित्यं मतन्द्रितः॥नित्योद्विग्नश्च मे गात्रे हिमाद्रौ तु गृहं वसन् ॥ ७५ ॥ प्राप्तोऽहं शवरेणैव येनाहं पञ्जरे धृतः ॥ शवरस्तु सभार्यो वै क्रीडते स मया सह ॥७६॥ मुनेः प्रासादान्मे ज्ञानं न जहाति कदाचन ॥ भुज्यते ह्यवशेनैव कृतं येन यथा च यत् ॥७७॥ स्वस्थो भव महाभाग मा स्म शोके मनः कृथाः ॥इत्युक्तः स तु गोकर्णस्तदा तेन शुकेन च ॥७८॥ तस्य तद्वचनं श्रुत्वा शुकमोक्षप्रदायकम् ॥ या सा मुक्तिप्रदा रम्या मथुरा पाप

नाशिनी॥७९॥तस्यां वसाम्यहं भद्र वाणिज्यार्थमिहागतः ॥ पुनरिच्छामहे तत्र भाण्डं गृह्य यथासुखम् ॥८०॥मथुरावासिनं श्रुत्वा गोकर्ण स शुकस्तदा ॥ पुत्रं संस्थाप्य चात्मानं गोकर्णस्य यथेप्सितम् ॥८१॥ एवं च वदतस्तस्य शबरी शयनोत्थिता ॥ दर्पान्निर्गत्य तु बहिर्ददर्शासनसंस्थितम् ॥ ८२ ॥ भृत्यैः परिवृतं चारुदर्शनीयस्वरूपकम् ॥ निरीक्ष्य बहुशस्तत्र शुको वचनमब्रवीत् ॥ ८३ ॥ अियातिथिं च संप्राप्तं मातः पूज्यतमं शुचिम् ॥ कुरु पूजां यथार्हं च गोकर्णस्य वरातिथेः ॥ ८४ ॥ शुकस्य वचनाद्यावत्पूजार्थमुपकल्पितम् ॥ न ददाति ततस्तत्र वनाच्छबर आगतः ॥ ८५ ॥ तस्याग्रे तु पुनस्तेन शुकेनातिथिपूजनम् ॥ शंसितं स तथेत्युक्त्वा कृत्वा पूजां प्रणम्य च ॥ ८६ ॥ फलानि मांसयुक्तानि मधूनि सुरभीणि च॥ संपाद्य संविदं कृत्वा वद किङ्करवाणि ते ॥ ८७ ॥ इत्युक्तः शबरेणाथ गोकर्णो वाक्यमब्रवीत् ॥ अन्यत्किंचिदथो देयं यदि किंचिददासि च ॥ ८८ ॥ शुकोऽयं पञ्जरस्थश्च पुत्रार्थं मे प्रदीयताम् ॥ मथुरायां गमिष्यामि कृतार्थः पितुरन्तिके ॥ ८९॥ इत्युक्तमात्रे वचने शबरो वाक्यमब्रवीत् ॥ अस्माकं यमुनास्नानं सङ्गमे यमुनाम्भसः ॥९०॥ सरस्वत्याः फले चैव दत्ते दास्यामि ते शुकम् ॥ शबरेणैवमुक्तस्तु गोकर्णः प्रत्यभाषत ॥९१॥ सरस्वत्याः सङ्गमे च यत्फलं लभते नरः ॥ स्नानेन किं फलं तस्य यदि जानासि तद्वद ॥९२॥ शबर उवाच ॥ शुकेनानेन मे सर्वं मथुरायाश्च यत्फलम् ॥ ९३ ॥ यत्फलं सङ्गमस्योक्तं शृणुयाद्यादशीव्रतम् ॥ वियोनिस्थो राक्षसो वा तिर्यग्योनिं गतस्य वा ॥ ९४ ॥ यमुद्दिश्य व्रतं कुर्यात्स गच्छेत्परमां गतिम् ॥ सङ्गमस्य फलं तस्य दृङ्गा गोकर्णमीश्वरम् ॥९५॥ नासौ यमपुरं याति विष्णुलोकं च गच्छति ॥ एवं मया श्रुतं तस्य सङ्गमस्य महाफलम् ॥ ९६ ॥ इति श्रीवराहपुराणे गोकर्णसरस्वतीमाहात्म्ये सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ श्रीवराह उवाच ॥ शुकं गृह्य ततः स्थानात्प्रस्थितो मथुरां पुरीम् ॥ प्राविश्य गृह्य तत्पुण्यं मातापित्रोस्तदर्पितम् ॥ १ ॥ शुकस्य चरितं सर्वं निवेद्य च महामतिः ॥ एवं निवसतस्तस्य बहुवर्षाणि तत्र वै ॥ २ ॥ सुखं प्राप्तं मतं चापि व्यवहारे च पूजने ॥ एवं निवसतस्तस्य द्रव्यं शेषमजायत ॥३॥ पुनस्तत्रैव गमने वणिग्भावे मतिर्गता ॥ समुद्रयाने रत्नानि महामौल्यानि साधुभिः ॥४॥ आनयिष्ये बहून्यत्र सार्धं रत्नपरीक्षकैः ॥ एवं निश्चित्य मनसा महासार्थपुरःसरः ॥ समुद्रयायिभिर्लोकैः संविदं प्रोच्य निर्गतः ॥ ५ ॥ पेयाहार

समाहारं कृत्वा कृत्यविदार्थकम् ॥ शुकं गृहीत्वा प्रस्थानमकरोत्पुण्यवासरे ॥ ६ ॥ मातापित्रोः शुभा वाचो गृहीत्वा देवतागृहे ॥ भार्यांणां देव कार्यं च वाटिकायाश्च पोषणम् ॥ ७ ॥ पितुः शुश्रूषणं चोक्त्वा सर्वं यूयं करिष्यथ ॥ यथायोगं यथाकालं यथाकृत्यं यथा च यत् ॥ ८ ॥ भवतीभिश्च कृत्यं मे करणीयं यथा तथा ॥ सन्दिश्य भार्याः सुश्रोणीर्देवं दृष्ट्वा प्रसाद्य च ॥ ९ ॥ भार्याभिः समनुज्ञातो यानपात्रं गतस्तदा ॥ शुकेन सह संप्राप्तो महान्तं लवणार्णवम् ॥ १० ॥ पोतारूढास्ततः सर्वे पोतवाहैरुपोहिताः ॥ अपरे दुस्तरेऽगाधे यान्ति वेगेन नित्यशः ॥ ११ ॥ अथ दैववशाद्वायुर्विलोमः समजायत ॥ दुर्वातेन तदा नित्यं बलात्पोत उपोहितः ॥ पोतवाहास्ततः सर्वे विसंज्ञा मोहिताः कृशाः ॥ १२॥ हा कष्टं हि कथं किञ्च कुत्र गच्छामहे वयम् ॥ तेषां तु वचनं श्रुत्वा ज्ञात्वा दुर्वातपीडनम् ॥ आक्षिपद्भाग्भिरुग्राभिरन्योन्यं शङ्कच मूर्च्छिताः ॥ १३ ॥ जल्पन्ति कोऽत्र पापिष्ठः समारूढो निराकृतः ॥ तस्य पातकसंस्पर्शान्मृताः सर्वे न संशयः ॥ १४ ॥ एवं विलपतां तेषां चत्वारोऽपि समभ्ययुः ॥ मासास्तत्रैव वाणिज्यं पण्मासात्सिध्यते फलम् ॥ १५ ॥ निर्भत्सनं ततस्तेषामन्योन्यमभिजल्पनम् ॥ श्रुत्वा शुकस्य गोकर्णः शशंसात्मविनिन्दनम् ॥ १६ ॥ अपुत्रस्य गतिर्नास्ति इति सर्वस्य निश्चितम् ॥ एषां मध्ये ह्यहं पापस्तेन तप्यामि पुत्रक ॥ १७ ॥ यदत्र युक्तं कालेऽस्मिन्विषमे समुपस्थिते ॥ वद् स्वाध्यायपाङ्गुण्यं कुच्छ्रे त्वं कार्यवित्तमः ॥ १८ ॥ शुक उवाच ॥ मा जोषमास्व भैस्तात अस्मिन्काले यथोचितम् ॥ अहं करिष्ये तत्सर्वं मा विषादे मनः कृथाः ॥ १९ ॥ एवमाश्वास्य पितरं समुड्डीय ततो द्रुतम् ॥ ध्रुवास्यां दिशमुद्वीक्ष्य उत्तराभिमुखो ययौ ॥ २० ॥ नीचगत्या रक्षयन्वै सुतरं दुस्तरं जलम् ॥ सानौ पर्वतसामीप्ये योजनेन वरं गिरिम् ॥ २१ ॥ रोमांचिततनुर्जातः शुको वीक्ष्य महागिरिम् ॥ क्रमित्वोर्द्धं च यात्युग्रं तावद्देवालयं शुभम् ॥२२॥ दृष्ट्वं च विष्ण्वायतनं तेजसा चोपशोभितम् ॥ दिक्षु सर्वास्वटित्वैवं निलिल्ये देवमन्दिरे ॥ २३ ॥ वत्साऽयं कोऽत्र संचारी कदा किं तु पिता मम ॥ वितरिष्यति नो कालं दुरन्तं सुकृतिर्यथा ॥ २४ ॥ क्षणमेकं तथा चैनं तस्य चिन्तान्वितस्य हि ॥ सौवर्णपात्रहस्ता च देवी देवं समर्चयत् ॥ २५ ॥ नमो नारायणायोक्त्वा निपसाद वरासने ॥ निमेषान्तरमात्रेण वयोरूपसमन्विताः ॥ असंख्याताः समायाता यथा देवी तथैव ताः ॥ २६ ॥ गीतं

च रत्नानां भागं दास्यामहे परम् ॥ एष धर्मः सदास्माकमेकसार्थागमेन हि ॥ ४९ ॥ एवं वसन्स गोकर्णो द्वीपस्थः शोकविह्वलः ॥ शुकं प्रोवाच दीनात्मा मातापित्रोः कृते तदा ॥ ५० ॥ शुकेन मन्त्रमूढत्वाप्तिपुरेवं निवेदितम् ॥ अहं पक्षी लघुतनुर्भवन्तं नेतुमक्षमः ॥५१॥ याता ऽस्मि मथुरां मार्गे समुद्रे जलमालिनि ॥ पित्रोर्वाक्यं तवाख्यासे त्वदीयं च तयोरहम् ॥ ५२ ॥ अवश्यं च गमिष्येऽहमनुज्ञा तु प्रदीयताम् ॥ सत्यमुक्तं ततस्तेन गोकर्णेन शुकं प्रति ॥५३॥ गच्छ त्वं पुत्र मथुरामवस्थां मामकीमिमाम् ॥ त्वया विना न शक्तोमि शीघ्रमागमनं कुरु ॥५४॥ इत्युक्तः स तथेत्युक्त्वा पोतारूढः खगोत्तमः ॥ कालेन मथुरां प्रातः सर्वं पित्रे न्यवेदयत् ॥ ५५ ॥ श्रुत्वा तौ विषमावस्थं मृतं हृदि निवेश्य च ॥ रुदित्वा सुचिरं कालं शुके स्नेहो निवेशितः ॥ ५६ ॥ अस्माकं जीवनार्थाय त्वया कार्यं विहङ्गम ॥ कथाभिरनुकूलाभिर्धर्मदर्शाभिरेव च ॥ ५७ ॥ शुकेन पंजरस्थेन कथालापेन विद्यया ॥ पुत्रशोकाभिसन्तप्तौ तथैवानेन सान्त्वितौ ॥ ५८ ॥ अथ सार्थः समायातो रत्नपूर्णो यथोदधिः ॥ वसुकर्णस्य पुत्रार्थमकरोत्स जनो महान् ॥ ५९ ॥ सर्वैस्तैर्विंशतिः संख्या एकैकेन समुद्रगैः ॥ रत्नैः समाचितोऽत्यर्थं पर्वतः कुसुमोत्करैः ॥ ६० ॥ प्रसाद्य सर्वे सम्पूज्य प्रेषितास्ते गृहं ययुः ॥ एवं ते न्यवसंस्तत्र यावत्कालं सुखेन तु ॥ ६१ ॥ शुश्रूषमाणास्तं वैश्यं यथा स्वपितरं तथा ॥ ६२ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे गोकर्णमाहात्म्ये एकसप्तत्यधिकशततमोऽध्यायः ॥१७१॥ श्रीवराह उवाच ॥ गोकर्णस्तु तथा चक्रे तस्मिन्नायतने शुभे ॥ प्रथमेऽह्नि यथा कृत्यमेवमेव त्रयोदश ॥ १ ॥ ता देव्यो नृत्यगीतेषु कुशलाश्चागमेऽभवन् ॥ सुरूपाश्च स्वलंकारा रमयन्ति दिनेदिने ॥ २ ॥ गोकर्णः सर्वभावेन गृहं विस्मृतवानसौ ॥ तथैकदा स गोकर्णस्ता देव्यश्च हतौजसः ॥ ३ ॥ विवर्णवदना दीना भग्नालंकारवाससः ॥ हीनांगा लुंचिताशिरःकेशपक्ष्मनखादयः ॥ ४ ॥ दृश्यन्ते विकृताकाराः सव्रणा रुधिरस्रवाः ॥ ता दृष्ट्वाऽतीव दुःखार्त्तोश्चके मनसि वेदनाम् ॥ ५ ॥ अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ॥ मम सङ्गादिमा देव्यो दशमीं च दशां गताः ॥ ६ ॥ एवं ज्ञात्वा स पप्रच्छ तासां रूपविपर्ययम् ॥ कथयध्वं महाभागाः किमेतद्रूपव्यत्ययम् ॥ ७ ॥ देव्य ऊचुः ॥ अप्रष्टव्यं महाभाग दैवः सर्वेषु कारणम् ॥ कालात्मकः स भगवान्भुज्यते सुकृतं यतः ॥ ८ ॥ स एव नित्यकालं च पृच्छति स्म तदुत्तरम् ॥ दुःखार्त्तस्य सुदीनस्य न जल्प

च रत्नानां भागं दास्यामहे परम् ॥ एष धर्मः सदास्माकमेकसार्थागमेन हि ॥ ४९ ॥ एवं वसन्स गोकर्णो द्वीपस्थः शोकविह्वलः ॥ शुकं प्रोवाच दीनात्मा मातापित्रोः कृते तदा ॥ ५० ॥ शुकेन मन्त्रमूढत्वाप्तिपुरेवं निवेदितम् ॥ अहं पक्षी लघुतनुर्भवन्तं नेतुमक्षमः ॥५१॥ याता ऽस्मि मथुरां मार्गे समुद्रे जलमालिनि ॥ पित्रोर्वाक्यं तवाख्यासे त्वदीयं च तयोरहम् ॥ ५२ ॥ अवश्यं च गमिष्येऽहमनुज्ञा तु प्रदीयताम् ॥ सत्यमुक्तं ततस्तेन गोकर्णेन शुकं प्रति ॥५३॥ गच्छ त्वं पुत्र मथुरामवस्थां मामकीमिमाम् ॥ त्वया विना न शक्तोमि शीघ्रमागमनं कुरु ॥५४॥ इत्युक्तः स तथेत्युक्त्वा पोतारूढः खगोत्तमः ॥ कालेन मथुरां प्रातः सर्वं पित्रे न्यवेदयत् ॥ ५५ ॥ श्रुत्वा तौ विषमावस्थं मृतं हृदि निवेश्य च ॥ रुदित्वा सुचिरं कालं शुके स्नेहो निवेशितः ॥ ५६ ॥ अस्माकं जीवनार्थाय त्वया कार्यं विहङ्गम ॥ कथाभिरनुकूलाभिर्धर्मदर्शाभिरेव च ॥ ५७ ॥ शुकेन पंजरस्थेन कथालापेन विद्यया ॥ पुत्रशोकाभिसन्तप्तौ तथैवानेन सान्त्वितौ ॥ ५८ ॥ अथ सार्थः समायातो रत्नपूर्णो यथोदधिः ॥ वसुकर्णस्य पुत्रार्थमकरोत्स जनो महान् ॥ ५९ ॥ सर्वैस्तैर्विंशतिः संख्या एकैकेन समुद्रगैः ॥ रत्नैः समाचितोऽत्यर्थं पर्वतः कुसुमोत्करैः ॥ ६० ॥ प्रसाद्य सर्वे सम्पूज्य प्रेषितास्ते गृहं ययुः ॥ एवं ते न्यवसंस्तत्र यावत्कालं सुखेन तु ॥ ६१ ॥ शुश्रूषमाणास्तं वैश्यं यथा स्वपितरं तथा ॥ ६२ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे गोकर्णमाहात्म्ये एकसप्तत्यधिकशततमोऽध्यायः ॥१७१॥ श्रीवराह उवाच ॥ गोकर्णस्तु तथा चक्रे तस्मिन्नायतने शुभे ॥ प्रथमेऽह्नि यथा कृत्यमेवमेव त्रयोदश ॥ १ ॥ ता देव्यो नृत्यगीतेषु कुशलाश्चागमेऽभवन् ॥ सुरूपाश्च स्वलंकारा रमयन्ति दिनेदिने ॥ २ ॥ गोकर्णः सर्वभावेन गृहं विस्मृतवानसौ ॥ तथैकदा स गोकर्णस्ता देव्यश्च हतौजसः ॥ ३ ॥ विवर्णवदना दीना भग्नालंकारवाससः ॥ हीनांगा लुंचिताशिरःकेशपक्ष्मनखादयः ॥ ४ ॥ दृश्यन्ते विकृताकाराः सव्रणा रुधिरस्रवाः ॥ ता दृष्ट्वाऽतीव दुःखार्त्तोश्चके मनसि वेदनाम् ॥ ५ ॥ अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ॥ मम सङ्गादिमा देव्यो दशमीं च दशां गताः ॥ ६ ॥ एवं ज्ञात्वा स पप्रच्छ तासां रूपविपर्ययम् ॥ कथयध्वं महाभागाः किमेतद्रूपव्यत्ययम् ॥ ७ ॥ देव्य ऊचुः ॥ अप्रष्टव्यं महाभाग दैवः सर्वेषु कारणम् ॥ कालात्मकः स भगवान्भुज्यते सुकृतं यतः ॥ ८ ॥ स एव नित्यकालं च पृच्छति स्म तदुत्तरम् ॥ दुःखार्त्तस्य सुदीनस्य न जल्प

न्त्यतिदुःखिताः ॥ ९ ॥ निश्चयार्थं पुनः सोऽथ गोकर्णस्ताः प्रणम्य च ॥ पृच्छत्याग्रहरूपेण निश्चयं विन्दते यथा ॥ १० ॥ यदि गोप्यं ममा
र्तस्य वैरूप्यं कथयिष्यथ ॥ अगाधे दुस्तरे प्राणांस्त्यक्ष्याम्यद्य सुदुःखितः ॥ ११॥ एवमुक्ते तदा तासां मध्ये एकाऽब्रवीदिदम् ॥ दुःखं तस्य
समाख्येयं यो विनाशयते रुजम् ॥१२॥ शृणु वत्स वदिष्येऽहं विरूपकरणं यथा ॥ अस्माकं च समुत्पन्नमेकचित्तोऽवधारय ॥ १३ ॥ आस्ते
मधुपरी रम्या नृणां मुक्तिप्रदायिनी ॥ अयोध्यापिपतिर्वीरश्चतुरङ्गबलान्वितः ॥१४॥ चातुर्मास्यं तीर्थसेवी स गतो भक्तिपूर्वकम् ॥ विष्णो
र्देवस्य चागारं पञ्चसंख्यासमन्वितम् ॥ १५ ॥ आरामवाटिकाः शुभ्राः प्राकारावरवेष्टिताः ॥ कूपप्रावर्तकोपेताः पुष्पजात्यः सुवासिताः ॥१६॥
फलवन्तो द्रुमास्तस्मिन्सर्वर्तुसुमनोहराः ॥ तस्याभ्याशे स राजार्पिश्चकारावासमुत्तमम् ॥ १७ ॥ सेवकैर्नाशितः सर्वं आरामः सफलद्रुमः ॥
प्राकारपरिखा चैव स्थण्डिलप्रतिमा कृता ॥ १८ ॥ बहुधा वार्यमाणैस्तु पापबुद्धिसमाश्रितैः ॥ एवं तेन कृतं तत्र सोऽपि देववशङ्कृतः ॥१९॥
पञ्जरस्थो यथा सिंहः क्रोऽस्मांस्त्राता भवेदिति ॥ पिधायाञ्जलिना वक्त्रमश्रुक्लिन्नस्तनान्तरा ॥ २० ॥ रुरोदोच्चैः स्वरं दीना हा कष्टमिति
जल्पती ॥ सर्वासां रुदतीनां च कुररीणामिव स्वनः ॥ २१ ॥ श्रूयते बहुधाकारो गोकर्णोऽप्यतिदुःखितः ॥ एकैकस्यास्तु चक्रेऽसौ मूर्ध्नां
पादाभिवन्दनम् ॥ २२ ॥ प्राञ्जलिर्दीनया वाचा सान्त्वयामास ताः शनैः ॥ प्राप्तसंज्ञास्तु ताः सर्वाः गोकर्णोऽप्याह सुस्वनः ॥ २३ ॥ भविता
यदि तत्राहं राजानं तं निवारयम् ॥ किं करिष्यामि दैवेन समर्थोऽप्यवसादितः ॥२४॥ इत्युक्तमात्रे वचने ताः सर्वा लब्धचेतसः ॥ ऐक्यभावेन
ताः सर्वाः पप्रच्छुर्वणिजं प्रति ॥ कस्त्वं कथय कस्माच्च स्थानाद्यत्त्वामिहागतः ॥ २५ ॥ गोकर्ण उवाच ॥ गोकर्णोऽहं सुचार्वास्यः सुकपोलो
ऽब्रवीन्मया ॥ पूर्वं दृष्टा भवत्यो वै चार्वंग्यश्चारुलोचनाः ॥ २६ ॥ इदानीं मलिना जाता मम शोकविवर्द्धनाः ॥ कथयध्वं ममात्मानमत्र
हेतुमनन्तरम् ॥ २७ ॥ ज्येष्ठा सोवाच तस्याग्रे पुष्पजात्या स्वलंकृताः ॥ वयमारामसंस्थाश्च स्वामिना परिपालिताः ॥ २८ ॥ हृद्येवंपाः
सुचार्वंग्यः पुष्पवृद्धिरताः सदा ॥ पूर्वं द्रष्टाः सुरूपाश्च विपर्ययमथो शृणु ॥ २९ ॥ राजलोकैः पीडिताश्च च्छेदनोन्मूलनेन च ॥
पीडिता भृशमुद्विग्नास्तेनेदानीं सकल्मषाः ॥ ३० ॥ पुष्पमालाविहिनाश्च मूलस्कन्धावशेषिताः ॥ एवंविधाश्च संभूता नष्टसंज्ञाः स्थिता

वयम् ॥ ३१ ॥ यो देवस्तत्र पाषाणो मृत्पिण्डेष्टकयन्त्रितः ॥ सोऽत्र सत्त्वमयः साक्षी तस्य पुण्यस्य कर्मणि ॥ ३२॥ पुण्यं सोदकपूर्णोऽयं तस्यारामस्य सेचकम् ॥ सरश्चोत्फलपूर्णं च कलहंसैर्युतं सदा ॥ ३३ ॥ ये च वृक्षाः फलोपेतास्ते सौवर्णाश्च सत्तम ॥ एता रक्षन्ति सततमारामं सुखदं नृणाम् ॥ तस्या नाशाद्यथा नोऽत्र जातेयं च विरूपता ॥३४॥ गोकर्ण उवाच ॥ आरामकर्तुः किं चात्र फलं भवति याद्दशम् ॥ कर णात्कूपदेशानां तस्य पुण्यफलं वद ॥ ३५ ॥ ज्येष्ठोवाच ॥ इष्टापूर्तं द्विजातीनां प्रथमं धर्मसाधनम् ॥ इष्टेन लभते स्वर्गं पूर्तेन मोक्षं च विन्द ति ॥ ३६ ॥ वापीकूपतडागानि देवतायतनानि च ॥ पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ॥ ३७॥ भूमिदानेन ये लोका गोदानेन च कीर्तिताः ॥ ते लोकाः प्राप्यते पुंभिः पादपानां प्ररोहणे ॥३८॥ अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दश पुष्पजातीः ॥ द्वे द्वे तथा दाडिममातुलिंगे पंचाम्ररोपी नरकं न याति ॥ ३९ ॥ यथा सुपुत्रः कुलमुद्धरेद्धि यथाऽतिकृच्छ्राच्नियमप्रयत्नात् ॥ तथाऽत्र वृक्षाः फलपुष्पभूताः स्वं स्वामिनं नरकादुद्धरन्ति ॥४० ॥ गोकर्ण उवाच ॥ इन्धनार्थं यदानीतमग्निहोत्रे तदुच्यते ॥ छायाविश्रामपथिकैः पक्षिणां निलयेन च ॥ ४१ ॥ पत्रमूलत्वगाद्यैश्च औषधार्थं तु देहिनाम् ॥ उपकुर्वन्ति वृक्षस्य पंचयज्ञाः स उच्यते ॥ ४२ ॥ गृहकृत्यानि काष्ठानि क्षुद्रजन्तुगृहास्तथा ॥ यत्र निर्वर्त्तनं प्रोक्तं तिक्ता पत्रैः समकृता ॥ ४३ ॥ फलन्ति वत्सरे मध्ये द्विशारं शकुनादयः ॥ सांवत्सरं पितुर्मातुरुपकारं फलैः कृतम् ॥ एवं पुत्र समारोपा एवं तत्सिद्धिरो विदुः ॥ ४४ ॥ श्रीवराह उवाच ॥ एवमुक्तस्तया देव्या मालत्या पुष्पजातया ॥ हा कष्टं कथमित्येव सुमोहं च पपात ह ॥ ४५ ॥ ताभिराश्वासितो पीमान्ससंज्ञो वारिणोक्षितः ॥ आत्मानं कथयास्माकं यस्माच्च त्वमुपागतः ॥ ४६ ॥ गोकर्ण उवाच ॥ वृद्धौ च मातापितरौ साधु भार्याचतुष्टयम् ॥ मथुरायां ममैवतद्धानं देवतागृहम् ॥४७॥ यदि तत्र गतश्चाहं पितृराज्ञोस्तु सन्निधौ ॥ इमामापदमापन्ना यूयं तद्धे निवेदये ॥४८॥ ज्येष्ठा प्रोवाच नेष्यामि यदि ते रोचतेऽनघ ॥ अद्यैव मथुरां देवीमवेक्ष्यामोऽधिगम्यताम् ॥ ४९ ॥ विमानप्रतिमा कारं यानमारुह्य सत्वरः ॥ दिव्यानीमानि रत्नानि भूषणानि फलानि च ॥ ५० ॥ गृह्णीष्वोपायनं राज्ञे तस्मै त्वं देह्यनर्घ्यकम् ॥ आरुह्य स तथेत्युक्त्वा नमस्कृत्य हरिं च ताः ॥५१॥ उत्पपात ततः स्थानाद्यत्र राजा व्यवस्थितः ॥ राज्ञे निवेदयामास रत्नानि सुबहूनि च ॥ ५२ ॥

राजा दर्शनमात्रेण सन्तुष्टः सोब्रवीदिदम् ॥ स्वागतं ते महाभाग संमान्य परिपूज्य च ॥ ५३ ॥ अर्द्धासने कृतः प्रीत्या रत्नदो धनदो यथा ॥ अस्मात्स्थानादिदानीञ्च अपसर्प्य क्षणान्तरे ॥ ५४ ॥ आश्चर्यं दर्शयिष्यामि कथयिष्यामि चापि भोः ॥ स तथेति प्रतिश्रुत्य सेनापतिमुवाच ह ॥ ५५ ॥ मुहूर्त्तार्द्धाद्यथा याति सैन्यं तच्च तथा कुरु ॥ क्षिप्रं तत्प्रातिपद्यस्व न कालोऽत्यभ्यगाद्यथा ॥ ५६ ॥ कृतं तेन तथा सर्वं यथा राज्ञा हि भाषितम् ॥ ता देव्यो दिव्यरूपाश्च विमानकृतरूपकाः ॥ ५७ ॥ साधु साध्विति गोकर्णं प्रशशंसुः पुनः पुनः ॥ वरं दत्त्वा यथाकामं स्वस्तीत्युक्त्वा दिवं ययुः ॥ ५८ ॥ गोकर्णस्तु तदाचक्षे तत्सर्वं नृपतेः सुखी ॥ सर्वं तच्चात्मचरितं पूर्त्तधर्मस्य यत् फलम् ॥ ५९ ॥ राज्ञा तस्मै प्रदत्ताश्च ग्रामाश्चैव पुराणि च ॥ वस्त्राणि च गजाश्चैव वाजिनोऽन्यद्धनं बहु ॥ ६० ॥ आश्चर्यं परमं धर्ममारामस्य महत् फलम् ॥ श्रुत्वा सर्वं चकारासौ सार्वभौमो महीपतिः ॥६१॥ इति श्रीवराहपुराणे गोकर्णमाहात्म्ये द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥ श्रीवराह उवाच ॥ तत्र स्थित्वा यथान्यायं गोकर्णः सर्वमंगलम् ॥ शुकं च मातापितरौ साधुभार्यांचतुष्टयम् ॥ १ ॥ संमान्य पूजयामास यथाविभवशक्तितः ॥ मथुरावासिभिर्लोकैरुद्यानं कारयंस्तदा ॥ २ ॥ स्वयं च कृतवांस्तत्र आविम्रस्य महामखम् ॥ भक्ष्यभोज्ये ब्राह्मणेभ्यो ददौ दानानि नित्यशः ॥३॥ गीतवादित्रमंगल्यं पुत्रवृद्धौ यथोचितम् ॥ तत्सर्वं कृतवाँल्लोको गोकर्णस्य महात्मनः॥४॥एकैकं च परिष्वज्य प्रणिपत्य यथाक्रमम् ॥ मातापित्रोः प्रणम्याथ शिरसा पादपंकजे ॥५॥ शुकं हृदि समालोक्य प्ररुरोद स वै वणिक् ॥ यस्य प्रसादाज्जीवश्च धर्मश्चानुत्तमा गतिः ॥ ६ ॥ विशिष्टेन मया प्राप्तो राज्ञो लाभः सुपुष्कलः ॥ शुक पुत्रान्मया प्राप्तमिह लोके परत्र च ॥ ७ ॥ एवं वसन्सुखं तत्र गोकर्णः सह बन्धुभिः ॥ शुक नाम्ना कृतं तेन शिवस्यायतनं महत् ॥ ८ ॥ शुकेश्वरं प्रतिष्ठाप्य दिव्यं सत्रं चकार ह ॥ ब्राह्मणानां शते द्वे च मिष्टान्नवरभोजने ॥९॥ शुकसत्रमिति ख्यातं मृतो मुक्तिमवाप सः ॥ विमानवरमारुह्य स्वर्गलोकं गतः शुकः ॥१०॥ शुकप्रदाने गोकर्णः फलं स्नानस्य संगमात्॥श्राद्धं सुवर्णे गोदानं कृत्वा तस्मै ददौ च सः ॥ ११ ॥ शंवराय सभार्यांय तेन स्वर्गं गतश्च ह ॥ शुकोदरेण सहितो विमानवरमास्थितः ॥ १२ ॥ एतत्ते कथितं सर्वं मथुरायां महत्फलम् ॥ सरस्वतीसंगमस्य गोकर्णस्य शिवस्य च ॥ १३ ॥ गोकर्णस्य तु सन्तानमक्षयं धर्मतोऽव्ययम् ॥ सम्भूतं

स सुखं भुक्त्वा ततो मोक्षमवाप्नुयात् ॥ १४ ॥ इति श्रीवराहपुराणे गोकर्णमाहात्म्ये त्रयस्त्रसत्यधिकशततमोऽध्यायः॥१७३॥श्रीवराह उवाच॥
पुनरन्यत्प्रवक्ष्यामि महापातकनाशनम् ॥ संगमस्य प्रभावं हि पापिनामपि मुक्तिदम् ॥१॥ अत्रैव श्रूयते पूर्वं ब्राह्मणः संशितव्रतः ॥ महानामेति विख्यातः स्थितोऽसौ वनमाश्रितः॥२॥स्वाध्यायमुक्तो होमे च नित्ययुक्तः सः योगवित् ॥ जपहोमपरो नित्यं स्वकालं क्षपते च सः ॥ ३ ॥ एवं कर्माणि कुर्वन्स ब्रह्मलोकमिगीषया॥बहुवर्षान्यतीतानि ब्राह्मणस्य वने तदा॥४॥तस्य बुद्धिरियं जाता तीर्थाभिगमनं प्रति॥ पुनरुत्तीर्यजलैरेतच्छ्रुत्वापि कलेवरम् ॥५॥ प्रयातो विधिवत्स्नात्वा सूर्यस्योदयनं प्रति ॥ अतिकुण्डादितः कृत्वा दक्षिणां कोटिकां ततः ॥६॥ तथा चोत्तरकोट्यां तु तथा मन्माधुरं च यत् ॥ क्रमेण सर्वतीर्थानि स्नात्वा मामपि पुष्करम् ॥ ७ ॥ गत्वा सर्वाणि तीर्थानि स्नात्वा पूतो भवाम्यहम् ॥ इति कृत्वा मधुरायां निर्जगामाथ स द्विजः ॥ ८ ॥ कृतपूजानमस्कारः अर्चानं प्रत्यपद्यत ॥ अर्चयप्रपन्नो ह्यहंशतंच प्रेतान्सुभीषणान् ॥ ९ ॥ अरण्ये कण्टकवृते निर्जने शब्दवर्जिते ॥ तान्दृष्ट्वा विकृताकारानतितीव्रभयङ्करान् ॥ १० ॥ ईषदुन्नस्तहृदयस्तिष्ठदुन्मील्य चक्षुषी ॥ आलम्ब्य स ततो धैर्यं त्रासमुत्सृज्य दूरतः ॥ ११ ॥ पप्रच्छ मधुरालापः के यूयं रौद्रमूर्तयः ॥ भवन्तः कर्मणा केन दुष्कृतेन भयावहाः ॥१२॥ एकस्था नात्सङ्घा यूयं प्रस्थिताः कुत्र वा सङ्घा ॥ प्रेता ऊचुः ॥ क्षुत्पिपासातुरा नित्यं बहुदुःखसमन्विताः ॥ १३ ॥ दुर्बुद्ध्या च वृताः सर्वे हीनज्ञाना विचेतसः ॥ न जानीमो दिशं कांचिद्दिदिशं चापि चाध्वनि ॥१४॥ नान्तरिक्षं महीं चापि जानीमो दिवसं तथा ॥ यदेतद्दुःखमापन्नं सुखोदर्कफलं भवेत् ॥ १५ ॥ अथ कामवितं भाति भास्करोदयनं प्रति ॥ अहं पर्युषितो नाम परः सूचीमुखस्ततः ॥ १६ ॥ शीघ्रगो रोधकश्चैव पंचमो ऊर्ध्वकस्तथा ॥ ब्राह्मण उवाच ॥ प्रेतानां कर्मजातानां नाम्नां वै सम्भवः कुतः ॥१७॥ किं तत्कारणमेतद्धि यूयं सर्वे सनामकाः ॥ प्रेत उवाच ॥ अहं स्वादु सदाश्नामि दम्भि पर्युषितं द्विजे ॥१८॥ एतत्कारणमुद्दिश्य नाम पर्युषितं द्विज ॥ सूचीता बहवोऽनेन विप्राश्चान्नादिकांक्षिणः ॥१९॥ एतत्कारणमुद्दिश्य परः सूचीमुखस्ततः ॥ समर्थितो द्विजेनैव शीघ्रं याति यतो हि सः ॥ २० ॥ एतत्कारणमुद्दिश्य शीघ्रगस्तेन सोच्यते ॥ एको गृहस्य मध्ये तु भुङ्क्ते द्विजभयेन हि ॥ २१ ॥ समारुह्योद्विग्नमना रोधकस्तेन चोच्यते ॥ मौनेनापि स्थितो नित्यं यावितोऽपि द्विजै

न्महीम् ॥ २२ ॥ अस्माकमपि पापिष्ठो लेखकस्तेन नाम वै ॥ मदेन लेखको याति रोधकस्तु व्यवाक्छिराः ॥२३॥ शीघ्रगः पङ्गुतां याति परं सूचीमुखस्ततः ॥ उपितः केवलग्रीवो लम्बौष्ठो वै महोदरः ॥ २४ ॥ बृहद्बृषणशुष्कांगः पापादेव प्रजायते ॥ एतत्ते सर्वमाख्यातमात्मवृत्तान्त सम्भवम् ॥२५॥ यदि ते श्रवणे श्रद्धा पृच्छ चान्यद्यदिच्छसि ॥ ब्राह्मण उवाच ॥ ये जीवा भुवि तिष्ठन्ति सर्व आहारजीविनः ॥२६॥ युष्माकमपि चाहारं श्रोतुमिच्छामि तत्त्वतः ॥ प्रेता ऊचुः ॥ शृणु चाहारमस्माकं सर्वभूतदयापर ॥ २७ ॥ यच्छुत्वा निन्दसे नित्यं भूयो भूयश्च नित्यशः ॥ श्लेष्मसूत्रपुरीषेण योषितां च समन्ततः ॥ २८ ॥ गृहाणि त्यक्तशौचानि प्रेता भुञ्जन्ति तत्र वै ॥ बलिमन्त्रविहीनानि दानहीनानि यानि च ॥२९॥ गुरवो नैव पूज्यन्ते स्त्रीजितानि गृहाणि च ॥ यानि प्रकीर्णभाण्डानि प्रकीर्णोच्छेषणानि च ॥३०॥ नित्यं च कलहो यत्र प्रेता भुञ्जन्ति तत्र वै ॥ अपात्रे प्रतिदत्तानि विधिहीनानि यानि च ॥ निन्दितानां द्विजातीनां जुगुप्सितकुलोद्भवे ॥ ३१ ॥ जातानां विहितानां च दुष्कृतं कर्म कुर्वताम् ॥ तेभ्यो दत्तं तदस्माकमुपतिष्ठति भोजने ॥ ३२ ॥ एतत्पापतरं चान्यद्भोजनं दुष्टकर्मिणाम् ॥ निर्विण्णाः प्रेतभावेन पृच्छामः सुदृढव्रत ॥ ३३ ॥ प्रेतो यथा न भवति तथा ब्रूहि तपोधन ॥ ब्राह्मण उवाच ॥ एकरात्रत्रिरात्रेण कृच्छ्रचान्द्रायणादिभिः ॥ ३४ ॥ त्रेतेरभ्युद्यतः पूतो न प्रेतो जायते नरः ॥ मिष्टान्नपानदाता च सततं श्रद्धयान्वितः ॥ ३५ ॥ यतीनां पूजको नित्यं न प्रेतो जायते नरः ॥ त्रीन्द्वीन् पंच चैकं वा प्रतिनित्यं तु पोषयेत् ॥३६॥ सर्वभूतदयालुश्च न प्रेतो जायते नरः ॥ देवातिथिषु पूजासु गुरुपूजासु नित्यशः ॥३७॥ रतो वै पितृपूजायां न प्रेतो जायते नरः ॥ जितक्रोधो ह्यमात्सर्यस्तृष्णासङ्गविवर्जितः ॥ ३८ ॥ क्षमायुक्तो दानशीलो न प्रेतो जायते नरः ॥ एकादशीं सितां कृष्णां सप्तमीं वा चतुर्दशीम् ॥ ३९ ॥ उपवासपरो नित्यं न स प्रेतोऽभिजायते ॥ गां ब्राह्मणं च तीर्थानि पर्वतांश्च नदी स्तथा ॥ ४० ॥ देवांश्च वन्दते नित्यं न प्रेतो जायते हि सः ॥ प्रेता ऊचुः ॥ त्वत्तस्तच्छ्रुतमस्माभिर्यो न प्रेतोऽभिजायते ॥ ४१ ॥ प्रेतस्तु जायते केन तद्भद त्वं महामुने ॥ विप्र उवाच ॥ शूद्रान्नेन तु भुक्तेन ब्राह्मणो म्रियते यदि ॥ ४२ ॥ तेनैव चोदरस्थेन स प्रेतो जायते ध्रुवम् ॥ नम्रकापालिपाषण्डसङ्गतासनभोजनैः ॥४३॥ मनुष्यः प्रेततां याति स्पर्शेन सुतरां तथा ॥ पूर्वपुण्यं विनश्येत्तु प्रेतो भवति नित्यशः ॥४४॥

॥१८२॥

पाषण्डाश्रमसंस्थश्च मद्यपः पारदारिकः ॥ वृथामांसरतो नित्यं स च प्रेतोऽभिजायते ॥ ४५ ॥ देवस्वं ब्राह्मणस्वं च गुरोर्द्रव्यं हरेत्तु यः ॥ कन्यां ददाति शुल्केन स च प्रेतोऽभिजायते ॥ ४६ ॥ मातरं पितरं भ्रातृभगिन्यौ च स्त्रियं सुतम् ॥ अदुष्टान्यस्त्यजेत्सोऽपि प्रेतो भवति च ध्रुवम् ॥ ४७ ॥ अयाज्ययाजनाच्चैव याज्यानां परिवर्जनात् ॥ रतो वा शूद्रसेवायां स प्रेतो जायते नरः ॥ ४८ ॥ ब्रह्महा च कृतघ्नश्च गोघ्नो वै पञ्चपातकी ॥ भूमिकन्यापहर्ताच स प्रेतो जायते नरः ॥ ४९ ॥ गुरोर्धर्म्मोपदेष्टुश्च नित्यं हितमभीप्सतः ॥ न करोति वचस्तस्य स प्रेतो जायते नरः ॥ ५० ॥ असद्ग्रहः प्रतिगृह्णाति नास्तिकेभ्यो विशेषतः ॥ स पापो जायते प्रेत आहारादिविवर्जितः ॥ ५१ ॥ प्रेता ऊचुः ॥ य एतत्कर्म कुर्वेन्ति मूढाऽधर्मपरायणाः ॥ विरुद्धकारिणः पापास्तेषां कांचिद्गतिं वद ॥५२॥ ब्राह्मण उवाच ॥ ये धर्मविमुखा मूढा दद्यादानविवर्जिताः ॥ तेषां गतिर्भवेदेका मथुरायान्तु सङ्गमे ॥५३॥ श्रवणद्वादशीयोगे माति भाद्रपदे तथा ॥ वामनं तत्र देवं तु पूजयेज्जुहुयात्तथा ॥५४॥ सुवर्णमन्नं वस्त्रं च च्छत्रोपानत्समुद्गयुतम् ॥ तत्र स्नातो पितॄंस्तर्प्य दत्त्वा करकमेव च ॥ ५५ ॥ न ते प्रेता भविष्यन्ति मार्गस्थो यो नमस्यते ॥ विमानवरमारुह्य विष्णुलोकं स गच्छति ॥५६॥ तत्र तीर्थे नरः स्नातो ह्यघपुष्टो यथाश्रुतः ॥ ध्यातश्च कीर्तितो वापि तेन गङ्गावगाहिता ॥५७॥ तीर्थस्यैव तु माहात्म्यं प्रेतो भूत्वा शृणोति यः ॥ तस्याश्वपदं विष्णोर्भवतीति मया श्रुतम् ॥ ५८ ॥ प्रेता ऊचुः ॥ अस्माकं वद कल्याण व्रतस्यास्य विधिं परम् ॥ येन वै क्रियमाणेन प्रेतत्वान्तु विमुच्यते ॥ ५९ ॥ ब्राह्मण उवाच ॥ एवमेव व्रतस्यास्य विधानं कर्मसंहितम् ॥ पुराणं कथितं राज्ञे मान्धात्रे पृच्छते पुरा ॥ ६० ॥ वसिष्ठेन महाभागाः शृणुध्वं कथयाम्यहम् ॥ प्रेतानां मोक्षणं पुण्यं गतिप्रवरदायकम् ॥ ६१ ॥ मासि भाद्रपदे शुद्धा द्वादशी श्रवणान्विता ॥ तस्यां दत्तं हुतं स्नानं सर्वं लक्षगुणं भवेत् ॥ ६२ ॥ सङ्गमे च पुनः स्नात्वा पूजयित्वा तु वामनम् ॥ कलशं विधिना दत्त्वा तस्य पुण्यफलं शृणु ॥ ६३ ॥ कपिलानां शतं दत्त्वा हिरण्योपस्करान्वितम् ॥ तेन यत्फलमाप्नोति तद्वाङ्मयामखण्डितम् ॥ ६४ ॥ राक्षसत्वं न गच्छेत्तु श्रवणद्वादशीव्रतात् ॥ स्वर्गे च वसते तावद्यावदिन्द्राश्चतुर्दश ॥ ६५ ॥ ततः स्वर्गात्परिभ्रष्टो ब्राह्मणो वेदपारगः ॥ जातिस्मरो महायोगी मोक्षमार्गपरायणः ॥ ६६ ॥

व्यानयुक्तेन भावेन मुक्तो यात्यपुनर्भवम् ॥ कनकं च सुसंपीतं साज्यं रत्नसमन्वितम् ॥ ६७ ॥ यथालाभोपपन्नेन सौवर्णं वामनः कृतः ॥ उपानच्छत्रसंयुक्तो विधिमन्त्रपुरःसरः ॥ ६८ ॥ कृत्वा च विधिवत्तस्य स्नानपूजादिकं नरः ॥ मन्त्रैस्तथाविधैर्हेमब्राह्मणं चोपपादयेत् ॥ ६९ ॥ आगच्छ वरदानन्त श्रीपते मदनुग्रहात् ॥ सर्वगोपि निजांशेन स्थानमेतदलङ्कुरु ॥ ७० ॥ (आवाहनम्) यत्त्वं नक्षत्ररूपेण द्वादश्यां नभसि स्थितः ॥ तन्नक्षत्रमहं वन्दे मनोवाञ्छितसिद्धये ॥ ७१ ॥ (नक्षत्रम्) नमः कमलनाभाय कमलालय केशव ॥ (स्नानम्) अमूर्ते सर्वतोव्यापिन्नारयाण नमोऽस्तु ते ॥ ७२ ॥ सर्वव्यापिन्जगद्योने नमः सर्वमयाच्युत ॥ (पूजाः) श्रवणद्वादशीयोगे पूजां गृहीष्व केशव ॥ ७३ ॥ धूपोऽयं देवदेवेश शंखचक्रगदाधर ॥ (धूपं) अच्युतानन्त गोविन्द वासुदेव नमोऽस्तु ते ॥ ७४ ॥ तेजसा सर्वलोकाश्च वितृताः सन्तु तेऽव्ययाः ॥ (दीपम्) त्वं हि सर्वगतं तेजो जनार्दन नमोऽस्तु ते ॥ ७५ ॥ आदित्यगर्भमाधाय वैरोचनिशमाय च ॥ त्रिभिः क्रमैर्जिता लोका वामनाय नमोऽस्तु ते ॥ ७६ ॥ (नैवेद्यम्) देवानां सम्मतश्चापि योगिनां परमां गतिः ॥ जलशायी जगद्योने अर्घ्यं मे प्रतिगृह्यताम् ॥ ७७ ॥ (अर्घ्यम्) हव्यभुग्व्यक्तर्ता त्वं होता हव्यं त्वमेव च ॥ सर्वमूर्ते जगद्योने नमस्ते केशवाय च ॥ ७८ ॥ (इति स्वाहा होमः) हिरण्यमन्नं त्वं देव जलस्थमयो भवान् ॥ (दक्षिणाम्) उपानच्छत्रदानेन प्रीतो भव जनार्दन ॥ ७९ ॥ (छत्रादिदानम्) पर्जन्यो वरुणः सूर्यः सलिलं केशवः शिवः ॥ अग्निर्वैश्रवणो देवः पापं हरतु मेऽव्ययः ॥ ८० ॥ (वामनस्तुतिम्) अन्नं प्रजापतिर्विष्णुरुद्रचन्द्रेन्द्रभास्कराः ॥ अन्नं त्वष्टा यमोऽग्निश्च पापं हरतु मेऽव्ययः ॥ ८१ ॥ (करकदानं) वामनो बुद्धिदाता च द्रवस्थो वामनः स्वयम् ॥ वामनस्तारकोभाभ्यां वामनाय नमोऽस्तु ये ॥ ८२ ॥ (यजमानः) वामनं प्रतिगृह्यापि वामनो मे प्रयच्छति ॥ वामनस्तारको भाभ्यां वामनाय नमो नमः ॥ ८३ ॥ (द्विजः प्रतिग्रहीता) कपिलाङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ दत्त्वा कामदुघां लोका भवन्ति सफला नृणाम् ॥८४॥ (गोदानं) मम पापच्छिदे तुभ्यं देवगर्भ सुपूजित ॥ मया विसर्जितो देव स्थानमन्यदलङ्कुरु ॥८५॥ (विसर्जनम्) एवं विद्यांस्तु द्वादश्यां यो नरः श्रद्धयान्वितः ॥ यत्र तत्र नभस्थे तु कृत्वा फलमवाप्नुयात ॥ ८६ ॥ ब्राह्मण उवाच ॥ यस्तु सारस्वते तीर्थे यमुनायाश्च सङ्गमे ॥ करोति

विधिनानेन तस्य पुण्यं शतोत्तरम् ॥८७॥ मयापि श्रद्धया चैतत्कालं तीर्थस्य सेवनम् ॥ क्षेत्रसंन्यासरूपेण कृत भक्तिसमन्वितम् ॥८८॥ येन यूयं न शक्ता मां बाधितुं पापकर्मिणः ॥ श्रवणद्वादशीयोगे व्रतं तिथिसमन्वितम् ॥ ८९ ॥ तावद्भूतं तु कर्तव्यं यावद्देहं क्षयं व्रजेत् ॥ तीर्थे स्थेय प्रभावो हि प्रत्यक्षमिह दृश्यते ॥९०॥ श्रवणाद्यो गतिः साक्षात्साधु लप्स्यामि चाऽधुना ॥ श्रीवराह उवाच ॥ एवं ब्रुवति विप्रे तु आकाशे दुन्दुभिस्वनः ॥ पुष्पवृष्टिर्दुन्दुभयो नदेवैर्मुक्ता सहस्रशः ॥९१॥ प्रेतानां तु विमानानि आगतानि समन्ततः ॥ देवदूत उवाचेदं प्रेतानां शृण्वतां तदा॥९२॥ अस्य विप्रस्य सम्भाषात्पुण्यसत्कीर्तितेन च ॥ प्रेतभावनिमुक्ताः स्थ तीर्थस्य श्रवणादपि ॥९३॥ तस्मात्सर्वप्रयत्नेन सदा सम्भाषणं वरम् ॥ कर्तव्यस्तीर्थभावश्च व्रतभावश्च मानते ॥९४॥ तीर्थाभिषेकिपुरुषाद्यथा तेषां दुरात्मनाम् ॥ प्रेतानामक्षयः स्वर्गः सरस्त्यात्राच्च सङ्गमात् ॥९५॥ प्राप्तं तीर्थप्रभावस्य श्रवणान्मुक्तिदं फलम् ॥ तिलकं सर्वपापानां पंच प्रेतत्वमुक्तिदम् ॥९६॥ यः पठेत्परया भक्त्या शृणुया द्भक्तितत्परः ॥ करोति श्रद्धया युक्तो न प्रेतो जायते नरः ॥९७॥ विशाखवर्तद्वादशं नाम तीर्थं त्रैलोक्यविश्रुतम् ॥ यस्य श्रवणमात्रेण न प्रेतो जायते नरः ॥ ९८ ॥ इति श्रीवराहपुराणे मथु० मा० सर्वतीर्थे यमुनासंगमप्रभावोनाम चतुःसप्ततितमोऽध्यायः ॥१७४॥ श्रीवराह उवाच ॥ शृणु चान्यद्वरारोहे कृष्णगङ्गासमुद्भवम् ॥ यमुनास्रोततिं स्नात्वा कृष्णद्वैपायनो मुनिः ॥ १ ॥ ध्यात्वा मनसि गङ्गां तां काञ्चिन्तीं पापहारिणीम् ॥ नित्यं च कर्म कुरुते तत्र तीर्थजलाप्लुतिम् ॥२॥सोमवैकुण्ठयोर्मध्ये कृष्णङ्गेति कथ्यते ॥ यत्रातप्यत स व्यासो मथुरायां स्थितोऽमलः॥३॥तत्राश्रमपदं दिव्यं मुनिप्रवरसेवितम् ॥ आगच्छन्ति सदा तत्र चातुर्मास्ययुयासिनः ॥४॥ मुक्त्यो वेदतत्त्वज्ञा ज्ञानिनः संशितव्रताः ॥ श्रोतस्मार्तपुराणेषु सल्देहो यस्य कस्यचित्॥५॥व्यासोऽपनोदयामास नानाशास्त्रैः सतांगतिः॥६॥कालञ्जरे महाद्रेर्वे तत्र तीर्थपतिं शिवम् ॥ यस्य सन्दर्शनाद्देव कृष्णगंगाफलं भवेत् ॥ ७॥तत्र स्थितो द्वादशाब्दव्रती संगविवर्जितः॥पञ्चाहारी च फलभुग्दर्शे वै पौर्णमासिके ॥८॥ गत्वा हिमालयं चासौ बदरीमभितो गतः॥व्यासश्चर्यापरस्तत्र ध्यानयोगपरायणः ॥९॥ भिक्षाकालदर्शी शुद्धात्मा विद्वत्सं प्राप्तुमात्मभुः॥ तस्याश्रमपदस्थस्य यद्दृष्टं ज्ञानचक्षुषा॥१०॥प्रत्यक्षं कृष्णतीर्थं तु पांचाल्यकुलजन्मना॥ मांबालयोऽयद्विजः कश्चिन्नाम्ना वसुरिति श्रुतः॥११॥दुर्भिक्षशीडितोऽत्यन्तं तमार्यो

दक्षिणांगतः॥शिवनद्या दक्षिणे तु कूले स वरपत्तने॥१२॥निवासमकरोत्तत्र ब्राह्मणीं वृत्तिमाश्रितः॥तत्रस्थस्य तदा पंच पुत्राः कन्याभवंस्तदा॥१३॥
ब्राह्मणाय च दत्ता सा धनधान्यसमन्विता ॥ स द्विजः कालसम्पन्नः सभार्यस्तत्र सांस्थितः ॥ १४ ॥ कन्याऽस्थीनि तु संगृह्य मथुरामाजगाम ह ॥
श्रुत्वा पुराणे पतितमर्द्धचन्द्रेऽस्थिपातनम्॥१५॥ नित्यं स्वर्गे वसति स यस्यास्थि ह्यर्द्धचन्द्रके॥तीर्थयात्राप्रसंगेन लोकैः प्रचलिता वहिः॥१६॥
तेन सार्थेन सा कन्या मथुरायां जगाम च ॥ कनिष्ठा भगिनी तेषां बालरण्डा बभूव ह ॥ १७ ॥ सुरूपा सुकुमाराङ्गी नीलकुंचितमूर्द्धजा ॥
कदलीकाण्डसंकाशे तस्या ऊरू सुमांसले ॥ १८ ॥ सुश्लिष्टाङ्गुलिपादा तु नखास्ताम्रोज्वलाः शुभाः ॥ गम्भीरा दक्षिणावर्त्ता नाभिस्त्रिवलि
शोभिता ॥१९॥ क्षामोदरी समकुक्षिः पीनोन्नतपयोधरा ॥ कम्बुग्रीवा संवृतास्या सुदती स्वधराहनुः ॥२०॥ सुनखी स्निग्धिणी सुभ्रूः सुप्रमाणा
सुभाषिणी ॥ तेन तेनैव सम्पूर्णरूपेण च तिलोत्तमा ॥ २१ ॥ यं यं पश्यति चार्वङ्गी यस्तां चैव प्रपश्यति ॥ स स चित्र इव न्यस्तो विचेता
जायते नरः ॥ २२ ॥ एवंविधा तत्र तत्र तीर्थस्नानपरायणा ॥ दृष्टा वेश्यासमूहेन प्रागल्भ्येन तदा क्वचित् ॥ २३ ॥ कान्यकुब्जाधिपो राजा
क्षत्रधर्मे व्यवस्थितः ॥ तस्य सत्रं सर्वकालं देवगर्त्तेश्वरे शिवे ॥ २४ ॥ प्रवर्त्तते सुचित्राढ्य प्रेक्षणीयं मनोरमम् ॥ वादित्राणि च गीतानि शक्रस्य
भवने यथा ॥ २५ ॥ तस्य देवस्य या वेश्यास्ताभिः सा प्रतिलोभिता ॥ २६ ॥ गीतनृत्यादिषु रता तासां धर्ममुपागता ॥ अल्पैस्तु दिवसैः
सच्ची असाच्चीभिः परीवृता ॥ २७ ॥ एवं वसति सा बाला देवस्यास्य परिग्रहा ॥ यथासुखं समेताभिर्विहरन्ती दिनेदिने ॥ २८ ॥ इति श्रीव
राहपुराणे मथुरामाहात्म्ये कृष्णगंगाकालिञ्जरप्रभावे पंचसप्तत्यधिकशततमोऽध्यायः ॥१७५॥ श्रीवराह उवाच ॥ पंचानां तु कनिष्ठो यः पंचालो
ब्राह्मणात्मजः ॥ वाणिज्यभाण्डमादाय समूहस्य प्रसंगतः ॥ १ ॥ सार्थेन निष्ठितः सोऽथ धनवान्रूपवांस्ततः ॥ क्रमेण ते सर्वदेशान्विषयान्
पर्वतान्नदीः ॥ २ ॥ आक्रम्य तत्र सम्प्राता यत्र सा मथुरा पुरी ॥ आवासं कारयामासुः प्रभूतयवसेन्धने ॥ ३ ॥ तस्मिन्स्थाने स पांचालः
प्रातस्तु पुरुषैः सह ॥ तस्मिंस्तीर्थवरे स्नाप्य वस्त्रालङ्कारभूषितः ॥ ऐश्वर्यमदभावेन यानेन महता तदा ॥ ४ ॥ देवतादर्शनं कृत्वा दत्त्वा दानान्य
न्यनेकशः ॥ ५ ॥ कौतुकार्थं ततो गत्वा देवं गर्त्तेश्वरं तदा ॥ तिलोत्तमायास्तद्रूपं दृष्ट्वा मोहवशं गतः ॥ ६ ॥ धात्रेयिकायास्तस्याश्च बहु

॥१८३॥

नानपुरःसरम् ॥ वस्त्राणि बद्धरूपाणि कटकानां शतानि च ॥ ७ ॥ हारा रत्नमयास्तद्वद्दद्दौ लोभविमोहितः ॥ ददावगुरुसारं च सकर्पूरं सचन्दनम् ॥ ८ ॥ तस्या गृहवरे तत्र वसति स्म दिनेदिने ॥ प्रहराद्धें दिने जाते ततः स्वशिविरं ययौ ॥ ९ ॥ स्नात्वा तीर्थे समीपे च कृष्णगङ्गोद्भवे सदा ॥ एवं नित्यं प्रसक्तो हि करोति द्रव्यगर्वितः ॥ १० ॥ एवं तु कुर्वतस्तस्य मासषट्कं ततो गतम् ॥ अथैकदा समायातः स्नातुं तत्र सुमन्तुना ॥ ११ ॥ स्वाश्रमस्थेन दृष्टः स कृमियुक्तः समागतः ॥ कृमयो रोमकूपेभ्यः पतमाना अनेकशः ॥ १२ ॥ यावत्स्नानं स कुरुते पतते राशिमात्रकः ॥ स्नाने कृते नश्यति च सुरूपश्चाभिजायते ॥ १३ ॥ एवं सुमन्तुना दृष्टमाश्चर्यं बहुवासरम् ॥ सुमन्तुस्तत्कथयामास कौऽयं कस्या त्मजो युवा ॥ १४ ॥ इति चिन्तासमायुक्तस्तमपृच्छद्विशंकितः ॥ कस्त्वं कस्यासि सुभग का जातिः कश्च ते पिता ॥ १५ ॥ किं करोषि दिवारात्रौ ब्रूहि त्वं पृच्छतो मम ॥ पाञ्चाल उवाच ॥ पांचालो ब्राह्मणसुतो वाणिज्यं च समाश्रितः ॥ १६ ॥ दक्षिणापथदेशाच्च मथुरायां समागतः ॥ निशामुषित्वा शिविरे प्रातस्तीर्थं समाश्रितः ॥ १७ ॥ स्नात्वा महेश्वरं दृष्ट्वा त्रिगर्त्तेश्वरसंज्ञितम् ॥ कालिञ्जरं भवत्पादौ गच्छामि शिविरं ततः ॥ १८ ॥ सुमन्तुरुवाच ॥ आश्चर्यं तव देहेऽस्मिन्नित्यं पश्यामि निःसृतम् ॥ अस्नाते कृमिसम्पूर्णं स्नाते निर्मलवर्चसम् ॥१९॥अस्ति किंचिन्महत्पापं तव पृच्छन्नसम्भवम् ॥ अस्यां तीर्थप्रभावेण स्नानाद्गच्छति दूरतः ॥ २० ॥ कालिञ्जरस्य संस्पर्शाच्छुद्धं देहं च दृश्यते ॥२१॥निरूप्य कथयास्माकं यत्ते पृच्छन्नकिल्विषम् ॥ २२ ॥ तीर्थमाहात्म्यभावं च दृष्ट्वा पृच्छामि ते हितम् ॥ इति तस्य मुनेः श्रुत्वा त्रिकालज्ञस्य भाषितम् ॥ २३॥ किंचिन्नोवाच पृष्टोऽपि एवमेव गतः पुनः ॥ तस्यामासीत्स एकान्ते तां तु पप्रच्छ सादरम् ॥२४॥ का त्वं कस्यासि सुभगे कश्च देशः प्रियंवदे ॥ किं तत्कारणमुद्दिश्य वससत्यत्र सुखं सदा ॥ २५ ॥ इति निर्बन्धतः पृष्टा किंचिन्नोवाच तं प्रति ॥ पुनः पुनश्च पप्रच्छ सा प्रोवाच न किंचन ॥ २६ ॥ किंचित्कालं समास्थाय तेनोक्तं हि प्रियां प्रति ॥ त्यक्ष्यामि हि प्रियात्प्राणान्यदि सत्यं न वक्ष्यसि ॥ २७ ॥ निर्बन्धं तस्य तज्ज्ञात्वा दुःखेनोवाच तं प्रति ॥ पितरौ भ्रातरश्चेति देशं ज्ञातिं ततः कुलम् ॥ २८ ॥ पंचालनगरी रम्या गङ्गायाश्चोत्तरे तटे ॥ तस्यां तौ पितरौ मह्यं वसतश्च यदृच्छया ॥ २९ ॥ दुर्भिक्षपीडिते राष्ट्रे गतौ तौ दक्षिणापथम् ॥ नर्मदादक्षिणे कूले ब्राह्मणानां पुरोत्तमे ॥ ३० ॥ तस्मिन्

स्थाने पितुर्मह्यं पंच पुत्रा मया सह ॥ जातास्तेषामहं षष्ठी कनिष्ठा विधवाऽभवम् ॥ ३१ ॥ योऽसौ कनिष्ठको भ्राता मम ज्येष्ठश्च पंचमः ॥
बाल एव गतो देशं धनतृष्णाप्रलोभितः ॥३२॥ तस्मिन्गतेऽथ पितरौ कालधर्ममुपेयतुः ॥ तीर्थेऽस्मिन्नस्थिपातार्थमहं सार्थैः सहागता ॥३३॥
अत्र स्नानपरा नित्यं देवब्राह्मणवन्दनम् ॥ कुर्वन्ती वशमापन्ना आसां यस्या ममेदृशम् ॥ ३४ ॥ आश्रिता कुलद्वयधर्मं कुलनाशो मया कृतः ॥
कुलद्वये च पुरुषा एकविंशतिसंख्यया ॥ ३५॥ नीता नरकमत्युग्रं मया पापिष्ठया भृशम् ॥ एवं सा तस्य तत्सर्वं कथयित्वा तिलोत्तमा ॥३६॥
रुरोद सुस्वरं दीना स्मृत्वा पूर्वं कुलं वरम् ॥ विलप्य बहुधा रात्रौ संस्मृत्य स्वं विचेष्टितम् ॥ ३७ ॥ तस्या विलपितं श्रुत्वा स्त्रीजनः स
तद्गतः ॥ सान्त्वयामास तां बालां किं भद्रे रुदितं तव ॥ ३८ ॥ एतच्छ्रुत्वा स पांचाल्यो मूर्च्छितो धरणीं गतः ॥ ताः स्त्रियस्तां समा
श्वास्य पांचाल्यं परिषायं च ॥ ३९ ॥ तैस्तैरुपायैर्विविधैर्जीवयित्वा च तं नरम् ॥ लब्धप्राणं तु तं दृष्ट्वा पप्रच्छुर्मोहकारणम् ॥ ४० ॥ तत
स्तेन सवृत्तान्तं कथितं च कुलं महत् ॥ तिलोत्तमासहायानां स्त्रीणामग्रे सविस्तरम् ॥ ४१ ॥ ततः स विमना जातो अगम्यागमनेन च ॥
प्रायश्चित्तं मतिर्भूद्विविंण्णस्य दुरात्मनः ॥ ४२ ॥ ब्रह्महा च सुरापश्च ब्राह्मणो यदि जायते ॥ प्रायश्चित्तं विनिर्दिष्टं मुनिभिर्देहनाशनम् ॥४३॥
मातरं गुरुपत्नीं च स्वसारं पुत्रिकां वधूम् ॥ गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते ॥ ४४ ॥ ब्रह्मघ्नश्च सुरापश्च स्त्रीघ्नश्च
गुरुतल्पगः ॥ अगम्यागमनं कृत्वा एषां स समतामियात् ॥ ४५ ॥ इति श्रुत्वा तु पांचाली ज्येष्ठभ्रातरमेव तम् ॥ द्विजेभ्यः प्रददौ सर्वमङ्गल्यं
विभूषणम् ॥४६॥ रत्नं वस्त्रं धनं धान्यं यत्किंचित्तत्र संस्थितम् ॥ तत्सर्वं ब्राह्मणेभ्यश्च दत्त्वाशेषं ददौ धनम् ॥४७॥ कालिञ्जरस्य भूपार्थमागत
मार्थं विशेषतः ॥ कृष्णगङ्गोद्भवे तीर्थे चितां कृत्वा विधानतः ॥ ४८ ॥ आत्मनश्च विशुद्ध्यर्थं प्रज्वाल हुताशनम् ॥ इति निश्चित्य तत्रैव
स्नात्वा देवं प्रणम्य च ॥ ४९ ॥ पंचालोऽपि विधानेन नमस्कृत्य मुनिं गुरुम् ॥ सुमन्तुं च महाभागमुपविश्याग्रतश्च सः ॥५०॥ मरणायोपयो
ग्यानि कृत्वा कर्माणि तत्र च ॥ माधुरान्स समाहूय दत्त्वा दानानि सर्वशः ॥ ५१ ॥ क्रीत्वा ग्रामांश्च तत्रैव ब्राह्मणेभ्यो ददौ तदा ॥ ईशावास्यं
जपं दिव्यं जापकेभ्यः नृणोति च ॥ ५२ ॥ तेभ्योऽपि प्रददौ द्रव्यं सत्रार्थं च विभागशः ॥ और्ध्वदेहिकभागार्थं कल्पयित्वा यथाविधि ॥५३॥

॥ १८४॥

स्नात्वा तीर्थे च कृष्णस्य देवं दृष्ट्वा प्रणम्य च ॥ कालिञ्जरस्य पूजार्थं सत्रार्थं परिकल्प्य च ॥ ५४ ॥ देवालयं च तत्रैव कृत्वा सन्दिश्य सार्थकान् ॥ सुमन्तोः प्रवरस्याथ पादौ जग्राह धर्मवित् ॥ ५५ ॥ देव ज्ञानं च ते दिव्यमद्रुतं लोमहर्षणम् ॥ अगम्यागमनादेव पापं जातं मम प्रभो ॥ ५६ ॥ आगतोऽहं यदारभ्य मथुरायां ततो गुरो ॥ भगिन्या सह संयोगे जातोऽयं कुलनाशकः ॥ ५७ ॥ त्वया निर्मलदृष्ट्या च वीक्षितोऽहं पुरा मुने ॥ कृमयो मम गात्राणु निर्गच्छन्तो हि नित्यदा ॥ ५८ ॥ कृष्णगंगाप्रभावेण पुनर्नैर्मलतां गतम् ॥ तत्सर्वं हि त्वया दृष्टं पृष्टश्चाहं पुनः पुनः ॥ ५९ ॥ तत्सत्यं मम सञ्जातमगम्यागमपातकम् ॥ तत्पापस्य विशुद्ध्यर्थं देहत्यागं करोमि वै ॥ ६० ॥ अनुज्ञां देहि भो स्वामिंस्तव पादौ नमाम्यहम् ॥ विश्राव्य तस्य तत्पापं चितां दीप्यं घृतोक्षिताम् ॥ ६१ ॥ प्रवेष्टुकामं तत्राग्नौ खे प्रोवाचाशरीरिणी ॥ मैवं कार्षीः साहसं च विषाण्मानो यतश्च वाम् ॥ ६२ ॥ कस्माद्वा कस्य सन्त्रासान्मरणे कृतनिश्चयौ ॥ यत्र कृष्णस्य संचारः क्रीडितं च यथासुखम् ॥ ६३ ॥ चक्राङ्कितपदा तेन स्थानं ब्रह्मसमं शुभम् ॥ अन्यत्र हि कृतं पापं तीर्थमासाद्य गच्छति ॥ ६४ ॥ तीर्थे च यत्कृतं पापं वज्रलेपो भविष्यति ॥ द्वावेतौ च यथाऽश्यं गंगासागरसंगमे ॥ ६५ ॥ सकृदेव नरः स्नात्वा मुच्यते ब्रह्महत्यया ॥ पृथिव्यां यानि तीर्थानि सर्वाण्येवाभिषेचनात् ॥ ६६ ॥ तत्पंचतीर्थस्नानेन समं नास्त्यत्र संशयः ॥ एकादश्यां च विश्रान्तो द्वादश्यां सोकरे तथा ॥ ६७ ॥ त्रयोदश्यां नैमिषे च प्रयागे च चतुर्दशीम् ॥ कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते ॥ ६८ ॥ कालेष्वेषु नरः स्नात्वा सर्वपापं व्यपोहति ॥ मथुरायां च तीर्थेभ्यो विश्रान्तः पंचतीर्थके ॥ ६९ ॥ असिकुण्डे सरस्वत्यां तथा कालिञ्जरस्य च ॥ पंचतीर्थाभिषेकाच्च यत्फलं लभते नरः ॥ ७० ॥ कृष्णगंगा दशगुणं लभते च दिनेदिने ॥ ज्ञानतोऽज्ञानतो वापि यत्पापं समुपार्जितम् ॥ ७१ ॥ सुकृतं दुष्कृतं चापि मथुरायां प्रणश्यति ॥ वराहेण पुरा चेदं पृथिव्यै कथितं शुभम् ॥ ७२ ॥ तीर्थानां गुणमाहात्म्यं महापातकनाशनम् ॥ सर्वदेवमयो योऽसौ सर्ववेदमयस्तथा ॥ ७३ ॥ अनन्तश्चाप्रमेयश्च यस्य चान्तो न विद्यते ॥ यस्य श्रोत्रैकदेशे तु आकाशो लेशमात्रकः ॥७४॥ विलीनो ज्ञायते नैव तस्य देवस्य का कथा ॥ तथा नयनयोः प्रान्ते तेजो लीनं न दृश्यते ॥ ७५ ॥ निःश्वासे च विलीनोऽसौ वायुर्नैष्टो न दृश्यते ॥ खुराग्रेषु तथा लीनाः समुद्राः सप्त च

प्रभोः ॥ ७६ ॥ दृश्यन्ते स्वेदसङ्काशा नाममात्रा यथा पुरा ॥ रोमकूपान्तरे लग्ना सशैलवनकानना ॥ ७७ ॥ नष्टा पृथ्वी न लभ्येत तस्मादे वात्तु कोऽधिकः ॥ सोऽत्र तीर्थपरिज्ञाणं कुर्वन्देवः स्वयं प्रभुः ॥ ७८ ॥ वराहः संस्थितः साक्षात्पुराणं येन सूचितम् ॥ पृथिव्याः सर्वसन्देहान् स्फोटयामास योऽव्ययः ॥ ७९ ॥ तस्य सन्दर्शनादेव सर्वपापविवर्जितः ॥ तत्क्षणादेव जायेत नात्र कार्या विचारणा ॥ ८० ॥ नवम्यां ज्येष्ठ शुक्लस्य स्नात्वा गङ्गोदके नरः ॥ सूकरे तु त्रिरात्रं च मानवो दीपदः सकृत् ॥ ८१ ॥ दत्त्वा दानं यथाशक्ति सर्वपापैः प्रमुच्यते ॥ कालिञ्जरे च द्वादश्यां स्नात्वा संपूज्य देवताम् ॥ ८२ ॥ द्वादशादित्यसङ्काशो विमाने च समास्थितः ॥ विष्णुना समनुज्ञातो विष्णुलोके महीयते ॥८३॥ वराह उवाच ॥ एवं सुखदृशब्देन देववाण्या प्रचोदितः ॥ पांचालसंज्ञकस्तत्र सुमन्तुं पर्यपृच्छत ॥ ८४ ॥ अस्मद्गुरुः पिता त्वं च ब्रूहि किं कर वाणि वै ॥ पावकालम्भनं मे स्यादुताहो तीर्थसेवनम् ॥ ८५ ॥ त्रिरात्रं कृच्छ्रपाराकं चान्द्रायणमथापि वा ॥ तव पादांकिते वापि स्थित्वा मोक्षमवाप्नुयाम् ॥ ८६ ॥ आकाशभारती यत्तु तत्सत्यं नानृतं क्वचित् ॥ मया प्रत्यक्षतः पूर्वं तव गात्रेषु पातकम् ॥ ८७ ॥ दिनेदिने च स्नानात्प्राङ् प्रतिगच्छति नित्यशः ॥ आश्रमे त्वं स्थितश्चात्र निर्मलश्च शशी यथा ॥८८॥ तिष्ठोपरमितः पापाद्यावत्कालं च जीवसि ॥ इयं तु भगिनी पापादुपावृत्ता सती परम् ॥ ८९ ॥ सगतिश्च विपापा च भविष्यति न संशयः ॥ श्रीवराह उवाच ॥ एवं प्रभावस्तीर्थस्य मधुरायां वसुन्धरे ॥९०॥कृष्णगंगोद्भवस्यापि तथा कालिञ्जरस्य च ॥ सूकरस्य च माहात्म्यं यथा ते वर्णितं पुरा ॥९१॥ यः शृणोति वरारोहे श्रद्धया परया युतः ॥ पठति प्रातरेवापि न स पापेन लिप्यते ॥९२॥ सप्तजन्मकृतं पापं तस्य सर्वं व्यपोहति ॥ फलं च गोशतस्यापि दत्तस्य समवाप्नुयात्॥अमृतत्वं च लभते स्वर्गलोकं च गच्छति॥९३॥इति श्रीवराहपुराणे कृष्णगंगोद्भवमाहात्म्यं नाम षट्सप्तत्यधिकशततमोऽध्यायः ॥१७६॥ ॥१८५॥

श्रीवराह उवाच॥शृणु चान्यद्वरारोहे कृष्णस्यान्यद्विचेष्टितम् ॥ द्वारकां वसमानस्य साम्बशापादिकं शृणु ॥१॥ सुखासीनस्य कृष्णस्य पुत्रदारसुतैः सह ॥ आगतो नारदस्तत्र यदृच्छागमनो मुनिः॥२॥पाद्यमर्घ्यं चासनं च मधुपर्कं सभाजनम्॥गां च दत्त्वा यथान्यायं कृतं संवादमुत्तमम् ॥३॥ एकान्ते प्राप्य कृष्णं च विज्ञप्तिमकरोत्प्रभुः॥कृष्ण किञ्चिद्रहस्यं मे कामस्तत्त्वं शृणु महामते॥४॥ साम्बनामा तव युवा पुत्रो वाग्मी तु रूपवान्॥स्पृह

णीयः सदा कान्तः स्त्रीजनस्य सुरेश्वरः॥५॥एतास्तु वरनार्यो वै क्रीडार्थं हि सुरेश्वरः॥देवयोन्यो ददुस्तुभ्यं सहस्राणि च षोडश॥६॥ साम्बं दृष्ट्वा च सर्वासां श्रुत्वते च मनः प्रभो ॥ एतत्तु ब्रह्मलोके च गीयते देवतैः स्वयम् ॥ ७ ॥ त्वत्प्रियार्थं समायातः कथितुं ते सुरोत्तम ॥ श्रूयते चार्थ विद्रुपः श्लोको द्वैपायनेन वै ॥ ८ ॥ क्रियातः स्वर्गवासोस्ति नरकस्तद्विपर्ययात् ॥ पुण्यरूपं तु यत्कर्म दिशो भूमिं च संस्पृशेत् ॥ ९ ॥ यावत्स शब्दो भवति तावत्पुरुष उच्यते ॥ पुरुषश्चाविनाशी च कथ्यते शाश्वतोऽव्ययः ॥ १० ॥ नरके पुरुषः प्रोक्तो विपरीतो मनीषिभिः ॥ तस्मात्साम्बं समाहूय तथा देवीगणं च तम् ॥ ११ ॥ आसनेषूपविष्टानां तासां श्लोभं च तत्त्वतः ॥ लक्षयिष्याम्यहं सर्वं सत्यं चासत्यमेव च ॥ १२ ॥ तावत्सभ्यासनान्येव स्वास्तीर्य च विभागशः ॥ सर्वास्तास्तु समाहूय आसने चोपवेश्य च ॥ १३ ॥ पश्चात्साम्बः समायातस्त स्थाग्रे करसंपुटम् ॥ कृत्वा स्थितो मुहूर्तं तु किमाज्ञापयसि प्रभो ॥ १४ ॥ दृष्ट्वा रूपमतीवास्य साम्बस्येव वरस्त्रियः ॥ चुक्षुभुः सकला देव्यः कृष्णस्येव तु पश्यतः ॥१५॥ उत्तिष्ठतः क्रियाः सर्वा गच्छत स्वनिवेशनम् ॥ कृष्णयाक्यातदा देव्यो जग्मुः स्वं स्वं निवेशनम् ॥१६॥ सांबस्तत्रैव संतस्थौ वेपमानः कृताञ्जलिः ॥ स कृष्णो नारदं वीक्ष्य लज्जयाऽधोमुखोऽभवत् ॥ १७ ॥ कृष्णस्तु कथयामास नारदाय सविस्तरम् ॥ स्त्रीस्वभावं चरित्रं च आश्चर्यं पापकारकम् ॥ १८ ॥ क्षणो नास्ति रहो नास्ति नास्ति कृत्ये विभावना ॥ तेन नारद नारीणां सतीत्वमुपजायते ॥ १९ ॥ एकवासास्तथा गौरी श्यामा वा वरवर्णिनी ॥ मध्यं गता प्रगल्भा च वयोऽतीतास्तथा स्त्रियः ॥ २० ॥ सुरूपं पुरुषं दृष्ट्वा क्षरन्ति मुनिसत्तम ॥ स्वभाव एष नारीणां सांबस्य शृणु कारणम् ॥ २१ ॥ अतीव मानी तेजस्वी धार्मिकोऽतिगुणान्वितः ॥ रूपकारणमुद्दिश्य गतः क्षोभं कथञ्चन ॥ २२ ॥ नारदस्त्वेवमेवं च प्रतिपूज्य हरेर्वचः ॥ अन्तरज्ञ उवाचेदं सांबशापकरं तथा ॥ २३ ॥ यथा एकेन चक्रेण रथस्य न गतिर्भवेत् ॥ पुरुषास्यादनाद्वैव क्षरन्ति सततं स्त्रियः ॥ २४ ॥ पुंसः सुदृष्टिपातेन कृतकृत्या भवन्ति ताः ॥ प्रद्युम्नं वीक्ष्य नार्यस्तु लज्जामापुः सुपुष्कलाम् ॥ २५ ॥ सांबं दृष्ट्वैव ताः सर्वा अनङ्गेन प्रपीडिताः ॥ उद्दीपनविभावोऽयं तासां गन्धादिकं यथा ॥ २६ ॥ तस्मात्सांबस्तु दुष्टात्मा तव स्त्रीणां विनाशकृत् ॥ सत्यलोके प्रवादो यस्तव जातो दुरत्ययः ॥ २७ ॥ मया श्रुतस्तु लोकेभ्यो

ब्रह्मर्षिभ्यो मुहुर्मुहुः ॥ सांबत्यागात्प्रमार्ष्टुं त्वमयशः कुलनाशकम् ॥ २८ ॥ त्वमिहाऽस्यमेयात्मन्मया तु कथितं द्विजैर्मुं ॥ इत्युक्त्वा वचनं तत्र नारदो मौनमास्थितः ॥ २९ ॥ कृष्णः शशाप सांबं तु विरूपस्त्वं भविष्यसि ॥ शापयुक्तः स सांबस्तु कुष्ठ्युक्तोऽभवत्क्षणात् ॥ ३० ॥ शरीरात्तु गलद्रक्तं पूतिगन्धयुतं सदा ॥ पश्युवत्कर्तितो यस्तु तद्भक्षेद्योऽस्य दृश्यते ॥ ३१ ॥ ततस्तु नारदेनैव साम्बशापविनाशकः ॥ समादिष्टो महान्यत्नं आदित्याराधनं प्रति ॥ ३२ ॥ सांब सांब महाबाहो शृणु जांबवतीसुत ॥ पूर्वाचले च पूर्वाह्णे उद्यन्तं तु विभावसुम् ॥ ३३ ॥ नमस्कुरु यथान्यायं वेदोपनिषदादिभिः ॥ त्वयोदितं रविः श्रुत्वा तुष्टिं यास्यति नान्यथा ॥ ३४ ॥ सांब उवाच ॥ अगम्यागमनात्पापाद्दग्धोऽतो यः पुरुषो भवेत् ॥ तस्य देवः कथं तुष्टो भविष्यति स वै मुने ॥ ३५ ॥ नारद उवाच ॥ भविष्यत्पुराणेति तत्र वाक्षद्भविष्यति ॥ ब्रह्मलोके पठिष्यामि ब्रह्मणोऽग्रे त्वहं सदा ॥ ३६ ॥ सुमन्तुर्मर्त्यलोके च मनोः प्रकथयिष्यति ॥ सांब उवाच ॥ कथं पूर्वाचले गत्वा मांसपिण्डोपमः प्रभो ॥ ३७ ॥ त्वत्प्रसादान्महद्दुःखं प्राप्तस्त्वहमकल्मषः ॥ नारद उवाच ॥ यथोद्दयाचले देवमाराध्य लभते फलम् ॥ ३८ ॥ मथुरायां तथा गत्वा षट्सूर्ये लभते फलम् ॥ मध्याह्ने च तथा देवं फलप्रियमकल्मषम् ॥ ३९ ॥ मथुरायां च मध्याह्ने मध्यन्दिनरवौ तथा ॥ अस्तङ्गते तथा देवं सद्यो राज्यफलं भवेत् ॥ ४० ॥ मथुरायां तथा पुण्यमुदयास्तं रवेर्जपन् ॥ मध्याह्ने प्रयतो वाग्भिः जपन्मुच्येत पातकात् ॥ ४१ ॥ कृष्णगङ्गोद्भवे स्नात्वा सूर्यमाराध्य यत्नतः ॥ सर्वपापविनिर्मुक्तः कुष्ठाद्भिश्यो विमुच्यते ॥ ४२ ॥ श्रीवराह उवाच ॥ ततः साम्बो महाबाहुः कृष्णाज्ञतो ययौ पुरीम् ॥ मथुरां मुक्तिफलदां रवेराराधनोत्सुकः ॥ ४३ ॥ नारदोक्तेन विधिना सांबो जांबवतीसुतः ॥ षट्सूर्यान्पूजयामास उदयन्तं दिवाकरम् ॥ ४४ ॥ कृत्वा योगेन चात्मानं सांबस्याग्रे रविस्तदा ॥ वरं वृणीष्व भद्रं ते मद्भक्तव्यापनाय च ॥ ४५ ॥ यस्तोषितो नारदेन तद्वदस्व ममाग्रतः ॥ सांब पंचाशकैः श्लोकैर्वेदगुह्यपदाक्षरैः ॥ ४६ ॥ यः स्तुतोऽहं त्वया वीर तेन तुष्टोऽस्मि ते सदा ॥ स्पृष्टो देवेन सर्वाङ्गे तत्क्षणादीप्तसच्छविः ॥४७॥ व्यक्तांगावयवः साक्षाद्वितीयोऽभूद्रविर्यथा ॥ मध्याह्ने याज्ञवल्क्यस्य यज्ञं माध्यन्दिनीयकम् ॥४८॥ अध्यापयत्सांबयुतो रविर्माध्यन्दिनोऽभवत् ॥ वैकुण्ठपश्चिमे पार्श्वे तीर्थं माध्यन्दिनीयकम् ॥ ४९ ॥ स्नात्वा मध्यन्दिनं दृष्ट्वा सर्वपापैः

॥१८६॥

प्रमुच्यते ॥ उदयास्ते ततो देवः सांबेन सहितो विराट् ॥ ५० ॥ सायाह्ने कृष्णगंगाया दक्षिणे संस्थितस्तदा ॥ तत्र दृष्ट्वा तु सायाह्ने रविमस्तोदयं प्रभुम् ॥ ५१ ॥ सर्वपापविशुद्धात्मा परं ब्रह्माधिगच्छति ॥ श्रीवराह उवाच ॥ एवं सांबस्य तुष्टेन मध्याह्ने तु नभस्तलात् ॥ ५२ ॥ द्विधाकृतात्मथेगेन सांबकुष्ठमपोहितम् ॥ साम्बः प्रख्याततीर्थे तु तत्रैवान्तरधीयत ॥ ५३ ॥ सांबस्तु सह सूर्येण रथस्थेन दिवानिशम् ॥ रविं पप्रच्छ धर्मात्मा पुराणं सूर्यभाषितम् ॥ ५४ ॥ भविष्यमिति विख्यातं ख्यातं कृत्वा पुनर्नवम् ॥ सांबः सूर्यप्रतिष्ठां च कारयामास तत्त्ववित् ॥ ५५ ॥ उदयाचलमाश्रित्य यमुनायाश्च दक्षिणे ॥ मध्ये कालप्रियं देवं मध्याह्ने स्थाप्य चोत्तमम् ॥५६॥ मूलस्थानं ततः पश्चादस्तमानाचले रविम् ॥ स्थाप्य त्रिमूर्त्तिं सांबस्तु प्रातर्मध्यापराह्णिकम् ॥ ५७ ॥ मथुरायां तथा चैकं स्थाप्य सांबो वसुन्धरे ॥ स्वनाम्ना स्थापयामास पुराणविधिना स्वयम् ॥ ५८ ॥ एवं सांबपुरं नाम मथुरायां कुलेश्वरम् ॥ रथयात्रां तथा कृत्वा रविणा कथिता यदा ॥ ५९ ॥ माघमासस्य सप्तम्यां दिव्यं सांबपुरं नराः ॥ रथयात्रां प्रकुर्वन्ति सर्वद्वन्द्वविवर्जिताः ॥ ६० ॥ गच्छन्ति तत्पदं शान्तं सूर्यमण्डलभेदकम् ॥ एतत्ते कथितं देवि सांबशापतमुद्भवम् ॥ ६१ ॥ पापप्रशमनाख्यानं महापातक नाशनम् ॥ ६२ ॥ इति श्रीवराहपुराणे साम्बवचनत्रयसूर्यप्रतिष्ठानं नाम सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥ श्रीवराह उवाच ॥ शत्रुघ्नेन पुरा घोरो लवणः सूदितो यथा ॥ द्विजानुग्रहकामार्थमन्नमुत्स्वरूपिणम् ॥ १ ॥ द्वादश्यां मार्गशीर्षस्य उपोष्य नियतः शुचिः ॥ यः करोति वरारोहे शत्रुघ्नचरितं यथा ॥ २ ॥ द्विजानां प्रीणनं कृत्वा स्वयान्नपटुभोजनैः ॥ लवणस्य वधादेव शत्रुघ्नस्य शरीरके ॥ ३ ॥ हर्षस्तु तुमहाञ्जातो रामस्याक्लिष्टकर्मणः ॥ अयोध्यायाः समायातो रामः सबलवाहनः ॥ ४ ॥ महोत्सवं च कर्त्तुं स शत्रुघ्नस्य महात्मनः ॥ सिता नाम्नी सुता प्राप्य मथुरां लवणान्तकः ॥ ५ ॥ एकादश्यां सोपवासः स्नात्वा विश्रान्तिसंज्ञके ॥ कृत्वा महोत्सवं तत्र कुटुम्बसहितः पुरा ॥ ६ ॥ तस्मिन्भुक्त्वा यथाकामं ब्राह्मणान्वै प्रतर्प्य च ॥ तस्मिन्नृनि तत्रैव यः कुर्यात्स महोत्सवम् ॥ ७ ॥ सर्वपापाद्विनिर्मुक्तः पितृभिः सह मोदते ॥ स्वर्गलोके चिरं कालं यावास्थित्यन्तजन्मनः ॥ ८॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये शत्रुघ्नलावणे रामतीर्थयात्रायामष्टसप्तत्यधिकशततमोऽ

ध्यायः ॥ १७८ ॥ धरण्युवाच ॥ तवापराधादेवेश कथ्योऽयं वैष्णवेन च ॥ विनापराधो मनुजः सापराधश्च जायते ॥ १ ॥ कर्मणाचरणेनेदा करणेन जुगुप्सितः ॥ तच्च पूजाफलं सर्वं ज्ञायते तद्वदस्व मे ॥ २ ॥ श्रीवराह उवाच ॥ कर्मणा मनसा वाचा ये पापरुचयो जनाः ॥ भक्षणं दन्तकाष्ठस्य राजान्नस्य तु भोजनम् ॥ ३ ॥ मैथुनं शवसंस्पर्शं पुरीषोत्सर्गमेवच ॥ सूतक्युदक्ययोश्चैव च स्पर्शनं मेहनं तथा ॥ ४ ॥ अभाष्य भाषणं चैव पिण्याकस्य च भक्षणम् ॥ रक्तपात्रस्यमलिनवस्त्रधारित्वनीलिजम् ॥ ५ ॥ गुरोश्चालीकनिर्बन्धः पतितान्नस्य भक्षणम् ॥ अभक्ष्य भक्षणं चैव तण्डुलीयविभीतकम् ॥ ६ ॥ अदानं तु वरान्नस्य जालपादवराकयोः ॥ भक्षणं देवतागारे सोपानत्कोपसर्पणम् ॥ ७ ॥ तथैव देव पूजायां निषिद्धकुसुमार्चनम् ॥ अनुत्तार्य च निर्माल्यं पूजा क्षीणान्धकारयोः ॥ ८ ॥ पानं सुरायां देवस्य अन्धकारे प्रबोधनम् ॥ तावत्कर्मा र्चने विष्णोरनमस्करणं तथा ॥ ९ ॥ अपराधास्त्रयस्त्रिंशत्समाख्याता मया धरे ॥ एभिर्युक्तस्तु पुरुषो विष्णुं नैव प्रपद्यति ॥ १० ॥ दूरस्थो न नमस्कारं कुर्यात्पूजा तु राक्षसी॥एकरात्रं द्विरात्रं वा त्रिरात्रं स्नानमेव च ॥ सवासाः पंचगव्याशी मलसंवस्त्रकं क्रमात् ॥११॥नीलीरक्षापनोदार्थं गोमयेन प्रघर्षणम् ॥ प्राजापत्येन शुद्धिः स्यान्नीलीवस्त्रस्य धारणात् ॥ १२ ॥ चान्द्रायणद्वयं कुर्याद्धरोः क्षयितसुत्तमम् ॥ चान्द्रायणं पराकं च पतितान्नस्य भक्षणात् ॥ १३ ॥ चान्द्रायणं पराकं च प्राजापत्यं तथैव च ॥ गोप्रदानं च भोज्यं च अभक्ष्यस्य च भक्षणे ॥ १४ ॥ उपवासस्तु पंचाहं पंचगव्येन शुद्ध्यति ॥ सोपानत्कश्चरेत्पादं कृच्छ्रस्य द्विरभोजनम् ॥१५॥ पुष्पाभावेऽर्चनं स्नानं देवस्पर्शं च कारयन् ॥ अनिर्माल्यनम स्कारं स्नानं पंचामृतेन तु ॥ १६ ॥ सुरापाने द्विजातीनां चान्द्रायणचतुष्टयम् ॥ तथैव द्वादशाब्दं तु प्राजापत्यत्रयं चरेत् ॥ १७ ॥ ब्रह्मकूर्चेन शुद्धिः स्याद्गोप्रदानत्रयेण च ॥ त्रयाणामेकरात्रेण पंचामृतानिषेवणात् ॥ १८ ॥ मुच्यते त्वपराधैस्तु तथा विष्णोः स्तवं पठन् ॥ एतत्ते कथितं गुह्यं किमन्यच्छ्रोतुमिच्छसि ॥ १९ ॥ पुनः पुनरुवाचेदं देवदेवो जनार्दनः ॥ मोहङ्गता तु शृणुते नष्टसंज्ञेव लक्ष्यते ॥ २० ॥ मुहूर्त्तमात्रे सा देवी संज्ञां प्राप्येदमब्रवीत् ॥ अपराधे कृते देव सूतकं हि प्रजायते ॥ २१ ॥ प्रायश्चित्तानि भूरीणि कृतानि तु नरैः सदा ॥ तेन मे मनसो मोहा दुःखदो यः समभ्ययात् ॥ २२ ॥ अस्ति कश्चिदुपायोऽत्र येन त्वं नृषु तुष्यसि ॥ पूजितः सफलश्चासि अपराधविशोधनम् ॥ २३ ॥

श्रीवराह उवाच ॥ संवत्सरस्य मध्ये तु तीर्थे सौकरवे मम ॥ कृतोपवासः स्नानेन गंगायां शुद्धिमाप्नुयात् ॥ २४ ॥ मथुरायां तथाप्येवं सापराधः शुचिर्भवेत् ॥ अनयोस्तीर्थयोरेवं यः सेवेत सकृन्नरः ॥ २५ ॥ सहस्रजन्मसु कृतानपराधान्हरति सः ॥ स्नानात्पानात्तथा ध्यानात्कीर्त्तना द्धारणात्तथा ॥२६॥ श्रवणान्मननाच्चैव दशनाद्याति पातकम् ॥ पृथिव्युवाच ॥ मथुरा सूकरं चैव द्वावेतौ तव वल्लभौ ॥ २७ ॥ विशिष्टमनयोः किंच सत्यं ब्रूहि सुरेश्वर ॥ श्रीवराह उवाच ॥ पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ॥ २८ ॥ कुञ्जाम्रकं प्रशंसन्ति सदा मद्भावभाविताः ॥ तस्मात्कोटिगुणं गुह्यं सौकरं तीर्थमुत्तमम् ॥२९॥ एकाहं मार्गशीर्ष्यां च द्वादश्यां सितवेष्णवम् ॥ गंगासागरिकं नाम पुराणेषु च पठ्यते ॥३०॥ गुह्याद्गुह्यतरं पुण्यं माथुरं मम मण्डलम् ॥ फलं परार्द्धगुणितं सिततीर्थान्न संशयः ॥ ३१ ॥ अटित्वा सर्वतीर्थानि कुञ्जाम्रादीनि नित्यशः ॥ अर्घं विनश्यते क्षिप्रं मथुरामागतस्य च ॥ ३२ ॥ विश्रमणाच्च विश्रान्तिस्तेन संज्ञा वरा मम ॥ सारात्सारतरं स्नानं गुह्यानां गुह्य मुत्तमम् ॥ ३३ ॥ गतिरन्वेषणीयानां मथुरा परमा गतिः ॥ कुञ्जाम्रके सौकरे च मथुरायां विशेषतः ॥ ३४ ॥ विना सांख्येन योगेन मुच्यते नात्र संशयः ॥ या गतिर्योगयुक्तस्य ब्राह्मणस्य मनीषिणः ॥ ३५ ॥ सा गतिस्त्यजतः प्राणान्मथुरायां न संशयः ॥ एतत्ते कथितं सारं मया सत्येन सुव्रते ॥ न तीर्थं मथुराया हि न देवः केशवात्परः ॥ ३६ ॥ इति श्रीवराहपुराणे मथुरामाहात्म्ये अपराधप्रायश्चित्तमाहात्म्यं नाम ऊना शीत्यधिकशततमोऽध्यायः॥१७९॥ श्रीवराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि पितॄणां तृप्तिकारकम् ॥ ध्रुवतीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे ॥ १ ॥ अस्यां पुर्यां तु राजासीद्धार्मिकः सत्यविक्रमः॥चन्द्रसेनेति नाम्ना च यज्वा दानहिते रतः॥२॥ तस्य नार्यः शते द्वे तु कुलशीलवयोयुते ॥ तासां मध्येऽधिका चेका पतिव्रतपरायणा॥३॥ नाम्ना चन्द्रप्रभा चैव वीरसूर्वीरपुत्रका ॥ तस्या दासीशतस्यैका दासी नाम्ना प्रभावती ॥ ४ ॥ तस्याः परिग्रहास्त्वेकोदिष्टाचारविहीनकाः ॥ तस्याः पितृगणाः सर्वे अतीताः शतसंख्यया ॥५॥ स्वदोषैः पतिताः सर्वे नरकं प्रति भामिनि ॥ संकरो नरकायैव कुलघ्नानां कुलस्य हि ॥ ६ ॥ कदाचिदपि तस्याथो भ्रष्टः प्राणिजनो महान् ॥ सूक्ष्मः प्राणिसमूहो हि ध्रुवतीर्थे तदापतत् ॥ ७ ॥ कृष्णरूपाश्चंक्रमन्तो मशकाकारसन्निभाः ॥ दृष्टास्ते ऋषिणा तत्र त्रिकालज्ञेन भामिनि ॥ ८ ॥ षष्ठान्नकालभोक्ता पयोव्रतेन महात्मना ॥ मानै

व्रतेन सा देवि सूर्यगत्या स्थितेन च ॥९॥ तस्मिन्क्षणे न च कृतं व्रतं जप्यं विमोहनात् ॥ कृपया परिभूतस्य कौतुकेन निरीक्षता ॥१०॥
चतुर्थ्यांशावशेषश्च दिवसः पर्यवर्तत ॥ एके तत्र समायान्ति पितरो नभसोऽवनिम् ॥ ११ ॥ अन्ये पूर्वोत्तरादेशादक्षिणात्पश्चिमात्तथा ॥ केचित्स्वभावतो दृष्टाः केचित्पुत्रैः स्वधाकृताः ॥ १२ ॥ हृष्यास्तुष्टाः सुपुष्टांगा गच्छन्तो दिवि सङ्कुलाः ॥ तपास्विनः स्नानरता रूक्षाः क्षामशरीरिणः ॥ १३ ॥ वस्त्रालङ्कारपुष्टांगा दृष्ट्वा गच्छन्ति संवशाः ॥ तथाऽपरे नग्नदेहाः सुदुष्टा यान्ति तत्र वै ॥ १४ ॥ अन्ये यथागतं यान्ति आयान्ति पुनरेव हि ॥ यानैरुच्चावचैः केचिन्नानारूपैः खगैस्तथा ॥ १५ ॥ समागच्छन्ति गच्छन्तीत्यन्तश्चाशिषो मुदा ॥
केचिद्यथागता यान्ति कुद्धाः शापप्रदायिनः ॥ १६ ॥ निर्गतोदग्सूक्ष्मश्च गच्छन्ति सुविमानिताः ॥ सम्मानितास्तथान्ये तु पितरः श्राद्ध पूजिताः ॥ १७ ॥ महोत्सवमिवालक्ष्य विस्मितो मुनिरुत्थितः ॥ गते पितृगणे पुत्राः सकलत्रा गृहान्ययुः ॥ १८ ॥ निर्जनं ध्रुवतीर्थं तु वृत वेलमिवाभवत् ॥ तत्रैकान्ते कृशांगोऽथ क्षुत्क्षामो गतिविह्वलः ॥ १९ ॥ वेपथुः कोटराक्षश्च पृथुरुग्रश्रुदूरः ॥ ऊरुचर्मास्थिरुक्वस्तो जृम्भमाणो भृशं कृशः ॥ २० ॥ न वाक्च श्रूयते तस्य क्षुद्रपक्षिरवो यथा ॥ को भवान्विकृताकारो वेष्टितो मशकैर्बहु ॥ २१ ॥ न गच्छसि यथास्थानमागतस्तु निरुद्यमः ॥ यथावत्पृच्छते मह्यं कथयात्मविचेष्टितम् ॥ २२ ॥ ममाद्य नैत्यकं कर्म तीर्थेऽस्मिन्नश्यतेऽनिशम् ॥
इमानुचावचान्नूनं दृष्ट्वा मां मोह आविशत् ॥ २३ ॥ त्वां दृष्ट्वेदृक्स्वरूपं च क्रिया मे सा गता त्वयि ॥ विश्रब्धः कथयास्माकं करोमि च हितं तव ॥ २४ ॥ जन्तुरुवाच ॥ बृहन्नित्यमतीवैव पितॄणां तृप्तिकारकम् ॥ ध्रुवतीर्थं च यः श्राद्धं पुनः कुर्यात्तिलोदकम् ॥ २५ ॥
तिलतृप्ता दिवं यान्ति पितरस्तेन पुत्रिणः ॥ सोऽहं स्वान्तरिकादत्तस्तृप्त्यर्थस्तु बुभुक्षितः ॥ २६ ॥ योनिसंकरदोषेण नरकं समुपाश्रितः ॥
आशापाशशतैर्बद्धः शतवर्षैरिहागतः ॥ २७ ॥ अगतिर्गमने मे स्यात्ते त्रितापैः समागतः ॥ सन्तानैः पुष्टवपुषो दत्तश्राद्धैः कृतोदकैः ॥२८॥
बलयुक्ता ययुः स्वर्गं निर्बलस्य कुतो गतिः ॥ येषां सन्ततिरक्षय्या तिष्ठत्येवं प्रजावती ॥ २९ ॥ ते स्वधाघूर्जितैः पुत्रैर्गच्छन्ति परमां गतिम् ॥ अद्य राज्ञस्तु पितरश्चन्द्रसेनस्य पूजिताः ॥ ३० ॥ दृष्टास्त्वया त्रिकालज्ञ दिव्यदृष्ट्या दिवं गताः ॥ ब्राह्मणानां च वैश्यान,

शूद्राणां पितरस्तथा ॥ ३१ ॥ प्रतिलोमानुलोमानां शूद्राणां श्राद्धकार्मणाम् ॥ सर्वेषां च त्वया दृष्टं येषां सन्ततिरव्यया ॥ ३२ ॥ एवं पृष्टः स विप्रेण कथयामास कारणम् ॥ पुनः पप्रच्छ तं जन्तुः कौतूहलसमन्वितः ॥ ३३ ॥ तवापि सन्ततिस्तात नास्ति दैवाद्यथोचिता ॥ यदि कश्चिदुपायोऽत्र मह्यं तव हितौषिणे ॥ ३४ ॥ वद सर्वं करिष्यामि यदि सत्यं वचो मम ॥ ततः स कथयामास दुःस्थः पितृगणैर्वृतः ॥३५॥ इमे ये मम देहे तु भवन्ति मशकाः कृशाः ॥ सन्तानप्रक्षयाद्देते मम देहं समाश्रिताः ॥ ३६ ॥ तन्तुमन्त्रमहं तेषां मम तन्तुमयी सकृत् ॥ आस्ते नगर्यां मध्ये तु चन्द्रसेनस्य वेश्मनि ॥३७॥ महिष्याः प्रेषणे नित्यं दासी नाम्ना प्रभावती ॥ तस्या दासी कर्मकरी विरूपनिधिनामतः ॥३८॥ अस्माकं सन्ततेस्तन्तुस्तस्य श्राद्धकृते वयम् ॥ आशया बद्धहृदयाः श्राद्धतर्पणहेतवः ॥ ३९ ॥ स्थिता एतावदेवं तु कालं यास्यामहेऽम्बुधौ ॥ नरके त्वप्रतिष्ठे तु निराशाः स्वेन कर्मणा ॥ ४० ॥ श्रुत्वैतत्स त्रिकालज्ञो मोहाविष्टोऽब्रवीदिदम् ॥ कथं निकृष्टयोन्या यद्दत्तं चापद्यते हविः॥४१॥ विधिरत्र कथं तस्या येन यूयं सपुत्रिणः ॥ प्रोवाच स त्रिकालज्ञं ज्ञानक्लिष्टं कृपान्वितम् ॥४२ ॥ पूर्वकर्मावृतेनेह यां यां गतिमधोमुखीम् ॥ ऊर्ध्वां यां चापि पितरः पुत्रिणः पुत्रमर्हते ॥ ४३ ॥ श्राद्धं पिण्डोदकं दानं नित्यं नैमित्तिकं तथा ॥ नान्या गतिः पितॄणां स्यात्पितरस्तेन पुत्रिणः॥४४॥अपि स्यात्स कुलेऽस्माकं यो नो दद्याज्जलाञ्जलिम् ॥ नदीषु बहुतोयासु शीतलासु विशेषतः ॥ ४५ ॥ विशेषात्तीर्थमध्ये तु तिलमिश्रं जलाञ्जलिम् ॥ रोध्यजुष्टजलेनाथ नाभिदघ्ने जले स्थितः ॥ ४६ ॥ दर्भपाणिस्त्रिस्त्रिगोत्रे पितृनाम समुच्चरन् ॥ तृप्यत्वेवं नाम शर्म स्वधाकारमुदाहरन् ॥ ४७ ॥ आदावेकाञ्जलिर्द्वे तु तिस्रोवै तर्पणे स्मृताः ॥ देवर्षिपितृतर्पणानां क्रमाज्ज्ञेयं विचक्षणैः ॥ ४८ ॥ तृप्यध्वामिति चान्ते वै मन्त्रं मन्त्रप्रतिक्रियाः ॥ उदीरतामाङ्गिरस आयन्तु न इतीरयेत् ॥ ४९ ॥ पित्रे प्रथमतो दद्यान्मात्रे दद्यात्तथाचरन् ॥ गोत्रं माता नाम देवी तृप्यत्वेवं स्वधोच्चरन् ॥ ५० ॥ एवं मातामहः शर्मा गोत्रे पितामहस्तथा ॥ ऊर्ध्वं पितृभ्यो ये चेह ते पितर इहोच्यते ॥ ५१ ॥ मधुवातेतयृचं तद्भूत्पूर्ववत्समुदीरयेत् ॥ पितामहीं प्रपितामहीं पत्न्या मातृवत्स ह ॥ ५२ ॥ एवं मातामहानां च पूर्ववत्क्रमशो बुधः ॥ नमो व इति मन्त्रेण प्रत्येकं त्रितयं त्रिषु ॥ ५३ ॥ गोत्रोच्चारं प्रकुर्वीत असूर्याम्नाशयामहे ॥ गोत्राय पित्रे महाय शर्मणे

चेदमासनम् ॥ ५४ ॥ गोत्रायै मात्रे मह्यै तु देव्यै चासनकर्मणि ॥ गोत्रः पितामहः शर्मा गोत्रा मातामही मही ॥ ५५ ॥ अर्घ्यपात्रसंकल्पे तु पिण्डदानेऽवनेजने ॥ गोत्रस्य पितुर्महस्य शर्मणोक्तस्य कर्मणि ॥५६ ॥ गोत्रायै मातुर्महायै देव्याश्चाज्ञयकर्मणि ॥ आवाहने द्वितीया च चतुर्थी पूज्यकर्मणि ॥ ५७ ॥ प्रथमा चाशिषि प्रोक्ता दत्तस्याक्षय्यकारिका ॥ श्राद्धपक्षे तथा षष्ठी अक्षय्यासनयोः स्मृता ॥ ५८ ॥ पितुरक्षयकाले तु पितृणां दत्तमक्षयम् ॥ एवमेतत्तु पुत्रेण भक्तिपूर्वं द्विजेन तु ॥ ५९ ॥ वार्यपि श्रद्धया दत्तं तदानन्त्याय कल्पते ॥ श्रद्धया ब्राह्मणेनैव यथा श्राद्धविधिक्रिया॥६०॥कृत्वा श्राद्धं तु पितरो हृष्टा मुमुदिरे सदा ॥ जोषमास्स्व त्रिकालज्ञ गच्छामो नरकाय वै॥६१॥पूर्वकर्मविपाकेन चिरं तु वसितुं मुने ॥ त्रिकालज्ञ उवाच ॥ ये मया चागता दृष्टास्तीर्थेऽस्मिन्पितरोऽथ वै ॥६२॥ बहवः स्वस्थमनसो बहवो दुःस्थमानसाः ॥ पुत्रदत्तं तथा श्राद्धं जग्राहोद्धिग्मरूपिणः ॥६३॥ मौनेन गच्छतां तेषां किमेतद्वद निश्चयम् ॥ अगस्तिरुवाच ॥ अत्र यन्निश्चयं श्राद्धे पुत्रस्य विफलं भवेत् ॥ ६४ ॥ नरस्य करणं किंचित्तन्मे निगदतः शृणु ॥ अदेशकाले यद्दत्तं विधिहीनमदक्षिणम् ॥६५॥ अपात्रे मलिनं द्रव्यं महत्पापाय जायते ॥ अश्रद्धेयमपाङ्क्तेयं दुष्टप्रेक्षितमीक्षितम् ॥ ६६ ॥ तिलमन्त्रकुशैर्हीनमासुरं तद्भवेदिति ॥ वैरोचनाय देवेन वामनेन विभूतये ॥ ६७॥ सच्छूद्रस्य च श्राद्धस्य फलं दत्तं पुरा किल ॥ तथा दाशरथी रामो हत्वा राक्षसमीश्वरम् ॥६८॥ रावणं सगणं घोरं तुष्टेन सह सीतया ॥ श्रुत्वा भक्तिं च राक्षस्याश्चिटायास्त्रिलोककृत् ॥६९॥ सीतावाक्यप्रतुष्टेन तस्यै प्रादाद्वरं विभुः ॥ अशुचीनि गृहाण्येव तथा श्राद्धहवींषि च ॥७० ॥ क्रोधाविष्टानि दानानि विधिपात्रयुतानि च ॥ पाक्षिशौचमनभ्युक्षप्रतिश्रयमभोजनम् ॥ ७१ ॥ त्रिजटे त्वत्प्रयच्छामि यच्च श्राद्धमदक्षिणम् ॥ तथैव शम्भुना दत्तं नागराजाय भक्तितः ॥ ७२ ॥ तुष्टेन वै वासुकये तन्मे निगदतः शृणु ॥ अनुज्ञाप्य व्रतं जन्तुर्वापिकी सकला क्रिया ॥ ७३ ॥ यज्ञस्य योचिता देया दक्षिणा नाददाद्विजः ॥ वृथाशपथकारी यो देवब्राह्मणसन्निधौ ॥ ७४ ॥ अश्रोत्रियाणि श्राद्धानि क्रिया मन्त्रैर्विनापि च ॥ रात्रौ सवाससा स्नानं यथासत्त्वस्वरूपतः ॥ ७५ ॥ यः शिष्यो न नमेद्दत्त्या गुरुं ज्ञानप्रदायकम् ॥ तथैव प्राकृतं धर्ममशेषं करिष्यतः ॥ ७६ ॥ सर्वं तुभ्य मया दत्तं नागराजाय वाापकम् ॥ इत्येतद्वै पुराणेषु सेतिहासेषु पठ्यते ॥ ७७ ॥ तद्वदर्लीककरणं श्राद्धं

व्रतं व्रतं तथा ॥ नोपतिष्ठति तेषां वै तेन नन्नादयस्त्वमी ॥ ७८ ॥ मुषिताच्छिद्रकरणैस्तद्दानफलभोक्तृभिः ॥ यथा गतास्तथा ते तु श्राद्धे हृतास्तु निष्फलाः ॥७९ ॥ मौनव्रतधरा यान्ति पुनः प्राप्यार्थहेतवे ॥ एवमेतन्महाप्राज्ञ यन्मां त्वां परिपृच्छसि ॥ ८० ॥ त्रिकालज्ञ उवाच ॥ षट्काले भोजनं त्वद्य नाहं भोक्तुमिहोत्सहे ॥ यावत्तृप्तिर्न ते भूयादृङ्मा इन्त स्थिरोभव ॥ ८१ ॥ तावत्कालं प्रतीक्षस्व यावदागमनं मम ॥ अस्मिंस्तीर्थे सदैवाहं दिवारात्रमतन्द्रितः ॥ ८२ ॥ सोऽहमद्य व्रतं त्यक्त्वा तव कारुण्यपूरितः ॥ गत्वाहमानयिष्यामि त्वयोक्तां तां वरां स्त्रियम् ॥ ८३ ॥ अनया कारयिष्यामि श्राद्धं तु विधिना सह ॥ एवमुक्त्वा स षड्राशी मौनवाक्संयमो द्रुतम् ॥ राजा समीपगं दृष्ट्वा अकस्मादागतं ऋषिम् ॥ ८४ ॥ क्षितिरास्तले विलुलितः पादौ कृत्वा तु मूर्द्धनि ॥ धन्योऽस्म्यनुगृहीतोऽस्मि यद्भवान्गृहमागतः ॥ ८५ ॥ सदा यज्ञं करिष्यामि गृहमागमनं तव ॥ अद्य मे सफलं जन्म यद्भवांस्त्वमिहागतः ॥ ८६ ॥ इदं पाद्यमिदं चार्घ्यं मधुपर्कमिमां च गाम् ॥ गृहाण मुनिशार्दूल येनाहं शान्तिमाप्नुयाम् ॥ ८७ ॥ तस्य तत्प्रतिगृह्याशु स मुनिस्त्वरितोऽब्रवीत् ॥ मदीयागमने राजन् शृणु त्वं कारणं महत् ॥ ८८ ॥ तच्छ्रुत्वा कुरु तत्सर्वं येनाहं तोषितोऽभवम् ॥ एवमुक्तस्तु राजर्षिस्त्रवीत्तं तपोधनम् ॥ ८९॥ किं तद्वद यथाकार्यं येन सिद्धं भवेदिदम् ॥ त्रिकालज्ञ उवाच ॥ या सा ते राजमहिषी तामानय वरानने ॥ ९० ॥ तस्या दासी वरारोहा प्रभावत्यपि विश्रुता ॥ सापि देव्या तु सहिता आयातु मम सन्निधौ ॥ ९१ ॥ ततश्चान्तःपुरादेवी सदासी तत्र चागता ॥ क्षितौ विलुलिता साध्वी प्रणाममकरोद्दधेः ॥९२ ॥ समासीनां च विप्रेन्द्रः प्रोवाच विननाननाम् ॥ ध्रुवतीर्थे मयाश्चर्यं यद्दृष्टं कथयामि वः ॥९३॥ ये केचित्पितरो लोके लोकानां सर्वतः स्थिताः॥ ये पूजिताः श्राद्धकृद्भिः पुत्रैः प्रीता दिवं ययुः ॥ ९४ ॥ एको वृद्धो नरस्तत्र सूक्ष्मप्राणिभिरावृतः ॥ क्षुत्क्षामदेहः शुष्कास्यो निर्गतोदरसूक्ष्म दृक् ॥ ९५ ॥ निराशो गन्तुकामश्च पुनः स निरयेऽशुचौ ॥ कारुण्यात्स मया पृष्टः कस्त्वं ब्रूहि किमिच्छसि ॥ ९६ ॥ तेनात्मकर्मजनितं मम कर्म निवेदितम् ॥ ततस्तत्रैव तच्छ्रुत्वा तस्य कारुण्यान्वितः ॥ ९७ ॥ तव दास्याश्च या दासी तस्यास्तन्तुः किलोच्यते ॥ नाम्ना विरूपक निधिस्तामानय वरानने ॥ ९८ ॥ इति श्रुत्वानवद्याङ्गी तस्या आनयनेऽत्वरत् ॥ प्रेषयामास सर्वत्र तस्या आनयने बहून् ॥ ९९ ॥ सा

चेकान्ते च दिवसे पानमांसरता सदा ॥ पुरुषेण सहासीना शय्यायां मदविह्वला ॥ १०० ॥ सेवकैः सा करे गृह्य आनीता मुनिसन्निधौ ॥ तां दृष्ट्वा मादृशमतां स मुनिः प्राह धर्मवित् ॥ १०१ ॥ प्रत्यथार्थं तु तस्या वै मुनिः प्राह क्रियां प्रति ॥ पितॄणां च कृते दत्तं दानं वारि न वा स्वधा ॥ १०२ ॥ तर्पणं चापि नो दत्तं पितॄणां चातिमुक्तिदम् ॥ सा नैवामित्युवाचेदं तं मुनिं संशितव्रतम् ॥ १०३ ॥ न जानामि पितॄन्वान्ये क्रियां कार्यं च वै विभो ॥ इति ब्रुवाणां तां दासीं त्रिकालज्ञोऽभ्युवाच ह ॥ १०४ ॥ पत्नी च मथुरेशस्य नृपः सपुरसज्जनः ॥ सर्वे द्रक्ष्यथ माहात्म्यं पितॄणां सन्ततेः फलम् ॥ १०५ ॥ सकौतुका महाभागाः श्राद्धदानं च नैव ह ॥ नगरस्थाश्च ते सर्वे ब्राह्मणा भावपूजिताः ॥ १०६ ॥ राज्ञानीतास्तत्र तीर्थे श्राद्धार्थं मुनिना सह ॥ लोकैः परिवृतो राजा ध्रुवतीर्थं गतः प्रभुः ॥ १०७ ॥ तत्र दृष्टः स वै जन्तुर्न च तन्तुर्विचेतनः ॥ मशकैर्वेष्टितः क्षुद्रैः क्षुधया चातिपीडितः ॥ १०८ ॥ उवाच तं तदा विप्रोऽभवत्सन्तानजाः स्त्रियः ॥ आनीतास्तव पुष्टयर्थं यथेच्छसि तथा कुरु ॥१०९॥ अगस्त्य उवाच ॥ स्नात्वैषा ध्रुवतीर्थे तु ब्रह्मणोक्तकमेण च॥करोतु तर्पणं चास्मिन्पूर्वोक्तविधिना त्वियम् ॥११०॥ततः श्राद्धं सरौप्यं च सवस्त्रं सविलेपनम्॥आचैत्या पिण्डदानेन करोत्वेषा च भक्तितः॥१११॥ अत्रैव सर्वे स्थित्वा वै मामीक्षध्वं सुखान्विताम् ॥ कारयित्वा यथासर्वं श्राद्धदानं हि तन्तुना॥११२॥तस्य तद्वचनं श्रुत्वा राजपत्नी यशस्विनी॥कार्यामास दास्या वै श्राद्धं सुबहुदक्षिणम् ॥११३॥पट्टवस्त्रं तथा धूपं कर्पूरागुरुचन्दनम्॥तिलोत्तरं तथान्नं च बहुरूपं सपिण्डकम् ॥११४॥कृते श्राद्धे पिण्डदाने स जन्तुः सुकृती यथा ॥दिव्यकान्तिरदीनात्मा तथाभूतैः पृथक् पृथक् ॥११५॥ वेष्टितः शुशुभेऽतीव दीक्षितोऽवभृथे यथा ॥ स्वर्गोगतोर्विमानैश्च छादितैः तत्र वै नभः॥११६॥ तेषां मशकगात्राणां सुगात्राणां सुरूपिणाम्॥ततस्तुष्टमना जन्तुर्विमानं प्रेक्ष्य चागतम्॥११७॥ गन्तुं स्वर्गसुवाचेदं त्रिकालज्ञं मुनिं नृपम्॥ शृण्वन्तु वचनं सर्वे मदीयं पितृतुष्टिद ॥११८॥ तीर्थानि सरितः श्रेष्ठाः पर्वताश्च सरांसि च ॥ कुरुक्षेत्रं गया चैव स्थानान्यायतनानि च ॥११९॥ पितॄणां मुक्तिदं चान्यन्न भूतं न भविष्यति ॥ आपाढ्याः पञ्चमे पक्षे प्रतिपन्प्रभृतित्वथ ॥ १२० ॥ शुक्लप्रतिपदन्तं च तीर्थे प्राप्य ससत्वराः ॥ पितरः श्राद्धपिण्डादा आश्विने ध्रुवमास्थिताः ॥ १२१ ॥ कृत्वा प्रेतपुरीं शून्यां स्वर्गं पातालमेव च ॥ इहमानाः स्वकं पुत्रं गोत्रतन्तुमथानु ॥१९०॥

जम् ॥ १२२ ॥ कन्यां गते सवितरि यः श्राद्धं सम्प्रदास्यति ॥ तर्पणं ध्रुवतीर्थे ते पितॄणां षोडशान्तरे ॥ १२३ ॥ सुतृप्ताः स्मो वयं शश्वद्या स्यामः परमां गतिम् ॥ एष एव प्रभावोऽत्र ध्रुवस्य कथितो मया ॥ १२४ ॥ दृष्टो भवद्भिः सर्वे यदस्मार्कं सुदुरत्ययम् ॥ दुस्तरं तारितं पापं त्वत्प्रसादान्महामुने ॥ १२५ ॥ इति विश्राव्य वचनं राजानं स ऋषिं जनान् ॥ राजपुत्रीं तथा दासीं स्वां सुतां शिवमस्तु वः ॥१२६॥ आरुह्य वरयानं ते गताः स्वर्गं वृताः सुरैः ॥ श्रीवराह उवाच ॥ ततः स राजशार्दूलः सगणः परिवारकैः ॥ १२७ ॥ दृष्ट्वा तीर्थस्य माहात्म्यं प्रणम्य ऋषिसत्तमम् ॥ प्रविष्टो नगरीं रम्यां संस्मरन्नित्यमच्युतम् ॥ १२८ ॥ एतत्ते कथितं भद्रे माहात्म्यं मधुराभवम् ॥ स्मरणाच्चास्य पापानि नश्यन्ते पूर्वजन्मनि ॥ १२९ ॥ पठति श्रद्धया युक्तो ब्राह्मणानां च सन्निधौ ॥ स पितॄंस्तर्पयेत्सर्वानभिगम्य गयाशिरे ॥ १३० ॥ एतत्त्वयानाव्रतिने न चाशुश्रूषवे तथा ॥ कथनीयं महाभागे यश्च नाचेष्टते हरिम् ॥ १३१ ॥ तीर्थानां परमं तीर्थं धर्माणां धर्मसुत्तमम् ॥ ज्ञानानां परमं ज्ञानं लाभानां लाभ उत्तमः ॥ १३२ ॥ कथनीयं महाभागे पुण्याद्भागवतान्सदा ॥ सूत उवाच ॥ एतच्छ्रुत्वा प्रभोर्वाक्यं धरणी विस्मयान्विता ॥ १३३ ॥ पप्रच्छ मुदिता देवी प्रतिमास्थापनं प्रति ॥ १३४ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे मधुरावर्णनं नामाशीत्यधिकशततमोऽध्यायः ॥ १८० ॥ अथ मधुकाष्ठाप्रतिमायामर्चास्थापनम् ॥ सूत उवाच ॥ एवं श्रुत्वा परं स्थानं सा मही संशितव्रता॥ सर्वक्षेत्रविभागेषु यश्च वै परमो विधिः ॥ १ ॥ संश्रुत्य विस्मयाविष्टा प्रत्युवाच वसुन्धरा ॥ धरण्युवाच ॥ अहो क्षेत्रप्रभावो वै यस्त्वया समुदाहृतः ॥ २ ॥ यं श्रुत्वा देवतत्त्वेन जातास्मि विगतज्वरा ॥ एकं मे परमं गुह्यं यन्नित्यं हृदि वर्त्तते ॥ ३ ॥ मम प्रीत्यर्थमखिलं तद्विष्णो वक्तुमर्हसि ॥ कथं तिष्ठसि काष्ठेषु शैलदन्मयजेषु च ॥ ४ ॥ ताम्रे कांस्ये च रौप्ये च तिष्ठसि स्थापितः कथम् ॥ सौवर्णेषु च सर्वेषु तिष्ठसि स्थापितः कथम् ॥ ५ ॥ ब्रह्मचारी समासाद्य कथं तिष्ठसि माधव ॥ दन्तरत्ने समासाद्य कथं सन्तिष्ठते भवान् ॥ ६ ॥ कथं तिष्ठसि वा सद्मे भित्तिसंस्थो जनार्दनः ॥ भूमिसंस्थो महाभाग विधिदृष्टेन कर्मणा ॥ ७ ॥ एवं धरावचः श्रुत्वा प्रत्युवाचादिसूकरः ॥ श्रीवराह उवाच ॥ प्रतिमा यस्य कर्त्तव्या तदानीय वसुन्धरे ॥ ८ ॥ प्रतिमां कारयेच्चैव लक्षणोक्तां वसुन्धरे ॥ अर्चाशुद्धिं ततः कृत्वा प्रतिष्ठाप्य विधानतः ॥९॥

ततः सम्पूजयेद्देवि संसारभवमुक्तये ॥ तत्र काष्ठेषु मधुकमानीय च वसुन्धरे ॥ १० ॥ कृत्वा तत्प्रतिमां चैव प्रतिष्ठाविधिनार्चयेत् ॥ तांस्तु दद्यात्तु गन्धांश्च ये मया समुदाहृताः ॥ ११ ॥ कर्पूरं कुंकुमं चैव त्वचं चागुरुमेव च ॥ रसं च चन्दनं चैव सिल्हकोशीरकं तथा ॥ १२ ॥ एतैर्विलेपनं दद्यादर्चितस्तु विचक्षणः ॥ स्वस्तिकं वर्द्धमानं च श्रीवत्सं कौस्तुभं तथा ॥ १३ ॥ विधानपूर्वकं चैव मंगल्यं चैव पायसम् ॥ वर्त्ति स्तिलफलं चैव कर्मण्यानि न संशयः ॥ १४ ॥ एवं सर्वं ततो दद्यात्पूजायां विहितं शुभम् ॥ कर्मणा विधिदृष्टेन शुद्धो भागवतः शुचिः ॥ १५ ॥ प्राणायामं ततः कृत्वा इमं मन्त्रमुदीरयेत् ॥ योऽसौ भवांस्तिष्ठते च सर्वयोगप्रधानतः ॥ १६ ॥ ससम्भ्रमं लोके सुप्रतीतस्तिष्ठ काष्ठे स त्वं भुवि ॥ एवं संस्थापनं कृत्वा काष्ठस्य प्रतिमासु च ॥ १७ ॥ पुनः प्रदक्षिणीकृत्य शुद्धैर्भागवतैः सह ॥ प्रज्वाल्य दीपं तत्रैव चार्चायाः सम्मुखं स्थितः ॥ १८ ॥ नोर्द्धं न तिर्यगीक्षेत कामक्रोधविवर्जितः ॥ नमो नारायणायेति इमं मन्त्रमुदीरयेत् ॥ १९ ॥ कुर्यात्संस्करणं तेषां विधिदृष्टेन कर्मणा ॥ २० ॥ मन्त्रः—योऽसौ भवान्सर्वजनप्रवीर गतिः प्रभुस्त्वं वससि ह्यमोघ ॥ अनेन मन्त्रेण च लोकनाथ संस्थापितस्तिष्ठ च वासुदेव ॥ २१ ॥ सर्वामेवं ततः कृत्वा मम संस्थापनक्रियाम् ॥ पूज्या भागवताः सर्वे ये तत्र समुपागताः ॥ २२ ॥ गन्धमाल्यैरर्चयित्वा उपलेपैश्च भोजनैः ॥ कुर्यात्संस्करणं तेषां विधिदृष्टेन कर्मणा ॥ २३ ॥ एतत्कर्मविधानेन मधुकाष्ठस्य सुन्दरि ॥ धर्मसंस्थापनार्थाय एतत्ते कथितं मया ॥ २४ ॥ यस्त्वनेन विधानेन अर्चां काष्ठस्य स्थापयेत् ॥ स न गच्छति संसारं मम लोकं च गच्छति ॥ २५ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे मधुकाष्ठायां प्रतिमार्चास्थापनं नाम एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥ अथ शैलार्चास्थापनम् ॥ श्रीवराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ यथा तिष्ठामि शैलेषु प्रतिमायामितस्ततः ॥ १ ॥ सुरूपां च शिलां दृष्ट्वा निःशल्यां सुपरीक्षिताम् ॥ तत्र दक्षं रूपकारं शीघ्रं च विनियोजयेत् ॥ २ ॥ शीघ्रमालिख्य तं तत्र श्वेतवर्तिकया नरः ॥ प्रदक्षिणां ततः कृत्वा पूजयेद्दक्षतादिभिः ॥ ३ ॥ दीपकं च ततो दद्याद्बलिं दध्योदनेन च ॥ नमो नारायणायेति उक्त्वा मन्त्रमुदीरयेत् ॥ ४ ॥ मन्त्रः—योऽसौ भवान्सर्वजनप्रवीरः सोमाग्नितेजाः सुमनःप्रधानः ॥ एतेन मन्त्रेण तु वासुदेव प्रतिष्ठितो वर्द्धय कीर्तिराशिम् ॥ ५ ॥ प्रवर अयुतवराह जय

॥१९१॥

जय वर्द्धस्व ॥ अनेनैव तु मन्त्रेण कर्त्तव्यं यस्य यादृशम् ॥ एवंरूपं ततः कृत्वा देवं नारायणं प्रभुम् ॥ ६ ॥ ततो वै स्थापयेत्तत्र पूर्वाभिमुखमेव तु ॥ अहोरात्रमुषित्वैवं शुक्लवस्त्रेण भूषितः ॥ ७ ॥ शुक्लयज्ञोपवीती च कृत्वा वै दन्तधावनम् ॥ सर्वगन्धोदकं गृह्य इमं मन्त्रमुदाहरेत्॥८॥मन्त्रः–योऽसौ भवांस्तिष्ठति सर्वरूप मायावलं सर्वजगत्स्वरूपम् ॥ एतेन मन्त्रेण जगत्स्वरूप सम्पूजितास्तिष्ठति लोकनाथ॥९॥ करणधारणप्रवच्यमुदाहरणमपराजितमजरामर ॥ सम्पूज्य स्नापयात्मानमनेन मन्त्रेण ॐ नमो वासुदेवाय ॥एवं तु स्थापनं कृत्वा शिलायां मम सुन्दरि ॥ ततो ऽधिवासनं कार्यं पूर्वप्रोक्तपदासु च ॥ १० ॥ यो मां संस्थापयेद्भक्त्या मम कर्मपरायणः ॥ स याति वैष्णवं लोकं नात्र कार्या विचारणा ॥११॥ यावत्कं पायसं भुक्त्वा अहोरात्रं समापयेत् ॥ततः पश्चिमसन्ध्यायां दद्याच्चत्वारि दीपकान्॥१२॥ पंचगव्यं च गन्धं च वारिणा सह मिश्रयेत् ॥ चतुरः कलशांश्चैव स्थापयेत्पादमूलतः ॥ १३ ॥ गीतवाद्यैश्चयोषेण उत्सवं तत्र कारयेत् ॥ ब्राह्मणैः सामगैस्तत्र वेदघोषं तु कारयेत् ॥ १४ ॥ ब्रह्माक्षरसहस्राणि पठतां ब्रह्मवादिनाम् ॥ येषां पठितशब्देन शुभगीतस्वरेण च ॥ १५ ॥ आगामिष्याम्यहं देवि मन्त्रपाठो मम प्रियः ॥ निःशब्दं च ततः कृत्वा स्थाप्यो भागवतैः सह ॥१६॥ पुनराहाहनं कुर्यान्मन्त्रेणानेन सुव्रतः ॥ आगच्छ हे देव सुमन्त्रयुक्तः पंचेन्द्रियैः षट्सु तथा प्रधानः ॥१७॥ एतेषु भूतेषु च संविधाता आवासितास्तिष्ठति लोकनाथ ॥ १८ ॥ अनेनैव तु मन्त्रेण समित्तिलघृतेन च ॥ मधुना चैव होतव्यमष्टोत्तरशताहुतीः ॥ १९ ॥ एवं कृते विधाने भवामि सन्निहितः स्वयम् ॥ व्यतीतायां तु शर्वर्यां प्रभाते विमले ततः॥२० ॥ पंचगव्यं तत प्राश्य मन्त्रेण विधिपूर्वकम् ॥ सर्वगन्धैश्च लाजैश्च पंचगव्यजलं तथा ॥ २१ ॥ ततः प्रासादे स्थाप्योऽहं गीतवाद्यैरमङ्गलैः ॥ सर्वगन्धांस्ततो गृह्य इमं मन्त्रमुदाहरेत् ॥ २२ ॥ मन्त्रश्च–योऽसौ भवाँल्लक्षणलक्षितश्च लक्ष्म्या च युक्तः सततं पुराणः ॥ अत्र प्रासादे सुसमिद्धतेजाः प्रवेशमायाहि नमो नमस्ते ॥२३॥ तत एतेन मन्त्रेण प्रासादं संप्रवेशयेत् ॥ प्रतिमा स्थापितव्या मे मध्ये न तु विपार्श्वतः ॥ २४ ॥ एवं संस्थापनं कृत्वा दद्याद्गुद्धर्त्तनं विभोः ॥ चन्दनं कुंकुमं चैव मिश्रं कालेयकेन च ॥२५॥ एवं चोद्धर्त्तनं कृत्वा इमं मन्त्रमुदाहरेत् ॥ योऽसौ भवान्सर्वजगत्प्रधानः सम्पूजितो ब्रह्मबृहस्पतिभ्याम् ॥ प्रवन्दितः कारणं मन्त्रयुक्तः सुस्वागतं तिष्ठ सुलोकनाथ ॥ २६ ॥ एवं संस्थापनं कृत्वा गन्धमाल्यैश्च

पूजयेत् ॥ शुक्लवस्त्राणि मे दद्यादिमं मन्त्रमुदाहरेत् ॥ २७ ॥ मन्त्रः--वस्त्राणि देवेश गृहाण तानि मया सुभक्त्या रचितानि यानि ॥ इमानि तन्धारय विश्वमूर्ते प्रसीद मह्यं च नमो नमस्ते ॥२८॥ एवं वस्त्राणि मे दद्याद्विधिदृष्टेन कर्मणा ॥ धूपनं मे ततो दद्यात्कुङ्कुमागुरुमिश्रितम् ॥ एवं च धूपनं दद्यादिमं मन्त्रमुदीरयेत् ॥ २९ ॥ मन्त्रः--असावनादिः पुरुषः पुराणो नारायणः सर्वजगत्प्रधानः ॥ गन्धं च माल्यानि च धूपदीपौ गृहाण देवेश नमो नमस्ते ॥ ३० ॥ एवं पूजां ततः कृत्वा प्रापणं च निवेदयेत् ॥ पूर्वोक्तेन विधानेन प्रापणं चोपकल्प्य च ॥ ३१ ॥ पूर्वोक्तेनैव मन्त्रेण दद्यात्प्रापणकं बुधः ॥ प्रापणान्ते चाचमनं दद्याद्देहविशुद्धये ॥ ३२॥ शान्तिजाप्यस्ततः कार्यः सर्वकार्यार्थसिद्धिदः ॥ मन्त्रः--ॐ त्वं वै सुशान्ति कुरु लोकनाथ राज्ञः सराष्ट्रस्य च ब्राह्मणानाम् ॥ बालेषु वृद्धेषु गवाङ्गणेषु कन्यासु शान्तिं च पतिव्रतासु ॥ ३३ ॥ रोगा विनश्यन्तु च सर्वतश्च कृषिबलानां च कृषिः सदा स्यात् ॥ सुभिक्षयुक्ताश्च सदा हि लोकाः काले सुवृष्टिर्भविता च शान्तिः ॥३४॥ एवं विधिं ततः कृत्वा विधिदृष्टेन कर्मणा ॥ संपूज्य तत्र देवेशं ब्राह्मणान्भोजयेद्व्रती ॥ ३५ ॥ दीनानाथान्प्रतर्प्यार्थं यथाविभवशक्तितः ॥ य एतेन विधानेन कुर्यात्तं स्थापनं मम ॥ ३६ ॥ यावन्तो मम गात्रेषु जायन्ते जलबिन्दवः ॥ तावद्वर्षसहस्राणि मम लोकेषु तिष्ठति ॥ ३७ ॥ यो मां संस्थापयेद्भूमे सर्वालङ्कारसंयुतः ॥ तारितं च कुलं तेन सप्त सप्त च सप्ततिः ॥ ३८ ॥ एतत्ते कथितं भद्रे शैलिकास्थापनं मम ॥ धर्मसन्धारणार्थाय मम भक्तसुखाय च ॥ ३९ ॥ इति श्रीवराहपुराणे शैलार्चास्थापनं नाम व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥ अथवृन्मयार्चास्थापनम् ॥ श्रीवराह उवाच ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ तिष्ठामि मृन्मयीं चापि प्रतिमां पूजनेच्छया ॥१॥ आर्चां च मृन्मयीं कृत्वा अस्फुटां चाप्यखण्डिताम् ॥ नाधिकां वामनां चापि न वक्रां कारयेद्बुधः ॥२॥ ईदृशीं प्रतिमां कृत्वा मम कर्मपरायणः ॥ भूमे सर्वाणि कर्माणि यथा वा रोचते तथा ॥ ३ ॥ काष्ठानामप्यलाभे तु मृन्मयीं तत्र कारयेत् ॥ शैलजां वा ततो भूमे मम कर्मपरायणः ॥ ४ ॥ ताम्रेण कांस्यरौप्येण सौवर्णेनापि वा रीतिभिः ॥ कुर्वन्ति शुभकर्माणः कोविदः प्रतिमां शुभाम् ॥ ५ ॥ अचेनं त्वपरं वेद्यां मम कर्मपरिग्रहात् ॥ केचिल्लोकापवादेन स्यात्यै कुर्वन्ति केचन ॥६॥ गृहे चालोच्य काश्चिन्मां पूजयेत्कामनापरः ॥ पूजयेद्यदि वा चक्रं मम तेजोंशसम्भवम् ॥ ७॥ भूमे एवं विजानीहि स्थापितोऽहं न

संशयः ॥ सम्पदस्तु प्रयच्छामि पूजितोऽहं धराधरे ॥ ८ ॥ मन्त्रैर्वा विधिपूर्वेण यो मे कर्माणि कारयेत् ॥ यं यं फलं समुद्दिश्य मां पूजयति मानवः ॥ ९ ॥ तत्तत्फलं प्रयच्छामि प्रसन्नेनान्तरात्मना ॥ मम चैव प्रसादेन प्राप्नोति गतिमुत्तमाम् ॥ १० ॥ मद्भक्तः सततं नित्यं कर्मणा परिवेष्टितः ॥ स वै मत्परितोषार्थं मनस्येव प्रपूजयेत् ॥ ११ ॥ दद्याज्जलाञ्जलिं मह्यं तेन मे प्रीतिरुत्तमा ॥ तस्य किं सुमनोभिश्च जाप्येन नियमेन किम् ॥१२॥ मह्यं चिन्तयतो नित्यं निभृतेनान्तरात्मना ॥ तस्य कामान्प्रयच्छामि दिव्यान्भोगान्मनोरमान् ॥ १३ ॥ एतत्ते सर्वमाख्यातं सुगोप्यं च प्रयत्नतः ॥ मृन्मयीं प्रतिमां कृत्वा मम कर्मसु निष्ठितः ॥१४॥ श्रवणे चैव नक्षत्रे कुर्यात्तस्याधिवासनम् ॥ पूर्वोक्तेन विधानेन स्थापयेन्मंत्रपूर्वकम् ॥ १५ ॥ पंचगव्यं च गन्धं च वारिणा सह मिश्रयेत् ॥ ततो मे स्नपनं कार्यमिमं मन्त्रमुदाहरेत् ॥ १६ ॥ मन्त्रः—योऽसौ भवान्सर्वजगत्प्रकर्त्ता यस्य प्रसादेन भवन्ति लोकाः ॥ स त्वं कुरुष्वाच्युत मत्प्रसादं त्वं तिष्ठ चार्च्चासु च मृन्मयीषु ॥ १७ ॥ कारणकारणं द्युप्रतेजसं द्युतिमन्तं महापुरुषं नमो नमः ॥ अनेन मन्त्रेण वेश्मनि प्रविश्य स्थापनां कुर्यात् ॥ अनेनैव तु मन्त्रेण स्थापयेन्मां समाहितः ॥ पूर्ववत्स्थापयेत्तत्र चतुरः कलशान्पुरा ॥ चतुरस्तान्गृहीत्वा च इमं मन्त्रमुदाहरेत् ॥ १८ ॥ मन्त्रः—ॐ वरुणं समुद्रो लब्ध्वा संपूजितो ह्यात्ममतिप्रसन्नः ॥ एतेन मन्त्रेण ममाभिषेकं प्राप्तं वरिष्ठं हि स ऊर्ध्वबाहुः ॥ अग्निश्च भूमिश्च रसाश्च सर्वे भवन्ति यस्मात्ततत्ते नमस्ये ॥ १९ ॥ एवमाप्याप्य विधिवन्मम कर्मपरायणः ॥ पूर्वोक्तविधिना चैव गन्धमाल्यैश्च पूजयेत् ॥ २० ॥ अगुरुं चैव धूपं च सकर्पूरं सकुङ्कुमम् ॥ नमो नारायणायेति उक्त्वा धूपं प्रकल्पयेत् ॥ २१ ॥ धूपं दत्त्वा यथान्यायं पीतं वस्त्रं तु दापयेत् ॥ नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥ २२ ॥ मन्त्रः—वस्त्रेण पीतेन सदा प्रसन्नो यस्मिन्प्रसन्ने तु जगत्प्रसन्नम् ॥ गृह्णातु वस्त्रं सुमुखः प्रसन्नो देवः सदा पातु भवस्य बन्धात् ॥२३॥ तत एतेन मंत्रेण वस्त्रं दद्याद्यथोचितम् ॥ धूपदीपादिभिः पूज्य प्रापणं परिकल्पयेत् ॥ २४ ॥ पूर्वोक्तेन विधानेन दद्यात्प्रापणकं नरः ॥ पश्चादाचमनं दद्यान्मन्त्रपूर्वं प्रयत्नतः ॥ २५ ॥ मन्त्रः—शान्तिर्भवतु देवानां ब्रह्म क्षत्रविशां तथा ॥ शान्तिर्भवतु वृद्धानां बालानां शान्तिरुत्तमा ॥२६॥ देवो वर्षतु पर्जन्यः पृथिवी सस्यपूरिता ॥ अनेनैव तु मन्त्रेण शान्तिं कृत्वा

विधानतः ॥ २७ ॥ पश्चाद्भागवतान्पूज्य ततो ब्राह्मणपूजनम् ॥ शिरसा वन्दनं कार्यं दक्षिणाभिः प्रपूज्य च ॥ २८ ॥ अच्छिद्रं वाच्य पश्चाच्च कुर्यादेवं विसर्जनम् ॥ एवं विसर्जनं कृत्वा ये च तत्र समागताः ॥ २९ ॥ पूजयेत्तांश्च विधिवद्वस्त्रालंकारभूषणैः ॥ पूजयीत गुरुं तत्र यदीच्छेन्मम सात्म्यताम् ॥ ३० ॥ यो गुरुं पूजयेद्भक्त्या विधिदृष्टेन कर्मणा ॥ तेनाहं पूजितो नित्यं देवि सत्यं ब्रवीमि ते ॥ ३१ ॥ तुष्टो ददाति कृच्छ्रेण ग्राममात्रं नराधिपः ॥ आब्रह्मपदपर्यन्तं हेलया यच्छते गुरुः ॥ ३२ ॥ तथैव मम शास्त्रेषु ममैव वचनाच्छुभे ॥ सर्वशास्त्रेषु कल्याणि गुरुपूजा व्यवस्थिता ॥ ३३ ॥ य एतेन विधानेन कुर्यात्संस्थापनं मम ॥ तारितानि कुलान्येव त्रीणि त्रिंशच्च सप्ततिः ॥ ३४ ॥ पूजायां मम मार्गेषु पतन्ति जलबिन्दवः ॥ तावद्वर्षसहस्राणि मम लोकेषु मोदते ॥ ३५ ॥ एवं ते कथितं भूमे स्थापनं मृन्मयस्य तु ॥ कथयिष्यामि ते ह्यन्यत् सर्वभागवतप्रियम् ॥ ३६ ॥ इति श्रीवराहपुराणे मृन्मयार्चास्थापनं नाम त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥ अथ ताम्रार्चास्थापनम् ॥ श्रीवराह उवाच ॥ ताम्रेण प्रतिमां कृत्वा सुरूपां चैव भास्वराम् ॥ उचितेनोपचारेण वेश्ममध्यमुपानयेत् ॥ १ ॥ ततो वेश्मन्युपागम्य स्थापयित्वा उदङ्मुखः ॥ चित्रायां चैव नक्षत्रे कुर्याच्चैवाधिवासनम् ॥२॥ जलं च सर्वगन्धेन पंचगव्येन मिश्रितम् ॥ स्नापयेच्च ततो मां वै इमं मन्त्रमुदाहरेत् ॥ ३ ॥ मन्त्रः—योऽसौ भवांस्तिष्ठति सारभूतः त्वं ताम्रके तिष्ठसि नेत्रभूतः ॥ आगच्छ मूर्त्तौ सह पंचभूतैर्मया च पात्रैः सह विश्वधात्मन् ॥ ४ ॥ अनेनैव तु मन्त्रेण स्थापयित्वा यशस्विनि ॥ पूर्वन्यायेन कर्त्तव्यमाधिवासनपूजनम् ॥ ५ ॥ व्यतीतायां च शर्वर्यामुदिते च दिवाकरे ॥ ऋचा शुद्धिं विधायाऽथ स्नापयेन्मन्त्रपूर्वकम् ॥ ६ ॥ ब्राह्मणा वेदपाठांश्च कुर्युस्तत्र समागताः ॥ वह्निनि मङ्गलान्यत्र मण्डपे स्थापयेत्ततः ॥७॥ सुगन्धद्रव्यसंयुक्तं जलं चादाय पूजकः॥ततो मे स्नपनं कार्यमिमं मन्त्रमुदाहरेत्॥८॥ मन्त्रः—ॐ योऽसौ भवान्सर्ववरः प्रभुश्च माया बलो योगबलप्रधानः ॥ आगच्छ शीघ्रं च मम प्रियाय सन्तिष्ठ ताम्रेष्वपि लोकनाथ ॥ ९ ॥ ज्वलन पवनतुल्यबल भावन तपन श्वासन स्वयं तिष्ठ भगवन् पुरुषोत्तम ओम् ॥ इति ॥ ततो द्वारमुपागम्य वेश्म शीघ्रं प्रवेशयेत् ॥ आसने चापि मां स्थाप्य पूजयेद्भक्तिपूर्वकम् ॥१०॥ मन्त्रेणानेन मां स्थाप्य गन्धपुष्पादिदीपकैः ॥ ११ ॥ स्थापनामन्त्रः—ॐ प्रकाशप्रकाश जगत्प्रकाश विज्ञानमयानन्दमय त्रैलोक्यनाथात्रागच्छ इह ॥१९३॥

सन्तिष्ठतां भवान्पुरोत्तम मामव इति ॥ अनेन स्थापनां कृत्वा मम शास्त्रानुसारतः ॥ शुक्लवस्त्रं समादाय इमं मन्त्रमुदाहरेत् ॥ १२ ॥ मन्त्रः—
ॐ शुद्धस्त्वमात्मा पुरुषः पुराणो जगत्सु तत्त्वं सुरलोकनाथ ॥ वस्त्राणि गृहीष्व मम प्रियाणि नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ १३ ॥ वस्त्रै
र्विभूषितं कृत्वा मम कर्मपरायणः॥यथान्यायेन मे शीघ्रमर्चनं तत्र कारयेत् ॥१४॥ अर्चनालंकृतं कृत्वा गन्धधूपादिभिः प्रभुम् ॥ सम्पूज्य विधिव
न्मां तु नैवेद्यं परिकल्पयेत् ॥१५॥ दत्त्वा स्वादु च नैवेद्यं शान्तिपाठं तु कारयेत् ॥ मन्त्रः—शान्तिर्भवतु देवानां विप्राणां शान्तिरुत्तमा॥१६॥
शान्तिर्भवतु राज्ञां च सराष्ट्राणां तथा विशाम् ॥ बालानां वृद्धिपण्यानां गर्भिणीनां च देहिनाम् ॥ १७ ॥ शान्तिर्भवतु देवेश त्वत्प्रसादान्ममा
खिला॥एवं शान्तिं पठित्वा तु ब्राह्मणांस्तत्र पूजयेत् ॥१८॥गुरुं भागवतं चैवमर्चयेच्च यथाविधि॥ब्राह्मणान्भोजयेत्तत्र यथोत्पन्नेन माधवि ॥१९॥
विशेषेण गुरुं पूज्य वस्त्रालंकारभोजनैः ॥ तेनाहं पूजितो भूमे सत्यमेतद्ब्रवीमि ते ॥ २० ॥ गुरुर्यस्य न तुष्टो वै तस्माद्दूरतरो ह्ययम् ॥
य एतेन विधानेन कुर्यात्संस्थापनं मम ॥ २१ ॥ तारितं च कुलं तेन नवभिः सप्तविंशतिः ॥ एतत्ते कथितं भद्रे ताम्रार्चास्थापनं
मम ॥ २२ ॥ कथयिष्यामि ते ह्येवं कात्स्न्येन प्रतिमार्चनम् ॥ जलस्य बिन्दवो यावन्मम स्नाने च सुन्दरि ॥ तावद्वर्षसहस्राणि मम
लोके महीयते ॥ २३ ॥ इति श्रीवराहपुराणे ताम्रार्चास्थापनं नाम चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥ अथ कांस्यार्चास्थाप
नम् ॥ श्रीवराह उवाच ॥ कांस्येन प्रतिमां कृत्वा सुरूपां सुप्रतिष्ठिताम् ॥ सर्वाङ्गावयवैर्युक्तां विमलां कर्मनिर्मिताम् ॥ १ ॥ ज्येष्ठायां चैव
नक्षत्रे मम वेश्मन्युपानयेत ॥ गीतवादित्रशब्देन बहुभिर्मङ्गलैस्तथा ॥ २ ॥ अर्घ्यं गृह्य यथान्यायमिमं मन्त्रमुदाहरेत् ॥ ३ ॥ योऽसौ
भवान्सर्वयज्ञेषु पूज्यो ध्येयो गोप्ता विश्वकामो महात्मा ॥ प्रसन्नात्मा भगवान्मे प्रसन्नः सुपूजितस्तिष्ठ हि लोकनाथ ॥ ४ ॥ अर्घ्यं दत्त्वा
यथान्यायं स्थापयेत्तदुदङ्मुखः ॥ यथान्यायेन संस्थाप्य कुर्याच्चैवाधिवासनम् ॥ ५ ॥ चतुरः कलशांश्चैव पंचगव्यसमन्वितान् ॥ सर्व
गन्धैश्च लाजैश्च मधुना च विशेषतः ॥ ६ ॥ चतुरः कलशांपूर्य स्नानार्थं मे समन्त्रकम् ॥ ततश्चास्तंगते सूर्ये शुद्धैर्भागवतैः सह ॥ ७ ॥
कुर्यात्संस्थापनं तत्र ममार्चायास्तु पूजकः ॥ गृहीत्वा कलशांस्तत्र शुद्धान्भागवतांस्तथा ॥ ८ ॥ नमो नारायणायेति उक्त्वा मन्त्रमुदाह

रेत् ॥ ९ ॥ मन्त्रः–आदिर्भवान्ब्रह्मयुगान्तकल्पः सर्वेषु कालेष्वपि कल्पभूतः ॥ एको भवान्नास्ति कश्चिद्वितीय उपागतास्तिष्ठ हि लोक नाथ ॥ १० ॥ विकार अविकार अकार सकार शकार पकार स्वच्छन्दरूपः क्षरमक्षरं धृतिरूपः अरूपमिति नमः पुरुषोत्तमायेति ॥ व्यती तायां तु शर्वर्यामुदिते च दिवाकरे ॥ अश्वेन च मुहूर्त्तेन प्राते मूलेषु चोत्तरे ॥ ११ ॥ पूर्वोक्तेषु विधानेन मम शास्त्रानुदर्शि नाम् ॥ स्थापयेद्वारमूले तु मम वेश्मनि सुन्दरि ॥ १२ ॥ सर्वशान्त्युदकं गृह्य सर्वगन्धफलानि च ॥ नमो नारायणायेति उक्त्वा मन्त्र मुद्गारेत् ॥१३॥ मन्त्रः–ॐ इन्द्रो भवांस्त्वं च यमः कुबेरो जलेश्वरः सोमबृहस्पती च॥शुक्रः शनैश्चरुधौ सह सैंहिकेयकेतू रविश्चैव धरात्मज स्त्वम् ॥१४॥ तथैव सर्वौषधयो जलानि वायुश्च पृथ्वी च स वायुसारथिः ॥ नागाः सयक्षाश्च दिशश्च सर्वास्तस्मै नमस्ते पुरुषोत्तमाय इति ॥१५॥ अनेनैव तु मन्त्रेण कृत्वा कर्म सुपुष्कलम् ॥ मम तां प्रतिमां गृह्य ततो वेश्मन्युपानयेत् ॥१६॥एकान्ते स्नापयेन्मां च जलैः पूर्वाभिमन्त्रितैः ॥ प्रगृह्य कलशेभ्यश्च जलं गन्धसमन्वितम् ॥ १७ ॥ गात्रसंशोधनार्थाय इमं मन्त्रमुदाहरेत् ॥१८॥ मन्त्रः–सरांसि ये ते च समस्तसागरा नद्यश्च तीर्थानि च पुष्करााणि ॥ आयान्तु तान्येव तव प्रसादाच्छुद्धये च मे स्युः पुरुषोत्तमाय इति ॥ १९ ॥ एवं मां स्नाप्य विधिना मम कर्मानु सारिणः ॥ एवं न्यायेन मां तत्र अर्चयित्वा यथोचितम् ॥२०॥ गन्धधूपादिभिश्चैव यथाविभवशक्तितः॥पश्चाद्वस्त्राणि मे दद्यान्मम गात्रसुखानि च ॥ २१ ॥ तान्यानयित्वा वस्त्राणि ममाग्रे स्थापयेन्नरः ॥ उभौ तौ चरणौ नत्वा इमं मन्त्रमुदाहरेत् ॥ २२ ॥ मन्त्रः–ॐ वस्त्राणि देवेन्द्र मया ह्यानीनि सूक्ष्माणि सौम्यानि सुखावहानि ॥ गात्रस्य सन्तुष्टिकराणि तुभ्यं गृह्णीष्व देवेश सुलोकनाथ ॥२३॥ वेदोपवेद ऋग्वेद यजुर्वेद सामवेद अथर्वणवेद संस्तुत इति नमः परस्परायेति ॥ अविचालंकृतं कृत्वा पूर्वन्यायेन सुन्दरि ॥ पश्चान्मे प्रापणं दद्यान्मन्त्रवद्विधिपूर्वकम् ॥ २४ ॥ दत्त्वा प्रापणकं तत्र दद्याद्दाचमनं ततः ॥ शान्तिपाठश्च वै कार्यो मन्त्रेणानेन सुन्दरि ॥ २५ ॥ विद्याः सर्वे ब्रह्म च ब्राह्मणाश्च ग्रहाः सर्वे सरितः सागराश्च ॥ इन्द्राद्यष्टौ लोकपालाश्च सर्वे पूर्वोक्ता ये सर्वशान्तिं च कुर्युः ॥ २६ ॥ आयाम यम कामदम वाम ॐ नमः पुरुषोत्तमायेति सूत्रम् ॥ वृत्तेष्वेवोपचारेषु मम कुर्यात्प्रदक्षिणम् ॥ अभिवादनं स्तुतिं चापि कृत्वा भागवतांश्छुचीन् ॥ २७॥ सम्पूज्य ब्राह्मणान्पश्चाद्भोजयेत्

पायसादिभिः ॥ तेभ्यः शान्त्युदकं गृह्य द्विजेभ्यः कमलेक्षणे ॥ २८ ॥ दद्यादभ्युक्षणं मह्यं तेनाहं पूजितोऽभवम् ॥ सर्वान्विसर्जयित्वा तु कुर्याद्धै गुरुपूजनम् ॥ २९ ॥ अङ्गुलीयकवासोभिर्दानसंमाननादिभिः ॥ यो गुरुं पूजयेद्भक्त्या भक्तियुक्तेन चेतसा ॥ ३० ॥ तेनाहं पूजितो देवि एवमेतन्न संशयः॥ ब्राह्मणान्मम भक्तांश्च गुरूंश्चैव हि निन्दति ॥ ३१ ॥ नाशयिष्यामि तं देवि सत्यमेतद्ब्रवीमि ते ॥ जलस्थ बिन्दवो यावन्मम गात्रेषु तिष्ठति॥३२॥ तावद्वर्षसहस्राणि मम लोकेषु तिष्ठति ॥ य एतेन विधानेन स्थापयिष्यति मां नरः ॥३३॥ तारितं च कुलं तेन पितृजं मातृजं तथा ॥ एतत्ते कथितं भद्रे कांस्येन स्थापनं मम ॥ ३४ ॥ कथयिष्यामि ते ह्येवं रौप्येण स्थापनं मम ॥ ३५ ॥ इति श्रीवराहपुराणे कांस्यप्रतिमास्थापनविधिर्नाम पंचाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥ श्रीवराह उवाच॥राजतीं प्रतिमां कृत्वा सुरूपां निर्मलां शुचिम् ॥ अश्लिष्टां चैव निर्दोषां सर्वतः परिनिष्ठिताम् ॥ १ ॥ चन्द्रपाण्डुरसङ्काशां सुश्लक्ष्णां स्निग्धवर्णां शुभाम् ॥ श्रिया युक्तां मनोज्ञां च दीप्यमानां दिशो दश ॥२॥ ईदृशीं प्रतिमां कृत्वा मम कर्मपरायणः ॥ गीतवाद्यशब्देन शंखदुन्दुभिनिःस्वनैः ॥ ३ ॥ स्तुतिभिर्मङ्गलैश्चैव मम वेश्मन्यु पानयेत् ॥ अर्घ्यपाद्यादिकं गृह्य इमं मन्त्रमुदाहरेत् ॥४॥ मन्त्रः–ॐ यः सर्वलोकैरपि सर्वमर्घ्यं पूज्यश्च मान्यश्च दिवौकसामपि॥उपागतो गृह्य इदं ममार्घ्यं प्रसीद मां तिष्ठतु लोकनाथ ॥ यो राजते यज्ञपतिश्च यज्ञे सूर्योदये मम कर्माग्निहोत्रम् ॥५॥ मन्दश्चेति आदिमध्यस्वरूपायेति ॥ तत एतेन मन्त्रेण अर्घ्यं दत्त्वा यथाविधि ॥ सुस्नातोऽलंकृतश्चैव स्थापयेत्तामुदङ्मुखः ॥ ६ ॥ आश्लेषासु च नक्षत्रे राशौ कर्कटके स्थिते ॥ अस्तङ्गते दिनकरे स्वजने यजति स्थिरे ॥ ७ ॥ तत्राधिवासनं कुर्याद्विधिवन्मन्त्रपूर्वकम् ॥ चत्वारः कलशास्तत्र चन्द्रनोदकमिश्रिताः ॥ ८ ॥ सर्वौषधीसमायुक्ताः सहकारविभूषिताः ॥ ततस्ते कर्मिणः सर्वे मम शास्त्रानुसारिणः ॥ ९ ॥ गुरोस्तु वचनादेवि मनोज्ञान्सुखशीतलान् ॥ नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥ १० ॥ मन्त्रः–योऽसौ भवान् सर्वलोककर्ता सर्वाव्यक्तः सर्वरूपैकरूपः ॥ आयातु मूर्त्तौ सहितो मया च ध्रुवादिभिर्लोकपालैस्तु पूज्यः ॥ ११ ॥ नमोऽनन्तायेति ॥ व्यतीतायां तु शर्वर्यामुदिते सूर्यमण्डले ॥ दिशासु च प्रसन्नासु द्वारमूल मुपानयेत् ॥ १२ ॥ एवं संस्थापनं कृत्वा मम कर्मानुसारिणः ॥ घटैः पूर्णैर्यथान्यायं कुर्यात्तत्राभिषेचनम् ॥ १३ ॥ अभिषिच्य ततः

पश्चात्स्थापयेत विधानतः॥नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥१४॥ मन्त्रः–गङ्गादिभ्यो नदीभ्यश्च सागरेभ्यो मया हृतम् ॥स्नानार्थं ते सुरश्रेष्ठ कर्पूरवासितं जलम् ॥१५॥ एवं स्नाप्य विधानेन गृहस्याभ्यन्तरं नयेत् ॥ स्थापना तत्र मे कार्या मन्त्रेणानेन सुन्दरि॥ १६ ॥ मन्त्रः–वेदैर्वेद्यो वेदविद्भिश्च पूज्यो यज्ञात्मको यज्ञफलप्रदाता ॥ यज्ञार्थं त्वामाह्वये देवदेव मूर्त्तावस्यां तिष्ठ सुलोकनाथ ॥ १७ ॥ धनजन रूप्यस्वर्ण अनन्ताय नम इति ॥ एवं संस्थापनं कृत्वा प्रह्वष्टेनान्तरात्मना ॥ अर्चयित्वा यथान्यायं पूर्वोक्तविधिना नरः ॥१८ ॥ नील वस्त्राणि मे दद्याश्रियाणि मम भूषणम्॥ ततो वस्त्राण्युपादाय जानुभ्यां पतितो भुवि॥१९॥ नमो नारायणायेति उक्त्वा कामसुदाहरेत् ॥२०॥ मन्त्रः–योऽसौ भवांश्चन्द्ररश्मिप्रकाशः शंखेन कुन्देन समानवर्णः ॥ क्षरिोज्वलः कौमुदवर्ण देव वस्त्राणि गृह्णीष्व मम प्रियाय ॥ २१ ॥ वेषः सुवेषः अनन्तः अमरः मारणः कारणः सुलभः दुर्लभः श्रेष्ठः सुवर्चा इति ॥ अनेनैव तु मन्त्रेण दत्त्वा वस्त्राणि मे शुचिः ॥ ततो मे प्रापणं दद्याद्भक्तियुक्तेन चेतसा ॥ २२ ॥ नमो नारायणायेति इमं मन्त्रमुदाहरेत् ॥ शाल्यन्नं पायसैर्युक्तं सितया च घृतेन च ॥ २३ ॥ प्रापणं गृह्यतां देव अनन्त पुरुषोत्तम ॥ दत्त्वा तु मम नैवेद्यं दद्यादाचमनं बुधः ॥ २४ ॥ सर्वलोकहिताथाय शान्तिपाठमुदाहरेत् ॥ ॐ शान्तिं करोति ब्रह्मा च रुद्रो विष्णुर्हि भास्करः॥२५॥रात्रिश्चैव तु सन्ध्ये द्वे नक्षत्राणि ग्रहा दिशः॥२६॥अचल चंचल सचल खेचल प्रचल अरविन्दप्रभ उद्भव चेति नमः संस्थापितानां वासुदेव इति ॥ कृत्वा वै शान्तिकं तत्र सर्वपापप्रणाशनम् ॥ पूज्य भागवतांस्तत्र यथाविभवशक्तितः ॥ २७ ॥ ब्राह्मणान्भोजयेत्तत्र गुरुं मन्त्रेण पूजयेत् ॥ तेभ्यः शान्त्युदकं गृह्य कुर्यादभ्युक्षणं ततः ॥ २८ ॥ ब्राह्मणान्स्वजनं चैव अभिवाद्य कृताञ्जलिः ॥ शीघ्रं विसर्जयेत्तांश्च ये तत्र समुपागताः॥२९॥ ततो गुरुं च संपूज्य दानमानादिभिर्विभुम् ॥ गुरौ सम्पूजिते तत्र मम पूजा कृता भवेत् ॥३०॥ जलस्य बिन्दवो येऽन्नभोजनान्ते पतन्ति हि ॥तावद्वर्षसहस्राणि विष्णुलोके स मोदते ॥३१॥ य एतेन विधानेन पूजयेन्मतिमान्नरः ॥ उद्धृतं च कुलं तेन पितृजं मातृजं तथा ॥ ३२ ॥ अनेन विधिना देवि रौप्यार्चास्थापनं मम ॥ सुवर्णस्य प्रवक्ष्यामि स्थापनं मम सुश्रियम् ॥ ३३ ॥ यथैव राजतीं कुर्यात्तथैव च सुवर्णिकाम् ॥ तेनैव विधिना सर्वं कुर्यादावाहनादिकम् ॥३४॥ यत्फलं दारुशैलादिनाम्ना कांस्यादिराजते ॥ तत्फलं

कोटिगुणितं सौवर्णस्य प्रपूजने ॥ ३५ ॥ कुलानि तारयेत्सप्त अयुतान्येकविंशतिम् ॥ याति मद्भवतां भूमे पुनरावृत्तिवर्जितः ॥ ३६ ॥ एतत्ते कथितं भूमे यत्त्वया परिपृच्छितम् ॥ रहस्यं विपुलश्रोणि किमन्यत्कथयामि ते ॥ ३७ ॥ भूमिरुवाच ॥ उक्ता याः प्रतिमाः सर्वाः सुवर्णादि विनिर्मिताः ॥ तासु तिष्ठसि सर्वासु शालग्रामे च सर्वदा ॥ ३८ ॥ कति पूज्या गृहाद्यो च अविशेषस्तु पूजने ॥ विशेषो वा भवेत्तन्मे रहस्यं वद माधव ॥ ३९ ॥ शिवादिपूजने के वा संख्यातास्तच्च मे वद ॥ श्रीवराह उवाच ॥ गृहे लिङ्गद्वयं नार्च्यं शालग्रामत्रयं तथा ॥ ४० ॥ द्वे चक्रे द्वारकायास्तु नार्च्यं सूर्यद्वयं तथा ॥ गणेशत्रितयं नार्च्यं शक्तित्रितयमेव च ॥ ४१ ॥ शालग्रामयुगं पूज्यं युग्मेषु द्वितयं न हि ॥ विषमा नैव पूज्याः स्युर्विषमे एक एव हि ॥ ४२ ॥ गृहेऽग्निदग्धा भग्ना वा नैव पूज्या वसुन्धरे ॥ आसां तु पूजनाद्गेहे उद्वेगं प्राप्नुयाद्गृही ॥ ४३ ॥ शालग्राम शिला भग्ना पूजनीया सचक्रका ॥ खण्डिता स्फुटिता वापि शालग्रामशिला शुभा ॥ ४४ ॥ शिला द्वादश वै देवि शालग्रामसमुद्भवाः ॥ विधिवत्पूजिता येन तस्य पुण्यं वदामि ते ॥४५॥ कोटिद्वादशलिङ्गैस्तु पूजितैः स्वर्णपङ्कजैः ॥ यत्स्याद्वादशकल्पैस्तु दिनेनैकेन तद्भवेत् ॥४६ ॥ यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम् ॥ तत्फलं नैव शक्तोऽहं वक्तुं वर्षशतैरपि ॥ ४७ ॥ सर्ववर्णैस्तु सम्पूज्याः प्रतिमाः सर्वदेवताः ॥ लिङ्गान्यपि तु पूज्यानि मणिभिः कल्पितास्तथा ॥ ४८ ॥ शालग्रामो न स्पृष्टव्यो हीनवर्णैर्वसुन्धरे ॥ स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः ॥ ४९ ॥ मोहाद्यः संस्पृशेच्छूद्रो योपिद्वापि कदाचन ॥ पच्यते नरके घोरे यावदाभूतसंप्लवम् ॥५० ॥ यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे ॥ दूरादेवार्चयेत्पृश्नपूर्जां कारयेत्सुसमाहितः ॥ ५१ ॥ चरणामृतपानेन सर्वपापक्षयो भवेत् ॥ अभक्ष्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् ॥ ५२ ॥ शालग्रामशिलायोगात्पावनं तद्भवेत्सदा ॥ दद्याद्भक्ताय यो देवि शालग्रामशिलां नरः ॥ ५३ ॥ सुवर्णसहितां तस्य यत्पुण्यं तच्छृणुष्व मे ॥ सुवर्णसहिता भूमिः सपर्वतवनाकरा ॥ ५४ ॥ सप्तसमुद्रा भवेद्दत्ता सत्पात्राय वसुन्धरे ॥ शालग्रामशिलायास्तु मूल्यमुद्वाट्यत्कचित् ॥ ५५ ॥ विक्रेता क्रयकर्त्ता च नरके नीयते ध्रुवम् ॥ पूजाफलं न शक्नोति वक्तुं वर्षशतैरपि ॥ ५६ ॥ एतत्ते कथितं गुह्यं प्रतिमा स्थापनं प्रति ॥ शालग्रामे विशेषश्च लिङ्गादीनां च यो भवेत् ॥५७॥ पूजनादौ विधिश्चापि किमन्यच्छ्रोतुमिच्छसि ॥५८॥ इति श्रीवराहपुराणे

प्रागितिहासे भगवच्छास्त्रे रौप्यसौवर्णचार्चालिंगादिस्थापनसंस्थादिकं नाम षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥ अथ सृष्टिपितृयज्ञौ ॥
सूत उवाच ॥ एवं नारायणाच्छ्रुत्वा सा मही संशितव्रता ॥ कराभ्यामञ्जलिं कृत्वा माधवं पुनरब्रवीत् ॥ १ ॥ धरण्युवाच ॥ श्रुतमेतन्मयाख्यानं
शेषस्य च महत्फलम् ॥ एकं मे परमं गुह्यं तद्भवान्वक्तुमर्हति ॥ २ ॥ पितृयज्ञस्य माहात्म्यं सोमदत्तो नराधिपः ॥ मृगयां सप्रयागम्य यत्त्वया
पूर्वमाधितम् ॥ ३ ॥ को गुणः पितृयज्ञस्य कथमेव प्रयुज्यते ॥ केन चोत्पादितं श्राद्धं कस्मिन्नर्थे किमात्मकम् ॥ ४ ॥ एतद्विच्छाम्यहं श्रोतुं
विस्तरेण वदस्व मे ॥ श्रीवराह उवाच ॥ साधु भूमे महाभागे यन्मां त्वं परिपृच्छसि ॥ ५ ॥ मोहितासि वरारोहे भाराक्रान्ता वसुन्धरे ॥ दिव्यां
ददामि ते बुद्धिं शृणु सुन्दरि तत्त्वतः ॥६॥ कथयिष्यामि ते ह्येवं श्राद्धोत्पत्तिविनिश्चयम् ॥ आद्यो स्वयंभुवस्य चोत्पत्तिं देवानां च वरानने ॥७ ॥
निष्पभेऽस्मिन्त्रिलोके सर्वतस्तमसावृते ॥ ह्यहं वै बुद्धिरुत्पन्ना त्रैलोक्यं सचराचरम् ॥८॥ सोऽहं च शेषपर्यङ्के एकश्चैव पराङ्मुखः ॥ स्वपामि
च वरारोहे अनन्तशयने ह्यहम् ॥ ९ ॥ निद्रां मायामयीं कृत्वा जागर्मि च स्वपामि वा ॥ विष्णुमायामयं कृत्वा जानासि त्वं न धारिणि ॥१०॥
युगं युगसहस्राणि यास्यन्ति च गतानि च ॥ न त्वं मम विजानासि ज्ञातुं मायां यशस्विनि ॥ ११ ॥ धारितं मम सुश्रोणि दिव्या पंचशतानि
च ॥ वाराहं रूपमादाय न जानासि हि भामिनि ॥ १२ ॥ यन्मां पृच्छसि वै ज्ञातुमात्मानं च यशस्विनि ॥ एकमूर्तिस्त्रिधा जातो ब्रह्मविष्णु
हरात्मकः ॥ १३ ॥ क्रोधद्रवेतोमेया सृष्ट ईश्वरोऽसुरनाशनः ॥ मम नाभ्यामभूत्पद्मं पद्मगर्भः पितामहः ॥ १४॥ एवं त्रयो वयं देशाः कृत्वा
लोकार्णवां महीम् ॥ तिष्ठाम परमप्रीत्या मायां कृत्वा तु वैष्णवीम् ॥ १५ ॥ सर्वं तज्जलपूर्णं तु न चाज्ञायत किञ्चन ॥ वटमेकं वर्जयित्वा
विष्णुमूलं यशोद्भवम् ॥ १६ ॥ तिष्ठाम वटवृक्षेऽहं मायया बालरूपधृक् ॥ पश्यामि च जगत्सर्वं त्रैलोक्यं यन्मया ॥१९६॥
कृतम् ॥ १७ ॥ धारयामि वरारोहे जानासि त्वं धरे शुभे ॥ कालेन तु तदा देवि कृत्वा वै वडवामुखम् ॥ १८ ॥
विनिस्सृतं जलं तत्र मायया तदनन्तरम् ॥ प्रलये च विनिर्वृत्ते ब्रह्मा लोकपितामहः ॥ १९ ॥ मुहूर्तं ध्यानमास्थाय भाषितो
वचनं मया ॥ शीघ्रमुत्पादय ब्रह्मन्देवतासुरमानुषान् ॥ २० ॥ एवमुक्तो मया देवि गृह्य तत्र कमण्डलुम् ॥ उपस्पृश्य शुचिर्भूत्वा ब्रह्मा

चोत्पादयन्पुरान् ॥ २१ ॥ आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ॥ तारणार्थं च सर्वेषां ब्राह्मणान्भुवि देवताः ॥ २२ ॥
बाहुभ्यां क्षत्रमुत्पन्नं वैश्या ऊरुविनिःसृताः ॥ पद्भ्यां विनिःसृताः शूद्राः सर्ववर्णोपचारकाः ॥ २३ ॥ देवताश्चासुरा देवि जातास्ते
ब्रह्मणस्तथा ॥ देवताह्यसुराः सर्वे तपोवीर्यबलान्विताः ॥ २४ ॥ आदित्या वसवो रुद्रा अश्विनौ च मरुद्गणाः ॥ देवतास्तु
त्रयस्त्रिंशददित्यां जनयन्पुरा ॥ २५ ॥ दित्यां च जनिताः पुत्रा असुराः सुरशत्रवः ॥ प्रजापतिश्चाजनयद्दर्पीश्चैव तपोधनान् ॥ २६ ॥
तेजसा भास्कराकाराः सर्वे शास्त्रविदो द्विजाः ॥ तेषां पुत्राश्च पौत्राश्च जनिता ब्रह्मसूनुना ॥ २७ ॥ निमेस्तु वंशसम्भूतो आत्रेय
इति विश्रुतः ॥ जातमात्रो महात्मा स श्रीमांश्चापि तपोनिधिः ॥ २८ ॥ एकचित्तं समाधाय तपश्चरति निश्चलः ॥ पंचाग्निर्वायुभक्षश्च
एकपादोर्ध्वबाहुकः ॥ २९ ॥ शीर्णपर्णाम्बुभक्षश्च शिशिरे च जलेशयः ॥ स कृच्छ्रे फलभक्षश्च पुनश्चान्द्रायणं चरन् ॥ ३० ॥ वर्षाणां च
सहस्राणि तपस्तप्त्वा वसुन्धरे ॥ मृत्युकालमनुप्राप्तस्ततः पञ्चत्वमागतः ॥ ३१ ॥ नष्टं च तं सुतं दृष्ट्वा निमेः शोक उपाविशत् ॥ पुत्र
शोकाभिसंयुक्तो दिवा रात्रौ च चिन्तयन् ॥ ३२ ॥ निमिः कृत्वा ततः शोकं विधानात्तत्र माधवि ॥ तं मनोगतसंकल्पं त्रिरात्रे प्रत्यपद्यत ॥ ३३ ॥ तस्य प्रतिविशुद्धस्य माघमासे तु द्वादशीम् ॥ मानसं सृज्य विषयं बुद्धिर्विस्तारगामिनी ॥३४॥ स निमिश्चिन्तयामास श्राद्ध
कल्पं समाहितः ॥ यानि तस्यैव भोज्यानि मूलानि च फलानि च ॥ ३५ ॥ यानि कानि च भक्ष्याणि नवश्च रससंभवः ॥ यानि तस्यैव
चेष्टानि सर्वमेतदुदाहरेत् ॥ ३६ ॥ आमन्त्र्य ब्राह्मणं पूर्वं शुचिर्भूत्वा समाहितः ॥ दक्षिणावर्ततः सर्वमकरोदृषिसत्तमः ॥ ३७ ॥ सप्तकृत्व
स्ततस्तत्र युगपत्तमुपाविशत् ॥ दत्त्वा तु मांसशाकानि मूलानि च फलानि च ॥३८॥ पूजयित्वा तु विप्रान्स सप्तकृत्वश्च सुन्दरि ॥ कृत्वा तु
दक्षिणाग्रांश्च कुशांश्च प्रयतः शुचिः ॥ ३९ ॥ प्रददौ श्रीमते पिण्डं नामगोत्रमुदाहरन् ॥ तत्कृत्वा स मुनिश्रेष्ठो धर्मसंकल्पमात्मनः ॥ ४०॥
एवं दिने गते भद्रे ह्यस्तं प्राते दिवाकरे ॥ ब्रह्म कर्मोत्तमं दिव्यं भावसाध्यमुपासत ॥ ४१ ॥ एकाकी यतचित्तात्मा निराशी निष्परिग्रहः ॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ॥ ४२ ॥ नात्युच्चं नातिनीचं च चेलाजिनकुशोत्तरम् ॥ तत्रैकाग्रं मनः कृत्वा यतचित्तो जितेन्

न्द्रियः ॥ ४३ ॥ उपविश्यासनेऽयुञ्जयोगमात्मविशुद्धये ॥ समं कायशिरोग्रीवं धारयन्नचलं स्थितः ॥ ४४ ॥ संप्रेक्ष्य नासिकाग्रं स्वं दिश श्चानवलोकयन् ॥ प्रकाशात्मा विगतभीर्ब्रह्मचारी व्रते स्थितः ॥ ४५ ॥ संयम्य मयि चित्तं यो युक्त आसीत मत्परः ॥ प्रयुञ्जीत सदात्मानं मद्भक्तो नान्यमानसः ॥ ४६ ॥ एवं निवृत्तसंध्यायां ततो रात्रिरुपागता ॥ पुनश्चिन्तितुमारब्धः शोकसंविग्नमानसः ॥ ४७ ॥ कृत्वा तु पिण्ड संकल्पं पश्चात्तापं चकार ह ॥ अकृतं मुनिभिः सर्वं किं मया तदनुष्ठितम् ॥ ४८ ॥ निषापकर्म ह्यशुचि पुत्रार्थे विनियोजितम् ॥ अहो स्नेहप्रभा वेण मया चाकृतबुद्धिना ॥४९॥ कथं ते मुनयः शापात्प्रदहेयुर्न मामिति ॥ सदेवासुरगन्धर्वपिशाचोरगराक्षसाः ॥ ५०॥ किं वक्ष्यन्ति च मां सर्वे ये वै पितृपदे स्थिताः ॥ एवं विचिन्त्यमानस्य गता रात्रिर्सुन्दरे ॥ ५१ ॥ पूर्वसन्ध्यानु सम्प्राप्ता उदिते च दिवाकरे ॥ सन्ध्याविधिं विधि वत्तत्र हुत्वाग्नीन्द्विजसत्तमः ॥ ५२ ॥ पुनश्चिन्तां प्रपन्नः स आत्रेयो ह्यतिदुःखितः ॥ एकाकी भ्रमते तत्र शोकपीडितमानसः ॥ ५३ ॥ धिग्मयो धिक्च मे कर्म धिग्बलं धिक्च जीवितम् ॥ पुत्रं सर्वसुखैर्युक्तं जीवितं हि न दृश्यते ॥ ५४ ॥ नरकं पूतिकाख्यातं ह्यदि दुःखं बिदुर्बुधाः ॥ परित्राणं ततः पुत्रादिच्छन्तीह परत्र च ॥ ५५ ॥ पूजयित्वा तु देवांश्च दत्त्वा दानं त्वनेकशः ॥ हुत्वाग्निं विधिवच्चैव स्वर्गं तु लभते नरः ॥ ५६ ॥ पुत्रेण लभते येन पौत्रेण च पितामहाः ॥ अथ पुत्रस्य पौत्रेण मोदन्ते प्रपितामहाः ॥ ५७ ॥ पुत्रेण श्रीमता हीनं नाहं जीवितु मुत्सहे ॥ एतस्मिन्नन्तरे देवि नारदो द्विजसत्तमः ॥ ५८ ॥ जगाम तापसारण्यमृष्याश्रमविभूषितम् ॥ सर्वैकामयुतं रम्यं बहुपुष्पफलोद कम् ॥ ५९ ॥ तत्प्रविश्याश्रमपदं भ्राजमानं स्वतेजसा ॥ तं दृष्ट्वा पूजयामास स्वागतेनाथ धर्मवित् ॥ ६० ॥ तस्मै दत्त्वा पाद्यमर्घ्यं आसने चोपवेश्य च ॥ उपविश्यासने देवि नारदो वाक्यमब्रवीत् ॥ ६१ ॥ नारद उवाच ॥ निमे शृणु महाप्राज्ञ शोकमुत्सृज्य दूरतः ॥ अशोच्यान न्वशोचस्त्वं प्रज्ञावान्नावबुध्यसे ॥ ६२ ॥ गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥ मृतं वा यदि वा नष्टं यो वान्तमनुशोचति ॥ ६३ ॥ अमित्रास्तस्य हृष्यन्ति स चापि न निवर्त्तते ॥ अमरत्वं न पश्यामि त्रैलोक्ये सचराचरे ॥ ६४ ॥ देवतासुरगन्धर्वा मानुषा मृगपक्षिणः ॥ सर्वे कालवशं यान्ति सर्वं कालबुभुक्षितं ॥ ६५ ॥ जातस्य सर्वभूतस्य कालो मृत्युरुपस्थितः ॥ अवश्यं चैव गन्तव्यं कृतान्तविहितेन

॥१९७॥

च ॥ ६६ ॥ तव पुत्रो महात्मा वै श्रीमान्राम श्रियो निधिः ॥ पूर्णं वर्षसहस्रं तु तपः कृत्वा सुदुश्चरम् ॥ ६७ ॥ मृत्युकालमनुप्राप्य गतो दिव्यां परां गतिम् ॥ एतत्तवं विदित्वा तु नानुशोचितुमर्हसि ॥ ६८ ॥ नारदेनैवमुक्ते तु श्रुत्वा स द्विजसत्तमः ॥ प्रगम्य शिरसा पादौ निमिरद्भिरमानसः ॥ ६९ ॥ भीतो गद्गदया वाचा निःश्वसंश्च मुहुर्मुहुः ॥ सव्रीडो भाषते विप्रः कारुण्येन समन्वितः ॥ ७० ॥ अहो मुनिवरश्रेष्ठ अहो धर्मविदां वर ॥ सान्त्वितोऽस्मि त्वया विप्र वचनैर्मधुराक्षरैः ॥ ७१ ॥ प्रणयात्तोद्वहाम्यापि स्नेहाद्वक्ष्यामि तच्छृणु ॥ शोको निरन्तरं चित्ते ममेतद्भृदि वर्त्तते ॥ ७२ ॥ कृतस्नेहस्य पुत्रार्थे मया संकल्प्य यत्कृतम् ॥ तर्पयित्वा द्विजान्सप्त अन्नाद्येन फलेन च ॥ ७३ ॥ पश्चाद्विसर्जितं पिण्डं दर्भानास्तीर्य भूतले ॥ उदकानयनं चैव ह्यपसव्येन वासितम् ॥ ७४ ॥ शोकस्य तु प्रभावेण एतत्कर्म मया कृतम् ॥ अनार्येजुष्टमस्वर्ग्यमकीर्त्तिकरणं द्विज ॥ ७५ ॥ नष्टबुद्धिस्मृतिसत्त्वो ह्यज्ञानेन विमोहितः ॥ न च श्रुतं मया पूर्वं न देवर्षिभिः कृतम् ॥ ७६ ॥ भयं तीव्रं प्रपश्यामि मुनिशापात्सुदारुणात् ॥ नारद उवाच ॥ न भेतव्यं द्विजश्रेष्ठ पितरं शरणं व्रज ॥ ७७ ॥ अधर्मं न च पश्यामि धर्मो नैवात्र संशयः ॥ नारदेनैवमुक्तस्तु निमिर्ध्यानमुपाविशत् ॥ ७८ ॥ कर्मणा मनसा वाचा पितरं शरणं गतः ॥ ततोऽतिचिन्तयामास वंशकर्त्तारमात्मनः ॥ ७९ ॥ ध्यायमानस्ततोऽप्याशु आजगाम तपोधनम् ॥ पुत्रशोकेन सन्तप्तं पुत्रं दृष्ट्वा तपोधनम् ॥ ८० ॥ पुत्रमाश्वासयामास वाग्भिरिष्टाभिरव्ययैः ॥ निमे संकल्पितस्तेऽयं पितृयज्ञस्तपोधन ॥ ८१ ॥ पितृयज्ञेति निर्दिष्टा धर्मोऽयं ब्रह्मणा स्वयम् ॥ ततो ह्यतितरो धर्मः क्रतुरेकः प्रतिष्ठितः ॥ ८२ ॥ कृतः स्वयंभुवा पूर्वं श्राद्धं यो विधिवत्तमः ॥ शृण्वतो नारदस्यापि विधिं विधिविदां वरः ॥ ८३ ॥ श्राद्धकर्मविधिं चैव प्रेतकर्म च या क्रिया॥ शृणु सुन्दरि तत्त्वेन यथा दाता सपुत्रकः ॥८४॥ मम चैव प्रसादेन तस्य बुद्धिं ददाम्यहम् ॥ जातस्य सर्वभूतस्य कालमृत्युरुपस्थितः ॥ ८५ ॥ अवश्यमेव गन्तव्यं धर्मराजस्य शासनात् ॥ अमरत्वं न पश्यामि यिपि ब्रह्मादीनि जन्तवः ॥ ८६ ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥ मोक्षः कर्मविशेषेण प्रायश्चित्तेन च ध्रुवम् ॥ ८७ ॥ सत्त्वं रजस्तमश्चैव त्रयः शारीरजाः स्मृताः ॥ अल्पायुषो नराः पश्चाद्भविष्यन्ति युगक्षये ॥ ८८ ॥ सात्त्विकं नाशबुद्धयन्ति कर्मदोषेण तामसः ॥

तामसं नरकं विन्द्यात्तिर्यग्योनिं च राक्षसीम् ॥ ८९ ॥ सात्त्विकं मुक्तियानाय यान्ति वेदविदो जनाः ॥ धर्मज्ञानं तथैश्वर्यं वैराग्यमिति सात्त्विकम् ॥९०॥ क्रूरो भीरुर्विषादि च हिंसको निरपत्रपः ॥ अज्ञानान्यश्च पैशाचमेतेषां तामसा गुणाः ॥९१॥ तामसं तद्विजानीयादुच्यमानो न बुद्ध्यति ॥ दुर्मदोऽश्रद्दधानश्च विज्ञेयास्तामसा नराः ॥ ९२ ॥ प्रबलो वाचि युक्तश्चाचलबुद्धिः सदायतः ॥ शूरः सर्वेषु व्यक्तात्मा विज्ञेया राजसा नराः ॥ ९३ ॥ क्षान्तो दान्तो विशुद्धात्मा विज्ञेयः श्रद्दधान्वितः ॥ तपःस्वाध्यायशीलश्च एतेषां सात्त्विका गुणाः ॥ ९४ ॥ एवं सञ्चिन्त्य यानस्तु न शोकं कर्तुमर्हसि ॥ त्यज शोकं महाभाग शोकः सर्वविनाशनः ॥ ९५ ॥ शोको दहति गात्राणि बुद्धिः शोकेन नश्यति ॥ लज्जा द्युतिश्च धर्मश्च श्रीः कीर्तिश्च स्मृतिर्नयः ॥९६॥ त्यजन्ति सर्वयत्नेश्च शोकेनोपहतं नरम् ॥ एवं शोकं त्यजित्वा तु निःशोको भव पुत्रक ॥९७॥ मूढः स्नेहप्रभावेण कृत्वा हिंसानृते तथा ॥ पच्यते नरके घोरे ह्यात्मदोषैर्विनुन्धरे ॥ ९८ ॥ स्नेहं सर्वेषु संयम्य बुद्धिं धर्मे नियोजयेत् ॥ धर्मलोक हितार्थाय शृणु सत्यं ब्रवीम्यहम् ॥९९॥ चातुर्वर्ण्यस्य वक्ष्यामि यश्च स्वायंभुवोऽब्रवीत् ॥ नेमिप्रभृतिनामवं येन श्राद्धं प्रवर्त्तते ॥१००॥ कण्ठ स्थानं गते जीवे भीतिविभ्रान्तमानसः ॥ ज्ञात्वा च विह्वलं तत्र शीघ्रं निःसार्येद्गृहात् ॥ १०१ ॥ कुशास्तरणशायी च दिशः सर्वा न पश्यति॥ लब्धस्मृतिर्मुहूर्त्तं तु यावज्जीवी न पश्यति ॥१०२॥ वाचयेत्स्नेहभावेन भूमिदेवा द्विजातयः ॥ सुवर्णं च हिरण्यं च यथोत्पन्नेन माधवि ॥१०३॥ परलोकहितार्थाय गोप्रदानं विशिष्यते ॥ सर्वदेवमया गाव ईश्वरेणावतारिताः ॥ १०४ ॥ अमृतं क्षरयन्त्यश्च प्रचरन्ति महीतले ॥ एतासां चैव दानेन शीघ्रं मुच्येत किल्बिषात् ॥१०५॥ पश्चाच्छ्रुतिपथं दिव्यमुत्कर्णेन च श्रावयेत् ॥ यावत्प्राणान्यमुञ्चेत कृत्वा कर्म सुदुष्करम् ॥ १०६ ॥ दृष्ट्वा सुविह्वलं स्नेहं मम मार्गानुसारिणम्॥प्रयाणकाले तु नरो मन्त्रेण विधिपूर्वकम् ॥ १०७ ॥ मंत्रेणानेन कर्त्तव्यं सर्वसंसारमोक्षणम् ॥ मधुपर्कं त्वरन् गृह्य चेमं मन्त्रमुदाहरेत् ॥ १०८ ॥ मन्त्रः—ॐ गृह्णीष्व मे सुविमलं मधुपर्कमाद्यं संसारनाशनकरं त्वमृतेन तुल्यम् ॥ नारायणेन रचितं भगवत्प्रियाणां दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥ १०९ ॥ तत एतेन मन्त्रेण दद्याद्वै मधुपर्ककम् ॥ मृत्युकाले तु पुरुषो परलोकसुखावहम् ॥ ११० ॥ एवं विनिःसृते प्राणे संसारं च न गच्छति ॥ नष्टसंज्ञं समुद्दिश्य ज्ञात्वा मृत्युवशङ्गतम् ॥१११॥ महावनस्पतिं गत्वा गत्वांश्च

॥१९८॥

विधानपि ॥ घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ॥११२ ॥ तेजोऽव्ययकरं चास्य तत्सर्वं परिकल्प्य च ॥ दक्षिणायां शिरः कृत्वा सालिले सन्निधाप्य च ॥११३॥तीर्थाद्याहृतं कृत्वा स्नापनं तस्य कारयेत् ॥ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः॥११४॥ कुरुक्षेत्रं च गङ्गा च यमुना च सरिद्वरा ॥ कौशिकी च पयोष्णी च सर्वपापप्रणाशिनी ॥११५॥ गण्डकी भद्रनामा च सरयूर्बलदा तथा ॥ वनानि नव वाराहे तीर्थे पिण्डारके तथा ॥ ११६ ॥ पृथिव्यां यानि तीर्थानी चत्वारः सागरास्तथा ॥ सर्वाणि मनसा ध्यात्वा स्नानमेवं तु कारयेत् ॥ ११७ ॥ प्राणैर्हतं तु तं ज्ञात्वा चितां कृत्वा विधानतः ॥ तस्या उपरि संस्थाप्य दक्षिणाग्रं शिरस्तथा ॥११८ ॥ दिव्यानग्निमुखान्ध्यात्वा गृह्य हस्ते हुताशनम् ॥ प्रज्वाल्य विधिवत्तत्र मन्त्रमेतमुदाहरेत् ॥११९॥ कृत्वा सुदुष्करं कर्म जानता वाप्यजानता॥ मृत्युकालवशं प्राप्य नरः पंचत्वमागतः ॥१२०॥ धर्माधर्मसमायुक्तो लोभमोहसमावृतः ॥ दह चैतस्य गात्राणि देवलोकं स गच्छतु ॥ १२१ ॥ एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणाम् ॥ ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥ १२२ ॥ चातुर्वर्ण्येषु संस्कारमेवं भवति पुत्रक ॥ गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ॥ १२३ ॥ मृतं नाम तथोद्दिश्य दद्यात्पिण्डं महीतले ॥ तदाप्रभृति चाशौचं देवकर्म न कारयेत् ॥ १२४ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे श्राद्धोत्पत्तिनिरूपणं नाम सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥ अथ पिण्डकल्पश्राद्धोत्पत्तिप्रकरणम् ॥ धरण्युवाच ॥ देवदेवोऽसि देवानां लोकनाथोऽपरिग्रहः ॥ आशौचकर्म विधिवच्छ्रोतुमिच्छामि माधव ॥ १ ॥ श्रीवराह उवाच ॥ आशौचं शृणु कल्याणि यथा शुध्यन्ति मानवाः ॥ गतायुषस्तुतीयेन स्नानं कुर्यान्नरीजले ॥ २ ॥ पिण्डं संचूरणं दद्यात्रींश्च दद्याज्जलाञ्जलीन् ॥ चतुर्थे पंचमे षष्ठे पिण्डमेकं जलाञ्जलिम् ॥ ३ ॥ अन्यस्थानेषु दातव्यं स्नानात्त्वहनि सप्तमे ॥ एवं प्रतिदिनं कार्यं यावच्च दशमं दिनम् ॥ ४ ॥ क्षारादिना वस्त्रशौचं दिने च दशमे तथा ॥ तिलामलकक्षेदेन गोत्रजः स्नानमाचरेत् ॥ ५॥ पिण्डदानं विवर्त्यार्थं क्षौरकर्म तु कारयेत् ॥ स्नानं कृत्वा विधानेन ज्ञातिभिः स्वगृहं व्रजेत् ॥ ६ ॥ एकादशे च दिवसे एकोद्दिष्टं यथाविधि ॥ स्नात्वा चैव शुचिर्भूत्वा प्रेतं विप्रेषु योजयेत् ॥ ७ ॥ एकोद्दिष्टं मनुष्याणां चातुर्वर्ण्यस्य माधवि॥ यथैकं द्रव्यसंयुक्तं स्वं विप्रं भोजयेत्तदा ॥८॥ स्नात्वा चैवं शुचिर्भूत्वा प्रेतं प्रेतेषु योजयेत् ॥ एकोद्दिष्टं तु द्रव्याणां चातु

वर्ण्यस्य माधवि॥९॥अपाकद्रव्यं संगृह्य ब्रह्मणो वचनं यथा॥त्रिषु वर्णेषु कर्त्तव्यं पाकभोजनमित्युत॥१०॥ शुश्रूषया विपन्नानां शूद्राणां च वरानने॥त्रयोदश्यां दिने प्राप्ते सुपक्वैर्भोजयेद्विजान् ॥११॥ मृतस्य नाम चोद्दिश्य यस्यार्थं च प्रयोजितः ॥स्वर्गतस्यैति सङ्कल्प्य कृत्वा ब्राह्मणमन्दिरम् ॥ १२ ॥ गत्वा निमन्त्रितं विप्रं नम्रो भूत्वा समाहितः ॥ मन्त्रेणानेन भो देवि मनस्येव पठन्ति तम् ॥ १३ ॥ गतोऽसि दिव्यलोके त्वं कृतान्तविहितेन च ॥ मनसा वायुभूतस्त्वं विप्रमेनं समाश्रय ॥ १४ ॥ अस्तङ्गते तथादित्ये गत्वा ब्राह्मणमन्दिरम् ॥ दत्त्वा तु पाद्यं विधिवन्नमस्कृत्य द्विजोत्तमम् ॥ १५ ॥ पादसंवाहनं कार्यं प्रेतस्य हितकाम्यया ॥ प्रेतभोगशरीरे तु ब्राह्मणस्य च सुन्दरि ॥१६॥ यावत्तु तिष्ठते तत्र प्रेतभोगमुदीक्षते ॥ तावन्न संस्पृशेद्भूमे मम गात्रं प्रतिष्ठितम् ॥१७॥ प्रभातायां तु शर्वर्यामुदिते च दिवाकरे ॥ स्नपयुकर्म प्रकर्त्तव्यं विप्रस्य तु यथाविधि॥१८॥स्नापनाभ्यञ्जनं कार्यं प्रेतसन्तोषदायकम्॥गृहीत्वा भूमिभागं च स्थण्डिलं तत्र कारयेत्॥१९॥निपातदेशं संगृह्य शुचिदेशे समाहितः॥नदीकूले निखाते वा प्रेतभूमिं विनिर्दिशेत्॥२०॥ चतुःषष्टिकृतं भगं यथावत्सुकृतं भवेत्॥ततो दक्षिणपूर्वेषु दिग्विभागेषु सुन्दरि ॥२१ ॥ छायायां कुंजरस्यापि नदीकूलद्रुमे तथा ॥ चाण्डालादिग्रहीणे तु प्रेतकार्यं समाचरेत् ॥२२॥ यं देशं च न पश्यन्ति कुक्कुटश्वानशूकराः ॥ श्वा चापोहति रावेण गर्जितेन च शूकरः ॥ २३ ॥ कुक्कुटः पक्षवातेन चाण्डालश्च यथा घरे ॥ तत्र कुर्वन्ति ये श्राद्धं पितॄणां बन्धनप्रदम् ॥ २४ ॥ वर्जनीया बुधैरेते प्रेतकार्येषु सुन्दरि ॥ देवतासुरगन्धर्वाः पिशाचोरगराक्षसाः ॥ २५ ॥ नागा भूतानि यज्ञाश्च ये च स्थावरजङ्गमाः ॥ स्नानं कृत्वा यथा देवि तव पृष्ठे प्रतिष्ठिताः ॥ २६ ॥ धारयिष्यामि सुश्रोणि विष्णुमायाततं जगत् ॥ चण्डालमादितः कृत्वा नराणां तु शुभाशुभम् ॥ २७ ॥ स्नानं कुर्वन्तु ते भूमे स्थण्डिले तदनन्तरे ॥ अकृत्वा पृथिवीभागं निवापं ये तु कुर्वते ॥ २८॥ त्वदधीनं जगद्भद्रे तवोच्छिष्टं हतं भवेत् ॥ न देवाः पितरस्तस्य गृह्णन्तीह कदाचन ॥ २९ ॥ पतन्ति नरके घोरे तेनोच्छिष्टेन सुन्दरि ॥ स्थण्डिले प्रेतभागं तु दद्यात्पूर्वाह्णिकं तु तम् ॥ ३० ॥ कृत्वा तु पिण्डसङ्कल्पं नामगोत्रेण माधवि ॥ पश्चादश्नन्ति गोत्राणि कुलजाश्चैकभोजनाः ॥ ३१ ॥ न दद्यादन्यगोत्रेभ्यो ये न भुञ्जन्ति तत्र वै ॥ चतुर्णामपि वर्णानां प्रेतकार्येषु सुन्दरि ॥ ३२ ॥ एवं दत्तेन प्रीयन्ते प्रेतलोकगता॥१९२॥

नराः ॥ अदत्त्वा प्रेतभागं तु भुङ्क्ते यस्तत्र मानवः ॥ ३३ ॥ गत्वा महानदीं सोऽपि सचैलं स्नानमाचरेत् ॥ तथाऽनि मनसा गत्वा त्रिभिरभ्युक्षयेद्भुवम् ॥ ३४ ॥ एवं शुद्धिं ततः कृत्वा ब्राह्मणान् शीघ्रमानयेत् ॥ आगतांश्च द्विजान् दृष्ट्वा कर्त्तव्या स्वागतक्रिया ॥३५॥ अर्घ्यं पाद्यं ततो दद्याद्धूपयेत्तान् माधवि ॥ आसनं चोपकल्पेत मन्त्रेण विधिपूर्वकम् ॥३६॥ मन्त्रः—इदं ते आसनं दत्तं विश्रामं क्रियतां द्विज॥ कुरुष्व मे प्रसादं च सुप्रतीदं द्विजोत्तम ॥ ३७ ॥ उपवेश्यासने विप्रं छत्रं सङ्कल्पयेत्पुनः ॥ निवारणार्थमाकाशे भूता गगनचारिणः ॥३८॥ देवगन्धर्व यक्षाश्च सिद्धसंघा महासुराः ॥ धारणार्थं तथाकाशे छत्रं तेजस्विनां कृतम् ॥ ३९ ॥ प्रेतस्य च हितार्थाय धारयेत वसुन्धरे ॥ पूर्वं संदृष्टतुष्टेन प्रेतभागं च दापयेत् ॥ ४० ॥ छत्रमावरणार्थं तु दद्याच्चैव द्विजातये ॥ आकाशे तत्र पश्यन्ति देवाः सिद्धपुरोगमाः ॥४१॥ गन्धर्वा ह्यसुराः सिद्धा राक्षसाः पिशिताशिनः ॥ दृश्यमानेषु सर्वेषु प्रेतः संव्रीडितो भवेत् ॥४२॥ व्रीडमानं ततो दृष्ट्वा हसंत्यसुरराक्षसाः ॥ एवं निवारणं छत्रमादित्येन कृतं पुरा॥४३॥प्रेतलोकगतानां च सर्वदेवार्पणां पुरा ॥ अग्निवर्षं शिलावर्षं ततं तत्र जलोदकम्॥४४॥ भस्मवर्षं ततो घोरमहोरात्रेण माधवि ॥ एवं निवारणं छत्रं दद्याद्विप्राय माधवि ॥४५॥ पश्चाद्दुपानहौ दद्यात्पादस्पर्शकरे शुभे ॥ उपानहोश्च वक्ष्यामि दाने भवति यत्फलम् ॥ ४६ ॥ पादौ च ते न दह्येतां यमस्य विषयं गते ॥ तमोऽन्धकारविषमं दुर्गमं घोरदर्शनम् ॥४७॥ एकाकी दुःसहं लोके पथा येन स गच्छति ॥ कालो मृत्युश्च दूतश्च यष्टिमुद्यम्य पृष्ठतः ॥ ४८ ॥ अहोरात्रेण घोरेण प्रेतं नयति माधवि ॥ दद्यात्तदर्थं विप्राय पद्भ्यां च सुखावहे ॥ ४९ ॥ ततवालु मयी भूमिः कण्टकैरुपसंस्तृता ॥ तेन दुर्गाणि तरति दत्तयोपानहाद्य वै ॥ ५० ॥ पश्चाद्रूपं च दीपं च दद्याद्धैमं मन्त्रपूर्वकम् ॥ याति येन विजानी यात्पृथक्प्रेतेन योजयेत् ॥ ५१ ॥ नामगोत्रमुदाहृत्य प्रेताय तदनन्तरम् ॥ शीघ्रमावाहयेद्धीमे दर्भपात्रे च भूतले ॥५२॥ मन्त्रः—इह लोकं परि त्यज्य गतोऽसि परमां गतिम् ॥ गृह्ण गन्धं मुदा युक्तो भक्त्या प्रेतोपपादितम् ॥ ५३ ॥ गन्धमन्त्रः—सर्वगन्धं सर्वपुष्पं धूपं दीपं तथैव च ॥ प्रतिगृह्णीष्व विप्रेन्द्र प्रेतमोक्षप्रदो भव ॥ ५४ ॥ एवं वस्त्राणि विप्राय सर्वोण्याभरणानि च ॥ पुनः पुनश्च पक्वान्नं प्रयच्छेत्तु वसुन्धरे ॥ ५५ ॥ एवमादीनि द्रव्याणि प्रेतभोग्यानि सर्वशः ॥ पादशौचादि त्रिःकृत्वा चातुर्वर्ण्यस्य माधवि ॥५६॥ एवंविधिः प्रयोक्तव्यः शूद्राणां मन्त्रवर्जितम् ॥

अमन्त्रस्य च शूद्रस्य विप्रो गृह्णाति मन्त्रतः ॥५७॥ एतत्सर्वं विनिर्वर्त्य पक्वान्नं भोजयेद्द्विजम् ॥ भोक्ष्यमाणेन विप्रेण ज्ञानशुद्धेन सुव्रति ॥५८॥ प्रेताय प्रथमं दद्यान्न स्पृशेत परात्परम् ॥ सर्वं व्यञ्जनसंयुक्तं प्रेतभागं प्रकल्पयेत् ॥५९॥ देवत्वं ब्राह्मणत्वं च प्रेतपिण्डे प्रदीयते ॥ मानुषत्वं निवापेषु ज्ञातव्यं सततं बुधैः ॥६०॥ पितृस्थाने प्रदातव्यं विधानान्मन्त्रसंयुतम् ॥ एवं प्रेतेषु विप्रेषु एव कालो न विद्यते ॥ ६१॥ हस्तशौचं पुनः कृत्वा द्युपस्पृश्य यथाविधि ॥ समन्त्रं प्रतिगृह्णाति पक्वान्नं भक्ष्यभोजनम् ॥ ६२ ॥ भुज्यमानस्य विप्रस्य प्रेतभागं च नित्यशः ॥ ज्ञातिवर्गेषु गोत्रेषु सम्बन्धिस्वजनेषु च ॥ ६३ ॥ भागस्तत्र प्रदातव्यस्तस्यार्थे यस्य विद्यते ॥ विप्राय दीयमाने तु वारणीयं न केनचित् ॥ ६४ ॥ निवारयति यो दत्तं गुरुहत्याफलं लभेत् ॥ न देवाः प्रतिगृह्णन्ति नाग्नयः पितरस्तथा ॥६५ ॥ एवं विलुप्यते धर्मः प्रेतस्तत्र न तुष्यति ॥ एवं विचिन्त्यमानस्य यथा धर्मो न लुप्यते ॥ ६६ ॥ ज्ञातिसम्बन्धिमध्ये तु यो दद्यात्प्रेतभोजनम् ॥ हृष्टेन मनसा विप्रे प्रेतभागं विशेषतः ॥ ६७ ॥ कूटवत्प्रतितिष्ठेत दृष्ट्वा तृप्तिं न गच्छति ॥ एवं तु प्रेतभावेन शीघ्रं मुञ्चति किल्बिषात् ॥ ६८ ॥ तृप्तिं ज्ञात्वा तु विप्रस्य पक्वान्नेन तु माधवि ॥ दातव्यमुदकं तस्य पाणावभ्युक्षणं ततः ॥ ६९ ॥ दृष्ट्वा तु प्रोक्षितं तेन उच्छिष्टं न विसर्जयेत् ॥ ब्राह्मणे नाप्यनुज्ञातः शीघ्रं संरभ्येत्ततः ॥ ७० ॥ दातव्यं तत्र चोच्छिष्टं येन हेतुमगर्हितम् ॥ उपस्पृश्य विधानेन मम तीर्थगतेन च ॥ ७१ ॥ शुचिर्भूत्वा तु विधिवत्कृत्वा शान्त्युदकानि तु ॥ प्रणम्य शिरसा देवि निवापस्थानमागतः ॥ मन्त्रैः स्तुतिस्तु कर्त्तव्या तव भक्त्याऽवतिष्ठता ॥ ७२ ॥ नमो नमो मेदिनि लोकमातरुर्व्यै महाशैलशिलाधारायै ॥ नमो नमो धारिणि लोकधात्रि जगत्प्रतिष्ठे वसुधे नमोऽस्तु ते ॥७३ ॥ एवं निवापदानेन तव भक्तेन सुन्दरि ॥ दद्यात्तिलोदकं तस्य नामगोत्रमुदाहरेत् ॥ ७४ ॥ जानुभ्यामवनिं गत्वा नमस्कुर्त्य द्विजोत्तमान् ॥ पाणिं संगृह्य हस्तेन मन्त्रेणोत्थापयेद्द्विजान् ॥७५॥ दद्याच्छय्यासनं देवि तथैवाञ्जनकङ्कणम् ॥ अंजनं कंकणं गृह्य शय्यामाक्रम्य स द्विजः ॥७६॥ मुहूर्त्तं तत्र विश्रम्य निवापस्थानमागतः ॥ गवां लांगूलमुद्धृत्य दद्याद्ब्राह्मणहस्तके ॥७७॥ पात्रेणोदुम्बरस्थेन कृत्वा कुणातिलोदकम् ॥ उदाहरेत्तु मन्त्रांश्चै सौरभेयान् द्विजातयः ॥ ७८ ॥ मन्त्रपूतं तदा तोयं सर्वपापप्रणाशनम् ॥ उद्धृत्य तत्र लांगूलं तोयेनाभ्युक्ष्य वै ततः ॥ ७९ ॥ पश्चात्प्रेतं विसर्ज्यैवं

दद्याद्दानं द्विजातये ॥ निवापमन्नमशुचिं दद्याद्यावसतर्पणम्॥८०॥गत्वा तु ब्राह्मणेभ्योऽपि स्वगृहं यत्र तिष्ठति ॥ पक्वान्नं भोजयेत्सर्वं न तिष्ठेत् प्रतिवासिकम् ॥ ८१ ॥ पिपीलिकादिभूतानि प्रेतभागं च सर्वशः ॥ कृत्वा तु तर्पणं देवि यस्यार्थे तस्य कल्पयेत् ॥ ८२ ॥ भुक्तेषु तेषु सर्वेषु दीनानाथान् प्रतर्प्य च॥प्रेतराजपुरं गत्वा प्रयच्छति स माधवि॥८३॥सर्वान्नमक्षयं तस्य दत्तं भवति सुन्दरि॥ कर्त्तव्य एवं संस्कारः प्रेतभावविशोधनः॥८४॥नेमिप्रभृतिभिः शौचं चातुर्वर्ण्यस्य सर्वतः॥भविष्यति न सन्देहो दृष्टपूर्वं स्वयम्भुवा॥८५॥कृत्वा तु धर्मसंकल्पं प्रेतकार्यं विशेषतः॥ न भेतव्यं त्वया पुत्र प्रेतकार्ये कृते सति ॥८६॥ विस्तरेण मया प्रोक्तं प्रत्यक्षं नारदस्य च॥त्वया वत्स सुतस्यार्थं कर्तुरेकः प्रतिष्ठितः ॥८७॥ तस्मात्प्रभृति लोकेषु पितृयज्ञो भविष्यति ॥ एवं यास्यसि वत्स त्वं न शोकं कर्तुमर्हसि ॥ ८८ ॥ शिवलोकं ब्रह्मलोकं विष्णुलोकं न संशयः॥ एवमुक्त्वा तदात्रेयः पितृकर्म यथाविधि ॥८९॥ दातव्यं तु तृतीये च मासे सप्तनवेषु च ॥ एकादशे तथा मासे दद्यात्सांवत्सरीं क्रियाम्॥९०॥ प्रेतस्यायाहनं कृत्वा शुचिर्भूत्वा समाहितः ॥ पक्वान्नं भोजयेत्तत्र प्रेतभागं यथाविधि ॥९१ ॥ मन्त्रयुक्तोपचारेण चातुर्वर्ण्यस्य सर्वतः ॥ वृषलानामन्त्राणां प्रयोक्तव्यं यथाविधि ॥ ९२ ॥ प्रेतकार्ये निवृत्ते तु पूर्णे संवत्सरे तथा ॥ प्रयान्ति जन्तवः केचिद्गत्वा गच्छन्ति चापरे ॥ ९३ ॥ पितामहः सुषा भार्या ज्ञातिसम्बन्धिबान्धवाः ॥ यद्येते बहवः सन्ति स्वप्नोपमामिदं जगत् ॥ ९४ ॥ स्वयं मुहूर्त्तं रोदित्वा ततो याति पराङ्मुखः ॥ स्नेहपाशेन बद्धो वै क्षणाद्धोन्मुच्यते ततः ॥९५ ॥ कस्य माता पिता कस्य कस्य भार्या सुतास्तथा ॥ युगे युगे तु वर्त्तन्ते मोहपाशेन बध्यते ॥९६॥ स्नेहभावेन कर्त्तव्यः संस्कारो हि मृतस्य च ॥ मातापितृसहस्राणि पुत्रदारशतानि च ॥ ९७॥ संसारेष्वनुभूतानि कस्य ते कस्य वा वयम् ॥ स्वयम्भुवा विधिः प्रोक्तः प्रेतसंस्कारलक्षणः ॥ ९८ ॥ प्रेतकार्ये निवृत्ते तु पितृत्वमुपजायते ॥ मासि मासि ह्यमायां वै कर्त्तव्यं पितृतर्पणम् ॥९९॥ पिता पितामहश्चैव तथैव प्रापितामहः ॥ जुहुयाद्ब्राह्मणमुखे तृप्तिर्भवति शाश्वती ॥ १००॥ एवमुक्त्वा स आत्रेयः पितृयज्ञविनिश्चयम् ॥ मुहूर्तं ध्यानमास्थाय तत्रैवान्तरधीयत ॥ १०१ ॥ नारद उवाच ॥ श्रुत्वा तु मृतसंस्कारमात्रेयोक्तं यथाविधि ॥ चातुर्वर्ण्यस्य सर्वस्य त्वया धर्मः प्रतिष्ठितः ॥ १०२ ॥ पितृयज्ञमुपश्राद्धे मासि मासि दिने तथा ॥ वर्त्तयन्ति यथान्यायमृषयश्च तपोधनाः ॥ १०३ ॥

निर्दिष्टं ब्राह्मणानां वै शूद्राणां मन्त्रवर्जितम् ॥ नेमिना च कृतं श्राद्धं ततःप्रभृति वै द्विजाः ॥ १०४ ॥ कुर्वन्ति सततं श्राद्धं नेमिश्राद्धं तदुच्यते ॥ स्वस्त्यस्तु ते महाभाग यास्यामि मुनिसत्तम ॥ १०५ ॥ एवमुक्त्वा मुनिश्रेष्ठो नारदो द्विजसत्तमः ॥ तेजसा द्योतयन्सर्वं गतः शक्रपुरं प्रति ॥ १०६ ॥ एवं च पिण्डसंकल्पं श्राद्धोत्पत्तिश्च माधवि ॥ आत्रेयेणैव मुनिना स्थापितं ब्राह्मणेषु च ॥ १०७ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे पिण्डकल्पश्राद्धोत्पत्तिर्नामाष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥ अथ पिण्डकल्पोत्पत्तिप्रकरणम् ॥ धरण्युवाच ॥ श्रुतं श्राद्धं यथावृत्तं शौचाशौचांश्च सर्वशः ॥ चतुर्णामपि वर्णानां प्रेतभोज्यं यथाविधि ॥ १ ॥ उत्पन्नं संशयं मेऽद्य भगवन्वक्तुमर्हसि ॥ चातुर्वर्ण्येषु सर्वेषु दद्याद्दानं द्विजोत्तमे ॥ २ ॥ प्रतिगृह्णन्ति ये तत्र प्रेतभागं विशेषतः ॥ अनिष्टं गर्हितं तत्र प्रेतेन सह भोजनम् ॥ ३ ॥ भुक्त्वा तेषां द्विजो देव मुच्यते केन कर्मणा ॥ कथं ते तारयिष्यन्ति दातारं पुरुषोत्तम ॥ ४ ॥ प्रणयात्स्वीस्वभावेन पृच्छामि त्वां जनार्दन ॥ एवमुक्तोऽपि भूम्याऽसौ शंखदुन्दुभिनिःस्वनः ॥ ५ ॥ वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥ श्रीवराह उवाच ॥ साधु भूमे वरारोहे यन्मां त्वं परिपृच्छसि ॥ ६ ॥ कथयिष्यामि ते देवि तारयन्ति यथा द्विजाः ॥ भुक्त्वा तु प्रेतभोज्यानि ब्राह्मणो ज्ञानदुर्बलः ॥ ७ ॥ विशोधनार्थं देहस्य उपवासं तु कारयेत् ॥ अहोरात्रोषितो भूत्वा विप्रो ज्ञानेन संयुतः ॥ ८ ॥ पूर्वसंध्यां विनिर्वर्त्य कृत्वा चैवाग्नितर्पणम् ॥ तिलहोमं प्रकुर्वीत शान्तिमङ्गलपाठकः ॥ ९ ॥ प्राक्स्रोतसं नदीं गत्वा स्नानं कृत्वा विधानतः ॥ पंचगव्यं ततः पीत्वा मधुपर्केण संयुतम् ॥ १० ॥ औदुम्बरे च पात्रे च कृत्वा शान्त्युदकानि च ॥ प्रोक्षयेच्च गृहं सर्वं यत्रातिष्ठत्स्वयं द्विजः ॥ ११ ॥ देवाश्चाग्निमुखाः सर्वे तर्पयित्वा विभागशः ॥ भूतानां च बलिं दद्याद्ब्राह्मणेभ्यश्च भोजनम् ॥ १२ ॥ एका गोस्तु प्रदातव्या पापक्षयकरी तदा ॥ एवं तु कुरुते यश्च स याति परमां गतिम् ॥ १३ ॥ प्रेतान्नं चोदरस्थे तु कालधर्ममुपागतः ॥ आकल्पं नरके घोरं वसमानः सुदुःखितः ॥ १४ ॥ प्राप्नोति राक्षसत्वं वै ततो मुच्येत किल्बिषात् ॥ प्रायश्चित्तं तु कर्तव्यं दातृभोक्तृसुखावहम् ॥ १५ ॥ गोहस्त्यश्वधनादीनि सागरान्तानि माधवि ॥ प्रतिगृह्णन्ति ये विप्रा मन्त्रेण विधिपूर्वकम् ॥ १६ ॥ प्रायश्चित्तं चरेद्यस्तु स तारयति निश्चितम् ॥ द्विजो ज्ञानेन सम्पन्नो वेदाभ्यासरतः सदा ॥ १७ ॥ स तारयति चात्मानं

दातारं नैव संशयः ॥ ब्राह्मणो नावमन्तव्यस्त्रिभिर्वर्णैर्धराधरे ॥ १८ ॥ दैवे च जन्मनक्षत्रे श्राद्धकाले च पर्वसु ॥ प्रेतकार्येषु सर्वेषु परीक्ष्य निपुणं द्विजम् ॥ १९ ॥ वेदविद्याव्रतस्नातं बुद्धधर्मनिरन्तरम् ॥ शीलयुक्तं सुसन्तुष्टं धर्मज्ञं सत्यवादिनम् ॥ २० ॥ क्षमायुक्तं च शास्त्रज्ञमहिंसायां रतं तथा ॥ एभिर्गुणैस्तु संयुक्तं ब्राह्मणं प्राप्य सत्वरः ॥ २१ ॥ दद्याद्दानानि विप्राय स वै तारयितुं क्षमः ॥ कुण्डगोलेषु यद्दत्तं निष्फलं तत्तु जायते ॥ २२ ॥ कुण्डगोलं प्रतिग्राहि दातारं चाप्यधो नयेत् ॥ पित्र्ये कर्मणि चैकं तु कुण्डं वा गोलकं तथा ॥ २३ ॥ दृष्ट्वा तं पितरो यान्ति निराशा निरयं द्रुतम् ॥ दैवे कर्मणि चैवं तु तेषां दत्तं सुनिष्फलम् ॥ २४ ॥ तस्मादानं न दातव्यमपात्राय यशास्विनि ॥ अत्रार्थे यत्पुरा वृत्तं तच्छृणुष्व वसुन्धरे ॥२५॥ अवन्तीविषये कश्चिद्राजा ह्यत्यन्तधार्मिकः ॥ नाम्ना मेधातिथिश्चैव मनुवंशविवर्द्धनः ॥ २६ ॥ राज्ञः पुरोहित श्चासीच्चन्द्रशर्म्मा द्विजोत्तमः ॥ अत्रोयगोत्रे चोत्पन्नो वेदवादरतः सदा ॥ २७ ॥ स राजा ब्राह्मणेभ्यश्च गा ददाति दिने दिने ॥ शतं दत्त्वा विधानेन पश्चाद्भुङ्क्ते नराधिपः ॥ २८ ॥ गते बहुतिथे काले राज्ञो मेधातिथेः पितुः ॥ श्राद्धस्य दिवसः प्राप्तो वैशाखे वरवर्णिनि ॥ विप्रानाह्वापयामास पितुर्वै श्राद्धकारणात् ॥ २९ ॥ आगतान्ब्राह्मणान्दृष्ट्वा मेधातिथिरकल्मषः ॥ विप्रान्नत्वा गुरुं चैव श्राद्धारम्भमथाकरोत् ॥ ३० ॥ श्राद्धं कृत्वा तु विधिवत्पिण्डान्निर्वाप्य यत्नतः ॥ श्राद्धसंकल्पितं चान्नं विप्रेभ्यः प्रददौ बहु ॥ ३१ ॥ तन्मध्ये ब्राह्मणः कश्चिद्गोलकोऽवस्थित स्तदा ॥ श्राद्धे संकल्पितं चान्नं तस्मै दत्तं विधानतः ॥ ३२ ॥ तेनैव श्राद्धदोषेण राज्ञस्तु पितरस्तदा ॥ स्वर्गोद्भ्रष्टा अलम्बन्ते वने कण्टक स्तदा ॥ श्राद्धे संकल्पितं चान्नं तस्मै दत्तं विधानतः ॥ ३३ ॥ क्षुत्पिपासार्दिता नित्यं क्रन्दन्ते च पुनः पुनः ॥ कदाचिद्दैवयोगेन राजा मेधातिथिः स्वयम्॥३४॥मृगयार्थं गतस्तत्र द्वित्रैः परिजनैर्वृतः ॥ तत्रावलम्बतो दृष्ट्वा तानपृच्छद्विजप्रियः ॥ ३५ ॥ के भवन्तोऽत्र संप्राता दृशामेतां सुदुःखिताः ॥ केन कर्मविपाकेन भवन्तः कथ यन्तु मे ॥ ३६ ॥ पितर ऊचुः ॥ अस्मद्दशंकरो नित्यं नाम्ना मेधातिथिः प्रभुः ॥ वयं तस्यैव पितरो नरकं गन्तुमुद्यताः ॥३७॥ तेषां तु वचनं श्रुत्वा राजा दुःखसमन्वितः ॥ उवाच तान्पितॄन्सर्वान्सान्त्वपूर्वमिदं वचः ॥३८ ॥ मेधातिथिरुवाच॥ मेधातिथिरहं नाम्ना भवन्तः पितरो मम ॥ केन वै कर्मदोषेण निरयं गन्तुमुद्यताः ॥ ३९ ॥ पितर ऊचुः ॥ श्राद्धं संकल्पितं चान्नं दत्तं तद्गोलकाय वै ॥ तेनैव कर्मदोषेण नरकं

गन्तुमुद्यताः ॥ ४० ॥ तत्र दुःखं महद्भुक्त्वा पुनर्गच्छामहे दिवम् ॥ पुत्र त्वं चैव दाता च सर्वलोकहिते रतः ॥ ४१ ॥
असंख्यातास्त्वया दत्ता गावः सुबहुदक्षिणाः॥ तेन पुण्येन गच्छामः स्वर्गं ह्यतिसुखप्रदम्॥४२॥तत्र चान्नं न विद्येत येन तृप्तिर्भविष्यति ॥ पुनः
श्राद्धं त्वया कार्यं पितृणां तृप्तिदायकम् ॥ ४३॥ तेषां तु वचनं श्रुत्वा मेधातिथिरगाद्गृहम् ॥ आहूय चन्द्रशर्माणं गुरुं वचनमब्रवीत् ॥ ४४ ॥
मेधातिथिरुवाच ॥ चन्द्रशर्मन्पुनः श्राद्धं करिष्ये पितुरद्य वै ॥ आहूयन्तां द्विजाः सर्वे कुण्डगोलकवर्जिताः ॥ ४५ ॥ इत्युक्तमात्रे वचने चन्द्र
शर्मा पुरोहितः ॥ आहूतवाद्विजान्सर्वान्वेदपाठकृतश्रमान् ॥ ४६॥ साधून्क्षांताञ्कुलीनांश्च सुशीलान्मानवर्जितान् ॥ राज्ञा तु कारयामास श्राद्धं
विधिविदां वरः ॥ ४७ ॥ कृते श्राद्धे ततः पश्चात्पिण्डान्निर्वाप्य यत्नतः ॥ ब्राह्मणान्भोजयामास दक्षिणाभिः प्रपूज्य च ॥ ४८ ॥ पश्चाद्विसर्जया
मास स्वयं तु बुभुजे नृपः ॥ भुक्त्वा पुनर्वेनं गत्वा दृष्टवांश्च स्वकान्पितॄन् ॥४९॥ हृष्टान्पुष्टान्बलैर्युक्तान्राजा तु मुमुदे भृशम् ॥ दृष्ट्वा तु पितर
श्चैवं राजानं पितृवत्सलम् ॥ ५० ॥ ऊचुर्विनयसम्पन्नाः प्रीतिपूर्वमिदं वचः॥स्वस्ति तेऽस्तु गमिष्यामः स्वर्गलोकं प्रति प्रभो ॥ ५१ ॥ इदानीं
च त्वया कार्यमस्माद्धितमनुत्तमम् ॥ गोलकाय न दातव्यं दैवे पित्र्यमथापि वा ॥ ५२ ॥ तयोर्दत्तं तु यच्छ्राद्धं निष्फलं तत्स्मृतं बुधैः ॥ दैवे
कर्माणि पित्र्ये च ब्राह्मणो नैव लभ्यते ॥ ५३॥ सङ्कल्पयित्वा चान्नं तु गोभ्यो देयं यथाविधि ॥ गवामभावे नद्यां वा क्षिपेदन्नं प्रयत्नतः ॥ ५४ ॥
अपात्राय न दातव्यं नास्तिकाय गुरुद्रुहे ॥ गोलकाय न दातव्यं कुण्डाय च विशेषतः ॥५५॥ इत्युक्त्वा पितरः सर्वे गताः स्वर्गाय भामिनि ॥
मेधातिथिरपि प्रायात्स्वपुरं ब्राह्मणैर्वृतः॥५६॥ यदुक्तं पितृभिः सर्वं तच्चकार मुदा युतः ॥ तस्मात्ते कथितं देवि एकोऽपि ब्राह्मणोत्तमः ॥५७॥
सन्तारयति दुर्गेभ्यो विषमेभ्यो न संशयः ॥ एकोऽपि तारितुं शक्तो यथा नावा महज्जलम् ॥५८॥ तस्माद्दानं प्रदातव्यं ब्राह्मणाय वसुन्धरे ॥
देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ॥ ५९ ॥ सर्वे श्राद्धं करिष्यन्ति निमिप्रभृतयो धरे ॥ मासे मासे च वै पश्चात्पितृपक्षे तपोधनाः ॥ ६० ॥
इति श्रीवराहपुराणे भगवच्छास्त्रे पिण्डकल्पोत्पत्तिर्नामैकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥ अथ श्राद्धपितृयज्ञानिश्चयप्रकरणम् ॥
धरण्युवाच ॥ देवमानुषतिर्यक्षु प्रेतेषु नरकेषु च ॥ आयान्ति जन्तवः केचिद्भूत्वा गच्छन्ति चापरे ॥ १ ॥ स्वप्नोपममिमं लोकं ह्यात्मकर्म

शुभाशुभम् ॥ वर्त्तते तिष्ठते देव तव मायाबलैर्जगत् ॥ २ ॥ क एते पितरो देव श्राद्धं भोक्ष्यन्ति योगतः ॥ आत्मकर्मवशाल्लोके गतिः पञ्चसु वर्त्तते ॥ ३ ॥ कथं तं पिण्डसङ्कल्पं मासे मासे नियोजयेत् ॥ के भवन्ति च भोक्तारः श्राद्धे पिण्डान्वितृक्रियाः ॥ ४ ॥ निश्चयं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ पृथिव्या एवमुक्तस्तु देवो नारायणो हरिः ॥५॥वराहरूपी भगवान्प्रयुवाच वसुन्धराम्॥ श्रीवराह उवाच ॥ साधु भूमे वरारोहे सर्वधर्मव्यवस्थिते ॥ ६ ॥ कथयिष्यामि ते देवि यन्मां त्वं पीरपृच्छसि ॥ ये ते भवन्ति भोक्तारः पितृयज्ञेषु माधवि ॥७॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ क्रियते पिण्डसङ्कल्पो मासे ह्येकदिने तथा॥८॥ज्ञात्वा नक्षत्रसंयोगं पितृपक्षे व्युपागते ॥ तिथिं पर्व विजानीयाद्येषु दत्तं महत्फलम् ॥ ९ ॥ करिष्यन्ति च ये श्राद्धं श्रद्धया ज्ञानिनो जनाः ॥ तत्सर्वं कथयिष्यामि शृण्वतां शुभलोचने ॥ १० ॥ केचिद्यजन्ति यज्ञं वै ब्रह्मयज्ञं द्विजातयः ॥ केचिद्यजन्ति सुभगे देवयज्ञं हुताशने ॥ ११॥ केचिच्च भूतयज्ञेन वर्त्तयन्ति सुमध्यमे ॥ केचिन्मनुष्ययज्ञेन पूजयन्ति गृहाश्रमे ॥ १२ ॥ पितृयज्ञं च भो देवि शृणु वक्ष्यामि निश्चयम् ॥ ये यजन्ति वरारोहे क्रतूनेकशतेरपि ॥ १३ ॥ सर्वे ते मयि वर्त्तन्ते सत्यमेतद्ब्रवीमि ते ॥ अग्निर्मुखं च देवानां हव्यकव्येषु माधवि ॥ १४ ॥ उत्तरोऽग्निरहं चैव दक्षिणाग्निरहं तथा ॥ अहमाहवनीयोऽग्निः सर्वयज्ञेषु सुन्दरि ॥ १५ ॥ पावनः पावकश्चैव अहमेव व्यवस्थितः ॥ सर्वेष्वेव तु कार्येषु देवसञ्ज्ञेषु माधवि॥ १६॥ वैश्वदेवे नियुञ्जीत ब्रह्मचारी शुचिः सदा ॥ भिक्षुको देवतीर्थेषु वानप्रस्थो यतिस्तथा ॥ १७ ॥ एतान्न भोजयेच्छ्राद्धे देवतार्थेषु पूजयेत् ॥ व्रतस्थान्संप्रवक्ष्यामि श्राद्धमर्हन्ति ये द्विजाः ॥ १८ ॥ उत्तमो गृहसन्तुष्टः क्षान्तो दान्तो जितेन्द्रियः ॥ उदासीनः सत्यसन्धः श्रोत्रियो धर्मपाठकः ॥ १९ ॥ वेदविद्याव्रतस्नातो सुविभृष्टान्नभोजकः ॥ ईदृशान्भोजयेच्छ्राद्धे पितृयज्ञेषु माधवि ॥ २० ॥ दत्त्वा हुताशनायादौ देवतीर्थेषु सुन्दरि ॥ मुखेषु पश्चाद्ब्राह्मणस्य पित्रे दद्याद्यथाविधि ॥ २१ ॥ चतुर्णामेव वर्णानां यद्यथा श्राद्धमर्हति ॥ तथा विधिः प्रयोक्तव्यः पितृयज्ञेषु सुन्दरि ॥ २२ ॥ यत्र पश्यन्ति ते भोज्यं श्वानः कुक्कुटसूकराः ॥ ब्राह्मणाश्चाप्यपांक्तेया नराः संस्कारवर्जिताः ॥२३ ॥ सर्वेकर्मकरा ये च सर्वभक्षाश्च ये नराः ॥ एताञ्श्राद्धे न पश्येत्तु पितृयज्ञेषु सुन्दरि ॥ २४ ॥ एते पश्यन्ति यच्छ्राद्धं तच्छ्राद्धं राक्षसं विदुः ॥ मया प्रक

लिपतो भागो बलये पूर्वमेव तु ॥ २५॥ हृतं यदा तु त्रैलोक्यं शक्रस्यार्थे त्रिविक्रमे ॥ एवं श्राद्धं प्रतीक्षन्ति मन्त्रहीनमविक्रियम् ॥ २६ ॥ वर्ज नीया वुधैरेते पितृयज्ञेषु सुन्दरि ॥ प्रच्छन्नं भोजयेच्छ्राद्धे तर्पयित्वा द्विजं शुचिः ॥ २७ ॥ पितृंस्तत्राह्वयेद्धीमे मन्त्रेण विधिपूर्वकम् ॥ पिण्डा स्त्रयः प्रदातव्याः सह व्यञ्जनसंयुताः ॥ २८ ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ अपसव्येन दातव्यं मासिमासि तिलोद कम् ॥ २९ ॥ प्रणम्य शिरसा देवीर्निवापस्य च धारिणीः ॥ वैष्णवी काश्यपी चेति अजया चेति नामतः ॥ ३० ॥ एवं दत्तेन प्रीयन्ते पितरश्च न संशयः ॥ परमात्मा शरीरस्थो देवतानां मया कृतः ॥ ३१ ॥ त्रयस्तत्र वरारोहे देवगात्राद्विनिस्मृताः ॥ पितृदेवा भविष्यन्ति भोक्तारः पितृपिण्डकान् ॥ ३२ ॥ देवतासुरगन्धर्वा यक्षराक्षसपन्नगाः ॥ छिद्रं श्राद्धेऽस्य पश्यन्ति वायुभूता न संशयः ॥ ३३ ॥ पितृयज्ञं विशालाक्षि ये कुर्वन्ति विदो जनाः ॥ आयुः कीर्तिं बलं तेजो धनपुत्रपशुस्त्रियः ॥ ३४ ॥ ददन्ते पितरस्तस्य आरोग्यं नात्र संशयः ॥ आत्म कर्मवशाल्लोकान् प्राप्नुवन्तीह शोभनान् ॥३५॥ तिर्यग्भ्यश्च विमुच्यन्ते प्रेतभावेन मानवाः ॥ नरके पच्यमानानां त्राता भवति मानवः॥३६॥ पूजकः पितृदेवानां सर्वकालं गृहाश्रमे ॥ द्विजातींस्तर्पयित्वा तु पूर्णेन विधिना नरः ॥ ३७॥ अक्षय्यं तस्य मन्यन्ते पितरः श्राद्धतर्पिताः ॥ नरा ये पितृभक्तास्ते प्राप्नुवन्ति परां गतिम् ॥ ३८ ॥ सात्विकं शुक्लपन्थानमेते यान्ति विदोजनाः ॥ पुनरन्यत्प्रवक्ष्यामि शृणु तत्त्वेन सुन्दरि ॥३९॥ अज्ञानतमसारूढा निकृतिज्ञाः शठास्तथा ॥ स्नेहपाशशतैर्नैव पच्यन्ते नरके नराः ॥ ४० ॥ कल्पान्तं पच्यमानापि त्रायन्ते येन मानवाः ॥ तेषां पुत्राश्च पौत्राश्च कदाचिदपि सुन्दरि॥४१॥मुंचन्ति जलबिन्दूंश्च अमां प्राप्य जलाशये ॥ तेनैव भविता तृप्तिस्तेषां निरयगामिनाम् ॥४२॥ ये वै श्राद्धं प्रकुर्वन्ति तर्पयित्वा द्विजातयः ॥ दत्त्वा तिलोदकं पिण्डान् पितृभ्यो भक्तिभावतः ॥ ४३ ॥ निरयात्तेऽपि मुच्यन्ते तृप्तिर्भवति चाक्षया ॥ गृह्य चोदुम्बरं पात्रं कृत्वा तत्र तिलोदकम् ॥४४॥ विप्राणां वचनं कृत्वा यथाशक्त्या च दक्षिणा ॥ देया तेषां तु विप्राणां पितॄणां मोक्षणाय च ॥ ४५ ॥ देयो नीलो वृषस्तत्र नरकार्त्तिविनाशनः ॥ नीलषण्डस्य लांगूले तोयमप्युद्धरेद्यदि ॥ ४६ ॥ षष्टिवर्षसहस्राणि पितरस्तेन तर्पिताः ॥ मुक्तमात्रेण शृङ्गेण नीलषण्डेन सुन्दरि ॥ ४७ ॥ उद्धृतो यदि सुश्रोणि पंकः शृङ्गेण तेन च ॥ बान्धवाः

पितरस्तस्य निरये पतितास्तु ये ॥ ४८ ॥ तानुद्धृत्य वरारोहे सोमलोकं स गच्छति ॥ मुक्तेन नीलषण्डेन यत्पुण्यं जायते भुवि ॥ ४९ ॥ षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥ सोमलोकेषु मोदन्ते क्षुत्तृड्भ्यां च विवर्जिताः ॥ ५० ॥ एष धर्मो गृहस्थानां पुत्र पौत्रसमन्वितः ॥ त्रातारश्च भविष्यन्ति वर्त्तयन्तो यथासुखम् ॥ ५१ ॥ पिपीलिकादिभूतानि जङ्गमाश्च विहङ्गमाः ॥ उपजीवन्ति सुश्रोणि गृहस्थेषु न संशयः ॥ ५२ ॥ एवं गृहाश्रमो मूलं धर्मस्तत्र प्रतिष्ठितः ॥ मासिमासि तु ये श्राद्धं प्रकुर्वन्ति गृहाश्रमे ॥ ५३ ॥ तिथौ पर्वणि ये चैव स्वपितॄंस्तारयन्ति वै ॥ ५४ ॥ न यज्ञदानाध्ययनोपवासैस्तिर्थाभिषेकैरपि चाग्निहोत्रैः ॥ दानैरनेकैर्विधिसम्प्रदत्तैर्न तत्फलं श्राद्धगृहस्थधर्मे ॥ ५५ ॥ पितरो निर्गतास्तत्र ब्रह्मविष्णुशरीरगाः ॥ पिता पितामहश्चैव तथैव प्रपितामहः ॥ ५६ ॥ एवं क्रमेण वै तत्र पितृदेवा वसुन्धरे ॥ देवताः कश्यपोत्पन्ना श्राद्धेषु विनियोजिताः ॥ ५७ ॥ तत एते न जानन्ति देवाः शक्रपुरोगमाः ॥ ईश्वरश्च न जानाति आत्मदेहविनिःसृताः ॥ ५८ ॥ न च ब्रह्मा विजानाति निःसृतो मम मायया ॥ एवं माया मयो भूमौ ब्रह्मरुद्रौ वह्निकृतौ ॥५९॥ पुनश्चान्यत्प्रवक्ष्यामि पितॄयज्ञेषु सुन्दरि ॥ दद्याद्धे ब्राह्मणमुखे नाग्नौ तु जुहुयात्कचित् ॥६० ॥ कृत्वा वै पिण्डसङ्कल्पं दर्भानास्तीर्य भूतले ॥ तेन ते पितृपिण्डेन पितृदेवा वसुन्धरे ॥६१॥ अजीर्णेनाभिपीड्यन्ते भुञ्यन्ते न च सुन्दरि ॥ ततो दुःखेन सन्तता पद्यन्ते सोममेव च ॥ ६२ ॥ दृष्ट्वा सोमेन सुश्रोणि देवताजीर्णपीडिताः ॥ स्वागतेनाथ वाक्येन पूजितास्तदनन्तरम् ॥ ६३ ॥ सोम उवाच ॥ देवताः कस्य चोत्पन्ना दुखिताः केन हेतुना ॥ एवं तु भाषमाणस्य सोमस्य तदनन्तरम् ॥ ६४ ॥ ऊचुस्ते सोममेवापि वाक्यं नः श्रूयतामिति ॥ त्रयस्तु पितरो देवा ब्रह्मविष्णुहरोद्भवाः ॥ ६५ ॥ श्राद्धे नियोजितास्तैस्तु पितृपिण्डेन तर्पिताः ॥ अजीर्णं जायते सोम तेन वै दुःखिता वयम् ॥ ६६ ॥ सोम उवाच ॥ सखा चाहं भविष्यामि त्रयाणां च चतुर्थकः ॥ सहितास्तत्र गच्छामो यथा श्रेयो भविष्यति॥६७॥ एवमुक्तास्तु सोमेन पितृदेवास्तदन्तरे ॥ सोमं सोमेन गच्छन्ति श्रेयस्कामा वसुन्धरे ॥ ६८ ॥ शरण्यं शरणं देवं ब्रह्माणं पद्मसंभवम् ॥ मेरुशृङ्गे सुखासीनं ब्रह्मर्षिगणसेवितम् ॥ ६९ ॥ दृष्ट्वा पितामहं देवं प्रणम्य सहसा क्षितौ ॥ आत्रिपुत्रेण सोमेन भाषितो वै पितामहः ॥ ७० ॥ य एते

पितरो देव दुःखिताजीर्णपीडिताः ॥ आगताः शरणं चात्र सोमं सोमेन सत्तम ॥७१॥ यथा नश्यंति जीर्णानि तथा कुरु पितामह॥ मुहूर्तं ध्यान मास्थाय ईश्वरं च ददर्श ह ॥ ७२ ॥ उवाच वचनं तत्र ब्रह्मा योगीश्वरं प्रति ॥ एते ते पितरो देव दुःखिताजीर्णपीडिताः ॥ ७३ ॥ आगताः शरणं चात्र सोमेन सहिता मम ॥ आचक्ष्व निर्मिता येन यथा श्रेयो भवेत्तव ॥७४॥ ब्रह्मणा चैवमुक्तस्तु ईश्वरः परमेश्वरः॥ मुहूर्त्तं ध्यानमास्थाय दिव्यं योगं च माधवि॥७५॥पश्यते ईश्वरं तत्र योगदेहाङ्गनिर्मितम् ॥ विस्मयं परमं गत्वा ब्रह्माणं वाक्यमब्रवीत् ॥७६॥निर्मिता विष्णुना ब्रह्मन् वैष्णव्या मायया च ते ॥ प्रथमं पितरो देवा ये च श्रेष्ठा भवंति ते ॥ ७७ ॥ पिता तु ब्रह्मदैवत्यो मम गात्राद्विनिर्मितः ॥ पितामहो विष्णुदेवो विष्णुगात्राद्विनिर्मितः ॥ ७८ ॥ प्रपितामहो रुद्रदेवो मम गात्राद्विनिर्मितः ॥ श्राद्धे नियोजितास्तेऽत्र मर्त्येषु पितृदेवताः ॥ ७९ ॥ ब्राह्मणानां हितार्थाय निर्मिता विष्णुमायया ॥ तांपैताः पितृयज्ञेषु पितरोऽजीर्णपीडिताः ॥ ८० ॥ आगताः शरणं ब्रह्मन्सोमेन सहिता यदि ॥ येन नश्यत्यजीर्णं च पितॄणां च सुखं भवेत् ॥८१॥ शृणु तत्ते प्रवक्ष्यामि ब्रह्मन् लोकपितामह ॥ शाण्डिल्यपुत्रस्तेजस्वी धूम्रकेतुर्विभावसुः ॥८२॥ श्राद्धे तु प्रथमं तस्य दातव्यं मानुषेषु वा ॥ सह तेनैव भोक्तव्यं पितृपिण्डविसर्जितम् ॥ ८३ ॥ ईश्वरेणैवमुक्तस्तु ब्रह्मा कमलसंभवः ॥ आहूय मनसा चैव ह्यागतो हव्यवाहनः ॥ ८४ ॥ प्रदीप्ततस्तेजसा वह्निः सर्वभक्षो हुताशनः ॥ योजितः पंचयज्ञेषु ब्रह्मणा मम मायया ॥८५॥ ब्रह्माग्निं भाषते तत्र शृणुष्व च हुताशन ॥ भोक्तव्यं प्रथमं ब्रह्मन्पितृपिण्डविसर्जितम् ॥८६॥ त्वया भुक्तेति भोक्ष्यन्ति देवताः समरुद्गणाः ॥ भोक्तव्यं मध्यमं श्राद्धे पथ्यमन्नं च वै सह ॥८७॥ पश्चाद्दत्तं तु तं पिण्डं सह सोमेन भुञ्जते ॥ ब्रह्मणा ह्येवमुक्तास्तु पितृदेवहुताशनाः॥८८॥ प्रस्थिताः सह सोमेन देवतास्ता वसुन्धरे॥ पितृयज्ञं वरारोहे भोक्ष्यन्ति सहिताः सदा ॥ ८९ ॥ एवं तु प्रथमं श्राद्धं दद्यादग्नेर्वसुन्धरे॥उद्दिश्य च पितॄन्देवि तर्पयित्वा द्विजातयः॥९०॥ पश्चात्पिण्डान्प्रदद्याच्च दर्भानास्तीर्य भूतले ॥ प्रथमं ब्रह्मणोंशाय दद्यात्पिण्डं विचानतः॥९१॥ पितामहाय रुद्रांशसंभूताय तु मध्यमम् ॥ प्रपितामहाय विष्णोस्तु दद्यात्पिण्डं महीतले ॥ ९२ ॥ विधिनाः मन्त्रपूर्वेण श्राद्धं कुर्वन्ति ये नराः ॥ तेषां वरं प्रयच्छन्ति पितरः श्राद्धतर्पिताः ॥ ९३ ॥ मम मायाबलेनैव कृतं श्राद्धं द्विजातीभिः ॥ अपांक्तेयांस्तथा विप्रान्प्रवक्ष्यामि वसुन्धरे ॥ ९४ ॥ नपुंसकाश्चित्रकारा

वसुपालविनिन्दकाः ॥ कुनखाः श्यावदन्ताश्च काणाश्च विकटोदराः ॥ ९५ ॥ नर्तका गायनाश्चैव तथा रङ्गोपजीविनः ॥ वेदविक्रयिणश्चैव सर्व याजकयाजकाः ॥ ९६॥ राजोपसेवकाश्चैव वाणिज्यक्रयविक्रयाः ॥ ब्रह्मयोन्यां समुत्पन्नाः सङ्कीर्णाः पतिताश्च ये ॥ ९७ ॥ असंस्कारप्रवृत्ताश्च शूद्रकर्मोपजीविनः ॥ शूद्रकर्मकरा ये च गणका ग्रामयाजकाः ॥ ९८ ॥ दीक्षितः क्रोडपुष्टश्च यश्च वार्धुषिको द्विजः ॥ विक्रेतारो रसानां च ये च वैश्योपजीविनः ॥ ९९ ॥ तस्करा लेखकाराश्च याजका रङ्गकारकाः ॥ शौल्किका गिरिका ये च दाम्भिका ये च माधवि ॥ १०० ॥ सर्वेकर्मकरा ये च सर्वविक्रयिणस्तथा ॥ एतान्न भोजयेच्छ्राद्धे पित्रर्थे च वसुन्धरे ॥ १०१ ॥ दूराच्चानं गता ये च तत्र कर्मोपजीविनः ॥ रस विक्रयिणश्चैव शैलूषस्तिलविक्रयी ॥ १०२ ॥ श्राद्धकालमनुप्राप्तं राजसं तं विदुर्बुधाः ॥ अन्ये ये दूषिता देवि द्विजरूपेण राक्षसाः ॥१०३॥ एतान्न पश्येच्छ्राद्धेषु पितृपिण्डेषु माधवि ॥ अपांक्तेयांस्तथा विप्रान्भुञ्जतः पश्यतो द्विजान् ॥ १०४ ॥ पितरस्तस्य षण्मासं दुःखमुच्छ्वसन्ति दारुणम् ॥ न्यस्तपात्रं द्रुतं कुर्योत्प्रायश्चित्तमुमे धरे ॥ १०५॥ घृतं तु जुहुयादग्नावादित्यं चावलोकयेत् ॥ पुनरावपनं कृत्वा पितरं च पितामहान् ॥१०६॥ गंधपुष्पं च धूपं च दद्यादर्घ्यं तिलोदकम् ॥ यथाविधि च विप्राय भोजयेच्च पुनः शुचिः ॥ १०७॥ पुनश्चान्यत्प्रवक्ष्यामि शृणु तत्त्वेन सुन्दरि ॥ ज्ञानशुद्धेन विप्रेण मन्त्रशुद्धिं यथाविधि ॥१०८॥ मृतान्नं ये न भुञ्जंति कदाचिदपि माधवि ॥ वैश्वदेवेषु दातव्यं श्राद्धेषु च न योजयेत् ॥ १०९ ॥ प्रेतान्नं भुञ्जमानास्तु श्राद्धमर्हन्ति ये द्विजाः ॥ तेषां दोषं प्रवक्ष्यामि भुक्तं भोजयते तु सः ॥ ११० ॥ दम्भकार कृतोच्छिष्टं कृत्वा तु नरकं व्रजेत् ॥ प्रायश्चितं प्रवक्ष्यामि यथा शुध्यन्ति ते नराः ॥१११॥ माघमासे तु द्वादश्यां सर्पिर्युक्तं तु पायसम् ॥ स लिहेन्मधुमांसेन तर्पयित्वा द्विजातयः ॥ ११२ ॥ सवत्सां कपिलां दद्यादात्मनः शुद्धिकामुकः ॥ पुनः श्राद्धं प्रकुर्वीत चात्मनः शुभ कामुकः ॥ ११३॥ स्नानोपलेपनं भूमे कृत्वा विप्रान्प्रमन्त्रयेत ॥ दन्तकाष्ठं विसृज्येव ब्रह्मचारी शुचिर्भवेत् ॥११४॥ यत्नेन मिथुनं श्राद्धे भोज यित्वा विसर्जयेत् ॥ अमायां च विशालाक्षि दन्तकाष्ठं न खादयेत् ॥ ११५ ॥ अमायां तु च यो मूर्खो दन्तकाष्ठं हि खादति ॥ हिंसितो हि भवेत्सोमो देवतानां पितस्तथा ॥ ११६ ॥ प्रभातायां तु शर्वर्यामुदिते च दिवाकरे ॥ दिवाकृत्यं ततो गृह्य विप्रस्य विधिपूर्व

कम् ॥ ११७ ॥ श्मश्रुकर्म च कर्त्तव्यं नखानां छेदनानि च ॥ स्नापनाऽभ्यञ्जने दद्यात्पितृभक्तेन सुन्दरि ॥ ११८ ॥ पक्वान्नं तत्र वै कार्यं सुविमृष्टं च शुद्धितः ॥ वृत्ते तु तत्र मध्याह्ने श्राद्धारम्भं तु कारयेत् ॥ ११९ ॥ स्वागतं च तथा कृत्वा पाद्यार्थं सलिलं शुचि ॥ पाद्यं दत्त्वा तु विप्राय गृहस्याभ्यन्तरं नयेत् ॥ १२० ॥ आसनं कल्पयित्वा तु आवाह्य तदनन्तरम् ॥ अर्घ्यं दत्त्वा विधानेन गन्धमाल्यैः प्रपूज्य च ॥ १२१ ॥ धूपं दीपं तथा वस्त्रं तिलोदकमथापि वा ॥ पात्रं च भोजनस्यार्थं विप्राग्रे धारयेत्तथा ॥१२२ ॥ भस्मना मण्डलं कार्यं पङ्क्तिदोषनिवारकम् ॥ अग्निकार्यं ततः कृत्वा अन्नं च परिवेषयेत् ॥ १२३ ॥ तत्र कार्यो न संकल्पः पितॄनुद्दिश्य सुन्दरि ॥ यथाबुद्धेन भोक्तव्यमिति ब्रूयाद्विजं प्रति ॥ १२४ ॥ रक्षोघ्नमन्त्रपाठांश्च श्रावयीत विचक्षणः ॥ तृप्तं तु ब्राह्मणं दत्त्वा दद्याद्वै विकिरं ततः ॥१२५ ॥ उत्तरीयासनं दत्त्वा पिण्डप्रश्नं तु कारयेत् ॥ दक्षिणाभिमुखो भूत्वा दर्भानास्तीर्य भूतले ॥ १२६ ॥ पिण्डदानं प्रकुर्वीत पित्राद्यित्रितये तथा ॥ पिण्डानां पूजनं कार्यं तन्तुवृद्ध्यै यथाविधि ॥ १२७ ॥ ब्राह्मणस्य च हस्ते तु दद्याद्दक्षिण्यमात्मवान् ॥ दक्षिणाभिः प्रतोष्यापि स्वास्ति वाच्यं विसर्जयेत् ॥ १२८ ॥ पिण्डान्नयस्तु वसुधे यावत्तिष्ठन्ति भूतले ॥ अप्यायमानाः पितरस्तावत्तिष्ठन्ति वै गृहे ॥ १२९ ॥ उपस्पृश्य शुचिर्भूत्वा दद्याच्छान्त्युदकानि च ॥ प्रणम्य शिरसा भूमौ निवापस्य च धारिणीः ॥१३० ॥ वैष्णवी काश्यपी चेति अक्षय्येति नामतः ॥ भक्षयेत्प्रथमं पिण्डं पत्न्यै देयं तु मध्यमम् ॥१३१ ॥ तृतीयमुदके दद्याच्छ्राद्धे एवंविधिः स्मृतः ॥ पितृदैवांश्च विसृजेत्ततश्च प्रणमेत्तु तान् ॥ १३२ ॥ एवं दत्तेन तुष्यन्ति पितृदेवा न संशयः॥दीर्घायुष्यं प्रयच्छन्ति पुत्रपौत्रधनानि च ॥१३३॥ ज्ञानोत्तमेषु विप्रेषु दद्याच्छ्राद्धं विधानतः॥अन्यथा तत्तु वै श्राद्धं निष्फलं नास्ति संशयः ॥१३४॥ मन्त्रहीनं क्रियाहीनं यः श्राद्धं कुरुते द्विजः ॥ मद्भक्तस्यासुरेन्द्रस्य फलं भवति भागतः ॥१३५ ॥ उद्धरेच्चादि पात्रं तु ब्राह्मणो ज्ञानवर्जितः॥राक्षसैर्हियते तच्च भुञ्जतस्तस्य सुन्दरि ॥ १३६ ॥ एतत्ते कथितं भद्रे पितृकार्यमनुत्तमम् ॥ उत्पत्तिं श्रेव दानं च यत्पुण्यं कथितं तव ॥१३७॥ अपरं चापि वसुधे किमन्यच्छ्रोतुमिच्छसि ॥१३८॥ इति श्रीवराहपुराणे श्राद्धपितृयज्ञनिश्चयो नाम नवत्यधिकशततमोऽध्यायः ॥१९०॥ अथ मधुपर्कोत्पत्तिदानसंकरणप्रकरणम् ॥ सूत उवाच ॥ एवं श्रुत्वा बहून्धर्मान् धर्मशास्त्रविनिश्चयात्॥

वराहरूपिणं देवं पुनः पप्रच्छ मेदिनी ॥ १ ॥ धरण्युवाच॥ एवं शास्त्रं मया देव तव वक्त्राद्विनिःसृतम् ॥ श्रुतं सुबहुशश्चैव तृप्तिर्मम न विद्यते॥२॥ ममैवानुग्रहार्थाय रहस्यं वक्तुमर्हसि ॥ कतिशो मधुपर्कश्च किंपुण्यं का च देवता ॥३॥ कानि द्रव्याणि कस्मै च देयानीति वदस्व मे ॥ इति भूम्या वचः श्रुत्वा देवदेवो जनार्दनः ॥४॥ वराहरूपी भगवान्प्रत्युवाच वसुन्धराम् ॥५॥ श्रीवराह उवाच ॥ शृणु भूमे प्रयत्नेन मधुपर्कों यथा कृतः ॥ उत्पत्तिश्चैव दानं च सर्वो यस्य च ह्रीयते ॥६॥ अहं ब्रह्मा च रुद्रश्च कृत्वा लोकस्य संक्षयम् ॥ अव्यक्तानि च भूतानि यानि कानि च सर्वशा ॥७॥ ततो भूमे दक्षिणाङ्गात्पुरुषो मे विनिःसृतः ॥ रूपवान्द्युतिमांश्चैव श्रीमान्ह्रीकीर्तिमान्नरः ॥ ८ ॥ तत्र पप्रच्छ मां ब्रह्मा मम गात्राद्विनिःसृतः ॥ य एव तिष्ठते विष्णो त्रयाणां च चतुर्थकः ॥ ९ ॥ सरहश्च लघुर्देव एतत्तव न युज्यते ॥ ब्रह्मणो वचनं श्रुत्वा मयाप्येवं प्रभाषितम् ॥ १० ॥ एवं च मे समुत्पन्नः सर्वकर्मसु निष्ठितः ॥ मधुपर्कोति विख्यातो भक्तानां भवमोक्षणः ॥ ११ ॥ मयात्र संशितं ब्रह्मन् रुद्रे चापि समासतः ॥ साधु विष्णो भागतस्ते एष चापि विनिःसृतः ॥ १२ ॥ उद्भवं मधुपर्कस्य आत्मसम्भवनिश्चयम् ॥ ततस्तु माऽब्रवीद्ब्रह्मा कारणं मधुरं वचः ॥ १३ ॥ मधुपर्केण किं कार्यमेतदाचक्ष्व निष्कलम् ॥ पितामहवचः श्रुत्वा मयाऽसौ प्रतिभाषितः ॥ १४ ॥ कारणं मधुपर्कस्य दानं सङ्कथणं तथा ॥ समार्चनविधिं कृत्वा मधुपर्कं प्रयच्छति ॥१५॥ ब्रह्मन् यात्युत्तरं स्थानं यत्र गत्वा न शोचति॥तस्य क्रियां प्रवक्ष्यामि मम दान प्रतिग्रहात् ॥ १६ ॥ यस्य दानविधिं प्राप्य यान्ति दिव्यां गतिं मम ॥ वृत्तेष्वेवोपचारेषु ये च ब्रह्मन्मम प्रियाः ॥ १७ ॥ संगृह्य मधुपर्कं वै इमं मन्त्रमुदाहरेत् ॥ १८ ॥ मन्त्रः—ॐ एष हि देव भगवंस्तव गात्रसूतिः संसारमोक्षणकरो मधुपर्कनामा ॥ भक्त्या मयाऽयं प्रतिपादितोऽद्य गृहाण देवेश नमो नमस्ते ॥ १९ ॥ पुनरन्यत्प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ यादृशो मधुपर्कों वै या च तस्य महा क्रिया ॥२०॥ मध्वेवं दधि सर्पिश्च कुर्याच्चैव समं तथा ॥ विधिना मन्त्रपूतेन यदीच्छेत्सिद्धिमुत्तमाम् ॥ २१ ॥ सामासाद्य ततः कृत्वा मम कर्मपरायणः ॥ उचितेनोपचारेण यत्त्वया परिपृच्छितम् ॥ २२ ॥ इति श्रीवराहपुराणे मधुपर्कोत्पत्तिदानसंकरणं नामैकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥ अथ सर्वशान्तिवर्णनम् ॥ सूत उवाच ॥ श्रुत्वा तु मधुपर्कस्य द्युत्पत्तिं दानमेव च ॥ पुण्यं चैव फलं चैव कारणं ग्रहणं

तथा ॥ १ ॥ विस्मयं परमं गत्वा सा मही संशितव्रता ॥ पादौ गृह्य यथान्यायं प्रत्युवाच जनार्दनम् ॥ २ ॥ देव वृत्तोपचारेण तव यन्मनसि प्रियम् ॥ किं च तत्रैव दातव्यं तव कर्मपरायणैः ॥ ३ ॥ एतदाचक्ष्व तत्त्वेन तत्र यत्परमं महत् ॥ श्रीवराह उवाच ॥ साधु भूमे महाभागे यन्मां त्वं परिपृच्छसि ॥ ४ ॥ कथयिष्यामि तत्सर्वं दुःखसंसारमोक्षणम् ॥ कृत्वा तु मम कर्माणि यत्त्वया पूर्वभाषितम् ॥ ५ ॥ पश्चाच्छान्तिं च मे कुर्याद्भूमे राष्ट्रसुखावहम् ॥ सर्वकर्म ततः कृत्वा भूम्यां जानु निपात्य च ॥ ६ ॥ नमो नारायणायेति उक्त्वा मन्त्रमुदाहरेत् ॥ मन्त्रः–ॐ नमो नमो वासुदेव त्वं गतिस्त्वं परायणम् ॥ ७ ॥ शरणं त्वां गतो नाथ संसारार्णवतारक ॥ आगतस्त्वं च सुमुख पुनः समुचितेन वै ॥ ८ ॥ दिशः पश्य अधः पश्य व्याधिभ्यो रक्ष नित्यशः ॥ प्रसीद स्वस्य राष्ट्रस्य राज्ञः सर्वबलस्य च ॥ ९ ॥ गर्भिणीनां च वृद्धानां व्रीहीणां च गवां तथा ॥ ब्राह्मणानां च सततं शान्तिं कुरु शुभं कुरु ॥ १० ॥ अन्नं कुरु सुवृष्टिं च सुभिक्षमभयं तथा ॥ राष्ट्रं प्रवर्द्धतु विभो शान्तिर्भवतु नित्यशः ॥ ११ ॥ देवानां ब्राह्मणानां च भक्तानां कन्यकासु च ॥ पशूनां सर्वभूतानां शान्तिर्भवतु नित्यशः ॥ १२ ॥ एवं शान्तिं पठित्वा तु मम कर्मपरायणः ॥ पुनर्जलाञ्जलिं दत्त्वा त्विमं मन्त्रमुदाहरेत् ॥ १३ ॥ मन्त्रः–योऽसौ भवान्सर्वजगत्प्रसूतो यज्ञेषु देवेषु च कर्मसाक्षी ॥ शान्तिं कुरु त्वं मम वासुदेव संसारमोक्षं च कुरुष्व देव ॥ १४ ॥ एषा सिद्धिश्च कीर्तिश्च ओजसां तु महोत्तमम् ॥ लाभानां परमो लाभो गतीनां परमा गतिः ॥ १५ ॥ एवं पठति तत्त्वेन मम शान्तिं सुखावहाम् ॥ ते तु मल्लयतां यान्ति पुनरावृत्तिवर्जिताः ॥ १६ ॥ एवं शान्तिं पठित्वा तु मधुपर्कं प्रयोजयेत् ॥ नमो नारायणायेति चोक्त्वा मन्त्रमुदाहरेत् ॥ १७ ॥ मन्त्रः–योऽसौ भवान्देववरप्रसूतो यो वै समर्च्यो मधुपर्कनामा ॥ आगच्छ सन्निधं इमं च पात्रे ममापि संसारविमोक्षणाय ॥ १८ ॥ सर्पिर्दधिमधून्येव समं पात्रे न्युदुम्बरे ॥ अलाभे मधुनश्चापि गुडेन सह मिश्रयेत् ॥ १९ ॥ घृतालाभे तु सुश्रोणि लाजैः सह विमिश्रयेत् ॥ अलाभे वापि दध्नश्च क्षीरेण सह मिश्रयेत् ॥ २० ॥ दधि क्षौद्रं घृतं चैव कारयेत समं तथा ॥ समर्पयामि देवेश रुद्र सर्पिर्घृतं मधु ॥ २१ ॥ सर्वेषां पप्यलाभे तु मम कर्मपरायणाः ॥ अप एव ततो गृह्य इमं मन्त्रमुदाहरेत् ॥ २२ ॥ मन्त्रः–ॐ योऽसौ भवान्नाभिमात्रप्रसूतो यज्ञेश्च मन्त्रैः

सरहस्यजप्यैः ॥ सोऽयं मया ते परिकल्पितश्च गृह्णाण दिव्यो मधुपर्ककनामा ॥ २३ ॥ यो ददाति महाभागे मयोक्तं विधिपूर्वकम् ॥ सर्वयज्ञफलं प्राप्य मम लोकं प्रपद्यते ॥ २४ ॥ अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥ यो वै प्राणान्प्रमुंचेत मम कर्मपरायणः ॥ २५ ॥ तस्य चेवेह दातव्यं मन्त्रेण विधिपूर्वकम् ॥ यावत्प्राणान्प्रमुंचेत कृत्वा कर्म सुपुष्कलम् ॥२६॥ मद्भक्तेन तु दातव्यं सर्वसंसारमोक्षणम् ॥ दृष्ट्वा तु विह्वलं ह्येनं मम कर्मपरायणः ॥२७॥ मधुपर्कं परं गृह्य चेमें मन्त्रमुदाहरेत् ॥२८ ॥ मन्त्रः–योऽसौ भवांस्तिष्ठति सर्वदेहे नारायणः सर्वजगत्प्रधानः ॥ गृहाण चेवं सुरलोकनाथ भक्तोपनीतं मधुपर्कसंज्ञम् ॥ २९ ॥ अनेनैव तु मन्त्रेण दद्याच्च मधुपर्ककम् ॥ नरस्य मृत्युकाले तु दद्यात्संसार मोक्षणम् ॥ ३० ॥ एषा गतिर्महाभागे मधुपर्कस्य कीर्त्तिता ॥ एवं कश्चिन्न जानाति मधुपर्कं वसुन्धरे ॥३१॥ एवं हि मधुपर्कश्च देयः सिद्धि मभीप्सुभिः ॥ अर्चित्वा देवदेवेशं सर्वसंसारनाशनम् ॥ ३२ ॥ ददाति मधुपर्कं यः स याति परमां गतिम् ॥ अयं पवित्रो विमलः सर्वकाम विशोधनः ॥ ३३ ॥ दीक्षिताय च दातव्यो यश्च शिष्यो गुरुप्रियः ॥ न मूर्खाय प्रदातव्यमविनीताय कर्हिचित् ॥३४॥ शृणोति मधुपर्कस्य चाख्यानं पापनाशनम् ॥ याति दिव्यां परां सिद्धिं मधुपर्कस्य कारणात् ॥ ३५ ॥ एतत्ते कथितं भद्रे मधुपर्कविभावनम् ॥ सर्वसंसारमोक्षार्थं यदीच्छेत्सिद्धिमुत्तमाम् ॥ ३६ ॥ राजद्वारे श्मशाने वा भये च व्यसने तथा ॥ ये पठन्ति त्विमां शान्तिं शीघ्रं कार्यं भविष्यति ॥ ३७ ॥ अपुत्रो लभते पुत्रमभार्यश्च प्रियां लभेत् ॥ अपतिर्लभते कान्तं बद्धो मुच्येत बन्धनात् ॥३८ ॥ एतत्ते कथितं भूमे महाशान्तिं सुखावहाम् ॥ सर्वसंसारमोक्षार्थं रहस्यं परमं महत्॥३९॥यस्त्वनेन विधानेन कुर्याच्छान्तिमनुत्तमाम्॥सर्वसङ्गान्परित्यज्य मम लोकं च गच्छति ॥ ४० ॥

इति श्रीवराहपुराणे भगवच्छास्त्रे सर्वशान्तिकरणं नाम द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥ अथ नचिकेतःप्रयागवर्णनम् ॥ लोमहर्षण उवाच ॥ व्यासशिष्यं महाप्राज्ञं वेदवेदाङ्गपारगम् ॥ द्वारदेशे समासीनं कृतपूर्वाह्णिकक्रियम् ॥ १ ॥ अश्वमेधे तथा वृत्ते राजा वै जनमेजयः ॥ ब्रह्मवध्याभिभूतस्य दीक्षां द्वादशवार्षिकीम् ॥ २ ॥ प्रायश्चित्तं चरित्वेवमागतो गजसाह्वयम् ॥ उपगम्य महात्मानं जाह्नवीतीरसंश्रयम् ॥ ३ ॥ ऋषिं परमसम्पन्नं वैशम्पायनमञ्जसा ॥ कर्मणा प्रेरितस्तेन चिन्ताव्याकुललोचनः ॥ ४ ॥ कुरूणां पश्चिमो राजा पश्चात्तापेन पीडितः ॥

व्यासशिष्यमुपागम्य प्रश्नमेनमपृच्छत ॥ ५ ॥ जनमेजय उवाच ॥ भगवन्नायते तीव्रं चिन्तयानस्य सुव्रत ॥ कर्मपाककलं यस्मिन्मानुषैरुप
भुज्यते॥६॥एतद्विच्छाम्यहं श्रोतुं कीदृशं तु यमालयम्॥ किंप्रमाणं च किंरूपं कथं गत्वा स पश्यति ॥७॥ न गच्छेयं कथं विप्र प्रेतराज्ञो निवेश
नम् ॥ धर्मराजस्य धीरस्य सर्वलोकानुशासिनः ॥ ८ ॥ सूत उवाच ॥ एवं पृष्टो महातेजास्तेन राज्ञा द्विजोत्तमः ॥ उवाच मधुरं वाक्यं राजानं
जनमेजयम् ॥ ९ ॥ वैशम्पायन उवाच ॥ शृणु राजन्पुरावृत्तां कथां परमशोभनाम् ॥धर्मबुद्धिकरीं नित्यां यशस्यां कीर्तिवर्द्धिनीम् ॥ १० ॥
पावनीं सर्वपापानां प्रवृत्तो शुभकारिणीम् ॥ इतिहासपुराणानां कथां वै विदुषां प्रियाम् ॥ ११ ॥ कश्चिदासीत्पुरा राजन्नृषिः परमधार्मिकः ॥
उद्दालक इति ख्यातः सर्ववेदाङ्गतत्त्ववित् ॥ १२ ॥ तस्य पुत्रो महातेजा योगमास्थाय बुद्धिमान् ॥ नाचिकेत इति ख्यातः सर्ववेदाङ्गतत्त्व
वित् ॥ १३ ॥ तेन रुष्टेन शप्तोऽभूत्पुत्रः परमधार्मिकः ॥ गच्छ शीघ्रं यमं पश्य मम क्रोधेन दुर्मते ॥ १४ ॥ तथेत्युक्त्वा महातेजाः पुत्रः
परमधार्मिकः ॥ चिन्तयित्वा मुहूर्तं तु योगमास्थाय बुद्धिमान् ॥ १५ ॥ क्षणेनान्तर्हितो जातः पितरं प्रत्युवाच ह ॥ विनयात्पृष्टतो वाक्यं
भावेन च समन्वितम् ॥ १६ ॥ मा भूद्वाक्यं च ते मिथ्या धार्मिकस्य कदाचन ॥ गमिष्यामि पुरं रम्यं धर्मराजस्य धीमतः ॥ १७ ॥ इह
चैव पुनस्तावदागमिष्ये न संशयः ॥ १८ ॥ पितोवाच ॥ एकस्त्वमसि वत्सश्च नान्यो बन्धुर्विधीयते ॥ अधर्मं चानृतं चास्तु त्वत्कीर्तिरपि
पुत्रक ॥ १९ ॥ मिथ्याभिशंसिनं तात यथेष्टं तारयिष्यति ॥ रोषेण हि मृषावादी निर्दयः कुलपांसनः ॥ २० ॥ अप्रवृत्तस्त्वसम्भाष्यो योऽहं
मिथ्या प्रयुक्तवान् ॥ त्वां वै धर्मसमाचारमभिधानेन शप्तवान् ॥ २१ ॥ अहं पुत्र न सद्वादी न क्षमे धर्मदूषितम् ॥ मस त्वं हि महाभाग नित्यं
चित्तानुपालकः॥२२॥धर्मज्ञश्च यशस्वी च नित्यं क्षान्तो जितेन्द्रियः॥शुश्रूषुरनहंवादी शक्तस्तारयितुं मम ॥२३॥याचितस्त्वं मया पुत्र गन्तुं वै
तत्र नार्हसि ॥२४॥ यदि वैवस्वतो राजा तत्र प्राप्तं यदृच्छया ॥रोषेण त्वां महातेजा विसृजेन्न कदाचन ॥ २५ ॥ विनश्येयमहं पश्य कुलसंतुविना
शनः॥धिक्कृतः सर्वलोकेन पापकर्त्ता नराधमः ॥ २६॥ नरकस्य पुदित्याख्या दुःखेन नरकं विदुः॥पुत्रित्राणं भवेत्पुत्राद्दिहेष्यति परत्र च ॥२७॥
हुतं दत्तं तपस्तप्तं पितरश्चापि पोषिताः ॥ अपुत्रस्य हि तत्सर्वं मोघं भवति निश्चयः ॥ २८ ॥ शुश्रूषावान्भवेच्छूद्रो वैश्यो वा कृषिजीवनः ॥

॥२०७॥

सत्यगात्रा तु राजन्यो ब्राह्मणो वा स्वकर्मकृत् ॥ २९ ॥ तपो वा विपुलं तप्त्वा दत्त्वा दानमनुत्तमम् ॥ अपुत्रो लभ्युयात्स्वर्गं यथा तात मया श्रुतम् ॥ ३० ॥ पुत्रेण लभते जन्म पौत्रेण तु पितामहः ॥ पुत्रस्य च प्रपौत्रेण मोदते प्रपितामहः ॥ ३१ ॥ न ह्यस्यामीति वत्स त्वां मम वंशविवर्द्धनम् ॥ याच्यमानः प्रयत्नेन तत्र गन्तुं न चार्हसि ॥ ३२ ॥ वैशम्पायन उवाच ॥ एवं विलपमानं तं पितरं प्रत्युवाच ह ॥ हृष्टपुष्टवपुर्भूत्वा पुत्रः परमधार्मिकः ॥ ३३ ॥ पुत्र उवाच ॥ न विषादस्त्वया कार्यो द्रक्ष्यसे मामिहागतम् ॥ दृष्ट्वा च तमहं देवं सर्वलोकनमस्कृतम् ॥ ३४ ॥ आगच्छामि पुनश्चात्र न भयं मेऽस्ति मृत्युतः ॥ पूजयिष्यति मां तात राजा त्वदनुकंपया ॥ ३५ ॥ सत्ये तिष्ठ महाभाग सत्ये च परिपालय ॥ सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ॥३६॥ सूर्यस्तपति सत्येन वातः सत्येन वाति च ॥ अग्निर्दहति सत्येन सत्येन पृथिवी स्थिता ॥३७॥ उद्धिर्लङ्घयेन्नैव मर्यादां सत्यपालितः ॥ मन्त्रः प्रयुक्तः सत्येन सर्वलोकहितायते ॥३८॥ सत्येन यज्ञा वर्त्तन्ते मन्त्रपूताः सुयूजिताः ॥ सत्येन वेदा गायन्ति सत्ये लोकाः प्रतिष्ठिताः ॥ ३९ ॥ सत्यं गाति तथा साम सर्वं सत्ये प्रतिष्ठितम् ॥ सत्यं स्वर्गश्च धर्मश्च सत्यादन्यन्न विद्यते ॥ ४० ॥ सत्येन सर्वं लभते यथा तात मया श्रुतम् ॥ न हि सत्यमतिक्रम्य विद्यते किंचिदुत्तमम् ॥४१॥ देवव्रतेन रूढेन वेदगर्भः पुरा किल ॥ सत्यस्थितेन देवानां परित्यक्तो महात्मना ॥ ४२ ॥ दीक्षां धारयते ब्रह्मा स तेनैव सुयन्त्रितः ॥ ओर्वेणाग्निस्तथा क्षितः सत्येन वडवामुखे ॥ ४३ ॥ संवर्त्तेन पुरा तात सर्वे लोकाः सदेवताः ॥ देवानामनुकंपार्थं धृता वीर्यवता तदा ॥४४॥ पातालं पाल्यन् सत्यं बद्धो वैरोचनो बलम् ॥ वर्द्धमानो महाशृङ्गैः शतशृङ्गो महागिरिः ॥ ४५ ॥ स्थितः सत्ये महाविन्ध्यो वर्द्धमानो न वर्द्धते ॥ सर्वं चरा चरमिदं सत्येन श्रीयते जगत् ॥ ४६ ॥ गृहधर्माश्च ये दृष्टा वानप्रस्थाश्च शोभिताः ॥ यतीनां च गतिः शुद्धा ये चान्ये व्रतसंस्थिताः ॥४७॥ अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ॥ अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ४८ ॥ सत्येन पाल्यते धर्मो धर्मो रक्षति रक्षितः ॥ तस्मात् सत्यं कुरुष्वाद्य रक्ष आत्मानमात्मना ॥ ४९ ॥ एवमुक्त्वा हृदपुष्टः स्वेन देहेन सुव्रत ॥ तपसा प्राप्तयोगस्तु जितात्मा कृतसंयमः ॥५०॥ ऋषिपुत्रो महातेजा सत्यवागनसूयकः ॥ प्राप्तश्च परमं स्थानं यत्र राज्ञो यमस्य तु ॥ ५१ ॥ इति श्रीवराहपुराणे प्रागितिहासे संसारचक्रे

नचिकेतप्रयाणं नाम त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥ अथ नचिकेतसो आगमनवर्णनम् ॥ वैशम्पायन उवाच ॥ गतश्च परमं स्थानं
यत्र राजा दुरासदः ॥ अचिंतस्तु यथान्यायं दृष्ट्वैव तु विसर्जितः ॥ १ ॥ ततो हृष्टमना राजन्पुत्रं दृष्ट्वा तपोनिधिः ॥ परिष्वज्य च
बाहुभ्यां मूर्ध्न्याघ्राय यत्नतः ॥ २ ॥ दिवं च पृथिवीं चैव नादयामास हृष्टवत् ॥ स संहृष्टमनाः प्रीतस्तानुवाच तपोधनान् ॥ ३ ॥ पश्यन्तु
मम पुत्रस्य प्रभावं दिव्यतेजसः ॥ यमस्य भवनं गत्वा पुनः शीघ्रमिहागतः ॥ ४ ॥ पितृस्नेहानुभावेन गुरुशुश्रूषयापि च ॥ दैवेन हेतुना
चायं जीवन्दृष्टो मया सुतः ॥ ५ ॥ लोके मत्सदृशो नास्ति पुमान्भाग्यसमन्वितः ॥ एष मृत्युमुखं गत्वा मम पुत्र इहागतः ॥ ६ ॥ कच्चित्त्वं
न हतो वत्स नैव बद्धो यमालये ॥ कच्चित्ते स शिवः पन्था गच्छतस्तव पुत्रक ॥७॥ कच्चित्ते व्याधयो घोरा नाव्यगच्छन्यमालये ॥ किमपूर्वं
त्वया दृष्टं कच्चित्तुष्टो महातपाः ॥ ८ ॥ कच्चिद्राजा त्वया दृष्टः प्रेतानामधिपो बली ॥ परुषेण न कच्चित्त्वां यमः पश्यति चक्षुषा ॥ ९ ॥
कच्चिन्न तुष्टो भगवांस्त्वां दृष्ट्वा स्वयमागतम् ॥ कच्चिच्छीघ्रं विसृष्टोऽसि धर्मराजेन पुत्रक ॥ १० ॥ कच्चिद्दोषारिकास्तत्र न रौद्रास्त्वां यमालये ॥ कच्चिद्राज्ञा विसृष्टं तु ना बाधन्तेतरे जनाः ॥ ११ ॥ कच्चित्पन्थास्त्वया लब्धो निर्गमो वा यमालये ॥ अयं मम सुतः प्राप्तः प्रसन्ना
मम देवताः ॥ १२ ॥ ऋषयश्च महाभागा द्विजाश्च सुमहाव्रताः ॥ यन्मे वत्स पुनः प्राप्तो यमलोकाद्दुरासदात् ॥ १३ ॥ एवमाभाषमाणं तु
श्रुत्वा सर्वे वनौकसः ॥ त्यक्त्वा व्रतानि सर्वाणि नियमांश्च तथैव च ॥ १४ ॥ जपन्तश्चैव जाप्यानि पूजयन्तश्च देवताः ॥ उद्बाहवः केचि
त्तिष्ठन्तोऽन्ये सुदारुणम् ॥ १५ ॥ एकपादेन तिष्ठन्तः पश्यन्तोऽन्ये दिवाकरम् ॥ एवमेव परित्यज्य नियमान्पूर्वसंचितान् ॥ १६ ॥ वैश्वानरा
महाभागास्तपसा संशितव्रताः ॥ आगतास्त्वरितं द्रष्टुं नाचिकेतं सुतं तदा ॥ १७ ॥ दिग्वाससश्च ऋषयो दन्तोलूखलिनस्तथा ॥ अश्म
कुट्टाश्च मौनाश्च शीर्णपर्णाम्बुभोजनाः॥१८॥धूमदाश्च तथा चान्ये तप्यमानाश्च पावके ॥ परिवार्य तथा दृष्ट्वा तस्य पुत्रं तपोनिधिम्॥ १९ ॥
उपविष्टास्तथा चान्ये स्थिताश्चान्ये सुयन्त्रिताः ॥ ते सर्वे तं तु पृच्छन्ति ऋषयो वेदपारगाः ॥ २० ॥ तं नाचिकेतसं दृष्ट्वा यमलोकाद्दिवा
गतम् ॥ भीतास्तत्र स्थिता हृष्टा केचित्कौतूहलान्विताः ॥२१॥ केचिद्विमनसश्चैव केचित्संशयवादिनः ॥ तमूचुः सहिताः सर्वे ऋषिपुत्रं तपो

॥२०८॥

धनम् ॥ २२ ॥ ऋषय ऊचुः ॥ भो भो सत्यव्रताचार गुरुशुश्रूषणे रत ॥ नाचिकेतः सुत प्राज्ञ स्वधर्मपरिपालक ॥ २३ ॥ ब्रूहि सत्यं त्वया दृष्टं श्रुतं च सविशेषकम् ॥ ऋषीणां श्रोतुकामानां पितुश्चैव विशेषतः॥२४॥ अपि गुह्यं च वक्तव्यं पृष्टे सति विशेषतः ॥ सर्वस्यापि भयं तीव्रं यद्वारा प्रतिदृश्यते॥२५॥मृतं नैव परं तात दृश्यते कालमायया ॥ स्वकर्म भुज्यते तात प्रयत्नेन च मानवैः॥२६॥इह चैव कृतं यत्तु तत्परत्रो पभुज्यते॥करोति यदि तत्कर्म शुभं वा यदि वाऽशुभम् ॥२७॥ तथाऽत्र दृश्यते काले कालस्यैव तु मायया ॥ म्रियते च यथा जन्तुर्यथा गर्भे च तिष्ठति॥२८॥तस्य पारं न गच्छन्ति बहवः पारचिन्तकाः ॥तत्र स्थिते जगत्सर्वं लोभमोहतमोवृतम्॥२९॥चिन्तयेत न चिन्ताऽत्र मृगयन्ति च यद्धितम् ॥करोति चित्रगुप्तः किं किं च जल्पत्यसौ पुनः॥३०॥ धर्मराजस्य किं रूपं कालो वा कीदृशो मुने॥ किंरूपा व्याधयश्चैव विपाको वापि कीदृशः॥३१॥किंच कुर्वन्प्रमुच्येत किं वा कर्म समाचरेत्॥आत्मपदं सर्वलोकस्य तत्कर्म दुरतिक्रमम्॥३२॥क्रोधवन्धनजं क्लेशं कर्षणं छेदनं तथा ॥ येन गच्छन्ति विप्रेन्द्र लोकं कर्मविदो जनाः॥३३॥ जितात्मानः कथं यान्ति कथं गच्छन्ति पापकृत् ॥ यथाश्रुतं यथादृष्टं यथा चैवात्र धारितम् ॥३४॥ प्रणयात्सोऽहदात्स्नेहाद्दास्मभिरभिपृच्छितम् ॥ वद सर्वं महाभाग याथातथ्येन विस्तरम्॥३५॥ वैशम्पायन उवाच॥ ऋषिभि स्त्वेवमुक्तस्तु नाचिकेतो महामनाः ॥ यदुवाच महाराज शृणु तज्जनमेजय ॥ ३६ ॥ इति श्रीवराहपुराणे संसारचक्रे नचिकेतागमनं नाम चतु र्नवत्यधिकशततमोऽध्यायः ॥१९४॥ अथ यमलोकस्थपापिवर्णनम् ॥ नाचिकेत उवाच ॥ कथ्यमानं मया विप्राः शृण्वन्तु तपसि स्थिताः ॥ नमश्च तस्मै देवाय धर्मराजाय धीमते ॥१॥ संसारं तु यथाशक्ति कथ्यमानं निबोधत ॥ असत्यवादिनो ये च जन्तुस्त्रीबालघातकाः॥२॥ तथा ब्रह्मघ्नः पापा ये च विश्वासघातकाः ॥ ये ये शठाः कृतघ्नाश्च लोलुपाः पारदारिकाः ॥३॥ कन्यानां दूषका ये च ये च ये पापरता नराः ॥ वेदानां दूषकाश्चैव वेदमार्गविहिंसकाः ॥४॥ शूद्राणां याजकाश्चैव ह्याहाभूता द्विजातयः ॥ अयाज्ययाजकाश्चैव ये ये कुष्ठयुता नराः ॥५॥ सुरापो ब्रह्महा चैव यो द्विजो वीरघातकः ॥ तथा वार्धुषिका ये च जिह्मप्रेक्षाश्च ये नराः ॥ ६ ॥ मातृत्यागी पितृत्यागी यः स्वसार्यां परित्यजेत् ॥ गुरुद्वेषी दुराचारो दूताश्चाव्यक्तभाषिणः ॥७ ॥ गृहक्षेत्रहरा ये च सेतुबन्धविनाशकाः॥अपुत्राश्चाप्यदाराश्च श्रद्धया च विवर्जिताः॥८॥ अशौचा निर्दयाः

पापा हिंसिका व्रतभञ्जकाः ॥ सोमविक्रयिणश्चैव स्त्रीजितः सर्वविक्रयी ॥ ९ ॥ भूम्यामनृतवादी च वेदजीवी च यो द्विजः ॥ नक्षत्री च निमित्ती च चाण्डालाध्यापकस्तथा ॥१०॥ सर्वमेधुनकर्ता च अगम्यागमने रतः ॥ मायिका रतिकाश्चैव तुलाधाराश्च ये नराः ॥११॥ सर्वपापसुसङ्काश्च चिन्तका येऽतिवैरिणः ॥ स्वाम्यर्थे न हता ये च ये च युद्धपराङ्मुखाः॥१२॥ परवित्तापहारी च राजवाती च यो नरः ॥ अशक्तः पापकोपश्च तथा ये ह्यग्निजीविनः ॥ १३ ॥ शुश्रूषया च मुक्ता ये लिङ्गिनः पापकर्मिणः ॥पात्रकारी चक्रिणश्च नरा ये चाप्यधार्मिकाः ॥१४॥ देवागारांश्च सत्राणि तीर्थविक्रयिणस्तथा ॥ व्रतविद्वेषिणो ये च तथाऽसद्व्रादिनो नराः ॥ १५ ॥ मिथ्या च नखरोमाणि धारयान्ति च ये नराः ॥ कूटा वक्रस्वभावाश्च कूटशास्त्रनकारिणः ॥१६॥ अज्ञानादव्रती यश्च यश्चाश्रमबहिष्कृतः ॥ विप्रकीर्णप्रतिग्राही सूचकस्तीर्थनाशकः ॥१७॥ कलही च व्रतक्लेशश्च निष्ठुरश्च नराधमः॥ एते चान्ये च बहवो ह्यनिर्दिष्टाः सहस्रशः॥१८॥ स्त्रियो नराश्च गच्छन्ति यत्र तच्छृणुतामलाः ॥ कुर्वन्तीह यथा सर्वे तत्र गत्वा यमालये ॥१९॥तानि वै कथयिष्यामि शूयतां द्विजसत्तमाः ॥ वैशम्पायन उवाच ॥ एवं तस्य वचः श्रुत्वा सर्वे एव तपोधनाः॥२०॥ पप्रच्छुर्विस्मयविष्टा नाचिकेतमृषिं तदा ॥ ऋषय ऊचुः ॥ त्वया सर्वं यथा दृष्टं ब्रूहि तत्र विदां वर ॥ २१ ॥ यथास्वरूपः कालोऽसौ येन सर्वं प्रवर्त्तते ॥ इह कर्माणि यः कृत्वा पुरुषो ह्यल्पचेतनः ॥२२॥ वारयेत्स तदा तं तु ब्रह्मलोके च स प्रभुः ॥ कल्पान्तं पच्यमानोऽपि दह्यमानोऽपि वा पुनः ॥२३॥ न नाशो हि शरीरस्य तस्मिन्देशे तपोधनाः ॥ यस्य यस्य हि यत्कर्म पच्यमानः पुनःपुनः ॥२४ ॥ अवश्यं चैव गन्तव्यं तस्य पार्श्वे पुनःपुनः ॥ न तु त्रासाद्विजः शक्तस्तत्र गन्तुं हि कश्चन ॥२५॥ न गच्छन्ति च ये तत्र दानेन नियमेन च ॥ वैतरण्याश्च यद्रूपं किंतोयं च वह त्यसौ ॥२६॥ रौरवो वा कथं विप्र किंरूपं कूटशाल्मलेः ॥ कदिशा वा हि ते दूताः किं कार्याः किंपराक्रमाः ॥ २७ ॥ किंच किंच तु कुर्वाणाः किंच किंच समाचरन् ॥ न चेतो लभते जन्तुच्छादितं पूर्वतेजसा ॥२८॥ धृतिं न लभते किंचिच्चैस्तैर्दोषैः सुवासिताः ॥ दोषं सत्यमजानन्तस्तथा मोहेन मोहिताः ॥२९॥ बोद्धव्यं नावबुध्यन्ते गुणानां तु गुणोत्तरम् ॥ हाहाभूताश्च चिंतार्त्ताः सर्वदोषसमन्विताः ॥३०॥ परं परमजानन्तो रमन्ते कस्य मायया ॥ क्लिश्यन्ते बहवस्तत्र कृत्वा पापमचेतसः ॥३१॥ एतत्कथय वत्स त्वं यतः प्रत्यक्षदर्शिवान् ॥ ३२॥ इति श्रीवराहपुराणे संसारचक्र

॥२०९॥

यमलोकस्थापापिवर्णनं नाम पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥ अथ धर्मराजपुरवर्णनम् ॥ वैशम्पायन उवाच ॥ तेषां तद्वचनं श्रुत्वा ऋषीणां भावितात्मनाम् ॥ उवाच वाक्यं वाक्यज्ञः सर्वं निरवशेषतः ॥ १ ॥ नाचिकेत उवाच ॥ श्रूयतां द्विजशार्दूलाः कथ्यमानं मया द्विजाः ॥ योजनानां सहस्रं तु विस्तराद्विगुणायतम् ॥ २ ॥ द्विगुणं परिखेपेण तद्वै प्रेतपतेः पुरम् ॥ भवनैरावृतं दिव्यैर्नानारूपैर्मनोनदमयैः शुभैः ॥ ३ ॥ हर्म्यप्रासादसंबाधमहाट्टालसमन्वितम् ॥ सोवर्णैर्नैव महता प्राकारेणाभिवेष्टितम् ॥४ ॥ कैलासशिखराकारैर्भवनैरुपशोभितम् ॥ तत्र वै विमला नद्यस्तोयपूर्णाः सुशोभनाः ॥ ५ ॥ दीर्घिकाश्च तथा कान्ता नलिन्यश्च सरांसि च ॥ तडागाश्चैव कूपाश्च वृक्षषण्डाः सुशोभनाः ॥६॥ नरनारीसमाकीर्णा गजवाजिसमाकुलाः ॥ नानादेशसमुत्थानैर्नानाजातिभिरेव च ॥७॥ सर्वजीवैस्तथाकीर्णा तस्य राज्ञः पुरोत्तमम्॥ कचिद्युद्धं कचिद्वृद्धं तेन बद्धो यमालये ॥८॥ कचिद्गायन् हसंश्चैव कचिद्दुःखेन दुःखितः ॥ कचित्क्रीडन्यथाकर्म कचिद्भुञ्जन् कचित्स्वपन् ॥९॥ कचिद्वृत्यन् कचित्तिष्ठन् कचिद्बन्धनसंस्थितः ॥ एवं शतसहस्राणि तस्य राज्ञः पुरोत्तमे ॥१०॥ स्वकर्मभिः प्रदृश्यन्ते स्थूलाः सूक्ष्माश्च जन्तवः॥ मया दृष्टा द्विजश्रेष्ठास्तस्य राज्ञः पुरोत्तमे ॥ ११ ॥ अङ्गानि चैव सीदन्ति मनो विह्वलतीव मे ॥ दिव्यभावाः स्पृशन्त्येते चित्तयानस्य तत्फलम् ॥ १२ ॥ तथापि कथयिष्यामि यथादृष्टं तथाश्रुतम् ॥ पुष्पोदका नाम तत्र नदीनां प्रवरा नदी ॥ १३ ॥ दृश्यते न च दृश्येत नानावृक्षसमाकुला ॥ सुवर्णकृतसोपाना दिव्यकांचनवालुका ॥ १४ ॥ प्रसन्नेन च तोयेन शीतलेन सुगन्धिना ॥ पुण्यत्फलवनाकीर्णा नानापक्षिसमाकुला ॥ १५ ॥ भ्राजते सरितां श्रेष्ठा सर्वपापप्रणाशिनी ॥ तस्यास्तीरे मया दृष्टाः पादपाश्च सहस्रशः ॥ १६ ॥ अमराः क्रीडमानाश्च जलक्रीडां पुनःपुनः ॥ विशालजघना यस्यां गन्धर्वीः सामगा इव ॥ १७ ॥ भुजङ्गवनताङ्गश्च किन्नरैश्च सुगायनाः ॥ दिव्यभूषणसम्भोगैः क्रीडन्त्यत्र समागताः ॥ १८ ॥ एवं नारीसहस्राणि तत्र दिव्यानि नित्यशः ॥ क्रीडन्ति सलिले तत्र प्रासादेषु शुभेषु च ॥ १९ ॥ तत्रापरे वृक्षषण्डा नित्यपुष्पफलान्विताः ॥ ते च कामप्रदा नित्यं तथा द्विजसमायुताः ॥ २० ॥ प्रमदाश्च जले तत्र कामरूपाः सुमेखलाः ॥ रमयन्त्यो नरांस्तत्र यथाकामं यथासुखम् ॥ २१ ॥ तां नदीं क्षोभयन्त्यस्ताः क्रीडन्ति सहिताः प्रियैः ॥ गायन्ति सलिले काश्चि

न्मधुरं मधुविह्वलाः ॥ २२ ॥ जलतूर्यनिनादेन भूषणानां स्वनेन च ॥ भाति सा निम्नगा दिव्या दिव्यरत्नैरलंकृता ॥ २३ ॥ वैवस्वती नाम महानदी सा शुभा नदीनां प्रवराऽतिरम्या ॥ प्रयाति मध्ये नगरस्य नित्यं मातेव पुत्रं परिपालयन्ती ॥ २४ ॥ तोयानुरूपा च मनोहरा च दिव्येन तोयेन सदैव पूर्णा ॥ यस्यास्तु हंसाः पुलिनेषु मत्ताः कुन्देन्दुवर्णाः प्रचरन्ति नित्यम् ॥२५॥ रथाङ्गसाह्वैः प्रवरैश्च पद्मैः प्रतप्तजाम्बूनद कर्णिकाभैः ॥ या दृश्यते चैव मनोज्ञरूपा सुवर्णतोपानयुता सुकान्ता ॥ २६ ॥ यस्यास्तु तोयं विमलं सुगन्धि स्वादु प्रसन्नं त्वमृतोपमं च ॥ वृक्षास्तु यस्या वनखण्डजाताः सदा शुभैः पुष्पफलैरुपेता ॥ २७ ॥ नार्यः सुरूपा मदविह्वलाश्च क्रीडन्ति ता यत्र मनोज्ञरूपाः ॥ यस्यां जनः क्रीडनताडनाद्यैर्वर्णैर्न यातिं न वै कदाचित् ॥ २८ ॥ या देवतानामपि पूजनीया तपोनिधीनां च तथा मुनीनाम् ॥ या दृश्यते तोय भरेण कान्ताकृतिः कवीनामिव निर्मलार्था ॥ २९ ॥ जलं च दत्तं बहुभिर्नरैश्च तस्याः स्वरूपप्रतिमा च निष्ठा ॥ प्रासादपङ्क्तिर्ग्वेलनप्रकाशा तस्यास्तु तीरे बहुभक्तिरम्याः ॥ ३० ॥ वादित्रगीतस्वनतालयुक्ता गायन्ति नार्यः सहिताः सदा हि ॥ कन्याकुलानां मृदुभाषितानि मनोहराणां च वनेषु तेषु ॥ ३१ ॥ कुर्वन्ति संदर्पमिव स्वनेन मनोज्ञरूपा दिवि देवतानाम् ॥ मृदङ्गनादश्च सुतन्त्रियुक्तगीतध्वनिश्चैव सुवंशयुक्तः ॥ ३२ ॥ प्रासादकुञ्जेषु विहार्यमाणा न तृप्तिमेवं बहु ताः प्रयान्ति ॥ गन्धः सुगन्धोऽगुरुचन्दनानां वातः शुभो वाति सुशीतमन्दः ॥ ३३ ॥ क्वचित् सुगन्धः प्रचचार भूयः प्रासादरोधं प्रविरूढमार्गः ॥ क्वचिज्जनाः क्रीडनकावसक्ताः क्वचिच्च नारीनरगीतशब्दाः ॥ ३४ ॥ तथाऽपरे क्रीडनकाः सकान्ताः सुवर्णवेदीकृतसानुशोभाः ॥ विमानभूताः प्रचरन्ति तोये प्रमत्तनारीनरसंकुलाश्च ॥ ३५ ॥ शक्यो विभागो न हि रम्यतायाः ह्यसौ दिनैर्वा बहुभिः प्रवक्तुम् ॥ नैषा कथा कर्मसमाधियुक्ता शक्त्या प्रवक्तुं दिवसैरनल्पैः ॥ ३६ ॥ इति श्रीवराहपुराणे संसारचक्रे धर्मराजपुरवर्णनं नाम षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥ ऋषिपुत्र उवाच ॥ दशयोजनविस्तारं ततो द्विगुणमायतम् ॥ प्राकारेण परिक्षिप्तं प्रासादशत शोभितम् ॥ १ ॥ समालिखदिवाकाशं प्रदीप्तमिव तेजसा ॥ गोपुरं तूत्तमं तत्र प्रासादशतशोभितम् ॥ २ ॥ नानायन्त्रैः समाकीर्णं ज्वाला मालासमायुतम् ॥ देवतानामृषीणां च ये चान्ये शुभकारिणः ॥ ३ ॥ प्रवेशस्तत्र तेषां हि विहितो धर्मदर्शिनाम् ॥ राजते गोपुरं सर्वं शारदाभ्र ॥२१७॥

चयप्रभम् ॥ ४ ॥ मानुषाणां सुकृतिनां प्रवेशस्तत्र निर्मितः ॥ अग्निधर्मसमाकीर्णं सर्वदोषसमन्वितम् ॥ ५ ॥ आयसं गोपुरं तत्र दक्षिणं भीमदर्शनम् ॥ रौद्रं प्रतिभयाकारं सुतप्तं दुर्निरीक्षणम् ॥ ६ ॥ प्रवेशो हि ततस्तेन विहितो रविसूनुना ॥ पापिष्ठानां नृशंसानां क्रव्यादानां दुरात्मनाम् ॥ ७ ॥ पापानां चैव सर्वेषां ये चान्ये घातकारकाः ॥ ओदुम्बरमवीचीकसुचावचमनःकृतम् ॥ ८ ॥ गोपुरं पश्चिमं तच्च दुर्निरीक्षं समन्ततः ॥ महता वह्निजालेन समालिप्तं भयानकम् ॥ ९ ॥ दुष्कृतीनां प्रवेशार्थं यमेन विहितं स्वयम् ॥ तस्मिन् पुरवरे रम्ये रम्या परम शोभना ॥ १० ॥ सर्वरत्नमयी दिव्या वेवस्वतनियोजिता ॥ सभा परमसम्पन्ना धार्मिकैः सत्यवादिभिः ॥ ११ ॥ जितक्रोधैरलुब्धैश्च वीतरागै स्तपस्विभिः ॥ सा सभा धर्मयुक्तानां सा सभा पापकारिणाम् ॥१२॥ सा सभा सर्वलोकस्य शुभस्येवाशुभस्य च ॥ कर्मणा सूचितस्याथ सा सभा धर्मसंहिता ॥ १३ ॥ आनिर्वर्त्य यथा कर्म शास्त्रदृष्टेन कर्मणा ॥ निर्विशङ्का निराक्षेपा धर्मज्ञा धर्मपाठकाः ॥ १४ ॥ चिन्तयन्ति च कार्याणि सर्वलोकहिताय ते ॥ यथादृष्टं यथाशास्त्रं यथाकालनिवेदकाः ॥१५॥ ततः सर्वे च तत्सर्वं चिन्तयन्ति सुयन्त्रिताः ॥ मनुः प्रजापति श्चैव पाराशर्यो महामुनिः ॥ १६ ॥ अत्रिरौद्दालकिश्चैव आपस्तम्बश्च वीर्यवान् ॥ बृहस्पतिश्च शुक्रश्च गौतमश्च महातपाः ॥ १७ ॥ शङ्खश्च लिखितश्चैव ह्याङ्गिरा भृगुरेव च ॥ पुलस्त्यः पुलहश्चैव ये चान्ये धर्मपाठकाः ॥ १८ ॥ यमेन सहिताः सर्वे चिन्तयन्ति प्रतिक्रियाम् ॥ सर्वे च कामप्रचुरा ये दिव्या ये च मानुषाः ॥१९॥ कुण्डलाभ्यां पिनद्धाभ्यामङ्गदाभ्यां महातपाः ॥ भ्राजते मुकुटस्तस्य ब्रह्मदत्तो महाद्युतिः ॥२०॥ तेजसा वचसा चैव दुर्निरीक्ष्यो महाबलः ॥ एकस्थामिव सर्वेषां तेजस्तेजस्विनां तदा ॥ २१ ॥ तस्य पार्श्वे महादिव्या ऋषयो ब्रह्मवादिनः ॥ दीप्यमानाः स्ववपुषा वेदवेदाङ्गपारगाः ॥ २२ ॥ वेदार्थानां विचारज्ञाः सत्यधर्मपुरस्कृताः ॥ छन्दःशिक्षाविकल्पज्ञाः सर्वशास्त्रविक ल्पकाः ॥ २३ ॥ निरुक्तमतिवादाश्च सामगान्धर्वशोभिताः ॥ धातुवादाश्च विविधा निरुक्ताश्चैव नैगमाः ॥ २४ ॥ तत्र चैव मया दृष्टा ऋषयः पितरस्तथा ॥ भवने धर्मराजस्य प्रगायन्तः कथाः शुभाः ॥ २५ ॥ तस्य पार्श्वे मया दृष्टः कृष्णवर्णो महाहनुः ॥ उत्तमः प्रकृता कार उर्ध्वरोमा निराकृतिः ॥ २६ ॥ वामबाहुश्च दण्डेन प्रवरेण समन्वितः ॥ विकृतास्यो महादंष्ट्रो नित्यक्रुद्धो भयानकः ॥ २७ ॥

शिक्षार्थं धर्मराजेन सन्दिष्टः स पुनःपुनः ॥ शृणोति चैव कालाऽसौ नित्ययुक्तः सनातनः ॥ २८ ॥ तथान्ये चापरे तत्र शासनेषु
समाहिताः ॥ दृष्टास्तत्र मया तात सर्वेतेजोमयी शुभा ॥ २९ ॥ यमेन पूज्यमाना सा दिव्यगन्धानुलेपनैः ॥ संहारः सर्वलोकानां गतीनां च
महागतिः ॥३०॥ अतः परं न कर्तव्यं साधनं कथितं बुधैः ॥ विभ्याति ह्यसुरास्तत्र ऋषयश्च तपोधनाः ॥३१॥ असुराश्च सुराश्चैव योगिनश्च
महौजसः ॥ नमस्कार्या च पूज्या च मोहिनी सर्वसाधनी ॥ ३२ ॥ तस्याङ्गेभ्यः समुद्भूता व्याधयः क्लेशसम्भवाः ॥ अपराश्च महाघोराः व्याधयः
कालनिर्मिताः ॥ ३३ ॥ पोरुषेण समायुक्ताः सर्वलोकनयायताः ॥ प्रकृत्या दुर्विनीतश्च महाक्रोधः सुदारुणः ॥ ३४ ॥ महासत्त्वो महातेजाः
जरामरणवर्जितः ॥ मृत्युर्दृष्टा दुराधर्षो दिव्यगन्धानुलेपनः ॥ ३५ ॥ गायका हासकाश्चैव सर्वजीवप्रबोधकाः ॥ मृत्युना सहिता नित्यं कालज्ञाः
कालसम्मताः ॥ ३६ ॥ दिव्याभरणशोभाभिः शोभमानाः सुतेजसः ॥ सवालव्यजनच्छत्रैः केचित्तत्र महौजसः ॥ ३७ ॥ पर्यास्तरणसंछन्नेष्वा
सनेषु तथा परे ॥ पूज्यमाना मया दृष्टाः केचित्तत्र महौजसः ॥ ३८ ॥ अनेकाश्च ज्वरास्तत्र वेदनाश्च सुदारुणाः ॥ नारीनरस्वरूपाश्च मया
दृष्टास्त्वनेकशः ॥ ३९ ॥ कामक्रोधविचारिण्यो नानारूपधराः स्त्रियः ॥ जीवभक्षकरा घोरास्तीव्ररोषा भयानकाः ॥४०॥ तासां हलहलाशब्दः
सर्वासां च समन्ततः ॥ धर्मराजसमीपे तु दारयन्ति धरामिमाम् ॥४१॥ कूष्माण्डा यातुधानाश्च राक्षसाः पिशिताशनाः ॥ एकपादा द्विपादाश्च
त्रिपादा बहुपादकाः ॥ ४२ ॥ एकबाहुर्द्विबाहुश्च त्रिबाहुर्बहुबाहुकः ॥ शङ्कुकर्णा महाकर्णा हस्तिकर्णास्तथाऽपरे ॥ ४३ ॥ केचित्तु तत्र पुरुषाः
सर्वशोभादिशोभिताः ॥ केयूरैर्मुकुटैश्चान्ये चित्रैरङ्गैस्तथाऽपरे ॥ ४४ ॥ स्रग्विणो बद्धपादाश्च सर्वाभरणभूषिताः ॥ सकुठाराः सकुद्दालाः
सचक्राः शूलपाणयः ॥ ४५ ॥ सशक्तितोमराः केचित्सघनुष्का दुरासदाः ॥ असिहस्तास्तथा चान्ये तथा मुद्गरपाणयः ॥ ४६ ॥
सज्जिता दधिहस्ताश्च गन्धहस्ता ह्यनेकशः ॥ विचित्रभक्षहस्ताश्च वस्त्रहस्तास्तथैव च ॥ ४७ ॥ धूपान्प्रगृह्य विविधान्वासांसि शुभ ॥२१७॥
दर्शनाः ॥ शिबिकाश्च महाशोभा यानानि विविधानि च ॥ ४८ ॥ वाजिकुञ्जरयुक्तानि हंसयुक्तानि चापरे ॥ शरभै ऋषभैश्चापि
हस्तिभिश्च सुदर्शनैः ॥ ४९ ॥ मयूरैः सारसैश्चैव चक्रवाकैश्च वाजिभिः ॥ एवंरूपा मया दृष्टास्तत्र चान्ये भयानकाः ॥ ५० ॥

उज्ज्वला मलिनाश्चैव जीर्णवस्त्रा नवांशुकाः ॥ सुमनाभिमना मूका मारकाः शतमारकाः ॥ ९१ ॥ समार्जारी काचवर्णा कृष्णा चैव कलिस्तथा ॥ धर्महस्ता यशोहस्ताः कीर्तिहस्तास्तथापरे ॥ ९२ ॥ एते पुरोगमास्तत्र कृतान्तस्य महात्मनः ॥ यद्येतानि यजेद्विप्रो नास्ति तस्य पराभवः ॥९३॥ नमस्कार्याश्च पूज्याश्च आपन्नेन हि नित्यशः ॥ परितुष्य कृता नित्यं विहिताः सार्वलौकिकाः ॥९४॥ इति श्रीवराहपुराणे संसारचक्रे कृतान्तकालमृत्युकिङ्करवर्णनं नाम सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥ अथ संसारचक्रयातनास्वरूपवर्णनम् ॥ वर्त्तमानः सभामध्ये राजा प्रेतपुराधिपः ॥ मामेकमृषभं तत्र दृशेनं च ददौ यमः ॥ १ ॥ याथातथ्येन मे पूजा कार्येण विधिनाऽकरोत् ॥ आसनं पाद्यमर्घ्यं च वेददृष्टेन कर्मणा ॥ २ ॥ अब्रवीच्च पुनर्हृद्यो ह्यास्यतां च वरासने ॥ कांचने कुशसंच्छन्ने दिव्यपुष्पोपशोभिते ॥ ३ ॥ तस्य वक्त्रं महारौद्रं नित्यमेव भयानकम् ॥ पश्यतस्तस्य मां विप्रास्ततः सौम्यतरं बभौ ॥ ४ ॥ लोहिते तस्य वै नेत्रे जल्पतश्च पुनःपुनः ॥ पद्मपत्रनिभे चैव जज्ञाते मम सौहृदात् ॥ ५ ॥ ततोऽहं तस्य भावेन भावितश्च पुनःपुनः ॥ हृष्टमानसो जातो विश्वासं च परं गतः ॥६ ॥ तस्य प्रीतिकरं सद्यः सर्वदोषविनाशनम् ॥ कामदं च यशोदं च देवर्तेश्चापि पूजितम् ॥ ७ ॥ कालवृद्धिकरं स्तोत्रं क्षिप्रं तत्र उदीरयन् ॥ येन प्रीतो महातेजा यमः परमधार्मिकः ॥ ८॥ ऋषिपुत्र उवाच ॥ त्वं धाता च विधाता च श्राद्धे चैव हि दृश्यसे ॥ पितॄणां परमो देवश्चतुष्पाद नमोऽस्तु ते ॥९॥ कालज्ञश्च कृतज्ञश्च सत्यवादी दृढव्रतः ॥ प्रेतनाथ महाभाग धर्मराज नमोऽस्तु ते ॥ १० ॥ कर्म कारयिता चैव भूतभव्य भवत्प्रभो ॥ पावको मोहनश्चैव संक्षेपो विस्तरस्तथा ॥ ११ ॥ दण्डपाणे विरूपाक्ष पाशहस्त नमोऽस्तु ते ॥ आदित्यसदृशाकार सर्वजीवहर प्रभो ॥१२॥ कृष्णवर्ण दुरावर्ष तैलरूप नमोऽस्तु ते ॥ मार्तण्डसदृश श्रीमन्मार्तण्डसदृशद्युतिः ॥१३॥ हव्यकव्यवहस्त्वं हि प्रभविष्णो नमोऽस्तु ते ॥ पापहन्ता व्रती श्राद्धानित्ययुक्तो महातपाः ॥१४॥ एकदण्डबहुदण्भूत्वा काल मृत्यो नमोऽस्तु ते॥ क्वचिद्दण्डी क्वचिन्मुण्डी क्वचित् कालो दुरासदः ॥१५॥ क्वचिद्बालः क्वचिद्वृद्धः क्वचिद्रोद्रो नमोऽस्तु ते ॥ त्वया विरजितो लोकः शासितो धर्महेतुना ॥१६॥ प्रत्यक्ष्यं दृश्यते देव त्वां विना न च सिध्यति ॥ देवानां परमो देवस्तपसां परमं तपः ॥१७॥ जपानां परमं जप्यं त्वत्तश्चान्यो न दृश्यते ॥ ऋषयो वा तथा रुद्रा

हतबन्धुसुहृज्जनाः ॥१८॥ पतिव्रतास्तु या नार्यो दुःखितास्तपसि स्थिताः ॥ न त्वं शक्त इह स्थानात्पातनाय कदाचन ॥ १९ ॥ तस्मात्त्वं सर्वदेवेषु चेको धर्मभृतां वरः ॥ कृतज्ञः सत्यवादी च सर्वभूतहिते रतः ॥ २० ॥ वैशम्पायन उवाच ॥ एवं श्रुत्वा स्तवं दिव्यमृषिपुत्रेण भाषितम् ॥ परितुष्टस्तदा धर्मो ह्यौदालकसुतं प्रति ॥ २१ ॥ यम उवाच ॥ परितुष्टोऽस्मि भद्रं ते माधुर्येण तवानघ ॥ याथातथ्येन वाक्येन ब्रूहि किं करवाणि ते ॥ २२॥ वरं वरय भद्रं ते यं वरं काङ्क्षसे द्विज ॥ शुभं वा श्रेयसा युक्तं जीवितं वाप्यनामयम् ॥ २३ ॥ ऋषिपुत्र उवाच॥ नेच्छाम्यहं महाभाग मृत्युं वा जीवितं प्रभो ॥ यदि त्वं वरदो राजन्सर्वभूतहिते रतः ॥ २४ ॥ द्रष्टुमिच्छाम्यहं देव तव देशं यथातथम् ॥ पापानां च शुभानां च या गतिस्त्विह दृश्यते ॥ २५ ॥ सर्वं दर्शय मे राजन्यदि त्वं वरदो मम ॥ चित्रगुप्तं च तं राजन्कार्यार्थं तव चिन्तकम् ॥ २६ ॥ दर्शयस्व महाभाग सर्वलोकस्य चिन्तक ॥ यथा कर्मविशेषाणां दर्शनार्थं करोति सः ॥२७ ॥ एवमुक्तो महातेजा द्वारस्थं संदिदेश ह ॥ चित्रगुप्तसकाशं तु नय विप्रं सुयन्त्रितम् ॥ २८ ॥ वक्तव्यश्च महाबाहुरस्मिन्विप्रे यथातथम् ॥ प्राप्तकालं च युक्तं च तत्सर्वं वक्तुमर्हसि ॥ २९ ॥ ततोऽहं त्वरितं नीतस्तेन दूतेन दर्शितः ॥ प्राप्तश्च परया प्रीत्या चित्रगुप्तनिवेशनम् ॥ ३० ॥ प्रत्युत्थितश्च मां दृष्ट्वा चिन्तयित्वा तु तत्त्वतः ॥ स्वागतं मुनिशार्दूल यथेष्टं परिगम्यताम् ॥ ३१ ॥ एवं सम्भाष्य मां वीरः स्वान्भृत्यान्सन्दिदेश ह ॥ कृताञ्जलिपुटान्सर्वान्घोररूपान्भयानकान् ॥ ३२ ॥ चित्रगुप्त उवाच ॥ भो भो शृणुत मे दूता मम चित्तानुवर्त्तकाः ॥ भक्तिमन्तो दुराधर्षा नित्यं व्रतपरायणाः ॥ ३३ ॥ अयं विप्रो मयादिष्टः प्रेतावासं गमिष्यति ॥ अस्य रक्षा च गुप्तिश्च भवद्भिः क्रियतामिति ॥ ३४ ॥ नैव दुःखेन खेदः स्यान्न चोष्णेन च शीततः ॥ नु भुक्षापि तृषा वापि एष आज्ञापयाम वः ॥ ३५ ॥ एवं दत्तवरो विप्रो गुरुचित्तानुचिन्तकः ॥ सर्वभूतदयावांश्च द्रव्यवांश्च स वै द्विजः ॥ ३६ ॥ यथाकाममयं पश्येद्धर्म्मराजपुरेत्तमम् ॥ एवमुक्त्वा महातेजा गच्छ गच्छेति चाब्रवीत् ॥ ३७ ॥ ऋषिपुत्र उवाच ॥ सन्दिष्टाश्च ततो दूताश्चित्रगुप्तेन धीमता ॥ धावन्तस्त्वरमाणास्तु गृह्णन्तो ह्यन्त एव च ॥ ३८ ॥ बध्नयन्ति महाकाया निर्दहन्ति महाबलाः ॥ पाटयन्ति प्रहारैश्च ताडयन्ति पुनः पुनः ॥ ३९ ॥ वेणुयष्टिप्रहारैश्च प्रहरन्ति ततोऽधिकैः ॥ भग्ना भिन्ना विभिन्नाश्च तथा भग्न

शिरोधराः ॥ ४० ॥ रुदन्ति करुणं घोरं त्रातारं नाप्नुवन्ति ते ॥ नरकेऽपि तथा पूर्णे ह्यगाधे तमसावृते ॥ ४१ ॥ केचिच्च तेषु पच्यन्ते दह्यन्ते पावकेन्धनम् ॥ तैलपाके तथा केचित्केचिक्षारेण सर्पिषा ॥ ४२ ॥ पतन्ति ते दुरात्मानस्तत्र तत्र च कर्मभिः ॥ यातनाभिर्दह्यमाना घोराभिश्च ततस्ततः ॥ ४३ ॥ केचिद्यन्त्रमुपारोप्य संपीड्यन्ते तिला इव ॥ तेषां संपीड्यमानानां शोणितं स्रवते बहु ॥ ४४ ॥ ततो वैतरणी घोरा संभूता निम्नगा तथा ॥ सफेनसलिलावर्त्ता दुस्तरा पापकर्मिणाम् ॥ ४५ ॥ अथान्ये शूल आरोप्य दूताः पादेषु गृह्य वै ॥ वैतरण्यां सुघोरायां प्रक्षिपन्ति सहस्रशः ॥ ४६ ॥ नानुष्णे रुधिरे तत्र फेनमालासमाकुलाः ॥ दशन्ति सर्पास्तांस्तत्र प्राणिनस्तु सहस्रशः ॥४७ ॥ अनुत्तार्य तदा तस्या उच्छ्रिता विकृतावशाः ॥ आवर्त्तादूर्मयश्चैव ह्युत्तिष्ठन्ति सहस्रशः ॥ ४८ ॥ तत्र शुष्यन्ति ते पापाः सर्वदोषसमन्विताः ॥ मज्जन्तश्च वमन्तश्च त्रातारं नाप्नुवन्ति ते ॥४९॥ अथान्ये बहवस्तत्र बहुभिश्चापि दूतकैः ॥ कूटशाल्मलिमारोप्य लोहकण्टकसंवृताम् ॥५०॥ असिशक्तिप्रहारैश्च ताडयन्ति पुनःपुनः ॥ तत्र शाखासु घोरासु मया दृष्टाः सहस्रशः ॥५१ ॥ कूष्माण्डा यातुधानाश्च लंबमाना भयानकाः ॥ अतिक्रम्य च ते स्कन्धास्तीक्ष्णकण्टकसङ्कुलाः ॥ ५२ ॥ वेदनार्त्तास्तु वेगेन शीघ्रं शाखा उपारुहन् ॥ तत्र ते निहता घोरा राक्षसाः पिशिताशनाः ॥ ५३ ॥ भ्रान्ति चारूढगात्राणि नःशङ्कं तमसा वृतम् ॥ संक्रमाच्चैव खादन्ति शालायां कपिवद्भृशम् ॥ ५४ ॥ यथा च कुक्कुटं खादेत् कश्चिन्म्लेच्छो निराकृतः ॥ तथा कटकटाशब्दस्तस्मिन्वृक्षे मया श्रुतः ॥ ५५॥ पक्वमाम्रफलं यद्वन्नरः खादेद्यथा वने ॥ एवं ते मुखतः कृत्वा महावक्त्रा दुरासदाः ॥ ५६ ॥ चूर्णयित्वा तु तान्सर्वांस्ते च तस्मिन्नगोत्तमे ॥ विसृजन्ति क्षितिं यावद्यास्थिभूतान्नरांस्तथा ॥ ५७ ॥ ततो जवेन संयुक्ता वनस्थाश्चूर्णिताः पुनः ॥ आविष्टानि च कर्माणि पुनः शीघ्रमकामयन् ॥ ५८ ॥ अथस्तान्तु पुनस्तत्र पश्यन्तः पापकर्मिणः ॥ बहुसंख्येषु पापेषु दारुणेषु सुदुःखिताः ॥ ५९ ॥ भो देव पाहि मुञ्चेति वदन्तः परुषं वचः ॥ यमदूता निरामर्षाः सूदयन्ति पुनः पुनः ॥६०॥ पाषाणवर्षैः केचित्तु पांसुवर्षैश्च विद्रुताः ॥ प्राविशन्ति नगच्छायां ततस्ते प्रज्वलन्ति तु ॥ ६१ ॥ द्रवन्ति च पुनस्तत्र दूतैश्चापि दृढं हताः ॥ भुवनेषु च घोरेषु पच्यन्ते ते दृढाग्निना ॥ ६२॥ वारिपूर्णं ततः कुम्भं शीतलं च जलं पुनः ॥ दीयतां दीयतां चेति ब्रुवते नः प्रसीदथ ॥६३॥

ततः पानीयरूपेण जलं तत्तं तु दीयते ॥ तेन दग्धाश्च आत्ताश्च क्रोशन्तश्च परस्परम् ॥ ६४ ॥ आलिङ्ग्यालिङ्गच दुःखार्त्ताः केचित्तत्र पतन्ति वै ॥ तथान्ये क्षुधितास्तत्र ह्याहाभूतमचेतसः ॥ ६५ ॥ अन्नानां च सुमिष्टानां भक्ष्याणां च विशेषतः ॥ पश्यन्ति राशिं तत्रस्थां सुगन्धां पर्वतोपमाम् ॥ ६६ ॥ दधिक्षीररसाश्चैव कुसरान्पायसं तथा ॥ मधुमाधवपूर्णानि सुरामैरेयकस्य च ॥ ६७ ॥ माध्वीकस्य च पानस्य सीधोर्जातीरसस्य च ॥ पानानि दिव्यानि सुगन्धीनि वै शीतलानि च ॥ ६८ ॥ गोरसस्य च पानानि भाजनानि च नित्यशः ॥ तपोऽर्जितानि दिव्यानि तिष्ठन्ति सुकृतात्मनाम् ॥ ६९ ॥ माल्यानि धूपं गन्धाश्च नानारससमायुताः ॥ मनोहराश्च कान्ताश्च भूषिष्ठाश्च सहस्रशः ॥ ७० ॥ भोजनेषु च सर्वेषु स्त्रियः कान्ता मनोहराः ॥ गृहीतकुम्भमणिकाः सर्वाभरणभूषिताः ॥ ७१ ॥ फलानि कुण्डहस्ताश्च पात्रहस्तास्तथापराः ॥ सुमनःपात्रहस्ताश्च अदीनाः परमाङ्गनाः ॥७२॥ अन्नदानरताश्चैव भोजयन्ति सहस्रशः ॥ नूपुरोज्वलपादाश्च तिष्ठन्ति च मनोहराः ॥७३॥ उपस्थाप्य महायोग्यमत्र काले च योषितः ॥ ब्रुवन्ति सर्वास्ताश्चैव तस्यां तस्य च दक्षिणाः ॥ ७४ ॥ निघ्नन्तश्च हसन्तश्च दूता निष्ठुरवादिनः ॥ भभिो कृतघ्ना लुब्धाश्च परदाराभिमर्शकाः ॥ ७५ ॥ पापाशया निष्कृतिकाः सर्वदानविवर्जिताः ॥ परापवादनिरताः पापैर्बद्धकथानकाः ॥ ७६ ॥ निर्लज्जा गृहका देया याचितुं मनसा हिताः ॥ सुलभानि न दत्तानि विभवे सति लौकिके ॥ ७७ ॥ पानीयमथ काष्ठानि यद्यन्नं सुखमागतम् ॥ तेन वध्या भवन्तो वै यातनाभिरनेकशः ॥७८॥ कर्मणां च क्षयो जातः संसारे यदि पच्यते ॥ विमुक्ताश्चेह लोकान्तु जनिष्यथ सुदुर्गताः ॥७९॥ कुलेषु सुदरिद्रेषु सञ्जाताः पापकर्मिणः॥ पापैरनुगता घोरैर्मानुषं लोकमाश्रिताः॥८०॥ वृत्तस्था भुञ्जते हेमांश्चातुर्वर्ण्यान्विशेषतः ॥ ततः सत्यरताः शान्ता दयावन्तः सुधार्मिकाः ॥८१॥ इह विश्राम्य ते धीराः किंचित्कालं सहानुगाः ॥ गच्छन्ति परमं स्थानं पृथिव्यां वा महत्कुले ॥ ८२ ॥ बहुसुन्दरनारीके समृद्धे सुसमाहिताः ॥ अजायन्त तथा क्षान्ताः प्राप्स्यन्ति परमां गतिम् ॥ ८३ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे संसारचक्रयातनानां स्वरूपवर्णनं नामाष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥ पुनः संसारचक्रयातनास्वरूपवर्णनम् ॥ ऋषिपुत्र उवाच ॥ तस्मिन् क्षितितले सर्वमायसैः कण्टकैश्चितम् ॥ प्रभवन्ति पुनः केचिद्विषमं तमसाश्रितम् ॥१॥ अथान्ये छिन्नपादास्तु छिन्नपाणिशिरोधराः ॥ पापाचारा

स्तथा देशादुपसर्पत मा चिरम् ॥ २ ॥ ये तु धर्मरता दान्ता वपुष्मन्तो यथा गृहे ॥ परिपान्ति क्षितिं सर्वे पात्यन्ते पापकारिणः ॥ ३ ॥
याचमानाः स्थिता नित्यं सुशीतेस्तोयभोजनैः ॥ स्त्रियः श्रीरूपसंकाशाः सुकुमाराः सुभोजनाः ॥ ४ ॥ कृत्वा पूजां परां तत्र प्रतीक्षन्ते परं जनम्॥ आम्रितते सुघोरे च निक्षिप्यन्ते शिलातले ॥५॥ आलोके च प्रदर्श्यन्ते वृक्षाश्च भुवनानि च॥ आयान्ति दह्यमानेषु पृष्टपादोदरेषु च॥६॥
तत्र गत्वा तु ते दूताः प्रविशन्ति सुदारुणाः॥ क्लिश्यन्ति बहुवस्तत्र त्रातारं नाधिगच्छन्ति ते ॥७ ॥ अथान्ये तु श्वभिर्घोरैरापादतलमस्तकम् ॥ भक्ष्यमाणा रुदन्तश्च क्रोशन्तश्च पुनःपुनः ॥८॥ अथान्ये तु महारूपा महादंष्ट्रा भयानकाः ॥ सूचीमुखं कृताः पापाः क्षुधितास्तृषितास्तथा ॥९॥
अन्नानि दीयमानानि भक्ष्याणि विविधानि च॥ भोज्यानि लेह्यचोष्याणि योनिपिंडं दुरात्मभिः ॥१०॥ अयःसारमयी नारी वह्नितप्ता सुदारुणा ॥ आलिङ्गति नरं तत्र धावन्तं चानुधावति ॥११॥ धावन्तं चानुधावंती त्विदं वचनमब्रवीत्॥ अहं ते भगिनी पाप ह्यहं भार्या सुतस्य ते ॥१२॥
मातृष्वसा ते दुर्बुद्धे मातुलानी पितृष्वसा ॥ गुरुभार्या मित्रभार्या भ्रातृभार्या नृपस्य च ॥१३॥ श्रोत्रियाणां द्विजातीनां जाया वै धर्षितास्त्वया॥ मोक्ष्यसे न हि पापात्त्वं रसातलगतो यथा॥१४॥ किं प्रधावसि निर्लज्ज व्यसनेश्योपपादितः॥ हनिष्येऽहं ध्रुवं पाप यथा कर्म त्वया कृतम्॥१५॥
एवं वै बोधयन्तीह श्रावयन्ति पुनःपुनः॥ आभिद्रवन्ति तं पापं घोररूपा भयानकाः॥१६॥ज्ञानिनां च सहस्रेषु जातं जातं तथा स्त्रियः ॥ अनुपीड्य दुरात्मानं धर्षयंति सुदारुणम् ॥ १७ ॥ वृषलीर्बहुलैर्दुःखैः किं क्रन्दसि पुनः पुनः ॥ किं क्रन्दसि सुदुर्बुद्धे परिष्वक्तः स्वयं मया ॥ १८ ॥
दशधा त्वं मया पाप नीयमानः पुनःपुनः ॥ अत्रालिं वापि कुर्वाणो याचमानो न लज्जसे ॥१९॥ न मोक्ष्यसे मया पाप कुतो गच्छसि मूढ वै ॥
यत्र यत्र प्रयासि त्वमिति गत्वा यमालये ॥ २० ॥ तत्र तत्रैव पाप त्वां न त्यक्ष्ये पारदारिकम् ॥लोहयष्टिप्रहारैश्च ताडयन्ति पुनःपुनः ॥२१॥
गोपाला इव दण्डेन कालयन्तो मुहुर्मुहुः ॥ व्याघ्रसिंहसृगालैश्च तथा गर्दभराक्षसैः ॥२२॥ भक्ष्यन्ते श्वापदैरन्यैः श्वभिः काकैस्तथाऽपरे ॥ आसितालवनं तत्र धूमज्वालासमाकुलम् ॥ २३ ॥ दावाग्निसदृशाकारं प्रदीप्तं सर्वतोऽर्चिषा ॥ तत्र क्षिप्त्वा ततः पापं यमदूतैः सुदारुणैः ॥ २४ ॥
दह्यमानान्सुतप्तांश्च संश्रयन्ते द्रुमान्पुनः ॥ आसिपत्रैस्ततो वृक्षाच्छिन्दन्ति बहुशो नरान् ॥२५॥ तत्र छिन्नाश्च दग्धाश्च हन्यमानाश्च सर्वशः ॥

विचेष्टा विकृताश्चैव दह्यमाना नदन्ति ते ॥२६॥ असितालवनद्वारि ये तिष्ठन्ति महारथाः ॥ पापकर्मसमायुक्तांस्तर्जयन्ति सुदारुणाः ॥ २७ ॥
भो भो पापसमाचारा धर्मसेतुविनाशकाः ॥ अतो निमित्तं पापिष्ठा यातनाभिः सहस्रशः ॥ २८ ॥ अनुभूयेह तत्सर्वं मानुष्यं यदि यास्यथ ॥
कुलेषु सुदरिद्राणां गर्भवासेन पीडिताः॥२९॥भोगैश्च पीडिता नित्यं उत्पत्स्यथ सुदुर्गताः॥ अग्निज्वालानिभास्तत्र अग्निस्पर्शा महारवाः॥३०॥
पक्षिणश्चायसैस्तुण्डैर्व्यांग्राश्चैव सुदारुणाः ॥ तत्र घोरा बहुविधाः कव्यादाः श्वादयस्तथा ॥३१॥ खादंति रुपितास्तत्र बहवो हिंसका नरान् ॥
ऋक्षद्वीपिसमाकीर्णं बहुकीटपिपीलिकं ॥३२॥ असितालवने विप्रा बहुदुःखसमाकुले ॥ तत्र क्षिप्ता मया दृष्टा यमदूतैर्महाबलैः ॥३३॥ असिपत्र
सुभग्राङ्गाः शूलळग्नास्तथाऽपरे ॥ तथाऽपरो महादेशो नानारूपो भयानकः ॥३४॥ पुष्करिण्यश्च वाप्यश्च ह्रदा नद्यस्तथैव च ॥ तडागानि च
कूपाश्च रुधिरस्य सहस्रशः॥३५॥ पूतिमांसकृमीणां च अमेध्यस्य तथैव च॥अन्यानि च मया तत्र दृष्टानि मुनिसत्तमाः ॥३६॥तत्र क्लिश्यन्ति
ते पापास्तस्मिन्मध्ये सहस्रशः ॥ निघ्नन्तश्च तथा गर्ध्रं मज्जन्तश्च सहस्रशः ॥३७॥ अस्थिपापाणवर्षाणि रुधिरस्य बलाहकाः ॥ अश्मवर्षाणि
ते घोराः पातयन्ति सहस्रशः ॥३८ ॥ धावतां प्लवतां चैव हा हतोऽस्मीति भाषिणाम् ॥ प्राहतानां पुनः शब्दो वध्यतां च सुदारुणः ॥३९ ॥
क्रन्दतां करुणोन्मिश्रं दिशोऽपूर्यन्त सर्वशः॥ क्वचिद्बद्धः क्वचिद्रुद्धः क्वचिद्विद्धः सुदारुणैः॥४०॥ क्वचित्स्थूलैस्तथा बद्धः उद्बद्धश्च क्वचित्तथा ॥
हाहाभयानकोन्मिश्रः शब्दोऽश्रूयत दारुणः॥४१॥ अपश्यं पुनरन्यत्र यत्स्मृत्वा चोद्विजेन्नरः ॥४२॥इति श्रीवराहपुराणे संसारचक्रे यातनास्वरूप
वर्णनं नाम नवनवत्यधिकशततमोऽध्यायः ॥१९९॥ पुनः नरकयातनास्वरूपवर्णनम् ॥ ऋषिपुत्र उवाच॥तमं चैव महातमं महारौरवरौरवौ ॥ ॥२१४॥
सप्ततालश्च नरको नरकः कालसूत्रकः॥१॥अन्धकारश्च नरको अन्धकारवरस्तथा॥अष्टावेते तु नरकाः पच्यन्ते यत्र पापिनः॥२॥प्रथमे प्रथमं
विद्याद्वितीये द्विगुणं तथा॥तृतीये त्रिगुणं विद्याच्चतुर्थे तु चतुर्गुणम् ॥३ ॥ पञ्चमे तु गुणाः पञ्च षष्ठे षड्गुणमुच्यते॥सप्तमे तु गुणाः सप्त अष्टमेऽ
ष्टविधा गुणाः॥४॥अहोरात्रेण चाध्वानं प्रेता गच्छन्ति तत्पुरम्॥ दुःखितानां ततो दुःखं दुःखाद्दुःखतरं ततः॥५॥दुःखमेवात्र न सुखं दुःखेदुःखं
विवर्ध्यते ॥ उपायस्तत्र नैवास्ति येन स्वल्पं सुखं भवेत् ॥ ६ ॥ मुच्यते च मृतस्तत्र मारकास्तत्र दुर्लभाः ॥ शब्दे स्पर्शे तथा रूपे रसे गन्धे

तु पञ्चमे ॥७॥ न सुखं तत्र तस्यास्ति किञ्चिदेवात्र विद्यते ॥ शारीरैर्मानसैश्चैव दुःखैर्दुःखांतगामिभिः ॥ ८॥ आयसैः कण्टकैस्तीक्ष्णैस्तप्तैस्तप्तावृता मही ॥ अन्तरिक्षं खगानीकैरग्निजिह्वैः समावृतम् ॥ ९ ॥ अतीव च बुभुक्षात्र पिपासा चाप्यतीव हि ॥ उष्णमत्युष्णमेवात्र शीतलं चातिशीतलम् ॥ १० ॥ पातुकामश्च पानीयं राक्षसैर्नीयते सरः ॥ हंससारससङ्कीर्णं पद्मोत्पलविभूषितम् ॥ ११ ॥ पातुकामश्च पानीयं सहसा तत्र धावति ॥ सलिलं प्रेक्षते चैव तत्र तप्ततरं तथा ॥ १२ ॥ ततः पक्वानि मांसानि राक्षसैः परिणीयते ॥ क्षारोदकेऽपि च तथा क्षिप्यतेऽत्र महाह्रदे ॥ १३ ॥ तत्र चैव ह्रदे नैका मत्स्याः खादन्ति सर्वशः ॥ ततः कालावसाने तु कथञ्चित्प्रपलायिनः ॥ १४ ॥ किञ्चिदन्तरमागम्य वेदनार्थाः पतन्ति हि ॥ यातनार्थं पुनस्तत्र मांसं चैवोपजायते ॥ १५ ॥ शिरस्येवोपविष्टस्य प्रस्थितस्य प्रधावतः ॥ तस्यान्तायां सवस्थायां दुःखं भवति दारुणम् ॥ १६ ॥ करीषगर्त्तस्तत्रैव कुम्भीपाकः सुदारुणः ॥ पद्मपत्राकृतिस्तस्य पेशी तत्र शरीरजः ॥ १७ ॥ पाटयन्ति सुमार्गेण राक्षसाः करपत्रिकाः ॥ निपीड्य दशने रोषं भामनादाः सुरोपिताः ॥ १८ ॥ असिपत्रवनं चात्र शृङ्गाटकवनं तथा ॥ तत्र शृङ्गाटकाश्चैव तप्तवालुकमिश्रिताः॥१९॥दह्यते छिद्यते चैव विध्यते भिद्यते पथा॥ पात्यते पीड्यते चैव कृष्यते च विशस्यते ॥२०॥ श्यामाश्च शबलाश्चैव श्वानस्तेऽत्र दुरासदाः ॥ खादन्ति च सुसंरब्धाः सर्पवृश्चिकसन्निभैः ॥ २१ ॥ कण्टकैः प्रतिकूलैश्च तत्रान्या कूट शाल्मलिः ॥ कर्षन्ति तत्र चैवैनं यावदस्थ्यवशेषितः ॥२२॥ यद्दुःखं तस्य दुर्बुद्धेः प्रतिकूलं च तस्य यत् ॥ तत्तदोत्पद्यते शीघ्रं यातनार्थाय यत्नतः ॥ २३ ॥ शीतकामस्य वै चोष्णमुष्णकामस्य शीतलम् ॥ सुखकामस्य वै दुःखं सुखं नैवात्र विद्यते ॥ २४ ॥ छिन्नाश्च शतधाप्येवं ह्यनिशं तैः सहस्रशः ॥ छिन्नाङ्गाः सर्वगात्रेषु सर्वमेव स विन्दति॥२५॥सलिलं च नदीं घोरां ज्वालाकीर्णां भयानकाम् ॥ उत्तार्यन्ते च तां प्रेतां यां दृष्ट्वैव भयं भवेत् ॥ २६ ॥ करम्भवालुका नाम शतयोजनमायता ॥ अग्निज्वालासमा घोरा यथा येन स गच्छति ॥ २७ ॥ ततो वैतरणी नाम क्षारोदा तु महानदी ॥ योजनानि तु पञ्चाशदधस्तात्पंचयोजनम् ॥ २८ ॥ अगाधपङ्का वै तत्र चर्ममांसास्थिभेदना ॥ तत्र कर्कटका घोरा वज्रदंष्ट्रा विशन्ति ताम् ॥ २९ ॥ उलूकाश्च धनुर्मात्रा वज्रजिह्वास्थिभेदनाः ॥ महाविषा महाक्रोधा दुर्विषह्याः सुदारुणाः ॥ ३० ॥ समुत्तीर्य तु

कृच्छ्रेण तस्माद्योजनकर्दमात् ॥ वसन्त्यत्र धरे केचिच्छून्यागारे निराश्रये ॥ ३१ ॥ यत्र वै मूषिकगणा भक्षयंति ह्यनेकशः ॥ मूषकैर्जग्ध गात्रस्तु ह्यस्थिमात्रावशेषितः ॥ ३२ ॥ प्रभाते वायुना स्पृष्टः पुनर्मांसं स विन्दति ॥ शून्यागारप्रवेशात्तु गव्यूतेर्नातिदूरतः ॥३३॥ सहकारवनं नाम रौद्रा यत्र च पक्षिणः ॥ निस्त्वगस्थिस्तैः क्रियते निर्मांसश्चैव मानवः ॥३४॥ निःशिराजालकश्चैव निरक्षिश्रवणस्तथा ॥ वटवृक्षो नातिदूरे दक्षिणे तु त्रियोजनम् ॥ ३५ ॥ सन्ध्याभ्र इव चाभाति प्रदीप्तो नित्यमेव तु ॥ दशयोजनविस्तीर्णा अधः शतसमायता ॥ ३६ ॥ यमचुल्लीति विख्याता गम्भीरा सा त्रियोजनम् ॥ नित्यं प्रज्वलिता सा तु नित्यं धूमान्धकारिता ॥ ३७ ॥ तत्र प्रेतसहस्राणि प्रयुतान्यर्बुदानि च ॥ प्रक्षिप्यन्ते त्वहोरात्रं राक्षसैर्यमकिङ्करैः ॥ ३८ ॥ मासमेकं वसत्यन्यो तस्यां चुल्ल्यां परिभ्रमन् ॥ ततः शकुनिका नाम वसामेदोवहा नदी ॥ ३९ ॥ चुल्लीकुक्षौ तु विश्रान्ता वेगिनी वहते तु सा ॥ तां समुत्तीर्य कृच्छ्रेण यातनाः सप्तकाः पुनः ॥४०॥ एकैकं दुस्तरं घोरं यथापूर्वं यथाक्रमात् ॥ अनुभुङ्क्ते स कृच्छ्रेण दुष्कृती तीव्रवेदनाः ॥ ४१ ॥ दश तत्र लताः शूलाः कुम्भीपाकास्त्रयोदश ॥ याति पापमहोरात्रं तस्मिन्नियमितेन तु ॥ ४२ ॥ राक्षसैर्निरनुक्रोशैर्दुर्निरीक्ष्यैस्ततस्ततः ॥ अङ्गारेषु विधूमेषु शूलप्रोतस्तु पच्यते ॥ ४३ ॥ शुष्कोदपाने धूमे च अधःशीर्षोऽवलम्बते ॥ ज्वाल्यते तीक्ष्णतैले तु कटाहे स तु पच्यते ॥ ४४ ॥ करीषगर्त्ते स पुनः पच्यते मेदवह्निना ॥ एकैकस्मिन्द्शाहं च शूलादिषु स पच्यते ॥ ४५ ॥ यातनाः सप्तकास्तस्य निष्कान्तस्य त्रियोजने ॥ यतो यमनदी नाम तप्तवपुजलोर्मिणी ॥ ४६ ॥ समुत्तीर्य तु कृच्छ्रेण दह्यमानस्त्वचेतनः ॥ ततो मुहूर्त्तं विश्रान्तः किंचिदन्तरमागतः ॥ ४७ ॥ दीर्घैर्वका मोक्षन्ते कान्तां शीतोदां शीतकाननाम् ॥ सर्वकामान्स लभते भगिनी सा यमस्य तु ॥ ४८ ॥ भक्ष्यं भोज्यं च सर्वैस्तु पापिभिस्तत्र लभ्यते ॥ स सर्वं विस्मरत्यत्र त्रिरात्रमुषितोऽपि सन् ॥ ४९ ॥ ततः शूलत्रहो नाम पर्वतः शतयोजनः ॥ निराश्रयः स सत्त्वानामेकपाषाण एव च ॥ ५० ॥ तत्र वर्षति पर्जन्यस्तत्र जलं सदा ॥ तत्र कृच्छ्रेण तरति अहोरात्रेण मानवः ॥ ५१ ॥ शृङ्गारकवनं नाम तत्र पश्यन्ति शाद्वलम् ॥ नीलमाक्षिकदंशैश्च सुव्याप्तं तद्वनं महत् ॥ ५२ ॥ यस्तु स्पृष्टश्च दृष्टश्च कृमिरूपश्च जायते ॥ प्रेतो वर्षति मांसासृगस्मात्कृच्छ्रात्तु निर्गतः ॥ ५३ ॥ ततोऽन्यल्लभते चैव यातनार्थं प्रयत्नतः ॥

॥२१६॥

ततः पश्यति पुत्रांस्तु महदुःखं सुदारुणम् ॥५४॥ मातरं पितरं चैव पुत्रान्दारांस्तथा प्रियान् ॥ पुरस्ताद्भ्रियमाणं स क्रन्दमानमचेतनम्॥५५॥ हा त्राहि त्राहि पुत्रेति क्रन्दमानस्ततस्ततः ॥ लगुडैर्मुद्गरैर्दण्डैर्जानुभिर्वैमुभिस्तथा ॥ ५६ ॥ मुष्टिभिश्च कृशाभिश्च व्यालैरङ्गगतैरपि ॥ तद्दृष्ट्वा तादृशं दुःखं ततो मोहं स गच्छति ॥ ५७ ॥ एवमेवात्मकर्माणि पर्यायेण पुनः पुनः ॥ प्राप्नुवन्तीह तेऽत्रैव नरा दुष्कृतकारिणः ॥ ५८ ॥ पातकानि च चत्वारि समाचारेण पंचमम् ॥ कृत्वा तानि नरा यान्ति तं देशं पापकारिणः ॥५९॥ तदादिषु च सर्वेषु गुणान्तरपथं गतः ॥ यदा भवति स प्रेतस्तदा स्थावरतां व्रजेत् ॥ ६० ॥ तदा वा स्थावरे तेषु जातस्य हि भवेन्नरः ॥ क्रमशः स भवेत्प्रेतस्तदा पशुगणेष्वपि ॥ ६१ ॥ पृथिवर्षसहस्राणि पृथिवर्षशतानि च ॥ गतः स वसति प्रेतो नरके तु पुनः पुनः ॥ ६२ ॥ ततो निवृत्तकर्मा तु स्वेदजः सम्भवेत्पुनः ॥ स्वेद जानां ततो नित्यं सर्वसंसारचंक्रमात् ॥ ६३ ॥ ततश्च पक्षिणां योनिं सर्वां संसरते पुनः ॥ गोयोनौ तु ततो गत्वा पुनर्मानुषतां व्रजेत् ॥ ६४ ॥ मानुषे शूद्रतां याति लब्ध्वा यदि तु तुष्यति ॥ ततो वैश्यत्वमागच्छेत्कर्मणाऽनेन वेष्टितः ॥ ६५ ॥ वैश्यात्क्षत्रियतां याति तस्माच्च ब्राह्मणो भवेत् ॥ ब्राह्मणत्वमपि प्राप्तः पापकर्मा दुरात्मवान् ॥ ६६ ॥ दुःशिक्षितेन मनसा ह्यात्मद्रोग्धा भवेत्तदा ॥ शरीरं मानसं घोरं व्यसनैरुपपादितम् ॥ ६७ ॥ उपयुक्तो नरो जातः पूर्वकर्मभिरन्वितः ॥ ज्ञेयश्च ब्रह्महा कुष्ठी काकाक्षः काकतालुकः ॥ ६८ ॥ सुरापः श्यावदन्तश्च पूतिगन्धश्च पापकृत् ॥ राजहा पितृहा चैव सुरापश्चापि यो भवेत् ॥ ६९ ॥ सुवर्णहर्ता च नरो ब्रह्मघ्नेन समो हि सः ॥ कांचिच्चात्र विरूपाणां नराणां पापकर्मिणाम् ॥ ७० ॥ यावद्भिः कर्मभिस्तेस्तेस्तेषु निर्याणवेश्मसु ॥ छिन्नभिन्नविशस्तानां रुधिरेण समन्ततः ॥ ७१ ॥ व्याप्तं महीतलं सर्वमापगाश्चापि निर्गताः ॥ अजस्रं क्षिप्यमानानां क्रन्दतां च सुदारुणम् ॥ ७२ ॥ समुत्तस्थौ महानादो हाहाकारसमाकुलः ॥ वध्नतो विविधैर्बन्धैर्यातयन्तश्च दारुणम् ॥ ७३ ॥ लौहयष्टिप्रहारैश्च आयुधैश्च सुदारुणैः ॥ छेदनैर्भेदनैश्चोग्रैः पीडनाभिश्च सर्वशः ॥ ७४ ॥ श्रान्ताः कर्मकरा दूता मोहेनायत्तचेतसः ॥ यदा श्रान्ताश्च खिन्नाश्च हन्तारः पापकर्मिणाम् ॥ ७५ ॥ विज्ञापयेत्तदा दूतांश्चित्रगुप्तं महौजसम् ॥ ७६ ॥ इति श्रीवराहपुराणे संतारचके नरकयातनास्वरूप

वर्णनं नाम द्विशततमोऽध्यायः ॥ २०० ॥ अथ राक्षसार्किकरयुद्धम् ॥ ऋषिपुत्र उवाच ॥ ततस्ते सहिताः सर्वे चान्योऽन्याभिरताः सदा ॥
नानावेषधरा दूताः कृताञ्जलिपुटास्तदा ॥ १ ॥ दूता ऊचुः ॥ वयं श्रान्ताश्च क्षीणाश्च ह्यन्यान् योजितुमर्हसि ॥ वयमन्यत्करिष्यामः स्वामिन्कार्यं
सुदुष्करम् ॥ २ ॥ अन्ये हि तावत्तत्कुर्युर्येथेष्टं तव सुव्रत ॥ भगवन्स्म परिक्लिष्टाः स्राहि नः परमेश्वर ॥ ३ ॥ ततो विवृत्तरक्ताक्षस्तेन वाक्येन रोषितः ॥
विनिःश्वस्य यथा नागो ह्यपश्यत्सर्वतो दिशम् ॥ ४ ॥ अदूरे दृष्टवान् कंचित्पुरुषं स ह्यनाकृतिम् ॥ स तु वेगेन सम्प्राप्त इङ्गितज्ञो दुरात्मवान् ॥ ५ ॥
निःसृतः स च रोषेण चित्रगुप्तेन धीमता ॥ ततः स त्वरितं गत्वा मन्देहा नाम राक्षसाः ॥ ६ ॥ नानारूपधरा घोरा नानाभरणभूषिताः ॥ विना
शाय महासत्त्वो यत्र तिष्ठन्महाबलाः ॥ ७ ॥ चित्रगुप्तो महाबाहुः सर्वलोकार्थचिन्तकः ॥ समः सर्वेषु भूतेषु भूतानां च समादिशत् ॥ ८ ॥
ततस्ते विविधाकारा राक्षसाः पिशिताशनाः ॥ उपरुद्ध्य तथा सर्वं मातंगांश्च हयं तथा ॥ ९ ॥ बद्धगोधाङ्गुलित्राणा नानायुधधरास्तथा ॥
अग्रतः किंकराः कृत्वा तिष्ठन्पादाभिवन्दनम् ॥ १० ॥ बुबन्तश्च पुनर्दृष्टाः शीघ्रमाज्ञापय प्रभो ॥ तव सन्देशकर्त्तारः कस्य कुर्त्ताम जीवि
तम् ॥ ११ ॥ तेषां तद्वचनं श्रुत्वा चित्रगुप्तो ह्यभाषत ॥ रोषगद्गदया वाचा निःश्वसन्वै मुहुर्मुहुः ॥ १२ ॥ भो भो मन्देहका वीराः मम चित्ता
नुपालकाः ॥ एतान्वध्नीत गृह्णीत भूतराक्षसपुंगवाः ॥ १३ ॥ एवं हत्वा च बद्धा च ह्यागच्छत पुनर्यथा ॥ हन्तारः सर्वभूतानां कृतज्ञा दृढ
विक्रमाः ॥ १४ ॥ हत्वा वै पापकानेतान्मम विप्रियकारिणः ॥ एतच्छ्रुत्वा वचस्तस्य वचनं चेदमब्रुवन् ॥ १५ ॥ राक्षसा ऊचुः ॥ श्रान्ता वा
क्षुधिता वापि दुःखिता वा तपोधनाः ॥ अमात्या एव ज्ञातव्या भृत्याः शतसहस्रशः ॥ १६ ॥ एते यथार्थं निर्दिष्टास्त्वयैव च महात्मना ॥ न
युक्तं विविधाकारा ह्यस्माकं नाशनाय वै ॥ १७ ॥ यथा ह्येते समुत्पन्नाः सर्वधर्मानुचिन्तकाः ॥ तथा वयं समुत्पन्नास्तदर्थं हि भवानपि ॥ १८ ॥
मा च मिथ्या प्रतिज्ञातं धर्मिष्ठस्य भवत्विति ॥ अस्माकं विग्रहे वीर मुच्यन्तां यदि मन्यसे ॥ १९ ॥ परित्रायस्व नो वीर किंकराणां महा ॥२१६॥
बलान् ॥ ह्रियमाणान्हि रक्षोभिरस्मानद्य रणाजिरे ॥ २० ॥ एवमुक्त्वा ततो घोरा व्याधयः कामरूपिणः ॥ सन्नद्धास्त्वरितं शूरा भीमरूपा भया
नकाः ॥ २१ ॥ गजैरन्ये तथा चाश्वै रथैश्चापि महाबलाः ॥ कण्टकैस्तुरगैर्हैसैरन्ये सिंहैस्तथापरे ॥ २२ ॥ मृगैः सृगालैर्महिषैर्व्याघ्रैर्मेषैस्तथापरे ॥

गृध्रैः श्येनैर्मयूरैश्च सर्पगर्दभकुक्कुटैः ॥ २३ ॥ एवं वाहनसंयुक्ता नानाप्रहरणोद्यताः ॥ समागता महासत्त्वा अन्योन्यमभिकांक्षिणः ॥ २४ ॥ तूर्यघण्टावेडितसंघुष्टैर्वलितास्फोटितैरपि ॥ जयार्थिनो द्रुतं वीराश्चालयन्तश्च मेदिनीम् ॥ २५ ॥ ततः समभवद्युद्धं तस्मिंस्तमसि सन्तते ॥ मुकुटैरंगदैश्चित्रैः केयूरैः पट्टिशासिकैः ॥ २६ ॥ सकुण्डलैः शिरोभिश्च भ्राजते वसुधातलम् ॥ बहुभिश्च सकेयूरैश्छत्रैश्च मणिभूषणैः ॥ २७॥ शूल शक्तिप्रहारैश्च यष्टितोमरपट्टिशैः ॥ असिखड्गप्रहारैश्च बलप्राणसमीरितैः ॥ २८ ॥ अभवद्दारुणं युद्धं तुमुलं लोमहर्षणम् ॥ नखैर्दन्तैश्च पादैश्च तेऽन्योऽन्यमभिजघ्निरे ॥ २९ ॥ बाहुभिः समनुप्राप्तः केशाकेशि ततःपरम् ॥ अयुक्तमतुलं युद्धं तेषां वै समजायत ॥ ३० ॥ ततस्ते राक्षसा भग्ना दूतैर्घोरपराक्रमैः ॥ देहि देहि वदन्त्येव.भिन्धि गृह्णीष्व तिष्ठ च ॥ ३१ ॥ वध्यमानाः पिशाचास्ते ये निवृत्ता रणार्दिताः ॥ आहूयन्त प्रति भयात्क्रोधसंरक्तलोचनाः ॥ ३२ ॥ तिष्ठ तिष्ठ क्व यासीति न गच्छामि दृढो भव ॥ मया मुक्तमिदं शस्त्रं तव देहविनाशनम् ॥ ३३ ॥ किन्तु मूढ त्वया शस्त्रं न मुक्तं मे रुजाकरम् ॥ मया क्षिप्तास्तु इषवः प्रतीच्छ क्व पलायसे ॥३४॥ किं त्वं वदसि दुर्बुद्धे एषोऽहं पारगो रणे ॥ मम बाहु विमुक्तस्तु यदि जीवस्यतो वद ॥ ३५॥ तत्र ते सहसा घोरा राक्षसाः पिशिताशनाः ॥ मन्देहा नाम नाम्ना ते वध्यमानाः सहस्रशः ॥ ३६ ॥ ततो भग्ना यदा ते तु राक्षसाः कामरूपिणः ॥ प्रत्यपद्यन्त ते मायां तामसीं तमसा वृताः ॥३७ ॥ अदृश्याश्चैव दृश्याश्च तद्बलं तमसा वृताः ॥ ततस्ते शरणं जग्मुर्ज्वरं परमभीषणम् ॥ ३८ ॥ शूलपाणिं विरूपाक्षं सर्वप्राणिप्रणाशनम् ॥ मन्देहा नाम नाम्ना वै राक्षसाः पिशिताशनाः ॥ ३९ ॥ खादन्ति चैव घ्नन्ति स्म चित्रगुप्तेन चोदिताः ॥ व्याधीनां च सहस्राणि दूतानां च महाबलाः ॥४०॥ वयमद्य महाभाग त्रायस्व जगतः पते ॥ ततस्तेषां वचः श्रुत्वा दूतानां कामरूपिणाम् ॥ ४१ ॥ ज्वरः क्रुद्धो महातेजा योधानां तु सहस्रशः ॥ कालो मुण्डः केकराक्षो लोहयष्टिपरिघहः ॥४२॥ विविधास्तन्दिदेशाऽत्र पुरुषानग्निवर्चसः ॥ ब्रह्माऽलिपुटान्सर्वानिदमाह सुरेश्वरः॥४३॥पच शीघ्रमिमान्पापान् योगेन च बलेन च ॥ ततस्ते त्वरितं गत्वा यत्र ते पिशिताशनाः ॥४४॥ ज्वराज्ञया च ते सर्वे जीमूतघननिःस्वनाः ॥ बहुंस्ते राक्षसान्घोरान्दर्पोत्सिक्तान् सहस्रशः ॥ ४५ ॥ बहुशस्त्रप्रहारैश्च शस्त्रैश्च विविधोज्ज्वलैः ॥ तरसा राक्षसा विग्ना रुधिरेण परिप्लुताः ॥ ४६ ॥ मोचयामास संग्रामं स्वयमेव

यमस्ततः ॥ राक्षसान्मोचयित्वाऽथ हन्यमानान्समन्ततः ॥ ४७ ॥ गत्वा ज्वरं महाभागं विनयात्सान्त्वयन्मुहुः ॥ पूजयन्वै ज्वरं दिव्यं गृह्य हस्ते महायशाः ॥ ४८ ॥ प्रविवेश गृहं स्वं तु सम्भ्रमेणेदशेन तु ॥ आननं तु समुत्प्रेक्ष्य संग्रामे स्वेदबिन्दुवत् ॥ ४९ ॥ धर्मराजोऽथ विश्रान्त कालभूतं महाज्वरम् ॥ किंकिं वृत्तमिदं देव व्यापिनस्त्वं महातपाः ॥ ५० ॥ रोषायासकरं चैव सर्वलोकनमस्कृतः ॥ अहं त्वं चैव देवेश इमं लोकं चराचरम् ॥ ५१ ॥ शासेमहि यथाकामं यथादृष्टं यथाश्रुतम् ॥ त्वया ग्राह्यो ह्यहं देव मृत्युना च सुसंवृतः ॥ ५२ ॥ लोकान्सर्वानहं हन्मि सर्वघाती न संशयः ॥ गच्छ गच्छ यथास्थानं युद्धं च त्यजतु स्वयम् ॥५३ ॥ राक्षसानां हतास्तत्र पष्टिकोट्यो रणाजिरे॥ अमराश्चाक्षया श्चैव न हि त्वां प्रापयन्ति वै ॥ ५४ ॥ ततो ह्युपरतं युद्धं धर्मराजो यमः स्वयम् ॥ दूतानां चित्रगुप्तेन सख्यमेकमकारयत् ॥ ५५ ॥ सम्भाषन्ते ततो दूताश्चित्रगुप्तं तथैव च ॥ नियुञ्जस्व मया पूर्वं सर्वकर्माणि जन्तुषु॥५६॥स्वकर्मगुणभूतानि ह्यशुभानि शुभानि च॥रुद्रं दूताः समागम्य चित्रगुप्तस्य पार्श्वतः॥५७॥उपस्थानं च कुर्वन्ति कालचिंतकमब्रुवन् ॥ यथा लोका यथा राजा यथा मृत्युः सनातनः॥५८॥तदेवोत्तिष्ठ तिष्ठेति क्षम्यतां क्षम्यतां प्रभो ॥ ५९ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे संसारचक्रे राक्षसकिंकरयुद्धं नामैकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥

अथ नारकिदण्डनकर्मविपाकवर्णनम् ॥ ऋषिरुवाच ॥ विस्मयस्तु मया दृष्टस्तस्मिन्नद्भुतदर्शनः ॥ चित्रगुप्तस्य सन्देशो धर्मराजेन धीमतः॥१॥ प्राप्नुवन्ति फलं ते वै ये च क्षिप्ताः पुरा जनाः ॥ अग्निना वै प्रतप्तास्ते बद्धा बन्धैः सुदारुणैः ॥ २ ॥ सन्तप्ता बहवो ये ते तैस्तैः कर्मभिरुल्बणैः ॥ श्यामाश्च दंशनाभिर्ये त्विमं शीघ्रं प्रमापय ॥ ३ ॥ दुराचारं पापरतं निर्घृणं पापचेतसम् ॥ श्वानस्तु हिंसका ये च भक्षयन्तु दुरात्मकम् ॥ ४ ॥ पितृघ्नो मातृगोघ्नस्तु सर्वदोषसमन्वितः ॥ आरोप्य शाल्मलीं घोरां कण्टकैस्तैर्विपाट्य ॥ ५ ॥ एनं पाचय तैलस्य घृतक्षौद्रस्य वा पुनः ॥ ततद्रोण्यां ततो मुंच ताम्रतप्तखले पुनः ॥ ६ ॥ नराधममिमं क्षिप्त्वा प्रदीप्ते हव्यवाहने ॥ ततो मनुष्यतां प्राप्य ऋणैस्तत्र प्रदीप्यते ॥ ७ ॥ शयनासनहर्त्तारमग्निदायी च यो नरः ॥ वैतरण्यामयं चैव क्षिप्यतामचिरं पुनः ॥ ८ ॥ पापकर्मायमत्यर्थं सर्वतीर्थविनाशकः ॥ तस्य प्रदीप्तः कीलोऽयं वह्नितप्तोऽतिदुःस्पृशः ॥९॥ आदेश्य चोभयोरस्य कर्णयोः कूटसाक्षिकः ॥ यो नरः पिशुनः कूट

॥२१७॥

साक्षी चात्रीकजल्पकः॥१०॥ग्रामयाजनकं विप्रमध्रुवं दांभिकं शठम्॥बद्धा तु बन्धने घोरे दीयतां तु न किंचन॥११॥ जिह्वाऽस्य छिद्यतां शीघ्रं वाचा दुष्टस्य पापिनः ॥ गम्यागम्यं पुरा येन विज्ञातं न दुरात्मना ॥ १२ ॥ कृतं लोभाभिभूतेन कामसम्मोहितेन च ॥ तस्य च्छित्वा ततो लिंगं क्षारमग्निं च दीपय ॥ १३ ॥ इमं तु खलकं कृत्वा दुरात्मा पापकारिणम् ॥ दायादा बहवो येन स्वार्थेहतोर्विनाशिताः ॥ १४ ॥ इमं चाधुपिकं विप्रं सर्वत्रागेषु भेदय ॥ तथायं यातनां यातु पापं बहु समाचरन् ॥ १५ ॥ सुवर्णस्तेयिनं पापं कृतघ्नं च तथा नरम् ॥ क्रूरं पितृघ्नं चैनं ब्रह्मघ्नेषु समीकुरु ॥ १६ ॥ अस्थि च्छित्वा ततः क्षिप्रं क्षारमग्निं च दापय ॥ इमं तु विप्रं खादन्तु तीक्ष्णदंष्ट्राः सुदारुणाः ॥ १७ ॥ पिशुनं हि महाव्याघ्राः पंच घोराः सुदारुणाः ॥ इमं पचत पाकेषु बहुधा मर्मभेदिनम् ॥ १८ ॥ येनाग्निरुज्झितः पूर्वं गृहीत्वा च न पूजितः ॥ इमं पापसमाचारं वीरघ्नमतिपापिनम् ॥ १९ ॥ कर्कटस्य तु घोरस्य नित्यक्रुद्धस्य मोचय ॥ इमं घोरे ह्रदे क्षिप्रं सर्वयाजनयाजकम् ॥ २० ॥ सर्वेषां तु पशूनां यो नित्यं धार्यते जलम् ॥ न त्राता न च दाता च पापस्यास्य दुरात्मनः ॥ २१ ॥ अदानव्रतिनो विप्रा वेदविक्रयिण स्तथा ॥ सर्वकर्माणि कुर्युर्ये दीयते न च कचन ॥ २२ ॥ तोयभाजनहर्त्तारं भोजनं योऽनिवारयन् ॥ हन्यतां सुदृढैर्दण्डैर्यमदूतैर्महाबलैः ॥ २३ ॥ वेणुदण्डकशाभिश्च लोहदण्डैस्तथैव च ॥ जलमस्मै न दातव्यं भोजनं च कथंचन ॥२४॥ तस्मा अन्नं च पानं च न च दातव्यं कदाचन ॥ इत विश्वास्य हन्तारं वह्नौ शीघ्रं प्रपाचय ॥ २५ ॥ ब्रह्मदेयं हृतं येन तं वै शीघ्रं विपाचय ॥ बहुवर्षसहस्राणि पातये कर्म विस्तरे ॥ २६ ॥ समुत्तीर्णं ततः पश्चात्तिर्यग्योनौ प्रपातये ॥ सूक्ष्मदेहविपाकेषु कीटपक्षिविजातिषु ॥ २७ ॥ क्लिष्टो जातिसहस्रेस्तु जायते मानुषस्ततः ॥ तत्र जातो दुरात्मा च कुलेषु विविधेषु च ॥२८॥ हिंसारूपेण घोरेण ब्रह्मवध्यां प्रदापयेत् ॥ राज्ञस्तु मारकं घोरं ब्रह्मघ्नं दुष्कृतं तथा॥२९॥ सुवर्णस्तेयिनं चैव सुरापं चैव कारयेत् ॥ अनुभूय ततः काले ततो यक्ष्म प्रयोजयेत् ॥३०॥ गोघातको ह्ययं पापः कूटशाल्मलिं मारुहेत् ॥ कृष्यते विविधैर्घोरै राक्षसैर्घोरदर्शनैः ॥ ३१ ॥ पूतिपाकेषु पच्यते जन्तुभिः संप्रयोजितः ॥ ब्रह्मवध्याच्चतुर्भागैर्मृगत्वं पशुतां गतः ॥ ३२ ॥ उद्विग्नवासं पतितं यत्र यत्रोपपद्यते ॥ पापकर्मसमुद्विग्नो जातो जातः पुनःपुनः ॥ ३३ ॥ अयं तिष्ठति किं पापः पितृघाती

दुरात्मवान् ॥ ते तु वर्षशतं साग्रं भक्षयन्तु विचेतसः ॥ ३४ ॥ ततः पाकेषु घोरेषु पच्यतां च नराधमः ॥ ततो मानुषतां प्राप्य गर्भस्थो म्रियतां पुनः ॥ ३५ ॥ व्यापन्नो दशगर्भेषु ततः पश्चाद्विमुच्यताम् ॥ तत्रापि लब्ध्वा मानुष्यं क्लेशभागी च जायताम् ॥ ३६ ॥ बुभुक्षारुग्वि कारैश्च सततं तत्र पीड्यताम् ॥ पापाचारमिमं घोरं मित्रविश्वासघातकम् ॥ ३७ ॥ यन्त्रेण पीड्यतां क्षिप्रं ततः पश्चाद्विमुच्यताम् ॥ दीप्यतां ज्वलने घोरे वर्षाणां च शतद्वयम् ॥ ३८ ॥ जायतां च ततः पश्चाच्छुनां योनौ दुरात्मवान् ॥ अष्टोऽपि जायतां तस्मान्मानुषः क्लेश भाजनः ॥ ३९ ॥ प्राप्तवान्विविधान्रोगान्संसारे चैव दारुणान् ॥ ब्रह्मस्वहारी पापोऽयं नरो लवणतस्करः ॥ ४० ॥ वर्षाणां तु शतं पंच तत्र क्लिष्टो दुरात्मवान् ॥ कृमिको जायते पश्चाद्विष्ठायां कृमिकोऽपरः ॥ ४१॥ शकुन्तो जायते घोरस्तत्र पश्चाद्बको भवेत् ॥ इममग्निप्रदं घोरं काष्ठाग्नौ सम्प्रतापय ॥ ४२ ॥ स्वकर्मसु विहीनेषु पश्चाल्लब्ध्वगतिस्तथा ॥ ततश्चाथ मृगो वापि ततो मानुषतां व्रजेत् ॥ ४३ ॥ तत्रापि दारुणं दुःखमुपभुंक्ते दुरात्मवान् ॥ सर्वदुष्कृतकार्येषु सह संघातचिन्तकैः ॥ ४४ ॥ एवं कर्मसमायुक्तास्ते भवन्तु सहस्रशः ॥ परद्रव्यापहाराश्च रौरवे पतितास्तथा ॥ ४५ ॥ कुम्भीपाकेषु निर्दग्धः पश्चाद्गर्दभतां गतः ॥ ततो जातस्त्वसौ पापः शूकरो मलभुक्तथा ॥ ४६ ॥ प्राप्नोतु विविधांस्तापान्यथा हृतधनश्च सन् ॥ क्षुधातृष्णापराक्रान्तो गर्दभो दशजन्मसु ॥ ४७ ॥ मानुष्यं समनुप्राप्य चौरो भवति पापकृत् ॥ परोपघाती निर्लज्जः सर्वदोषसमन्वितः ॥ ४८ ॥ वृक्षशाखावलम्बोऽत्र ह्यधःशीर्षः प्रजायते ॥ अग्निना पच्यतां पश्चाल्लुब्धो वै पुरुषाधमः ॥ ४९ ॥ ततो वर्षशते पूर्णे मुच्यते स पुनः पुनः ॥ अजितात्मा तथा पापः पिशुनश्च दुरात्मवान् ॥ ५० ॥ पूर्वश्च सूकरो भूत्वा नकुलो जायते पुनः ॥ विमुक्तश्च ततः पश्चान्मानुष्यं लभते चिरात् ॥ ५१ ॥ धिक्कृतः सर्वलोकेन कूटसाक्ष्यनृतव्रतः ॥ न शर्म लभते क्वापि कर्मणा स्वेन गर्हितः ॥ ५२ ॥ इमं ह्यानृतिकं दुष्टं क्षेत्रहारकमेव च ॥ स्वकर्म दुष्कृतं यावत्तावद्दुःखं भुनक्त्व सौ ॥ ५३ ॥ कर्मण्येकैकशश्चायं स तु तिष्टत्वयं पुनः ॥ वर्षलक्षं न सन्देहस्तताश्चित्रष्टत्वयं पुनः ॥ ५४ ॥ ततो जातीः स्मरेत्सर्वास्तिर्यग्योनिं समाश्रितः ॥ जायतां मानुषः पश्चात्सुधया परिपीडितः ॥ ५५ ॥ सर्वकामविमुक्तस्तु सर्वदोषसमन्वितः ॥ क्वाचिज्जात्यां भवेदन्धः क्वाचिद्बधिर

॥२१८॥

एव च ॥ ५६ ॥ क्वचिन्मूकश्च काणश्च क्वचिद्व्याधिसमन्वितः ॥ एवं हि प्राप्नुयाद्दुःखं न च सौख्यमवाप्नुयात् ॥ ५७ ॥ जात्यन्तरसहस्राणि प्रयुतान्यर्बुदानि च ॥ शान्तिं न लभते चैव भूमे क्षेत्रहरो नरः ॥ ५८ ॥ तीव्रैरन्तर्गतैर्दुःखैर्भूमिहर्त्ता नराधमः ॥ इमं बन्धैर्दृढैर्बद्धा विपाचय तथाचिरम् ॥ ५९ ॥ प्रबद्धः सुचिरं कालं मम लोकं गतो नरः ॥ जायतां स चिरं पापो मार्जारस्तेन कर्मणा ॥ ६० ॥ तीव्रक्षुधापरिक्लिष्टो बद्धो बन्धनयन्त्रितः ॥ दुःखान्यनुभवंस्तत्र पापकर्मा नराधमः ॥ ६१ ॥ सप्तधा सप्त चैकां च जातिं गत्वा स पच्यते ॥ इमं शाकुनिकं पापं श्वभिर्गृध्रैश्च घातय ॥ ६२ ॥ ततः कुक्कुटतां यातु विड्भक्षश्च दुरात्मवान् ॥ दंशश्च मशकश्चैव ततः पश्चाद्भवेत्तु सः ॥ ६३ ॥ जातिकर्म सहस्रं तु ततो मानुषतां व्रजेत् ॥ इमं सौकारिकं पापं महिषा घातयन्तु तम् ॥६४ ॥ वर्षाणां च सहस्रं तु धावमानं ततस्ततः॥विभिन्नं च प्रभिन्नं च शृंगाभ्यां पार्ष्णिरेव च ॥ ६५ ॥ तस्माद्देशात्ततो मुक्तस्ततः सूकरतां व्रजेत् ॥ महिषः कुक्कुटश्चैव शशो जम्बूक एव च ॥ ६६ ॥ यां यां याति पुनर्जातिं तत्र भक्ष्यो भवेत्तु सः ॥ कर्मक्षयोऽन्यथा नास्ति मया पूर्वं विनिर्मितम् ॥ ६७ ॥ प्राप्य मानुषतां पश्चात्पुनर्व्याधो भविष्यति ॥ अन्यथा निष्कृतिर्नास्ति जातिजन्मशतैरपि ॥ ६८ ॥ उच्छिष्टान्नप्रदातारं पापाचारमधार्मिकम् ॥ अङ्गारैः पचतां चैनं त्रीणि वर्षशतानि च ॥ ६९ ॥ भिन्नचारित्रदुःशीला भर्तुर्व्यलीककारिणी ॥ आयसान्पुरुषान्सप्त ह्यालिङ्गन्तु समन्ततः ॥ ७० ॥ ततः शुनी भवेत्पश्चात्सूकरी च ततःपरम् ॥ कर्मक्षये ततःपश्चान्मानुषी दुःखिता भवेत् ॥ ७१ ॥ न च सौख्यमवाप्नोति तेन दुःखेन दुखिता ॥ अनेन भृत्या बहवः श्रांताः शांताः प्रवाहिताः ॥ ७२ ॥ भक्ष्यं भोज्यं च पानं च न तेषामुपपादितम् ॥ अनुमोदे प्रजा दृष्ट्वा लिप्समानो दुरात्मवान् ॥ ७३ ॥ एवं कुरुत भद्रं वो मम पाश्वे तु दुर्मतिः ॥ रौरवे नरके घोरे सर्वदोषसमन्विते ॥ ७४ ॥ सर्वकर्माणि कुर्वाणं क्षपयध्वं दुरासदम् ॥ वर्षाणां तु सहस्राणि तैस्तैः कर्मभिरावृतम् ॥ ७५ ॥ प्रक्षिप्य तामयं पश्चाद्म्युजातो दुरात्मवान् ॥ जायतामुरगः पश्चात्ततः कर्म समाश्रयेत् ॥ ७६ ॥ ततः पश्चाद्भवेत्पापश्चेतरः सर्वपापकृत् ॥ सूकरस्तु भवेत्पश्चान्मेषः संजायते पुनः ॥ ७७ ॥ हस्त्यश्वश्च शृगालश्च सूकरो वक एव च ॥ ततो जातस्तु सर्वेषु संसारेषु पुनः पुनः ॥ ७८ ॥ वर्षाणामयुतं साग्रं ततो मानुषतां व्रजेत् ॥ पंचगर्भेषु सापत्सु पंच जातो म्रियेत सः ॥ ७९ ॥ अपोगण्डे,

म्रियेत्पंच कर्मशेषक्षये तु सः ॥ ततो मानुषतां याति चैष कर्मविनिर्णयः ॥ ८०॥ पापस्य सुकृतस्याथ प्रजानां विनिपातने ॥ भूतानां चाप्यसंमानं दुष्प्रहारश्च सर्वशः ॥ ८१ ॥ अतः स्वयम्भुवा पूर्वं कर्मपाको यथार्थवत् ॥८२॥ इति श्रीवराहपुराणे संसारचक्रे नारकिदण्डकर्मविपाकवर्णनं नाम द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥ अथ पापसमूहानुक्रमवर्णनम् ॥ ऋषिपुत्र उवाच ॥ अन्यान्यपि च पापानि चित्रगुप्तो दिदेश ह ॥ व्यामिश्रान्कथ्यमानांश्च शृणुध्वं तान्महौजसः ॥ १ ॥ शीलसंयमहीनानां कृष्णपक्षानुगामिनाम् ॥ महापापैरुपेतानां कथ्यतां तत्प्रभावम् ॥ २ ॥ राजद्विष्टा गुरुद्विष्टाः सर्वे ते वै विगर्हिताः ॥ अविश्वास्या ह्यसम्भाष्याः कुक्षिमात्रपरायणाः ॥ ३ ॥ हिंसाविहारिणः क्रूराः सूचकाः कायदूषकाः ॥ गवेडकस्य वधकाः महिषाजादिकस्य च ॥ ४ ॥ दावाग्निं ये च मुंचन्ति ये च सौकरिकास्तथा ॥ तत्र कालमसंख्येयं पच्यन्ते पापकारिणः ॥ ५ ॥ कर्मक्षयाद्यदा भूयो मानुष्यं प्राप्नुवन्ति ते ॥ अल्पायुषो भवन्तीह व्याधिग्रस्ताश्च नित्यशः ॥ ६॥ गर्भ एव विपद्यन्ते म्रियन्ते बालकास्तथा ॥ परिरिंगरताः केचिन्म्रियन्ते पुरुषाधमाः ॥ ७ ॥ काष्ठवंशे च शस्त्रे च वायुना ज्वलनेन च ॥ तोयेन वा पाशबन्धैः पतनेन विषेण वा ॥८॥ मातापितृवधं कृत्वा मित्रसम्बन्धिबन्धुजम् ॥ बहुशः प्राप्नुवन्त्येते विद्वेषं चाप्यभिश्शः॥९॥प्राणातिपातनं ते वै प्राप्नुवन्ति यथा तथा ॥ लोहकाः कारुकाश्चैव गर्भाणां विनिर्हिंसकाः ॥ १० ॥ मूलकर्मकरा ये च गरदाः पुरदाहकाः ॥ ये च पञ्जरकर्तारो ये च शूलोपघातकाः ॥ ११ ॥ पिशुनाः कलहाश्चैव ये च मिथ्याविदूषकाः ॥ गोकुञ्जरखरोष्ट्राणां चर्मका मांसभेदकाः ॥ १२ ॥ उद्बन्धनकराश्चण्डाः पच्यन्ते नरकेषु ते ॥ तत्र कालं तु सम्प्राप्य यातनाश्च सुदुःसहाः ॥ १३ ॥ कर्मक्षयो यदा भूयो मानुष्यं प्राप्नुवन्ति ते ॥ हीनाङ्गाः सुदरिद्राश्च भवंति पुरुषाधमाः ॥ १४ ॥ श्रवणच्छेदनं चैव नासाच्छेदनमेव च ॥ छेदनं हस्तपादानां प्राप्नुवंति स्वकर्मणा ॥ १५ ॥ शारीरं मानसं दुःखं प्राप्नुवन्ति पुनःपुनः ॥ गलवेदनास्तथाश्चास्य तथा मस्तकवेदनाः ॥ १६ ॥ कुक्ष्यामयं तथा तीव्रं प्राप्नुवंति नराधमाः ॥ जडान्धबधिरा मूकाः पंगवः पादसर्पिणः ॥ १७ ॥ एकपक्षहताः काणाः कुनखाश्चामयाविनः ॥ कुब्जाः खञ्जास्तथा हीना विकलाश्च घटोदराः ॥ १८ ॥ गलत्कुष्ठाः श्वित्रकुष्ठा भवन्ति स्वेश्च कर्मभिः ॥ वाताण्डाश्चाण्डहीनाश्च प्रमेहमधुमेहिनः ॥ १९ ॥ योनिशूलाक्षिशूलाश्च श्वास

स्तद्वद्व्यशूलिनः ॥ पिण्डकावर्त्तभेदैश्च ग्रीहगुल्मादिरोगिणः ॥ २० ॥ बहुभिर्दारुणैर्घोरैर्व्याधिभिः समनुद्रुताः ॥ इत्येतान्हिंसकान्क्रूरान्घातयन्तु सुदारुणान् ॥ २१ ॥ मिथ्याप्रलापिनो दूतान्पाचयन्तु यथाक्रमम् ॥ कर्कशाः पुरुषाः सत्या ये च योपानिरर्थकाः ॥ २२ ॥ एषां चतुर्विधा भाषा या मिथ्याप्यभिधीयते ॥ हास्यरूपेण या भाषा चित्ररूपेण वा पुनः ॥ २३ ॥ अरहस्यं रहस्यं वा पैशुन्येन तु निन्दनात् ॥ उद्वेग जनना वापि कटुका लोकगर्हिताः ॥२४॥ ह्लेष्मक्षयकरां रूक्षां भिन्नवृत्तविभूषिताम् ॥ कदलीगर्भनिस्सारां मर्मस्पृक्कटुकाक्षराम् ॥ २५ ॥ स्वरहीनामसंस्थेयां भाषंते च निरर्थकम् ॥ अर्यवित्तमुखा ये च ये निबद्धाः प्रलापिनः ॥ २६ ॥ दूषयन्ति हि जल्पन्तोऽनृजवो निष्ठुराः शठाः ॥ निर्दया गतलज्जाश्च मूर्खा मर्मविभेदिनः ॥ २७ ॥ न मर्षयंति येऽन्येषां कीर्त्यमानाञ्छुभान्गुणान् ॥ दुर्वाचः परुषांश्चण्डान्वन्धयच्वं नराधमान् ॥ २८ ॥ ततस्तिर्यक्प्रजायन्ते बहुधा कीटपक्षिणः ॥ लोके दोषकराश्चैव लोकद्विष्टास्तथा परे॥ ॥ २९ ॥ तत्र कालं चिरं घोरं पच्यन्ते पापकारिणः॥ कर्मक्षयो यदा भूयो मानुष्यं प्राप्नुवन्ति ते ॥ ३० ॥ परिभूता अविज्ञाना नष्टचित्ता अकीर्त्तयः ॥ अनर्च्याश्चाप्यनर्हाश्च स्वपक्षे ह्यवमानिताः ॥३१॥ त्यक्त्वा मित्राणि मित्रेषु ज्ञातिभिश्च निराकृताः ॥ लोकदोषकराश्चैव लोक द्वेष्याश्च ये नराः ॥ ३२ ॥ अन्यैरपि कृतं पापं तेषां पतति मस्तके ॥ वज्रं शस्त्रं विषं वापि देहादेहनिपातनम् ॥ ३३ ॥ मिथ्याप्रलापिनामेषा मुक्ता क्लेशपरम्परा ॥ स्तेयहारं प्रहारं च नीतिहारं तथैव च ॥ ३४ ॥ स्तेयकर्माणि कुर्वन्ति प्रसह्य हरणानि च ॥ करचण्डाशिनो ये च राज शब्दोपजीविनः ॥ ३५ ॥ पीडयन्ति जनान् सर्वान्कूपणान्यामकूटकान् ॥ सुवर्णमणिमुक्तानां कूटकर्मानुकारकाः ॥ ३६ ॥ समये कृतहर्त्तारो लोकपीडाकरा नराः ॥ अनादिबुद्धयश्चान्ये स्वार्थातिशयकारिणः ॥ ३७ ॥ भूतनिष्ठाभियोगज्ञा व्यवहारेष्वनर्थकाः ॥ भेदकाराश्च धातूनां रजतस्य च कारकाः ॥ ३८ ॥ न्यासार्थहारका ये च सम्मोहनकराश्च ये ॥ ये तथोपाधिकाः क्षुद्राः पच्यन्ते तेषु तेष्वथ ॥ ३९ ॥ निरयेष्व प्रतिष्ठेषु दारुणेषु ततस्ततः॥तत्र कालं तु सुचिरं पच्यन्तां पापकारिणः॥४०॥कर्मक्षयो यदा तेषां मानुष्यं प्राप्नुवन्ति ते ॥तत्र तत्रोपपद्यन्ते यत्र यत्र महद्भयम् ॥ ४१ ॥ यस्मिंश्चौरभयं देशे क्षुद्रभयं राजतो भयम् ॥ आपद्भयोऽपि भयं यत्र व्याधिमृत्युभयं तथा ॥ ४२॥ ईतयो यत्र देशेषु

लुब्धेषु नगरेषु च ॥ क्षयाः कालोपसर्गा वा जायन्ते तत्र ते नराः॥४३॥बहुदुःखपरिक्लिष्टा गर्भवासेन पीडिताः ॥ एकहस्ता द्विहस्ता वा कूटाश्च विकृतोदराः ॥ ४४ ॥ शिराविवृतगात्राश्च हीनाङ्गा वातरोगिणः ॥ अश्रुपातितनेत्राश्च भार्या न प्राप्नुवन्ति ते ॥४५॥ तेषामपत्यं न भवेत्तद्रूपं च सुलक्षणम् ॥ अतिह्रस्वं विवर्णं च विकृतं भ्रान्तलोचनम् ॥ ४६ ॥ संसारे च यथा पक्वं कृपणं भैरवस्वनम् ॥ महतः परिवारस्य तुष्टश्चोच्छिष्टभोजकः ॥ ४७॥ रूपतो गुणतो हीनो बलतः शीलतस्तथा ॥ राजभृत्या भवन्त्येते पृथिवीपरिचारकाः ॥ ४८ ॥ अनालया निरामर्षा वेदनाभिः सुसंवृताः ॥ समकार्यसजात्यानां मित्रसम्बन्धिनां तथा ॥ ४९ ॥ कर्मान्तकारका ह्येते तृणीभूता भवन्ति ते ॥ अनर्थो राजदण्डो वा नित्यमुत्पाद्यते वधः ॥ ५० ॥ कर्मकल्याणकृच्छ्रेण भृशं चापि विमुह्यति ॥ कर्षकाः पशुपालाश्च वाणिज्यस्योपजीविकाः ॥५१॥ यद्यत्कुर्वन्ति ते कर्म सर्वत्र क्षयभागिनः ॥ सत्यमन्विष्यमाणाश्च नैव ते कीर्त्तिभागिनः ॥ ५२ ॥ यत्किञ्चिदशुभं कर्म तस्मिन्देशे समुच्छ्रितम् ॥ तस्य देशस्य नैवास्ति वर्जयित्वानुराजानम् ॥ ५३ ॥ सुवृष्ट्यामपि तेषां वै क्षेत्रं तं तु विवर्जयेत् ॥ अशानिर्वा पतेत्तत्र क्षेत्रं वापि विनश्यति ॥५४॥ न सुखं नापि निर्वाणं तेषां मानुषता भवेत् ॥ उत्पद्यते नृशंसानां तीव्रः क्लेशः सुदारुणः ॥५५॥ स्तेयकर्मप्रयुक्तानां मुक्त्वा क्लेशपरम्पराम् ॥ परदारप्रसक्तानामिमां शृणुत यातनाम् ॥ ५६ ॥ तिर्यङ्मानुषदेहेषु यान्ति विक्षिप्तमानसाः ॥ विहरन्ति ह्यधर्मेषु धर्मचारित्रदूषकाः ॥ ५७ ॥ तांस्तेनैव प्रदानेन संग्रहेण ग्रहेण वा ॥ मूलकर्मप्रयोगेण राष्ट्रस्यातिक्रमेण वा ॥ ५८ ॥ प्रसह्य वा प्रकृत्या वै ये चरन्ति कुलाङ्गनाः ॥ वर्णसङ्करकर्त्तारः कुलधर्मादिदूषकाः ॥ ५९ ॥ शीलशौचादिसम्पन्नं ये जनं धर्मलक्षणम् ॥ धर्षयन्ति च ये पापाः शृण्वतां तत्प्रभावः ॥ ६० ॥ निरयं पापभूयिष्ठा अनुभूय महाभयम् ॥ बहुवर्षसहस्राणि कर्मणा तेन दुष्कृताः ॥ ६१ ॥ कर्मक्षये यदा भूयो मानुष्यं यान्ति दारुणम् ॥ सङ्कीर्णयोनिजाः क्षुद्रा भवन्ति पुरुषाधमाः ॥ ६२ ॥ वेश्यालङ्ककूटानां शौण्डिकानां तथैव च ॥ दुष्टपाषण्डनारीणां नैकमैथुनगामिनाम् ॥ ६३ ॥ निर्लज्जपुण्ड्रकाः केचिद्भद्रपौरुषगण्डकाः ॥ स्त्रीबन्धकाः स्त्रीविनाशाः स्त्रीवेषाः स्त्रीविहारिणः ॥ ६४ ॥ स्त्रीणां चानुप्रवृद्धा ये स्त्रीभोगपरिभोगिनः ॥ तदेवतास्तन्नियमास्तद्रहेपास्तत्प्रभाषिताः ॥६५ ॥ तद्भावास्तत्कथालापास्तद्भोगाः परिभोगिनः ॥ विप्रलोभं च दानेषु ॥२२०॥

प्राप्नुवन्ति नराधमाः ॥ ६६ ॥ सौभाग्यपरमासक्ता नरा वीभत्सदर्शनाः ॥ अबुद्धेः सह संवासं प्रियं चाविप्रियं तथा ॥ ६७ ॥ शारीरं मानसं दुःखं प्राप्नुवन्ति नराधमाः ॥ कृमिभिर्भक्षणं चैव तप्ततैलोपसेचनम् ॥ ६८ ॥ अग्निप्रकारनदीभ्यां तु प्राप्नुवन्ति न संशयः ॥ परदारप्रसक्ताना भयं भवति नित्यहः ॥ ६९ ॥ सर्वं च निखिलं कार्यं यन्मया समुदाहृतम् ॥ ७० ॥ इति श्रीवराहपुराणे पापसमूहानुक्रमो नाम त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥ अथ दूतप्रेषणवर्णनम् ॥ ऋषिरुवाच ॥ इदं चैवापरं तस्य वदतो हि मया श्रुतम् ॥ चित्रगुप्तस्य विप्रेन्द्रा वचनं लोकशासिनः ॥१॥ दूरेऽसाविति किं कार्यं न क्ष्योऽस्त्यस्य कर्मणः ॥ किं कृपां कुरुते तस्मिन्गृहाण जहि मा व्यथः ॥२॥ त्रीडितः किम्भवान्ज्ञातं किं तिष्ठति पराङ्मुखः ॥ किं न गच्छसि वेगेन किं त्वया सुचिरं कृतम् ॥ ३ ॥ गच्छ गच्छ पुनस्तत्र शीघ्रं चैनमिहानय ॥ अशक्तोऽस्मीति किं रोषमहंस्ते दर्पमीदृशम् ॥ ४ ॥ किं त्वं वदसि दुर्बुद्धे विवाहस्तस्य वर्त्तते ॥ ऊर्ध्वरेतास्तपस्वीति त्वं मां भाषयसे कथम् ॥ ५ ॥ किं त्वं वदसि गर्ह्यं च मुहूर्त्तं परिपालय ॥ रमते कान्तया सार्द्धमिति किं त्वं प्रभाषसे ॥ ६ ॥ पतिव्रतेति साध्वीति रहस्यं भाषसे पुनः॥ किं किं वदसि बालो हि निशि चैवागतो गृहम् ॥ ७ ॥ आनीयते कथं ज्ञात्वा भोक्तुकामं कथं हरे ॥ जलशायिनं कथं चैव दातुकामं कथं हरे ॥८॥ धार्मिका यूयमेवात्र अहमेको नृशंसवत् ॥ यात यात तथा दृष्ट्वा यथाकालोऽनतिक्रमेत् ॥ ९ ॥ शीघ्रं त्वं भव सर्पो हि व्याघ्रस्त्वं च सरीसृपः ॥ जले ग्राहो भव त्वं हि त्वं कृमिस्त्वं सरीसृपः॥१०॥ नरकानुगतस्त्वं हि व्याधिभूतैः समाश्रयः ॥ अतीसारो भव त्वं हि त्वं छर्दिस्त्वं पुनर्भवः॥११॥ कर्णरोगो विपूची च नित्यरोगश्च सम्भवः ॥ ज्वरो भव महावीरो जलेग्राह्यो दुरासदः॥१२॥ वातव्याधिस्तथा घोरस्तथैव त्वं जलोदरः॥अपस्मारस्त्वमुन्मादो वातरोगस्तथैव च ॥१३॥ विभ्रमस्त्वं भवेच्छीघ्रं विष्टम्भश्च पुनर्भव ॥ व्याधिर्भव महावीरो ह्ययं तृष्णां तु विन्दतु॥१४॥ यथाकालं यथादृष्टं तावत्कालोऽत्र तिष्ठतु ॥ कालसंहरणे वापि शुभस्यागमनेऽपि वा ॥ १५ ॥ यूयं च कृतकर्माणस्ततो मोक्षमवाप्स्यथ ॥ द्रुतं द्रवत वेगेन सर्वे गच्छत मा चिरम् ॥ १६ ॥ वराज्ञा धर्मराजस्य या मया समुदाहृता ॥ एकाहं क्षपयेस्तत्र द्विरात्रं तत्र मा चिरम् ॥ १७ ॥ त्रिरात्रं वै चतूरात्रं पञ्चरात्रं दशरात्रकम् ॥ पक्षं वा मासमेकं वा बहून्मासांस्तथापि वा ॥ १८ ॥ क्षपयित्वा यथाकालं ततो मोक्षमवाप्स्यथ ॥ भूतात्मा

मोहवांस्तत्र करुणः कष्टमेव च ॥ १९ ॥ यस्मिन्यस्मिन्तु कालेऽहं यावतश्च श्रयाम्यहम् ॥ तस्मिंस्तस्मिन्महाकालं यूयं तत्कर्तुमर्हथ ॥२०॥
विनियोगा मया सूक्ता यथापूर्वं यथाश्रुतम् ॥ जाग्रतं वा प्रमत्तं वा यथा कालो न सम्पतेत् ॥ २१ ॥ यत्रात्तथा तु कर्त्तव्यं भवद्भिर्मम
शासनात् ॥ अभयं चात्र यच्छामि ब्राह्मणेभ्यो न संशयः ॥ २२ ॥ तस्माद्यात ऋषिभ्यश्च स्त्रीभ्यश्चैव महाबलाः ॥ यातनाया न भेतव्यमह
माज्ञापयामि वः ॥ २३ ॥ यथावाच्यं च कुरुत यथा कालो न गच्छति ॥ यथाकामं प्रकुरुत यच्च दृष्टं यथा तथा ॥ २४ ॥ मयाज्ञप्ता
विशेषेण मृत्युना सह सङ्गताः ॥ यथा वीरो महातेजाश्चित्रगुप्तो महायशाः ॥२५॥ यथात्रवीत्स्वयं रुद्रो यथा शक्रः शचीपतिः ॥ यथाज्ञापयते
ब्रह्मा चित्रगुप्तस्तथा प्रभुः ॥ २६ ॥ इति श्रीवराहपुराणे संसारचक्रे दूतप्रेषणं नाम चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥ अथ शुभाशुभ
फलानुकीर्तनवर्णनम् ॥ ऋषिपुत्र उवाच ॥ इदमन्यत्पुरा विप्राः श्रूयतां तस्य भाषितम् ॥ यमस्य चित्रगुप्तस्य यच्च तत्र मया श्रुतम् ॥ १ ॥
अयं तु भवतां यातु यातु स्वर्गं महीक्षिताम् ॥ अयं वृक्षस्त्वयं तिर्यगयं मोक्षं व्रजेन्नरः ॥ २ ॥ अयं नागो भवेच्छीघ्रमयं तु परमां गतिम् ॥
स्वपूर्वकान्पश्यतेऽयमात्मनस्तु पितामहान् ॥ ३ ॥ क्लिश्यतो रुदतश्चैव वदतश्च पुनःपुनः ॥ स्वेन दोषेण सर्वे वा अक्षयं नरकङ्गताः ॥ ४ ॥
दारत्यागी त्वधर्मिष्ठः पुत्रपौत्रविवर्जितः ॥ क्षिप्तं वै रौरवे ह्येनं क्षपयन्तु महौजसः ॥ ५ ॥ मुच्यतां त इमे सर्वे ह्यतीतानागतास्तथा ॥
मुच्यन्तामाशु मुच्यन्तां त एते पापवर्जिताः ॥ ६॥ आगमे च विपत्तौ च सर्वधर्मानुपालकाः ॥ ते तु कल्पान्वहून्स्वर्गं उषित्वा ह्येनमूर्ययकाः ॥७॥
बहुसुन्दरनार्यङ्के ह्याद्ये परमधार्मिकम् ॥ कलौ मानुषतां यातु धर्मस्येह निदर्शनम् ॥ ८ ॥ त्रिविष्टपे परिक्लेशो वासो ह्यस्याक्षयो भवेत् ॥
अयमायोधने शत्रुं हत्वा तु निधनङ्गतः ॥ ९ ॥ ब्राह्मणार्थे गवार्थे वा राष्ट्रार्थे निधनङ्गतः ॥ शक्रस्य ह्यमरावत्यां निवेदयत मा चिरम् ॥१०॥
तत्र वैमानिको भूत्वा कल्पमेकं निवत्स्यति ॥ तथैवायं महाभागो धर्मात्मा धर्मवत्सलः ॥ ११ ॥ बहुदानरतो नित्यं सर्वभूतानुकम्पकः ॥
एनं गन्धश्च माल्यैश्च शीघ्रमेव प्रपूजय ॥ १२ ॥ अस्मै पूजा भवेद्देया मया दिष्टा महात्मने ॥ वीज्यतां चामरैरेष रथमस्मै प्रदीयताम् ॥१३॥
प्रेतवासं समुत्सृज्य ह्येतो यातु त्रिविष्टपम् ॥ इन्द्रस्यार्द्धं भवेच्चैवं देवदेवस्य धीमतः ॥ १४ ॥ शङ्खतुर्येनिनादेन तत्र वै विजयेन च ॥ तत्र वै

॥२२१॥

पूजयित्वा च प्रायशो लभतां सुखम् ॥ १५ ॥ अयं गच्छतु भद्रं चापीन्द्रदेशं दुरासदम् ॥ अनेन वै कीर्तिमता लोकः सर्वो ह्यलंकृतः ॥ १६॥
गुणैश्च शतसंख्यैकैः शक्र एनं प्रतीक्षते ॥ तावत्स्थास्यति धर्मात्मा यावच्छक्रत्रिविष्टपे ॥ १७ ॥ तावत्स मोदते स्वर्गे यावद्मोऽनुमीयते ॥
ततश्च्युतश्च कालेन मानुष्ये सुखमश्नुते ॥ १८ ॥ रत्नवेणुप्रदश्चैव सर्वधर्मैरलंकृतः ॥ अश्विनोर्नय लोकं तु सर्वसौख्यसमन्वितम् ॥ १९ ॥ अयं
यातु महाभागो देवदेवं सनातनम् ॥ अतिमृष्टः पुरा येन यथोक्ताः सुखदोहनाः ॥ २० ॥ सर्वशक्त्या समेतेन द्विजेभ्य उपपादिताः ॥ शुचीनां
ब्राह्मणानाम्ब्रह्मदानं विशेषतः ॥ २१ ॥ तेन कल्पं वसिष्यन्ति रुद्रकल्पा मनोरमाः ॥ तत्र कल्पं वसेद्दत्वा रुद्रलोकं न संशयः ॥ २२ ॥ तेन
दत्तं द्विजातिभ्यो मधुखण्डपुरःसरम् ॥ रसैश्च विविधैर्युक्तं सर्वगन्धमनोरमम् ॥ २३ ॥ तरुणी क्षीरसम्पन्ना गौः सुवर्णयुता शुभा ॥ सवत्सा
हेमवासाश्च दत्ताऽनेन महात्मना ॥ २४ ॥ अस्य लेख्यं मया दृष्टं तिस्रः कोट्यस्त्रिविष्टपे ॥ स्वर्गात्परिच्युतश्चापि ऋणीणां जायते कुले ॥२५॥
सुवर्णस्य प्रदाता च त्रिदशेभ्यो निवेद्यताम् ॥ त्रिदशानभ्यनुज्ञाप्य यातु देवसुमापतिम् ॥ २६ ॥ तत्रैष वै महातेजा यथेष्टं काममाप्नुयात् ॥
तत्रैवायमपि प्रेतगणभक्तो महातपाः ॥ २७ ॥ प्रयातु पितृभिः सार्द्धं तर्पिता येन पूर्वजाः ॥ दानव्रता दिवं यान्तु नानालोकनमस्कृताः ॥२८॥
अयं भद्रो महाकामं सर्वभूतहिते रतः ॥ सर्वकामैरयं पूज्यः सर्वकामप्रदो नरः ॥ २९ ॥ क्षितिप्रदो द्विजातिभ्यो ह्ययं यातु त्रिविष्टपम् ॥
तत्रैव तिष्ठताद्वीरो ब्रह्मलोके सहानुगः ॥ ३० ॥ विविधैः कामभोगैस्तु सेव्यमानो नरोत्तमः ॥ अक्षयं चाजरं स्थानं पूज्यमानो महर्षिभिः ॥३१॥
इति श्रीवराहपुराणे भगवच्छास्त्रे संसारचक्रे शुभाशुभफलानुकीर्त्तनं नाम पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥ अथ शुभकर्मफलोदय
प्रकरणम् ॥ ऋषिरुवाच ॥ चित्रगुप्तस्य सन्देशो वदतो यो मया श्रुतः ॥ श्रूयतां वै महाभागास्तपःसिद्धा द्विजोत्तमाः ॥ १ ॥ इमं सर्वातिथिं
दान्तं सर्वभूतानुकम्पकम् ॥ समान्नदानदातारं शेषभोजनभोजिनम् ॥ २ ॥ मुञ्च मुञ्च महाभृत्य चैष धर्मस्य निर्णयः ॥ अहं कालेन सार्द्धं हि
मृत्युना प्रकृतस्तथा ॥ ३ ॥ मम स्थास्यन्ति पार्श्वेषु पापा वै विकृतास्तथा ॥ एनं गास्यन्ति गन्धर्वा गगनेऽप्सरसस्तथा ॥४ ॥ दीयतामासनं
दिव्यं तथान्यद्यानमेव च ॥ अन्यान्यान्कामयेत्कामात्मनसा यानि चेच्छति ॥ ५ ॥ तत्तु शीघ्रं प्रदातव्यं धर्मराजस्य शासनात् ॥ अक्रियाणि

तु दानानि पूर्वं दत्तानि धीमता ॥ ६ ॥ प्रेक्षतां च महाभागो भोक्तुं चैव सहानुगः ॥ तिष्ठत्येषोऽत्र वै वीरो ममादेशान्महायशाः ॥ ७ ॥
यावत्स्वर्गाद्विमानानि समागच्छन्ति कुत्रश्चः ॥ ततः स प्रवरैर्यानैः सानुगः सपरिच्छदः ॥ ८ ॥ देवानां भवनं
यातु देवैतेरभिपूजितः ॥ तत्रैव रमतां वीरो यावल्लोको हि धार्यते ॥ ९ ॥ स कृतार्थः सदा लोके यत्रैषोऽभिप्रयास्यति ॥
तत्र मेध्यं पवित्रं च यत्र स्थास्यत्ययं शुचिः ॥ १० ॥ नैककन्याप्रदातारं नैकयज्ञकृतं तथा ॥ पूज्यतां सर्वकामैस्तु
पदं गच्छतु वैष्णवम् ॥ ११ ॥ तत्रैष रमतां धीरः सहस्रमयुतं समाः ॥ ततो वै मानुषे लोके आद्ये वै जायतां कुले ॥ १२ ॥
भूतानुकम्पको ह्येष क्रियतामस्य चार्चनम् ॥ वर्षाणामयुतं चायं तत्र तिष्ठतु देववत् ॥ १३ ॥ जायते तु ततः पश्चात्सर्वमानुषपूजितः ॥
उपानहौ च छत्रं च जलभाजनमेव च ॥ १४ ॥ असकृच्चैव दत्तानि तस्मै पूजां प्रयच्छथ ॥ सभा यत्र प्रवर्त्तन्ते यस्मिन्देशे सहस्रशः ॥ १५ ॥
हस्तेन संस्पृशत्येष मृदुना शीतलेन च ॥ विद्याधरस्तथा ह्येष नित्यं मुदितमानसः ॥ १६ ॥ महापद्मानि चत्वारि तस्मिंस्तिष्ठन्तु नित्यशः ॥
ततश्च्युतश्च कालेन मानुषं लोकमास्थितः ॥ १७ ॥ बहुसुन्दरनारीके कुले जन्म समाप्नुयात् ॥ दधि क्षीरं घृतं चैव येन दत्तं द्विजातिषु ॥ १८ ॥
एष वा यातु नः पार्श्वमस्मै पूजां प्रयच्छथ ॥ नीयतां नीयतां शीघ्रं यत्र यत्र न चाल्यते ॥ १९ ॥ गोरसस्य तु पूर्णानि भाजनानि सहस्रशः ॥
यत्र दत्त्वा च पीत्वा च बान्धवेभ्यो विभागशः ॥ २० ॥ ततः पश्चादयं यातु यत्र लोकोऽनसूयकः ॥ तत्रैव रमतां धीरो बहुवर्षशता
न्ययम् ॥ २१ ॥ बहुसुन्दरनारीभिः सेव्यमानो महातपाः ॥ अमराख्यो भवेत्तत्र गोलोकेषु समाहितः ॥ २२ ॥ इदमेवापरं चैव चित्रगुप्तस्य
भाषितम् ॥ सर्वदेवमया देव्यः सर्ववेदमयास्तथा ॥ २३ ॥ अमृतं धारयन्त्यश्च प्रचरन्ति महीतले ॥ तीर्थानां परमं तीर्थमतस्तीर्थं न
विद्यते ॥ २४ ॥ पवित्रं च पवित्राणां पुष्टीनां पुष्टिरेव च ॥ तस्मात्पुरस्तु दातव्यं गवां वै मेध्यकारणात् ॥ २५ ॥ दृश्या हि त्रिदशाः सर्वे ॥२२२॥
शीरेण च महेश्वरः ॥ घृतेन पावको नित्यं पायसेन पितामहः ॥ २६ ॥ सकृद्दत्तेन प्रीयन्ते वर्षाणां हि त्रयोदश ॥ तां दत्त्वा चैव पीत्वा च प्रीतो
मेध्यस्तु जायते ॥ २७ ॥ पंचगव्येन पीतेन वाजिमेधफलं लभेत् ॥ गव्यं तु परमं मेध्यं गव्यादन्यन्न विद्यते ॥ २८ ॥ दृप्तेषु मरुतो देवा

जिह्वायां तु सरस्वती ॥ खुरमध्ये तु गन्धर्वाः खुराग्रेषु तु पन्नगाः ॥ २९ ॥ सर्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ॥ ककुदे सर्वक्षत्राणि
लांगूले धर्म आश्रितः ॥ ३० ॥ अपाने सर्वतीर्थानि प्रस्रावे जाह्नवी नदा ॥ नानाद्रिपसमाकीर्णाश्चत्वारः सागरास्तथा ॥ ३१ ॥ ऋषयो
रोमकूपेषु गोमये पद्मधारिणी ॥ रोमे वसन्ति विद्याश्च त्वक्केशेष्वयनद्वयम् ॥ ३२ ॥ धैर्यं धृतिश्च शान्तिश्च पुष्टिर्बुद्धिस्तथैव च ॥ स्मृतिर्मेधा
तथा लज्जा वपुः कीर्तिस्तथैव च ॥ ३३ ॥ विद्या शान्तिर्मतिश्चैव सन्ततिः परमा तथा ॥ गच्छन्तमनुगच्छन्ति ह्येता गावो न संशयः ॥ ३४॥
यत्र गावो जगत्तत्र देवदेवपुरोगमाः ॥ यत्र गावस्तत्र लक्ष्मीः सांख्यधर्मश्च शाश्वतः ॥ ३५ ॥ सर्वरूपेषु ता गावस्तिष्ठन्त्यभिमतास्तथा ॥
भवनेषु विशालेषु सर्वप्रासादपङ्क्तिषु ॥ ३६ ॥ स्त्रियश्च पुरुषाश्चैव रक्षन्तश्च सुयन्त्रिताः ॥ शयनासनपानेषु द्युपविष्टाः सहस्रशः ॥ ३७ ॥
क्रीडन्ति विविधैर्भोगैर्भोगेषु च सहस्रशः ॥ तत्र पानगृहेष्वन्ये पुष्पमालाविभूषिताः ॥ ३८ ॥ भक्ष्याणां विविधानां च भोजनानां च संचयात् ॥
शयनासनपानानि वाजिनो वारणांस्तथा ॥ ३९ ॥ अपश्यन्विविधास्तत्र स्त्रियश्च शुभलोचनाः ॥ शोभयन्ति स्त्रियः काश्चिज्जलक्रीडा
गतास्तथा ॥ ४० ॥ उद्यानेषु तथा चान्या भवनेषु च पुण्यतः ॥ अनेन सदृशं नास्ति ह्यस्मादन्यन्न विद्यते ॥ ४१ ॥ अहो सूत्रकृतं शिल्प
महोरत्नैरलंकृतम् ॥ एवं गृहाद्गृहं गच्छन्नहं तत्र ततस्तमः ॥ ४२ ॥ ततस्तु निखिलं सम्यग्दृष्ट्वा कर्म महोदयम् ॥ पुनरेवागतः पार्श्वं यमस्य
द्विजसत्तमाः ॥ ४३ ॥ इति श्रीवराहपुराणे संसारचक्रे शुभकर्मफलोदयो नाम षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥ अथ संसारचक्रपुरुष
विलोभनप्रकरणम् ॥ ऋषिपुत्र उवाच ॥ इदमन्यन्महाभागाद्वारदात्कलहप्रियात् ॥ श्रुतं विप्रा यथा तत्र यमस्य सदसि स्वयम् ॥ १ ॥ तथा
च पृच्छतस्तस्य पुराकृत्तं महात्मनः ॥ आख्यानं कथयामास यदुक्तं चित्रभानुना ॥ २ ॥ यथा च जनको राजा कामादिव्यानवाप्तवान् ॥
तत्सर्वं कथयिष्यामि शृण्वतां मुनिसत्तमाः ॥३॥ अयं तत्र महातेजा नारदो मुनिसत्तमः ॥ धर्मराजसभां प्राप्तस्तपसा द्योतितप्रभः ॥४ ॥ तत्र
राजाऽथ वेगेन तं दृष्ट्वा स्वयमागतम् ॥ अर्चयित्वा यथान्यायं कृत्वा चैव प्रदक्षिणम् ॥ ५ ॥ उवाच च महातेजाः सूर्यपुत्रः प्रतापवान् ॥
स्वागतं ते द्विजश्रेष्ठ दिष्ट्या प्राप्तोऽसि नारद ॥ ६ ॥ सर्वज्ञः सर्वदर्शी च सर्वधर्मविदां वरः ॥ गान्धर्वस्येतिहासस्य विज्ञाता त्वं महामुने ॥ ७॥

वयं पूताश्च मेध्याश्च त्वां दृष्ट्वा ह्यागतं विभो ॥ अयं देशः पुनः पूतः सर्वतो मुनिसत्तम ॥ ८ ॥ यत्कार्यं येन वा कार्यं यद्वै मनसि वर्त्तते ॥ प्रब्रूहि भगवन्नाशु यच्चान्यत्किंचिदुत्तमम् ॥ ९ ॥ दुर्ल्लभं त्रिषु लोकेषु यच्च प्रियतरं तव ॥ तपोमयानां सर्वेषां द्विजातीनां च सुव्रत ॥ १० ॥ इति धर्मवचः श्रुत्वा नारदः प्राह धर्मवित् ॥ अहं ते कथयिष्यामि यत्पृष्टं संशयास्पदम् ॥ ११ ॥ नारद उवाच॥ भगवान् पाता च गोप्ता च नेता धर्मस्य नित्यशः ॥ सत्येन तपसा क्षान्त्या धैर्येण च न संशयः ॥ १२ ॥ भावज्ञश्च कृतज्ञश्च त्वदन्यो न हि विद्यते ॥ संशयं सुमहत्प्राप्तं स्तन्मामाचक्ष्व सुव्रत ॥ १३ ॥ अमरत्वं कथं याति व्रतेन नियमेन च ॥ केन वा दानधर्मेण तपसा वा सुरोत्तम ॥ १४ ॥ अतुलां च श्रियं लोके कीर्त्तिं च सुमहत्फलम् ॥ लभन्ते शाश्वतं स्थानं दुर्ल्लभं विगतज्वराः ॥ १५ ॥ केन गच्छन्ति नरकं पापिष्ठं लोकगर्हणम् ॥ सर्वमाख्याहि तत्त्वेन परं कौतूहलं हि मे ॥ १६ ॥ यम उवाच ॥ गच्छन्ति हि नरा घोरा बहवोऽधर्मनिर्मितम् ॥ बन्धांश्च सुबहूंस्तत्र प्राप्नुवन्ति तपोधन ॥ १७ ॥ विस्तरेण तु तत्सर्वं ब्रवीमि मुनिसत्तम ॥ श्रूयतां तन्महाभाग श्रुत्वा चैवोपधारय ॥ १८ ॥ नाग्निचित्ररकं याति न पुत्री न च भूमिदः ॥ शूरश्च शतवर्षी च वेदानां चैव पारगः ॥ १९ ॥ पतिव्रता न गच्छन्ति सत्यवाक्याश्च ये नराः ॥ अजिताश्चाशठा श्चैव स्वामिभक्ताश्च ये नराः ॥ २० ॥ अहिंसका न गच्छन्ति ब्रह्मचर्यव्यवस्थिताः ॥ पतिव्रता दानवन्तो द्विजभक्ताश्च ये नराः ॥ २१ ॥ स्वदारनिरता दान्ताः परदारविवर्जकाः ॥ सर्वभूतात्मभूताश्च सर्वभूतानुकम्पकाः ॥ २२ ॥ न गच्छन्ति तु तं देशं पापिष्ठं तमसावृतम् ॥ यातनास्थानसंपूर्णं हाहाकारभयाकुलम् ॥ २३ ॥ ज्ञानवन्तो द्विजा ये च ये च विद्यां पराङ्गताः ॥ उदासीना न गच्छन्ति स्वाम्यर्थे च हता नराः ॥ २४ ॥ न गच्छन्त्यत्र दातारः सर्वभूतहिते रताः ॥ शुश्रूषका मातृपित्रोर्न गच्छन्ति च ये नराः ॥ २५ ॥ तिलान् गां च हिरण्यं च पृथिवीं चापि शाश्वतीम् ॥ ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥ २६ ॥ यथोक्तं यजमानाश्च सत्र याजिन एव च॥ चातुर्मास्यकरा ये च ये द्विजाः आहिताग्नयः ॥२७॥ गुरुचित्तानुपालाश्च कृतिनो मौनयञ्चिताः ॥ नित्यस्वाध्यायिनो दान्ताः सदा सभ्याश्च ये नराः ॥२८॥ मां न पश्यन्ति ते चैव स्वात्मभावेन भावितः॥अपर्वमैथुना ये च न गच्छन्ति जितेन्द्रियाः ॥२९॥ब्राह्मणा अमरत्वं

चे प्राप्नुवन्ति न संशयः ॥ निवृत्ताः सर्वकामेभ्यो निराशाः सुजितेन्द्रियाः ॥ ३० ॥ न गच्छन्ति हि तद्धोरं यत्र ते पापकर्मिणः ॥ ३१ ॥
नारद उवाच ॥ किं दानं श्रेय आहोस्वित्पात्रेण फलमुच्यते ॥ किं वा कर्म महत्कृत्वा स्वर्गलोके महीयते ॥ ३२ ॥ रूपं वा धनधान्यं वा
ह्यायुश्च कुलमेव वा ॥ प्राप्यते येन दानेन तन्ममाचक्ष्व सुव्रत ॥ ३३ ॥ यम उवाच ॥ न शक्यं विस्तरेणेह वक्तुं वर्षशतैरपि ॥ शुभाशुभानां
गतयो द्रष्टुं वा प्रभुमेव वा ॥ ३४ ॥ किंचिन्मात्रं प्रवक्ष्यामि येन यत्प्राप्यते नरैः ॥ विविधानि च सौख्यानि प्रायशस्तु गुणागुणैः ॥ ३५ ॥
रहस्यमिदमाख्यानं श्रूयतां मुनिसत्तम ॥ या गतिः प्राप्यते येन प्रेत्यभावे न संशयः ॥ ३६ ॥ तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ॥
आयुःप्रकर्षो भोगाश्च भवन्ति तपसैव तु ॥ ३७ ॥ ज्ञानविज्ञानमारोग्यं रूपसौभाग्यसम्पदः ॥ तपसा प्राप्यते भोगो मनसा नोपदिश्यते ॥३८॥
एवं प्राप्नोति पुण्येन मौनेनाज्ञां महामुने ॥ उपभोगांस्तु दानेन ब्रह्मचर्येण जीवितम् ॥ ३९ ॥ अहिंसया परं रूपं दीक्षया कुलजन्म च ॥ फल
मूलाशिनो राज्यं स्वर्गः पर्णाशिनां भवेत् ॥४०॥ पयोभक्ष्या दिवं यान्ति जायते द्रविणाढ्यता ॥ गुरुशुश्रूषया नित्यं श्राद्धदानेन सन्ततिः॥४१॥
गवाह्याः कालदीक्षाभिर्यैं तु वा तृणशायिनः ॥ स्वयं विषवणाद्ब्रह्म त्वपः पीत्वेहलोकभाक् ॥ ४२ ॥ क्रतुयष्टा दिवं याति चोपहारं च सुव्रत ॥
कृत्वा तु दशवर्षाणि नीरपानाद्विशिष्यते ॥ ४३ ॥ रसानां प्रतिसंहारात् सौभाग्यमनुजायते ॥ आमिषस्य प्रतीहाराद्भवत्यायुष्मती
प्रजा ॥४४॥ गन्धमाल्यनिवृत्त्या तु मूर्त्तिर्भवति पुष्कला॥ अन्नदानेन च नरः स्मृतिं मेधां च विन्दति॥४५॥ छत्रप्रदानेन गृहं वरिष्ठं स्थं ह्युपानद्युग
सम्प्रदानात् ॥ वस्त्रप्रदानेन सुरूपता च धनैश्च पुत्रैश्च भृता भवन्ति ॥ ४६ ॥ पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥ अन्नपानप्रदानेन
कामभोगेस्तु तृप्यते ॥४७॥ पुष्पोपगन्धं च फलोपगंधं यः पादपं स्पर्शयते द्विजाय ॥ स स्त्रीसमृद्धं हि सुरत्नपूर्णं गृहं हि सर्वोपचितं लभेत ॥४८ ॥
वस्त्रान्नपानीयरसप्रदानात् प्राप्नोति तानेव रसप्रदानात् ॥ स्रग्धूपगन्धान्यनुलेपनानि पुष्पाणि गृह्याणि मनोरमाणि ॥ ४९ ॥ दत्त्वा द्विजेभ्यः स
भवेत्सुरूपो रोगांश्च कांश्चिल्लभते न जातु ॥ बीजैरशून्यैः शयनाभिरामं दद्याद्गृहं यः पुरुषो द्विजाय ॥ ५० ॥ स स्त्रीसमृद्धं गजवाजिपूर्णं लभे
द्विधिष्ठानवरं वरिष्ठम् ॥ धूपप्रदानेन तथा गवां च लोकानवाप्नोति नरो वसूनाम् ॥ ५१ ॥ गजं तथा गोवृषभप्रदानैः स्वर्गे सुखं शाश्वतमाम

नन्ति ॥ घृतेन तेजःसुकुमारतां च प्राणद्युतीः स्निग्धतां चापि तैलैः ॥ ५२ ॥ क्षौद्रेण नानारसतृप्ततां च दीपप्रदानाद्द्युतिमाप्नुवन्ति ॥ ५३ ॥ पायसेन वपुःपुष्टिं कूसरात्स्निग्धसौम्यताम् ॥ फलैस्तु लभते पुत्रं पुष्पैः सौभाग्यमेव च ॥ ५४ ॥ स्थैर्यंदेव्यं विमानं तु शिबिकां चैव मानवः ॥ प्रेक्षणेरपि सौभाग्यं प्राप्नोतीह न संशयः ॥ ५५ ॥ अभयस्य प्रदानेन सर्वकामानवाप्नुयात् ॥ ५६ ॥ इति श्रीवराहपुराणे संसारचक्रं पुरुषविलोभनं नाम तत्राधिकद्विशततमोऽध्यायः ॥ २०७ ॥ अथ पतिव्रतोपाख्यानवर्णनम् ॥ ऋषिपुत्र उवाच ॥ मुहूर्तस्य तु कालस्य दिव्याभरणभूषितान् ॥ प्रयातान्दिवि संप्रेक्ष्य विमानैः सूर्यसन्निभैः ॥ १ ॥ ब्राह्मणास्तपसा सिद्धाः सपत्नीकाः सबान्धवाः ॥ सानुरागा द्युभयतो मन्युनाभिपरिप्लुताः ॥ २ ॥ विवर्णवदनो राजा प्रभातेजोविवर्जितः ॥ अधिरादेव सञ्जातः क्रोधेन भृशदुःखितः ॥ ३ ॥ तं तथा निष्प्रभं दृष्ट्वा धर्मराजं तपोधनः ॥ नारदश्चाब्रवीत्तत्र ज्ञात्वा तस्य मनोगतम् ॥ ४ ॥ अपि त्वं भ्राजमानस्तु पशोः पतिरिवापरः ॥ कस्मात्ते शोभनं वक्त्रं क्षणाद्वैवर्ण्यमापतत् ॥ ५ ॥ विनिःश्वसन्यथा नागः कस्मात्त्वं परितप्यसे ॥ राजन्कस्माद्बिभेषि त्वमेतदिच्छामि वेदितुम् ॥ ६ ॥ यम उवाच ॥ विवर्णं जायते वक्त्रं शुष्यते न च संशयः ॥ यन्मया ह्यीदृशं दृष्टं श्रूयतां तन्महामुने ॥ ७ ॥ यायावरास्तु ये विप्रा उञ्छवृत्तिपरायणाः ॥ दृढव्रताध्यायतपसो ह्रीमन्तो ह्यनसूयकाः ॥ ८ ॥ अतिथिप्रियकाश्चैव नित्ययुक्ता जितेन्द्रियाः ॥ ते त्वर्हमानिनः सर्वे गच्छन्त्युपरि मे द्विज ॥ ९ ॥ न च मामुपतिष्ठन्ति न चैव वशगा मम ॥ मस्तके मम गच्छन्ति सपत्नीकाः सहानुगाः ॥ १० ॥ दिव्यगन्धैर्विलिप्ताङ्गा माल्यभूषितवाससः ॥ सृजन्तो मम माल्यानि तेन ताम्ये द्विजोत्तम ॥ ११ ॥ मृत्यो तिष्ठसि कस्यार्थे को वा मृत्युः कथं भवेत् ॥ किं त्वं न भाषसे मृत्यो ब्रूहि लोके निरर्थकः ॥ १२ ॥ लोभासक्तान्सदा हंसि पापिष्ठान्धर्मवर्जितान् ॥ एषां तपसि सिद्धानां नाहं विघ्नवानिह ॥ १३ ॥ निग्रहानुग्रहौ नापि मया शक्यौ महात्मनाम् ॥ कर्तुं वा प्रतिषेद्धुं वा तेन तप्ये भृशं मुने ॥ १४ ॥ एतस्मिन्नन्तरे तत्र विमानेन महाद्युतिः ॥ पतिव्रता समं भर्त्रा सानुगा सपरिच्छदा॥१५॥महता तूर्यघोषेण सम्प्राप्ता प्रियदर्शना ॥ धर्मराजहितं सर्वं धर्मज्ञा धर्मवत्सला ॥१६॥ साब्रवीत्ति विमानस्था साधयन्ती शुभाङ्गना ॥ विचित्रं प्रसृतं वाक्यं सर्वसत्त्वसुखावहम् ॥१७॥ पतिव्रतोवाच॥ धर्मराज महाबाहो कृतज्ञः सर्वसम्मतः ॥

मेवमीर्षा कुरुष्व त्वं ब्राह्मणेषु तपस्विषु॥१८॥ एतेषां तपसां वीर माहात्म्यं बलमेव च ॥ अचिन्त्याः सर्वभूतानां ब्राह्मणा वेदपारगाः ॥१९ ॥ ब्राह्मणाः सततं पूज्या ब्राह्मणाः सर्वदेवताः ॥ मात्सर्यं क्रोधसंयुक्तं न कर्त्तव्यं द्विजातिषु ॥२०॥ त्वया शुभाशुभं कर्म नित्यं पूजा मनास्विनाम् ॥ रागो वा रोषमोहो वा न कर्त्तव्यो सदा सताम् ॥ २१ ॥ प्रयाता गगने दृष्टा विद्युत्सौदामिनी यथा ॥ दृष्ट्वा पतिव्रतां नारीं धर्मराजेन पूजिताम् ॥ २२ ॥ अत्रवन्निारदस्तत्र धर्मराजं तथागतम् ॥ २३ ॥ नारद उवाच ॥का चैषा सुमहाभागा सुरूपा प्रमदोत्तमा ॥ या त्वया पूजिता राजन् हितमुक्त्वा गता पुनः॥२४॥ एतदिच्छाम्यहं ज्ञातुं परं कौतूहलं हि मे ॥ एतन्मे सुमहाभाग कथयस्व समासतः ॥२५॥ यम उवाच ॥ अहं ते कथयिष्यामि कथां परमशोभनाम् ॥ एषा मया यथा तात पूजितापि च कृत्स्नशः ॥ २६ ॥ पुरा कृतयुगे तात निमिर्नाम महा यशाः ॥ आसीद्राजा महातेजाः सत्यसन्ध इति श्रुतः ॥ २७ ॥ तस्य पुत्रो मिथिर्नाम जनकाजनकोऽभवत् ॥ तस्य रूपवती नाम पत्नी प्रियहिते रता ॥ २८ ॥ सा चाप शुभकर्माणि पतिभक्ता पतिव्रता ॥ प्रीत्या परमया युक्ता भर्त्तुर्वचनकारिणी ॥ २९ ॥ सोऽपि राजा महा भागः सर्वभूतहिते रतः ॥ धर्मात्मा च महात्मा च सत्यसन्धो महातपाः ॥ ३० ॥ य इमां पृथिवीं सर्वां धर्मेण परिपालयन् ॥ न व्याधिर्न जरा मृत्युस्तस्मिन्राजनि ज्ञायते ॥ ३१ ॥ ववर्ष सततं देवस्तस्य राष्ट्रे महाद्युतेः ॥ एवं बहुगुणोपेतं तस्य राज्यं महात्मनः ॥ ३२ ॥ न कश्चिद्दृश्यते मर्त्त्यो रुजार्त्तो दुःखितोऽपि वा ॥ अथात्र बहुकालस्य राजानं मिथिलाधिपम्॥३३॥उवाच राज्ञी विप्रेन्द्र विनयात्प्राश्रितं वचः॥३४॥ राज्ञ्युवाच ॥ भृत्यानां च द्विजातीनां तथा परिजनस्य च ॥ यदस्ति द्रविणं किंचित्पृथिव्यां यद्गृहे च ते ॥ ३५॥ विनियुक्तं तु तत्सर्वं साम्निध्यं तु तथा त्वया ॥ न च राज न्विजानासि भोजनस्य प्रशंसासि ॥ ३६ ॥ नास्ति तन्नियमः कश्चिन्नुप्पमूल्यं च नास्ति नः ॥ न वा गवादिकं किंचिन्न च वस्त्राणि कर्हिचित् ॥ ३७ ॥ न चैव वार्षिकः कश्चिद्विद्यते भाजनस्य च ॥ दृश्यते हि महाराज मम चैवाथ सुव्रत ॥ ३८ ॥ यत्कर्त्तव्यं मया वापि तन्मे ब्रूहि नराधिप ॥ कर्त्तव्यस्म्यहं विशेषेण यद्वाक्यमपि मन्यसे ॥ ३९ ॥ राजोवाच ॥ न शक्यमुपरोधेन वक्तुं भामिनि विप्रियम् ॥ न च पश्याम्यहं देवि तव चैव जनस्य च ॥ ४० ॥ तद्ब्रवीमि यथाशक्त्या यदि मे मन्यसे प्रिये ॥ हविष्ये वर्त्तमानानामिदं वर्ष

शतं गतम् ॥ ४१ ॥ कुद्दालेन हि काष्ठेन क्षेत्रं वै कुर्महे प्रिये ॥ ततो धर्मविधिं तत्त्वात्प्राप्नुयां मे न संशयः ॥४२॥ भक्ष्यं भोज्यं च ये ये च
ततस्त्वं सुखमाप्स्यसि ॥ एवमुक्ता ततो राज्ञी राजानीमदमब्रवीत् ॥ ४३ ॥ देव्युवाच ॥ भृत्यानां तु सहस्राणि तव राजन्निवेशने ॥ अश्वानां
च गजानां च सैरिभानां तथैव च ॥ ४४ ॥ उष्ट्राणां महिषाणां च खराणां च महायशाः ॥ एते सर्वे कथं राजन्न कुर्वन्ति तवेप्सितम् ॥ ४५ ॥
राजोवाच ॥ नियुक्तानि हि कर्माणि वार्षिकाणीतराणि च ॥ सर्वकर्माणि कुर्वन्ति ये भृत्या मे वरानने ॥ ४६ ॥ बल्लीवर्दाः खरा अश्वा गजा
उष्ट्रा ह्युनकशः ॥ सर्वे नियुक्ता मे देवि सर्वकर्मसु शोभने ॥ ४७ ॥ आयसं त्रापुष ताम्रं राजतं काञ्चनं तथा ॥ नियुक्तानि तु सर्वाणि सर्व
कर्मस्वनिन्दिते ॥ ४८ ॥ ननु पश्याम्यहं देवि किंचिद्धेमं न चायसम् ॥ येन कुर्यामहं देवि कुद्दालं सुसमाहितः ॥४९॥ एवमुक्ता महादेवी तेन
राज्ञा सुशोभना ॥ हृष्टपुष्टमना देवी राजानमिदमब्रवीत् ॥ ५० ॥ गच्छ राजन्यथाकाममनुयास्यामि पृष्ठतः ॥ एवमुक्तः सुनिष्क्रान्तः
सभार्यः स नरेश्वरः ॥ ५१ ॥ ततो राजा च देवी च क्षेत्रं मृगयतस्तदा ॥ गतौ च परमाध्वानं ततो राजाब्रवीदिदम् ॥ ५२ ॥ इदं भद्रं मम
क्षेत्रमास्स्वात्र वरवर्णिनि ॥ यावद्बुल्मानिमान् भद्रे कण्टकांश्च वरानने ॥ ५३ ॥ अहं छिनाम्रि वै देवि त्वमेताञ्छोधय प्रिये ॥ एष ते कर्म
योगस्तु ततः प्राप्स्यामि चेप्सितम् ॥ ५४ ॥ एवमुक्ता महादेवी तेन राज्ञा तपोधन ॥ उवाच मधुरं वाक्यं प्रहसन्ती नृपाङ्गना ॥ ५५ ॥
वृक्षोऽत्र दृश्यते पार्श्वे सौवर्णो गुल्म एव च ॥ पानीयस्य तु सान्निध्यं न किंचिदिह दृश्यते ॥ ५६ ॥ कथं क्षेत्रं करिष्यावो ह्युद्रोगस्य तु कार
कम् ॥ इयं नदी ह्ययं वृक्ष इयं भूमिः समांसला ॥ ५७ ॥ अस्मिन्वापि कृतं कर्म कथं गुणकरं भवेत् ॥ तस्यास्तद्वचनं श्रुत्वा राजा वचन
मब्रवीत् ॥ ५८ ॥ शुभं सानुनयं वाक्यं भूतानां गुणवत्सलः ॥ पूर्वंगृहे भवेत्पूर्वं विनियुक्तं तथा प्रिये ॥ ५९ ॥ पानीयस्य तु पार्श्वेन सन्नि
कृष्टेन सुन्दरि ॥ चतुर्थे जनपर्यन्तं न किंचिदिह दृश्यते ॥ ६० ॥ अयं गृहो महादेवि न च बाधाऽत्र कस्यचित् ॥ ततस्तच्छोधयामास
तत्क्षेत्रं भार्यया सह ॥ ६१ ॥ वियन्मध्ये तथोग्रश्च सविता तपते सदा ॥ समृद्धश्च तदा तत्र निदाघः काल आगतः ॥ ६२ ॥ प्रवृद्धो दारुणो
घर्मः कालश्चैवातिदारुणः ॥ ततः सा तृषिता देवी क्षुधिता च तपस्विनी ॥ ६३ ॥ स्निग्धौ ताम्रतलौ पादौ तस्यां सन्तापनागतौ ॥ गुण

प्रवाहरक्तौ तु तस्याः पादौ च सुव्रत ॥ ६४ ॥ सूर्यस्य पादा मध्याह्ने तापयन्त्यग्निसन्निभाः ॥ ततः सा व्यथिता देवी भर्त्तारमिद मब्रवीत् ॥ ६५ ॥ तृषितास्मि महाराज भृशमुष्णेन पीडिता ॥ पानीयं दीयतां राजन्मम शीघ्रं प्रसादतः ॥ ६६ ॥ इत्युक्त्वा पतिता देवी विह्वला दुःखपीडिता ॥ पतन्त्या च तया सूर्यो दृष्टो विह्वलया तथा ॥ ६७ ॥ यदृच्छया पतन्त्या तु सूर्यः कोपेन वीक्षितः ॥ ततो विवस्वान् भगवान् सन्त्रस्तो गगने तदा ॥ ६८॥ दिवं मुक्त्वा महातेजाः पतितो धरणीतले ॥ ततो दृष्ट्वा तु राजाऽसौ स्वभावेन च वर्जितम् ॥ ६९ ॥ किमर्थमिह तेजस्विंस्त्यक्त्वा मण्डलमागतः ॥ किं करोमि महातेजाः सर्वलोकनमस्कृतः ॥ ७० ॥ एवं ब्रुवन्तं राजानं सूर्यः सानुनयोऽब्रवीत् ॥ पतिव्रता शुभाक्षी च ममैषा रुषिता भृशम् ॥ ७१॥ ततोऽहं पतितो राजंस्तव कार्यानुशासनः ॥ अनया सदृशी नारी त्रैलोक्ये नैव विद्यते ॥ ७२ ॥ पृथिव्यां स्वर्गलोके वा न काचिदिह दृश्यते ॥ अहोऽस्याः परमं सत्त्वमहोऽस्याः परमं तपः ॥ ७३॥ अहो धैर्यं च शक्तिश्च तवैवं शंसिता गुणाः॥तथैव ते महाभाग तव चित्तानुसारिणी॥७४॥ अनुरूपा विशुद्धा च तपसा च वराङ्गना॥पतिव्रता च साध्वी च नित्यं तव हिते रता॥७५॥सदृशी ते महाभाग शक्रस्येव यथा शची ॥पात्रं पात्रवता प्राप्तं सुकृतस्य महत्फलम् ॥७६॥ अनुरूपः सुरूपो वा यतो जातः सुयन्त्रितः ॥ मा च ते वितथः कामो भवेच्चैव नराधिपः ॥७७ ॥ कुरुष्व दयितं क्षेत्रं यथा मनसि वर्त्तते ॥ भोजनार्थं महाराज त्वदन्यो न हि विद्यते॥७८॥फलं दं च यशस्यं च भविष्यति हि कामदम्॥एवमुक्त्वा ततः सूर्यः ससर्ज जलभाजनम्॥७९॥उपानहौ च छत्रं च दिव्यालंकार भूषितम् ॥ ददौ च राज्ञे सविता प्रीत्या परमया युतः ॥८०॥ उपभोक्तुं सुखस्यार्थं सुपुण्यस्य विशेषतः ॥ दत्त्वा तत्पुण्यकर्माणं ततः प्राह दिवाकरः ॥ ८१ ॥ एवमुक्त्वा तु भगवांस्तथा तत्कृतवान् क्वचित् ॥ राज्ञा च जनकेनैव प्रियाया हितकाम्यया ॥ ८२ ॥ ततः साप्यायिता देवी तोयेन शुभलक्षणा ॥ लब्धसंज्ञा गतभया राजानमिदमब्रवीत् ॥ ८३ ॥ देवीं दृष्ट्वा तदाश्चर्यं विस्मयोत्फुल्ललोचना ॥ केन दत्तं शुभं तोयं दिव्यं छत्रमुपानहौ ॥ ८४ ॥ एतन्मे संशयं राजन्कथयस्व तपोधन ॥ राजोवाच ॥ एष देवो महादेवि विवस्वान्नाम नामतः ॥ ८५ ॥ तवानुकम्पया देवि मुक्त्वाकाशमिहागतः ॥ एवमुक्ता तु सा देवी भर्त्तारमिदमब्रवीत् ॥ ८६ ॥ करवाण्यस्य कां प्रीतिं ज्ञायतामस्य वाञ्छितम् ॥ ततो राजा

महातेजाः प्रणिपत्य कृताञ्जलिः ॥ ८७ ॥ विज्ञापयामास तदा भगवन् किं करोमि ते ॥ एवमुक्तो नरेन्द्रेण सूर्यो वचनमब्रवीत् ॥ ८८ ॥ अभयं मे महाराज स्त्रीभ्यो भवतु मानद ॥ तच्छ्रुत्वा वचनं तस्य भास्कारस्य तु मानदः ॥ ८९ ॥ तां प्रियां प्रीतहृदयां श्रावयंस्तस्य भाषितम् ॥ राज्ञस्तु वचनं श्रुत्वा देवी वचनमब्रवीत् ॥ ९० ॥ प्रीत्या परमया युक्ता तस्य राज्ञो मनःप्रिया ॥ रश्मीनां वारणार्थाय छत्रं दत्त्वा तु कुण्डि काम् ॥ ९१ ॥ इमौ चोपानहौ दत्त्वा चौभौ पादस्य शङ्करौ ॥ अभयं ते महाभाग यथा त्वं वृतवानसि ॥ ९२ ॥ एवं पतिव्रतां विप्र पूजयामि नमामि च ॥ ९३ ॥ इति श्रीवराहपुराणे संसारचक्रे पतिव्रतोपाख्यानं नाम अष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥ अथ पतिव्रताहात्म्य वर्णनम् ॥ नारद उवाच ॥ कर्मणा केन राजेन्द्र तपसा वा तपोधनाः ॥ उत्तमां च गतिं यांति कृष्णवातः प्रशंस मे ॥१॥ एवमुक्तस्तु धर्मात्मा नारदेनाब्रवीत्तदा ॥ यम उवाच ॥ न तस्य नियमो विप्र तपो नैव च सुव्रत ॥ २ ॥ उपवासो न दानं वा न देशो वा महामुने ॥ यादृशी तु भवे द्विप्र शृणु तत्त्वं समासतः ॥ ३ ॥ प्रसुप्ते या प्रस्वपिति जागर्ति विबुधे स्वयम् ॥ भुङ्क्ते तु भोजिते विप्र सा मृत्युं जयति ध्रुवम् ॥४ ॥ मौने मौना भवेद्या तु स्थिते तिष्ठति या स्वयम् ॥ सा मृत्युं जायते विप्र नान्यत्पश्यामि किंचन ॥५ ॥ एकदृष्टिरेकमना भर्तुर्वचनकारिणी ॥ तस्या विभीमहे सर्वं ये तथान्ये तपोधन ॥ ६ ॥ देवानामपि सा साध्वी पूज्या परमशोभना ॥ भर्त्रा चाभिहिता यापि न प्रत्याख्यायिनी भवेत् ॥७॥ वर्त्तमानापि विप्रेन्द्र प्रत्याख्यातापि वा सदा ॥ न दैवतं सम्प्रयाति पत्युरन्यं कदाचन ॥ ८ ॥ सा न मृत्युमुखं याति एवं या स्त्री पतिव्रता ॥ एवं या तु भवेन्नित्यं भर्तुः प्रियहिते रता ॥ ९ ॥ अनुवृत्तभावेन भर्त्तारमनुगच्छति ॥ सा तु मृत्युमुखद्वारं न गच्छेद्ब्रह्मसम्भव ॥ १० ॥ एष माता पिता बन्धुरेष मे दैवतं परम् ॥ एवं शुश्रूषते या तु सा मां विजयते सदा ॥११॥ पतिव्रता तु या साध्वी तस्यां चाहं कृताञ्जलिः ॥ भर्त्तार मनुयायन्ती भर्त्तारमनुगच्छती ॥ १२ ॥ भर्त्तारमनुशोचन्ती मृत्युद्वारं न पश्यति ॥ गीतवादित्रनृत्यानि प्रेक्षणीयान्यनेकशः ॥ १३ ॥ न शृणोति न पश्येद्या मृत्युद्वारं न पश्यति ॥ क्लान्तीं च तिष्ठती वापि कुर्वन्ती वा प्रसाधनम् ॥ १४ ॥ नान्यं या मनसा पश्येन्मृत्युद्वारं न पश्यति ॥ देवता अर्चयन्तं वा भुज्यमानमपि द्विज ॥ १५ ॥ पतिं न त्यजते चित्तान्मृत्युद्वारं न पश्यति ॥ भानौ चानुदिते वापि उत्थाय

च तपोधन ॥ १६ ॥ गृहं मार्जयते नित्यं मृत्युद्वारं न पश्यति ॥ चक्षुर्देहश्च भावश्च यस्या नित्यं सुसंवृतम् ॥ १७ ॥ शौचाचारसमायुक्ता सापि मृत्युं न पश्यति॥ भर्तुर्मुखं प्रपश्येद्या भर्तुश्चित्तानुसारिणी ॥ १८ ॥ वर्त्तते च हिते भर्तुर्मृत्युद्वारं न पश्यति ॥ एवं कीर्त्तिमतां लोके दृश्यन्ते दिवि देवताः ॥ १९ ॥ मानुषाणां च भार्या वै तत्र देशे तु दृश्यते ॥ कथितैव पुरा विप्र आदित्येन पतिव्रता ॥ २० ॥ मया तस्मात्तु विप्रर्षे यथावृत्तं यथाश्रुतम् ॥ गुह्यमेतत्ततो दृष्ट्वा पूजयामि पतिव्रताः ॥ २१ ॥ इति श्रीवराहपुराणे संसारचक्रे पतिव्रतामाहात्म्यं नाम नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥ पुनः पतिव्रतामाहात्म्यवर्णनम् ॥ नारद उवाच ॥ रहस्यं धर्ममाख्यानं त्वयोक्तं तु महायशः ॥ स्त्रीणां माहात्म्यमुद्दिश्य भास्करस्य मतं यथा ॥ १ ॥ इदं हि सर्वभूतेषु परं कौतूहलं मम ॥ तदहं श्रोतुमिच्छामि कथयस्व महातपाः ॥ २ ॥ ये नरा दुःखसन्ततास्तपस्तीव्रं समाश्रिताः ॥ नानाव्रतशतोपायैः सुखहेतोः महाप्रभ ॥ ३ ॥ मनसा निश्चितात्मानस्त्यक्त्वा सर्वप्रियाप्रियम् ॥ कांक्षन्ते बहवः केचित्केनचिद्विनिहन्यते॥४॥ श्रुता लोके श्रुतिस्तात श्रेयोधर्मा हि नित्यशः॥सम्यक्कृच्छ्रश्रितस्याथ कथं पापे मतिर्भवेत्॥५॥ कस्येतच्चेष्टितं तात कर्त्ता कारयितापि वा ॥ कः कर्षति जगच्चैको भूतग्रामं चतुर्विधम् ॥ ६ ॥ कं वा द्वेषं पुरस्कृत्य मतिस्तस्य प्रवर्त्तते ॥ सुखदुःखादि लोकेऽस्मिन्प्रकरोति सुदारुणम् ॥ ७ ॥ यद्येवं तु मया गुह्यं दुर्विज्ञेयं सुरैरपि ॥ शक्यं श्रोतुं महाराज तदाख्याहि तपोधन ॥ ८ ॥ नारदेनैवमुक्तस्तु धर्मराजो महामनाः ॥ विनयात्प्रार्थितं वाक्यमिदमाह महामुनिम् ॥ ९ ॥ यम उवाच ॥ देवर्षे श्रूयतां पुण्यं यद्भवीषि महामुने ॥ त्वदुक्तया मे कथयतः शृणुष्वावहितोऽनघ ॥ १० ॥ नकश्चिद्दृश्यते लोके कर्त्ता कारयितापि वा ॥ यद्वै परमधर्मात्मन् यस्मिन्कर्म प्रतिष्ठितम् ॥ ११ ॥ यस्य वै कीर्त्यते नाम येन चाज्ञाप्यते जगत् ॥ व्यवहराम्यहं वचश्चाहं यः करोति स्वयंकृतम् ॥ १२ ॥ दिव्येऽस्मिन् सदसि ब्रह्मन् ब्रह्मर्षिगणसंवृते ॥ यथाश्रुतं यथादृष्टं कथयिष्याम्यहं विभो ॥१३॥ स्वकर्म भुज्यते तात सम्भूतेयंकृतं स्वयम् ॥ आत्मानं पातयत्यात्मा किञ्चित्कर्म च कारयेत् ॥ १४॥ वायुना भाविता संज्ञा संसारे सा दृढीकृता ॥ तामेव भजते जन्तुः सुकृतं वाथ दुष्कृतम् ॥ १५ ॥ अभिघातामिभूतस्तु आत्मनात्मानमुद्धरेत् ॥ आत्मा शत्रुश्च बन्धुश्च न कश्चिद्बन्धुरात्मनः ॥ १६ ॥ बन्धुं बन्धुपरिक्लेशं

निर्मितं पूर्वकर्मभिः ॥ जगत्यामुपभुङ्क्ते वै जीवा योनिशतैरपि॥१७॥मिथ्याप्रवृत्तः शब्दोऽयं जगद्भ्रमति सर्वशः ॥ यावत्तत्कुरुते कर्म तावत्कर्म स्वयंकृतम् ॥ १८ ॥ यथा यथा क्षयं याति ह्यशुभं पुरुषस्य वै ॥ तथा तथा शुभा बुद्धिर्मनुजस्य प्रवर्तते ॥ १९ ॥ संसारे प्राप्तदोषस्य जायमानस्य देहिनः ॥ पततां च गतो भावः पापकर्मक्षयेन तु ॥ २० ॥ शुभाशुभकरीं बुद्धिं लभते पौर्वदेहिकीम् ॥ दुष्कृतैः कर्मभिर्देही शुभैर्यो स्वयमर्जितैः॥क्रैशक्षयं पापहरं शुभं कर्म करोत्यथ ॥२१॥ शुभाशुभं नरः प्राप्य कर्माकर्म तथैव च॥ विवृते विमले कर्मण्यमरेषु महीयते॥२२॥ स्वर्गः शुभफलप्राप्तिर्नैरयः पापसंभवः ॥ नैव कश्चित्प्रदाता च नापहर्ता प्रदृश्यते ॥ २३ ॥ नारद उवाच ॥ यद्येवं स्वकृतं कर्म समन्वेति शुभाशुभम् ॥ शुभस्येह भवेद्बुद्धिरशुभस्य क्षयोऽपि वा ॥ २४ ॥ मनसा कर्मणा वापि तपसा चरितेन वा ॥ यथा न रोहते जन्तुस्तथा त्वं वक्तुमर्हसि ॥ २५ ॥ यम उवाच ॥ इदं पुण्यं पवित्रं च ह्यशुभानां शुभप्रदम् ॥ कीर्तयिष्यामि ते सम्यक्पापदोषक्षयं सदा ॥ २६ ॥ प्रणम्य शिरसा सम्यक्पापघ्नकराय च ॥ कर्तृणे जगतो नित्यं विश्वस्य जगतो ह्यहम् ॥२७॥ येन सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम् ॥ अनादिमध्य निधनं दुर्विज्ञेयं सुरासुरैः ॥ २८ ॥ यः समः सर्वभूतेषु जितात्मा शान्तमानसः ॥ स पापेभ्यो विमुच्येत ज्ञानवान्सर्ववेदवित् ॥२९ ॥ तत्त्वार्थ वेत्ति यः सम्यक्पुरुषं प्रकृतिं तथा ॥ ज्ञात्वा वा यो न मुह्येत पदं प्राप्नोति शाश्वतम् ॥३०॥ गुणागुणपरिज्ञाता ह्यक्षयस्य क्षयस्य च ॥ ध्याने नैव ह्रासमूढः स पापेभ्यः प्रमुच्यते ॥३१॥ स्वदेहे परदेहे च सुखदुःखेन नित्यशः ॥ विचारज्ञो भवेद्यस्तु स मुच्येतेनसा ध्रुवम् ॥३२॥ अहिंस्रः सर्वभूतेषु तृष्णाक्रोधविवर्जितः ॥ शुभन्यायः सदा यश्च स पापेभ्यः प्रमुच्यते ॥ ३३ ॥ प्राणायामैश्च निर्गृह्य त्वधः सन्धारणानि च ॥ व्यय स्थितमना यस्तु स पापेभ्यः प्रमुच्यते ॥ ३४ ॥ निराशः सर्वतस्तिष्ठेद्दिग्यथेषु न लोलुपः॥परीतात्मा त्यजेत्प्राणान्सर्वपापात्प्रमुच्यते ॥३५॥ श्रद्दधानो जितक्रोधः परद्रव्यविवर्जकः ॥ अनसूयश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते ॥ ३६ ॥ गुरुशुश्रूषया युक्तस्त्वहिंसानिरतश्च यः ॥ अशुद्रशीलस्तु नरः स पापेभ्यः प्रमुच्यते ॥३७॥ प्रशस्तानि च यः कुर्यादप्रशस्तानि वर्जयेत् ॥ मङ्गले परमो यश्च स पापेभ्यः प्रमुच्यते ॥३८॥ योऽभिगच्छति तीर्थानि विशुद्धेनान्तरात्मना ॥ पापादुपरतो नित्यं स पापेभ्यः प्रमुच्यते ॥ ३९ ॥ उत्थाय ब्राह्मणं गच्छेद्व्रतो भक्त्या

समान्वितः ॥ अभिगम्य प्रदानेन स पापेभ्यः प्रमुच्यते ॥ ४० ॥ नारद उवाच ॥ एतच्छ्रेयो हितं चैव सर्वेषां वै परन्तप ॥ उपपन्नं च युक्तं च तत्त्वया समुदाहृतम् ॥ ४१ ॥विविधैः कारणोपायैः सम्यक्तत्त्वार्थदर्शितैः ॥ संशयोऽभून्मम पुरा स त्वया नाशितः प्रभो ॥ ४२ ॥ ततोऽप्यल्पतरश्चेत्स्यादुपायो योगवित्तम ॥ कथ्यतां मे महाभाग येन पापं प्रणश्यति ॥४३॥ दुष्करं पूर्वमुक्तं हि योगधर्मस्य साधनम् ॥ पापापहरणं लोके यदल्पत्सुखसाधनम् ॥ ४४ ॥ अल्पोपायकरं चैव सुखोपायं च सर्वशः ॥ येन पापकृतान्दोषानपोहति सुदारुणान्॥४५॥ आत्मायत्ताश्च ये नित्यं न च विस्तारविस्तरः ॥ गुणैश्च विविधैर्युक्ता इहलोके परत्र च ॥ ४६ ॥ कर्मणामशुभानां च विविधोत्पत्तिजन्मनाम् ॥ यः समर्थः स्फोटयितुं तन्मे ब्रूहि महातपाः ॥ ४७ ॥ यम उवाच ॥ यथा स भगवानाह धर्ममेतं प्रजापतिः ॥ तदहं भावयिष्यामि नमस्कृत्य स्वयम्भुवम् ॥ ४८ ॥ लोकानां श्रेयसोऽर्थं तु पापानां तु विनाशनम् ॥ क्रियाकारनियोगं च प्रोच्यमानं निबोध मे ॥ ४९ ॥ कैवल्यमभिसम्पन्ने श्रद्दधानो भवेन्नरः ॥ अनन्यमानसः कुर्याद्यथा धर्मानुशासनम् ॥ ५० ॥ प्राप्नुयादीप्सितान्कामान्पापैर्मुक्तो यथासुखम् ॥ यः कुर्याद्धर्मसंयुक्तं विशुद्धेनान्तरात्मना ॥ ५१ ॥ यस्तु कारयते रूपं शिशुमारं प्रजापतिम् ॥ दृष्ट्वा नमस्येत्प्रयतः स पापेभ्यः प्रमुच्यते ॥ ५२ ॥ यदा तस्य शरीरस्थं सोमं पश्येत्समाहितः ॥ महापातकनाशस्तु तदा तस्य विधीयते ॥ ५३ ॥ ललाटे तूत्थितं दृष्ट्वा मुच्यते च स पातकैः ॥ कण्ठस्थं पातकैः सर्वैर्हृदिस्थं च कृताकृतैः ॥ ५४॥ मनसा कर्मणा वाचा यत्किंचित्कलुषं कृतम् ॥ उदरस्थं तु तं दृष्ट्वा मुच्यते नात्र संशयः ॥ ५५ ॥ वाङ्मनोभिः कृतानां तु पापानां विप्रमोक्षणम् ॥ यदा लांगलकण्ठे तु स्थितं पश्येद्विधाकरम् ॥ ५६ ॥ तदा स दुष्कृतान्सर्वान्विनाशयति मानवः ॥ यदा सोमं गुरुं सर्वं यः कुर्याच्तु प्रदक्षिणम् ॥५७॥ ध्यायेत ह्यक्षयं यस्तु स पापेभ्यः प्रमुच्यते ॥ भृगुर्बुधः शनैश्चारो लोहिताङ्गश्च वीर्यवान् ॥५८॥ सौम्यरूपो यदा चन्द्रः कुरुते च प्रदक्षिणाम् ॥ हृदि कृत्वा तु तत्पापं यो ध्यायेदक्षरं शुचि ः॥५९॥ तदा निर्मलतां याति चन्द्रमाः शारदो यथा ॥ प्राणायामशतं कृत्वा सर्वपापैः प्रमुच्यते ॥ ६० ॥ जघनस्थं शुचिर्दृष्ट्वा नरश्चन्द्रमसं मुने ॥ नमस्येत्प्रयतो भूत्वा सर्वपापैः प्रमुच्यते ॥ ६१ ॥ आर्द्रस्थमार्द्रकर्मा तु ध्यात्वा चाष्टशताक्षरम् ॥ यदा चन्द्रश्च सूर्यश्च द्वावन्योऽन्यं प्रप

स्यतः ॥ ६२ ॥ सम्पूर्णो विमलो सम्यग्भ्राजमानो स्वतेजसा ॥ कृत्वा हृदि तथा पापं यो ध्यायेत्परमव्ययम् ॥ ६३ ॥ वामनं ब्राह्मणं दृष्ट्वा वाराहं च जलोत्थितम् ॥ धरणी चोद्धृता येन सिंहं चापि महामुने ॥ ६४ ॥ नमस्येद्वै पथोभक्षः स पापेभ्यः प्रमुच्यते ॥ प्राणायामं च यः कुर्यात्सोऽपि पापात्प्रमुच्यते ॥ ६५ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे संसारचक्रे पापनाशोपायनिरूपणं नाम दशाधिकद्विशततमोऽध्यायः ॥२१०॥ पुनः पापनाशोपायवर्णनम् ॥ ऋषिपुत्र उवाच॥एतच्छ्रुत्वा शुभं वाक्यं धर्मराजस्य नारदः ॥ इदं भावेन भक्त्या च पुनर्वचनमब्रवीत् ॥ १ ॥ नारद उवाच ॥ समः सर्वेषु भूतेषु स्थावरेषु चरेषु च ॥ धर्मराज महाबाहो पितृतुल्यपराक्रम ॥ २ ॥ ब्राह्मणानां हितार्थाय यद्वक्तं मे प्रदक्षिणम् ॥ इदं श्रेयःसमाख्यानं श्रुतं श्रुतपरं पदम् ॥ ३ ॥ त्रयो वर्णा महाभाग यज्ञसामान्यभागिनः ॥ शूद्रा वेदपवित्रेभ्यो ब्राह्मणेस्तु बहिष्कृताः ॥ ४ ॥ यथैव सर्वसमता तव भूतेषु मानद ॥ तथैव तेषामपि हि श्रेयो वाच्यं महामते ॥ ५ ॥ यथा कर्म हितं वाक्यं शूद्राणामपि कथ्यताम् ॥ यम उवाच ॥ अहं ते कथयिष्यामि चातुर्वर्ण्यस्य नित्यशः ॥ ६ ॥ यद्धितं धर्मयुक्तं च नित्यं भवति सुव्रत ॥ केवलं श्रुतिसंयोगाच्छ्रद्धया नियमेन च ॥ ७ ॥ करोति पापनाशार्थमिदं वक्ष्यामि तच्छृणु ॥ गावः पवित्रा मङ्गल्या देवानामपि देवताः ॥ ८ ॥ यस्ताः शुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते ॥ सौम्ये मुहूर्ते संयुक्ते पंचगव्यं तु यः पिबेत् ॥ ९ ॥ यावज्जीवकृतात्पापात्तत्क्षणादेव मुच्यते ॥ लांगूलेनोद्धृतं तोयं सूर्म्या गृह्णाति यो नरः ॥१०॥ सर्वतीर्थफलं प्राप्य स पापेभ्यः प्रमुच्यते ॥ प्रस्रवेण च यः स्नायाद्दोहिन्यां मानवे द्विज ॥ ११ ॥ सर्वपापकृतान्दोषान्दुहत्याशु न संशयः ॥ धेनुस्तनाद्विनिष्क्रान्तां धारां क्षीरस्य यो नरः ॥ १२ ॥ शिरसा प्रतिगृह्णाति स पापेभ्यः प्रमुच्यते ॥ ब्राह्मणस्तु सदा स्नातो भक्त्या परमया युतः ॥१३॥ नमस्येत्प्रयतो भूत्वा स पापेभ्यः प्रमुच्यते ॥ उदयात्रिःसृतं सूर्यं भक्त्या परमया युतः ॥ १४ ॥ नमस्येत्प्रयतो भूत्वा स पापेभ्यः प्रमुच्यते ॥ दध्यक्षताञ्जलीभिस्तु त्रिभिः पूजयते शुचिः ॥१५॥ तस्य भानुः प्रसन्नश्च ह्यशुभं यत्समर्जितम् ॥ तस्य भानुः स संदह्य दूरीकुर्यात्सदा द्विज ॥१६॥ तावकं दधिमिश्रं तु पात्रे ओदुम्बरे स्थितम् ॥ सोमाय पौर्णमास्यां हि दत्त्वा पापैः प्रमुच्यते ॥१७॥ अरुन्धतीं ध्रुवं चैव तथा सर्वान्महामुनिन् ॥ अभ्यर्च्य वेदविधिना तेभ्यो दत्त्वा च

तावकम् ॥ १८ ॥ एकाग्रमानसो भूत्वा यो नमस्येत्कृताञ्जलिः ॥ किल्बिषं तस्य वै सर्वं तत्क्षणादेव नश्यति ॥ १९ ॥ द्विजं शुश्रूषते यस्तु तर्पयित्वातिभक्तितः ॥ नमस्येत्प्रयतो भूत्वा स पापेभ्यः प्रमुच्यते ॥ २० ॥ विष्णुवेधु च योगेषु शुचिर्दत्त्वा पयो नरः ॥ तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ॥ २१ ॥ प्राचीनाग्राकुशान् कृत्वा स्थापयित्वा वृषं नरः ॥ द्विजैः सह नमस्कृत्य सर्वपापैः प्रमुच्यते ॥ २२ ॥ दक्षिणावर्त्तसंव्येन कृत्वा प्राक्स्रोतसं नदीम् ॥ कृत्वाऽभिषेकं विधिवत्ततः पापात्प्रमुच्यते ॥ २३ ॥ दक्षिणावर्त्तशङ्खेन कृत्वा चैव करे जलम् ॥शिरसा तद्गृहीत्वा तु विप्रो ह्यष्टमनाः शुचिः ॥ २४ ॥ तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ॥प्राक्स्रोतसं नदीं गत्वा नाभिमात्रजले स्थितः॥२५॥ स्नात्वा कृष्णतिलैर्मिश्रा दद्यात्सप्ताञ्जलीर्नरः ॥ प्राणायामत्रयं कत्वा ब्रह्मचारी जितेन्द्रियः ॥ २६ ॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥ अच्छिद्रपद्मपत्रेण सर्वरत्नोदकेन तु ॥ २७ ॥ त्रिधा यस्तु नरः स्नायात्सर्वपापैः प्रमुच्यते ॥ अन्यच्च ते प्रवक्ष्यामि गुह्याद्गुह्यतरं मुने ॥ २८ ॥ कार्त्तिकेऽमलपक्षे तु स्मृता द्वेकादशी तिथिः ॥मुक्तिमुक्तिप्रदा या तु नाम्ना ख्याता प्रबोधिनी ॥ २९ ॥ या सा विष्णोः परा मूर्त्तिरव्यक्तानेकरूपिणी ॥ सा क्षिता मानुषे लोके द्वादशी मुनिपुङ्गव ॥ ३० ॥ ये उपोष्यन्ति विधिवन्नारायणपरायणाः ॥ न तेषामशुभं किञ्चिज्जन्मकोटिकृतं मुने ॥ ३१ ॥ एकादशीं समाश्रित्य पुरा पृष्टो महेश्वरः ॥ वाराहरूपी धरया सर्वलोकहिताय वै ॥ ३२ ॥ धरण्युवाच ॥ अस्मिन्कलियुगे घोरे नराः पापरताः प्रभो ॥ ब्रह्मस्वहरणे युक्ता तथा ब्राह्मणघातकाः ॥ ३३ ॥ गुरुद्रोहरता देव मित्रद्रोहरतास्तथा ॥ स्वामिद्रोहरताश्चैव परदाराभिशंकाः ॥ ३४ ॥ परद्रव्यापहरणे संसक्ताश्च सुरेश्वर ॥ अभक्ष्यभक्षणरता वेदब्राह्मणनिन्दकाः ॥ ३५ ॥ दाम्भिका भिन्नमर्यादा नायमस्तीति वादिनः ॥ असत्प्रतिग्रहे सक्ता अगम्यागमने रताः ॥ ३६ ॥ एतैश्चान्यैश्च पापैश्च संसक्ता ये नरा विभो ॥ किमासाद्य गतिर्देव तेषां वद सुरेश्वर ॥ ३७ ॥ श्रीवराह उवाच ॥ साधु देवि महाभागे यत्पृष्टोऽहं वरानने ॥ रहस्यं ते प्रवक्ष्यामि लोकानां हितकाम्यया ॥३८ ॥ महापातकयुक्ता ये नराः सुकृतवर्जिताः ॥ तेषां मया हितार्थाय निर्मिता तच्छृणुष्व मे ॥ ३९ ॥ या सा विष्णोः परा शक्तिरव्यक्तानेकरूपिणी ॥ सा मर्त्ये निर्मिता भूमे द्वादशीरूपधारिणी ॥ ४० ॥ तामुपोष्य नरा भद्रे महापापरताश्च ये ॥ पुण्यपापविनिर्मुक्ता गच्छन्ति पदमव्ययम्॥४१॥

उपायोऽतःपरो नान्यो विद्यते हि वसुन्धरे ॥ एकादशीं विना येन सर्वपापक्षयो भवेत् ॥४२॥ यथा शुक्ला तथा कृष्णा ह्युपोष्या सा प्रयत्नतः ॥ शुक्ला भक्तिप्रदा नित्यं कृष्णा मुक्तिं प्रयच्छति॥४३॥तस्मात्सर्वप्रयत्नेन कर्त्तव्या द्वादशी सदा॥यदीच्छेद्वैष्णवं लोकं गन्तुं वै भूतधारिणि॥४४॥ मनसा वचसा चैव कर्मणा समुपार्जितम् ॥ पापं मासकृतं पुंसां दहत्येकादशी कृता ॥ ४५ ॥ दहन्तीह पुराणानि भूयोभूयो वरानने ॥ न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे ॥ ४६ ॥ यदीच्छथ नरा गन्तुं तद्विष्णोः परमं पदम् ॥ न भोक्तव्यं न भोक्तव्यं तदा केशववासरे॥४७॥ ऊर्ध्ववाहुर्विरौम्येष प्रलापं मे शृणुष्व तम् ॥ आराधयस्व विश्वेशमेकादश्यामतान्द्रितः ॥ ४८ ॥ न शक्नेन पिवेत्तोयं न हन्यान्मत्स्यसूकरौ ॥ एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ ४९ ॥ स ब्रह्महा सुरापश्च स स्तेयी गुरुतल्पगः ॥ एकादश्यां तु यो भुंक्ते पक्षयोरुभयोरपि ॥५०॥ किं तेन न कृतं पापं दुर्वृत्तेनात्मघातिना ॥ एकादश्यां विशालाक्षि भुक्तं येन विजानता ॥५१॥ एकादशीं च यः शुक्लामसमर्थ उपोषितुम् ॥ तदा नक्तं प्रकर्त्तव्यं तथाऽयाचितमेव वा ॥ ५२ ॥ एकभक्तेन दानेन कर्त्तव्यं द्वादशीव्रतम् ॥ न करोति यदा भूमे व्रतं वा दानमेव वा ॥ ५३॥ महापातकभागी स्यात्सुगतिं नाप्नुयात्कचित् ॥ उपवासासमर्थानां तथैव पृथुलोचने ॥ ५४ ॥ एका सा द्वादशी पुण्या उपोष्या सा प्रबोधिनी ॥ तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ॥ ५५ ॥ प्राप्नोति सकलं चैतद्वादशद्वादशीफलम् ॥ पूर्वाभाद्रपदायोगे सैव या द्वादशा भवेत् ॥ ५६ ॥ अतीव महती तस्यां सर्वं कृतमिहाक्षयम् ॥ उत्तराभाद्रसहिता यदि सैकादशी भवेत् ॥ ५७ ॥ तदा कोटिगुणं पुण्यं केशवाल्लभते फलम् ॥ सकृदेवेऽर्चिते तस्यां लभते भूतधारिणि ॥ ५८ ॥ यथा प्रबोधिनी पुण्या तथा यस्यां स्वपेद्धरिः ॥ उपोष्या हि महाभागे त्वनन्तफलदा हि सा ॥ ५९ ॥ शयने बोधने चैव हरेस्तु परिवर्त्तने ॥ उपोष्यैव विधानेन नरो निर्मलतां व्रजेत् ॥ ६० ॥ तस्मात्सर्वप्रयत्नेन द्वादशीं समुपोषयेत् ॥ यदीच्छेत्तु विशालाक्षि शाश्वतीं गतिमात्मनः ॥ ६१ ॥ एकादशी सोमयुता कार्त्तिके मासि भामिनि ॥ उत्तराभाद्रसंयोगे अनन्तफलदा हि सा ॥ ६२ ॥ तस्यां यत्क्रियते भद्रे तदनन्तगुणं स्मृतम् ॥ एकादशी भौमयुता यदा स्याद्भूतधारिणि ॥ ६३ ॥ स्नात्वा देवं समभ्यर्च्य प्राप्नोति परमं फलम् ॥ प्राप्नोति सकलं चैव द्वादशद्वादशीफलम् ॥ ६४ ॥

जलपूर्णं तथा कुंभं स्थापयित्वा विचक्षणः ॥ पञ्चरत्नसमोपेतं घृतपात्रयुतं तथा ॥ ६५ ॥ तस्योपरि न्यसेन्मत्स्यस्वरूपं तु जनार्दनम् ॥ निष्कमात्रसुवर्णेन घटितं तु वरानने ॥ ६६ ॥ पंचामृतेन संस्नाप्य कुंकुमेन विलेपितम् ॥ पीतवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ॥ ६७ ॥ पूजयेत् कमलैर्देवि मद्भक्तः संयतेन्द्रियः ॥ मत्स्यं कूर्मं वराहं च नरसिंहं च वामनम् ॥६८॥ रामं रामं च कृष्णं च बुद्धं चैव च कल्किनम् ॥ एवं दशावतारांश्च पूजयेद्भक्तिसंयुतः ॥ ६९ ॥ पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि ॥ संपूज्यैवमलङ्कारैर्वैविधैरुपशोभितम् ॥ ७० ॥ रात्रौ चोत्थापनं कार्यं देवदेवस्य सुव्रते॥ प्रभाते विमले स्नात्वा भक्त्या संपूज्य केशवम्॥७१॥ पुष्पधूपादिनैवेद्यैः फलैर्नानाविधैः शुभैः॥ततस्तु पूजयेद्विद्वानाचार्यं भक्तिसंयुतः ॥७२॥ अलङ्कारोपहारैश्च वस्त्राद्यैश्च स्वशक्तितः ॥ पूजयित्वा विधानेन तं देवं प्रतिपादयेत् ॥ ७३ ॥ जगदादिर्जगद्रूपो जगदादिरनादिमान् ॥ जगदादिर्जगद्योनिः प्रीयतां मे जनार्दनः ॥ ७४ ॥ अनेनैव विधानेन कुर्याद्वैकादशीव्रतम् ॥ तस्य पुण्यं भवेद्यत्तु तच्छृणुष्व वसुन्धरे ॥ ७५ ॥ यदि वक्त्रसहस्राणां सहस्राणि भवन्ति तैः ॥ संख्यातुं नैव शक्यन्ते प्रवोधिन्यास्तथा गुणाः ॥ ७६ ॥ तथाप्युद्देशमात्रेण शक्त्या वक्ष्यामि तच्छृणु ॥ चन्द्रतारार्कसङ्काशमाधिष्ठायानुजीविभिः ॥ ७७ ॥ सहैव यानमागच्छेन्मम लोकं वसुन्धरे ॥ ततः कल्पसहस्रांते सप्तद्वीपेश्वरो भवेत् ॥ ७८ ॥ आयुरारोग्यसंपन्नो जन्मातीतो भवेत्ततः ॥ ब्रह्महश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ ७९ ॥ पापान्येतानि सर्वाणि श्रवणेनैव नाशयेत्॥८०॥ पठ्ये च धीमानधनोऽपि भक्त्या स्पृशेन्मनुष्य इह चिन्त्यमानः॥शृणोति भक्तस्य मतिं ददाति विकल्मषः सोऽपि दिवं प्रयाति ॥ ८१ ॥ दुःस्वप्नः प्रशममुपैति पठ्यमाने माहात्म्ये भवभयहारके नरस्य ॥ यः कुर्याद्भक्तवरमेतदव्ययाया बोधिन्याः किमुत फलं तु तस्य वाच्यम् ॥ ८२ ॥ ते धन्यास्ते कृताथांश्च तेरेव सुकृतं कृतम्॥तैरात्मजन्म सफलं कृतं ये व्रतकारकाः ॥ ८३ ॥ नारायणाच्युतानन्त वासुदेवेति यो नरः ॥ सततं कीर्त्तयेद्भक्त्या याति मल्लयतां प्रिये ॥ ८४ ॥ किं पुनः श्रद्धया युक्तः पूजयेन्मामनन्यधीः ॥ गुरूपदिष्टमार्गेण याति मल्लयतां नरः ॥ ८५ ॥ तस्य व ज्ञवराहस्य विष्णोरमिततेजसः ॥ प्रयाणं ये च कुर्वंति ते पूज्याः सततं सुरैः ॥८६॥ तस्मात् सुनिप्रतेभांव्यं वैष्णवं मार्गमास्पदम्॥दुर्लभं वैष्णवत्वं हि त्रिषु लोकेषु सुन्दरि॥८७॥ जन्मान्तरसहस्रेषु समाराध्य वृषध्वजम् ॥ वैष्णवत्वं लभेत्

कश्चित्सर्वपापक्षये सति ॥ ८८॥ पापक्षयमवाप्नोति चेश्वराराधने कृते ॥ ज्ञानमिच्छता रुद्रं पूजयेत्परमेश्वरम् ॥८९॥ मामाराध्य तथा याति तद्विष्णोः परमं पदम् ॥ वैष्णवा हि महाभागाः पुनान्ति सकलं जगत्॥९०॥संस्मृतः कीर्तितो वापि दृष्टः स्पृष्टोऽपि वा प्रिये ॥ पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया॥९१॥एतज्ज्ञात्वा तु विद्वद्भिः पूजनीयो जनार्दनः॥वेदोक्तविधिना भद्रे आगमोक्तेन वा सुधीः॥९२॥यम उवाच ॥ एतच्छ्रुत्वा महाभागा धरणी संशितव्रता ॥ समाराध्य जगन्नाथं विधिना तल्लयङ्गता ॥ ९३ ॥ अतो यत्नेन वै साध्यं वैष्णवत्वं विपश्चिता ॥ ये वैष्णवा महात्मानो विष्णुपूजनतत्पराः ॥ ९४॥ तेषां नैवास्त्ययं लोको यान्ति तत्परमं पदम्॥ये सकृद्वादशीमेतामुपोष्यांते विधानतः ॥९५॥ प्रबोधनाख्यां सुधियस्ते यांति परमं पदम् ॥ न यमं यातनादण्डाञ्नरकं न च किङ्करान् ॥९६ ॥ पश्यंति द्विजशार्दूल इति सत्यं मयोदितम् ॥ एतत्ते सर्वमाख्यातं यथादृष्टं यथाश्रुतम् ॥९७॥ कथितं मे महाभाग यत्त्वया परिपृच्छितम्॥स्वयंभुवा यथा प्रोक्तं गुह्याख्यानं महामुने ॥९८॥ तत्ते सर्वं समासेन व्याख्यातं धर्मवत्सल ॥ ९९ ॥ इति श्रीवराहपुराणे पापनाशोपायवर्णनं नामैकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥

अथ संसारचक्रोपाख्यानं प्रबोधनीयवर्णनम् ॥ नारद उवाच ॥ साधु साधु महाराज सर्वधर्मविदां वर ॥ त्वया तु कथिता दिव्या कथेयं धर्मसंहिता ॥१॥ अतोऽहमपि सुप्रीतस्तव धर्मपथे स्थितः ॥ तव वाक्याद्विनिस्सृतानि प्रोक्तानि च श्रुतानि च ॥२॥ त्वयाहं चैव राजेन्द्र पूजितश्च विशेषतः ॥ गच्छामि त्वरितो लोकान्यत्र मे रमते मनः ॥ ३ ॥ स्वस्ति तेऽस्तु महाराज त्वत्कम्पो भव सुव्रत ॥ एवमुक्त्वा ततो यातो नारदो मुनिसत्तमः ॥ ४ ॥ तेजसा द्योतयन्सर्वं गगनं भास्करो यथा ॥ विचचार दिवं रम्यां कामचारो महामुनिः ॥ ५॥ गते तस्मिंस्तु सुचिरं स राजा धर्मवत्सलः ॥ मां दृष्ट्वा सुमना विप्रा वाक्यैश्चित्रैरवन्दयत् ॥ ६ ॥ कृत्वा पूजां च मे युक्तां प्रियमुक्त्वा च सुव्रत ॥ विसर्जयामास विभुः सुप्रीतो नांतरात्मना ॥ ७ ॥ एतद्वः कथितं विप्रास्तस्य राज्ञः पुरोत्तमे ॥ यथा दृष्टं श्रुतं चैव यथा चेहागतो ह्यहम् ॥८॥ वैशंपायन उवाच ॥ तस्य तद्वचनं श्रुत्वा हृष्टपुष्टास्तपोधनाः ॥ केचिद्वेखानसास्तत्र केचिदाम्बरिणस्तथा ॥ ९ ॥ साधु साधुरिति चैवोक्त्वा विस्मयोत्फुल्ललोचनाः ॥ यायावरास्तथा चान्ये वानप्रस्थास्तथापरे ॥१०॥ शालीनाश्च तथा केचित्कापोतीं वृत्तिमास्थिताः ॥ तथा चान्ये जगुर्वृत्तिं सर्वभूतदयां शुभाम् ॥११॥

शिलेंच्छाश्च तथैवान्ये काष्ठान्ताश्च महौजसः ॥ अपाकपाचिनः केचित्पाकिनश्च क्वचित्पुनः ॥ १२ ॥ नानाविधिधराः केचिच्चित्तात्मानस्तु केचन ॥ स्थानमौनव्रताः केचित्तथान्ये जलशायिनः ॥ १३ ॥ तथोर्द्धशायिकाश्चान्ये तथान्ये मृगचारिणः ॥ पंचाग्नयस्तथा केचित् केचित्पर्णफलाशिनः ॥१४ ॥ अभ्रभक्षा वायुभक्षाश्च तथान्ये शाकभक्षिणः ॥ अतोऽन्येऽप्यतितीव्रं वै तपश्चैव प्रपेदिरे ॥ १५॥ तपसोऽन्यन्न चास्तीति चिन्तयित्वा पुनः पुनः ॥जन्मनो मरणाच्चैव केचिद्धीरा महर्षयः ॥ १६ ॥ त्यक्त्वा धर्ममधर्मं च शाश्वतीं धियमास्थिताः ॥ श्रुत्वा चैव कथामेतामृषयो दिव्यवर्चसः ॥ १७॥ जगृहुर्नियमांस्तांस्तान्भयहेतोरनिन्दिताः ॥ नाचिकेतोऽपि धर्मात्मा पुत्रो दृष्ट्वा तपोधनम् ॥ १८ ॥ प्रीत्या परमया युक्तो धर्ममेवान्वचिन्तयत् ॥ वेदार्थममितं विष्णुं शुद्धं चिन्मयमीश्वरम् ॥ १९ ॥ चिन्तयामास धर्मात्मा तपः परममास्थितः ॥ इदं तु परमाख्यानं भगवद्भक्तिकारकम् ॥ २० ॥ शृणुयाच्छ्रावयेद्वापि सर्वकामानवाप्नुयात् ॥ २१ ॥ इति श्रीवराहपुराणे प्राणितिहासे संसार चक्रोपाख्याने प्रबोधनीयं नाम द्व्यधिकद्विशततमोऽध्यायः ॥ २१२. ॥ अथ गोकर्णेश्वरमाहात्म्यम् ॥ सूत उवाच ॥ पुरा देवैर्विनिर्हते संग्रामे तारकामये ॥ अत्युच्छ्रिते प्रतिबले दानवानां बले तथा ॥ १ ॥ सहस्राक्षे लब्धपदे क्षीणशत्रौ गतास्पदे ॥ सम्यक्प्रसूतिमापन्ने त्रैलोक्ये सचराचरे ॥ २ ॥ शृङ्गे चैवाचलेन्द्रस्य मेरोः सर्वहिरण्मये ॥ मणिविद्रुमविद्धे च विपुले पंकजासने ॥ ३ ॥ सुखोपविष्टमेकाग्रं स्थिरचित्तं कृतेक्षणम् ॥ निवृत्तकार्यं मुदितं सूर्यवैश्वानरद्युतिम् ॥ ४ ॥ प्रणम्य मूर्ध्ना चरणावुपगृह्य समाहितः ॥ ब्रह्माणं परिपप्रच्छ कुमारो नति पूर्वकः ॥ ५ ॥ सनत्कुमार उवाच ॥ भगवञ्छ्रोतुमिच्छामि पुराणमृषिसंस्तुतम् ॥ पुराणं तु महाभाग त्वत्तस्तत्त्वविदां वर ॥६ ॥ कथमुत्तर गोकर्णं दक्षिणं च कथं विभो॥शृङ्गेश्वरस्य परमं कथं सम्यक्प्रतिष्ठितम्॥७॥ क्षेत्रस्य किं प्रमाणं स्यात्किञ्च तीर्थफलं स्मृतम् ॥कथं पशुपतिस्तत्र भगवान्मृगरूपधृक् ॥ ८ ॥ सर्वैस्त्वत्प्रमुखैर्देवैः कथमासादितं पुनः ॥ मृगरूपं कथं चास्य शरीरं क्व प्रतिष्ठितम् ॥ ९ ॥ यथा यत्र च यस्तत्र विधिः सम्यगनुष्ठितः ॥ तत्सर्वं निखिलेनाशु ब्रूहि मे वाग्विदां वर ॥ १० ॥ एवमुक्तः स भगवान्ब्रह्मा ब्रह्मविदां वरः ॥ उवाच तस्मै पुत्राय गुह्यमेतत्पुरातनम् ॥ ११ ॥ ब्रह्मोवाच ॥ शृणु वत्स महाभाग यथातत्त्वं ब्रवीमि ते ॥ पुराणमेतद्ब्रह्मर्षे सरहस्यं यथाश्रुतम् ॥ १२ ॥

अस्ति भूधरराजस्य मन्दरस्योत्तरे शुचौ ॥ मुञ्जवान्नाम शिखरो नन्दनोपवनद्युतिः ॥ १३ ॥ वज्रस्फटिकपाषाणः प्रवालांकुरशाद्वलैः ॥ नीला मलशिलावर्णो गुहानिर्झरकन्दरः ॥ १४ ॥ विचित्रकुसुमोपेतैर्लतामञ्जरीधारिभिः ॥ रेजे यः प्रांशुभिः शृङ्गैरुल्लिखद्भिरिवाम्बरम् ॥ १५ ॥ दर्पं स्तत्राधिकं रेजुर्नानाधातुपरिस्रवैः ॥ शिलीन्ध्रकुसुमोपेताश्चित्रिता इव सर्वतः ॥ १६ ॥ तेऽत्र केतकिखण्डाश्च कुंदखंडाश्च पुष्पिताः ॥ उन्मीलिता इवाभान्ति घातकीवनराजिभिः ॥१७॥ भिन्नेन्द्रनीलविमलैर्धौतैः प्रस्रवणाम्बुभिः ॥ चित्रैः कुसुमसंछन्नैः शिलाप्रस्तरविस्तरैः ॥१८॥ शक्रचाप निभैः रम्यैः कुबेरभवनद्युतौ ॥ तस्मिन्नगवरे रम्ये महोरगनिषेविते ॥ १९ ॥ क्रीडद्भिर्देवमिथुनैर्नृत्यद्भिश्चाप्सरोगणैः ॥ कूजद्भिः शिखिभिर्मत्तैः सेविते च नगोत्तमे ॥ २० ॥ कल्हारकुसुमोपेते हंससारससेविते ॥ प्रसन्नसलिलाकीर्णे स रोभिः फुल्लपंकजैः ॥२१॥ गजयूथानुकीर्णाभिर्जुष्टाभिर्मृगपक्षिभिः ॥ सेविताभिर्मुनिगणैः सरिद्भिरुपशोभिते ॥ २२ ॥ किन्नरोद्गीतकुहरे परपुष्टनिनादिते ॥ विद्याधरशताकीर्णे देवगन्धर्व सेविते ॥ २३ ॥ धारापातैश्च तोयानां विस्फुलिङ्गैः सहस्रशः ॥ प्रज्वालितेऽतुले शृङ्गे रम्ये हरितशाद्वले ॥ २४ ॥ सर्वर्तुकवनोद्याने पुष्पाकरसुशोभिते ॥ यज्ञकिम्पुरुषावासे गुह्यकानामथाश्रये ॥ २५ ॥ तस्मिन्गिरिवरे रम्ये सेवितव्ये सुशोभने ॥ धर्मारण्ये तपःक्षेत्रे मुनिसिद्धनिषेविते ॥ २६ ॥ वरदस्तत्र भगवान्स्थाणुर्नाम महेश्वरः ॥ सर्वामरगुरुर्देवो नित्यं सन्निहितः प्रभुः ॥ २७ ॥ भक्तानुकम्पी स श्रीमान्गिरीन्द्रसुतया सह ॥ स ह्यभ्यास्ते गिरिवरं पार्षदैश्च गुहेन च ॥ २८ ॥ विमानयायिनः सर्वे तं देवमजमव्ययम् ॥ आजग्मुः सेवितुं देवा वरेण्यमजमव्ययम् ॥ २९ ॥ अन्ये देवनिकायाश्च सेवितुं प्रपतन्ति तम् ॥ ततस्रेतायुगे काले नन्दी नाम महामुनिः ॥ ३० ॥ आरिराधयिषुः शर्वं तपस्तेपे सुदारुणम् ॥ ग्रीष्मे पंचतपास्तिष्ठेच्छिशिरे सलिलाश्रयः ॥ ३१ ॥ ऊर्ध्ववाहुर्निरालम्बस्तोयाऽनिलहुताशनैः ॥ त्रैतैश्च विविधैरुग्रै स्तपोभिर्नियमैस्तथा ॥ ३२ ॥ जपपुष्पोपहारैश्च कालेकाले मुनिः सदा ॥ शङ्करं विधिवद्भक्त्या सोऽर्चयद्विजपुङ्गवः ॥ ३३ ॥ उग्रेण तपसा त्मानं योजयामास सुव्रतः ॥ काष्ठभूतो यदा विप्रः कृशो धर्मसुसन्ततः ॥ ३४ ॥ क्षामोऽभूत्कृष्णवर्णश्च ततः प्रीतश्च शङ्करः ॥ सम्यगाराधितो भक्त्या नियमेन च तोषितः ॥ ३५ ॥ तदात्मदर्शनं प्रादात्स मुनेर्वृषभध्वजः ॥ उक्तवांश्च मुनिं शर्वश्चक्षुर्दिव्यं ददामि ते ॥ ३६ ॥ अदृश्यं

॥२३१॥

पश्य मे रूपं वत्स प्रीतोऽस्मि ते मुने ॥ यत्पश्यन्तीह विद्वांसो रूपमप्रतिमौजसम् ॥३७॥ सङ्ख्यसूर्यकिरणं ज्वालामालिनमूर्जितम् ॥बालार्कमण्डलाकारं प्रभामण्डलमण्डितम्॥३८॥जटाजूटतटाश्लिष्टं चन्द्रालंकृतशेखरम् ॥ जगदालोचनं श्रीमत्प्रदीप्तत्रितयेलोचनम् ॥३९॥ प्रादेशमात्रं रुचिरं शतशीर्षं शतोदरम्॥सहस्रबाहुचरणं सहस्राक्षिशिरोमुखम् ॥४०॥ अणीयसामणीयांसं बृहतां तु बृहत्तरम् ॥ अक्षमालापवित्राङ्गं कमण्डलुकरोद्यतम्॥४१॥॥ सिंहचर्माम्बरधरं व्यालयज्ञोपवीतिनम् ॥ दृष्ट्वा देवं महादेवं हृष्टरोमा महातपाः ॥४२॥ प्राञ्जलिः प्रणतो भूत्वाऽगृणाद्ब्रह्म सनातनम् ॥ नमो धात्रे विधात्रे च संभवे वरदाय च ॥ ४३ ॥ जगद्भोक्त्रे त्रिनेत्राय शंकराय शिवाय च ॥ भवाय भवगोप्त्रे च मुनये कृत्तिवासते ॥ ४४ ॥ नीलकण्ठाय भीमाय भूतभव्यभवाय च ॥ लम्बभ्रुवे कपालाय हरिनेत्राय मीढुषे ॥ ४५ ॥ कपर्दिने विशालाय सुजटकेशाय धीमते ॥ शूलिने पशुपतये विभवे स्थाणवे तथा ॥ ४६ ॥ गणानां पतये ब्रह्मे संक्षेप्त्रे भीषणाय च ॥ सौम्याय सौम्यतपसे भीमाय व्यम्बकाय च ॥ ४७ ॥ प्रेतावासनिवासाय रुद्राय वरदाय च ॥ कपालमालिने तस्मै हरिश्मश्रुधराय च ॥ ४८ ॥ भक्तप्रियाय सततं नमोऽस्तु परमात्मने ॥ एवं नन्दी भवं स्तुत्वा नमस्कृत्य च सर्वशः ॥ ४९ ॥ प्रणम्य शिरसा देवं पुनः पुनरवन्दत ॥ ततस्तु भगवान्प्रीतस्तस्मै विप्राय शंकरः ॥ ५० ॥ उवाच च वचः साक्षात्तमृषिं वरदः प्रभुः ॥ वरान्वृणीष्व विप्रेन्द्र यानिच्छसि महामुने ॥ ५१ ॥ तांस्ते सर्वान्प्रयच्छामि दुर्लभानपि मारिष ॥ प्रभुत्वममरत्वं वा शक्रत्वमपि वा प्रभो ॥ ५२ ॥ ब्रह्मत्वं लोकपालत्वमपवर्गमथापि वा ॥ अथाष्टगुणमैश्वर्यं गाणपत्यमथापि वा ॥ ५३ ॥ यदिच्छसि मुने शीघ्रं तद्ब्रूहि द्विजपुङ्गव ॥ इत्युक्तोऽसौ भगवता शर्वेण मुनिपुङ्गवः ॥ ५४ ॥ प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना ॥ न प्रभुत्वं न देवत्वं नेन्द्रत्वमपि वा प्रभो ॥ ५५ ॥ ब्रह्मत्वं लोकपालत्वं नापवर्गं वरप्रद ॥ नैवाष्टगुणमैश्वर्यं गाणपत्यं न च प्रभो ॥ ५६ ॥ स्पृहये देवदेवेश प्रसन्ने त्वयि शंकर ॥ यदि प्रीतोऽसि भगवन्नतुकोशतया मम ॥५७॥ अनुग्राह्यो ह्ययं देव त्वयावश्यं सुराधिप ॥ यथान्ये न भवेद्भक्तिस्त्वत्तो नित्यं महेश्वर ॥ ५८ ॥ तथाहं भक्तिमिच्छामि सर्वभूताशये त्वयि ॥ यथा च न भवेद्विघ्नं तपस्यानिरतस्य मे ॥ ५९ ॥ कोटिजप्येन रुद्राणामाराधनपरस्य च ॥ एतत्तु वचनं श्रुत्वा नन्दिनः स महेश्वरः ॥ ६० ॥ प्रहस्योवाच

तं प्रीत्या ततो मधुरया गिरा ॥ प्रीतोऽस्म्युत्तिष्ठ विप्रर्षे तप्यमानेन सुव्रत ॥ ६१ ॥ आराधितश्च भक्त्याहं त्वया शुद्धेन चेतसा ॥ पर्याप्तं
ते महाभाग तपः कर्तुं तपोधन ॥ ६२ ॥ निवर्त्तयति मां वत्स मत्पादाराधने रतः ॥ जता ते त्रिगुणा कोटी रुद्राणां पुरतो मम ॥ ६३ ॥
पूर्णं वर्षसहस्रं च तपस्तीव्रं महामुने ॥ न कृतं यत्पुरा देवैर्नासुरैर्ऋषिभिर्न च ॥ ६४ ॥ कृतं सुमहदाश्चर्यं त्वया कर्म सुदुष्करम् ॥ संक्षोभित
मिदं सर्वं त्रैलोक्यं सचराचरम् ॥ ६५ ॥ आगमिष्यन्ति ते द्रष्टुं देवाः सर्वे सवासवाः ॥ अक्षयश्चाव्ययश्च त्वमतर्क्यः ससुरासुरैः ॥ ६६ ॥
दिव्यतेजोवपूः श्रीमान्दिव्याभरणभूषितः ॥ मत्तुल्यो मत्प्रभावश्च त्वमेकः ससुरासुरैः ॥६७॥ मद्रूपधारी मत्तेजारूपश्चः सर्वगुणोत्तमः ॥ भवि
ष्यसि न सन्देहो देवदानवपूजितः ॥ ६८ ॥ अनेनैव शरीरेण जरामरणवर्जितः ॥ दुष्प्राप्येयमवाप्ता ते देवैर्गीणेश्वरी गतिः ॥ ६९ ॥ पार्षदानां
वरिष्ठस्त्वं मामकानां द्विजोत्तम ॥ नन्दीश्वर इति ख्यातो भविष्यसि न संशयः ॥ ७० ॥ प्राप्तमद्यगुणं सत्यमैश्वर्यं ते तपोधन ॥ द्वितीयां मे
तनुं त्वां तु नमस्यन्ति च देवताः ॥ ७१ ॥ अद्यप्रभृति देवाश्च देवकार्येषु सर्वतः ॥ प्रभुस्त्वं भविता लोके मत्प्रसादान्मुनीश्वर ॥ ७२ ॥
त्वामेवाभ्यर्चयिष्यन्ति सर्वभूतानि सर्वतः ॥ मत्तः समभिवाञ्छन्ति प्रसादं पार्षदाधिप ॥ ७३ ॥ वरान्वरार्थिनां दाता विधाता जगतः सदा ॥
भविष्यसि च धर्मज्ञ भीतानामभयप्रदः ॥ ७४ ॥ यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु ॥ नावयोरन्तरं किंचिदम्बरानिलयो
रिव ॥ ७५ ॥ द्वारे तु दक्षिणे नित्यं त्वया स्थेयं गणाधिप ॥ वामे तु विधुना चापि महाकालेन सर्वदा ॥ ७६॥ प्रतीहारो भवानद्य सर्वदा
विदशोत्तमः ॥ शिरो मे रक्षतु भवान्महाकालोऽपि मे गणः ॥ ७७ ॥ न वज्रेण न दण्डेन न चक्रेण न चाग्निना ॥ कांचिच्छक्नोति वै बाधां
कर्तुं वै भुवनत्रये ॥ ७८ ॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ त्वामेव संश्रयिष्यन्ति मद्भक्ताः पुरुषाश्च ये ॥ ७९ ॥ त्वयि तुष्टे ह्यहं तुष्टः ॥२३२॥
कुपिते कुपितस्त्वहम् ॥ त्वत्तः प्रियतरो नास्ति ममान्यो द्विजपुंगव ॥ ८० ॥ एवं तस्मै वरान्दत्त्वा प्रीतः स्वयमुमापतिः ॥ उवाच भूयः
स्पष्टेन स्वरेणाम्बरचारिणा ॥ ८१ ॥ आगतान्विद्धि सर्वान्वै त्रिदशान्समरुद्गणान् ॥ दिदृक्षया च भद्रं ते कृतकृत्यश्च साम्प्रतम् ॥ ८२ ॥
यदीरितं मया वत्स वरं प्रातिवचस्त्वया ॥ प्रविष्टं न श्रुतिपथं दिवि सर्वदिवौकसाम् ॥ ८३ ॥ नारायणं पुरस्कृत्य सेन्द्रास्ते समरुद्गणाः ॥

प्रेमार्थं चागमिष्यन्ति वरार्थं तपसाऽमराः ॥ ८४ ॥ यक्षविद्याधरगणाः सिद्धगन्धर्वपन्नगाः ॥ मुनयश्च महात्मानस्तपोलब्धाः सहस्रशः ॥८५॥
ते बुद्धा त्वद्गतामृद्धिं प्रतप्ताः परमेष्यया ॥ तपांसि विविधान्यत्र विविधान्नियमांस्तथा ॥ ८६ ॥ चतुं समभिवाञ्छन्ति सदाभ्यासे वरार्थिनः ॥
वरदं यामभिज्ञाय गिरौ मौञ्जवति स्थितम् ॥ ८७ ॥ अत्रैते यावदागम्य न मां पश्यन्ति मानवाः ॥ तावदेव त्वितः शीघ्रं गमिष्यामि महासुने ॥ ८८ ॥ अद्य ते तु मया सर्वे देवा ब्रह्मपुरोगमाः ॥ द्रष्टव्याश्चानुमन्तव्या मत्तोऽनुग्रहकांक्षिणः ॥ ८९ ॥ अभिप्रायं च सर्वेषां जानामि द्विजसत्तम ॥ अनुगृह्य वरैस्तेभ्य तत्रैवान्तरधीयत ॥ ९० ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे गोकर्णेश्वरमाहात्म्ये त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥ पुनः गोकर्णमाहात्म्यनान्दिकेश्वरवरप्रदानवर्णनम् ॥ ब्रह्मोवाच ॥ अन्तर्हिते ततस्तस्मिन्भवे वै भूतनायके ॥ बभूव दिव्यः स तदा नन्दी गणचमूपतिः ॥ १ ॥ चतुर्भुजत्रिणयनो दिव्यसंस्थानसंस्थितः ॥ दिव्यवर्णवपुश्चारुदिव्यागुरुसमान्वितः ॥ २ ॥ त्रिशूली परिघी दण्डी पिनाकी मोञ्जमेखली ॥ शुशुभे तेजसा तत्र द्वितीय इव शंकरः ॥ ३ ॥ आस्थितः पादमाकृष्य ह्याह्वयत्रिव स द्विजः ॥ त्रिभिः क्रमैः क्रांतुमनास्त्रिविक्रम इवोद्यतः ॥ ४ ॥ तं दृष्ट्वा खेचराः सर्वा देवताः परिशंकिताः ॥ आख्यातुं पुरुहूताय सम्भ्रान्ताः प्रययुर्दिवम् ॥ ५ ॥
तेभ्यः श्रुत्वा सहस्राक्षः सर्वे चान्ये दिवौकसः ॥ विषादं परमं गत्वा चिन्तामापेदिरे भृशम् ॥ ६ ॥ अयं कश्चिद्वरं लब्ध्वा ह्युमाकान्तान्महेश्वरात् ॥ अत्युर्जितबलः श्रीमांस्त्रैलोक्यं प्राप्स्यति ध्रुवम् ॥ ७ ॥ यादृशोऽस्य महोत्साहस्तेजोबलसमान्वितः ॥ नूनमेष महासत्त्वो हरेत्स्थानं दिवौकसाम् ॥ ८ ॥ यावच्चैवौजसा नाकमसौ चंक्रमते प्रभुः ॥ प्रसादयामो वरदं तावदेव महेश्वरम् ॥ ९ ॥ एवमुक्त्वा तु ते तत्र मया सह सुरोत्तमाः ॥ गिरेर्मौञ्जवतः शृङ्गमाजग्मुर्दैवनिर्मितम् ॥ १० ॥ विधाता भगवान्विष्णुः प्रभुस्त्रिभुवनेश्वरः ॥ अभ्यर्चायंस्ततः सोऽथ स हि जानाति तद्वृतम् ॥ ११ ॥ कृतेन तेन विबुधाः पश्यन्ति मुनयश्च ते ॥ ततः स भगवान्विष्णुः सहदेवः सधातृकः ॥ १२ ॥ जगाम तत्र यत्रासौ नन्दी तिष्ठति देववत् ॥ नन्व्युवाच ॥ सफलं जीवितं मेऽद्य सफलश्च परिश्रमः ॥ १३ ॥ यन्मे दृष्टः सुराध्यक्षः सर्वलोकगुरुर्हरिः ॥
पर्याप्तं तन्ममाद्येह कृतकृत्योऽस्मि तेन वै ॥१४॥ यच्च मे प्रभुरव्यग्रः प्रीतः पापहरो हरः ॥ विधाय पार्षदत्वं मे वरानिष्टान्ददौ शिवः ॥१५॥

परो मेऽनुग्रहः सोऽत्र पूतोऽस्मि खलु साम्प्रतम् ॥ यच्चोक्तं विधिना वाक्यं देवान्प्रति महात्मना ॥१६॥ मामुद्दिश्य हितं तथ्यं तथैव च न चान्यथा ॥ यन्मां देवर्षयः प्रीत्या समागत्य प्रियंवदाः ॥१७॥ तेनास्मि परमप्रीत आहूतः परमेष्ठिना ॥ देवा ऊचुः ॥ वयं तं वरदं देवं द्रष्टुमास्ते वरप्रदम्॥१८॥ तवेप तपसा तुष्टः स्वयं प्रत्यक्षतामृतः ॥ इत्युक्तवन्तस्ते देवाः पुनरूचुर्द्विजोत्तमम् ॥ १९॥ कुत्र द्रष्टुमहे देवं भगवन्तं कृपालिनम्॥नन्द्युवाच ॥ अनुगृह्य तु मां देवस्तत्रैवादर्शनं गतः ॥२०॥ न जाने कुत्र वा देवं कुत्रास्ते तद्वदेष्यताम्॥सनत्कुमार उवाच ॥ किमाह नन्दिनं देवो येनासौ नोक्तवान्प्रभुम् ॥ २१॥ तन्मे कथय देवेश गुह्यं किं चास्ति शूलिनः ॥ ब्रह्मोवाच ॥ यदुक्तवान्महेशानो नाख्येयोऽस्मि सुरान्प्रति ॥ २२ ॥ किमुक्तवान्महादेवो नन्दिनं तच्छृणुष्व मे ॥ ईश्वर उवाच ॥ अस्ति कश्चित्समुद्देशः क्षितेः सिद्धोऽद्रिसंकटः ॥ २३ ॥ पारे हिमवतः पुण्ये तपोवनगणैर्युतः ॥ तत्र श्लेष्मातको नाम वसते पन्नगोत्तमः ॥ २४ ॥ सोऽनुग्राह्यो मयावश्यं तपसा दग्धकिल्बिषः ॥ तद्भ्याशे च रुचिरं न चासौ वानराश्रयः॥२५॥ तस्य नाम्ना च तत्स्थानं दिव्यं चिरतपोभृतम्॥श्लेष्मातकवनं नाम पुण्यशीलशिलोच्चयम्॥२६॥ मृगरूपेण चरता तत्र वै विदशा मया ॥ द्रष्टव्याः सन्निवृत्तक्षन्तः खिन्नाश्चान्वेषणे मम ॥ २७ ॥ नाख्यातव्यं त्वया तेषां देवतास्मरसामिदम् ॥ अनुगृह्य वरैस्तैश्च तत्रैवान्तरधीयत ॥ २८ ॥ विद्योतयन्दिशः सर्वास्त्रिदशैः परिवारितः ॥ बालकेन्दुनिभं दिव्यमर्चितं दिव्यबिन्दुभिः ॥ २९ ॥ कामगं रथमारुह्य महेन्द्रः समरुद्गणः ॥ आयातः शैलपृष्ठन्तमोजसा पूरयन्त्रिव ॥ ३० ॥ गणावृतश्च वरदो वरुणो यादसांपतिः ॥ वज्रस्फटिकचित्रेण विमानेनातितेजसा ॥ ३१ ॥ ततकाञ्चनवर्णेन रत्नचित्रेण भास्वता ॥ विमानेनागतः शुक्रे द्योतयन्वै धनाधिपः ॥ ३२ ॥ विमानशतकोटीभिरागतो यक्षराक्षसैः ॥ श्रीमद्भिर्बहुभिर्दिव्यैर्विमानैः सूर्यसन्निभैः ॥३३॥ अधिष्ठितः सुकृतिभिः प्रायाद्वेस्वतोपमः ॥ चन्द्रादित्यौ ग्रहाः सर्वे समग्रं त्वृक्षमण्डलम् ॥ ३४ ॥ विमानेरग्नितुल्याभैरागजग्मुः खान्महीधरम् ॥ रुद्रास्त्वेकादशायाताः सूर्या द्वादश चैव तु ॥ ३५ ॥ आगता वश्विनौ देवौ मोत्रवन्तं महागिरिम् ॥ विश्वेदेवाश्च साध्याश्च गुरुश्च तपसान्वितः ॥ ३६ ॥ संछाद्यैरावतपथं सहसाभ्याययुर्द्रुतम् ॥ स्कन्दश्चैव विशाखश्च भगवांश्च विनायकः ॥३७॥ संप्रातस्तं गिरिवरं मयूरशतनादितम् ॥ नारदस्तुम्बुरुश्चैव विश्वावसुपरावसू ॥ ३८ ॥ हाहाहूहूस्तथा

॥२३३॥

चान्ये सर्वे गन्धर्वसत्तमाः ॥ वेहायसेर्यानवरैर्विविधैर्वीसवाज्ञया ॥ ३९ ॥ अनिलश्चानलश्चैव धर्मः सत्यो ध्रुवोऽपरः ॥ देवर्षयश्च सिद्धाश्च यक्षा विद्याधरास्तथा ॥ ४० ॥ गुह्यकाश्च महात्मानः सर्व एव समागताः ॥ गन्धकाली घृताची च बुद्धा गौरी तिलोत्तमा ॥ ४१॥ उर्वशी मेनका रंभा पंचस्था च तथापरा ॥ एताश्चान्याश्च तच्छैलमाजग्मुर्देवयोषितः ॥४२॥ पुलस्त्योऽत्रिर्मरीचिश्च वसिष्ठो भृगुरेव च ॥ कश्यपः पुलहश्चापि विश्वामित्रोऽथ गौतमः ॥४३॥ भारद्वाजोऽग्निवेश्यश्च तथा वृद्धपराशरः ॥ मार्कण्डेयोऽङ्गिरा गर्गः संवर्तः क्रतुरेव च ॥४४ ॥ मरीचिर्जमदग्निश्च भार्गवश्च्यवनस्तथा ॥ नियोगान्मम विष्णोश्च शक्रस्य त्रिदिवस्पतेः ॥४५॥ सिंधुश्च पुरुषश्चैव सरयूश्च महानदी॥ ताम्रारुणा चारुभागा वितस्ता कौशिकी तथा ॥४६॥ पुण्या सरस्वती कोका नर्मदा बाहुदा तथा ॥ शतद्रुश्च विपाशा च गंडकी च सरिद्वरा ॥४७॥ गोदावरी च वेणी च तापी च सरिदुत्तमा ॥ करतोया च शीता च तथा चीरवती नदी ॥४८ ॥ नंदा च परनन्दा च तथा चर्मण्वती नदी ॥ पर्णाशा देविका चैव वितस्ता च तथापरा ॥ ४९ ॥ सिंधुश्च पुरुषश्चैव प्रभासः सोम एव च ॥ लोहितश्चायुस्तत्र गंगासागर एव च ॥ ५० ॥ अन्यानि चापि मेदिन्यां तीर्थायतनानि च ॥ ५१॥ निजस्वरूपेणाजग्मुस्तत्र पुण्यान्यनेकशः ॥ उपागतानि चेन्द्रस्य नियोगादुत्तमं गिरिम् ॥ ५२॥ शैलोत्तमो महामेरुः कैलासो गन्धमादनः ॥ हिमवान्हेमकूटश्च निषधश्च महागिरिः ॥५३॥ विन्ध्यो महेन्द्रः सह्यश्च मलयो दर्दुरस्तथा ॥ माल्यवांश्चित्रकूटश्च तथा द्रोणः शिलोच्चयः ॥ ५४ ॥ श्रीपर्वतो लतावेष्टः पारियात्रश्च शैलराट् ॥ आगताः सर्व एवैते शैलेन्द्राः काननौकसः॥५५॥ सर्वे यज्ञाः सर्वविद्या वेदाश्चत्वार एव च ॥ धर्मः सत्यं दमः स्वर्गः कपिलश्च महानृषिः ॥५६ ॥ वासुकिश्च महाभागश्चानृताशी भुजङ्गराट्॥ज्वलत्फणासहस्रेण अनन्तश्च धराधरः ॥ ५७॥ फणींद्रो धृतराष्ट्रश्च किर्मीराङ्कश्च नागराट् ॥ अंभोधरश्च स श्रीमान्नागराजो महाद्युतिः ॥५८॥अर्बुदो न्यर्बुदबलस्तथा चक्षुःश्रवाधिपः ॥ विद्युज्जिह्वो द्विजेन्द्रश्च शङ्खवर्चा महाद्युतिः ॥५९॥एतावन्त्रिभुवने धीमान्नहुषोऽनिमिषेश्वरः ॥ विरोचनसुतः सत्यः स्फुटोमणि शतोज्ज्वलः ॥ ६० ॥ फणाशतधरो रूपी भूरिशृङ्ग इवाचलः ॥ अस्मिन्मयसंयुक्तः प्रज्ञावान् भुजगेश्वरः ॥ ६१ ॥ विनतो नागराजश्च कम्बलाश्वतरौ तथा ॥ भुजगाधिपतिर्वीर एलापत्रस्तथैव च ॥ ६२ ॥ उरगानामधिपती कर्कोटकधनञ्जयौ ॥ एवमाद्याः समायाता भुजगेन्द्रा

महाबलाः ॥ ६३ ॥ अहोरात्रे तथा पक्षा मासाः संवत्सरास्तथा ॥ द्यौर्मेदिनी दिशश्चैव विदिशश्च समागताः ॥ ६४ ॥ ततश्चैवागतैर्देवैर्ऋषैः
सिद्धैश्च सर्वशः॥अपूर्यत गिरेः शृङ्गे वेला काले यथोदधेः॥६५॥ तस्मिन्देवसमाजे तु रम्ये शैलेन्द्रमूर्द्धनि॥ पुष्पाणि मुमुचुस्तत्र तरवो ह्यनिला
र्दिताः ॥ ६६ ॥ प्रगीता देवगन्धर्वाः प्रनृत्ताप्सरसां गणाः ॥ पक्षिणः संप्रहृष्टाश्च कूजन्ति मधुरं तदा ॥ ६७ ॥ पुण्यगन्धाः सुखस्पर्शास्तत्र
वांति च वायवः ॥ एवमागत्य ते सर्वे देवा विष्णुपुरोगमाः ॥ ६८ ॥ श्रिया ज्वलन्तं ददृशुर्नन्दिनं पुरतः स्थितम् ॥ स च तानागतान्दृष्ट्वा
गन्धर्वाप्सरसां गणान् ॥ ६९ ॥ स हि तान्देवराजेन सार्द्धमन्यैश्च देवतैः ॥ मूर्ध्ना प्रणम्य चरणौ प्राञ्जलिः प्रयतात्मवान् ॥ ७० ॥
सम्भ्रान्तः सहसा तेभ्यो नमस्कर्तुं प्रचक्रमे ॥ नमस्कृत्य च तान् सर्वान् स्वागतानभिभाष्य च ॥ ७१ ॥ अर्घ्यपाद्यादिभिः
शीघ्रमासनैश्च न्यमन्त्रयत् ॥ प्रणिधानेन तस्यार्थं श्रुत्वा तत्प्रतिपूजयेत् ॥ ७२ ॥ आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ॥
साध्या विश्वे सगन्धर्वा गुह्यकाश्च प्रपूजयेत् ॥ ७३ ॥ विश्वावसुर्हाहाहूहू तथा नारदतुम्बुरू ॥ चित्रसेनादयः सर्वे गन्धर्वास्तमपूज
यन् ॥ ७४ ॥ तं वासुकिप्रभृतयः पन्नगेन्द्रा महौजसः ॥ सोम्यमभ्यर्चयन्ति स्म दृष्ट्वा नन्दीश्वरं तथा ॥ ७५ ॥ सिद्धचारणसङ्घाश्च विद्या
श्चाप्सरसाङ्गणाः ॥ सत्कृतं देवदेवेन गणास्तमाभिपूजयन् ॥ ७६ ॥ यक्षाविद्याधराश्चैव ग्रहाः सागरपर्वताः ॥ सिद्धा ब्रह्मर्षयश्चैव गङ्गाद्याः
सरितस्तथा ॥ ७७ ॥ आशिषः प्रददुस्तस्य सर्व एव मुदान्विताः ॥ देवा ऊचुः ॥ स सुप्रीतोऽस्तु ते देवः सदा पशुपतिर्मुने ॥ ७८ ॥ सर्वत्र
चाप्रतिहता गतिश्चास्तु तवानघ ॥ भवान्देवेस्तु वा न स्यादत ऊर्ध्वं द्विजोत्तम ॥ ७९ ॥ निरामयोऽमृतीभूतश्चरिष्यति विभुः सुखी ॥
लोकेषु सप्तसु विभो व्यम्बकेन सहाच्युत ॥ ८० ॥ इत्युक्त्वास्त्रिदशैर्नन्दी पुनस्तान्प्रत्युवाच ह ॥ नन्दिकेश्वर उवाच ॥ यद्भवद्भिः प्रियं सर्वैः
प्रीतिमद्भिः सुरोत्तमैः ॥ ८१ ॥ आशिषाऽनुगृहीतोऽस्मि नियोज्योऽहं सदा हि वः ॥ ब्रूत यूयं किमस्माभिः कर्त्तव्यं भवतामिह ॥ ८२ ॥
आज्ञापयध्वमाज्ञप्तस्तस्माद्विबुधसत्तमाः ॥ तस्य तद्वचनं श्रुत्वा शक्रः प्रोवाच तं तदा ॥ ८३ ॥ शक्र उवाच ॥ कुत्रासौ प्रस्थितो भद्र कुत्र
वा स गतोऽपि वा ॥ पश्यामो विप्र तं सर्वे देवानामधिपं विभुम् ॥ ८४ ॥ स्थाणुमुग्रं शिवं देवं शर्वमेव स्वयं मुने ॥ यदि जानासि भगवा

नीश्वरो यत्र तिष्ठति ॥८५॥ तत्स्थानं न समाख्याहि महर्षे शीघ्रमेव हि ॥ तच्छ्रुत्वा वचनं धीमदीरितं वज्रपाणिना ॥८६॥ प्रत्युवाच ततः शक्रं नन्दी पशुपतिं स्मरन् ॥ नन्दिकेश्वर उवाच ॥ श्रोतुमर्हसि देवेन्द्र यथातत्त्वं दिवस्पते ॥८७॥ अस्मिन्गिरौ मुञ्जवति स्थाणुरभ्यर्चितो मया ॥ प्रीतोऽसौ मां वरैर्दिव्यैरनुगृह्य हरः प्रभुः ॥८८॥प्रीतो विनिर्गत इतस्तं विज्ञातुं विभेम्यहम्॥ यद्याज्ञापयसे देवं चाहं त्वच्छासने स्थितः ॥८९॥ मार्गयामो हि यत्नेन भगवन्तं तु वासव ॥ ९० ॥ इति श्रीवराहपुराणे गोकर्णमाहात्म्ये नन्दिकेश्वरवरप्रदानं नाम चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥ अथ गोकर्णेश्वरजलेश्वरमाहात्म्यवर्णनम् ॥ ब्रह्मोवाच ॥ ततः शक्रः सुरगणैः सह सर्वैः समेत्य च ॥ बुद्धिं चकार गमने मार्गितुं यत्र शङ्करः ॥ १ ॥ तत उत्थाय ते देवाः सर्वे एव शिलोच्चयात् ॥ विहायसा ययुः शीघ्रं तेनैव सह नन्दिना ॥ २ ॥ स्वर्लोकं ब्रह्मलोकं च नागलोकं च सर्वशः ॥ वभ्रमुस्त्रिदशाः सर्वे रुद्रान्वेषणतत्पराः ॥ ३ ॥ खिन्नाः क्लिष्टाश्च सुभृशं न पुनस्तत्पदं विदुः ॥ चतुःसमुद्रपर्यन्तसप्तद्वीपवतीं महीम् ॥ ४ ॥ सशैलकाननोपेतां मार्गयद्भिर्हितं सुरम् ॥ कन्दरेषु महद्रीणां तुङ्गेषु शिखरेषु च ॥ ५ ॥ विततेषु निकुञ्जेषु विहारेषु च सर्वतः ॥ विचिन्वद्भिः क्षितिमिमां तृणं द्विविदलीकृतम् ॥६॥ न प्रवृत्तिः क्वचिदपि शम्भोरासाद्यते सुरैः ॥ यदा निर्विण्णमनसो मार्गमाणाः सुरास्तदा ॥ ७ ॥ न पश्यन्ति शिवं तत्र तदेषां भयमाविशत् ॥ भीतास्ते संविदं कृत्वा सञ्चिन्त्य गुरुलाघवम् ॥ ८ ॥ सम्भूयान्योऽन्यममरा मामेव शरणं ययुः ॥ तमेकाग्रेण मनसा शङ्करं लोकशङ्करम् ॥९॥ उपायमात्रं दृष्टं मे ध्यायंस्तद्वेषभूषणैः ॥ यथा यत्र च सोऽस्माभिर्द्रष्टव्यो वृषभध्वजः ॥ १० ॥ सर्वं त्रैलोक्यमस्माभिर्विचितं वै निरन्तरम् ॥ श्वेष्मातकवनोद्देशं स्थानं मुक्त्वा महीतले ॥ ११ ॥ आगच्छध्वं गमिष्यामस्तमुद्देशं सुरोत्तमाः ॥ इत्येवमुक्त्वा तैः सर्वैस्तामाशां प्रस्थिता वयम् ॥१२॥ तत्क्षणादेव सम्प्राप्ता विमानैः शीघ्रयायिभिः ॥ श्वेष्मातकवनं पुण्यं सिद्धचारणसेवितम् ॥ १३ ॥ तस्मिन्सुरमणीयानि विविधानि शुचीनि च ॥ ध्यानस्थानानि रम्याणि बहूनि गुणवन्ति च ॥ १४ ॥ आश्रामारण्यभागेषु दरीणां विवरेषु च ॥ विभ्राजद्वनराजीका नद्यश्च विमलोदकाः ॥ १५ ॥ सिंहशार्दूलभल्लिषगोलांगूलर्क्षवानरैः ॥ नादितं गजयूथैश्च मृगयूथैश्च तद्वनम् ॥ १६ ॥ प्रमुखे वासवं कृत्वा विविशुस्ते सुरास्तदा ॥ विमुच्य स्थयानानि पाद्भिः सिद्धादिसङ्कटम् ॥ १७ ॥

कन्दरोदरकूटेषु तरूणां गहनेषु च ॥ सर्वदेवमयं रुद्रं मार्गमाणाः शनैः शनैः ॥ १८ ॥ प्राविशन्तश्च ते देवा वनोद्देशे कचिच्छुभे ॥ कदलीवनसंछन्ने कुळपादपशोभिते ॥ १९ ॥ गिरिनद्यास्तु पुलिने हंसकुन्देंदुसन्निभे ॥ गन्धामोदेन पुष्पाणां वासितं मधुगन्धिमत् ॥ २० ॥ मुक्ताचूर्णनिकाशाभिर्वालुकाभिस्ततस्ततः ॥ विक्रीडमानां ददृशुः कन्यां काञ्चिन्मनोरमाम् ॥ २१ ॥ तत्र ते विबुधा दृष्ट्वा सर्वे मां समचोदयन् ॥ आद्योऽहं सर्वदेवानां कथमेतद्ब्रवीदिति ॥ २२॥ मुहूर्तं ध्यानमास्थाय विज्ञाता सा मया तदा ॥ ध्रुवं शैलेन्द्रपुत्रीयमुमा विश्वेश्वरेश्वरी ॥ २३ ॥ ततस्तदुच्चशिखरमारुह्य विबुधेश्वराः ॥ अधो विलोक्य ते सर्वे ददृशुस्तं सुरोत्तमम् ॥ २४ ॥ मध्ये मृगसमूहस्य गोनारमिव संस्थितम् ॥ एकशृंगैकचरणं तप्तहाटकवर्चसम् ॥ २५ ॥ चारुवक्त्राक्षिदशनं पृष्ठतः शुक्लबिन्दुभिः ॥ शुक्लेनोदरभागेन राजतेरुपशोभितम् ॥ २६ ॥ पीनोन्नतकटिस्कन्धं निम्नसंक्षिशिरोधरम् ॥ बिम्बोष्ठं ताम्रजिह्वास्यं दंष्ट्राकुरविराजितम् ॥ २७ ॥ तं दृष्ट्वा विबुधाः सर्वे शिखरात्प्रतिधाविताः ॥ सर्वोद्यमेन तरसा तं मृगेन्द्रं जिघृक्षवः ॥२८॥ शृङ्गाग्रं प्रथमं धृत्वा गृहीत्वा वज्रपाणिना ॥ मध्यं मया तस्य तदा गृहीतं प्रणतात्मना ॥२९॥ जग्राह केशवश्चापि मूलं तस्य महात्मनः ॥ त्रिभिरेवं गृहीतं तु त्रिधा भूतमभज्यत ॥३०॥ शक्रस्याग्रे स्थितं हस्ते मध्ये हस्ते मम स्थितम् ॥ विष्णोर्मूलं स्थितं हस्ते प्रविभक्तं त्रिधागतम् ॥३१॥ शृङ्गस्यैव गृहीतस्य त्रिधास्माकं मृगाधिपः॥विषाणरहितस्तस्य प्रनष्टः पुनरत्र वै ॥३२॥ अन्तर्हितोऽन्तरिक्षस्थः प्रोवाचास्मानुपालभन् ॥ भो भो देवा मया यूयं वंच्यमानानवाप्स्यथ ॥ ३३ ॥ सशरीरोऽहं युष्माभिर्वंशात्तः प्रगतस्त्विवतः ॥ शृङ्गमात्रेण सन्तुष्टा भवन्तस्तेन वञ्चिताः ॥ ३४ ॥ यद्यहं सशरीरः स्यां गृहीत्वा स्थापितोऽभवम् ॥ तदा चतुष्पात्सकलो धर्मः स्यात्प्रतिपादितः ॥३५॥ कामं शृंगाणि मेऽत्रैव श्रेष्ठमात्मकवनेऽमराः ॥ न्यायतः स्थापयिष्यध्वं लोकानुग्रहकाम्यया ॥३६॥ अत्रापि महती व्युष्टिर्भविष्यति न संशयः॥पुण्यक्षेत्रे सुमहति मत्प्रभावानुभाविते॥३७॥यावन्ति भुवि तीर्थानि ह्यासमुद्र सरांसि च॥क्षेत्रेऽस्मिंस्तानि तीर्थानि चागमिष्यन्ति मत्कृते॥३८॥ अहं पुनः शैलपतेः पादे हिमवतः शुभे ॥ नेपालाख्ये समुत्पत्स्ये स्वयमेव महीतलात् ॥३९॥ दीप्ततेजोमयशिराः शरीरं च चतुर्मुखम् ॥ शरीरेश इति ख्यातः सर्वत्र भुवनत्रये ॥ ४० ॥ तत्र नागह्रदे घोरे स्थास्याम्यन्तर्जले ह्यहम् ॥ त्रिंशद्वर्षसहस्राणि

॥२३९॥

सर्वभूतहिते रतः ॥ ४१ ॥ यदा वृष्णिकुलोत्पन्नः कृष्णचक्रेण पर्वतान् ॥ पाटयित्वेन्द्रवचनाद्दानवान्निहनिष्यति ॥ ४२ ॥ तदा स देशो भविता सर्वम्लेच्छैरधिष्ठितः ॥ ततोऽन्ये सूर्यवंशीयाः क्षत्रियास्ताम्निहत्य च ॥ ४३ ॥ वासिष्यंति च तं देशं ब्राह्मणैः संप्रवर्तितान् ॥ धर्मान्संस्थापयिष्यंति राज्यं प्राप्स्यंति शाश्वतम् ॥४४॥ ततो लिङ्गाच्चिह्नं तत्र प्रतिष्ठास्यंति पार्थिवाः॥क्षत्रियाः सूर्यवंशीयाः शून्ये लप्स्यंति मां नृपाः ॥४५॥ ततो जनपदस्तत्र भविष्यति महांस्तदा ॥ स्फीतो ब्राह्मणभूयिष्ठसर्ववर्णाश्रमेर्वृतः ॥ ४६ ॥ सम्यक्प्रवृत्ता राजानो भविष्यन्त्यायतो स्थिताः ॥ एवं सम्यक्स्थिते तस्मिन्देशे पोरजने तथा ॥ ४७ ॥ तत्र मामर्चयिष्यंति सर्वभूतानि सर्वदा ॥ तत्राहं यैः सकृद्दृष्टो विधिवद्भेदितस्तु यैः ॥४८॥ गत्वा शिवपुरं ते मां द्रक्ष्यंते दग्धकिल्बिषाः ॥ उत्तरेण तु गंगाया दक्षिणे चाश्विनीमुखात् ॥ ४९ ॥ क्षेत्रं हि मम तज्ज्ञेयं योजनानि चतुर्दश ॥ हिमाद्रे स्तुङ्गशिखरात्प्रोद्भूता वाग्म (ङ्म) ती नदी ॥ ५० ॥ भागीरथ्याः शतगुणं पवित्रं तज्जलं स्मृतम् ॥ तत्र स्नात्वा हरेर्लोकानुपस्पृश्य दिवस्पतेः ॥५१ ॥ मुक्त्वा देहं नरा यांति मम लोकं न संशयः ॥ अपि दुष्कृतकर्माणः क्षेत्रेऽस्मिन्निवसंति ये ॥ ५२ ॥ नियतं पुरुहूतस्य श्रिताः स्थाने वसंति ते ॥ देवदानवगन्धर्वाः सिद्धविद्याधरोरगाः ॥५३॥ मुनयोऽप्सरसो यक्षा मोहिता मम मायया ॥ तद्धि गुह्यं न जानंति यत्र सन्निहितो ह्यहम् ॥ ५४ ॥ तपस्तपोधनानां च सिद्धक्षेत्रं हि तत्स्मृतम् ॥ प्रभासाच्च प्रयागाच्च नैमिषात्पुष्करादपि ॥ ५५ ॥ कुरुक्षेत्रादपि बुधाः क्षेत्रमेतद्विशिष्यते ॥ श्वशुरो मे स्थितो यत्र हिमवान् भूधरेश्वरः ॥ ५६ ॥ प्रभवन्ति यतः सर्वा गंगाद्याः सरितां वराः ॥ तस्मिन्क्षेत्रवरे पुण्ये पुण्याः सर्वाः सरिद्वराः ॥ ५७ ॥ सर्वे प्रस्रवणाः पुण्याः सर्वे पुण्याः शिलोच्चयाः ॥ आश्रमस्तत्र भविता सिद्धचारणसेवितः ॥५८॥ शैलेश्वर इति ख्यातः शरीरं यत्र मे स्थितम् ॥ स्रवन्तीनां वरा पुण्या वाग्मती पर्वतोत्तमात् ॥ ५९ ॥ भागीरथी वेगवती कलुषं दहते नृणाम् ॥ कीर्त्तनादेव संशुद्धे दर्शनाद्भवनिर्मापस्यति ॥ ६० ॥ पानावगाहनात्तस्यास्तारयेत्सप्त वै कुलान् ॥ लोकपालस्तु चरति तीर्थस्यार्तिं च तत्स्वयम् ॥ ६१ ॥ तत्र स्नात्वा दिवं यान्ति मृतास्ते त्वपुनर्भवाः ॥ स्नात्वा स्नात्वा तु ये तत्र नित्यमभ्यर्चयन्ति माम् ॥ ६२ ॥ उद्धराम्यहमेतान्वै प्रीतः संसारसागरात् ॥ यस्तस्य वारिणा पूर्णमेकं च घटमुद्धरेत् ॥ ६३ ॥ स्नापनार्थं मम शुचिः श्रद्दधानोऽनसूयकः ॥ वेदवेदांगविदुषा

श्रोत्रियेण विशेषतः ॥ ६४ ॥ आहृतस्याग्निहोत्रस्य यत्फलं तस्य तद्भवेत् ॥ तस्यास्तीरे जलोद्भेदं मन्मूलादभिनिःसृतम् ॥ ६५ ॥ मृगशृङ्गोदकं नाम नित्यं मुनिजनप्रियम् ॥ तत्राभिषेकं कुर्वीत उपस्पृश्य समाहितः ॥६६ ॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्यति॥ तीर्थं पंचनदं प्राप्य पुण्यं ब्रह्मर्षिसेवितम् ॥ ६७ ॥ अग्निष्टोमफलं तत्र स्नातमात्रः प्रपद्यते ॥ षष्टिं चेनुसहस्राणि यानि रक्षन्ति वाग्मतिम् ॥ ६८ ॥ न तां पापाः कृतघ्नो वा कदाचित्प्रापुयान्नरः॥शुचयः श्रद्दधानाश्च सत्यसंधाश्च ये नराः ॥६९ ॥ वाग्मत्यां ते नरः स्नान्ति लभन्ते चोत्तमां गतिम् ॥ आर्त्ता भीताश्च सन्तप्ता व्याधितोऽव्याधितोऽपि वा॥७०॥ वाग्मत्याः सलिले स्नात्वा ये मां पश्यन्ति संस्कृताः॥तेषां शान्तिर्भवेन्नित्यं पुरुषाणां न संशयः ॥७१॥ मत्प्रभावात्तु स्नातस्य सर्वं नश्यति किल्बिषम् ॥ईतयः समुदीर्णाश्च प्रशमं यान्ति सर्वशः॥७२॥वाग्मत्याः सलिले स्नात्वा ये मां पश्यन्ति संस्कृताः ॥ वाग्मती सरितां श्रेष्ठा यत्र यत्राऽवगाह्यते ॥७३॥ तत्र तत्र फलं दद्याद्राजसूयाश्वमेधयोः ॥ योजनाभ्यन्तरं क्षेत्रं समन्तात्सर्वतोदिशम् ॥ ७४ ॥ मूलक्षेत्रं तु विज्ञेयं रुद्रेणाधिष्ठितं स्वयम् ॥ तत्र पूर्वोत्तरे पार्श्वे वासुकिर्नाम नागराट् ॥ ७५ ॥ वृतो नागसहस्रैस्तु द्वारि तिष्ठति मे सदा ॥ स विघ्नं कुरुते नृणां तत्क्षेत्रं विशतां सदा ॥ ७६ ॥ प्रथमं स नमस्कार्यस्ततोऽहं तदनन्तरम् ॥ अनेन विधिना पुंसामविघ्नं विशतां भवेत् ॥ ७७ ॥ वन्दते परया भक्त्या यो मां तत्र नरः सदा ॥ पृथिव्यां स भवेद्राजा सर्वलोकनमस्कृतः ॥ ७८ ॥ गन्धैर्माल्यैश्च मे मूर्त्तिमभ्यर्चयति यो नरः ॥ उत्पत्स्यते स देवेषु तुषितेषु न संशयः ॥ ७९ ॥ यस्तु दद्यात्प्रदीपं मे पर्वते श्रद्धयान्वितः ॥ सूर्यप्रभेषु देवेषु तस्योत्पत्तिर्विधीयते ॥ ८० ॥ गीतवादित्रनृत्यैस्तु स्तुतिभिर्जागरेण वा ॥ ये मे कुर्वन्ति सेवां वै मत्संस्थास्ते भवन्ति हि ॥ ८१ ॥ दध्ना क्षीरेण मधुना सर्पिषा सलिलेन वा ॥ स्नापनं ये प्रयच्छन्ति ते तरन्ति जरान्तकौ ॥८२ ॥ यः श्राद्धे भोजनं दद्याद्विप्रेभ्यः श्रद्धयान्वितः ॥ सोऽमृताशी भवेच्चूनं त्रिदिवे सुरपूजितः ॥ ८३ ॥ व्रतोपवासैर्होमैर्वा नैवेद्यैश्चारुभिस्तथा ॥ यजन्ते ब्राह्मणा ये मां परया श्रद्धयान्विताः ॥ ८४ ॥ पञ्चविंशसहस्राणि चोपित्वा दिवि ते ततः ॥ ऐश्वर्यं प्रतिपद्यन्ते मर्त्यलोके पुनः पुनः॥८५॥ ब्राह्मणाः क्षत्रियो वैश्यः शूद्रः स्त्री वापि सङ्गताः ॥ शैलेश्वरं तु तत्स्थानं भक्तितः समुपासते ॥ ८६ ॥ मत्पार्षदास्ते जायन्ते सततं सहिताः सुरैः ॥ शैलेश्वरं परं गुह्यं गतिः शैलेश्वरः परा ॥ शैले

श्वरात्परं क्षेत्रं न क्वचिद्भुवि विद्यते ॥ ८७ ॥ ब्रह्महा गुरुहा गोघ्नः स्पृष्टो वै सर्वपातकैः ॥ क्षेत्रमेतदनुप्राप्य निर्मलो जायते नरः ॥ ८८ ॥ विविधान्यत्र तीर्थानि सन्ति पुण्यानि देवताः ॥ येषान्तोयैर्नरः स्पृष्टः सर्वपापैः प्रमुच्यते ॥८९॥ क्रोशं क्रोशं सुरे रूपं तत्र संहृत्य निर्मितम् ॥ तीर्थं क्रोशोदकं नाम पुण्यं मुनिजनप्रियम्॥९०॥तत्र स्नात्वा शुचिर्दान्तः सत्यसन्धो जितेन्द्रियः॥विमुक्तः किल्बिषैः सर्वैः सर्वमेव फलं लभेत्॥९१॥ अनाशकं व्रजेद्यस्तु दक्षिणेन महात्मनः ॥ शैलेश्वरस्य पुरुषः स गच्छेत्परमां गतिम् ॥९२॥ भृगुप्रपतनं कृत्वा कामक्रोधविवर्जितः ॥ विमानेन दिवं गच्छेद्भृतः सोऽप्सरसाङ्गणैः॥९३॥भृगुमूले परं तीर्थं ब्रह्मणा निर्मितं स्वयम् ॥ब्रह्मोद्रेदेति विख्यातं तस्यापि शृणु यत्फलम्॥९४॥संवत्सरं तु यस्तत्र स्नास्यंस्तु नियतेन्द्रियः॥स ब्रह्मलोके विरजे गच्छेन्नास्त्यत्र संशयः॥९५॥तत्र गोरक्षकं नाम गोवृषः पदक्षिप्तम् ॥ दृष्ट्वा च तानि हि पुमान् गोसहस्रफलं लभेत् ॥९६॥ गौर्यास्तु शिखरं तत्र गच्छेत्सिद्धनिषेवितम् ॥यत्र सन्निहिता नित्यं पार्वती शिखरप्रिया ॥९७॥ लोकमाता भगवती लोकरक्षार्थमुद्यता ॥ तस्याः सालोक्यमायाति दृष्ट्वा स्पृष्ट्वाभिवाद्य च ॥ ९८ ॥ त्यजते पतितुं तस्या अधस्ताद्गाम्मतीतटे ॥ उमालोकं व्रजेदाशु विमानेन विहायसा ॥ ९९ ॥ स्तनकुण्डे उमायास्तु यः स्नायात्खलु मानवः ॥ स्कन्दलोकमवाप्नोति भूत्वा वैश्वानरद्युतिः ॥ १०० ॥ तीर्थं पंचनदं प्राप्य पुण्यं ब्रह्मर्षिसेवितम् ॥ अग्निहोत्रफलं तत्र स्नानमात्रेण लभ्यते ॥ १०१ ॥ नकुलोहेन मतिमान्स्नापयेत्प्रयतात्मवान् ॥ जातिस्मरः स तु भवेत्तिष्यते चास्यमानसम् ॥ १०२ ॥ तस्यैवोत्तरतस्तीर्थमपरं सिद्धसेवितम् ॥ नाम्ना प्रान्तकपानीयं गुह्यं गुह्यकरक्षितम् ॥ १०३ ॥ संवत्सरं यस्तु पूर्णं तत्र स्नायान्नरः सदा ॥ गुह्यकः स भवेदाशु रुद्रस्यानुचरः सुधीः ॥ १०४ ॥ देव्याः शिखरासिन्या ज्ञेयं पूर्वोत्तरेण वै ॥ दक्षिणेन तु वाग्मत्याः प्रसृतं कन्दरोदरात् ॥ १०५ ॥ तीर्थं ब्रह्मोदयं नाम पुण्यं पापप्रणाशनम् ॥ तत्र गत्वा जलं स्पृष्ट्वा स्नात्वा चाभ्युक्ष्य मानवः ॥ १०६ ॥ मृत्युलोकं न पश्येत्स कृच्छ्रेषु च न सीदति ॥ गत्वा सुन्दरिकातीर्थं विधिना तीर्थमादिमम् ॥ १०७ ॥ तत्र स्नात्वा भवेत्तोये रूपवानुत्तमद्युतिः ॥ त्रिसन्ध्यं तत्र गच्छेत्तु पूर्वेण विधिवन्नरः ॥ १०८ ॥ तत्र सन्ध्यामुपास्याथ द्विजो मुच्येत किल्बिषात् ॥ वाग्मत्या मणिवत्याश्च सम्भेदे पापनाशने ॥ १०९ ॥ अहोरात्रं वसेद्यस्तु रुद्रजापी द्विजः शुचिः ॥ स भवेद्रेदवि

द्विद्वान्यज्वा पार्थिवपूजितः ॥ ११० ॥ तारितं च कुलं तेन सर्वं भवति साधुना ॥ वर्णावरोऽपि यः कश्चित्स्नात्वा दद्यात्तिलोदकम् ॥ १११ ॥ तर्पिताः पितरस्तेन भवेयुर्नात्र संशयः ॥ यत्र यत्र च वाम्मत्यां स्नाति वै मानवोत्तमः ॥ ११२ ॥ तिर्यग्योनिं न गच्छेत्तु समुद्रे जायते कुले ॥ वाम्मतीमणिवत्यांश्च संभेदश्चर्षिसेवितः ॥ ११३ ॥ धीमान्गच्छेत्तु विधिना कामक्रोधविवर्जितः ॥ गङ्गाद्वारे तु यत्पोक्तं स्नानपुण्यफलं महत् ॥ ११४ ॥ स्नानस्य तद्दशगुणं भवेदत्र न संशयः ॥ अत्र विद्याधराः सिद्धा गन्धर्वा मुनयः सुराः ॥११५ ॥ स्नानमेतदुपासन्ते यक्षाश्च भुजगेः सह ॥ स्वल्पमप्यत्र यत्किंचिद्विजेभ्यो दीयते धनम् ॥ ११६ ॥ तदक्षयं भवेद्दानुर्दानपुण्यफलं महत् ॥ तस्मात्सर्वप्रयत्नेन करणीयं च देवताः ॥ ११७ ॥ वरिष्ठं क्षेत्रमेतस्मान्नान्यदेव हि विद्यते ॥ तस्मिन् श्रेष्मातकवने पुण्ये त्रिदशसेविते ॥ ११८ ॥ यत्र यत्र मया देवाश्चरता मृगरूपिणा ॥ आसितं स्वपितं यातं विहृतं वा समन्ततः ॥११९॥ तत्र तत्राभवत्सर्वं पुण्यक्षेत्रं च सर्वशः ॥ शृंगमेतद्विधाभूतं सम्यक्संश्रयतां सुराः ॥ १२० ॥ गोकर्णेश्वर इत्येतत्पृथिव्यां ख्यातिमेष्यति ॥ एवं सन्दिश्य विबुधान्देवदेवः सनातनः ॥ १२१ ॥ अदृश्य एव विबुधैः प्रय यावुत्तरां दिशम् ॥ १२२ ॥ इति श्रीवराहपुराणे भगवच्छास्त्रे भगवद्गोकर्णेश्वरमाहात्म्ये जलेश्वरमाहात्म्यवर्णनं नाम पंचदशाधिकद्विशतत मोऽध्यायः ॥२१५॥ अथ गोकर्णशृंगेश्वरादिमाहात्म्यम् ॥ ब्रह्मोवाच ॥ तस्मात्स्थानादपक्रान्ते त्र्यम्बके मृगरूपिणि ॥ अन्योऽन्यं मन्त्रयित्वा तु मया सह सुरोत्तमाः ॥ १ ॥ त्रिधाविभक्तं तच्छृङ्गं पृथक्पृथगवस्थितम् ॥ सम्यक्स्थापयितुं देवा विधिदृष्टेन कर्मणा ॥ २ ॥ स्थापितं देवि नीत्वा वै शृंगाग्रं वज्रपाणिना ॥ मया तत्रैव तन्मध्यं स्थापितं विधिवत्प्रभोः ॥ ३ ॥ देवैर्देवर्षिभिश्चैव सिद्धैर्ब्रह्मर्षिभिस्तथा ॥ गोकर्ण इति विख्यातिः कृता वैशेषिकी वरा ॥ ४ ॥ विष्णुना देवतीर्थेन तन्मूलं स्थापितं ततः ॥ तस्य शृङ्गेश्वर इति नाम तत्राभवन्महत् ॥ ५ ॥ तत्र तत्रैव भगवांस्तस्मिन्शृंगे त्रिधा स्थिते ॥ सान्निध्यं कल्पयामास भागेनैकेन चोन्मनाः ॥ ६ ॥ शतं तेन तु भागानामात्मनो निहितं मृगे ॥ तस्माद्विकं तु भागानां शृंगाणां त्रितये न्यधात् ॥७॥ मार्गेण तच्छरीरेण निर्ययौ भगवान्विभुः ॥ शैशिरस्य गिरेः पादं प्रपेदे स्वयमात्मनः॥८॥ शतसंख्या स्मृता व्युष्टिस्तस्मिंश्छैलेश्वरे विभोः ॥ त्रिधा विभक्ते शृंगेऽस्मिन्नेकाग्रगातीनि प्रभोः ॥ ९ ॥ ततः सुरासुरगुरुर्देवं भूतमहेश्वरम् ॥

तपसोऽग्रेण संसेव्य ववरे विविधान्वरान् ॥ १० ॥ देवेदानवगन्धर्वाः सिद्धयक्षमहोरगाः ॥ श्लेष्मातकवनं कृत्स्नं सर्वतः परिमण्डलम् ॥ ११ ॥
तीर्थयात्रां पुरस्कृत्य प्रादक्षिण्यं च चक्रतुः ॥ फलान्निर्दिश्य तीर्थानां तथा क्षेत्रफलं महत् ॥ १२ ॥ यथास्थानानि ते तस्मान्निवृत्ताश्च सुरा
दयः ॥ एवं तस्मान्निवृत्तेषु देवतेषु तदा ततः ॥ १३ ॥ पौलस्त्यो रावणो नाम भ्रातृभिः सह राक्षसैः ॥ आगम्याग्रेण तपसा देवमाराधय
द्विभुम् ॥ १४ ॥ शुश्रूषया च परया गोकर्णेश्वरमव्ययम् ॥ यदा तु तस्य तुष्टो वै वरदः शंकरः स्वयम् ॥ १५ ॥ तदा त्रैलोक्यविजयं वरं
वव्रे स राक्षसः ॥ प्रसादात्तस्य तत्सर्वं वाञ्छितं मनसा हि यत् ॥ १६ ॥ अवाप्य च दशग्रीवस्तदिष्टं परमेश्वरात् ॥ त्रैलोक्यविजयायाशु
तत्क्षणादेव निर्ययौ ॥ १७ ॥ त्रैलोक्यं स विनिर्जित्य शक्रं च त्रिदशाधिपम् ॥ तदुत्पाट्यानयामास पुत्रेणेन्द्रजिता सह ॥ १८ ॥ शृंगाग्रं
यत्पुरा नीत्वा स्थापितं वज्रपाणिना ॥ तदुत्पाट्यानयामास पुत्रेणेन्द्रजिता सह ॥ १९ ॥ तद्यावद्रावणः स्थाप्य मुहूर्तमुदपेस्तटे ॥ सन्ध्या
मुपासते तत्र लग्नस्तावदसौ भुवि ॥ २० ॥ न शशाक यदा रक्षस्तदुत्पाटयितुं बलात् ॥ वज्रकल्पं समुत्सृज्य तदा लंकां विनिर्ययौ ॥ २१ ॥
स तु दक्षिणगोकर्णो विज्ञेयस्ते महामते ॥ स्वयं प्रतिष्ठितस्तत्र स्वयं भूतपतिः शिवः ॥ २२ ॥ एतत्ते कथितं सर्वं मया विस्तरतो मुने ॥
यथावदुत्तरस्तस्य गोकर्णस्य महात्मनः॥२३॥दक्षिणस्य च विप्रर्षे तथा शृंगेश्वरस्य च॥शैलेश्वरस्य च विभोस्थित्युत्पत्तिर्यथा क्रमम्॥२४॥
व्युष्टिः क्षेत्रस्य महती तीर्थानां च समुद्भवः ॥ प्रोक्तं सर्वं मया वत्स किमन्यच्छ्रोतुमिच्छसि ॥ २५ ॥ इति श्रीवराहपुराणे गोकर्णशृंगेश्वरादीनां
माहात्म्यं नाम षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥ अथ धरणीवराहसंवादफलश्रुतिवर्णनम् ॥ सनत्कुमार उवाच ॥ उक्तं भगवता सर्वं
यथावत्परमेष्ठिना ॥ पृष्टेन संशयं सम्यक्परं कृत्वार्थनिश्चयम् ॥ १ ॥ भगवद्विश्वरूपस्य स्थाणोरप्रतिमौजसः ॥ क्रीडतो लोकनाथस्य
कानने मृगरूपिणः ॥ २ ॥ यथा शरीरं शृङ्गे च पुण्यक्षेत्रे प्रतिष्ठितम् ॥ हिताय जगतस्तत्र तीर्थानि च यथाभवन् ॥ ३ ॥ तन्मे ब्रूहि महा
भाग यथातत्त्वं जगत्पते ॥ ब्रह्मोवाच ॥ पुलस्त्यो वक्ष्यते शेषं यदतोऽन्यन्महामुने ॥ ४ ॥ सर्वेषामेव तीर्थानामेषां फलविनिश्चयम् ॥ कुरु
राज्यं पुरस्कृत्य मुनीनां पुरतो वने ॥ ५ ॥ पुत्रो मे मत्समः सम्यग्वेदवेदांगतत्त्ववित् ॥ यच्छ्रुत्वा पुरुषस्तात विमुक्तः सर्वकिल्बिषैः ॥ ६ ॥

यशस्वी कीर्तिमान्भूत्वा वन्द्यते प्रेत्य चेह च ॥ श्रोतव्यमेतत्सततं चातुर्वर्ण्यैः सुसंयुतैः ॥७॥ मंगल्यं च शिवं चैव धर्मकामार्थसाधकम् ॥
श्रीभूतिजननं पुण्यमायुष्यं विजयावहम् ॥ ८ ॥ धन्यं यशस्यं पापघ्नं स्वस्तिकृच्छान्तिकारकम् ॥ श्रुत्वैवं पुरुषः सम्यङ्न दुर्गतिमवाप्नुयात् ॥ ९ ॥ कीर्तयित्वा व्रजेत्स्वर्गं कल्यमुत्थाय मानवः ॥ सूत उवाच ॥ इत्युक्त्वा भगवान्देवः परमेष्ठी प्रजापतिः ॥ १० ॥ सनत्कुमारं
सन्दिश्य विरराम महायशाः ॥ एतद्वः कथितं सर्वं मया तत्त्वेन सत्तमाः ॥ ११ ॥ वराहभूमिसंवादे सारमुद्धृत्य सत्तमाः ॥ यश्चैव कीर्त्तयेन्नित्यं
शृणुयाद्वापि भक्तितः ॥ १२ ॥ सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ प्रभासे नैमिषारण्ये गंगाद्वारेऽथ पुष्करे ॥१३ ॥ प्रयागे ब्रह्मतीर्थे
च तीर्थे चामरकण्टके ॥ यत्पुण्यफलमाप्नोति तत्कोटिगुणितं भवेत् ॥ १४ ॥ कपिलां द्विजमुख्याय सम्यग्दत्त्वा तु यत्फलम् ॥ प्राप्नोति सकलं
श्रुत्वा चाध्यायं तु न संशयः ॥ १५ ॥ श्रुत्वाऽस्यैव दशाध्यायं शुचिर्भूत्वा समाहितः ॥ अग्नेष्टोमातिरात्राभ्यां फलं प्राप्नोति मानवः ॥१६ ॥
यः पुनः सततं शृण्वन्नैरन्तर्येण बुद्धिमान् ॥ पारयेत्परया भक्त्या तस्यापि शृणु यत्फलम् ॥ १७ ॥ सर्वयज्ञेषु यत्पुण्यं सर्वदानेषु यत्फलम् ॥
सर्वतीर्थाभिषेकेन यत्फलं मुनिभिः स्मृतम् ॥ १८ ॥ तत्प्राप्नोति न सन्देहो वराहवचनं यथा ॥ यदेतत्पारयेद्भक्त्या मम माहात्म्यमुत्तमम् ॥ १९ ॥ अपुत्रस्य भवेत्पुत्रः सपौत्रस्य सुपौत्रकः ॥ यस्येदं लिखितं गेहे तिष्ठेत्संपूज्यते सदा ॥ २० ॥ तस्य नारायणो देवः सन्तुष्टः
स्याद्धि सर्वदा ॥ यश्चैतच्छृणुयाद्भक्त्या नैरन्तर्येण मानवः ॥ २१ ॥ श्रुत्वा तु पूजयेच्छास्त्रं यथा विष्णुं सनातनम् ॥ गन्धपुष्पैस्तथा वस्त्रैर्ब्रा
ह्मणानां च तर्पणैः ॥ २२ ॥ यथाशक्ति नृपो ग्रामैः पूजयेच्च वसुन्धरे॥श्रुत्वा तु पूजयेद्यः पौराणिकं नियतः शुचिः ॥२३ ॥ सर्वपापविनिर्मुक्तो
विष्णुसायुज्यमाप्नुयात्॥२४॥ ॐ॥इति श्रीवराहपुराणे भगवच्छास्त्रे धरणीवराहसंवादे फलश्रुतिर्नाम सप्तदशाधिकद्विशततमोऽध्यायः॥२१७॥

समाप्तमिदं वराहं महापुराणम् ॥

अथ पुराणपठनादिविषयानुक्रमणिकाध्यायः ॥ त्रिःसप्तषट्क्षितिमिते नृपविक्रमस्य काले गते भगवतो हरिबोधनस्य ॥ वीरेश्वरेण सह माधवभट्टनाम्ना काश्यां वराहकथितं लिखितं पुराणम् ॥ १ ॥ वराहस्य पुराणस्य वृत्तान्तान्प्रवक्ष्यामि ॥ आदौ सम्बन्धकथनं वृत्तान्तश्चादिकमेकः ॥ २ ॥ आदिसृष्टिस्ततः प्रोक्ता चरितं दुर्जनस्य च ॥ वृत्तान्तोदेशभागश्च श्राद्धकल्पस्ततः परम् ॥ ३ ॥ आदिवृत्तान्तकथने सरमाख्यानमेव च ॥ महातपोपाख्यानं च अग्न्युत्पत्तिस्ततः परम् ॥ ४ ॥ अश्विनोरपि चोत्पत्तिर्गोर्युत्पत्तिस्तथैव च ॥ विनायकस्य चोत्पत्तिर्नागोत्पत्तिस्तथैव च ॥ ५ ॥ स्कन्दोत्पत्तिश्च भानोश्च उत्पत्तिः समुदाहृता ॥ कामादीनां तथोत्पत्तिः देव्युत्पत्तिस्तथैव च ॥ ६ ॥ धनदस्य तथोत्पत्तिः परापरविनिर्णयः ॥ धर्मोत्पत्तिस्तथोत्पत्ती रुद्रस्य च ततः स्मृता ॥ ७ ॥ सोमोत्पत्तिरहस्यं च क्षितेश्चापि समासतः ॥ उक्तः प्रागिति ह्यश्च व्यापोपाख्यानमेव च ॥ ८ ॥ ततः सत्यतपोपाख्या मत्स्यद्वादशिका तथा ॥ कूर्मद्वादशिका चापि वराहद्वादशी तथा ॥ ९ ॥ नृसिंह द्वादशी चापि वामनद्वादशी तथा ॥ भार्गवद्वादशी चापि श्रीरामद्वादशी तथा ॥ १० ॥ कृष्णद्वादशिका चापि बुद्धद्वादशिका तथा ॥ कल्कि द्वादशिका चापि पद्मनाभस्य द्वादशी ॥ ११ ॥ ततो व्रतं धरण्याश्च गीतागस्त्यस्य चोत्तमा ॥ पशुपालस्य चाख्यानं भर्तृप्रातिव्रतं तथा ॥ १२ ॥ शुभव्रतं धन्यव्रतं कान्तिव्रतमतः स्मृतम् ॥ सौभाग्यव्रतमाख्यातमविघ्नव्रतमेव च ॥ १३ ॥ शान्तिव्रतं कामव्रतमारोग्यव्रतमेव च ॥ पुत्रप्रातिव्रतं शौर्यव्रतं वै सार्वभौमिकम् ॥१४॥ पुराणस्तवनं चैव नारायणेश्वरेण च ॥ रुद्रगीता ततः पुंसां प्रकृतेश्चापि निर्णयः ॥१५॥ ततो भुवनकोशस्य वर्णनं समुदाहृतम् ॥ जम्बूद्वीपस्य मर्यादावर्णनं परिकीर्तितम् ॥१६॥ भारतादिसमुद्देशः सृष्टिसम्भाग एव च ॥ नारदस्य च संवादो महिषेण प्रकीर्तितः ॥ १७ ॥ शक्तिमाहात्म्यकथनं महिषासुरघातनम् ॥ रुद्रमाहात्म्यकथनं पर्वाध्यायस्ततः परम् ॥ १८ ॥ श्वेतोपाख्यानमत्रोक्तं तिलधेनुविधिस्ततः ॥ जलधेनोरसधेनोर्गुडधेनोर्वीर्यं परम् ॥ १९ ॥ ततश्च शर्करायेनोर्मधुधेनोस्ततः परम् ॥ दधिधेनोश्च लवणधेनोः कार्पासधेनुका ॥ २० ॥ धान्यधेनुश्च भगवच्छास्त्रलक्षणमेव च ॥ विष्णोस्तोत्रं ततो नाना प्रश्नाः प्रोक्ता हरिं प्रति ॥ २१ ॥ ततो भागवतानां च लक्षणं परिकीर्तितम् ॥ लक्षणं सुखदुःखानां द्वात्रिंशदपराधकाः ॥ २२ ॥ नानामन्त्रास्ततः प्रोक्ता देवोपकरणे विधिः ॥

भोज्याभोज्यस्य कथनं सन्ध्योपस्थानकारणम् ॥ २३ ॥ वियोगिगर्भमोक्षश्च कोकामुखप्रशंसनम् ॥ भगवच्छास्त्रकथने माहात्म्यं पुष्पग
न्धयोः ॥ २४ ॥ रूपकारणमत्रोक्तं मायाचक्रं ततः परम् ॥ कुब्जाम्रकस्य माहात्म्यं वर्णदीक्षा ततः परम् ॥ २५ ॥ कंकृताञ्जनदर्पाणां मन्त्राः
प्रोक्तास्ततः परम् ॥ राजान्नभक्षणे प्रायश्चित्तं प्रोक्तं ततः परम् ॥ २६ ॥ दन्तकाष्ठाद्यकरणे प्रायश्चित्तं ततः परम् ॥ श्वादिस्पर्शने मन्त्र
त्यागे चोक्तं ततः परम् ॥ २७ ॥ नीलवस्त्रपरिधाने क्रोधयुक्तस्य चार्चने ॥ रक्तवस्त्रपरिधाने अन्धकारे प्रपूजने ॥ २८ ॥ कृष्णवस्त्रपरिधाने
धौतवस्त्रस्य धारणे ॥ क्रोडादिमांसभक्षे च प्रायश्चित्तं प्रकीर्त्तितम्॥२९॥ दीपोच्छिष्टस्य तैलस्य करलेपेन पूजने॥इमशानगमने स्पृष्टपूजने चैव
शोधने ॥ ३० ॥ पिण्याकभक्षणे चैव उपादग्गुडपादके ॥ भगवच्छास्त्रविहितात्करणे शोधने ततः॥३१॥ सूकरक्षेत्रमहिमा ततो जम्बूकगुह्यश्रयोः ॥
खञ्जरीटस्य चाख्यानं पुनः कोकामुखस्य च॥३२॥ बदरीपण्डमाहात्म्यं गुह्यधर्मप्रकीर्तनम् ॥मन्दारगुह्यमहिमा शालग्रामप्रसंशनम् ॥३३॥ सोमे
श्वरस्य महिमा मुक्तिक्षेत्रस्य चापि हि॥त्रिवेण्याश्चैव माहात्म्यं माहात्म्यं गण्डकीभवम् ॥३४॥चक्रतीर्थस्य महिमा हरिक्षेत्रसमुद्भवः ॥ देवहदस्य
चाख्यानं रुरुक्षेत्रस्य चापि हि ॥ ३५ ॥ गोनिष्क्रमस्य महिमा द्वारवत्यास्ततः परम् ॥ तत्रत्यतीर्थमाहिमा लोहार्गलमतः परम् ॥ ३६ ॥ मथुराती
र्थमाहात्म्यं प्रादुर्भावस्तथैव च ॥ यमुनातीर्थमाहात्म्यमक्रूरस्य च तीर्थकम् ॥ ३७ ॥ देवारण्यस्य माहात्म्यं चक्रतीर्थस्य चोत्तमम् ॥
कपिलस्यापि महिमा तथा गोवर्द्धनस्य च ॥ ३८ ॥ तथा आख्यायिकायुक्तं विश्रान्तेश्च ततः परम् ॥ गोकर्णस्य च माहात्म्यं सरस्वत्या
स्तथैव च ॥ ३९ ॥ यमुनोद्भेदमहिमा कालिञ्जरसमुद्भवाः॥गंगोद्भेदस्य महिमा शापः स्यम्बस्य वै तथा ॥ ४०॥ मधुकप्रतिमायाश्च स्थापनं
संप्रकीर्तितम् ॥ शैलाच्चाः स्थापनं चापि मृन्मयार्चास्थितिस्तथा ॥ ४१ ॥ ताम्रार्चास्थापनं चापि कांस्यार्चास्थापनं तथा ॥ रौप्यर्चास्थापनं
चाथ सौवर्णप्रतिमास्थितिः ॥४२॥ श्राद्धोत्पत्तिस्ततः प्रोक्तं पिण्डं संकल्प एव च ।. पिण्डोत्पत्तिस्ततः प्रोक्ता पितृयज्ञविनिर्णयः ॥ ४३ ॥
मधुपर्ककृफलं दाने संसारचक्रवर्णनम् ॥ दुष्कृत्यकरणं चैव सुखवर्णनमेव च ॥ ४४ ॥ कृतान्तदूतकथनं यातनारूपमेव च ॥ वर्णनं नरकाणां
च किंकराणां च वर्णनम् ॥ ४५ ॥ तथा कर्मविपाकं च यादृशं कर्म तादृशम् ॥ पापकृत्यस्य कथनं दूतप्रेषणकर्म च ॥ ४६ ॥ शुभाशुभस्य

कथनं शुभकर्मफलोदयम् ॥ लोभनं पुरुषस्यापि निमेरारुयानमद्भुतम् ॥ ४७ ॥ पापनाशकथां दिव्यां गोकर्णेशसमुद्भवम्॥ नन्दिनो वरदानं च जलशैलेशयोस्तथा ॥ ४८ ॥ शृंगेश्वरस्य महिमा चैवं वृत्तान्तसंग्रहः ॥ एतच्छ्रुत्वामुयान्मर्त्यो वाराहश्रुतिजं फलम् ॥ ४९ ॥ इत्यनुक्रमणिका नाम अष्टादशाधिकद्विशततमोऽध्यायः ॥ १२८ ॥ समाप्तं वाराहं महापुराणं शुभम् ॥ यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ १ ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज–गंगाविष्णोः अध्यक्ष "लक्ष्मीवेङ्कटेश्वर" मुद्रणालये मैनेजर पं० शिवदुलारे वाजपेयीत्यनेन स्वाम्यर्थमाङ्कितं प्रकाशितं च। संवत् १९८०. शकाब्दाः १८४५,

पुस्तक मिलनेका ठिकाना–

गंगाविष्णु श्रीकृष्णदास,	खेमराज श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" प्रेस–कल्याण	"श्रीवेङ्कटेश्वर" प्रेस–मुंबई.

क्रय्यपुस्तकोंकी संक्षिप्त-सूची.

पुस्तकोंका नाम.	की. रु. आ.
श्रीमहाभारत-सटीक अतिउत्तम बडे अक्षरका मजबूत कागज गणपतकृ० छापेका अनुक्रमणिका सहित ...	६०-०
महाभारत छोटाअक्षर हलका कागज	२५-०
पद्मपुराण सम्पूर्ण (५५०००) ग्रंथ बहुतपुस्तकोंके द्वारा शुद्ध होकर छपा तयार है	२०-०
हरिवंशपुराण सटीक	१०-०
" भाषाटीका समेत	१६-०
" केवल भाषावार्त्तिक जिल्दबँधा ...	७-०

पुस्तकोंका नाम.	की. रु. आ.
श्रीवाल्मीकीयरामायण संस्कृत मूल और अत्युत्तम भाषाटीका माहात्म्य और अनुक्रमणिका सहित मोटा कागज सुंदर अक्षर	३०-०
वाल्मीकीयरामायण केवलभाषा दो जिल्दोंमें ...	१५-०
श्रीमद्वाल्मीकीय रामायण तनिश्लोकी रामानुजी भूषण संस्कृत टीकासहित	३०-०
वाल्मीकीयरामायण रामाभिरामीटीका	१५-०
श्रीवाल्मीयरामायण सुंदरकांड मूल बडा ...	२-८

पुस्तकें मिलनेका ठिकाना-

गंगाविष्णु श्रीकृष्णदास, " लक्ष्मीवेङ्कटेश्वर " छापाखाना कल्याण-मुंबई.
और खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर " स्टीम् प्रेस-मुंबई.



Z.01.239.107

वराह भगवान्
पृथ्वी

अत्रेयमभ्यर्थना.

"लक्ष्मीवेङ्कटेश्वर" (स्टीम्) यन्त्रालयकी परमोपयोगी स्वच्छ शुद्ध और सस्ती पुस्तकें।

यह विषय आज २५।३० वर्षसे अधिक हुआ भारतवर्षमें नगर २ गाँव २ प्रसिद्ध है कि, इस यन्त्रालयकी छपी हुई पुस्तकें सर्वोत्तम और सुन्दर प्रतीत तथा प्रमाणित हुई हैं सो इस यन्त्रालयमें प्रत्येक विषयकी पुस्तकें जैसेः—वैदिक, वेदान्त, पुराण, धर्मशास्त्र, व्याकरण, न्याय, मीमांसा, योगमार्ग, छन्द, ज्योतिष, काव्य, अलंकार, चम्पू, नाटक, कोष, वैद्यक, साम्प्रदायिक तथा स्तोत्रादि संस्कृत और हिन्दी भाषाके प्रत्येक अवसरपर विक्रीके अर्थ तैयार रहतेहैं। शुद्धता स्वच्छता तथा कागजकी उत्तमता और जिल्दकी बँधाई देशभरमें विख्यात है । इतनी उत्तमता होनेपरभी दाम बहुतही सस्ते रक्खे गये हैं और कमीशनभी पृथक् काट दियाजाता है। ऐसी सरलता पाठकोंको मिलना असंभव है, संस्कृत तथा हिन्दीके रसिकोंको अवश्य अपनी २ आवश्यकतानुसार पुस्तकोंके मँगानेमें त्रुटि न करना चाहिये ऐसा उत्तम, सस्ता और शुद्ध माल दूसरी जगह मिलना असम्भव है.) ॥ डाक खर्चके लिये भेजकर विना मूल्य "सूचीपत्र" मँगादेखो ॥

पुस्तकें मिलनेका ठिकाना—

मंगाविष्णु श्रीकृष्णदास, " लक्ष्मीवेङ्कटेश्वर " छापाखाना कल्याण–मुंबई.

और खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर " स्टीम् प्रेस–मुंबई.

॥ इति श्रीमद्वाराहमहापुराणं समाप्तम् ॥

BL1140
.4
.V37
1983
Orient
Sanskrit
Coll.